नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान्।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम्॥

मध्यसिद्धान्तकौमुदी

डॉ० सुरेशचन्द्र शर्मा

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

185

◆

श्रीवरदराजाचार्यविरचिता

मध्यसिद्धान्तकौमुदी

'सुबोधिनी'-संस्कृत-हिन्दीव्याख्याद्वयोपेता

(सम्पूर्ण)

व्याख्याकार

डॉ. सुरेशचन्द्र शर्मा

व्याकरणाचार्य, एम.ए., पी-एच्.डी.

चौखम्बा सुरभारती प्रकाशन

वाराणसी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129, वाराणसी 221001
दूरभाष : 2335263
ई-मेल : csp_naveen@yahoo.co.in

© सर्वाधिकार प्रकाशकाधीन

संस्करण 2012
मूल्य : 600.00

अन्य प्राप्तिस्थान

चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069, वाराणसी 221001

❖

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113, दिल्ली 110007

❖

चौखम्बा पब्लिशिंग हाउस
4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : 32996391; 23286537
ई-मेल : chaukhamba_neeraj@yahoo.com

THE
CHAUKHAMBA SURBHARATI GRANTHAMALA
185

MADHYASIDDHĀNTA-KAUMUDĪ

OF

ŚRĪ VARADARĀJĀCĀRYA

(Part I : Avyayaprakaranānta)

Edited with
ubodhini'-Sanskrit & Hindi Commentaries

By
Shri Suresh Chandra Sharma
Vyakaranacharya, M. A., Ph. D.

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

© CHAUKHAMBA SURBHARATI PRAKASHAN
(*Oriental Publishers & Distributors*)
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
VARANASI 221001
Telephone : 57214

Also can be had of
CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U. A. Bungalow Road, Jawaharnagar
Post Box No. 2113
DELHI 110007
Telephone : 236391

*

Sole Distributors
CHOWKHAMBA VIDYABHAWAN
CHOWK (Behind The Benares State Bank Building)
Post Box No. 1069
VARANASI 221001
Telephone : 63076

निवेदनम्

विदितमेव तत्रभवतां श्रीमतां यत्संस्कृतवाङ्मयज्ञानाय व्याकरणमेव मुख्यं साधनम्। ऐन्द्रचान्द्रादिषु नैकेषु व्याकरणेषु सत्स्वपि सर्वत्राधुना पाणिनीयव्याकरणमेव प्रचलति। तच्च व्याकरणं लक्ष्यलक्षणात्मकम्। तत्र शब्दो हि लक्ष्यः, लक्षणन्तु सूत्रम्। अनयोः सम्यग्ज्ञानार्थं पाणिनीयाष्टाध्याय्या अध्ययनं परमावश्यकम्। अतः 'अष्टाध्यायी'ति ग्रन्थस्य गूढाभिप्रायं ज्ञातुं काशिकादिवृत्तिग्रन्थानां पठनपाठनयोः परम्परा प्रचलिता। परिवर्तनशीलेऽस्मिन् युगेऽध्ययनाध्यापनविधावपि परिवर्तनं स्वाभाविकमेव। अत एव सरलरीत्या व्याकरणशास्त्रज्ञानाय अष्टाध्यायीक्रमस्थकाठिन्यनिवारणाय च प्रक्रियाक्रमस्यारम्भो जातः। रूपावतारादुद्गतेयं प्रक्रियापरम्परा रूपमालया प्रक्रियाकौमुद्या च पल्लविता, सिद्धान्तकौमुद्या च पुष्पिता तत्रैव पर्यवसिताऽपि। श्रीमद्भट्टोजिदीक्षितविदुषा विरचिता वैयाकरणसिद्धान्तकौमुदी प्रौढा पाण्डित्यपरिपूर्णा च वर्तते। अतः सकुमारमतीनां बालानां प्रवेशोऽत्र दुष्कर इति विचार्य तच्छिष्येण पण्डितप्रवरेण वरदराजाचार्येण प्राथमिकाध्येतॄणां बालानामनायासेन बुद्धिप्रवेशलाभाय लघुसिद्धान्तकौमुदी, लब्धकिञ्चित्प्रवेशानां माध्यमिकानाञ्च बालानां व्याकरणशास्त्रबोधसम्पत्तये मध्यसिद्धान्तकौमुदी विरचिता।

सेयं मध्यसिद्धान्तकौमुदी स्वल्पेन कालेन बहुबोधाधायनीति विदन्त्येव विद्वांसः। ग्रन्थस्यास्य परमोपादेयतामभिलक्ष्य कैश्चिद्विश्वविद्यालयैः माध्यमिककक्षासु विनिर्धारितोऽयं ग्रन्थः। यद्यप्यद्यत्वे मध्यसिद्धान्तकौमुद्याः संस्कृतहिन्दीव्याख्योपेतानि नैकानि संस्करणानि प्रकाशितानि सन्ति। परं 'विद्यार्थिजनोपयोगि सरलटीकोपेतं किञ्चित्संस्करणं नैव समुपलभ्यते' इत्यभावमनुभवता चौखम्बासुरभारतीप्रकाशनाध्यक्षस्याग्रहवशंवदेन छात्रहितैषिणा मया 'सुबोधिनी'ति संस्कृत-हिन्दीव्याख्योपेतायाः मध्यसिद्धान्तकौमुद्याः प्रथमो भागः प्रकाश्यते। कार्येऽस्मिन् व्याकरण-साहित्य-वेदान्ताद्यनेकशास्त्रमर्मविदुषां व्याकरणविभागाध्यक्षाणां पूज्यगुरुवर्याणां श्रीमतां केशवदेवतिवारीमहाभागानां हार्दिकीमधमर्णतामावहामि, यैरत्यन्तवात्सल्यभावेन पदे पदे काठिन्यं निरस्यास्माकं साहाय्यं कृतम्। अत्र कियत्साफल्यमधिगतं मयेत्यत्र तु विद्वांसः प्रेक्षका एव प्रमाणम्। प्रमादेनात्र काश्चन त्रुटयः स्युस्ताः संशोध्य विद्वद्भिः सूचनीयोऽप्ययं जन इति शम्।

विदुषामाश्रवः —

सुरेशचन्द्र शर्मा

भूमिका

संस्कृत भाषा भारत की ही नहीं, अपितु विश्व की प्राचीनतम भाषा है । सभ्यता के उषाकाल में इस भाषा का उदय हुआ और सर्वप्रथम भारत को ही इस उदय के दर्शन का श्रेय प्राप्त हुआ । 'वेद संसार के प्राचीनतम ग्रन्थ हैं' यह सभी विद्वानों और ऐतिह्यविदों ने स्वीकार किया है ।

किसी भी भाषा की सुरक्षा और उसका मौलिक ज्ञान उसके व्याकरण में निहित होता है । बिना व्याकरण के भाषा प्रायः विश्रृंखल और अपूर्ण रहती है । संस्कृत-वाङ्मय में व्याकरणशास्त्र का विशिष्ट स्थान है । 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम् ।' अर्थात् जिससे साधु शब्दों का ज्ञान होता है, उसे **'व्याकरण'** की संज्ञा से अभिहित किया जाता है । महाभाष्यकार ने इसी को **'शब्दानुशासन'**[1] भी कहा है । शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष—इन षडङ्गों में व्याकरण वेद का मुख रूप प्रधान अङ्ग माना जाता है । जैसा कि पाणिनीय शिक्षा में कहा गया है—

'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥'[2]

भगवान् पतञ्जलि ने भी कहा है—**'प्रधानं च षडङ्गेषु व्याकरणम् ।'**[3]

व्याकरण-वाङ्मय में ऐन्द्र व्याकरण सबसे प्राचीन है । शब्दोपदेश के लिए प्रकृति-प्रत्यय विभाग की कल्पना सर्वप्रथम सुरगुरु बृहस्पति के शिष्य इन्द्र ने की थी । देवराज इन्द्र से लेकर महर्षि पाणिनि पर्यन्त[4] अनेक आचार्यों ने व्याकरणशास्त्र का निर्माण किया था, परन्तु आज पाणिनीय व्याकरण ही सर्वाङ्ग परिपूर्ण उपलब्ध होता है । यद्यपि यह संस्कृत के प्राचीन आर्ष

---

१. 'अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनम्, शब्दानामनुशासनं शब्दानुशासनं सूत्रवार्तिकभाष्यव्याख्यानादिरूपं शास्त्रम् ।'

२. पाणिनीय शिक्षा (४१, ४२) ।

३. महाभाष्यम् (पस्पशाह्निकम्) ।

४. बोपदेव ने इन्द्र आदि आठ वैयाकरणों का उल्लेख किया है—

'इन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः ॥' (कविकल्पद्रुमः)

व्याकरणों में सबसे अन्तिम और संक्षिप्ततम है; तथापि लौकिक और वैदिक दोनों प्रकार के संस्कृत-वाङ्मय को आलोकित करने वाला एक महान् प्रकाश-स्तम्भ है। विश्व की किसी भी भाषा का व्याकरण इतना सरल और परिष्कृत नहीं बन सका है। संसार के सभी विद्वानों ने इसकी वैज्ञानिकता की मुक्तकण्ठ से प्रशंसा की है। पाणिनीय व्याकरण का मूलग्रन्थ भगवान् पाणिनि की 'अष्टाध्यायी' है। इसमें ३९९५ सूत्र हैं।[1] इस अष्टाध्यायी के माध्यम से उन्होंने संस्कृत भाषा के परिष्कृत रूप को स्थायित्व प्रदान किया। कालान्तर में महर्षि कात्यायन ने 'अष्टाध्यायी' की समीक्षा करते हुए उसके पूरक के रूप में वार्तिकग्रन्थ की रचना की। सूत्र तथा वार्तिकों के पारस्परिक समन्वय को समझाने के लिए शेषावतार भगवान् पतञ्जलि ने विशद विवरणात्मक ग्रन्थ 'महाभाष्यम्' की रचना की। उन्होंने पूर्ववर्ती दोनों आचार्यों की रचनाओं में सत्यान्वेषण किया और सिद्धान्ततः निष्कर्ष प्रस्तुत किया, जिससे विद्वानों ने उनके सिद्धान्तों को विशेष मान्यता प्रदान की—'यथोत्तरं मुनीनां प्रामाण्यम्।' इस प्रकार सूत्रकार 'पाणिनि', वार्तिककार 'कात्यायन' और भाष्यकार 'पतञ्जलि' ये तीनों आचार्य व्याकरण के 'त्रिमुनि' कहलाते हैं।

पाणिनि

महर्षि पाणिनि के जन्मस्थान, जन्मकाल आदि के विषय में इतिहासकार एकमत नहीं हैं। 'त्रिकाण्डशेष' कोष में पाणिनि के छह नामों का उल्लेख मिलता है। पाणिन, आहिक, दाक्षीपुत्र, शालङ्कि, पाणिनि और शालातुरीय। इन नामों द्वारा इनके गोत्र, माता-पिता तथा देश का निर्णय किया जा सकता है। इनमें पाणिन और पाणिनि दोनों नाम गोत्र-व्यपदेशज हैं। कुछ विद्वानों का मत है कि 'आहिक' इनका मूल नाम है। इनकी माता का नाम दाक्षी था, अतः इनका एक नाम दाक्षीपुत्र भी है। महाभाष्यकार पतञ्जलि का कथन है—'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः।' कुछ गवेषकों के अनुसार इनके पिता का नाम शलङ्क था। अतः इनको 'शालङ्कि' कहा गया। 'शालातुरीय' नाम इनके जन्मप्रदेश को स्पष्ट करता है। 'गणरत्नमहोदधि' नामक ग्रन्थ में 'शालातुरीय' की व्युत्पत्ति इस प्रकार की गई है—**'शलातुरो नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्रभवान् पाणिनिः।'** इससे स्पष्ट होता है कि पाणिनि का जन्मस्थान 'शलातुर' नामक ग्राम ही है, जो वर्तमान

---

[1] 'चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह॥'
(स्वरसिद्धान्तचन्द्रिका, श्लो० १५)

में 'लाहौर' नाम से प्रसिद्ध है और पाकिस्तान का विशाल नगर है। इनकी प्रारम्भिक शिक्षा सम्भवतः तक्षशिला में हुई थी, पश्चात् अपने ज्ञान की अभिवृद्धि के लिए यह अन्यत्र चले गये। इनके गुरु का नाम उपवर्षाचार्य था, जो नालन्दा विश्वविद्यालय के सुप्रसिद्ध आचार्य कहे जाते थे। इन्होंने अपने अध्ययन काल में ही कठिन तपस्या करके आशुतोष भगवान् शङ्कर को प्रसन्न किया और उनके उपदेश से 'अष्टाध्यायी' नामक व्याकरणशास्त्र की रचना की। महर्षि पाणिनि की वन्दना में आचार्यों ने कहा भी है—

'येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥'

महर्षि पाणिनि के काल के सम्बन्ध में इतिहासकारों के भिन्न-भिन्न मत हैं। अष्टाध्यायी के 'कुमारः श्रमणादिभिः' (२।१।७०) सूत्र में 'श्रमण' पद प्रयुक्त हुआ है। इससे आलोचक पाणिनि को बुद्धकालीन अथवा तत्पश्चात्कालीन सिद्ध करते हैं। इसी प्रकार कुछ विद्वान् 'इन्द्रवरुण०' (४।१।४९) सूत्र में 'यवन' पद को देखकर इन्हें 'सिकन्दर' के समकालीन स्वीकार करते हैं। परन्तु यह नितान्त भ्रमपूर्ण है। क्योंकि वैदिक ब्राह्मणग्रन्थों में भी श्रमण पद का उल्लेख मिलता है।[1] इसी प्रकार सिकन्दर के भारतागमन से भारतीय लोग यवनों से परिचित हुए। यह भी भ्रम ही है, क्योंकि महाभारत में यवन सैनिकों के द्वारा युद्ध करने का प्रसङ्ग है।

पं० युधिष्ठिर मीमांसक का मत है कि पाणिनि विक्रम से २८०० वर्ष पूर्व हुए हैं। किन्तु भाण्डारकर और गोल्डस्टुकर ने पाणिनि का समय ५०० ई० पू० से पहले निश्चित किया है। इसी प्रकार भारतीय और पाश्चात्य मतों पर सम्यग् विचार करने के उपरान्त डॉ० वासुदेव शरण अग्रवाल ने पाणिनि का समय ५०० ई० पू० निश्चित किया है।[2]

कात्यायन

पाणिनि की 'अष्टाध्यायी' पर आवश्यकतानुसार अनेक आचार्यों ने वार्तिकग्रन्थ लिखे थे। उनमें महामुनि कात्यायन का प्रमुख स्थान है। पाणिनीय व्याकरण को सम्पूर्ण एवं समृद्ध बनाने के लिए कात्यायन का विशेष महत्त्व

---

[1] 'अत्र पिता अपिता भवति, माता अमाता, लोका अलोकाः, देवा अदेवाः, श्रमणोऽश्रमणः, तापसोऽतापसः।'

(शतपथब्राह्मण)

[2] द्रष्टव्य—श्रीवासुदेवशरण अग्रवाल : 'पाणिनिकालीन भारतवर्ष'। (पृ० ४७०–४८०)

है। पाणिनि और कात्यायन समकालीन और सतीर्थ्य थे। इनका कात्यायन नाम गोत्रज है। आपका मूल नाम 'वररुचि' था। महाभाष्य के प्रथमाह्निक में 'यथा लौकिकवैदिकेषु' इस वार्तिक पर 'प्रियतद्धिता दाक्षिणात्याः, यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते।' इस पतञ्जलि-वचन से विदित होता है कि ये दाक्षिणात्य थे। ये केवल वार्तिककार ही नहीं अपितु महाकवि भी थे। इनके 'स्वर्गारोहण' नामक काव्य की प्रशंसा अनेक ग्रन्थों में है। यथा—

'यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।
काव्येन रुचिरेणैव ख्यातो वररुचिः कविः॥'

महाभाष्यकार पतञ्जलि

इस समय पाणिनीय व्याकरण पर पतञ्जलि-विरचित एक ही भाष्य ग्रन्थ उपलब्ध होता है। यह विशालकाय होने से महाभाष्य के नाम से प्रसिद्ध है। भाष्य का तात्पर्य निम्नाङ्कित है—

'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥'

महामुनि पतञ्जलि एवं उनके महाभाष्य की सभी विद्वानों ने मुक्तकण्ठ से प्रशंसा की है। उनका महाभाष्य न केवल व्याकरणशास्त्र का ही प्रामाणिक ग्रन्थ है, अपितु अनेक विषयों का आकर ग्रन्थ है। इस ग्रन्थ की भाषा यद्यपि अत्यन्त सरल है, तथापि कहीं-कहीं भाव-गाम्भीर्य अत्यधिक है।

भगवान् पतञ्जलि ने मनोवाक्कायदोषनिरसनार्थ 'योगसूत्र', 'महाभाष्य' और 'चरकसंहिता' इन तीन विश्वप्रसिद्ध ग्रन्थों की रचना की, जैसा कि किसी विद्वान् ने भगवान् पतञ्जलि की स्तुति करते हुए कहा है—

'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥'

महाभाष्यकार पतञ्जलि ने अपने परिचय के विषय में कुछ नहीं लिखा है। किन्तु 'महाभाष्य' में कुछ स्थलों पर 'गोर्नदीयस्त्वाह' तथा 'गोणिकापुत्रः' लिखा गया है। इससे ज्ञात होता है कि यह गोर्नद प्रदेश के निवासी थे। यह गोर्नद प्रदेश कहाँ है? इस पर आधुनिक विद्वान् गोण्डा जनपद को ही गोर्नद मानते हैं। इनके महाभाष्य में 'पुष्यमित्रो यजते, इह पुष्यमित्रं याजयामः' इत्यादि प्रयोग मिलते हैं। इससे प्रतीत होता है कि ये राजा पुष्यमित्र के समकालिक थे। पुष्यमित्र का समय ईसा की द्वितीय शताब्दी निश्चित किया गया है। भारतीय पौराणिक गणना के आधार पर पं० युधिष्ठिर जी मीमांसक ने पतञ्जलि का समय विक्रम से १२०० वर्ष पूर्व निश्चित किया है।

पाणिनीय व्याकरण के ये तीनों आचार्य 'त्रिमुनि' के नाम से प्रसिद्ध हैं। आशुतोष भगवान् शंकर के डमरू से पाणिनि के चतुर्दशसूत्र प्राप्त हुए और उन्हीं सूत्रों के आधार पर उन्होंने अष्टाध्यायी की रचना की। उसकी पूर्ति के लिए कात्यायन ने वार्तिकों की रचना की और भगवान् शेषावतार पतञ्जलि ने जिज्ञासु विद्यार्थियों और मनीषियों के हितार्थ 'महाभाष्य' का प्रवचन किया। ये तीनों व्याकरणशास्त्र के प्रवर्तक है।

अष्टाध्यायी के टीकाकार

पाणिनीय व्याकरण के मूल ग्रन्थ 'अष्टाध्यायी' पर अनेक वृत्तिग्रन्थ लिखे गये। वृत्तिकारों में श्वोभूति, व्याडि, कुणि, माथुर, वररुचि आदि प्रमुख हैं। परन्तु इस समय उपलब्ध वृत्तिग्रन्थों में वामन और जयादित्य द्वारा विरचित 'काशिकावृत्ति' अत्यन्त सराहनीय है। इसका निर्माणकाल विद्वानों ने वि० सं० ६५०-७०० के मध्य स्वीकार किया है।

इस प्रकार अध्येता को सर्वप्रथम सम्पूर्ण 'अष्टाध्यायी' कण्ठस्थ करके प्रयोग के लिए 'काशिका' का अध्ययन करना होता था। अनन्तर विशेषज्ञानार्थ महाभाष्य पढ़कर ही विशिष्ट पाण्डित्य प्राप्त होता था।

प्रक्रिया-क्रम

प्रौढ एवं विशेष परिश्रम न करने वाले विद्यार्थियों को उक्त प्रणाली में कष्ट और गौरव का अनुभव होने लगा था। अतः सरलरीति से व्याकरणशास्त्र के ज्ञान के लिए तथा अष्टाध्यायी-क्रमस्थ कठिनाई को दूर करने के लिए सर्वप्रथम बौद्धमतावलम्बी धर्मकीर्ति ने वि० सं० १३०० में 'रूपावतार' नामक प्रक्रिया-ग्रन्थ की रचना की। पश्चात् विमलसरस्वती ने 'रूपमाला' और पं० रामचन्द्राचार्य ने 'प्रक्रियाकौमुदी' की रचना की। किन्तु इन प्रक्रिया-ग्रन्थों में अष्टाध्यायी के समस्त सूत्रों का सन्निवेश नहीं था। इस न्यूनता की पूर्ति के लिए म० म० श्रीभट्टोजि दीक्षित ने 'वैयाकरण सिद्धान्तकौमुदी' की रचना की। विद्वानों ने भट्टोजि दीक्षित का समय वि० सं० १५०० से १५७५ के मध्य स्वीकार किया है। उक्त ग्रन्थ अष्टाध्यायी के समस्त सूत्रों सहित उणादिसूत्र, फिट्सूत्र, लिङ्गानुशासन, गणपाठ और धातुपाठ से सर्वाङ्गपरिपूर्ण है। यह ग्रन्थ इतना उपयोगी सिद्ध हुआ कि सम्पूर्ण भारतवर्ष में पाणिनीय व्याकरण का अध्ययन इसी के द्वारा होने लगा। 'सिद्धान्तकौमुदी' पर अनेक टीकाएँ लिखीं गयीं, जिनमें दीक्षित जी की प्रौढमनोरमा, ज्ञानेन्द्र सरस्वती की तत्त्वबोधिनी, वासुदेव दीक्षित की बालमनोरमा तथा नागेश का लघुशब्देन्दुशेखर प्रसिद्ध है।

आचार्य वरदराज

आचार्य वरदराज दाक्षिणात्य पण्डित थे। इनके पिता दुर्गातनय और गुरु भट्टोजिदीक्षित थे। अपने अध्ययन के पश्चात् इन्होंने पाणिनि-व्याकरण में प्रवेशार्थी सुकुमार मति वाले बालकों के लिए 'सिद्धान्तकौमुदी' का पथ-प्रदर्शक 'लघुसिद्धान्तकौमुदी' नामक ग्रन्थ की रचना की। वरदराज का यह लघु प्रयास प्रारम्भिक छात्रों के लिए परमोपयोगी है।

मध्यसिद्धान्तकौमुदी

इस प्रकार 'लघुकौमुदी' द्वारा साधारण ज्ञान प्राप्त हो जाने पर विद्यार्थियों की ज्ञानवृद्धि के लिए वरदराज ने द्वितीय सोपान रूप 'मध्यसिद्धान्तकौमुदी' का प्रणयन किया। मध्यसिद्धान्तकौमुदी के अन्त में वरदराज ने कहा है—

'कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी।
तस्याः सङ्ख्या तु विज्ञेया खबाणकरवह्निभिः॥'

यह किंवदन्ती है कि आचार्य वरदराज की इस कृति को देखकर गुरुवर भट्टोजिदीक्षित को सन्देह हो गया था कि मध्यकौमुदी को पढ़ने के पश्चात् मेरी 'सिद्धान्तकौमुदी' को कौन पढ़ेगा? क्योंकि सिद्धान्तकौमुदी का सार-सर्वस्व मध्यसिद्धान्तकौमुदी है।

इस ग्रन्थ में सिद्धान्तकौमुदी की अपेक्षा संक्षेप के अतिरिक्त प्रकरण-क्रम में भी भिन्नता है। वाक्य में सर्वप्रथम अर्थज्ञान के लिए पदच्छेद अपेक्षित होता है। अतः पूर्व में सन्धि-प्रकरण को रखा गया है। अनन्तर सुबन्त पदों के ज्ञान के लिए षड्लिङ्ग-प्रकरण और अव्यय-प्रकरण का संघटन किया गया है। इसके बाद स्त्रीप्रत्यय की अपेक्षा तिङन्त पदों के ज्ञान के लिए तिङन्त-प्रकरण का विन्यास सर्वथा उचित है। क्योंकि स्त्रीप्रत्यय कृत्तद्धित-समास के बाद ही अपेक्षित है। अतः अन्त में 'स्त्री-प्रत्यय' का होना ही उचित है। इसी प्रकार कारक का भी समास से पूर्व होना युक्तिसङ्गत प्रतीत होता है। क्योंकि विभक्त्यर्थज्ञान पर ही समास-प्रक्रिया आधारित है।

मध्यसिद्धान्तकौमुदी की एक अत्यन्त प्राचीन टीका 'मध्यमनोरमा' है; ऐसा कुछ विद्वानों ने स्वीकार किया है। परन्तु इसका मुद्रित संस्करण अद्यावधि अप्राप्य ही है।

आजकल मध्यसिद्धान्तकौमुदी के संस्कृत-हिन्दी टीकाओं सहित अनेक संस्करण निकल रहे हैं। उनमें पं० सदाशिव शास्त्री की 'सुधा' संस्कृत व्याख्या तथा पं० रामचन्द्र झा द्वारा रचित 'इन्दुमती' हिन्दी टीका का प्रमुख स्थान रहा है।

प्रस्तुत संस्करण में 'सुबोधिनी' संस्कृत-हिन्दी व्याख्या का संक्षेप में वर्ण्यविषय इस प्रकार है—संस्कृत में जिज्ञासु छात्रों को सूत्रार्थ समझाना ही उद्देश्य रहा है। हिन्दी में प्रत्येक सूत्र का पदच्छेद, अनुवृत्ति तथा सूत्रभेद प्रदर्शित कर विद्यार्थियों को सूत्रार्थ समझने की ओर स्वतः उन्मुख होने की प्रणाली बतलायी गई हैं। अनन्तर ग्रन्थ की 'वृत्ति' के अनुसार सूत्रार्थ किया गया है। 'विमर्श' में अनुवृत्त सूत्रों का उल्लेख करते हुए सूत्रस्थ पदों के साथ उनका सम्बन्ध प्रदर्शित कर सूत्रार्थ स्पष्ट किया गया है। प्रक्रियानुसार क्रम से उदाहरणों की सिद्धि की गई है और प्रत्युदाहरणों के द्वारा सूत्रस्थ पदों की सार्थकता दिखलायी गई है। प्रसङ्गवश कठिन स्थलों का स्पष्टीकरण भी किया गया है। नवीन प्रकरणों के आरम्भ में पूर्वापर सङ्गति उपक्रम के रूप में की गई है। इसके अतिरिक्त अन्य ज्ञातव्य तथ्यों का प्रतिपादन किया गया है।

प्रस्तुत संस्करण की व्याख्या के विषय में गुण-दोषों का विवेचन सुधी पाठकजन ही करेंगे। मेरे प्रमाद एवं अज्ञानवश कुछ त्रुटियाँ हुई होंगी। अतः नीर-क्षीर-विवेकी विद्वानों से निवेदन है कि वे उन्हें सुधारकर सूचित करने का कष्ट करें। आशा एवं विश्वास है कि 'मध्यसिद्धान्तकौमुदी' के इस संस्करण से छात्रगण अवश्य ही लाभ उठायेंगे।

शिवरात्रि, २०४६ वि० }

विदुषां वशंवदः
सुरेशचन्द्र शर्मा

प्रकरण-सूची

१ संज्ञाप्रकरणम् १

२ अच्सन्धिप्रकरणम् १६

३ प्रकृतिभावसन्धिप्रकरणम् ३५

४ हल्सन्धिप्रकरणम् ४२

५ विसर्गसन्धिप्रकरणम् ६१

६ स्वादिसन्धिप्रकरणम् ६३

७ अजन्तपुँल्लिङ्गप्रकरणम् ७१

८ अजन्तस्त्रीलिङ्गप्रकरणम् १२३

९ अजन्तनपुंसकलिङ्गप्रकरणम् १३५

१० हलन्तपुँल्लिङ्गप्रकरणम् १४५

११ हलन्तस्त्रीलिङ्गप्रकरणम् २०५

१२ हलन्तनपुंसकलिङ्गप्रकरणम् २१०

१३ अव्ययप्रकरणम् २१६

वार्तिकादिसूची २२२

सूत्रसूची २२३

॥ श्रीः ॥

मध्यसिद्धान्तकौमुदी

'सुबोधिनी'-संस्कृत-हिन्दीव्याख्योपेता

अथ संज्ञाप्रकरणम्

नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ॥

'श्रीसरस्वत्यै नमः'

श्रीगणेशं नमस्कृत्य साम्बं विश्वेश्वरं परम् ।
बालानां सुखबोधाय सुबोधिनीयं विरच्यते ॥

अन्वयः—वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् नत्वा पाणिनीयानां मध्यसिद्धान्तकौमुदीं करोति ।

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युः' इति भाष्यादिसिद्धप्रतिपादितकर्तव्यताकं ग्रन्थादौ मङ्गलमाचरन् वैयाकरणो वरदराजः 'गुरुः साक्षात्परं ब्रह्म' इत्युक्तिं हृदि निधाय श्रीगुरून् प्रणम्य चिकीर्षितं प्रतिजानीते—**नत्वेति** । वरदराजः =मध्यसिद्धान्तकौमुदीप्रणेता, श्रीगुरून्—श्रिया=निखिलशास्त्रज्ञानरूपया शोभया, सहिताः श्रीसहिताः, ते च गुरवः—गृणन्त्युपदिशन्तीति गुरवस्तान्=सच्छास्त्रोपदेशकानिति यावत्, भट्टोजिदीक्षितान्=शब्दकौस्तुभ-सिद्धान्तकौमुदी-मनोरमादिग्रन्थकर्तॄन्

प्रकृत ग्रन्थ 'मध्यसिद्धान्तकौमुदी' के आरम्भ में ग्रन्थकार वरदराजभट्टाचार्य शिष्टों की परम्परा का अनुसरण कर, अपने ग्रन्थ की निर्विघ्न परिसमाप्ति हेतु मङ्गलाचरण प्रस्तुत करते हैं ।

मूलार्थ—मैं वरदराज पदवाक्यप्रमाणज्ञानरूप शोभा से युक्त अपने गुरु श्रीभट्टोजिदीक्षित को प्रणाम करके पाणिनिमुनि रचित व्याकरणशास्त्र में प्रवेश हेतु मध्यसिद्धान्तकौमुदी को बनाता हूँ ।

विमर्श—'गुरुः साक्षात्परं ब्रह्म, नास्ति तत्त्वं गुरोः पदम्' इत्यादि शिष्ट व्यवहार से विदित है कि ज्ञानदाता गुरु का सर्वश्रेष्ठ स्थान है, वही परमपदार्थ है । अतः ग्रन्थकार ने आरम्भ में विघ्नों के विनाश हेतु गुरुनमस्कारात्मक मङ्गल प्रस्तुत किया है ।

किसी ग्रन्थ के अध्ययन में अध्येताओं की प्रवृत्ति के लिए अनुबन्धचतुष्टय अर्थात् विषय, अधिकारी, सम्बन्ध और प्रयोजन का निरूपण करना आवश्यक होता है । अतः इस प्राचीन परम्परा का अनुसरण करते हुए प्रकृत ग्रन्थ मध्यसिद्धान्तकौमुदी के मङ्गलाचरण श्लोक में भी 'अनुबन्धचतुष्टय' की कल्पना की गई है ।

अइउण् ।१। ऋलृक् ।२। एओङ् ।३। ऐऔच् ।४। हयवरट् ।५। लण् ।६। ञमङणनम् ।७। झभञ् ।८। घढधष् ।९। जबगडदश् ।१०। खफछठथचटतव् ।११।

(बहुवचनमत्रादरार्थम्), नत्वा = प्रणम्य, अञ्जलिशिरःसंयोगादिव्यापारेण तोषयित्वेति भावः । पाणिनीयानाम्—पाणिनिना प्रोक्तं पाणिनीयं (व्याकरणशास्त्रम्), तदधीयते विदन्ति वेति पाणिनीयास्तेषां पाणिनीयानाम्, मध्यसिद्धान्तकौमुदीम्—सिद्धः = निष्पन्नः, अन्तः = निर्णयो येषान्ते सिद्धान्तास्तेषां कौमुदीव कौमुदी—कौमुद्या अर्थप्रकाशकत्वधर्मेण चन्द्रिकयाऽत्र साम्यमिति भावः, मध्या=लघुकौमुद्यादिवन्नात्यल्पा, सिद्धान्तकौमुदीवच्च नातिविस्तीर्णा; चासौ सिद्धान्तकौमुदी मध्यसिद्धान्तकौमुदी—'पुंवत्कर्मधारय०' (६।३।४२) इत्यनेन पुंवद्भावः'; ताम्, करोति = विरचयति ।

मङ्गलाचरणोऽनुबन्धा अपि निवेशनीया भवन्ति । यथोक्तमभियुक्तैः—

'विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम् ।
विनानुबन्धं ग्रन्थादौ मङ्गलं नैव शस्यते ॥'

ग्रन्थाध्ययनविषयकप्रवृत्तिप्रयोजकज्ञानविषयत्वमनुबन्धसामान्यलक्षणम् । अत एवात्रापि 'पाणिनीयानां मध्यसिद्धान्तकौमुदीम्' इति कथनेनानुबन्धाः सूचिताः । पाणिनीयानामर्थाद् वैयाकरणानां सिद्धान्तज्ञानं विषयः । तज्जिज्ञासुरधिकारी, अन्ये त्वधीत-

---

(१) विषय का अभिप्राय है—किसी शास्त्र या ग्रन्थ की प्रतिपाद्यवस्तु । यहाँ वैयाकरण सिद्धान्तज्ञान प्रस्तुत ग्रन्थ का विषय है ।

(२) जिस कार्य के लिए मनुष्य स्वयं को योग्य (अधिकारी) समझता है; उसी में उसकी प्रवृत्ति होती है । यह अधिकारिता मुख्यतया दो बातों पर निर्भर होती है, प्रथम—इष्टसाधनता, द्वितीय—कृतिसाध्यता । 'इदं मदिष्टसाधनम्' अर्थात् जिसमें उसे अपने उद्देश्य की सिद्धि में सफलता मिले तथा इसके साथ यह भी आवश्यक है 'इदं मत्कृतिसाध्यम्' अर्थात् वह उस कार्य को करने में समर्थ भी है । इस प्रकार ग्रन्थाध्ययन में प्रवृत्ति के लिए इष्टसाधनता और कृतिसाध्यता का ज्ञान आवश्यक होने से अधिकारी भी अनुबन्ध माना गया है । यहाँ वैयाकरणमध्यसिद्धान्त का जिज्ञासु अधिकारी है ।

(३) सम्बन्धज्ञान अध्येता की प्रवृत्ति के लिए आवश्यक होने से सम्बन्ध भी अनुबन्ध है । ग्रन्थ का प्रतिपाद्य-प्रतिपादकभाव सम्बन्ध है ।

(४) 'प्रयुङ्क्ते प्रयोजयति वा प्राधान्येन यत्तत्प्रयोजनम्' इस व्युत्पत्ति के अनुसार प्रयोजन का अर्थ है—प्रधानप्रवर्त्तक । अध्येता को जब तक ग्रन्थ के प्रतिपाद्य विषय के ज्ञान की उपयोगिता की जानकारी नहीं होती, तब तक उस ग्रन्थ के अध्ययन में उसकी प्रवृत्ति नहीं होती । इस प्रकार अध्येता की प्रवृत्ति के लिए विषय का ज्ञान आवश्यक होने से विषयज्ञान का प्रयोजन भी अनुबन्ध माना गया है । प्रकृत ग्रन्थ का प्रयोजन प्रकृतिप्रत्ययादिविभाग से शब्द-निष्पादन है ।

अक्षरसमाम्नाय के द्योतक अइउण् इत्यादि १४ सूत्र भी प्रत्याहारों की सिद्धि में 'आदिरन्त्येन सहेता' के साथ एकवाक्यता होने से सूत्र कहे गये हैं । इस प्रकार शक्तिनियामकत्वं होने के कारण इनको संज्ञासूत्र भी कहते हैं ।[1]

---

१. "एषां क्रमबोधकत्वेऽपि 'आदिरन्त्येन सहेता' इत्यनेनैकवाक्यतया वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वम्" (ल० श० शे०)

कपय् ।१२। शषसर् ।१३। हल् ।१४। इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ।

काव्यकोषादिद्विजातिरधिकारीति वदन्ति । प्रतिपाद्यप्रतिपादकभावः सम्बन्धः । अनायासेन तदवगमः प्रयोजनम् ।

अ इ उ ण् इति । वर्णानां स्पष्टप्रतिपत्तये संहिताया अविवक्षणादेतेषु अ इ उ इत्यादिष्वसन्धिः । सौत्रत्वान्नैतेभ्यो विभक्त्युत्पत्तिः । यद्वा स्वराणां चादिषु पाठात् 'चादयोऽसत्त्वे' इति निपातसंज्ञायां 'निपात एकाजनाङ्' इति प्रगृह्यत्वात् प्रकृतिभावः । ननु अकारादिवर्णेभ्यो 'वर्णात्कारः' इत्यनेन कारप्रत्ययः स्यादिति चेन्न, 'रोगाख्यायां ण्वुल् बहुलमि'त्यतोऽनुवृत्तबहुलग्रहणसामर्थ्यात् । न च 'एओङ्, ऐऔच्' इत्यत्र स्थान-प्रयत्नसाम्ये सावर्ण्यं स्यादिति वाच्यम्; 'एओङ्, ऐऔच्' इति पृथक्सूत्रपाठात् । **लणिति** । ननु 'अइउण्' इत्यत्र णकारानुबन्धेनैवाणादिप्रत्याहारसिद्धौ पुनः लणित्यत्र णकारानुबन्धग्रहणं व्यर्थमिति न शङ्कयम्, 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादि-लक्षणम्' इति परिभाषया तस्य साफल्यात् । तथा च व्याख्यानम्—

'परणैवेण्ग्रहाः सर्वे पूर्वेणैवाऽण्ग्रहा मताः । ऋतेऽणुदित्सवर्णस्येत्येतदेकं परेण तु ॥'

इति = इमानि चतुर्दशसूत्राणि, माहेश्वराणि = महेश्वरादागतानि माहेश्वराणि 'तत आगतः' इत्यण् । महेश्वरप्रसादप्राप्तानीत्यर्थः । तदुक्तं पाणिनीयशिक्षायाम्—

'अइउण्, ऋऌक्, एओङ्, ऐऔच्' इन चार सूत्रों में सन्धिकार्य की प्रवृत्ति वर्णों की स्पष्ट प्रतीति के कारण नहीं होती । अन्यथा सन्धि हो जाने पर वर्णों की पृथक्ता को व्याख्यान आदि के द्वारा सूचित करना पड़ता । अथवा अ इ उ इत्यादि स्वरों का चादिगण में पाठ होने से 'चादयोऽसत्त्वे' से निपातसंज्ञा हो जानेपर 'निपात एकाजनाङ्' सूत्र से प्रगृह्यसंज्ञा होकर प्रकृतिभाव होने से सन्धि नहीं होती । अकारादि वर्णों से बाहुलकात् 'वर्णात्कारः' से कारप्रत्यय भी नहीं होता ।

यहाँ ए तथा ऐ का कण्ठतालु स्थान और विवृत प्रयत्न साम्य होने से एवम् ओ तथा औ वर्णों का कण्ठोष्ठ स्थान और विवृत प्रयत्न समान होने से सवर्ण संज्ञा होकर 'एओङ्, ऐऔच्' इन दो सूत्रों के स्थान पर एक ही सूत्र से काम चल सकता था ? ऐसी शङ्का की जाती है । इसका निराकरण यह है कि पाणिनि ने 'एओङ्, ऐऔच्' ये दो सूत्र पृथक् पढ़े हैं । अतः ए ऐ तथा ओ औ वर्णों की परस्पर सवर्ण संज्ञा नहीं होती ।

वर्णसमाम्नाय में 'ण्' अनुबन्ध[१] का पाठ दो सूत्रों में किया गया है, प्रथम तो 'अइउण्' सूत्र में, दूसरा 'लण्' सूत्र में । अतः अण् और इण् प्रत्याहारों में यह शङ्का उत्पन्न होती है कि णकार से पूर्व 'ण्' का ग्रहण किया जाय अथवा पर (दूसरे) 'ण्' का ग्रहण किया जाय ? इस शंका का समाधान व्याख्यान के द्वारा किया जाता है कि 'अणुदित्सवर्णस्य चाप्रत्ययः' (१।१।६९) सूत्र में तो अण् प्रत्याहार पर-णकार तक स्वीकार किया जाय; अन्यत्र सभी जगह पूर्व-णकार तक । इण प्रत्याहार पर-णकार से ही ग्राह्य है ।

मूलार्थ—ये १४ माहेश्वर सूत्र अण्, अक्, अच् इत्यादि संज्ञाओं (प्रत्याहारों) की सिद्धि के लिए हैं । इन १४ (चौदह) सूत्रों के अन्तिम वर्ण (ण् क् ङ् च् ट् आदि) इत्संज्ञक होते हैं ।

---

[१] इत्संज्ञकत्वम् इत्संज्ञायोग्यत्वम् वानुबन्धत्वम् । अनु पश्चाद् बध्यते युज्यते इति अनुबन्धः । जो बाद में जोड़े जाये वे अनुबन्ध कहे जाते हैं । ये अनुबन्ध इत्संज्ञा सदृश होते हैं ।

'येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥' इति ।

नन्वेषां माहेश्वरसूत्राणां वैयाकरणसिद्धान्तप्रकाशने उपयोगाभावादिह तदुपन्यासो व्यर्थं इत्यत आह—अणादिसंज्ञार्थानीति । अण् आदिर्यासां ताः अणादयः=अक्, अच्, अल्, हल् इत्यादिसंज्ञारूपप्रत्याहाराः, अणादयश्च ताः संज्ञा अणादिसंज्ञाः, ताः अर्थः प्रयोजनं येषां तानि अणादिसंज्ञार्थानि । कथमेषां सूत्राणामणादिसंज्ञार्थत्वमित्यत आह—**एषामन्त्या इत** इति । एषां चतुर्दशसूत्राणामन्त्ये भवा अन्त्याः 'दिगादिभ्यो यदि'त्यनेन यत्प्रत्ययः, णकारादिवर्णा इत्संज्ञका भवन्तीत्यर्थः । **हकारादिष्विति ।** सुकरतयोच्चारणार्थमेव हकारादिष्वकारोच्चारणं कृतम्, अन्यथा ह्य्व्र् इत्येवं क्लिष्टोच्चारणापत्तेरिति भावः । अथवा अचं विना हलामुच्चारणाभावात् पुनः पुनरकारपाठो हकाराद्युच्चारणार्थ इत्यवगन्तव्यम् । यथोक्तम्—'उच्चैरुदात्तः' इति सूत्रस्थभाष्ये—'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवति' इति ।

ननु 'उरण् रपरः' इत्यत्र रप्रत्याहारेण रलयोर्ग्रहणार्थं रप्रत्याहारसिद्धिरा-

(अर्थात् उनका लोप होता है, शास्त्रप्रवृत्ति में उनका उपयोग नहीं होता है ।) हकार इत्यादि व्यञ्जन वर्णों में अकार उच्चारण की सुविधा के लिए है । परन्तु 'लण्' सूत्र में अकार की इत्संज्ञा होती है । इत्संज्ञा होने से उसका भी लोप हो जाता है ।

विमर्श—अ इ उ ण् इत्यादि चौदह सूत्र 'माहेश्वरसूत्र' कहे जाते हैं । इस वर्णसमूह का परिचय महर्षि पाणिनि को महेश्वर (भगवान् शंकर) की कृपा से प्राप्त हुआ है । इस सम्बन्ध में एक किंवदन्ती प्रचलित है कि—पाणिनि अपने गुरु वर्षाचार्य के गुरुकुल में विद्याध्ययन करते थे । अध्ययन के समय अपनी प्रतिभा का समुचित विकास होते हुए न देखकर अत्यन्त खिन्न रहा करते थे । वर्षाचार्य के ही शिष्य कात्यायन प्रखरप्रतिभासम्पन्न थे । अपने सहाध्यायी कात्यायन से शास्त्रार्थ में पराजित होकर पाणिनि ने भगवान् शंकर की आराधना की । जिसके परिणामस्वरूप उन्हें शिव के डमरू-निनाद से वर्णसमाम्नाय (१४ सूत्रों) की प्राप्ति हुई ।[1] इस प्रकार अपने आराध्य भगवान् शिव से वरदान के रूप में प्राप्त शब्दों की चतुर्दश सूत्रों में कल्पना कर महर्षि पाणिनि ने बड़े वैज्ञानिक ढंग से स्वर-व्यञ्जन विभाग किया है । इन चौदह सूत्रों से प्रत्याहारों की कल्पना द्वारा शास्त्र का निरूपण करने में परम लाघवहुआ है । ये प्रत्याहार इस व्याकरणशास्त्र में अत्यन्त उपयोगी हैं । प्रत्याहार का अर्थ है—संक्षिप्त कथन[2] । इस प्रकार अनेक वर्णों का ज्ञान संक्षेप में हो जाने से व्यवहार में सरलता हो जाती है । जैसे अच् और हल् प्रत्याहारों से क्रमशः स्वर और व्यञ्जन वर्णों का ज्ञान सुगमता से हो जाता है । अतः इन चौदह माहेश्वर-सूत्रों को प्रत्याहार सूत्र भी कहा गया है ।

अण्, अक्, अच् आदि संज्ञा करना इन १४ सूत्रों का प्रयोजन है । इन सूत्रों के अन्तिम व्यञ्जन वर्ण की इत्संज्ञा होती है । इत्संज्ञक वर्ण का लोप होने से प्रत्याहारों में इन (ण् क् ङ् इत्यादि) व्यञ्जनवर्णों का समावेश नहीं किया जाता । प्रत्याहारों के निर्माण में इन इत्संज्ञक वर्णों की उपयोगिता है, जो उनके नामों में सार्थक दृष्टिगोचर होती है ।

---

१. 'नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ॥' (नन्दिकेश्वर कृत काशिका)

२. 'प्रत्याह्रियन्ते सङ्क्षिप्यन्ते वर्णाः यत्र स प्रत्याहारः ।'

हकारो द्विरुपात्तोऽयमटि शल्यपि वाञ्छता ।
अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ॥

(१) हलन्त्यम् १।१।३ । उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् ।

वश्यकी, सा च लण्सूत्रस्याकारस्येत्संज्ञां विना न सम्भवतीत्यत आह—**लण्मध्ये त्वित्संज्ञकः** । अत्र मानञ्च 'लपरत्वं वक्ष्यामी'ति भाष्यमेव । 'लण्' इति सूत्रेऽकार इत्संज्ञको न तूच्चारणमात्रार्थः ।

अन्वयः—-अयं हकारः अटि शल्यपि वाञ्छता द्विरुपात्तः, अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ।

अटि शल्यपीति । अट् प्रत्याहारे शल्प्रत्याहारे च हकारस्य ग्रहणं स्यादित्येतदर्थं हयवरडित्यत्र 'हल्' इत्यत्र च हकारोऽयं द्विरुपात्तः=द्विवारं पठितः । अटि हकारस्य प्रयोजनमाह—**अर्हेणेति** । 'अट्कुप्वाङ्नुमि'ति सूत्रेणाड्व्यवायेऽपि णत्वम् । शलि पाठस्य फलमाह—**अधुक्षदिति** । 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशः ।

(१) हल् प्रथमान्तम्, अन्त्यं प्रथमान्तम् । पदद्वयं सूत्रम् । 'उपदेशेऽजनुनासिक इत्' इत्यस्मात् पूर्वसूत्रादुपदेश इति इदिति चानुवर्तते । तदाह–**उपदेशेऽन्त्यमित्यादिना** । अथ कोऽयमुपदेश इत्यत आह—**उपदेश आद्योच्चारणमिति** । उपशब्दोऽत्र आद्यर्थकः, दिशिरुच्चारणक्रियायाम् । आद्यञ्च तदुच्चारणञ्चेत्याद्योच्चारणम्=प्रथममुच्चारणमित्यर्थः, तच्च प्रत्यासत्त्या मुनित्रयस्यैव । केचित्तु—

'हयवरट्' इत्यादि सूत्रों के हकारादि वर्णों में अकार उच्चारण की सुविधा के लिए है । क्योंकि स्वरों की सहायता के बिना व्यञ्जनों का स्पष्ट उच्चारण नहीं हो पाता । किन्तु 'लण्' सूत्र के मध्य में (लकारोत्तरवर्ती) अकार इत्संज्ञक है । इसके साथ ही 'लण्' सूत्रस्थ अकार को अनुनासिक माना जाता है । क्योंकि अच्=स्वर वर्णों के इत्संज्ञाविधायक[1] सूत्र में सानुनासिक अच् की इत्संज्ञा स्वीकार की गई है । माहेश्वर-सूत्रों में अन्तिम व्यञ्जन वर्णों के अतिरिक्त इस लकारोत्तरवर्ती अकार की इत्संज्ञा का प्रयोजन 'र' प्रत्याहार की सिद्धि है । अन्तिम इत्संज्ञक अकार के साथ 'हयवरट्' सूत्रस्थ र् को आदि वर्ण मानकर मध्यवर्ती ल् और आदि वर्ण र् का ग्रहण होने से र प्रत्याहार बनता है । इस प्रकार इस 'र' प्रत्याहार में र् और ल् दोनों वर्णों का समावेश होता है । फलतः आगे 'अच् सन्धि' प्रकरण में 'उरण् रपरः' (१।१।५१) सूत्र के सहकार से अवर्ण और लृकार को गुण एवं वृद्धि क्रमशः 'अल्' और 'आल्' होते हैं । अन्यथा र प्रत्याहार-सिद्धि के अभाव में ऋ और लृ की परस्पर सवर्ण संज्ञा होने से 'रपर' केवल अर् तथा आर् ही होता ।

अट् प्रत्याहार और शल् प्रत्याहार में हकार का ग्रहण हो, इसलिए माहेश्वर सूत्रों में दो बार 'ह्' का पाठ किया गया है । 'अट्' प्रत्याहार में हकार का समावेश हो जाने से 'अर्हेण' में 'अट्कुप्वाङ्नुम॰' से णत्व हो जाता है तथा 'शल्' प्रत्याहार में हकार का समावेश होने से 'अधुक्षत्' में 'शल इगुपधात॰' सूत्र से च्लि' के स्थान पर 'क्सः' आदेश हो जाता है ।

(१) **पद**—हलन्त्यम् । **अनुवृत्ति**—उपदेशे इत् । **संज्ञासूत्र** ।

मूलार्थ—उपदेश अवस्था में विद्यमान जो अन्त्य हल् (व्यञ्जन वर्ण), उसकी इत्संज्ञा होती है । व्याकरणशास्त्र के प्रवर्तक पाणिनि, कात्यायन, पतञ्जलि आदि आचार्यों का प्रथम उच्चारण

---

[1] 'उपदेशेऽजनुनासिक इत्' (१।३।२) ।

सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र । (२) अदर्शनं लोपः १।१।६० । प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् । (३) तस्य लोपः १।३।९ । तस्येतो लोपः स्यात् । णादयो-

'धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥' इत्याहुः ।

(२) अदर्शनं प्रथमान्तम्, लोपः प्रथमान्तम् । शास्त्रतोऽर्थतश्च प्रसक्तस्य=प्राप्तोच्चारणस्यादर्शनम्=श्रवणाभावः, लोप इत्यर्थः ।

(३) तस्य षष्ठ्यन्तम्, लोपः प्रथमान्तम्, तस्य=इत्संज्ञकस्येत्यर्थः । णादयो-

'उपदेश' कहा जाता है । जो पद सूत्रों में नहीं देखे गये हैं, उनको दूसरे सूत्रों से सब जगह अनुवर्तन कर लेना चाहिए ।

विमर्श—प्रत्याहारसूत्रों द्वारा स्वर-व्यञ्जन वर्णों का विभाग करने के पश्चात् प्रत्याहार सिद्धि का उपक्रम किया जा रहा है । कार्यों की सुगमता के लिए पाणिनीय सूत्रों को छः भागों में विभक्त किया गया है—संज्ञा, परिभाषा, विधि, नियम, अतिदेश और अधिकार ।[1]

'हलन्त्यम्' इत्संज्ञाविधायक सूत्र है । यहाँ 'उपदेशेऽजनुनासिक इत्' सूत्र से अनुवृत्त 'उपदेशे, इत्' तथा सूत्र में विद्यमान 'अन्त्यं, हल्' पदों की एकवाक्यता होने पर 'उपदेशेऽन्त्यं हल् इत्' इस प्रकार बोध होता है ।

प्रकृत में 'उपदेश' पद का अर्थ आद्य उच्चारण है । यहाँ 'आद्य' शब्द पाणिनि, कात्यायन और पतञ्जलि तीनों मुनियों के अर्थ में रूढ है । अतः अज्ञात वर्णों के स्वरूप-ज्ञान के लिए तीन मुनि द्वारा उच्चरित को उपदेश कहते हैं । प्राचीन आचार्यों ने आद्योच्चारण को धातु, सूत्र, गण, उणादि, लिङ्गानुशासन, आगम, प्रत्यय और आदेश के रूप में स्वीकार किया है । काशिकाकार के अनुसार 'शास्त्रवाक्य' ही उपदेश हैं और वे सूत्रपाठ तथा खिलपाठ के अन्तर्गत समाविष्ट किये गये हैं । सूत्रपाठ से पाणिनि की 'अष्टाध्यायी' और खिलपाठ से धातु, गण, उणादि तथा लिङ्गानुशासन का ग्रहण किया जाता है ।

इस प्रकार 'हलन्त्यम्' सूत्र से उपदेश में अन्तिम व्यञ्जन वर्ण की इत्संज्ञा सिद्ध हुई ।

(२) पद—अदर्शनं लोपः । **संज्ञासूत्र ।**

मूलार्थ—विद्यमान वस्तु के अदर्शन=न दिखलायी पड़ने को लोप कहते हैं ।

विमर्श—यहाँ प्रसङ्गतः लोपसंज्ञा का विवेचन किया जा रहा है ।

सूत्र में संज्ञा—लोप और संज्ञी—अदर्शन है । यहाँ अदर्शन शब्द का अर्थ श्रवणाभाव और उच्चारणाभाव के रूप में स्वीकार किया गया है । इस प्रकार प्रसक्त=शास्त्रतः, अर्थतः विद्यमान=प्राप्तोचारण का जो अदर्शन, वह लोपसंज्ञक होता है, अर्थात् उस अभाव को लोप कहते हैं ।

(३) पद—तस्य, लोपः । **अनुवृत्ति**—इत् । **विधिसूत्र ।**

---

[1] कम शब्दों में किसी बात का स्पष्ट वर्णन करना सूत्र का प्रयोजन होता है—

'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥' इति सूत्रलक्षणम् ।
'संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥'

'तत्र नामकरणं संज्ञा । अनियमे नियमकारिणी परिभाषा । कर्तव्यत्वेन निर्देशो विधिः । प्राप्तविधिनियामकं नियमः । अतस्मिन् तद्धर्मापादकम् अतिदेशः । उत्तरप्रकरणव्यापी अधिकारः ।'

ऽणाद्यर्थाः । **(४) आदिरन्त्येन सहेता १।१।७१ ।** अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । यथा अण् इति अ इ उ वर्णानां संज्ञा । एवमच्, हल्, अल् इत्यादयः । **(५) ऊकालोऽज्झ्रस्वदीर्घप्लुतः १।२।२७ ।** उश्च ऊश्च ऊ ३ श्च वः । वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् । सः प्रत्येकमुदात्तादिभेदेन

ऽणाद्यर्था इति । अण् आदिर्येषान्तेऽणादयस्तेऽर्थाः प्रयोजनं येषान्तेऽणाद्यर्थाः । णादयः =वर्णसमाम्नाये पठिताः ण् क् च् प्रभृतय इत्संज्ञकाः वर्णाः, अण्-अक्-अच्-इत्यादि-प्रत्याहारप्रयोजनका इति ।

(४) आदिः प्रथमान्तम् । अन्त्येन तृतीयान्तम् । सह इति अव्ययपदम् । इता तृतीयान्तम् । अन्त्ये भवः अन्त्यः, तेन इता सहोच्चार्यमाणः आदिः अण् अक् इच् इत्यादिरूपा संज्ञेत्यर्थः । यस्मात्पूर्वं नास्ति परमस्ति स आदिः, यस्मात्परं नास्ति पूर्वञ्चास्ति सोऽन्तः । आद्यन्तशब्दाभ्यामत्र मध्यगा आक्षिप्यन्ते । 'स्वं रूपमि'ति सूत्रात् स्वमित्यनुवर्त्तते षष्ठ्या च विपरिणम्यते । तदाह—**अन्त्येनेत्यादि ।**

(५) अणादिसंज्ञासु सिद्धासु अचो ह्रस्वादिसंज्ञां दर्शयति—**ऊकालोऽजिति ।**

मूलार्थ—उस इत्संज्ञक वर्ण का लोप हो जाता है ।

(४) पद—आदिः, अन्त्येन, सह, इता । **अनुवृत्ति**—स्वं रूपम् । **संज्ञासूत्र ।**

मूलार्थ—अन्तिम इत्संज्ञक वर्ण के साथ उच्चार्यमाण आदि वर्ण अपने तथा मध्यवर्ती वर्णों का बोधक होता है । जैसे—'अण्' अ इ उ वर्णों का बोधक है । उसी प्रकार अच्, हल्, अल् इत्यादि प्रत्याहार भी जानने चाहिए ।

विमर्श—यह प्रत्याहारबोधक सूत्र है । यहाँ आदि और अन्त्य पद अवयवार्थक हैं । इन आदि और अन्त्य शब्दों से समुदाय का आक्षेप किया जाता है । 'स्वं रूपं शब्दस्याशब्दसंज्ञा' सूत्र से 'स्वं रूपम्' की अनुवृत्ति है । इस प्रकार आदि और अन्त्य पद मध्यवर्ती वर्णों के साथ स्वयं आदि वर्ण भी संज्ञी है । अन्तिम इत्संज्ञक वर्ण का लोप हो जाने से प्रत्याहार में उसे सम्मिलित नहीं किया जाता । जैसे—अच् प्रत्याहार में अन्त्य इत् हुआ 'ऐऔच्' का चकार, तत्सदृश अच् का चकार, उसके साथ आदि वर्ण अइउण् का अकार (उसके सदृश अच् का अकार), उससे आक्षिप्त समुदाय—'अ इ उ ऋ ऌ ए ओ ऐ औ' है । इसी प्रकार अण्-अल् इत्यादि प्रत्याहारों की सिद्धि होती हैं ।

प्रत्याहारों की संख्या ४२ है, जिनका क्रम इस प्रकार है—

१. अक्	७. अण्	१३. एङ्	१९. चर्	२५. झल्	३१. यञ्	३७. वल्
२. अच्	८. अण्	१४. एच्	२०. चय्	२६. झश्	३२. यण्	३८. वश्
३. अट्	९. इण्	१५. ऐच्	२१. छव्	२७. झष्	३३. यम्	३९. शर्
४. अम्	१०. इक्	१६. खर्	२२. जश्	२८. बश्	३४. यय्	४०. शल्
५. अल्	११. इच्	१७. खय्	२३. झय्	२९. भष्	३५. यर्	४१. हल्
६. अश्	१२. उक्	१८. ङम्	२४. झर्	३०. मय्	३६. रल्	४२. हश्

इसके अतिरिक्त र प्रत्याहार भी है । जिसका विवेचन पूर्व में किया जा चुका है ।

(५) पद—ऊकालः, अच्, ह्रस्वदीर्घप्लुतः । **संज्ञासूत्र ।**

मूलार्थ—उ, ऊ और ऊ ३—ये तीनों उकार 'वः' पद से जाने जाते हैं । इन एकमात्रिक,

त्रिधा । (६) उच्चैरुदात्तः १।२।२९ । ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् । (७) नीचैरनुदात्तः १।२।३० । ताल्वादिषु सभागेषु स्थानेष्व-

ह्रस्वदीर्घप्लुत इति समाहारद्वन्द्वः, सौत्रं पुंस्त्वम् । वां काल इवेति । फलितार्थकथनमिदम् । विग्रहस्तु वः कालो यस्येति बोध्यः । अपदेन स्वोच्चारणकालो लक्ष्यते ।

(६) उच्चैः अव्ययपदम्, उदात्तः प्रथमान्तम् । उच्चैश्शब्दोऽधिकरणशक्तिप्रधानः 'ऊर्ध्वभागे' इत्यर्थे वर्तते । 'ऊकालोऽच्' इत्यतः 'अच्' इत्यनुवर्तते । तदेतदाह—**ताल्वादिष्वित्यादिना** । **सभागेष्विति** । ताल्वादीनां स्थानानां सावयवत्वकथनम् ऊर्ध्वभागे इत्यस्योपपादनार्थम्, तेषामखण्डत्वे ऊर्ध्वभागे इत्यनुपपत्तेः ।

द्विमात्रिक और त्रिमात्रिक उकार के उच्चारण काल के समान जिस अच् का उच्चारण काल हो, उस अच्=स्वर की क्रमशः ह्रस्व, दीर्घ और प्लुत संज्ञा होती है । वह अच् उदात्त, अनुदात्त और स्वरित भेद से पुनः तीन प्रकार का होता है ।

विमर्श—सूत्र में पठित काल शब्द मात्रा-विशेष का बोधक है । ह्रस्व, दीर्घ और प्लुप्त—ये तीनों संज्ञाएँ स्वर वर्ण के उच्चारण में लगने वाले सीमित समय की मापक हैं । उ, ऊ और ऊ ३ से क्रमशः एकमात्रिक, द्विमात्रिक और त्रिमात्रिक स्वरों का बोध होता है । इन तीनों कालों का अन्वय यथासंख्य परिभाषा के द्वारा ह्रस्व, दीर्घ और प्लुत शब्दों के साथ होने से एकमात्रिक स्वर की ह्रस्वसंज्ञा, द्विमात्रिक की दीर्घसंज्ञा तथा त्रिमात्रिक की प्लुत संज्ञा होती है ।[1] वह ह्रस्व, दीर्घ और प्लुत रूप प्रत्येक अच् उदात्त, अनुदात्त और स्वरित भेद से तीन प्रकार का होता है ।

विशेष—यहाँ शंका होती है कि वर्णसमाम्नाय में पहले अकार का पाठ किया गया है; उसको तथा इ को छोड़कर सूत्रकार ने दृष्टान्त के रूप में उ वर्ण का ग्रहण क्यों किया ? इसका समाधान है कि ब्राह्ममुहूर्त में कुक्कुट (मुर्गा) की ध्वनि कु, कू, कू ३ में क्रमशः आरोह होता है । उसमें एकमात्रिक ह्रस्व उ, द्विमात्रिक दीर्घ ऊ तथा त्रिमात्रिक प्लुत ऊ ३ प्रसिद्ध है । यह मात्रा समय का प्राकृतिक मापक है । अतः आचार्य ने प्राकृतिक मुर्गे की ध्वनि का आश्रय लेकर सूत्र में उच्चारणकाल का निर्धारण किया है ।

(६) पद—उच्चैः, उदात्तः । **अनुवृत्ति**—अच् । **संज्ञासूत्र** ।

मूलार्थ—मुख के भीतर तालु आदि सभाग स्थानों के ऊर्ध्वभाग से उच्चरित स्वरवर्णों की उदात्त संज्ञा होती है ।

विमर्श—आचार्य पाणिनि ने वर्णों की उच्चारण पद्धति में उदात्तादि वर्णधर्मों की निष्पत्ति पर सूक्ष्म विचार किया है । प्रकृत सूत्र में 'उच्चैः' तथा 'उदात्तः' दो पद हैं । 'ऊकालोऽच्०' (१।२।२७) सूत्र से 'अच्' पद अनुवृत्त है । सामान्यतः 'उच्चैः' शब्द से 'ऊँचे स्वर से बोलना' अर्थ लिया जाता है, किन्तु यहाँ 'उच्चैः' शब्द मुख के अन्दर स्थित तालु, कण्ठ आदि भागों के ऊपरी भाग का ज्ञान कराता है; क्योंकि तालु, कण्ठ, मूर्धा, दन्त, ओष्ठ आदि स्थानों से वर्णों का उच्चारण किया जाता है । इन स्थानों के उच्चैः=ऊपरी भागों से उच्चरित अच्=स्वर वर्ण उदात्तसंज्ञक होते हैं ।

(७) पद—नीचैः, अनुदात्तः । **अनुवृत्ति**—अच् । **संज्ञासूत्र** ।

मूलार्थ—तालु आदि सभाग स्थानों के अधोभाग में उच्चरित अच् अनुदात्तसंज्ञक होता है ।

---

[1] 'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् ॥'

धोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात् । (८) समाहारः स्वरितः १।२।३१ । उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् । सः नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा । (९) मुखनासिकावचनोऽनुनासिकः १।१।८ । मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् । तदित्थम्–

(७) अनुदात्तसंज्ञामाह—**नीचैरिति** । नीचैश्शब्दोऽधिकरणशक्तिप्रधानः 'अधोभागे' इत्यर्थे विद्यते ।

(८) स्वरितसंज्ञामाह—**समाहारः स्वरित इति** । पूर्वसूत्राभ्याम् उदात्तानुदात्तपदे अनुवृत्ते व्याख्यानाद् धर्मप्रधाने षष्ठ्यन्ततया च विपरिणम्येते । यत्र समाहरणं स समाहारः । अधिकरणे घञ् । 'ऊकालोऽजि'त्यस्मात् अजित्यनुवर्तते । ततश्चोदात्तत्वानुदात्तत्वयोर्धर्मयोर्यस्मिन्नचि मेलनं स्यात् सोऽच् स्वरितसंज्ञको भवतीत्यर्थः ।

(९) अनुनासिकसंज्ञामाह—**मुखनासिकेति** । मुखसहिता नासिका मुखनासिकेति

विमर्श—प्रकृत सूत्र में भी 'नीचैः' पद मुख के अन्तर्गत तालु आदि भागों के निम्न भाग का बोधक है । अतः तालु-कण्ठादि स्थानों के नीचैः=नीचे के भागों से उच्चरित स्वर वर्ण की अनुदात्त संज्ञा होती है ।

विशेष—ऋग्वेद में अनुदात्त स्वर को वर्ण के नीचे पड़ी रेखा द्वारा निर्दिष्ट किया जाता है ।

(८) पद—समाहारः स्वरितः । **अनुवृत्ति**—उदात्तः, अनुदात्तः, अच् । **संज्ञासूत्र ।**

मूलार्थ—उदात्तत्व और अनुदात्तत्व दोनों वर्णधर्म जिसमें इकठ्ठे हो जाये, वह अच्=(स्वर) स्वरितसंज्ञक होता है ।

विमर्श—सूत्र में 'समाहारः' संज्ञी है और 'स्वरितः' संज्ञा । उदात्तत्व और अनुदात्तत्व दोनों वर्णधर्मों का समाहार=एकीकरण ही 'स्वरित' कहलाता है । दोनों वर्णधर्मों का एकत्र समावेश होने से उच्चारण की मध्यता प्रतीत होती है । यहाँ यह शंका की जाती है कि उदात्त और अनुदात्त दो विरोधी वर्णधर्म हैं । उनका एक अच् में मिलना सम्भव कैसे होगा ? इसका समाधान यह है कि—जिस वर्ण की 'स्वरित' संज्ञा होती है, उसमें अंशद्वय की स्थिति समष्टि रूप में रहती है । जिसमें उदात्त धर्म की स्थिति है, उस अंश में अनुदात्तत्व धर्म की स्थिति नहीं एवं जिस अंश में अनुदात्तत्व की स्थिति है, उसमें उदात्तत्व धर्म की स्थिति नहीं । इस प्रकार इन्हीं दोनों वर्णधर्मों के मेल से स्वरित स्वर की उत्पत्ति होती है ।

विशेष—ऋग्वेद में स्वरित स्वर का चिह्न वर्ण के ऊपर एक खड़ी रेखा द्वारा सूचित किया जाता है ।

इस प्रकार ह्रस्व, दीर्घ, और प्लुत—ये तीनों उदात्तादि भेद से नौ प्रकार के होते हैं । यथा—१. ह्रस्वोदात्त, २. ह्रस्वानुदात्त, ३. ह्रस्वस्वरित, ४. दीर्घोदात्त, ५. दीर्घानुदात्त, ६. दीर्घस्वरित, ७. प्लुतोदात्त, ८. प्लुतानुदात्त, ९. प्लुतस्वरित । उक्त रीति से नौ प्रकार का वह अच् पुनः अनुनासिक और अननुनासिक भेद से दो-दो प्रकार का होता है । जो अग्रिम सूत्र द्वारा स्पष्ट किया गया है ।

(९) पद—मुखनासिकावचनः, अनुनासिकः । **संज्ञासूत्र ।**

मूलार्थ—मुख सहित नासिका (नाक) से जिस वर्ण का उच्चारण होता है, वह अनुनासिक संज्ञक वर्ण कहलाता है ।

अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । ऌवर्णस्य द्वादश । तस्य दीर्घाभावात् । एचामपि द्वादश । तेषां ह्रस्वाभावात् । (१०) तुल्यास्यप्रयत्नं सवर्णम् १।१।९ । ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।

विग्रहः 'शाकपार्थिवादित्वात् सहितपदस्य लोपः ।' उच्यतेऽसाविति वचनः, कर्मणि ल्युट् । मुखनासिकया वचन इति 'मुखनासिकावचनः' । 'कर्तृकरणे कृता बहुलमि'ति तृतीयासमासः ।

सर्वेषां स्वराणां सामान्यरूपेणाष्टादशभेदाः न भवन्तीत्याह—**तदित्थमिति** ।

(१०) अथ सवर्णसंज्ञामाह—**तुल्यास्येति** । आस्यशब्दोऽत्र न मुखमात्रपरः, किन्तु आस्ये=मुखे भवम् आस्यम्=ताल्वादिस्थानम् 'शरीरावयवाद्यत्' इति भवार्थे

विमर्श—अनुनासिक पद का अर्थ है—'नासिकाम् अनुगत इति अनुनासिकः (नासिकाम् अनु=पश्चात् प्राप्तः)' अर्थात् नासिका से उच्चरित वर्ण । सामान्यतया वर्णों का उच्चारण मुख से ही होता है, किन्तु जिस वर्ण के उच्चारण में मुख के साथ नासिका भी सक्रिय हो, वह अनुनासिक कहलाता है ।[1] इस प्रकार वर्गों के अन्तिम वर्ण ङ्, ञ्, ण्, न् और म् अनुनासिक हैं ।

इन अनुनासिक और अननुनासिक दो भेदों के कारण पूर्वोक्त नौ भेदों को दुगुना करने से अ, इ, उ, ऋ इनमें से प्रत्येक वर्ण के अठारह भेद हुए । दीर्घ न होने से ऌ के बारह भेद हैं । ह्रस्व न होने से ए, ओ, ऐ, औ इनमें प्रत्येक के बारह भेद हैं ।

स्वरों का भेदबोधक चक्र

अ इ उ ऋ ऌ	अ इ उ ऋ ए ओ ऐ औ	
(ह्रस्व भेद)	(दीर्घ भेद)	(प्लुत भेद)
१. ह्रस्व उदात्तानुनासिक	७. दीर्घ उदात्तानुनासिक	१३. प्लुत उदात्तानुनासिक
२. ,, उदात्ताननुनासिक	८. ,, उदात्ताननुनासिक	१४. ,, उदात्ताननुनासिक
३. ,, अनुदात्तानुनासिक	९. ,, अनुदात्तानुनासिक	१५. ,, अनुदात्तानुनासिक
४. ,, अनुदात्ताननुनासिक	१०. ,, अनुदात्ताननुनासिक	१६. ,, अनुदात्ताननुनासिक
५. ,, स्वरितानुनासिक	११. ,, स्वरितानुनासिक	१७. ,, स्वरितानुनासिक
६. ,, स्वरिताननुनासिक	१२. ,, स्वरिताननुनासिक	१८. ,, स्वरिताननुनासिक

स्वरों के अष्टादश भेदों का निरूपण करने के पश्चात् आचार्य सवर्ण संज्ञा का निरूपण करते हैं—

(१०) पद—तुल्यास्यप्रयत्नम् , सवर्णम् । **संज्ञासूत्र** ।

मूलार्थ—तालु आदि स्थान और आभ्यन्तर प्रयत्न जिन वर्णों के तुल्य (=समान) हों उनकी परस्पर सवर्ण संज्ञा होती है ।

विमर्श—सूत्र में 'तुल्य' पद सदृश का पर्यायवाची है । 'आस्य' पद से मुखभवस्थान तालु आदि स्थानों का ग्रहण किया गया है । इन स्थानों से टकराकर वर्ण बाहर आते हैं अर्थात् उच्चरित होते हैं । इसी प्रकार प्रयत्न में 'प्र' शब्द से मुखभव यत्न-आभ्यन्तर का ही ग्रहण होता है, बाह्य का नहीं; क्योंकि वर्णों के बाहर निकलने के पूर्व आभ्यन्तर प्रयत्न होते हैं, जो वर्णों के उच्चारण में अत्यन्त सहायक होते हैं । इसी प्रयत्नशीलता के कारण यहाँ आभ्यन्तर प्रयत्न ही

---

[1] 'किञ्चिन्मुखवचनम्, किञ्चिन्नासिकावचनम् ।' (व्याकरणमहाभाष्यम्)

(ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्) । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । ऌतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य । इति स्थानानि । यत्नो द्विधा—आभ्यन्तरो बाह्यश्च । आद्यः पञ्चधा । स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्व-

यत्प्रत्ययः । प्रकृष्टो यत्नः प्रयत्नः । आस्यञ्च प्रयत्नश्चास्यप्रयत्नौ, तुल्यौ आस्यप्रयत्नौ यस्य वर्णजालस्य तत्तुल्यास्यप्रयत्नम्, परस्परं सवर्णसंज्ञकं स्यादित्याह—**तात्वादीति ।**

ऋऌवर्णयोः स्थानसाम्याभावादप्राप्ता सवर्णसंज्ञा वार्तिककृता विधीयते—**ऋऌवर्णयोरिति ।** आ च ऌवर्णश्च ऋऌवर्णौ, तयोः ऋऌवर्णयोर्मिथः परस्परं सावर्ण्यं=सवर्णत्वं वक्तव्यमित्यर्थः । कस्य किं स्थानमित्याकाङ्क्षायां तद्व्यवस्थापकानि शिक्षावचनान्यर्थतः सङ्गृह्णाति—**अकुहविसर्जनीयामिति ।** 'अ' इत्यष्टादशभेदाः गृह्यन्ते । 'कु' इति कादिपञ्चात्मकः कवर्गः । विसर्जनीयशब्दोऽपि विसर्गपर्यायः । **दन्ता इति ।** दन्तमूलप्रदेशा इत्यर्थः, अतो भग्नदन्तस्याप्युच्चारणं भवत्येव । **नासिका चेति ।** चकारेण स्वस्ववर्गानुकूलं तात्वादि गृह्यते । **यत्नो द्विधेति ।** यत्नशब्दोऽत्र प्रयत्नपरः । यत्नानामाभ्यन्तरत्वं बाह्यत्वञ्च वर्णानामुत्पत्तेः प्रागूर्ध्वभावित्वमिति शिक्षाग्रन्थेषु स्पष्टम् ।

अपेक्षित है । अतः जिन वर्णों के कण्ठ, तालु, मूर्धा आदि स्थान और आभ्यन्तर प्रयत्न समान हों, वे परस्पर सवर्ण कहलाते हैं ।

मूलार्थ—ऋकार और ऌकार की (भिन्न स्थान होने पर भी) परस्पर सवर्ण संज्ञा होती है । अकार, कु=(कवर्ग) क, ख, ग, घ, ङ्, ह और विसर्ग[1] का कण्ठ स्थान है । इ, चु=(चवर्ग) च, छ, ज, झ, ञ्, य और श का तालु स्थान है । ऋ, टु=(ट वर्ग) ट, ठ, ड, ढ, ण, र और ष का मूर्धा स्थान है । ऌ, तु=(त वर्ग) त, थ, द, ध, न, ल और स का दन्त स्थान है । उ, पु=(पवर्ग) प, फ, ब, भ, म और उपध्मानीय का ओष्ठ स्थान है । ञ, म, ङ, ण, न का नासिका स्थान भी है । ए, ऐ का स्थान कण्ठतालु है । ओ, औ का स्थान कण्ठोष्ठ है । 'व' का स्थान दन्तोष्ठ है । जिह्वामूलीय का स्थान जिह्वामूल है । अनुस्वार का स्थान नासिका है—ये वर्णों के स्थान हैं । यत्न दो प्रकार के हैं—आभ्यन्तर और बाह्य । प्रथम आभ्यन्तर प्रयत्न के पाँच भेद हैं—१. स्पृष्ट, २. ईषत्स्पृष्ट, ३. ईषद्विवृत ४. विवृत और ५. संवृत । स्पर्श वर्णों का स्पृष्ट प्रयत्न है । अन्तःस्थ वर्णों का ईषत्स्पृष्ट प्रयत्न है । ऊष्माण=श, ष, स और ह वर्णों का ईषद्विवृत प्रयत्न है । स्वरों का विवृत प्रयत्न है । ह्रस्व अ का प्रयोगदशा में संवृत प्रयत्न है, किन्तु प्रक्रियादशा में विवृत प्रयत्न रहता है । यह आचार्य पाणिनि ने 'अ अ' सूत्र से ज्ञापित किया है ।

---

[1] १. यहाँ अकार के साहचर्य के कारण विसर्ग का कण्ठ स्थान कहा गया है, किन्तु विसर्ग अयोगवाह है; अतः आश्रय का जो स्थान होगा, वही विसर्ग का स्थान होगा । जैसे 'रामः' यहाँ विसर्ग का स्थान कण्ठ होगा और 'हरिः' यहाँ विसर्ग का स्थान तालु होगा, क्योंकि पाणिनीय शिक्षा में स्पष्ट कहा गया है—

'अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ।' पा० शि०—२२

स्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव । बाह्यप्रयत्नस्त्वेकादशधा—विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः । शषसहा ऊष्माणः । अचः स्वराः । ≍क≍ख

आद्यः—आभ्यन्तरप्रयत्नमित्यर्थः । **बाह्य इति ।** आस्यबहिर्भूतदेशे गलविवरादौ विकासादिरूपकार्यकरो बाह्यः । **घोषाश्चेति ।** चकारेणाचामपि सङ्ग्रहः । **यणश्चेति ।** अत्रापि चेनाचो ग्रहणं भवति । एवञ्च बाह्यप्रयत्नेऽचामपि घोषसंवारनादाल्पप्राणाः प्रयत्नाः भवन्ति । **ह्रस्वस्यावर्णस्येति ।** प्रयोगे इत्यस्य व्यवहारकाले इत्यर्थः । प्रक्रिया-

---

बाह्य प्रयत्न ग्यारह प्रकार के हैं—विवार, संवार, श्वास, नाद, घोष, अघोष, अल्पप्राण, महाप्राण, उदात्त, अनुदात्त और स्वरित। खर् प्रत्याहार बोध्य वर्णों का विवार, श्वास तथा अघोष प्रयत्न है। हश् प्रत्याहार के संवार, नाद और घोष प्रयत्न हैं। वर्गों के प्रथम (क, च, ट, त, प), तृतीय (ङ, ज, ड, द ब) और पञ्चम (ङ, ञ, ण, न, म) तथा यण् (य, व, र, ल) के अल्पप्राण प्रयत्न हैं। वर्गों के द्वितीय (ख, छ, ठ, थ फ), चतुर्थ (घ, झ, ढ, ध भ) तथा शल् प्रत्याहार के महाप्राण प्रयत्न हैं। क से म पर्यन्त वर्ण स्पर्श कहलाते हैं। यण्=य, र, ल, व को अन्तःस्थ कहते हैं। श्, ष्, स्, ह् को ऊष्म कहते हैं। अच्=(अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ) स्वर कहलाते हैं। ≍क≍ख में क और ख से पूर्व आधे विसर्ग के समान जिह्वामूलीय कहलाता है। ≍प≍फ यहाँ प और फ से पहले आधे विसर्ग के समान उपध्मानीय कहलाता है। 'अं' और 'अः' इनमें स्वर वर्ण के बाद क्रमशः अनुस्वार और विसर्ग कहलाते हैं।

विमर्श—प्रसङ्गवश सवर्णसंज्ञा में उपयोगी वर्णों के प्रमुख आठ स्थानों का निरूपण किया गया है, जो अधोलिखित वर्णोद्भवस्थान-बोधक चक्र से स्पष्ट हो जायेगा—

स्थान-बोधक चक्र

वर्ण		उच्चारण स्थान
स्वर	व्यञ्जन	स्थान
अ	क, ख, ग, घ, ङ, ह, (: विसर्ग)	कण्ठ
इ	च, छ, ज, झ, ञ, य, श	तालु
ऋ	ट, ठ, ड, ढ, ण, र, ष	मूर्धा
ऌ	त, थ, द, ध, न, ल, स	दन्त
उ	प, फ, ब, भ, म (≍प≍फ–उपध्मानीय)	ओष्ठ
	ञ, म, ङ, ण, न	नासिका तथा स्वस्वर्गीय स्थान
ए, ऐ		कण्ठतालु
ओ, औ		कण्ठोष्ठ
	व	दन्तोष्ठ
	≍क≍ख–जिह्वामूलीय	जिह्वामूल
	(अनुस्वार)	नासिका

इति ≍क≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः। ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः। अं अः इत्यचः परावनुस्वारविसर्गौ। (११) अणुदि-

दशायाम् = 'शास्त्ररीत्या शब्दसाधनसमये' इत्यर्थः, संवृत्तत्वविधायकस्य 'अ अ' इति सूत्रस्य सम्पूर्णामष्टाध्यायीं प्रत्यसिद्धत्वात्।

यत्न दो प्रकार के होते हैं—आभ्यन्तर और बाह्य। वर्णों के मुख से बाहर निकलने से पहले किये गये प्रयत्न 'आभ्यन्तर' कहलाते हैं। उसके पश्चात् होने वाले प्रयत्न बाह्य हैं। वर्णोत्पत्ति में अव्यवहित पूर्व न होने से बाह्य प्रयत्न को गौण प्रयत्न कहा जाता है।[1]

आभ्यन्तर प्रयत्न पाँच हैं—स्पृष्ट, ईषत्स्पृष्ट, ईषद्विवृत, विवृत और संवृत। इनका विवेचन मूलार्थ में किया जा चुका है। जब क से म पर्यन्त २५ व्यञ्जनों में जिह्वा तालु तथा कण्ठ आदि स्थानों का स्पर्श करती है, तब उसे स्पृष्ट प्रयत्न कहते हैं। 'ईषत्स्पृष्ट' का अर्थ है—तालु आदि स्थानों को जिह्वा द्वारा धीरे से स्पर्श करना। 'विवृत' का अर्थ है—जिह्वा एवं तालु आदि उच्चारण स्थानों के बीच का मार्ग खुला रहे। 'ईषद्विवृत' से तात्पर्य है कि उक्त मध्य का मार्ग थोड़ा-सा विवृत=खुला रहे। संवृत प्रयत्न ह्रस्व अकार के व्यवहार काल में होता है। साधनिकादशा में विवृत ही होता है। क्योंकि ह्रस्व 'अ' का संवृत-विधायक सूत्र 'अ अ' (८।४।६८) सम्पूर्ण अष्टाध्यायी के प्रति असिद्ध माने जाने से इस सूत्र के द्वारा किये गये कार्य की ओर शास्त्र की दृष्टि नहीं जाती। अतः वह अकार विवृत माना गया है। वर्णों के आभ्यन्तर प्रयत्न को निम्न चक्र से स्पष्ट किया गया है—

आभ्यन्तरप्रयत्न-बोधक चक्र

आ. प्रयत्न	स्पृष्ट	ईषत्स्पृष्ट	ईषद्विवृत	विवृत	संवृत
संज्ञा	स्पर्श	अन्तःस्थ	ऊष्म	स्वर	
वर्ण	क,ख,ग,घ,ङ च,छ,ज,झ,ञ ट,ठ,ड,ढ,ण त,थ,द,ध,न प,फ,ब,भ,म	य, व, र, ल	श, ष, स, ह	अ, इ, उ ऋ, ऌ, ए ओ, ऐ, औ	ह्रस्व अकार (प्रयोगदशा में)

बाह्य प्रयत्न ग्यारह प्रकार के होते हैं, जिनका विवेचन मूलार्थ में किया गया है। जिन वर्णों का उच्चारण करते समय कण्ठ का विकास हो, उनको विवार कहते हैं। जिन वर्णों के उच्चारण करते समय श्वास चलता हो उसे श्वास, जिनके उच्चारण में नाद=व्यक्त ध्वनि हो उसे नाद तथा जिन वर्णों का उच्चारण करने में गूँज होती हो उनको घोष, तदतिरिक्त को अघोष एवं जिन वर्णों के उच्चारण में प्राणवायु का अल्प उपयोग हो उसे अल्पप्राण और अधिक उपयोग हो उसे महाप्राण कहते हैं।

किन वर्णों का कौन-सा बाह्य प्रयत्न है? यह निम्नलिखित चक्र से स्पष्ट हो जायेगा।

---

[1] आभ्यन्तर प्रयत्न का उपयोग सवर्णसंज्ञा में होता है, परन्तु बाह्य प्रयत्न का उपयोग सवर्णसंज्ञा में नहीं होता। किन्तु आन्तरतम्य परीक्षा अर्थात् वर्णों में परस्पर अत्यन्त समानता का अन्वेषण करते समय बाह्य प्रयत्न की आवश्यकता होती है।

त्सवर्णस्य चाप्रत्ययः १।१।६९। अविधीयमानोऽण् उदिच्च सवर्णस्य संज्ञा स्यात्। अत्रैवाण् परेण णकारेण। कु चु टु तु पु एते उदितः। तदेवम्—अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवं लृकारोऽपि। एचो द्वादशानाम्। अनुना-

(११) संज्ञासूत्रमिदम्। प्रतीयते=विधीयत इति प्रत्ययः, स न भवतीति अप्रत्ययोऽविधीयमानः, आदेशप्रत्ययादिभिन्नोऽण् इत्यर्थः। चकारात् 'स्वं रूपमि'ति सूत्रात् स्वमित्यनुवर्तते, तच्च षष्ठ्यन्ततया विपरिणम्यते। तदाह—**अविधीयमान** इत्यादिना। अण् अविधीयमानः सवर्णबोधकः, उदित् विधीयमानोऽपि सवर्णबोधको भवतीति भावः। अणिति पूर्वेण परेण वा प्रत्याहार इत्याशङ्कायामुच्यते—**अत्रेति**।

बाह्यप्रयत्न-बोधक चक्र

बा. प्रयत्न	विवार, श्वास, अघोष	संवार, नाद, घोष	अल्पप्राण	महाप्राण	उदात्त, अनुदात्त, स्वरित
वर्ण	क, ख, श	ग, घ, ङ, य	क, ग, ङ, य	ख, घ, श	अ ए
	च, छ, ष	ज, झ, ञ, व	च, ज, ञ, व	छ, झ, ष	इ ओ
	ट, ठ, स	ड, ढ, ण, र	ट, ड, ण, र	ठ, ढ, स	उ ऐ
	त, थ	द, ध, न, ल	त, द, न, ल	थ, ध, ह	ऋ औ
	प, फ	ब, भ, म	प, ब, म	फ, भ	लृ

इस प्रकार व्यञ्जन वर्णों में प्रत्येक के चार तथा स्वर वर्णों में प्रत्येक के तीन बाह्यप्रयत्न होते हैं।

(११) पद—अण्, उदित्, सवर्णस्य, च अप्रत्ययः। **अनुवृत्ति—**स्वं रूपम्। **संज्ञासूत्र।**

मूलार्थ—अविधीयमान (प्रत्ययभिन्न) अण् और उदित् सवर्ण के बोधक=सवर्णी अक्षरों के ग्राहक होते हैं।

आचार्यों के व्याख्यान से यहाँ अण् पर-णकार तक लिया जाता है। कु चु टु तु पु—ये उदित् कहलाते हैं। 'अणुदित्' सूत्र का फल इस प्रकार है—'अ' अठारह का बोधक होता है। इसी प्रकार इकार और उकार भी अठारह-अठारह के बोधक हैं। ऋकार तीस का बोधक है एवं लृकार भी तीस का बोधक है। एच्=ए, ओ, ऐ, औ प्रत्येक बारह के बोधक होते हैं। अनुनासिक और अननुनासिक भेद से य व ल दो प्रकार के होते हैं। इसीलिए अनुनासिक 'य व ल' अनुनासिक, निरनुनासिक दोनों का संज्ञाबोधक है।

विमर्श—सूत्र द्वारा विधान किये जाने वाले को प्रत्यय कहते हैं। इससे भिन्न 'अप्रत्ययः' का अर्थ है—जिसका विधान न किया गया हो—अविधीयमान। इस प्रकार अविधीयमान (प्रत्यय-भिन्न) केवल अण् का ही विशेषण है; उदित् का नहीं। अतः प्रत्यय-भिन्न अण प्रत्याहार और उकारेत्संज्ञक उदित्[1] वर्ण अपने स्वरूप तथा सवर्ण के ग्राहक होते हैं।

केवल इसी सूत्र में अण् प्रत्याहार पर-णकार से लिया जाता है। अतः यहाँ अण् पद से अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल वर्णों का बोध होता है। कु=कवर्ग, चु=चवर्ग, टु=टवर्ग, तु=तवर्ग, पु=पवर्ग, ये उत्कारेत्संज्ञक हैं। अतः ये वर्ण भी सवर्ण के बोधक होते हैं। स्पष्ट ज्ञान के लिए वर्णों के प्रकार बतलाये जा रहे हैं। अ=१८, इ=१८, उ=१८, (ऋ और लृ वर्णों की परस्पर सवर्ण संज्ञा होने के कारण ऋ=१८+लृ=१२) ऋ=३०, इसी प्रकार लृ=

---

[1] 'उत् इत् यस्य उदित्। अण् च उदित् च अणुदित्' (बहुव्रीहिगर्भः इतरेतरद्वन्द्वः)।

सिकाननुनासिकभेदेन यवला द्विधा । तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा । (१२) **परः सन्निकर्षः संहिता** १।४।१०९ । वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् । (१३) **हलोऽनन्तराः संयोगः** १।१।७ । अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः । (१४) **सुप्तिङन्तं पदम्** १।४।१४ । सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।

इति सन्ध्युपयोगि संज्ञाप्रकरणम् ॥ १ ॥

अस्मिन्नेव सूत्रे अण् परेण णकारेण गृह्यते । अन्यत्र—'अणोऽप्रगृह्य०' इत्यादौ पूर्वेण णकारेण प्रत्याहारः । अत्र व्याख्यानमेव शरणम् । यथोक्तं भाष्ये—

'परेणैवेण्ग्रहाः सर्वे पूर्वेणैवाण्ग्रहा मताः ।
ऋतेऽणुदित्सवर्णस्येत्येतदेकं परेण तु ॥' इति ।

(१२) परः अतिशयितः, सन्निकर्षः सामीप्यम्—अर्धमात्राधिककालव्यवधानराहित्यम् । अर्धमात्राकालव्यवधानन्तु स्वाभाविकमेव । तदेतदभिप्रेत्याह—**अतिशयित** इत्यादि ।

(१३) **हलोऽनन्तरा इति** । अनन्तराः=अव्यवहिताः, विजातीयव्यवधानरहिता इति यावत् । एवञ्च स्वरवर्णैर्व्यवधानशून्या हल्वर्णाः संयोगसंज्ञका भवन्तीत्यर्थः ।

(१४) **सुप्तिङिति** । 'स्वौजसमौट्०' इति सूत्रे 'सु' इत्यारभ्य सुपः पकारेण

३०, (दीर्घ और प्लुत होने से, ह्रस्व न होने के कारण ए, ओ, ऐ, औ प्रत्येक के १२ प्रकार (भेद) होते हैं ।

विशेष—प्रकृत सूत्र में 'अप्रत्ययः' पद का समावेश होने के कारण प्रत्ययावयव अण्=अ इ उ आदि वर्ण सवर्णों के बोधक नहीं होते । अतः 'त्यदादीनामः' (७।२।१०२) सूत्र से विधीयमान 'अ' से केवल ह्रस्व अकार का ही ग्रहण होता है ।

(१२) पद—परः, सन्निकर्षः, संहिता । **संज्ञासूत्र** ।

मूलार्थ—वर्णों की अत्यन्त सन्निधि=(समीपता) को संहिता कहते हैं ।

विमर्श—प्रकृत सूत्र में संहिता संज्ञा है, 'परः सन्निकर्षः' संज्ञी । परः=अत्यधिक, सन्निकर्षः=सामीप्य । इस प्रकार सूत्रार्थ है—वर्णों की जो अत्यधिक समीपता है उसकी संहिता संज्ञा होती है । एक वर्ण के उच्चारण के बाद अर्धमात्राकाल का व्यवधान स्वाभाविक होता है । उससे अधिक काल का व्यवधान न रहे—यह अर्थ विवक्षित है ।[1] जैसे 'सुधी+उपास्यः' में इकार उकार की अत्यधिक समीपता होने से 'संहितायाम्' (६।१।७०) के अधिकार में 'इको यणचि' (६।१।७४) सूत्र से यण् आदेश इ=य् होकर 'सुद्ध्युपास्यः' रूप होगा ।

(१३) पद—हलः, अनन्तराः, संयोगः । **संज्ञासूत्र** ।

मूलार्थ—अच् वर्णों के व्यवधान से रहित हल् संयोगसंज्ञक होते हैं ।

विमर्श—व्यवधान रहित दो या दो से अधिक व्यञ्जनसमूह 'संयोग' कहलाता है । व्यवधान विजातीय वर्णों का होता है । व्यञ्जन वर्णों के विजातीय स्वर वर्ण हैं । अतः दो या अधिक व्यञ्जनों के बीच में स्वर वर्णों का व्यवधान न हो—यह अर्थ यहाँ अपेक्षित है । जैसे—'अग्निः' शब्द में ग् न् दो व्यञ्जनों का संयोग है ।

(१४) पद—सुप्तिङन्तं, पदम् । **संज्ञासूत्र** ।

---

[1] 'परो यः सन्निकर्षो वर्णानाम्, अर्धमात्राकालव्यवधानं स संहितासंज्ञो भवति ।' (काशिका)

अथ अच्सन्धिः

(१५) इको यणचि ६।१।७७। इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी उपास्य इति स्थिते ॥ (१६) तस्मिन्निति निर्दिष्टे पूर्वस्य १।१।६६। सप्तमी-

प्रत्याहारः। एवं 'तिप्तस्झि०' इत्यत्र 'ति' इत्यारभ्य महिङो ङकारेण प्रत्याहारः। सुप्च तिङ् च सुप्तिङौ, तौ अन्ते यस्य तत्सुप्तिङन्तम्। शब्दरूपन्तु शब्दशास्त्रप्रस्तावाल्लभ्यते। अन्तशब्दश्च प्रत्येकमभिसम्बध्यते 'द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नियमादिति।

इति संज्ञाप्रकरणम्।

(१५) इकः षष्ठ्यन्तम्, यण् प्रथमान्तम्, अचि सप्तम्यन्तम्। इक इत्यत्र स्थानषष्ठी, तथा च 'षष्ठी स्थानेयोगा' (१।१।४९) इति परिभाषया स्थान इति लभ्यते। स्थानञ्च—प्रसङ्गः। अचीत्यत्रौपश्लेषाधिकरणे सप्तमी संहितायामित्यधिकार-

मूलार्थ—सुबन्त और तिङन्त की पद संज्ञा होती है।

विमर्श—प्रकृत सूत्र में पद संज्ञा है और 'सुप्तिङन्तम्' संज्ञी। सुप् का अर्थ है—प्रातिपदिक नाम विहित विभक्तिसंज्ञक प्रत्यय (स्वौजसमौट्' सूत्र में सु से लेकर सुप् तक २१ प्रत्यय) और तिङ् का अर्थ है—धातु से विहित विभक्तिसंज्ञक प्रत्यय ('तिप्तस्झि०' सूत्र से विहित तिप् से लेकर महिङ् तक १८ प्रत्यय) प्रकरणवशात् 'शब्दस्वरूपम्' का अध्याहार किया जाता है। इस प्रकार उक्त दोनों प्रत्यय जिस शब्दस्वरूप के अन्त में रहें, वे क्रमशः सुबन्त और तिङन्त हैं। उन दोनों की पद संज्ञा होती है।

संज्ञाप्रकरण समाप्त।

संज्ञा प्रकरण में सन्धि[1] के प्रसङ्ग में 'संहिता' संज्ञा की उपयोगिता का प्रतिपादन किया जा चुका है।[2] एक पद में, धातु और उपसर्ग के मिलने पर तथा समास में सन्धि नित्य (आवश्यक) होती है। वाक्य में सन्धि करना वक्ता की इच्छा पर निर्भर रहता है।[3] सन्धियाँ पाँच प्रकार की मानी गई हैं—अच्सन्धि, प्रकृतिभाव, हल्सन्धि, विसर्गसन्धि और स्वादिसन्धि। वर्णसमाम्नाय में अच्=स्वरों का प्रथम पाठ होने से पूर्व में अच् सन्धि का विवेचन किया जा रहा है।

(१५) पद—इकः, यण्, अचि। **विधिसूत्र।**

मूलार्थ—इक् के स्थान में यण् आदेश होता है, अच् परे रहते संहिता के विषय में।

विमर्श—प्रकृत सूत्र में इक्=इ उ ऋ ऌ वर्ण स्थानी हैं। यण्=य् व् र् ल् वर्ण आदेश हैं। 'संहितायाम्' का अधिकार है। इस प्रकार इक् और अच् के बीच किसी अन्य वर्ण का व्यवधान न होने पर इक् के स्थान पर यण् आदेश होगा।

---

[1] सन्धिः संहिता इति पर्यायः। सम्पूर्वकाद् धाधातोः 'उपसर्गे घोः किः' इति किप्रत्यये 'सन्धिरि'ति।

[2] 'परः सन्निकर्षः संहिता' (१।४।१०९)।

[3] 'संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥'

निर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य ज्ञेयम् । (१७) स्थानेऽन्तरतमः १।१।५० । प्रसङ्गे सति .सदृशतम आदेशः स्यात् । सुध्य् उपास्य इति जाते ।

त्वेनानुवर्तते । इत्यत आह—**इकः स्थान इत्यादि । सुधी** इति । शोभना धीर्येषान्ते सुधियः । सुधीभिः उपास्यः सुध्युपास्यः । अत्र 'सुधी + उपास्यः' इति स्थिते ।

(१६) **तस्मिन्निति ।** 'तस्मिन्निति सप्तम्यन्तानुकरणम् । निरिति नैरन्तर्ये, दिशिरुच्चारणार्थः ।' 'अचि अणि' इत्युक्ते व्यवहितेऽव्यवहितेऽप्यचि प्राप्तेऽव्यवहित एवेति, पूर्वस्य परस्य च प्राप्ते पूर्वस्यैवेति च नियम्यते ।

(१७) **स्थानेऽन्तरतमः ।** स्थानं = प्रसङ्गः, शास्त्रप्रवृत्तिरिति यावत् । अन्तरशब्दोऽत्र सदृशपर्यायः, अतिशयितोऽन्तरः अन्तरतमः । अर्थादेकस्य स्थानिन अनेकादेशप्रसङ्गे सति यः स्थानार्थगुणप्रमाणतः स्थानिना सदृशतमः स एवादेशो भवति ।

विशेष—'यस्य स्थानेऽन्यद्विधीयते तत्स्थानि । येन विधीयमानेन अन्यत् प्रसक्तं निवर्त्तते स आदेशः ।' अर्थात् विद्यमान होकर जो बाद में न रहे, वह 'स्थानी' कहलाता है । जिसके आ जाने पर स्थानी न रहे, वह 'आदेश' कहलाता है । आदेश शत्रुवत् होता है, जो स्थानी को हटाकर स्थित होता है ।

(१६) पद—तस्मिन्, इति, निर्दिष्टे, पूर्वस्य । **परिभाषासूत्र ।**

मूलार्थ—(सूत्र में) सप्तम्यन्त पद का उच्चारण करके विधीयमान कार्य वर्णान्तर के व्यवधान से रहित पूर्व के स्थान में होता है ।

विमर्श—सूत्र में 'इति' शब्द अर्थनिर्देशार्थं प्रयुक्त किया गया है । अतः 'तस्मिन्' शब्द से 'सप्तमी विभक्ति' यह अर्थ लिया जाता है । तदनुसार सप्तमी-निर्देश से विधीयमान कार्य वर्णान्तर से अव्यवहित पूर्व को होता है । परिणामतः 'सुधी+उपास्यः' में 'इको यणचि' सूत्र द्वारा विधीयमान कार्य यण्, प्रकृत परिभाषासूत्र से एकवाक्यता होने पर इक् और अच् के बीच किसी अन्य वर्ण का व्यवधान न होने पर धकारोत्तरवर्ती ईकार के स्थान में ही हुआ ।

(१७) पद—स्थाने, अन्तरतमः । **परिभाषासूत्र ।**

मूलार्थ—प्रसङ्ग रहने पर सदृशतम आदेश होता है ।

विमर्श—जब एक वर्ण के स्थान में अनेक आदेशों की प्राप्ति होती है, तब प्राप्त होने वाले आदेशों के मध्य में जो सबसे अधिक सदृश हो, उसके स्थान में वही आदेश होता है । जैसे 'सुधी+उपास्यः' में 'ई' के स्थान में यण्=य् व् र् ल् चारों की प्राप्ति है, किन्तु ई तथा य् का तालु स्थान समान होने से उक्त चारों वर्णों में से 'य्' सबसे अधिक निकट है । अतः 'ई' के स्थान पर 'य्' आदेश हुआ ।

सादृश्य मुख्यतया चार प्रकार के होते हैं—१. स्थानतः, २. अर्थतः, ३. गुणतः, ४. प्रमाणतः । (१) दध्यत्र—दधि+अत्र में स्थानी इकार तथा आदेश 'य' दोनों तालु स्थान वाले हैं, अतः स्थानकृत साम्य से इ के स्थान में 'य्' यण् हुआ । (२) क्रोष्टा—यहाँ शृगाल-वाचक क्रोष्टु शब्द और क्रोष्टृशब्द समानार्थक हैं । अतः अर्थकृत सादृश्य को लेकर 'तृज्वत्क्रोष्टुः' सूत्र से क्रोष्टु शब्द के स्थान में 'क्रोष्टृ' आदेश हुआ । (३) वाग्घरिः—'वाग्+हरिः' में संवार, नाद, घोष तथा महाप्राण प्रयत्न वाले हकार में वैसा ही घकार हुआ, क्योंकि उक्त प्रयत्न दोनों के समान हैं । यहाँ गुण से तात्पर्य प्रयत्नों से है । (४) प्रमाणकृत आन्तर्य में मात्रासाम्य अपेक्षित है । अमुष्मै,

(१८) अनचि च ८।४।४७। अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धस्य द्वित्वम्। **(१९) झलां जश् झशि ८।४।५३।** झलां जश् स्यात् झशि परे। इति पूर्वधस्य दः **(२०) संयोगान्तस्य लोपः ८।२।२३।** संयोगान्तं यत्पदं तस्य लोपः स्यात्। **(२१) अलोऽन्त्यस्य १।१।५२।** षष्ठीनिर्दिष्टोऽन्त्यस्याल आदेशः स्यात्। इति

---

(१८) **अनचि च।** 'अनचि' इत्यत्र प्रसज्यप्रतिषेधः। न अच् अनच् तस्मिन्ननचि। 'यरोऽनुनासिकेऽनुनासिको वे'त्यतो 'यर' इति 'वा' इति चानुवर्तते। 'अचो रहाभ्यां द्वे' इत्यत अच इति द्वे इति चानुवर्तते। अत आह—**अचः परस्येत्यादिना।**

(२१) **अलोऽन्त्यस्य।** अल इति षष्ठ्यन्तम्। अत्र 'षष्ठी स्थाने' इति सूत्रमनुवर्तते। तच्च षष्ठी प्रथमान्ततृतीयान्ततया विपरिणम्यते। विधीयमान आदेश इत्यध्या-

---

अमूभ्याम्—यहाँ क्रमशः ह्रस्व अकार के स्थान में ह्रस्व उकार तथा दीर्घ आकार के स्थान में दीर्घ ऊकार हुए हैं—सूत्र—'अदसोऽसेर्दादुदोमः' (८।२।८०)।

विशेष—प्रकृत सूत्र में 'षष्ठी स्थानेयोगा' से 'स्थाने' पद की अनुवृत्ति आने से पुनः 'स्थाने' ग्रहण का फल यह है कि जहाँ अनेक प्रकार के सादृश्य प्राप्त हों, वहाँ स्थानकृत सादृश्य ही बलवान् होता है।

(१८) पद—अनचि च। **अनुवृत्ति**—यरः, वा, अचः, द्वे। **विधिसूत्र।**

सूलार्थ—अच् से परे यर् को विकल्प से द्वित्व होता है, किन्तु अच् परे रहते द्वित्व नहीं होता। इस प्रकार 'सु ध् य् उपास्यः' में द्वित्व होकर दो धकार हुए—सु ध् ध् य् उपास्य इति।

विमर्श—प्रकृत सूत्र में 'यरोऽनुनासिके०' सूत्र से 'यरः' तथा 'वा' एवं 'अचो रहाभ्यां द्वे' से 'अचः' तथा 'द्वे' की अनुवृत्ति आती है। इन सब पदों को जोड़ कर इस प्रकार अर्थ होता है—'अच्' से परे 'यर्' के स्थान में द्वित्व होता है, किन्तु यर् से परे यदि अच् वर्ण हो तो द्वित्व नहीं होगा।

(१९) पद—झलां जश् झशि। **विधिसूत्र।**

सूलार्थ—झल् के स्थान पर जश् आदेश होता है, झश् परे रहते।

विमर्श—झल् प्रत्याहार बोध्य वर्णों के स्थान पर झश् प्रत्याहार बोध्य वर्णों के पश्चाद्वर्ती होने पर जश् प्रत्याहार बोध्य वर्ण (ज् ब् ग् ड् द्) हो जाते हैं। इस प्रकार 'सु ध् ध् य् उपास्यः' में पूर्वधकार के स्थान पर स्थानकृत सादृश्य होने के कारण दन्तस्थानीय (जश् प्रत्याहार बोध्य वर्ण) 'द्' हुआ। क्योंकि पूर्वधकार का पश्चाद्वर्ती धकार झश् प्रत्याहार का है।

(२०) पद—संयोगान्तस्य लोपः। **अनुवृत्ति**—पदस्य। **विधिसूत्र।**

मूलार्थ—संयोगान्त पद का लोप होता है।

विमर्श—'पदस्य' (८।१।१६) के अधिकार में होने से प्रकृत सूत्र में 'पदस्य' की अनुवृत्ति आती है। 'अलोऽन्त्यस्य' परिभाषासूत्र के साथ एकवाक्यता होने से यह अर्थ निष्पन्न होता है—जिस पद के अन्त में संयोग (संयुक्त वर्ण) हों, उसके अन्त्य वर्ण का लोप होता है।

(२१) पद—अलः, अन्त्यस्य। **अनुवृत्ति**—षष्ठी (स्थाने)। **परिभाषासूत्र।**

मूलार्थ—षष्ठी-निर्देश से विधीयमान कार्य अन्त्य अल् के स्थान में हो।

विमर्श—प्रकृत सूत्र में 'षष्ठी स्थानेयोगा' सूत्र से षष्ठी व स्थाने की अनुवृत्ति आती हैं। अल् प्रत्याहार के अन्तर्गत सभी वर्ण आ जाते हैं। इस प्रकार 'सूत्र में षष्ठ्यन्त पद का निर्देश कर

यलोपे प्राप्ते । (वा० यणः प्रतिषेधो वाच्यः) सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः । लाकृतिः । (२२) एचोऽयवायावः ६।१।७८ । एचः क्रमात् अय्, अव्, आय्, आव्,

---

ह्वियते । अतः स्थाने विधीयमान आदेशः षष्ठीनिर्दिष्टस्य यः अन्त्य अल् तस्य स्यादित्यर्थः । **यणः प्रतिषेध** इति । संयोगान्तं यत्पदं तदन्तस्य यणो लोपस्य प्रतिषेधो वक्तव्य इत्यर्थः । **सुद्ध्युपास्य** इति । अत्र 'सुधी + उपास्यः' इति स्थिते 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रेण सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्यैवेति नियमविधानात् 'स्थानेऽन्तरतमः' इति सूत्रेण च सदृशतमादेशविधाननियमात् 'इको यणचि' इत्यनेन ईकारस्य स्थाने 'य्' इति यणादेशे 'अनचि च' इति सूत्रेण धकारस्य विकल्पेन द्वित्वे, सु ध् ध् य् + उपास्य इति जाते 'झलां जश् झशि' इति सूत्रेण प्रथमधकारस्य दकारे 'सु द् ध् य्+उपास्यः' इत्यवस्थायाम् 'अलोऽन्त्यस्ये'ति परिभाषैकवाक्यतया 'संयोगान्तस्य लोपः' इति सूत्रेण यकारस्य लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन यलोपनिषेधे सति 'सुद्ध्युपास्यः' इति रूपं सिद्धम् । मधोः अरिः मध्वरिः = मधुनामकदैत्यस्य शत्रुरिति । 'मधु + अरिः' इति च्छेदः । धातुरंशः धात्रंशः । ऌ + आकृतिः = लाकृतिः ।

(२२) **एचोऽयवायावः ।** एचः षष्ठ्यन्तम्, अयवायावः प्रथमान्तम् । अय् च अव् च आय् च आव् चेति विग्रहः । 'इको यणची'त्यतोऽचीत्यनुवर्तते ।

जहाँ आदेश का विधान किया गया हो, वह अन्तिम वर्ण को होता है ।' तदनुसार 'संयोगान्तस्य लोपः' सूत्र की प्रकृत सूत्र से एकवाक्यता होने पर 'सु द् ध् य् उपास्यः' यहाँ अन्तिम वर्ण 'य्' का लोप प्राप्त हुआ । उसका निषेध वार्तिक द्वारा किया जा रहा है—

(वा०) 'यणः प्रतिषेधो वाच्यः' संयोगान्त पद के अन्तिम यण् = य् व् र् ल् का लोप नहीं होता, ऐसा जानना चाहिए । इस प्रकार 'सुद्ध्युपास्यः' रूप सिद्ध हुआ । इसका अर्थ है— 'सुधीभिः उपास्यः' अर्थात् विद्वानों द्वारा उपासना करने योग्य ।

'मधु + अरिः' यहाँ उकार को यण् वकार—'म ध् व् अरिः'—ध् का द्वित्व, जश्त्व पूर्व ध् को द् होकर 'मद्ध्वरिः' = मधु नामक दैत्य के शत्रु = विष्णु । 'धातृ + अंशः' ऋकार के स्थान पर यण् 'र्' तथा 'त्' को द्वित्व होकर 'धात्त्रंशः' रूप हुआ । धात्रंशः = ब्रह्मा का अंश । 'ऌ + आकृतिः' = लाकृतिः—ऌ के स्थान में 'ल्' होकर 'लाकृतिः' रूप सिद्ध होगा = 'ऌ की आकृति की तरह स्वरूप वाला' अर्थ है ।

(२२) **पद**—एचः, अयवायावः । **अनुवृत्ति**—अचि, संहितायाम् । **विधिसूत्र ।**

मूलार्थ—एच् के स्थान में क्रम से अय्, अव्, आय्, आव् आदेश होते हैं, अच् परे रहते ।

विमर्श—यहाँ एच् = ए, ओ, ऐ, औ स्थानी है और अय्, अव्, आय्, आव् आदेश हैं । दोनों की संख्या चार है । 'इको यणचि' सूत्र से 'अचि' पद अनुवृत्त है । तदनुसार यथासंख्यपरिभाषा द्वारा स्थानी तथा आदेश की समान संख्या होने के कारण क्रमशः ए = अय्, ओ = अव्, ऐ = आय् और औ = आव् आदेश होते हैं ।

प्रसङ्गवश उद्देश्य और विधेय के समानसंख्यक होने पर व्यवस्था-निर्देशक सूत्र की व्याख्या की जा रही है ।

एते स्युरचि । (२३) यथासङ्ख्यमनुदेशः समानाम् १।३।१० । समसम्बन्धी विधिर्यथासङ्ख्यं स्यात् । हरये । विष्णवे । नायकः । पावकः । (२४) वान्तो यि प्रत्यये ६।१।७९ । यादौ प्रत्यये परे ओदौतोरवावौ स्तः । गव्यम् । नाव्यम् । (वा० अध्वपरि-

(२३) **यथासङ्ख्यमिति** । अत्र समानामिति सम्बन्धसामान्ये षष्ठी । साम्यञ्चात्र सङ्ख्यातो विवक्षितम् । अनुदिश्यत इत्यनुदेशः । उद्देश्यप्रतिनिर्देश्ययोः समसङ्ख्यत्वे क्रमात्कार्यं स्यादित्यर्थः । हरे + ए = हरये । विष्णो + ए = विष्णवे । नै + अकः = नायकः । पौ + अकः = पावकः ।

(२४) **यकारादाविति** । अत्र 'यि' इति प्रत्यये इत्यस्य विशेषणम् । सप्तम्यन्ते वर्णग्रहणे यो विधिः सः—तद्वर्णादौ ज्ञेय इत्यर्थक 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति परिभाषया तदादिलाभेन यकारादावित्यर्थलाभः । **गव्यमिति** । गोशब्दात् 'गोपयसोर्यत्' इत्यनेन विकारार्थे यत्प्रत्यये कृते 'गो + यम्' इति स्थिते, ओकारस्याऽच्परकत्वाभावात् 'एचोऽयवायावः' इत्यनेनावादेशाप्राप्तौ 'वान्तो यि प्रत्यये' इत्यनेन यकारादौ

(२३) पद—यथासंख्यम् , अनुदेशः, समानम् । **परिभाषासूत्र** ।

मूलार्थ—समान सम्बन्धी विधि क्रमशः संख्यानुसार होती है ।

विमर्श—यह परिभाषा सूत्र है । स्थानी और आदेश की समान संख्या होने पर आदेश की प्रवृत्ति क्रमानुसार प्रथम को प्रथम, द्वितीय को द्वितीय, तृतीय को तृतीय—इस प्रकार से होती है । यहाँ 'यथासंख्यम्' का अर्थ है (संख्यामनतिक्रम्य–अव्ययीभाव स०)—क्रमानुसार[1] । इस परिभाषा की उपस्थिति से पूर्व सूत्र द्वारा एच्—ए, ओ, ऐ, औ के स्थान पर विधीयमान आदेश क्रमशः होते हैं ।

हरे+ए, विष्णो+ए, नै+अकः, पौ+अकः में क्रमशः ए=अय्—हरये (हरि के लिए)। ओ=अव्—विष्णवे (विष्णु के लिए)। ऐ=आय्—नायकः (नेता)। औ=आव्—पावकः (अग्नि)।

(२४) पद—वान्तः यि प्रत्यये । **विधिसूत्र** ।

मूलार्थ—यकारादि प्रत्यय के परे 'ओ' तथा 'औ' को वान्त (अव्, आव्) आदेश होते हैं । गौ का विकार—गव्यम् (घी, दूध इत्यादि)। यहाँ विकार अर्थ में 'गोपयसोर्यत्' सूत्र से यत्प्रत्यय, विभक्तिकार्य गो+यम्, ओ=अव् आदेश हुआ है । नाव्यम् (नावा तार्यम्=नौका से पार करने योग्य जल)—नौ+यम् ('नौवयोधर्म०' से यत्प्रत्यय), औ=आव् <नाव्यम् ।

विमर्श—प्रकृत सूत्र में 'अव्' तथा 'आव्' आदेशों के लिए 'वान्त' पद का प्रयोग किया गया है । अतः 'येन विना यदनुपपन्नं तत्तेनाक्षिप्यते' के अनुसार 'अव्' तथा 'आव्' आदेशों से 'ओ' तथा 'औ' स्थानी का ग्रहण किया जाता है । इस प्रकार सन्धि के विषय में यकारादि परे रहने पर ओ एवम् औ के स्थान में क्रमशः अय् तथा आव् आदेश होते हैं ।

(वा०) अध्व=मार्ग के परिमाण (नाप) अर्थ में गो शब्द को यूति शब्द के परे वान्त आदेश होता है । उदाहरण—गव्यूतिः । गो+यूतिः, ओ=अव्—गव्यूतिः (यूतिः—यु+क्तिन् (ति)

---

[1] 'सङ्ख्याशब्देन क्रमो लक्ष्यते । यथासङ्ख्ये यथाक्रममनुदेशो भवति ।' (काशिका)

माणे च) गव्यूतिः । (२५) धातोस्तन्निमित्तस्यैव ६।१।८० । यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव नान्यस्य । लव्यम् । अवश्यलाव्यम् । तन्निमित्तस्य

प्रत्यये परेऽवादेशे गव्यमिति रूपम् । नावा तार्यं नाव्यम् । नौ + यम् । 'नौवयोधर्म०' इत्यादिना यत्प्रत्ययः । **अध्वपरिमाणे चेति** । मार्गपरिमाणे गम्यमाने गोशब्दाद् यूतिशब्दे परेऽवादेशो भवतीत्यर्थः । गो + यूतिः = गव्यूतिः, क्रोशयुगमित्यर्थः ।

(२५) **धातोस्तन्निमित्तस्यैवेति** । अत्र एच इति 'वान्तो यि प्रत्यय' इति चानुवर्तते । यादिप्रत्यये परे धातोरेचो भवन् वान्तादेशः यादिप्रत्ययनिमित्तकस्यैव एचो भवति, अन्यस्य नेत्यर्थः । सूत्रारम्भसामर्थ्यादेव सिद्धे एवकारस्तु विपरीतनियमवारणार्थः । अन्यथा तन्निमित्तस्यैचश्चेद्वान्तादेशस्तर्हि धातोरेवेति नियमः स्यात् तथा च 'बाभ्रव्य' इत्यत्र वान्तादेशो न स्यात् । **लव्यमिति** । लूञ्धातोः 'अचो यत्' इति यत्प्रत्यये 'सार्वधातुकार्धधातुकयोरि'ति गुणे 'लो + यम्' इत्यत्र वान्तादेशे लव्यमिति रूपम् । **अवश्यलाव्यमिति** । 'ओरावश्यके' इति लूञो ण्यत् 'अचो ञ्णिति' इत्यनेन ऊकारस्य वृद्धिः औकारः, अवश्यमित्यव्ययम्, मयूरव्यंसकादित्वात् समासः । औकारस्य

'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' से निपातन से उ को दीर्घ ऊ=यूतिः)। अमरकोष के अनुसार 'गव्यूतिः' का अर्थ 'दो कोस' है ।

(२५) पद—धातोः, तन्निमित्तस्य एव । **अनुवृत्ति**—वान्तः, यि प्रत्यये, एचः । **नियमसूत्र** ।

मूलार्थ—यकारादि प्रत्यय के परे धातु के एच् को यदि वकारान्त आदेश हो तो यकारादिप्रत्यय-निमित्तक एच् को ही हो; अन्य को नहीं । सूत्र में तन्निमित्तक पद का ग्रहण क्यों किया गया ? ओयते । औयत ।

विमर्श—यह नियमसूत्र है । पूर्व सूत्रों से यहाँ 'वान्तः, यि प्रत्यये तथा 'एचः' पदों की अनुवृत्ति आती है । अतः धातु के अवयव एच्=स्थानी है और वान्त=अव् तथा आव् आदेश हैं । सामान्यतः पूर्व सूत्र से यकारादि प्रत्यय के परे रहते ओ तथा औ को क्रमशः अव् तथा आव् आदेश होते हैं, किन्तु यह सभी धातुओं में नहीं होता । उस सामान्य वचन का यहाँ नियमन किया गया है । नियम की व्यवस्था 'एव' शब्द द्वारा की गई है । तदनुसार य् वर्ण से प्रारम्भ होने वाले प्रत्यय के परे रहते धातु के एच् को वान्तादेश हो तो वह एच् यादि-प्रत्यय-निमित्तक ही होना चाहिए; अन्यथा नहीं । **उदाहरण**—१. लव्यम् । √लू+यत् (य) गुण लो+य्, वान्त=अव् आदेश<लव्य+सु (अम्)=लव्यम् (काटने योग्य) । इस उदाहरण में यकारादि प्रत्यय 'यत्' है, उसी को निमित्त मानकर 'सार्वधातु०' से उ=ओ गुण । अतः ओकार के स्थान पर अव् आदेश हुआ । २. अवश्यलाव्यम्—'अवश्य+√लू+ण्यत् (य) 'अचो ञ्णिति' सूत्र से उ को वृद्धि 'औ'<अवश्य लौ+य औ=अवादेश<अवश्यलाव्य+सु (अम्)—अवश्यलाव्यम् (अवश्य काटने योग्य) । **प्रत्युदाहरण**—'ओयते । औयत ।' प्रकृत सूत्र में तन्निमित्तक पद का ग्रहण होने से 'य्' वर्ण से आरम्भ होने वाले प्रत्यय को निमित्त मानकर होने वाले ओ तथा औ क्रमशः अव् तथा आव् आदेशों का विधान किये जाने से 'ओयते' तथा 'औयत' में वान्त आदेश=(अव् तथा आव्) नहीं होते हैं । इन दोनों प्रत्युदाहरणों में ओ तथा औ यादि-प्रत्यय-निमित्तक नहीं है । यथा—(१) ओयते—आङ्+√वेञ्+लट् (कर्म में प्रत्यय) (ते), यक्—आ+वे+

किम् ? ओयते । औयत । (२६) क्षय्यजय्यौ शक्यार्थे ६।१।८१ । यान्तादेशनिपातनार्थमिदम् । क्षय्यम् । जय्यम् । शक्यार्थे किम् ? क्षेतुं जेतुं योग्यं क्षेयं पापं जेयं मनः । (२७) क्रय्यस्तदर्थे ६।१।८२ । तस्मै प्रकृत्यर्थायेदं तदर्थम् । क्रेतारः क्रीणीयुरिति बुद्धया आपणे प्रसारितं क्रय्यम् । क्रेयमन्यत् । क्रयणार्हमित्यर्थः । (२८) अदेङ्गुणः

धात्ववयवत्वाद् यादिप्रत्ययनिमित्तकत्वाच्च वान्तादेशः । तन्निमित्तस्यैवेति किम् ? नियमस्य किं प्रयोजनमित्याशयः । **ओयत इति** । आङ्पूर्वाद् वेञ्धातोः कर्मणि लट् 'भावकर्मणोः' इत्यात्मनेपदे यकि, सम्प्रसारणे पूर्वरूपे 'अकृत्' इति दीर्घे, आङा सहोकारस्य गुणे तस्य यादिप्रत्ययनिमित्तकत्वाभावान्न वान्तादेशः । **औयत इति** । वेञः कर्मणि लङ्, यगादि प्राग्वत् आटि 'आटश्चे'ति वृद्धिः ।

(२६) **क्षय्यजय्याविति** । क्षिधातोः जिधातोश्च 'अचो यत्' इति यत्प्रत्यये गुणे क्षे+यम्, जे+यम्—इत्यत्र अयादेशस्याप्राप्तौ शक्यार्थे निपातनम्, **क्षेयमिति** । 'अर्हे कृत्यतृचश्चे'ति यत् । स च न शक्यार्थ इति नात्र यान्तादेशः ।

(२७) **प्रकृत्यर्थायेति**—प्रकृत्यर्थो द्रव्यविनिमयः ।

य+ते, व=उ (सम्प्रसारण) पूर्वरूप<आ+उ+य+ते गुण<ओयते । (२) औयत—आ+√वेञ्+लङ् (कर्म में) त, यक्—आ+वे+य+त, सम्प्रसारण, पूर्वरूप<आ+उ+य+त, आट् का आगम, दीर्घ, 'आटश्च' से वृद्धि=औयत (बुना गया) ।

(२६) पद—क्षय्यजय्यौ, शक्यार्थे । **विधिसूत्र ।**

मूलार्थ—शक्य अर्थ में क्षय्य और जय्य निपातन[1] से सिद्ध होते हैं । क्षय होने में शक्य=क्षय्यम् । जीतने में समर्थ=जय्यम् । सूत्र में शक्यार्थ पद का ग्रहण क्यों किया ? योग्यता अर्थ में यान्तादेश न हो, अतः 'शक्यार्थ में' कहा गया है । यथा—क्षेयम् (पापम्)=नाश करने योग्य पाप । जेयम् मनः (जीतने योग्य मन) ।

विमर्श—शक्य अर्थ में निपातन (विशेष विधान) करने के लिए प्रकृत सूत्र की रचना की गई है । पूर्व सूत्र से अय् आदेश की अप्राप्ति में यह व्यवस्था की गई है । उदाहरण—१. √क्षि+यम् (यत्), गुण <क्षे+यम्, निपातन से अय् आदेश—क्षय्यम् । २. जय्यम्—जि+यम् (यत्), गुण, जे+यम्, अय् आदेश<जय्यम् ।

(२७) पद—क्रय्यः, तदर्थे । **विधिसूत्र ।**

मूलार्थ—'ग्राहक खरीदें' इस दृष्टि से जो वस्तु बाजार में फैलाकर रखी जाती है—इस अथ में 'क्रय्यम्' शब्द निपातन से सिद्ध होता है । बेचने योग्य अर्थ में 'क्रेयम्' होता है ।

विमर्श—यहाँ 'तदर्थे' पद से धातु का अर्थ लिया जाता है (तस्मै इदं=तदर्थम्, तस्मिन्) । तदनुसार क्री धातु का अर्थ द्रव्य-विनिमय=खरीदना है । मूल्य देकर खरीदने हेतु प्रसारित वस्तु के लिए 'क्रय्यम्' का प्रयोग होता है । प्रक्रिया इस प्रकार है—√क्री+यम् (यत्), गुण<क्रे+

---

[1] जो शब्द लोक में जैसे सुने जाते थे—प्रचलित थे, उनका उसी रूप में आचार्यों ने उल्लेख कर दिया है । ऐसे शब्दों के विषय में उनके अर्थ के अनुसार प्रकृति-प्रत्यय कल्पित कर दिये जाते हैं—

'धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च ।
अनुबन्धविकाराणां रूढ्यर्थं च निपातनम् ॥' —महाभाष्यप्रदीपः ५।२।१२४

१।१।२ । अदेङ् च गुणसंज्ञः स्यात् । (२९) तपरस्तत्कालस्य १।१।७० । तः परो यस्मात् तात्परो वा उच्चार्यमाणो वर्णः समकालस्यैव संज्ञा स्यात् । (३०) आद् गुणः ६।१।८७ । अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् । उपेन्द्रः । रमेशः । गङ्गोद-

---

(२८) **अदेङ्गुण इति** । अच्च एङ् चेति समाहारद्वन्द्वः । अत् एङ् इत्युभयत्र तपरकरणम् । तथा च 'अ' इति ह्रस्वाकारस्यैव 'ए, ओ' इति द्विमात्रस्यैव गुणसंज्ञा ।

(२९) **तपर इति** । अत्र बहुव्रीहितत्पुरुषसमासद्वयम्, अत आह—**तः परो यस्मादिति** । समकालस्यैव = उच्चार्यमाणसमानकालिकस्यैवेत्यर्थः ।

(३०) **आद्गुण इति**—'एकः पूर्वपरयोः' इत्यधिकारः । 'इको यणचि' इत्यतोऽचि इत्यनुवर्तते । अत आह—**अवर्णादचीत्यादिना** । **उपेन्द्र** इति । 'उप + इन्द्रः' इति स्थितेऽत्र 'आद्गुणः' इत्यनेन पूर्वपरयोः अकार-इकारयोः स्थाने कण्ठतालुस्थानकः

यम्, निपातन से अय् आदेश—क्रय्यम् । 'केवल बेचने योग्य वस्तु, जो घर में या अन्यत्र रखी है' अर्थ में 'क्रेयम्' प्रयोग होता है । यहाँ अय् आदेश नहीं होता ।

(२८) पद—अदेङ्, गुणः । **संज्ञासूत्र ।**

मूलार्थ—ह्रस्व अकार तथा एङ्=ए, ओ की गुणसंज्ञा होती है ।

(२९) पद—तपरः तत्कालस्य, **अनुवृत्ति**—सवर्णस्य, स्वं रूपम् । **संज्ञासूत्र ।**

मूलार्थ—तकार है परे जिससे अथवा तकार से परे (त् से पूर्व अथवा पश्चात्) जो अच्, वह उच्चार्यमाण समान काल का ही बोधक होता है ।

विमर्श—प्रकृत सूत्र में पूर्व दो सूत्रों से 'सवर्णस्य' तथा 'स्वं रूपम्' की अनुवृत्ति आती है । 'तपरः' पद में बहुव्रीहि और तत्पुरुष दो समास हैं—(१) तः परः यस्मात् सः तपरः (बहु०) । (२) तात् परः = तपरः (तत्पुरुषः) । 'तत्कालः' पद में उत्तरपदलोपी बहुव्रीहि समास है—तत्काल इव कालो यस्य सः । इस प्रकार 'त्' है परे जिससे अथवा 'त्' से परे जो स्वर वर्ण, वह उच्चार्यमाण समानकाल (मात्रा) का बोधक होता है । उदाहरणतः—उक्त सूत्र 'अदेङ् गुणः' में 'अत्' शब्द में उच्चरित अकार केवल ह्रस्व (छह प्रकार का) अकार का बोधक होगा, क्योंकि अ के बाद तकार है । इसी प्रकार 'एङ्' पद में ए तथा ओ केवल द्विमात्रिक एकार तथा ओकार के बोधक होंगे, क्योंकि यहाँ एङ् पद 'त्' के पश्चात् आया है (तात् परः) ।

विशेष—'अणुदित्० इत्यादि ग्रहणकशास्त्र के अन्तर्गत समकाल का बोध कराने वाला होने से इस सूत्र को संज्ञासूत्र कहा गया है ।

(३०) पद—आत्, गुणः । **अनुवृत्ति**—अचि । **विधिसूत्र ।**

मूलार्थ—अवर्ण से अच् परे रहते पूर्व-पर के स्थान में गुण रूप एकादेश होता है ।

विमर्श—सूत्र में दो पद हैं—'आत्' और 'गुणः' । 'आत्' पञ्चमी विभक्ति के एकवचन का रूप है । तपरकरण नहीं है । 'इको यणचि' से 'अचि' पद की अनुवृत्ति आती है । 'एकः पूर्वपरयोः' का अधिकार है । तदनुसार अवर्ण से अच् परे रहते पूर्व और पर दोनों वर्णों के स्थान में एक गुण (अ, ए, ओ) आदेश होता है । **उदाहरण**—उप + इन्द्रः = उपेन्द्रः । यहाँ पकारोत्तरवर्ती अकार के पश्चात् अच् वर्ण 'इ' है । अतः दोनों वर्ण अ + इ (स्थान-साम्य होने के कारण मिलकर) गुण 'ए' हो गये । अ (कण्ठ स्थान) + इ (तालु) = ए (कण्ठतालु स्थान) । इसी

कम् । (३१) उपदेशेऽजनुनासिक इत् १।३।२ । उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञाः । **(३२) उरण् रपरः १।१।५१ ।** ऋ इति त्रिंशतः संज्ञेत्युक्तम्, तत्स्थाने

गुणसंज्ञकः एकारो जातः, तेन 'उपेन्द्रः' इति सिद्धम् । रमा + ईशः, गङ्गा + उदकम् इति च्छेदः ।

(३१) **उपदेशेऽजित्** । उपशब्द आद्यर्थकः । दिशिरुच्चारणक्रियायाम् । उपदेशनमुपदेशः, भावे घञिति मनोरमाकारः । अनिर्ज्ञातस्वरूपस्य कार्यार्थं स्वरूपज्ञापनार्थमपूर्वोच्चारणं ह्युपदेशः । **प्रतिज्ञेति** । प्रतिज्ञायत इति प्रतिज्ञा । अनुनासिकस्य भावः आनुनासिक्यम् । प्रतिज्ञा आनुनासिक्यं येषां ते प्रतिज्ञानुनासिक्याः = पाणिन्यादिप्रोक्ता वर्णाः प्रतिज्ञामात्रबोध्यानुनासिक्यवन्त इत्यर्थः । **लण्सूत्रस्येति** । लण्सूत्रे तिष्ठतीति लण्सूत्रस्थः, स चासौ अवर्णश्च लण्सूत्रस्थावर्णः, तत्र सहोच्चार्यमाणो रेफः 'र्' इत्येवंरूपः रेफलकारयोः संज्ञा = बोधक इत्यर्थः ।

(३२) **उरणिति**--उः अण् रपरः इति च्छेदः । 'उः' इति ऋशब्दस्य षष्ठ्येकवचनम् । 'स्थानेऽन्तरतमः' इत्यतः स्थाने ग्रहणमनुवर्तते तदाह–**ऋ इत्यादिना** । रपरः

प्रकार—रमा + ईशः = रमेशः । आ + ई = ए । गङ्गा + उदकम् = गङ्गोदकम् । आ + उ = ओ (गङ्गा का जल) ।

'गुणसन्धि-बोधक चक्र'

स्थानी + स्थान आदेश

अ (कण्ठ) + इ (तालु) = ए—(कण्ठतालु)
अ (कण्ठ) + उ (ओष्ठ) = ओ (कण्ठोष्ठ)
अ (कण्ठ) + ऋ (मूर्धा) = अ (अर्—कण्ठमूर्धा)
अ (कण्ठ) + ऌ (दन्त) = अ (अल्—कण्ठदन्त)
} द्रष्टव्य— 'उरण् रपरः'

विशेष—गुण-सन्धि की बाधक दीर्घ तथा वृद्धि सन्धि है ।

(३१) पद—उपदेशे, अच् , अनुनासिक, इत् । **संज्ञासूत्र ।**

मूलार्थ—उपदेशावस्था में अनुनासिक अच् की इत्संज्ञा होती है। गुरु-परम्परा द्वारा निश्चयात्मक कथन से पाणिनि प्रोक्त वर्णों की अनुनासिकता का ज्ञान किया जाता है । 'लण्' सूत्र में इत्संज्ञक अ वर्ण के साथ उच्चरित रेफ 'र्' और 'ल्' का बोधक होता है ।

विमर्श—प्रकृत सूत्र के अनुसार पाणिनि आदि त्रिमुनि द्वारा संकेतित अनुनासिक अच् वर्ण इत्संज्ञक होते हैं । प्राचीन काल में कोई चिह्न-विशेष अच् वर्णों की अनुनासिकता का द्योतक होता था । अब केवल इत्संज्ञा रूप कार्य से कारण स्वरों की अनुनासिकता जानी जाती है । उदाहरणतः 'लण्' में लकारोत्तरवर्ती 'अ'कार की इत्संज्ञा पाणिनि द्वारा अनुनासिक माने जाने के कारण होती है । परिणामस्वरूप 'हयवरट्' सूत्र का 'र्' 'लण्' के अ के साथ मिलकर 'र' प्रत्याहार के रूप में र् और ल् इन दो वर्णों का बोध कराता है ।

(३२) पद—उः अण् , रपरः । **अनुवृत्ति**—स्थाने । **परिभाषासूत्र ।**

मूलार्थ—ऋकार के तीस प्रकार संज्ञा-प्रकरण में कहे जा चुके हैं। उसके स्थान पर होने वाला अण् रपर होकर ही प्रवृत्त होता है ।

योऽण् स रपरः सन्नेव प्रवर्त्तते । कृष्णर्द्धिः । तवल्कारः । (३३) लोपः शाकल्यस्य ८।३।१९। अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे । (३४) पूर्वत्रासिद्धम् ८।२।१ । अधिकारोऽयम् । तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं

=रप्रत्याहारपर इत्यर्थः । तेन 'ऋ'स्थाने अर् 'ऌ' स्थाने च अल् विधीयते । **कृष्णर्द्धिरिति ।** 'कृष्ण + ऋद्धिः' इत्यत्र 'आद्गुणः' इति सूत्रेण पूर्वपरयोः अकार-ऋकारयोः स्थाने रेफशिरस्कोऽकारे कृते, जलतुम्बिकान्यायेन रेफस्योर्ध्वगमने सति 'कृष्णर्द्धिः' इति सिद्धम् । 'तव + ऌकारः' इति च्छेदः ।

(३३) **लोप इति ।** 'झरो झरि' इत्यतः अपूर्वस्येति अशीति चानुवर्तते । 'व्योर्लघु०' इत्यतः व्योरित्यनुवर्तते । अत आह—अवर्णेति ।

(३४) **पूर्वत्रासिद्धमिति ।** अधिकारसूत्रमिदम् । स्वदेशे वाक्यार्थशून्यत्वे सति

विमर्श—प्रकृत सूत्र द्वारा ऋ के स्थान में होने वाले आदेश की विशेष व्यवस्था की जा रही है । ऋ और ऌ के स्थान में गुणादि की प्राप्ति होने पर अ, ए, ओ इत्यादि में से कोई भी उसका अन्तरतम स्थानी नहीं है । अतः प्रकृत सूत्र में स्थाने पद की अनुवृत्ति आने से यह सूत्रार्थ होता है—(उः स्थाने) ऋ के स्थान में होने वाला अण् यदि प्राप्त है तो वह र के साथ ही प्रवृत्त होगा । 'र' से रप्रत्याहार=र्, ल् का ग्रहण होता है । **उदाहरण**—कृष्णर्द्धिः । कृष्ण+ऋद्धिः 'आद् गुणः' से गुण—अ+ऋ+अ, 'उरण् रपरः' सूत्र से रपर—(अर्) कृष्ण् अर् द्धिः=कृष्णर्द्धिः (कृष्ण का ऐश्वर्य) । यहाँ 'कृष्ण+ऋद्धिः' में णकारोत्तरवर्ती अ और ऋ के स्थान में कौन-सा गुण हो ? ऐसी शंका होती है; क्योंकि अ और ऋ में स्थानकृत समानता नहीं मिलती । 'अ' का कण्ठ और ऋ का मूर्धा स्थान है । ऐसा गुणसंज्ञक कोई वर्ण नहीं है, जिसका कण्ठ-मूर्धा स्थान हो, तथापि दग्धाश्वरथन्याय से (दो राजा वन में अपने-अपने रथ से गये । जंगल में आग लगने से एक का रथ जल गया, दूसरे का घोड़ा पलायित हुआ । ऐसी परिस्थिति में दोनों में अभाव की तुल्यता है । दोनों का परस्पर सहायतार्थ संयोजन होता है । तब 'अश्वो नष्टः, मम रथो दग्धः, आवयोः संयोगः' । उसी प्रकार यहाँ अकार गुण को स्थानी की अपेक्षा है और ऋकार को गुण-संज्ञक आदेश की) अ और ऋ परस्पर स्थानाभावरूप आनन्तर्य से जुड़ गये=गुण अकार 'उरण् रपरः' की सहायता से रपर् अर्, जलतुम्बिकान्यायेन रेफ का ऊर्ध्वगमन होने पर 'कृष्णर्द्धिः' सिद्ध हुआ । इसी प्रकार तव+ऌकारः गुण—रपर (अल्)<तव्+अल्+कारः= तवल्कारः (तुम्हारा ऌकार) ।

(३३) पद—लोपः शाकल्यस्य । **अनुवृत्ति**—पूर्वस्य, अशि, व्योः पदस्य । **विधिसूत्र ।**

मूलार्थ—अवर्णपूर्वक पदान्त यकार, वकार का विकल्प से लोप होता है, अश् परे रहते ।

विमर्श—'शाकल्य के मत में लोप होता है' यह सूत्रगत पदों का अर्थ है । 'किस स्थिति में किन वर्णों का लोप हो' ? इस शङ्का का समाधान पूर्वसूत्रों से अनुवृत्ति किये जाने पर होता है । अतः 'भोभगो०' (८।३।१७) से 'अपूर्वस्य' तथा 'अशि' एवं 'व्योर्लघु०' (८।३।१८) से 'व्योः' की अनुवृत्ति आती है । 'पदस्य' का अधिकार है । इस प्रकार अवर्णपूर्वक पदान्त यकार-वकार का अश् परे रहते शाकल्य के मत में लोप होता है । अन्य आचार्यों के मत में लोप का विधान न होने के कारण विकल्प से लोप कहा गया है ।

(३४) पद—पूर्वत्र, असिद्धम् । **अधिकारसूत्र ।**

प्रति परं शास्त्रमसिद्धम्। हर इह। विष्ण इह। हरयिह। विष्णविह। (३५) वृद्धिरादैच् १।१।१। आदैच्च वृद्धिसंज्ञः स्यात्। (३६) वृद्धिरेचि ६।१।८८। आदेचि परे वृद्धिरेकादेशः। गुणापवादः। कृष्णैकत्वम्। गङ्गौघः। देवैश्वर्यम्। कृष्णौ-

उत्तरसूत्रेण सहैकवाक्यतयार्थबोधजनकत्वमधिकारत्वम्। अष्टाध्याय्याः द्वितीयपादस्यादिमं सूत्रमिदम्। इतःपरं सर्वत्रैवाधिक्रियत अत एव त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धमिति सङ्गच्छते।

(३६) 'आद् गुणः' इत्यतः आदित्यनुवर्तते। **गुणापवाद** इति। निरवकाशो विधिरपवादः।

मूलार्थ—यह अधिकार सूत्र है। सपादसप्ताध्यायीस्थ (सवा सात अध्यायों के) सूत्रों की दृष्टि में त्रिपादीस्थ (अष्टमाध्याय के अन्तिम तीन पादों) के सूत्र असिद्ध होते हैं। त्रिपादी में भी पूर्वसूत्र के प्रति परसूत्र असिद्ध होता है।

विमर्श—पाणिनीय अष्टाध्यायी के प्रथम से अष्टमाध्याय के प्रथम पाद तक सपादसप्ताध्यायी और अष्टम अध्याय के द्वितीय, तृतीय एवं चतुर्थ पादमात्र त्रिपादी कहे जाते हैं।

उदाहरण—हरे+इह, विष्णो+इह। यहाँ 'एचोऽयवायावः' सूत्र से क्रमशः ए=अय्, ओ=अव् आदेश हो जाने पर 'हर् अय् इह, विष्ण् अव् इह' स्थिति में आदेशावयव य् और व् पद के अन्त में हैं; उसके पूर्व 'अ' है। दोनों प्रयोगों में य्, व् के पश्चात् 'इ' (अश्) होने से 'लोपः शाकल्यस्य' से य्, व् का लोप हो गया—हर इह। विष्ण इह। यहाँ इन दोनों उदाहरणों में अ+इ=ए गुणसन्धि प्राप्त है, परन्तु 'पूर्वत्रासिद्धम्' के प्रभाव से लोपशास्त्र के असिद्ध होने के कारण स्वरसन्धि नहीं होती। लोप का विकल्प से विधान होने से पक्ष में हरयिह, विष्णविह।

(३५) पद—वृद्धिः आदैच्। **संज्ञासूत्र।**

मूलार्थ—आत् (आ) ऐच् (ऐ, औ) की वृद्धि संज्ञा हो।

विमर्श—सूत्र में 'वृद्धिः' संज्ञा है, 'आदैच्' संज्ञी। संज्ञी होने के कारण 'आदैच्' पद उद्देश्य है तथा संज्ञा होने से 'वृद्धिः' पद विधेय है। अतः 'अदेङ् गुणः' आदि की तरह यहाँ भी उद्देश्य का कथन पूर्व में होना चाहिए। यहाँ इस नियम की अपेक्षा इसलिए की गई है कि अष्टाध्यायी का प्रथम सूत्र होने से 'वृद्धिः' पद यहाँ मङ्गलार्थक है।[1]

(३६) पद—वृद्धिः, एचि। **अनुवृत्ति**—आत्। **विधिसूत्र।**

मूलार्थ—अवर्ण से एच् परे रहते पूर्व-पर के स्थान में वृद्धि रूप एक आदेश होता है। 'गुण' सन्धि का अपवाद है।

विमर्श—'आद् गुणः' से अनुवृत्त पद 'आत्' तथा सूत्रस्थ 'एच्' पद स्थानी है। आदेश (वृद्धि) से आ, ऐ, औ वर्णों का ग्रहण होता है। 'आ के बाद एच्=ए, ओ, ऐ, औ वर्णों के रहते हुए पूर्व और पर दोनों वर्णों के स्थान पर एक ही वृद्धि रूप आदेश होता है।

(१) 'अ' या 'आ'+ए=ऐ। (२) 'अ' या 'आ'+ऐ=ऐ।

(३) 'अ' या 'आ'+ओ=औ। (४) 'अ' या 'आ'+औ=औ।

उदाहरण—(१) कृष्ण+एकत्वम् (अ+ए=ऐ)=कृष्णैकत्वम्। अर्थ—कृष्ण की एकता।

---

[1] 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते'—महाभाष्यम् (सूत्र १।१।१)।

त्कण्ठयम् । (३७) **एत्येधत्यूठ्सु ६।१।८९** । अवर्णादेजाद्योरेत्येधत्योरूढि च परे वृद्धिरेकादेशः स्यात् । पररूपगुणापवादः । उपैति । उपैधते प्रष्ठौहः। एजाद्योः किम् ? उपेतः । मा भवान्प्रेदिधत् । (स्वादीरेरिणोः) स्वैरम् । स्वैरी । स्वैरिणी । (अक्षादूहिन्यामुपसङ्ख्यानम्) अक्षौहिणी सेना । (प्रादूहोढोढ्येषैष्येषु) प्रौहः । प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः । (ऋते च तृतीयासमासे) सुखेन ऋतः सुखार्तः । तृतीयेति किम् । परमर्तः ।

---

(३७) एतिश्च एधतिश्च ऊठ् चेति विग्रहः । अत्र 'वृद्धिरेचि' इत्यतः एचीत्यनुवर्तते । 'एत्येधती' इमौ श्तिप् निर्दिष्टौ । इण् गताविति, एध् वृद्धाविति धातू विवक्षितौ 'यस्मिन्विधिः' इति परिभाषाबलेन एजादाविति लभ्यते । तच्च एत्येधत्योरेव विशेषणम्, न तु ऊठोऽसम्भवात् । 'एकः पूर्वपरयोरि'त्यधिकृतम् । 'आद् गुणः' इत्यतः आदित्यनुवर्तते । तदाह—**अवर्णादित्यादिना** । 'येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवती'ति न्यायेन 'एङि पररूपम्' इति पररूपस्य 'आद् गुणः' इति गुणस्य चापवादोऽयम् ।

---

(२) गङ्गा+ओघः (आ+ओ=औ)=गङ्गौघः । अर्थ—गङ्गा का प्रवाह । (३) देव+ऐश्वर्यम् (अ+ऐ=ऐ)=देवैश्वर्यम् । अर्थ—हे देव ! आपका ऐश्वर्य । (४) कृष्ण+औत्कण्ठ्यम् (अ+औ=औ)=कृष्णौत्कण्ठ्यम् । अर्थ—कृष्ण की उत्कण्ठता ।

(३७) पद—एत्येधत्यूठ्सु । **अनुवृत्ति**—वृद्धिः, एचि, आत् । **विधिसूत्र** ।

अर्थ—अवर्ण से एजादि एति, एधति और ऊठ् परे हो तो पूर्व-पर के स्थान में वृद्धि रूप एक आदेश होता है । पररूप और गुण सन्धि का यह अपवाद-सूत्र है । (१) उपैति—उप+एति (अ+ए=ऐ) वृद्धि=उपैति । अर्थ—समीप जाता है । (२) उपैधते—उप+एधते (अ+ए=ऐ) वृद्धि=उपैधते । अर्थ—समीप में बढ़ता है । इन दोनों उदाहरणों में पररूप (६।१।९४) प्राप्त था, उसके अपवादस्वरूप प्रकृत सूत्र से वृद्धि हुई । (३) प्रष्ठौहः—प्रष्ठ+ऊहः, (अ+ऊ=औ) वृद्धि=प्रष्ठौहः । अर्थ—बैल । यहाँ गुणसन्धि (६।१।८७) प्राप्त थी, उसके अपवादस्वरूप वृद्धि हुई ।

प्रकृत सूत्र में एज् आदि विशेषण क्यों कहा ? उपेतः, मा भवान्प्रेदिधत् । सूत्र में एजादि पद इण् तथा एध् के विशेषण के रूप में न होने पर 'उप+इतः' तथा 'प्र+इदिधत्' में भी वृद्धि प्राप्त होने लगेगी । वृद्धि न हो, इसलिए एजादि पद दोनों धातुओं के विशेषण के रूप में प्रयुक्त हुआ है । अतः दोनों प्रत्युदाहरणों में धातु का पूर्व वर्ण एकार रहित होने से वृद्धि नहीं हुई, किन्तु 'आद् गुणः' से गुण हुआ; उपेतः=समीप गया हुआ । मा भवान्प्रेदिधत्=आप बहुत न बढ़ें ।

(वा०) स्व शब्द के अवर्ण से परे ईर तथा ईरिन् शब्द का अच् हो तो पूर्व-पर के स्थान पर वृद्धि रूप एकादेश होता है । (१) स्वैरम्—स्व+ईरम् (अ+ई=ऐ)=स्वैरम् । अर्थ—स्वच्छन्द । (२) स्वैरी—स्व+ईरी (अ+ई=ऐ वृद्धि)=स्वैरी । अर्थ—स्वेच्छा से गमन करनेवाला । (३) स्वैरिणी—स्व+ईरिणी (अ+ई=ऐ)=स्वैरिणी । अर्थ—स्वेच्छाचारिणी स्त्री । यहाँ 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' परिभाषा की प्रवृत्ति होने से वार्तिक द्वारा वृद्धि हुई ।

(वा०) अक्ष शब्द से ऊहिनी शब्द परे रहते पूर्व-पर के स्थान में वृद्धि रूप एकादेश होता है । यह वार्तिक प्राप्त गुण का बोधक है । उदाहरण—अक्षौहिणी । अक्ष+ऊहिनी (अ+ऊ=औ, न=ण)=अक्षौहिणी सेना । सेना-विशेष ।

(प्रवत्सतरकम्बलवसनार्णदशानामृणे) प्रार्णमित्यादि । (३८) **उपसर्गाः क्रियायोगे १।४।५९ ।** प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः । प्र । परा । अप । सन् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । एते प्रादयः । (३९) **भूवादयो धातवः १।३।१ ।** क्रिया-

---

(३८) **उपसर्गा इति** । क्रियासम्बन्धे सतीत्यर्थः ।

(३९) **भूवादय इति** । भूश्च वाश्चेति भूवौ, आदिश्च आदिश्चेति आदी, भूवौ आदी येषान्ते भूवादयः । भू-प्रभृतयो वा सदृशा इत्यर्थः । सादृश्यञ्चात्र क्रियावाचकत्वेन गृह्यते, तदाह—**क्रियावाचिन इत्यादि** ।

(वा०) प्र शब्द से ऊह, ऊठ, ऊढि, एष, एष्य शब्दों के परे रहने पर पूर्व-पर के स्थान में वृद्धि रूप एकादेश होता है। **उदाहरण**—(१) प्र+ऊहः (अ+ऊ=औ)=प्रौहः (अच्छा तार्किक)। (२) प्र+ऊढः (अ+ऊ=औ)=प्रौढः (बढ़ा हुआ प्रौढ़)। (३) प्र+ऊढिः (अ+ऊ=औ)=प्रौढिः (प्रौढ़ता)। (४) प्र+एषः (अ+ए=ऐ)=प्रैषः (प्रेरणा)। (५) प्र+एष्यः (अ+ए=ऐ)=प्रैष्यः (नोकर)।

(वा०) अवर्ण के अनन्तर ऋत शब्द के परे रहते पूर्व तथा पर वर्णों के स्थान में वृद्धि रूप एकादेश होता है, तृतीयातत्पुरुष समास में। **उदाहरण**—सुख+ऋतः (सुखेन ऋतः)। अ+ऋ=आर्=सुखार्तः। अर्थ—सुख से प्राप्त। **प्रत्युदाहरण**—प्रकृत वार्तिक में 'तृतीयासमासे' पद न रहने पर 'परमश्चासौ ऋतः' इस विग्रह वाले कर्मधारय समास में वृद्धि होने लगेगी, जो इष्ट नहीं है। अतः 'तृतीयासमासे' पद का ग्रहण किया गया है। यहाँ गुण होने पर (अ+ऋ =अर्) 'परमर्तः' हुआ।

(वा०) प्र, वत्सतर, कम्बल, वसन, ऋण, दश—इन शब्दों के पश्चात् ऋण शब्द के परे रहते पूर्व एवं पर वर्ण के स्थान में वृद्धि रूप एकादेश होता है। **उदाहरण**—(१) प्रार्णम्। प्र+ऋणम् (अ+ऋ=आर्) वृद्धि=प्रार्णम्। अर्थ—अधिक ऋण। इसी प्रकार वत्सतर+ऋणम्, कम्बल+ऋणम्, वसन+ऋणम्, दश+ऋणम् इत्यादि में वृद्धि होती है।

(३८) पद—उपसर्गाः, क्रियायोगे। **अनुवृत्ति**—प्रादयः। **संज्ञासूत्र।**

मूलार्थ—क्रिया के योग में प्र आदि की उपसर्ग संज्ञा होती है। प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अति, अपि, सु, उद्, अभि, प्रति, पर, उप—ये प्रादि हैं।

विमर्श—प्रादि उपसर्गों की संख्या २२ है। क्रिया से संयोग होने पर ही उपसर्ग संज्ञा होती है। लौकिक संस्कृत में उपसर्ग धातु से पूर्व लगाये जाते हैं तथा वैदिक संस्कृत में धातु के पश्चात् तथा बीच में भी लगते हैं। धातु के साथ उपसर्ग जोड़ने पर अर्थ-परिवर्तन, अर्थ में प्रकृष्टता आदि प्रतिक्रियाएँ होती हैं। यथा—हरति (चुराता है), प्रहरति (प्रहार करता है)। सूते, प्रसूते आदि।

(३९) पद—भूवादयः, धातवः। **संज्ञासूत्र।**

मूलार्थ—क्रियावाचक भू आदि की धातुसंज्ञा होती है।

विमर्श—सूत्र में द्वन्द्वगर्भित बहुव्रीहि समास है। भूश्च वाश्चेति भूवौ, आदिश्च आदिश्च आदी, भूवौ आदी येषान्ते भूवादयः। अतः 'वा' के सदृश अर्थात् क्रियावाची भू आदि धातुसंज्ञक होते हैं।

वाचिनो भ्वादयो धातुसंज्ञाः स्युः । (४०) **उपसर्गादृति धातौ ६।१।९१** । अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । प्रार्च्छति ॥ (४१) **वा सुप्यापिशलेः ६।१।९२** । आदुपसर्गादृकारादौ सुब्धातौ परे वृद्धिर्वा । आपिशलिग्रहणं पूजार्थम् । (४२) **अचो रहाभ्यां द्वे ८।४।४६** । अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । इति प्राप्ते । (४३) **शरोऽचि ८।४।४९** । द्वे न । प्रार्षभीयति ।

---

(४०) 'आद् गुणः' इत्यतः पञ्चम्यन्तमादित्यनुवर्तते । तच्चोपसर्गविशेषणमतस्तदन्तविधिवर्णान्तादिति लभ्यते । ऋतीति तु धातोर्विशेषणत्वाद् यस्मिन्विधिरिति तदादिलाभेन ऋकारादावित्यर्थः । 'एकः पूर्वपरयोः' इत्यधिकारादेकादेशलाभः । 'वृद्धिरेची'-त्यतो 'वृद्धिरि'त्यनुवर्तते, तेनोक्तार्थलाभ इति । प्रार्च्छतीति । प्र + ऋच्छति इति दशायाम् ऋच्छतीत्यस्य क्रियावाचकत्वाद् 'भूवादयो धातवः' इत्यनेन धातुसंज्ञायां प्र इत्यस्य क्रियायोगात् 'उपसर्गाः क्रियायोगे' इत्यनेनोपसर्गसंज्ञायाम् 'उपसर्गादृति धातौ' इत्यनेन पूर्वपरयोः स्थाने (आ) वृद्धौ रपरे च कृते प्रार्च्छतीति निष्पन्नम् ।

(४१) **वा सुपीति** । 'उपसर्गादृति धातावि'ति सूत्रमनुवर्तते 'आद् गुणः' इत्यतः आदिति, 'वृद्धिरेची'त्यतः वृद्धिरिति चानुवर्तते । आदित्युपसर्गविशेषणत्वेन तदन्तविधिः । प्रत्ययग्रहणपरिभाषया सुबित्यनेन सुबन्तप्रकृतिको धातुर्विवक्षितः ।

(४२) **अचो रहाभ्यामिति** । यरोऽनुनासिक इत्यतो यर् इत्यनुवर्तते । अच इति दिग्योगे पञ्चमी, पराभ्यामिति शेषः ।

(४३) अचि परे शरो न द्वित्वमिति भावः ।

पृथ्वी का पर्यायवाचक भूपद की धातुसंज्ञा नहीं होती है। वैसे ही विकल्पार्थक अव्यय 'वा' पद भी धातुसंज्ञक नहीं होता । क्योंकि वह 'वा' क्रियावाची नहीं है (दधाति क्रियामिति धातुः) ।

(४०) पद—उपसर्गाद्, ऋति, धातौ । **अनुवृत्ति**—आत् , वृद्धि । **विधिसूत्र ।**

मूलार्थ—अवर्णान्त उपसर्ग से ऋकारादि धातु परे रहते पूर्व और पर के स्थान में वृद्धि रूप एकादेश होता है । उदाहरण—प्रार्च्छति ।

विमर्श—प्रकृत सूत्र में अनुवृत्त 'आत्' शब्द 'उपसर्गात्' का विशेषण होने से तदन्त विधि होती है। 'एकः पूर्वपरयोः' का अधिकार है। अतः अवर्णान्त उपसर्ग के बाद ऋकारादि धातु के रहने पर पूर्व और पर वर्ण के स्थान में वृद्धि रूप एकादेश हो जाता है। जैसे—प्रार्च्छति । प्र+ऋच्छति (अ+ऋ=आर्) प्रार्च्छति । अर्थ—अधिक चलता है ।

(४१) पद—वा, सुपि, आपिशलेः । **अनुवृत्ति**—आत्, उपसर्गात्, ऋति, धातौ, वृद्धिः । **विधिसूत्र ।**

मूलार्थ—अवर्णान्त उपसर्ग से ऋकारादि सुब्धातु (नामधातु) पर में हो तो विकल्प से वृद्धि होती है । आपिशलि ग्रहण आदर के लिए है ।

(४२) पद—अचः, रहाभ्यां, द्वे । **अनुवृत्ति**—यरः वा । **विधिसूत्र ।**

मूलार्थ—अच् से परे 'र्' तथा 'ह्' उससे परे यर् वर्णों को विकल्प से द्वित्व होता है ।

(४३) पद—शरः, अचि । **अनुवृत्ति**—द्वे न । **विधि (निषेध) सूत्र ।**

मूलार्थ—अच् परे रहते शर् को द्वित्व नहीं होता । प्रार्षभीयति, प्रर्षभीयति ।

प्रर्षभीयति । (४४) एङि पररूपम् ६।१।९४ । आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः । प्रेजते । उपोषति । (४५) अचोऽन्त्यादि टि १।१।६४ । अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् । (शकन्ध्वादिषु पररूपं वाच्यम्) तच्च टेः । शकन्धुः । कर्कन्धुः । कुलटा । सीमन्तः केशवेशे । सीमान्तोऽन्यः । मनीषा । हलीषा । लाङ्गलीषा । पतञ्जलिः । सारङ्गः पशुपक्षिणोः । साराङ्गोऽन्यः । आकृतिगणोऽयम् ।

---

(४४) 'उपसर्गात्' इति 'धातौ' इति चानुवर्तते । आदित्यनुवृत्तमुपसर्गादित्यस्य विशेषणम् । 'यस्मिन्विधिरि'ति परिभाषाबलेन तदादिलाभः । 'एकः पूर्वपरयोः' इत्यधिकारादेकादेशलाभः । प्रेजते—प्र + एजते इति स्थिते 'वृद्धिरेची'त्यनेन वृद्धौ प्राप्तायां तां प्रबाध्य 'एङि पररूपमि'त्यनेन पूर्वपरयोः स्थाने पररूपैकादेशे प्रेजते इति रूपम् । एवम् 'उप + ओषति' इत्यत्रापि बोध्यम् ।

(४५) **अच** इति निर्धारणे षष्ठी । जातावेकवचनम् । अन्त्ये भवः अन्त्यः, अन्त्य आदिर्यस्य तद् अन्त्यादीति विग्रहः ।

शकन्ध्वादिष्विति । शकन्ध्वादि विषये तत्सिध्यर्थं पूर्वपरयोः पररूपं वाच्यमित्यर्थः । **तच्च टेः** । अर्थाट्टेः पररूपं भवति । 'शक + अन्धुः' इति स्थिते सवर्णदीर्घे प्राप्तेऽनेन वार्तिकेन टेः पररूपे कृते 'शकन्धुः' इति । कर्क + अन्धुः । कुल + अटा । **सीमन्त इति** । केशानां रचनाविशेषे गम्यमाने 'सीमन् + अन्तः' इत्यत्रानः पररूपं भवती-

---

विमर्श—प्रकृत सूत्र में 'अचो रहाभ्यां द्वे' (८।४।४६) से द्वे तथा 'नादिन्या क्रोशे०' (८।४।४८) से 'न' की अनुवृत्ति आती है। तदनुसार स्वर वर्णों के अनन्तर शर=श् ष् स् को द्वित्व नहीं होता। **उदाहरण**—प्र+ऋषभीयति (ऋषभमात्मानमिच्छतीत्यर्थे क्यच्) (अ+ऋ =आर्—वृद्धि)<प्र् आर् षभीयति=प्रार्षभीयति । यहाँ 'अचो रहाभ्यां द्वे' से ष् को द्वित्व प्राप्त है। परन्तु 'शरोऽचि' सूत्र के द्वारा निषेध होने से द्वित्व नहीं हुआ। पक्ष में अर्थात् वृद्धि के अभाव में गुण (अ+ऋ=अर्) प्रर्षभीयति ।

(४४) पद—एङि, पररूपम् । **अनुवृत्ति**—आत्, उपसर्गात्, धातौ । **विधिसूत्र** ।

मूलार्थ—अवर्णान्त उपसर्ग से एङ् आदि धातु परे रहने पर पूर्व-पर के स्थान में पररूप एकादेश होता है। प्रेजते, उपोषति ।

विमर्श—प्रस्तुत सूत्र में 'आद् गुणः' से 'आत्', 'उपसर्गादृति०' से 'उपसर्गात्' एवं 'धातौ' की अनुवृत्ति आती है। तब सूत्र का पूर्वोक्त अर्थ होता है। पररूप सन्धि वृद्धि का बाध करती है। **उदाहरण**—(१) प्र+एजते (अ+ए=ए) प्र् एजते=प्रेजते। अर्थ—अधिक काँपता है। (२) उप+ओषति (अ+ओ=ओ) उप् ओषति=उपोषति । अर्थ—उपवास करता है।

(४५) पद—अचः, अन्त्यादि, टि । **संज्ञासूत्र** ।

मूलार्थ—अचों के मध्य में जो अन्त्य अच्, वह है आदि में जिसके, उस समुदाय की टिसंज्ञा होती है। (वा०)—'शकन्ध्वादिगणपठित शब्दों की सिद्धि के लिए पूर्व-पर के स्थान में पररूप एकादेश हो और वह भी टिसंज्ञक वर्णों का हो' ऐसा कहना चाहिए। शकन्धुः। कर्कन्धुः। कुलटा। (वा०)—केशप्रसाधन अर्थ वाच्य हो तो 'सीमन्तः', भिन्न अर्थ में सीमान्तः। मनीषा। हलीषा। लाङ्गलीषा। पतञ्जलिः। (वा०)—पशु-पक्षी अर्थ वाच्य हो तो 'सारङ्गः', भिन्न अथ में

मार्तण्डः । (एवे चानियोगे) । क्वेव भोक्ष्यसे । अनियोगे किम् । तवैव । (ओत्वोष्ठयोः समासे वा) स्थूलोतुः । स्थूलौतुः । बिम्बोष्ठः । बिम्बौष्ठः । समासे किम् ।

त्यर्थः । मनस् + ईषा । हल + ईषा । लाङ्गल + ईषा । पतत् + अञ्जलिः । सार + अङ्गः । 'मृत + अण्डः' इत्यत्र पररूपे कृते मृतण्डादागत इत्यर्थे अण् प्रत्ययः । **एवे चेति ।** नियोगोऽवधारणम्—अन्ययोगव्यवच्छेदः, अनियोगे = अनिर्धारणेऽर्थे य 'एव' शब्दस्तस्मिन्नकारात् परे पूर्वपरयोः पररूपमेकादेशः स्यादित्यर्थः । क्व + एव = क्वेव । **ओत्वोष्ठयोरिति ।** अवर्णात् ओतुशब्दे ओष्ठशब्दे च परे पूर्वपरयोरचोः विकल्पेन पररूपं वक्तव्यमित्यर्थः । स्थूल + ओतुः । स्थूलश्चासौ ओतुरिति विग्रहः 'ओतुर्बिडालो मार्जारः' इत्यमरः । बिम्ब + ओष्ठः ।

साराङ्गः । यह आकृतिगण है । मार्तण्डः । (वा०)—अवर्ण के अनन्तर 'एव' शब्द रहने पर पूर्व-पर के स्थान में पररूप एकादेश होता है, अनिश्चय अर्थ में । क्वेव भोक्ष्यसे । अनियोग क्यों कहा ? तवैव । (वा०)—अवर्ण के अनन्तर ओतु या ओष्ठ शब्द का अच् परे हो तो पूर्व-पर के स्थान में समास में विकल्प से पररूप होता है । स्थूलोतुः । स्थूलौतुः । बिम्बोष्ठः । बिम्बौष्ठः । समास में क्यों कहा ? तवौष्ठः ।

विमर्श—सूत्र में 'अचोऽन्त्यादि' पद संज्ञी तथा 'टि' संज्ञा है । सूत्रार्थ स्पष्ट है । यथा—अच् वर्णों में जो अन्तिम अच् वह है आदि में जिसके, ऐसे शब्द-समुदाय की टिसंज्ञा होती है । जैसे 'पतत्' शब्द में अन्तिम अच् तकारोत्तरवर्ती अकार है, वह द्वितीय तकार के आदि में है । अतः उसके सहित शब्द 'अत्' हुआ । उसकी 'टि' संज्ञा हुई । जहाँ अन्तिम अच् के बाद कोई हल् वर्ण नहीं होगा, वहाँ व्यपदेशिवद्भाव से उसी वर्ण को 'टि' जानना चाहिए । यथा—'शक' में ककारोत्तरवर्ती अकार 'टि' संज्ञक है । (वा०) पद—शकन्ध्वादिषु, पररूपं वाच्यम् । अनुवृत्ति—अचि । अर्थ—शकन्धु आदि शब्दों की सिद्धि हेतु अच् परे रहते पररूप एकादेश होता है; वह टिसंज्ञक वर्णसमुदाय के अनन्तर अच् परे रहते हो तो । **उदाहरण**—(१) शक + अन्धुः (अ + अ = अ), शक् + अन्धुः = शकन्धुः । अर्थ—शकों का कुआँ । (२) कर्क + अन्धुः (अ + अ = अ), कर्क् + अन्धु = कर्कन्धुः । अर्थ—कर्क द्वारा बनाया हुआ कुआँ । (३) कुल + अटा (अ + अ = अ) कुल् + अटा = कुलटा । अर्थ—दुराचारिणी स्त्री । सीमन्तः केशवेशे । केशप्रसाधन अर्थ में पररूप होता है, अन्यत्र नहीं । (४) सीमन् + अन्तः ('अन्' टि + अ = अ) = सीमन्तः । अर्थ—केशों का संस्कार-विशेष । इससे भिन्न सीमा (मर्यादा) अर्थ में सीम + अन्तः = सीमान्तः, सवर्णदीर्घ । (५) मनस् + ईषा (अस् 'टि' + ई = ई)—मनीषा । अर्थ—बुद्धि । (६) हल + ईषा (अ + ई = ई)—हलीषा । अर्थ—हल की मूठ । (७) पतत् + अञ्जलिः (अत् 'टि' + अ = अ) पतञ्जलिः । अर्थ—महाभाष्यकार ऋषि । (८) (वा०) पशु-पक्षी अर्थ में सार + अङ्गः (अ + अ = 'अ' पररूप) = सारङ्गः । अर्थ—हिरन (पशु) चातक (पक्षी) । भिन्न अर्थ में सार + अङ्गः (अ + अ = 'आ' दीर्घ) = साराङ्गः । अर्थ—शक्तिशाली । शकन्ध्वादि गण आकृति गण है । इसका तात्पर्य यह है कि जो शब्द इस गण में नहीं पढ़े गये तथा शिष्टप्रयुक्त पररूप से निष्पन्न हैं तो उनका पाठ भी शकन्ध्वादि गण में कल्पित कर लेना चाहिए । अतः 'मार्तण्ड' पद में भी पररूप की कल्पना की जाती है । (९) 'मृतण्डस्यापत्यम्' इस अर्थ में अण् प्रत्यय होने से पूर्व मृत +

तवौष्ठः । (४६) **ओमाङोश्च ६।१।९५** । ओमि आङि चात्परे पररूपमेकादेशः स्यात् । शिवायों नमः । शिव आ इहि इति स्थिते । शिव एहि । शिवेहि । (४७) **अकः सवर्णे दीर्घः ६।१।१०१** । अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात् । दैत्यारिः ।

---

(४६) **ओमाङोश्च** । 'आदि'ति, 'पररूपमि'ति, 'एकः पूर्वपरयोरि'ति चानुवर्तते । 'शिवाय+ओंनमः' इति स्थिते वृद्धि बाधित्वा पररूपैकादेशे साधु । **शिवेहि इति** । 'शिव+आ+इह्' इति स्थिते दीर्घे गुणे च प्राप्ते 'धातूपसर्गयोः कार्यमन्तरङ्गमि'ति परिभाषया पूर्वम् आ+इह् इत्यत्र 'आद् गुणः' इत्यनेन गुणे 'शिव+एहि' इत्यवस्थायाम् 'अन्तादिवच्चे'ति पूर्वान्तवद्भावे 'ओमाङोश्चे'ति पररूपे कृते 'शिवेहि' इति रूपसिद्धिः ।

(४७) 'इको यणची'त्यतोऽचीत्यनुवर्तते । 'एकः पूर्वपरयोरि'त्यधिकारः । सावर्ण्यञ्च स्थानतः प्रयत्नतश्च । 'अकोऽकि दीर्घः' इत्येव सुवचम् । **दैत्यारिरिति** ।

अण्डः (अ+अ='अ' पररूप)=मृतण्डः । पश्चात् अण् प्रत्यय तथा आदि वृद्धि होने पर 'मार्तण्डः' रूप होता है ।

(वा०) एवे च अनियोगे । **अनुवृत्ति**—आत् । अकार के अनन्तर अनिश्चयार्थक 'एव' शब्द परे रहने पर पररूप एकादेश होता है । **उदाहरण**—(१०) क्व+एव (अ+ए='ए' पररूप) क्वेव भोक्ष्यसे । अर्थ—कहाँ भोजन करोगे ? यहाँ भोजन के विषय में कोई निश्चय नहीं है । **प्रत्युदाहरण**—'अनियोग' पद के ग्रहण से अनिश्चयार्थक 'एव' शब्द में ही पररूप होने से तव+एव='तवैव' में वृद्धि हुई । अर्थ—तुम्हारे ही यहाँ (भोजन करूँगा) । यहाँ 'एव' निश्चयार्थक है । (वा०) अवर्ण के बाद 'ओतु' और 'ओष्ठ' शब्द परे रहते विकल्प से पररूप होता है समास में । पक्ष में वृद्धि होकर दो रूप बनेंगे । **उदाहरण**—(११) स्थूल+ओतुः (अ+ओ='ओ' पररूप) स्थूलोतुः (पररूप), पक्ष में स्थूलौतुः (वृद्धिः), विग्रह—स्थूलश्चासौ ओतुश्च । अर्थ—मोटी बिल्ली । (१२) बिम्ब+ओष्ठः (अ+ओ=ओ)—बिम्बोष्ठः (पररूप) पक्ष में बिम्बौष्ठः (वृद्धि) विग्रह—बिम्बवद् ओष्ठौ यस्य । अर्थ—बिम्बफल के समान होंठ । **प्रत्युदाहरण**—समास ग्रहण न करने पर तव+ओष्ठ=तवौष्ठः (वृद्धि) । यहाँ भी पररूप हो जाता, क्योंकि यहाँ समास नहीं है; अतः केवल वृद्धि हुई ।

(४६) पद—ओमाङोः च । **अनुवृत्ति**—आत्, पररूपम् । **विधिसूत्र** ।

मूलार्थ—अवर्ण से ओम् और आङ् परे रहते पररूप एकादेश होता है । (यह वृद्धि तथा दीर्घ का बाध करता है ।)

विमर्श—सूत्रार्थ स्पष्ट है । **उदाहरण**—(१) शिवाय+ओंनमः (अ+ओं='ओ' पररूप) शिवायों नमः । अर्थ—शिव को नमस्कार । (२) 'शिव+आ+इह' इस स्थिति में (अ+आ) दीर्घ तथा (आ+इ) गुण दोनों की प्राप्ति है । परन्तु अन्तरङ्ग होने से दीर्घ को बाधकर प्रथम गुण (आ+इ=ए) पश्चात् 'शिव+ए हि' में पूर्वान्तवद्भाव से आङ् का आरोप होने से (अ+ए=ए) पररूप=शिवेहि । अर्थ—हे शिव ! रक्षार्थ आओ ।

(४७) पद—अकः, सवर्णे, दीर्घः । **अनुवृत्ति**—अचि । **विधिसूत्र** ।

मूलार्थ—अक् से सवर्ण अच् परे रहते पूर्व-पर के स्थान में दीर्घ रूप एकादेश होता है ।

श्रीशः। विष्णूदयः। (ऋति सवर्णे ऋ वा) । होतृकारः। होतॄकारः। (४८) **एङः पदान्तादति ६।१।१०९।** पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव। (४९) **सर्वत्र विभाषा गोः ६।१।१२२।** लोके वेदे चैङन्तस्य गोरिति वा प्रकृतिभावः पदान्ते। गो अग्रम्। गोऽग्रम्। एङन्तस्य किम्। चित्रग्वग्रम्। पदान्ते

दैत्यानामसुराणामरिः=शत्रुः 'दैत्यारिः'। 'दैत्य + अरिः' इति स्थिते 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णेऽचि परे पूर्वपरयोः स्थाने दीर्घे कृते 'दैत्यारिः' इति। **ऋति सवर्ण इति।** अकः सवर्णे ऋति परे पूर्वपरयोः ऋ इत्येकादेशो विकल्पेन भवतीत्यर्थः।

(४८) 'अमि पूर्वः' इत्यतः पूर्व इत्यनुवर्तते। एकः पूर्वपरयोरित्यधिकृतम्। अतः पदान्तादेङोऽति परे पररूपमित्यर्थः।

(४९) 'एङः पदान्तादति' इत्यतः 'एङः' इति 'पदान्तादि'ति चानुवर्तते। 'प्रकृत्यान्तः पादमि'त्यतः प्रकृत्येत्यनुवर्तते। प्रकृत्या स्वरूपेण—निर्विकाररूपेणावतिष्ठत इत्यर्थः।

विमर्श—यहाँ पूर्वसूत्र (१३३) से अनुवृत्त 'प्रातिपदिक' पद **संज्ञा** है तथा सूत्रस्थ 'कृत्तद्धितसमासाः' **संज्ञी**। 'प्रत्ययग्रहणे तदन्ता ग्राह्याः' परिभाषा के अनुसार 'कृत्' और 'तद्धित' में तदन्त विधि होती है। इस प्रकार कृत्प्रत्ययान्त, तद्धितप्रत्ययान्त और समास की भी प्रातिपदिक संज्ञा होती है।

(१) कृत् और तद्धित प्रत्यय होने से पूर्वसूत्र से अप्राप्त प्रातिपदिकसंज्ञा का विधान प्रकृत सूत्र से किया गया है।

(२) समास के अर्थवान् होने पर पूर्वसूत्र से प्राप्त प्रातिपदिकसंज्ञा का इस सूत्र से पुनः विधान करने का प्रयोजन यह है कि 'जिस शब्दसमूह में पूर्वभाग पद रहे तो उसकी प्रातिपदिकसंज्ञा समास में ही होती है। इस प्रकार प्रकृत सूत्र में समास पद के नियमार्थ होने के कारण वाक्य की प्रातिपदिकसंज्ञा नहीं होती।

(१३५) पद—प्रत्ययः। **अधिकारसूत्र।**

मूलार्थ—अष्टाध्यायी के पञ्चमाध्याय की समाप्ति तक इस सूत्र का अधिकार है।

विमर्श—तृतीयाध्याय के प्रारम्भ से लेकर पञ्चमाध्याय की समाप्ति तक इसका अधिकार होने से सु आदि विभक्तियाँ भी प्रत्यय हैं। 'स्वौजसमौट्०' (४।१।२)।

उत्तरम्—'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'।

हिन्दी अर्थ—(१) प्रश्न—विद्वान् कैसे वचन बोलता है? उत्तर—अर्थवत्। (२) प्रश्न—रोगी कौन है? उत्तर—अधातुः (निर्बल व्यक्ति)। (३) प्रश्न—नास्तिक कौन है? उत्तर—अप्रत्ययः (ईश्वर पर विश्वास न करने वाला)। (४) प्रश्न—लोग कैसे चन्द्रमा को नहीं देखते? उत्तर—प्रातिपदिकम् (प्रतिपदा के चन्द्रमा को लोग नहीं देखते)।

परिसमाप्तेरधिकारोऽयम् । **(१३६) परश्च ३।१।२ ।** अयमपि तथा । **(१३७) ङ्याप्प्रातिपदिकात् ४।१।१ ।** ङ्यन्तादाबन्तात्प्रातिपदिकाच्चेत्यापञ्चमपरिसमाप्तेरधिकारोऽयम् । **(१३८) स्वौजसमौट्छष्टाभ्यांभिस्-ङेभ्यांभ्यस्-ङसिभ्यांभ्यस्-ङसोसाम्-ङ्योस्सुप् ४।१।२ ।** ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः । सु औ जस्–प्रथमा । अम् औट् शस्–द्वितीया । टा भ्यां भिस्–तृतीया । ङे भ्यां भ्यस्–चतुर्थी । ङसि भ्यां भ्यस् पञ्चमी । ङस् ओस् आम्–षष्ठी । ङि ओस् सुप्–सप्तमी । **(१३९) सुपः १।४।१०३ ।** सुपस्त्रीणि त्रीणि वचनान्येकश एकवचन-

---

(१३८) **स्वौजसमौडिति ।** ङ्याप्प्रातिपदिकादित्यधिकृतं प्रत्ययः परश्चेति । यथायथं च विपरिणम्यते, तदाह—**ङ्यन्तादित्यादि ।** सूत्रे एकविंशतिः स्वादयः ।

(१३९) सुप्प्रत्याहारः । 'तान्येकवचनद्विवचनबहुवचनान्येकशः' इति सूत्रं 'तानी'ति वर्जयित्वाऽनुवर्तते । 'तिङस्त्रीणि त्रीणि' इत्यतः त्रीणीत्यनुवर्तते । तदाह—**सुपस्त्रीणीत्यादि ।**

---

(१३६) पद—परः, च । **अनुवृत्ति**—प्रत्ययः । **परिभाषा-अधिकारसूत्र ।**

मूलार्थ—इस सूत्र का पाँचवें अध्याय की समाप्ति तक अधिकार है ।

विमर्श—इस सूत्र के द्वारा प्रत्यय की स्थिति का नियम बतलाया जा रहा है कि जिसकी प्रत्यय संज्ञा की गई है वह, जिससे विधान किया जाय उससे, परः अर्थात् परे (अनन्तर) होता है ।

(१३७) पद—ङ्याप्प्रातिपदिकात् । **अधिकारसूत्र ।**

मूलार्थ—इस सूत्र का भी पाँचवें अध्याय के अन्त तक अधिकार है । अतः इस सूत्र के पश्चात् पाँचवें अध्याय तक पठित प्रत्यय ङ्यन्त, आबन्त तथा प्रातिपदिक से विहित होते हैं ।

विमर्श—यहाँ ङ्यन्त से (ङी–स्त्रीप्रत्यय के तीन प्रत्यय—ङीप्, ङीष्, ङीन्) आबन्त से (आप्–तीन आकारान्त प्रत्यय—टाप्, डाप्, चाप्) अन्त में रहे, ऐसे शब्दों का तथा प्रातिपदिक से अर्थवान् पद, कृदन्त, तद्धितान्त तथा समास का ग्रहण होता है ।

(१३८) पद—स्वौजसमौट्…सुप् । **अनुवृत्ति**—ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च । **विधिसूत्र ।**

मूलार्थ—ङ्यन्त, आबन्त और प्रातिपदिकसंज्ञक से परे सु आदि प्रत्यय होते हैं ।

विमर्श—यह एकपद सूत्र है । द्वन्द्व समास में सुप् (इक्कीस) प्रत्ययों का संकलन किया गया है । उक्त तीनों अधिकारसूत्रों की यहाँ अनुवृत्ति आती है । इस प्रकार ङीप्रत्ययान्त, आप् प्रत्ययान्त तथा प्रातिपदिक से परे सु, औ, जस् इत्यादि प्रत्यय होते हैं ।

(१३९) पद—सुपः । **अनुवृत्ति**—त्रीणि, एकवचन-द्विवचन-बहुवचनानि, एकशः । **संज्ञासूत्र ।**

मूलार्थ—सुप् के तीन-तीन वचन (त्रिक) क्रम से एकवचन, द्विवचन और बहुवचन संज्ञक होते हैं ।

विमर्श—प्रकृत सूत्र में 'तान्येकवचनद्विवचनबहुवचनान्येकशः' (१।४।१०२) सूत्र से 'एकवचन, द्विवचन, बहुवचन' तथा 'एकशः' पदों की अनुवृत्ति आती है । 'तिङस्त्रीणि त्रीणि०' (१।४।१०१) से 'त्रीणि' 'त्रीणि' की अनुवृत्ति आ रही है । 'सुपः' षष्ठ्यन्त पद है । तदनुसार

द्विवचन-बहुवचनसंज्ञानि स्युः । (१४०) **द्व्येकयोर्द्विवचनैकवचने १।४।२२** । द्वित्वैकत्वयोरेते स्तः । (१४१) **विरामोऽवसानम् १।४।११०** । वर्णानामभावोऽवसानसंज्ञः स्यात् । रुत्वविसर्गौ । रामः । * अयोगवाहानामकारस्योपरि शर्षु चेति वाच्यम् * ।

---

(१४०) पदार्थद्वयविवक्षायां द्विवचनम्, एवं तदर्थैकत्वविवक्षायामेकवचनम् ।

(१४१) विरम्यतेऽस्मिन्निति विरामः, स चात्र वर्णानामुच्चारणाभावात्मक एव । **राम इति** । रमन्ते योगिनोऽस्मिन्निति रामः=परमात्मा (दाशरथिश्च) । रामशब्दस्य अव्युत्पत्तिपक्षे 'अर्थवदधातुरप्रत्ययप्रातिपदिकम्' इति, व्युत्पत्तिपक्षे च

'सुप्' प्रत्याहार के इक्कीस प्रत्ययों को सात त्रिकों में विभाजित किया गया है । प्रत्येक त्रिक के ३ प्रत्ययों की क्रम से एकवचन, द्विवचन तथा बहुवचन संज्ञा होती है । इस प्रकार सातों विभक्तियों का त्रिकों में विभाजन निम्नलिखित चक्र में दर्शाया गया है—

'सुप्' प्रत्याहार-बोधक चक्र

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	सु	औ	जस्
द्वितीया	अम्	औट्	शस्
तृतीया	टा	भ्याम्	भिस्
चतुर्थी	ङे	भ्याम्	भ्यस्
पंचमी	ङसि	भ्याम्	भ्यस्
षष्ठी	ङस्	ओस्	आम्
सप्तमी	ङि	ओस्	सुप्

विभक्तियों के इत्संज्ञकवर्ण रहित रूप

प्रथमा — स् (:)	औ	अस् (:)
द्वितीया — अम्	औ	अस् (:)
तृतीया — आ	भ्याम्	भिस् (:)
चतुर्थी — ए	भ्याम्	भ्यस् (:)
पंचमी — अस् (:)	भ्याम्	भ्यस् (:)
षष्ठी — अस् (:)	ओस् (:)	आम्
सप्तमी — इ	ओस् (:)	सु

(१४०) पद—द्व्येकयोः, द्विवचनैकवचने । **संज्ञासूत्र ।**

मूलार्थ—द्वित्व की विवक्षा में द्विवचन और एकत्व की विवक्षा में एकवचन होता है ।

विमर्श—उद्देश्य (द्व्येकयोः) और विधेय (द्विवचनैकवचने) दोनों समान संख्या वाले होने से यथासंख्यपरिभाषा की उपस्थिति से क्रमशः अन्वित हो जाते हैं । उदाहरण—द्विवचन—रामौ । एकवचन—रामः ।

(१४१) पद—विरामः, अवसानम् । **संज्ञासूत्र ।**

सूत्रार्थ—वर्णों के अभाव की अवसान संज्ञा होती है ।

यमाऽनुस्वारविसर्गजिह्वामूलीयोपध्मानीया अयोगवाहाः। तेनेह विसर्गस्य यर्त्वादनचि चेति द्वित्वपक्षे रामः। (१४२) सरूपाणामेकशेष एकविभक्तौ १।२।६४। एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते, अन्ये तु लुप्यन्ते। (१४३) प्रथमयोः पूर्वसवर्णः ६।१।१०२। अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एका-

'कृत्तद्धितसमासाश्चे'ति प्रातिपदिकसंज्ञायां 'ङ्याप्प्रातिपदिकात्' इति प्रातिपदिकसंज्ञकरामशब्दात् 'स्वौजसमौडि'ति 'खले कपोतन्यायेन' सर्वे स्वादयः प्राप्ताः तत्र सुपः इत्यनेन प्रथमादिसप्तम्यन्तत्रिके एकवचनद्विवचनबहुवचनसंज्ञाः विहिताः। तेषु प्रथमाविभक्तेः एकवचनविवक्षायां सु-प्रत्ययेऽनुबन्धलोपे 'राम + स्' इति जाते 'ससजुषो रुः' इत्यनेन सकारस्य रुत्वेऽनुबन्धलोपे 'राम + र्' इति दशायां 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे कृते 'रामः' इति।

(१४३) 'अकः सवर्णे दीर्घः' इत्यतोऽक इत्यनुवर्तते, 'इको यणचि' इत्यतोऽचीति। 'एकः पूर्वपरयो'रित्यधिकारः। राम + औ 'वृद्धिरेचि' इति वृद्धिः।

विमर्श—विरम्यतेऽनेनेति विरामः (वि+√रम्+घञ् (भाव में)=विरामः) जिस वर्ण पर उच्चारण रुक जाय, उसे विराम कहते हैं। सूत्र में 'विराम' संज्ञी और 'अवसान' संज्ञा है। अवसान का स्थल 'खरवसानयोर्विसर्जनीयः' (८।३।१५) है। तदनुसार प्रातिपदिकसंज्ञक राम शब्द से एकत्व की विवक्षा में प्रथमा विभक्ति का एकवचन 'सु' प्रत्यय आने पर राम सु (उ की इत्संज्ञा–'उपदेशेऽजनुनासिक इत्' से)—**'राम+स्'** (स्=र्, —'ससजुषो रुः') राम+र्, (र्= :—'खरवसानयोः०')=रामः। (वा०) 'अयोगवाहों का अक्षरसमाम्नाय (चतुर्दश माहेश्वरसूत्रों) में अकार के आगे तथा शर् प्रत्याहार में पाठ जानना चाहिए।'

यम, अनुस्वार, विसर्ग, जिह्वामूलीय और उपध्मानीय को 'अयोगवाह' कहते हैं।

इस प्रकार यर् प्रत्याहारान्तर्गत विसर्ग का पाठ होने से 'अनचि च' सूत्र से विसर्ग का द्वित्व होकर 'रामः' रूप भी निष्पन्न हुआ।

(१४२) पद—सरूपाणाम्, एकशेषः, एकविभक्तौ। **नियमसूत्र।**

मूलार्थ—एक विभक्ति में जितने समान रूप देखे जायँ, उनमें से एक ही शेष रहता है। (अन्य का लोप हो जाता है)।

विमर्श—(एका चासौ विभक्तिः, तस्याम्) समान विभक्ति में समान रूप वाले शब्दों का एक रूप ही शेष रहता है। अर्थात् द्विवचन तथा बहुवचन की विवक्षा में दो या अधिक समान रूप वाले शब्दों के आगे समान विभक्तियों के आने पर उनमें से एक ही शब्द शेष रहता है। अन्य शब्दों का लोप हो जाता है।

(१४३) पद—प्रथमयोः, पूर्वसवर्णः। **अनुवृत्ति**—अकः, अचि। **विधिसूत्र।**

मूलार्थ—'अक्' से प्रथमा-द्वितीया सम्बन्धी अच् परे रहते पूर्व-पर के स्थान में पूर्वसवर्ण दीर्घ एकादेश होता है।

विमर्श—'एकः पूर्वपरयोः' (६।१।८४) का अधिकार है। 'अकः सवर्णे दीर्घः' (६।१।१०१) से 'अकः' तथा 'इको यणचि' (६।१।७७) से 'अचि' की अनुवृत्ति आती है। तदनुसार अक् (अ इ उ ऋ लृ) के अनन्तर प्रथमा, द्वितीया विभक्ति सम्बन्धी अच् (स्वर्) वर्ण परे रहते दोनों वर्णों के स्थान पर पूर्ववर्णस्वरूप 'सवर्णदीर्घ' एकादेश होता है।

देशः स्यात् । इति प्राप्ते । (१४४) **नादिचि** ६।१।१०४ । आदिचि न पूर्वसवर्णदीर्घः । वृद्धिरेचि । रामौ । (१४५) **बहुषु बहुवचनम्** १।४।२१ । बहुत्वविवक्षायां बहुवचनं स्यात् । (१४६) **चुटू** १।३।७ । प्रत्ययाद्यौ चुटू इतौ स्तः । (१४७) **विभक्तिश्च** १।४।१०४ । सुप्तिङौ विभक्तिसंज्ञौ स्तः । (१४८) **न विभक्तौ तुस्माः** १।३।४ । विभक्तिस्थास्तुस्माः नेतः । इति सस्य नेत्वम् । रामाः । (१४९) **एकवचनं**

---

(१४५) बहुत्वविवक्षायां बहुवचनं स्यादित्यर्थः ।

(१४८) **रामा इति** । रामश्च रामश्च रामश्चेति विग्रहे रामरामरामेति बहुत्वविवक्षायां प्रातिपदिकसंज्ञायां 'बहुषु बहुवचनम्' इत्येतत्सहकृतेन 'स्वौजसमौडि'ति

---

(१४४) पद—न, आत्, इचि । **अनुवृत्ति**—पूर्वसवर्णः । **विधिसूत्र** (निषेध) ।

मूलार्थ—अवर्ण के अनन्तर इच् परे रहते पूर्वसवर्ण दीर्घ नहीं होता । वृद्धिरेचि । रामौ ।

विमर्श—सूत्रस्थ 'आत्' पद में पञ्चमी विभक्ति है । पूर्वसूत्र से 'पूर्वसवर्णः' की अनुवृत्ति आ रही है । 'आत्' में तपरकरण होने से ह्रस्व अकार के आगे इच् (इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ) वर्ण परे रहते पूर्वसवर्ण दीर्घ नहीं होता ।

उदाहरण—राम, राम+औ (द्वित्व की विवक्षा में प्रथमा विभक्ति का द्विवचन) 'सरूपाणामेक०' से एकशेष होकर—राम+औ, (इस स्थिति में 'अ+औ=औ' वृद्धिसन्धि का बाध कर 'प्रथमयोः०' (१४३) सूत्र से ('अ+औ=आ') पूर्वसवर्ण दीर्घ की प्राप्ति होती है । इच् (औ) परे होने से 'नादिचि' (१४४) सूत्र द्वारा पूर्वसवर्ण दीर्घ का निषेध हुआ । अतः 'वृद्धिरेचि' से वृद्धि होकर (अ+औ=औ)=रामौ ।

(१४५) पद—बहुषु, बहुवचनम् । **संज्ञासूत्र** ।

मूलार्थ—बहुत्व की विवक्षा में बहुवचन होता है ।

विमर्श—सूत्र स्वयं में पूर्ण है । दो या दो से अधिक की अपेक्षा में बहुवचन के प्रत्यय होते हैं ।

(१४६) पद—चुटू । **अनुवृत्ति**—प्रत्ययस्य, आदिः, इत् । **संज्ञासूत्र** ।

मूलार्थ—प्रत्यय के आदि में स्थित चवर्ग और टवर्ग की इत्संज्ञा होती है ।

विमर्श—यहाँ 'ष-प्रत्ययस्य' से 'प्रत्ययस्य', 'आदिर्ञिटुडवः' से 'आदिः' तथा 'उपदेशेऽजनुनासिक इत्' से 'इत्' की अनुवृत्ति आती है । तदनुसार प्रत्यय के आदि में स्थित चवर्ग और टवर्ग इत्संज्ञक होते हैं ।

(१४७) पद—विभक्तिः, च । **अनुवृत्ति**—सुप्, तिङ् । **संज्ञासूत्र** ।

मूलार्थ—सुप् और तिङ् की विभक्तिसंज्ञा होती है ।

विमर्श—पूर्वसूत्र (१३८) से 'सुप्' तथा 'तिङस्त्रीणि०' (१।४।१०१) से 'तिङ्' की अनुवृत्ति आती है । सुप् और तिङ् प्रत्याहार हैं । 'सुप्' में २१ तथा 'तिङ्' में १८ प्रत्यय समाविष्ट हैं । इनकी विभक्तिसंज्ञा होती है ।

(१४८) पद—न, विभक्तौ, तुस्माः । **अनुवृत्ति**—उपदेशे, हलन्त्यम्, इत् । **संज्ञासूत्र** (निषेध) ।

मूलार्थ—विभक्ति के तवर्ग, सकार और मकार की इत्संज्ञा नहीं होती है । अतः स् की इत्संज्ञा नहीं हुई । रामाः ।

सम्बुद्धिः २।३।४९। सम्बोधने प्रथमायाः एकवचनं सम्बुद्धिसंज्ञं स्यात्। (१५०) **यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १।४।१३।** यः प्रत्ययो यस्मात् क्रियते तदादिशब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात्। (१५१) **एङ्ह्रस्वात्सम्बुद्धेः ६।१।६९।** एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्। हे राम! हे रामौ! हे रामाः!

प्रथमाबहुवचने जसि 'राम राम राम जस्' इति जाते 'सरूपाणामेकशेष एकविभक्तौ' इत्यनेनैकस्य शेषे 'राम जस्' इत्यत्र 'चुटू' इत्यनेन जस्येत्संज्ञायां 'तस्य लोपः' इति लोपे च कृते 'राम अस्' इति जाते, सकारस्य 'हलन्त्यम्' इत्यनेन प्राप्तेत्संज्ञायाः 'विभक्तिश्च' इति विभक्तिसंज्ञापुरस्सरं 'न विभक्तौ तुस्माः' इत्यनेन निषेधे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'ससजुषो रुः' इति सस्य रुत्वेऽनुबन्धलोपे 'खरवसानयोः०' इति रेफस्य विसर्गे 'रामाः' इति सिद्धम्।

(१४९) **एकवचनमिति।** प्रातिपदिकार्थलिङ्गेत्यतः प्रथमेत्यनुवर्तते, षष्ठ्या च विपरिणम्यते। 'सम्बोधने चे'त्यतः 'सम्बोधने' इत्यनुवर्तते। तदाह—**सम्बोधन इत्यादिना।**

(१५१) **एङ्ह्रस्वादिति।** एङ्ह्रस्वादित्यङ्गविशेषणत्वात् तदन्तविधिः। 'हल्-

---

विमर्श—अनुवृत्त पदों के द्वारा सूत्रार्थ पूर्ण होता है। तदनुसार तवर्ग=त्, थ्, द्, ध्, न, स् तथा म् यदि विभक्ति अर्थात् सुप् प्रत्ययों के अन्त में स्थित हों तो उनकी इत्संज्ञा नहीं होती। इत्संज्ञा का फल लोप का न होना है।

उदाहरण—बहुत्व की विवक्षा में राम शब्द से प्रथमा बहुवचन जस्,—'राम राम राम+जस्' (एकशेष होकर) राम+जस्, (ज् की इत्संज्ञा—'चुटू', लोप) राम+अस् ('स्' की हलन्त्यम् से इत्संज्ञा प्राप्त 'विभक्तिश्च' से विभक्तिसंज्ञा होकर 'न विभक्तौ तुस्माः' से इत्संज्ञा का निषेध, 'प्रथमयोः पूर्वसवर्णः' से अ+अ='आ' दीर्घ)—रामास् (स्=र्), रामार् (र्=:)=रामाः।

(१४९) पद—एकवचनं, सम्बुद्धिः। **अनुवृत्ति**—प्रथमा, सम्बोधने। **संज्ञासूत्र।**

मूलार्थ—सम्बोधन में प्रथमा के एकवचन (सु) की सम्बुद्धि संज्ञा होती है।

विमर्श—प्रकृत सूत्र में 'प्रातिपदिकार्थ०' (२।३।४६) से 'प्रथमा' तथा 'सम्बोधने च' से 'सम्बोधने' पदों की अनुवृत्ति आ रही है। 'प्रथमा' पद षष्ठी विभक्ति में परिवर्तित हो जाता है—'प्रथमायाः'। इस प्रकार सम्बोधन में प्रथमा विभक्ति के एकवचन की 'सम्बुद्धि' संज्ञा होती है। दूर से बुलाने पर प्रयुक्त प्रथमा विभक्ति का दूसरा नाम सम्बोधन है।

(१५०) पद—यस्मात्, प्रत्ययविधिः, तदादि, प्रत्यये, अङ्गम्। **संज्ञासूत्र।**

मूलार्थ—जो प्रत्यय जिस (शब्द) से किया जाय, तदादि शब्द रूप को उस प्रत्यय के परे रहते 'अङ्ग' संज्ञा होती है।

विमर्श—यहाँ प्रत्यय को अङ्ग संज्ञा से निमित्त माना गया है—अर्थात् इस प्रकार किसी शब्द से विधीयमान प्रत्यय परे रहते तदादि (प्रत्यय से पूर्व शब्दस्वरूप) अङ्गसंज्ञक होता है। यथा राम शब्द से 'सु' (प्रत्यय) आने पर उसके परे 'राम' की अङ्ग संज्ञा होती है।

(१५१) पद—एङ्ह्रस्वात्, सम्बुद्धेः। **अनुवृत्ति**—हल्, लोपः। **विधिसूत्र।**

(१५२) अमि पूर्वः ६।१।१०७। अकोऽम्यचि पूर्वरूपमेकादेशः स्यात्। रामम्। रामौ। (१५३) लशक्वतद्धिते १।३।८। तद्धितवर्जप्रत्ययाद्या ल-श-कवर्गा इतः स्युः।

ङ्याब्भ्यः०' इत्यतो हलिति प्रथमान्तमनुवर्तते। 'लोपो व्योर्वलि' इत्यतो लोप इत्यनुवर्तते। ततश्च एङन्तादध्रस्वान्ताच्चाङ्गात्परं यत् हल् सम्बुद्धयवयवभूतं तल्लुप्यत इति फलितार्थः। **हे राम इति।** रामशब्दात् सम्बोधनार्थकप्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे राम+स् इति जाते 'एकवचनं सम्बुद्धिः' इति सम्बुद्धिसंज्ञायां 'यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्' इत्यनेन रामशब्दस्याङ्गत्वे 'एङ्ह्रस्वात्सम्बुद्धेः' इति सकारस्य लोपे कृते 'हे राम!' इति।

(१५२) **अमि पूर्व इति।** 'अकः सवर्णे दीर्घः' इत्यतोऽक इति पञ्चम्यन्तमनुवर्तते 'इको यणची'त्यतोऽचीति च। 'एकः पूर्वपरयोरि'त्यधिकारः। तथा चामोऽवयवेऽचि परे इति फलितार्थः।

मूलार्थ—एङन्त, ह्रस्वान्त अङ्ग से परे 'सम्बुद्धि' के हल् का लोप होता है।

विमर्श—'सम्बुद्धि' संज्ञा फल प्रकृत सूत्र द्वारा बतलाया जा रहा है। यहाँ 'हल्ङ्याब्भ्यो०' (६।१।६८) से 'हल्' तथा 'लोपो व्योर्वलि' (६।१।६६) से 'लोपः' की अनुवृत्ति आती है। तदनुसार एङ् तथा ह्रस्व से परे 'सम्बुद्धि' का 'हल्' लुप्त हो जाता है। **उदाहरण—हे राम—** यहाँ राम शब्द से सम्बोधन में प्रथमा का एकवचन 'सु' प्रत्यय आने पर राम+सु (स्)—('एकवचनं सम्बुद्धिः' से सम्बुद्धि संज्ञा होकर 'एङ्ह्रस्वात्सम्बुद्धेः' से ह्रस्वान्त अङ्ग 'राम' के पश्चात् 'स्' का लोप)=हे राम!

(१५२) पद—अमि, पूर्वः। **अनुवृत्ति**—अकः, अचि। **विधिसूत्र।**

मूलार्थ—अक् से अम् सम्बन्धी अच् परे रहते पूर्वरूप एकादेश होता है।

विमर्श—अक्=(अ, इ, उ, ऋ, ऌ) के अनन्तर द्वितीया का एकवचन 'अम्' का अच् (अ) परे रहते पूर्व-पर के स्थान में पूर्वरूप एकादेश होता है। यहाँ 'अकः सवर्णे दीर्घः' से 'अकः', 'इको यणचि' से 'अचि' की अनुवृत्ति आती है। 'एकः पूर्वपरयोः' का अधिकार है। यह सूत्र 'अकः सवर्णे०' 'अतो गुणे' और 'प्रथमयो०' का बाधक है।

उदाहरण—(१) राम शब्द से द्वितीया का एकवचन 'अम्' प्रत्यय आने पर 'राम+अम्' (यहाँ मकारोत्तरवर्ती अकार 'अक्' है, उससे पर 'अम्' का अकार 'अच्' है, अतः 'अ+अ=अ'—पूर्वरूप होकर)=रामम्।

(२) द्वितीया—द्विवचन 'औट्' प्रत्यय आने पर 'राम राम+औ' एकशेष होकर—'राम+औ'—(अ+औ=औ—'वृद्धिरेचि')=रामौ।

(१५३) पद—लशकु, अतद्धिते। **अनुवृत्ति**—प्रत्ययस्य, आदिः, इत्। **संज्ञासूत्र।**

मूलार्थ—तद्धित को छोड़कर प्रत्यय के आदि में स्थित लकार, शकार और कवर्ग की इत्संज्ञा होती है।

विमर्श—सूत्रार्थ के लिए 'षः प्रत्ययस्य' (१।३।६) से 'प्रत्ययस्य', 'आदिर्ञिटुडवः' (१।३।५) से 'आदिः' तथा 'उपदेशेऽजनुनासिक इत्' से 'इत्' की अनुवृत्ति आती है। तदनुसार तद्धित भिन्न प्रत्यय के आदि वर्ण ल्, श्, कवर्ग=(क्, ख्, ग्, घ्, ङ्) इत्संज्ञक होते हैं। (इत्संज्ञा का फल वर्णों का लोप होना है)।

(१५४) तस्माच्छसो नः पुंसि ६।१।१०३ । पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात्पुंसि । **(१५५) अट्कुप्वाङ्नुम्व्यवायेऽपि ८।४।२ ।** अट्-कवर्ग-पवर्ग-आङ्-नुम्-एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे । इति प्राप्ते । **(१५६) पदान्तस्य ८।४।३७ ।** नस्य णो न । रामान् । **(१५७)**

(१५४) **पूर्वसवर्णदीर्घादिति** । तच्छब्देनात्र सन्निहितस्य पूर्वसवर्णदीर्घस्यैव परामर्शः ।

(१५५) **अट्कुप्वाङिति** । 'रषाभ्यां नो णः समानपदे' इति सम्पूर्णसूत्रमनुवर्तते । अट्कवर्ग-पवर्ग-आङ्-नुम् इत्येतेषां मध्ये प्रत्येकं व्यवधाने यथासम्भवमिलितद्वयादिव्यवधानेऽपि रषाभ्यां परस्य नस्य णत्वं स्यादित्यर्थः ।

(१५६) रामानिति । रामशब्दाद् द्वितीयाबहुवचने शसि 'लशक्वतद्धिते' इति शकारस्येत्संज्ञायां लोपे च राम + अस् इति जाते, 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'रामास्' इत्यत्र 'तस्माच्छसो नः पुंसि' इति सकारस्य नकारे कृते 'रामान्' इति । अत्र अट्कुप्वाङित्यादिना नस्य णत्वे प्राप्ते 'पदान्तस्ये'ति तन्निषेधे रामान्निति रूपम् ।

(१५४) पद—तस्मात् , शसः, नः, पुंसि । **विधिसूत्र ।**

मूलार्थ—पूर्वसवर्ण दीर्घ से परे 'शस्' के सकार को पुँल्लिग में नकार होता है ।

विमर्श—प्रकृत सूत्र का 'तस्मात्' पद अपने समीपवर्ती पूर्वसवर्ण दीर्घ का परामर्शक है । अतः पूर्वसवर्ण दीर्घ होने के पश्चात् 'शस्' के स् स्थान में (पुंल्लिंगवाचक शब्दों में) 'न्' होता है ।

(१५५) पद—अट्कुप्वाङ्नुम्व्यवाये, अपि । **अनुवृत्ति**—रषाभ्यां नः णः समानपदे । **विधिसूत्र ।**

मूलार्थ—अट्, कवर्ग, पवर्ग, आङ्, नुम् का यथासम्भव सम्मिलित अथवा अलग-अलग व्यवधान होने पर भी समानपद (एकपद) में र्, ष् से परे 'न्' के स्थान पर 'ण्' होता है ।

विमर्श—'रषाभ्यां नो णः समानपदे' (८।४।१) सम्पूर्ण सूत्र यहाँ अनुवृत्त होता है । इस प्रकार किसी एकपद में 'र्, ष्' के बाद अट्, कवर्ग, पवर्ग, आङ्, नुम् से व्यवधान सहित 'न्' के स्थान में 'ण्' होता है । अट्, कवर्ग आदि का यह व्यवधान अलग-अलग अथवा दो-तीन वर्णों का सम्मिलित भी हो सकता है ।

(१५६) पद—पदान्तस्य । **अनुवृत्ति**—नः, णः, न । **विधिसूत्र** (निषेध) ।

मूलार्थ—पदान्त नकार को णकार नहीं होता ।

विमर्श—'रषाभ्यां नो०' (८।४।१) से 'नः' तथा 'णः' की, एवम् 'न भाभूपूकमि०' (८।४।३४) से 'न' की अनुवृत्ति आती है । तदनुसार पद के अन्त में स्थित 'न्' को 'ण्' नहीं होता । रामान् । **उदाहरण**—राम शब्द से द्वितीया का बहुवचन 'शस्' प्रत्यय आने पर 'राम+शस्' ('लशक्वतद्धिते' से 'श्' की इत्संज्ञा, लोप होने पर) राम+अस् (अ+अ='आ' दीर्घ—'प्रथमयोः०' से)—'रामास्' (स्=न्—'तस्माच्छसो नः पुंसि') रामान् ('अट्कुप्वाङ्' से न्=ण् प्राप्त, 'पदान्तस्य' से निषेध होकर)=रामान् ।

टाङसिङसामिनात्स्याः ७।१।१२। अदन्ताट्टादीनामिनादयः क्रमात् स्युः। णत्वम्। रामेण। (१५८) **सुपि च ७।३।१०२।** यञादौ सुप्यतोऽङ्गस्य दीर्घः स्यात्। रामाभ्याम्। (१५९) **अतो भिस ऐस् ७।१।९।** अतोऽङ्गात्परस्य भिस ऐस् स्यात्। 'अनेकाल्शित्सर्वस्य'। रामैः। (१६०) **ङेर्यः ७।१।१३।** अतोऽङ्गात्परस्य ङेर्यादेशः

---

(१५७) **टाङसिङसामिति।** 'टा' इत्यस्य 'इन', 'ङसि' इत्यस्य 'आत्' 'ङस्' इत्यस्य 'स्य' इति स्यादित्यर्थः। **रामेणेति।** रामशब्दात् तृतीयैकवचने 'टा' विभक्तौ 'राम + टा' इति दशायां 'टाङसिङसामिनात्स्याः' इति टास्थाने इनादेशे 'आद् गुणः' इति गुणे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नस्य णत्वे 'रामेण' इति।

(१५९) **रामैरिति।** रामशब्दात् तृतीयाबहुवचनविवक्षायां भिस्प्रत्यये राम + भिस् इति जाते 'अतो भिस ऐस्' इति ऐसादेशे प्राप्ते क्व स्यादिति जिज्ञासायाम् 'अनेकाल्शित्सर्वस्ये'ति परिभाषया सर्वस्य भिसः स्थाने ऐसादेशे 'वृद्धिरेची'ति वृद्धौ सस्य रुत्वे विसर्गे च 'रामैः' इति रूपम्।

---

(१५७) पद—टाङसिङसाम्, इनात्स्याः। **अनुवृत्ति**—अतः, अङ्गस्य। **विधिसूत्र।**

मूलार्थ—अदन्त अङ्ग से परे टा, ङसि, ङस के स्थान में क्रमशः इन्, आत् और स्य आदेश होते हैं। रामेण।

विमर्श—प्रकृत सूत्र में 'अतो भिस्०' (७।१।९) से 'अतः' की अनुवृत्ति आती है। 'अङ्गस्य' का अधिकार है। जो पञ्चम्यन्त में परिवर्तित हो जाता है। इस प्रकार 'अतः' पद अङ्गस्य का विशेषण होने से तदन्तविधि होकर—ह्रस्व अकारान्त अङ्ग से परे टा, ङसि, ङस के स्थान में क्रम से इन, आत्, स्य होते हैं। **उदाहरण**—राम शब्द से तृतीया-एकवचन 'टा' आने पर 'राम+टा' (टा=इन 'टाङसिङसाम्०') 'राम+इन' (अ+इ='ए' गुण)—रामेन (न्=ण्—अट्कुप्वाङ्०)=रामेण।

(१५८) पद—सुपि, च। **अनुवृत्ति**—अतः, अङ्गस्य, दीर्घः, यञि। **विधिसूत्र।**

मूलार्थ—यञादि सुप् के परे रहते अदन्त अङ्ग को दीर्घ होता है। रामाभ्याम्।

विमर्श—प्रकृत सूत्र में 'अतो दीर्घो यञि' (७।३।१०१) सम्पूर्ण सूत्र की अनुवृत्ति आती है। 'यञि' सुपि का विशेषण है, तदादि-विधि होने पर 'यञादि सुप्' अर्थ होता है। इस प्रकार यञादि सुप् (भ्याम्, भिस्, भ्यस् तथा ङे) प्रत्यय परे रहते ह्रस्व अकारान्त अङ्ग को दीर्घ होता है। **उदाहरण**—राम शब्द से तृतीया-द्विवचन 'भ्याम्' प्रत्यय आने पर 'राम+भ्याम्' (अ='आ' दीर्घ—'सुपि च')=रामाभ्याम्।

(१५९) पद—अतः, भिसः, ऐस्। **अनुवृत्ति**—अङ्गस्य। **विधिसूत्र।**

मूलार्थ—अदन्त अङ्ग से परे 'भिस्' के स्थान पर 'ऐस्' आदेश होता है। रामैः।

विमर्श—'अङ्गस्य' का अधिकार है। 'अतः' अङ्गस्य का विशेषण है। यहाँ आदेश ऐस् और स्थानी भिस् दोनों अनेकाल् हैं। अतः 'अनेकाल्शित्सर्वस्य' परिभाषा के द्वारा सम्पूर्ण 'भिस्' के स्थान में 'ऐस्' आदेश होता है। **उदाहरण**—राम शब्द से तृतीया बहुवचन 'भिस्'—राम+भिस्-('भिस्'='ऐस्'—'अतो भिस ऐस्') राम+ऐस् (अ+ऐ=ऐ—वृद्धि)—रामैस्, (स्=र्)—रामैर्, (र=:)=रामैः।

स्यात् । (१६१) स्थानिवदादेशोऽनल्विधौ १।१।५६ । आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ । आदेशोऽलाश्रयविधौ तु स्यादेव । इति स्थानिवत्वात्सुपि चेति

---

(१६०) **ङेर्य इति ।** ङेरिति चतुर्थ्येकवचनस्य ग्रहणम्, प्रतिपदोक्तत्वात् । न तु सप्तम्येकवचनस्य 'ङि' इत्यस्येति ।

(१६१) यथा लोके गुरुस्थानापन्ने गुरुपुत्रादौ स्थानापत्त्या तद्धर्मलाभः प्रसिद्धः, तथैवेह शास्त्रे आदेशः स्थानिना तुल्यो भवति—अर्थात् स्थानिधर्मको भवतीति । अलिति वर्णपर्यायः । अलाश्रयो विधिः अल्विधिः, एकवर्णाश्रितो विधिरित्यर्थः । न अल्विधिः अनल्विधिः, तस्मिन् अनल्विधौ । अलाश्रयभिन्ने कार्ये कर्तव्ये स्थानिवन्न भवतीति फलितार्थः । अल् चेह स्थान्यवयव एव गृह्यते । तदाह मूले—**न तु स्थान्यलाश्रयविधाविति ।** यथा 'क इष्टः' इत्यत्र यज्धातोः क्तप्रत्यये सम्प्रसारणे पूर्वरूपे च कृते 'इष्टः' इति रूपम् । अत्र स्थानिवद्भावात् इकारे यकारं मत्वा 'हशि चे'त्यनेन रोरुत्वं न भवति, स्थान्यलाश्रयविधित्वात् । **रामाय इति ।** रामशब्दात् चतुर्थ्येकवचने 'ङे' विभक्तौ 'ङेर्यः' इत्यनेन 'ङे' इत्यस्य स्थाने यकारादेशे कृते राम + य इति जाते, 'स्थानिवदादेशोऽनल्विधावि'ति स्थानिवद्भावेन यकारे सुप्त्वमानीय 'सुपि चे'ति अदन्ताङ्गस्य दीर्घे 'रामाय' इति । अत्र दीर्घे कर्तव्ये सन्निपातपरिभाषा तु न प्रवर्तते, 'कष्टाय क्रमणे' इत्यादिनिर्देशात् ।

---

(१६०) पद—ङेः, यः । **अनुवृत्ति**—अतः, अङ्गस्य । **विधिसूत्र ।**

मूलार्थ—अदन्त अङ्ग से परे 'ङ्' के स्थान में 'य' आदेश होता है ।

विमर्श—'अङ्गस्य' का अधिकार है । 'अतो भिस ऐस्' (७।१।९) से 'अतः' पञ्चम्यन्त पद की अनुवृत्ति आ रही है । 'य' आदेश 'य्+अ' अनेकाल् होने से सम्पूर्ण 'ङ्' के स्थान पर होता है ।

(१६१) पद—स्थानिवत्, आदेशः, अनल्विधौ । **अतिदेशसूत्र ।**

मूलार्थ—आदेश स्थानिवत् (स्थानी के समान) होता है, किन्तु स्थानी-सम्बन्धी एक अल् (वर्ण) को आश्रय मानकर विधि करनी हो तो स्थानिवद्भाव नहीं होता ।

विमर्श—छः प्रकार के सूत्रों में यह आरोपबोधक अतिदेशसूत्र है । आदेश से स्थानी का नाश हो जाने पर स्थानी की सत्ता नहीं रहती है, परन्तु प्रकृत सूत्र द्वारा स्थानी में रहने वाले धर्म का आदेश में आरोप हो जाता है । जैसे—राम+ङे (चतुर्थी एकवचन), ङे=य—'ङेर्यः', राम+य (यहाँ 'य' में सुप्त्व नहीं है, किन्तु इस अतिदेशसूत्र ने सुप्त्व के अभाव वाले 'य' में सुप्त्व का आरोप किया । अतः 'सुपि च' से दीर्घ होकर 'रामाय' प्रयोग हुआ ।

इस सूत्र में दो वाक्य हैं—(१) आदेशः स्थानिवत् और (२) अनल्विधौ । यहाँ अल्विधिः का अर्थ है—अलाश्रय विधि । 'अल्' पद वर्ण का पर्याय है । नञ्तत्पुरुष समास है—न अल्विधिः 'अनल्विधिः' । अर्थात् एक अल् (वर्ण) के आश्रय से कुछ विधान हो तो आदेश स्थानिवत् नहीं होता । 'अल्विधिः' पद में चार प्रकार से विग्रह हो सकता है—(१) अला विधिः (तृतीया तत्पुरुष), (२) अलः विधिः (पञ्चमी त०), (३) अलः विधिः (षष्ठी त०), (४) अलि विधिः (सप्तमी त०) । अत एव 'व्यूढोरस्केन, द्यौः, द्युकामः, क इष्टः' में स्थानिवद्भाव का अल्विधि होने से निषेध होने पर क्रमशः णत्व, विभक्तिलोप, वलोप और उत्व कार्य नहीं हुए ।

दीर्घः। रामाय। रामाभ्याम्। (१६२) बहुवचने झल्येत् ७।३।१०३। झलादौ बहुवचने सुप्यतोऽङ्गस्यैकारः। रामेभ्यः। सुपि किम्? पचध्वम्। (१६३) वाऽवसाने ८।४।५६। अवसाने झलां चरो वा स्युः। रामात्–रामाद्। रामाभ्याम्। रामेभ्यः।

(१६२) 'सुपि चे'ति दीर्घस्यापवादोऽयम्। **सुपि किमिति।** पचध्वम्। पूर्वसूत्रतो यदि सुपीति नान्ववर्तिष्यत तदा ध्वमि परेऽनेन सूत्रेणैकारोऽभविष्यत् पचेध्वमिति स्यात्। नात्र सुप्, किन्तु (ध्वम्) तिङ्।

(१६३) **रामादिति।** रामशब्दात् पञ्चम्येकवचने 'ङसि' विभक्तौ 'टाङसिङसामिनात्स्याः' इति ङसेरादादेशे 'अकः सवर्णे०' इति दीर्घे 'झलां जशोऽन्ते' इति तस्य दत्वे 'वाऽवसाने' इति दस्य विकल्पेन तत्वे 'रामात्' इति। पक्षे 'रामाद्' इति।

(१६२) पद—बहुवचने, झल्येत्। **अनुवृत्ति**—अतः, अङ्गस्य, सुपि। **विधिसूत्र।**

मूलार्थ—झलादि बहुवचन 'सुप्' परे रहते अकारान्त अङ्ग को एकार आदेश होता है। रामेभ्यः। 'सुपि' क्यों कहा?—पचध्वम्।

विमर्श—प्रकृत सूत्र में 'अतो दीर्घो यञि' (७।३।१०१) से अतः तथा 'सुपि च' से सुपि की अनुवृत्ति आती है। 'अतः' में अङ्गस्य का विशेषण होने से तदन्तविधि होती है। इसी प्रकार सुपि का विशेषण झलि होने से तदादिविधि होकर 'झलादि सुप्' अर्थं होता है। अलोऽन्त्यपरिभाषा की उपस्थिति से बहुवचन में झलादि सुप् परे रहते ह्रस्व अकारान्त अङ्ग के अन्तिम अल् को 'ए' आदेश होता है।

उदाहरण—राम शब्द से चतुर्थी बहुवचन 'भ्यस्' आने पर राम+भ्यस्, (अ=ए, झलादि सुप् (भ्यस्) परे रहते) रामेभ्यस् (स्=र्), रामेभ्यर् (र्= :)=रामेभ्यः।

प्रत्युदाहरण—प्रकृत सूत्र में 'सुपि' पद की अनुवृत्ति आती है। अतः प्रस्तुत एकार का विधान 'सुप्' प्रत्याहार में ही होता है। अतः 'पचध्वम्' में तिङ् प्रत्यय (ध्वम्) होने से चकारोत्तरवर्ती अकार को एकार नहीं हुआ।

(१६३) पद—वा, अवसाने। **अनुवृत्ति**—झलां चर। **विधिसूत्र।**

मूलार्थ—अवसान में विद्यमान 'झल्' के स्थान में 'चर्' आदेश विकल्प से होता है। रामात्। रामाद्।

विमर्श—प्रकृत सूत्र में 'झलां जश् झशि' (८।४।५३) से 'झल्' तथा 'अभ्यासे चर्च' से 'चर्' की अनुवृत्ति आती है। इस प्रकार अवसान (पद के अन्त में) विद्यमान् झल् वर्णों के स्थान में विकल्प से चर् हो जाता है।

उदाहरण—(१) राम शब्द से पञ्चमी का एकवचन 'ङसि' प्रत्यय आने पर 'राम+ङसि' ङसि=आत्—'टाङसिङसाम्०' से) राम+आत् (अ+आ='आ' दीर्घ)=रामात् (त्=द् 'झलां जशोऽन्ते')—रामाद् (द्=त् 'वाऽवसाने')=रामात्। विकल्प होने के कारण पक्ष में रामाद्।

(२) पञ्चमी द्विवचन 'भ्याम्'—राम+भ्याम् (दीर्घ—'सुपि च')=रामाभ्याम्।

(३) पञ्चमी बहुवचन 'भ्यस्'—राम+भ्यस् (अ='ए'—'बहुवचने झल्येत्')—रामेभ्यस् (स्=र्)—रामेभ्यर् (र्= :)=रामेभ्यः।

(४) षष्ठी एकवचन 'ङस्'—राम+ङस् (ङस्=स्य 'टाङसिङसा०' से)—रामस्य।

रामस्य । (१६४) ओसि च ७।३।१०४ । अतोऽङ्गस्यैकारः स्यात् । रामयोः । (१६५) ह्रस्वनद्यापो नुट् ७।१।५४ । ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्याऽऽमो नुडागमः । (१६६) नामि ६।४।३ । नामि परेऽजन्ताङ्गस्य दीर्घः । रामाणाम् । रामे ।

---

(१६६) **रामाणामिति ।** रामशब्दात् षष्ठीबहुवचने आमि 'ह्रस्वनद्यापो नुट्' इति नुटचनुबन्धलोपे टित्वादाद्यवयवे राम + नाम् इति जाते 'नामि' इति दीर्घे णत्वे च कृते रामाणामिति ।

---

(१६४) पद—ओसि च । **अनुवृत्ति**—अतः, अङ्गस्य एत् । **विधिसूत्र ।**

मूलार्थ—अकारान्त अङ्ग को ओस् परे रहते एकार आदेश होता है ।

विमर्श—'अतो दीर्घो यञि' से 'अतः' तथा 'बहुवचने झल्येत्' से 'एत्' पद की अनुवृत्ति आती है 'अतः' पद अङ्गस्य का विशेषण होने से तदन्तविधि हो जाती है। इस प्रकार 'ओस्' विभक्ति के परे रहते ह्रस्व अदन्त अङ्ग अन्तिम वर्ण के स्थान में एकार आदेश हो जाता है ।

उदाहरण—राम शब्द से षष्ठी द्विवचन 'ओस्' विभक्ति आने पर राम+ओस्, (अ= 'ए'—'ओसि च') रामे+ओस् (ए=अय्)—रामयोस्, (स्=र्)—रामयोर्, (र्= :)= रामयोः ।

(१६५) पद—ह्रस्वनद्यापः, नुट् । **अनुवृत्ति**—आमि । **विधिसूत्र ।**

मूलार्थ—ह्रस्वान्त, नद्यन्त और आबन्त अङ्ग से परे 'आम्' को 'नुट्' का आगम होता है ।

विमर्श—'आमि सर्वनाम्नः सुट्' (७।१।५२) से 'आमि' पद की अनुवृत्ति आती है । 'ह्रस्वनद्यापः' में समाहारद्वन्द्व समास है (ह्रस्वश्च, नदी च, आप् च—एतेषां समाहारः) । 'अङ्गस्य' का अधिकार होने से ह्रस्व, नदी तथा आप् पदों में तदन्तविधि हो जाती है । 'आमि' पद षष्ठ्यन्त में परिवर्तित हो जाता है । 'नुट्' का आगम टित् होने के कारण 'आद्यन्तौ टकितौ' परिभाषा की उपस्थिति से 'आम्' का आद्यवयव होगा ।

उदाहरण—राम शब्द से षष्ठी बहुवचन आम्, राम+आम्, (नुट् (न्)—'सवर्ण दीर्घ का बाध कर 'ह्रस्वनद्यापो नुट्' से) राम न् आम् ।

(१६६) पद—नामि । **अनुवृत्ति**—दीर्घः, अच् , अङ्गस्य । **विधिसूत्र ।**

मूलार्थ—'नाम्' परे रहते अजन्त अङ्ग को दीर्घ होता है ।

विमर्श—'ढ्लोपे पूर्वस्य०' (६।३।१११) से 'दीर्घः' पद की अनुवृत्ति आती है । 'दीर्घ' पद से दीर्घ (अच्) विधान होने के कारण 'अचश्च' (५।२।२८) परिभाषा की उपस्थिति से 'अचः' पद अङ्गस्य का विशेषण हो जाता है । अतः अजन्ताङ्ग को नाम् परे रहने पर दीर्घ होता है ।

उदाहरण—(१) राम+नाम् (अ=आ—दीर्घ)—रामानाम् (न्=ण्—'अट्कुप्वाङ्०') =रामाणाम् । (२) राम शब्द से सप्तमी विभक्ति का एकवचन 'ङि'—राम+ङि (ङ् की इत्संज्ञा होकर) राम+इ (अ+इ='ए'—गुण)—रामे । (३) सप्तमी विभक्ति का द्विवचन 'ओस्' राम+ओस् (अ=ए—'ओसि च')=रामे+ओस् (ए=अय्)—रामयोस् (स्=र्)= रामयोर् (र्= :)=रामयोः । (४) सप्तमी विभक्ति के बहुवचन 'सुप्' प्रत्यय आने पर 'राम+सुप्' ('प्' की इत्संज्ञा होकर) राम+सु (अ=ए—'बहुवचने झल्येत्')—रामे+सु ।

रामयोः । सुपि एत्वे कृते । (१६७) **आदेशप्रत्यययोः ८।३।५९ ।** इण्कुभ्यां परस्याऽपदान्तस्याऽऽदेशः प्रत्ययावयवश्च यः सस्तस्य मूर्धन्यादेशः । ईषद्विवृतस्य सस्य तादृश एव षः । रामेषु । एवं कृष्णादयोऽप्यदन्ताः । (१६८) **सर्वादीनि सर्वनामानि १।१।२७ ।** सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः । सर्व । विश्व । उभ । उभय । डतर । डतम । अन्य । अन्यतर । इतर । त्वत् । त्व । नेम । सम । सिम ।

---

(१६७) **आदेशप्रत्यययोरिति ।** 'अपदान्तस्य मूर्धन्यः' (८।३।५५), 'इण्कोः' (८।३।५७) इत्यनयोरधिकारः । 'सहेः साडः सः' इत्यस्मात् 'सः' इत्यनुवर्तते । तच्च 'आदेशप्रत्यययोरि'त्यत्र द्विवचनान्ततया विपरिणम्य सम्बध्यते । एवञ्च इण्वर्गाभ्यां परयोः पदान्तयोरादेशात्मकप्रत्ययावयवात्मकयोः सकारयोः मूर्द्धन्यादेशः स्यादित्यर्थः ।

(१६८) **सर्वादीनीति ।** सर्वः आदिर्येषां तानि सर्वादीनि । तथा च सर्वादिगणपठितानि सर्वनामसंज्ञानि स्युरित्यर्थः ।

---

(१६७) पद—आदेशप्रत्यययोः । **अनुवृत्ति**—सः, अपदान्तस्य मूर्द्धन्यः, इण्कोः । **विधिसूत्र ।**

मूलार्थ—इण् और कवर्ग से परे अपदान्त आदेशरूप सकार तथा प्रत्यय के अवयव सकार के स्थान में मूर्धन्य 'ष्' आदेश होता है । ईषद्विवृत प्रयत्नवान् 'स्' के स्थान में तत्सदृश 'ष्' होता है । रामेषु ।

विमर्श—प्रकृत सूत्र में 'सहेः साडः सः' (८।३।५६) सूत्र से 'सः' पद की अनुवृत्ति आती है । 'अपदान्तस्य मूर्द्धन्यः' (८।३।५५) तथा 'इण्कोः' (८।३।५७) का अधिकार है । 'आदेशप्रत्यययोः' में द्वन्द्वसमास है (आदेशश्च प्रत्ययश्च तयोः) इस प्रकार इण् प्रत्याहार ('लण्' के 'ण्' तक) और कवर्ग से परे आदेश स्वरूप एवं प्रत्ययावयव 'स्' के स्थान पर मूर्द्धन्य (ष्) आदेश होता है । **उदाहरण**—रामे+सु (स्=ष्—यहाँ इण् (एकार) से परे अपदान्त प्रत्यय का अवयव 'स्' है । अतः मूर्द्धन्य 'ष्' हुआ)=रामेषु ।

अकारान्त पुँल्लिङ्ग राम शब्द के रूप

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०—रामः	रामौ	रामाः	पं०—रामात्	रामाभ्याम्	रामेभ्यः
द्वि०—रामम्	रामौ	रामान्	ष०—रामस्य	रामयोः	रामाणाम्
तृ०—रामेण	रामाभ्याम्	रामैः	स०—रामे	रामयोः	रामेषु
च०—रामाय	रामाभ्याम्	रामेभ्यः	सं०—हे राम !	हे रामौ !	हे रामाः !

इसी प्रकार कृष्ण, मुकुन्द आदि अकारान्त पुंल्लिग शब्दों के रूप राम के सदृश समझे जायें ।

(१६८) पद—सर्वादीनि, सर्वनामानि । **संज्ञासूत्र ।**

मूलार्थ—सर्वादिगणपठित शब्दों की 'सर्वनाम' संज्ञा होती है ।

विमर्श—'सर्वादीनि' पद में तद्गुणसंविज्ञान बहुव्रीहि समास है (सर्वः आदिः येषां तानि) । अन्यथा अन्य पदार्थ की प्रधानता के कारण बहुव्रीहि समास में 'सर्व' पद की सर्वनाम संज्ञा नहीं होती । अर्थ की स्पष्ट प्रतिपत्ति के लिए शब्दस्वरूप पद का अध्याहार किया गया है । इस प्रकार

* पूर्वपराऽवरदक्षिणोत्तराऽपराऽधराणि व्यवस्थायामसंज्ञायाम् *। * स्वमज्ञातिधनाख्यायाम् *। * अन्तरं बहिर्योगोपसङ्ख्यानयोः *। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। एक। द्वि। युष्मद्। अस्मद्। भवतु। किम्। एते पञ्चत्रिंशच्छब्दाः सर्वादयः। **(१६९) जशः शी ७।१।१७।** अदन्तात्सर्वनाम्नो जशः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। सर्वे। **(१७०) सर्वनाम्नः स्मै ७।१।१४।** अतः सर्वनाम्नो ङेः स्मै।

---

(१६९) **अनेकाल्त्वादिति।** अत्रानेकाल्त्वात् सर्वादेशः न तु शित्त्वात्, सर्वादेशात्प्राक् शकारस्येत्संज्ञाया एवाभावात्। कृते सर्वादेशे तु स्थानिवद्भावेन प्रत्ययत्वात् 'लशक्वतद्धिते' इत्यनेनेत्संज्ञा। **सर्वे इति।** सर्वशब्दात् प्रथमाबहुवचने जसि विभक्तौ 'सर्वादीनि सर्वनामानि' इति सर्वशब्दस्य सर्वनामसंज्ञायां 'जशः शी' इत्यनेन अनेकाल्त्वात् सर्वस्य जसः स्थाने 'शी' इत्यादेशे 'लशक्वतद्धिते' इति शकारस्येत्संज्ञायां लोपे च 'सर्व + ई' इति जाते 'आद् गुणः' इति गुणे 'सर्वे' इति।

(१७०) **सर्वनाम्न इति।** 'अतो भिस०' इत्यस्मादत इत्यनुवर्तते, 'ङेर्यः' इत्यतो ङेरिति च। तदाह—**अत इत्यादि।**

सर्वादि गण में पढ़े हुए शब्द सर्वनामसंज्ञक होते हैं। सर्वादिगण में ३५ शब्द पढ़े गये हैं—सर्व, विश्व, उभ, उभय, डतर (प्रत्ययान्त), डतम (प्रत्ययान्त), अन्य, अन्यतर, इतर, त्वत, त्व, नेम (आधा), सम (सभी), सिम (सभी), पूर्व, पर, अवर (पश्चिम), दक्षिण, उत्तर, अपर, अधर (नीचे), स्व, अन्तर, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, भवतु, किम्।

पूर्वपरा० (गणसूत्र) पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर—इन सात शब्दों की व्यवस्था और संज्ञा में सर्वनाम संज्ञा होती है।

स्वमज्ञाति०—स्वशब्द की ज्ञाति (बान्धव) और धन अर्थ से भिन्न आत्मा और आत्मीय अर्थ में सर्वनाम संज्ञा होती है।

अन्तरम्०—बहिर्योग (बाह्य) और उपसंव्यान (परिधानीय) अर्थ में अन्तर शब्द की सर्वनाम संज्ञा होती है।

(१६९) पद्—जशः, शी। **अनुवृत्ति**—अतः, सर्वनाम्नः। **विधिसूत्र।**

मूलार्थ—अदन्त सर्वनाम से परे 'जश्' के स्थान में 'शी' आदेश होता है।

विमर्श—प्रकृत सूत्र में 'अतो भिस०' (७।१।९) से 'अतः' तथा 'सर्वनाम्नः स्मै' (७।१।१४) से 'सर्वनाम्नः' की अनुवृत्ति आ रही है। 'अतः' पद 'सर्वनाम्नः' का विशेषण होने से तदन्तविधि होती है। इस प्रकार ह्रस्व अकारान्त सर्वनाम से परे जश् के स्थान पर 'शी' आदेश होता है। 'शी' में 'श्+ई' दो वर्ण (अनेकाल्) होने से यह आदेश सम्पूर्ण जश् के स्थान में होता है।

उदाहरण—सर्व शब्द से प्रथमा बहुवचन 'जस्' विभक्ति आने पर—'सर्व+जस्', (जस्= शी (ई) 'लशक्वतद्धिते' से 'श्' की इत्संज्ञा, लोप)—सर्व+ई (अ+ई='ए' गुण)=सर्वे।

(१७०) पद्—सर्वनाम्नः, स्मै। **अनुवृत्ति**—अतः, ङेः। **विधिसूत्र।**

मूलार्थ—अदन्त सर्वनाम से परे 'ङे' को 'स्मै' आदेश होता है। सर्वस्मै।

विमर्श—यहाँ 'अतो भिस ऐस्' से 'अतः' तथा 'ङेर्यः' से 'ङे' की अनुवृत्ति आती है। अनुवृत्त 'अतः' पद सूत्रस्थ 'सर्वनाम्नः' का विशेषण है। 'अतः' में तदन्तविधि होने से 'अदन्त'

सर्वस्मै । (१७१) ङसिङ्योः स्मात्स्मिनौ ७।१।१५ । अतः सर्वनाम्न एतयोरेतौ स्तः । सर्वस्मात्–सर्वस्माद् । (१७२) आमि सर्वनाम्नः सुट् ७।१।५२ । अवर्णान्तात्परस्य सर्वनाम्नो विहितस्याऽऽमः सुडागमः स्यात् । एत्वषत्वे । सर्वेषाम् । सर्वस्मिन् । शेषं रामवत् । एवं विश्वादयोऽप्यदन्ताः । उभशब्दो नित्यं द्विवचनान्तः । उभौ–२ । उभाभ्याम् ३ । उभयोः २ । तस्येह पाठोऽकजर्थः । डतरडतमौ प्रत्ययौ । 'प्रत्ययग्रहणे तदन्तग्रहणमि'ति तदन्ता ग्राह्याः । नेम–इत्यर्धे । समः–सर्वपर्यायः । तुल्य-

(१७२) **सर्वेषामिति ।** सर्वनामसंज्ञकसर्वशब्दस्य प्रातिपदिकसंज्ञायां षष्ठीबहुवचनविवक्षायाम् आमि विभक्तौ 'सर्व + आम्' इत्यवस्थायां नुटं प्रबाध्य 'आमि सर्वनाम्नः सुट्' इत्यनेन सुडागमेऽनुबन्धलोपे 'सर्व + स् + आमि'ति जाते 'बहुवचने झल्येत्' इत्यनेन वकारोत्तरवर्तिनोऽकारस्यैत्वे 'आदेशप्रत्यययोः' इति षत्वे च कृते 'सर्वेषामि'ति सिद्धम् ।

सर्वनाम से परे ङे के स्थान में 'स्मै' आदेश होता है। 'स्मै' आदेश भी अनेकाल् होने के कारण सम्पूर्ण 'ङे' के स्थान में होता है।

उदाहरण—सर्वशब्द से चतुर्थी एकवचन ङे—'सर्व+ङे' (ङे=स्मै)=सर्वस्मै ।

(१७१) पद—ङसिङ्योः, स्मात्स्मिनौ । **अनुवृत्ति**—अतः सर्वनाम्नः । **विधिसूत्र।**

मूलार्थ—अदन्त सर्वनाम से परे 'ङसि' और 'ङि' के स्थान में क्रमशः 'स्मात्' और 'स्मिन्' आदेश होते हैं। सर्वस्मात् ।

विमर्श—पूर्वसूत्रों से 'अतः' तथा 'सर्वनाम्नः' की अनुवृत्ति आ रही है। 'ङसि' तथा 'ङि' स्थानी हैं और 'स्मात्' तथा 'स्मिन्' आदेश। दोनों की संख्या समान होने से यथासंख्य परिभाषा के बल से क्रमशः 'ङसि' को 'स्मात्' तथा 'ङि' को 'स्मिन्' आदेश होता है। स्मात् और स्मिन् आदेशों में 'न विभक्तौ तुस्माः' से निषेध हो जाने पर 'त्' और 'न्' की इत्संज्ञा नहीं होती। यह सूत्र 'टाङसिङसाम्०' का अपवाद है।

उदाहरण—सर्व शब्द से पञ्चमी एकवचन ङसि 'सर्व+ङसि' (ङसि=स्मात्)=सर्वस्मात् ।

(१७२) पद—आमि, सर्वनाम्नः सुट् । **अनुवृत्ति**—आत् । **विधिसूत्र ।**

मूलार्थ—अवर्णान्त अङ्ग से परे सर्वनाम से विहित (किये गये) 'आम्' को 'सुट्' का आगम होता है। एत्व तथा षत्व होने पर सर्वेषाम्। सर्वस्मिन् । शेष रूप राम शब्द की तरह चलते हैं। इसी प्रकार विश्व आदि अकारान्त शब्दों के रूप भी चलते हैं। 'उभ' शब्द नित्य द्विवचनान्त है। उसका सर्वादिगण में पाठ 'अकच् प्रत्यय होने के लिए किया गया है। इससे 'उभकौ' आदि रूपों की सिद्धि होती है। उभय शब्द द्विवचन नहीं है। डतर, डतम दोनों प्रत्यय हैं। अतः 'प्रत्ययग्रहणे तदन्ताः ग्राह्याः' परिभाषा से प्रत्ययान्त का ग्रहण होता है। नेम का अर्थ आधा है। सम शब्द सर्व का पर्यायवाची है। तुल्य का पर्याय नहीं है, इस विषय में 'यथासङ्ख्यमनुदेशः समानाम्' सूत्र में 'समानाम्' का निर्देश ही प्रमाण है।

विमर्श—प्रकृत सूत्र में 'आज्जसेरसुक्' (७।१।५०) से 'आत्' पद की अनुवृत्ति आती है। 'आत्' 'सर्वनाम्नः' का विशेषण होने से तदन्तविधि होकर अकारान्त का ग्रहण होता है। 'आमि'

पर्यायस्तु नेह—'यथासङ्ख्यमनुदेशः समानामि'ति ज्ञापकात् । (१७३) **पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् १।१।३४** । एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात् । पूर्वे–पूर्वाः । स्वाभिधेया-

(१७३) **पूर्वे, पूर्वा इति** । पूर्वशब्दात् प्रथमाबहुवचने जसि विभक्तौ 'सर्वादीनि सर्वनामानि' इति प्राप्तां नित्यां सर्वनामसंज्ञायां प्रबाध्य 'पूर्वपरावर०' इत्यनेन विकल्पेन

पद षष्ठ्यन्त में परिवर्तित हो जाता है। 'सुट्' में 'ट्' की इत्संज्ञा होने से 'आम्' का आदि-अवयव होगा। तदनुसार अकारान्त सर्वनाम के अनन्तर आम् का आद्यवयव सुट् (स्) का आगम होता है।

उदाहरण—(१) सर्व शब्द से षष्ठी बहुवचन—आम्—'सर्व+आम् (सुट् (स्) का आगम)='सर्व+स्+आम्' (अ=ए 'बहुवचने झल्येत्')=सर्वे+साम् (स्=ष्–'आदेशप्रत्ययोः')=सर्वेषाम् । (२) सर्व शब्द से सप्तमी एकवचन में 'ङि' प्रत्यय आने पर 'सर्व+ङि' ('ङि'='स्मिन्'—'ङसिङ्योः०' से)=सर्वस्मिन् । शेष रूप राम शब्द की तरह चलते हैं।

अकारान्त पुंल्लिङ्ग सर्वनाम 'सर्व' शब्द के रूप

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०–सर्वः	सर्वौ	सर्वे	पं०–सर्वस्मात	सर्वाभ्याम्	सर्वेभ्यः
द्वि०–सर्वम्	सर्वौ	सर्वान्	ष०–सर्वस्य	सर्वयोः	सर्वेषाम्
तृ०–सर्वेण	सर्वाभ्याम्	सर्वैः	स०–सर्वस्मिन्	सर्वयोः	सर्वेषु
च०–सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	सं०–हे सर्व	हे सर्वौ	हे सर्वे

इसी प्रकार विश्व आदि अकारान्त सर्वनाम शब्दों की रचना-प्रक्रिया जानी जायँ। उभ शब्द नित्य द्विवचनान्त है। (१) उभ+औ (अ+औ=औ 'वृद्धि')=उभौ। (२) उभ+भ्याम् (दीर्घ)=उभाभ्याम् । (३) उभ+ओस् (एत्व) उभे+ओस् (ए=अय्)—उभयोस्, (स=र्)—उभयोर् (र्=ः)=उभयोः ।

यहाँ आशङ्का यह होती है कि द्विवचन में सर्वनामप्रयुक्त कोई कार्य न होने पर भी सर्वादिगण में उभ शब्द का पाठ क्यों किया गया ? इसका उत्तर है 'तस्येह पाठोऽकजर्थः ।' अर्थात् उभ शब्द में भी 'अव्ययसर्वनाम्नामकच् प्राक्टेः' से सर्वनाम को विहित 'अकच्' प्रत्यय हो, इसलिए यहाँ उसका पाठ किया गया है। (उभ+अकच्=उभ्+अक—उभक+औ=उभकौ ।)

डतर, डतम प्रत्यय हैं। प्रत्ययों की सर्वनाम संज्ञा का कोई प्रयोजन न होने से 'प्रत्ययग्रहणे तदन्ता ग्राह्याः' से तदन्त विधि होकर डतरान्त और डतमान्त पद ग्रहण किये जाते हैं। अतः (किम्+डतर=) 'कतर' तथा (किम्+डतम=) 'कतम' आदि पदों की सर्वनाम संज्ञा होती है।

नेम शब्द का अर्थ 'आधा' है। 'सम' पद 'सर्व' का पर्याय है, तुल्य का नहीं। इसमें प्रमाण पाणिनि का 'समानाम्'[1] प्रयोग है।

(१७३) पद—पूर्वपरावरदक्षिणोत्तरापराधराणि, व्यवस्थायाम्, असंज्ञायाम् । **अनुवृत्ति**—सर्वनामानि, विभाषा, जसि । **विधिसूत्र ।**

मूलार्थ—पूर्व आदि सात शब्दों की गणसूत्र से सर्वत्र नित्य प्राप्त सर्वनाम संज्ञा व्यवस्था

---

[1] 'यथासङ्ख्यमनुदेशः समानाम्'—पा० सू० ।

ऽपेक्षाऽवधिनियमो व्यवस्था। व्यवस्थायां किम् ? दक्षिणा गाथकाः। कुशला इत्यर्थः। असंज्ञायां किम् ? उत्तराः कुरवः। (१७४) **स्वमज्ञातिधनाख्यायाम् १।१।३५।** ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा। स्वे। स्वाः। आत्मीयाः, आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोऽर्था वा। (१७५) अन्तरं

सर्वनामसंज्ञायाम् 'जसः शी' इति जसः 'शी' इत्यादेशे शस्येत्संज्ञायां लोपे च कृते पूर्व + ई इति जाते 'आद् गुणः' इति गुणे 'पूर्वे' इति। सर्वनामसंज्ञाया अभावपक्षे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे च कृते 'पूर्वाः' इति। **स्वाभिधेयेति**। स्वस्य पूर्वादिशब्दस्याभिधेयो दिग्देशादिरूपोऽर्थः तेनापेक्ष्यमाणो जिज्ञास्यमानो योऽवधेर्नियमः यथा—'काशी पूर्वा, कुतः पूर्वा ? प्रयागात्।' इत्येवं रूपः स व्यवस्थेत्युच्यते।

(१७४) **स्वमिति**। आत्मा, आत्मीयः, धनं ज्ञातिश्चेति स्वशब्दस्य चत्वारोऽर्थाः। तत्रात्मीयवाचिनः सर्वनामसंज्ञा न तु ज्ञातिधनवाचिनः।

और असंज्ञा अर्थ में जस् के परे रहते विकल्प से होती है। पूर्वे--पूर्वाः। पूर्व आदि शब्दों के अर्थ से अपेक्षित अवधि के नियम को व्यवस्था कहते हैं। 'व्यवस्था' पद का ग्रहण क्यों किया ? दक्षिणा गाथकाः। अर्थात् दक्ष हैं। सूत्र में 'असंज्ञायाम्' का ग्रहण क्यों किया ? उत्तराः कुरवः।

विमर्श—'सर्वादीनि सर्वनामानि' (१।१।२७) से 'सर्वनामानि' तथा 'विभाषा जसि' (१।१।३२) से 'विभापा' एवं 'जसि' दोनों पदों की अनुवृत्ति आती है। इस प्रकार 'पूर्व, पर, अवर, दक्षिण, उत्तर, अपर और अधर शब्दों की व्यवस्था और असंज्ञा में जस् परे रहते विकल्प से सर्वनाम संज्ञा होती है।' गणसूत्र से नित्य प्राप्त सर्वनाम संज्ञा का प्रकृत सूत्र द्वारा विकल्प से विधान किया गया है।

उदाहरण—पूर्व शब्द से विकल्प से सर्वनाम संज्ञा होने पर पूर्व+जस्, (जस्=शी ई) पूर्व+ई (अ+ई=ए 'गुण')=पूर्वे। सर्वनाम संज्ञा के अभाव पक्ष में—पूर्व+जस्, (अस्) दीर्घ होकर—पूर्वास्, (स्=र्), पूर्वार्, (र्= :)=पूर्वाः। **स्वाभि०**—'यह किससे पूर्व है अथवा पर है ? इत्यादि अवधि के नियम की आकाङ्क्षा को यहाँ 'व्यवस्था' कहते हैं।

प्रत्युदाहरण—(१) 'दक्षिणा गाथकाः' (गायक चतुर हैं)। यहाँ 'दक्षिण' शब्द का अर्थ 'चतुर' है, अतः अवधि की आकाङ्क्षा न होने से सर्वनाम संज्ञा नहीं हुई। (२) सूत्र में 'असंज्ञायाम्' पद का ग्रहण होने से 'उत्तराः कुरवः' में सर्वनाम संज्ञा नहीं हुई। क्योंकि यहाँ 'उत्तर' शब्द 'उत्तर कुरुदेश' की संज्ञा है।

(१७४) पद—स्वम्, अज्ञातिधनाख्यायाम्। **अनुवृत्ति**—सर्वनामानि, विभाषा, जसि। **संज्ञासूत्र**।

मूलार्थ—ज्ञाति और धन से भिन्न अर्थ में (आत्मा, आत्मीय अर्थ में) स्व शब्द की गणसूत्र से नित्य प्राप्त सर्वनामसंज्ञा 'जस्' परे रहते विकल्प से होती है।

विमर्श—पूर्वसूत्रों से 'सर्वनामानि' तथा 'विभापा जसि' की अनुवृत्ति आ रही है। 'स्व' पद के चार अर्थ हैं—१. आत्मा, २. आत्मीय, ३. धन एवं ४. ज्ञाति (बान्धव)। आत्मा तथा आत्मीय अर्थों में 'स्व' शब्द की जस् के परे रहते विकल्प से सर्वनाम संज्ञा होती है।

उदाहरण—'स्व' शब्द से प्रथमा बहुवचन जस्—'स्व+जस् (विकल्प से सर्वनाम संज्ञा होकर 'जसः शी' से जस्=शी-ई)=स्व+ई (अ+ई='ए'—गुण)=**स्वे**। सर्वनाम संज्ञा न

बहिर्योगोपसंव्यानयोः १।१।३६। बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञ जसि वा। अन्तरे अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः। (१७६) पूर्वादिभ्यो नवभ्यो वा ७।१।१६। एभ्यो ङसिङ्यो स्मात्स्मिनौ वा स्तः। पूर्वस्मात्–पूर्वात्। पूर्वस्मिन्–पूर्वे। एवं परादीनामपि। शे सर्ववत्। एकशब्दः संख्यायां नित्यैकवचनान्तः। संज्ञोपसर्जनीभूतास्तु न सर्वादयः सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय। तदन्त स्यापीयं संज्ञा 'द्वन्द्वे चे' ति ज्ञापकात्। * अन्तरमिति गणसूत्रेऽपुरीति वक्तव्यम् *

---

(१७५) **अन्तरमिति।** अत्रापि सर्वनामानीति विभाषा जसीति चानुवर्तते उपसंव्यानम्—परिधानीयम् (वस्त्रादिकमित्यर्थः)।

(१७६) **पूर्वस्मादिति।** पूर्वशब्दात् पञ्चम्येकवचनविवक्षायां 'ङसि' विभक्तौ 'पू +ङसि' इति स्थिते 'पूर्वादिभ्यो नवभ्यो वे'ति विकल्पेन ङसेः स्थाने 'स्मात्' इत्यादे पूर्वस्मादिति। पक्षे 'पूर्वात्' इति। **संज्ञोपसर्जनीति** आधुनिकसङ्केतः संज्ञा, अन्यविशेषण

होने पर स्व+जस् (अस्), दीर्घ—स्वास्, (स्=र्) स्वार् (र्=ः)=स्वाः। ज्ञाति अं धन अर्थ में केवल एक रूप 'स्वाः' ही रहेगा।

(१७५) पद—अन्तरम्, बहिर्योगोपसंव्यानयोः। **अनुवृत्ति**—सर्वनामानि, विभाषा, जसि **संज्ञासूत्र।**

मूलार्थ—बाह्य और (उपसंव्यान) परिधानीय अर्थ में अन्तर शब्द की गणसूत्र से प्र नित्यसर्वनाम संज्ञा जस् के परे रहते विकल्प से होती है।

विमर्श—पूर्वसूत्रों से 'सर्वनामानि, विभाषा, जसि' की अनुवृत्ति आती है। इस प्रकार अन शब्द को जस् परे रहते विकल्प से सर्वनाम संज्ञा का विधान किया गया है। 'अन्तर्' शब्द अनेक अर्थों में से केवल बाह्य और परिधान अर्थ में विकल्प से सर्वनाम संज्ञा होती है।

उदाहरण—(१) अन्तरे, अन्तराः वा गृहाः (बाहर के घर)। सर्वनाम संज्ञा (विकल्प से होने पर अन्तर+जस् (जस्=शी–ई), अन्तर+ई (अ+ई=ए)=अन्तरे। सर्वनाम स के अभाव पक्ष में 'अन्तराः'। इसी प्रकार (२) अन्तरे, अन्तरा वा शाटिका (नीचे पहनने यो वस्त्र)। यहाँ उपसंव्यान (परिधान) अर्थ में दो रूप होंगे।

(१७६) पद—पूर्वादिभ्यः, नवभ्यः, वा। **अनुवृत्ति**—ङसिङ्योः, स्मात्स्मिनौ। **विधिसू**

मूलार्थ—पूर्वादि नौ शब्दों से परे 'ङसि' और 'ङि' के स्थान में क्रमशः 'स्मात्' 'स्मिन्' आदेश विकल्प से होते हैं। पूर्वस्मात्-पूर्वात्। पूर्वस्मिन्-पूर्वे। इसी प्रकार पर शब्दों के रूप भी होते हैं। शेष रचनाक्रम सर्व शब्द की तरह होगा। संज्ञा और उपसर्जन सर्वनाम संज्ञा नहीं होती। जैसे 'सर्व' किसी का नाम है तो 'सर्वाय देहि'। 'अन्तरम्०' सूत्र 'अपुरि' और कहना चाहिए। अन्तरायां पुरि।

विमर्श—प्रकृत सूत्र में 'ङसिङ्योः स्मात्स्मिनौ' (७।१।१५) सम्पूर्ण सूत्र की अनुवृत्ति रही है। तदनुसार 'ङसि, ङि' स्थानी है तथा 'स्मात्, स्मिन्' आदेश। पूर्वोक्त सूत्रों (१ १७४, १७५) में जिन ९ शब्दों का समावेश हुआ है, उनका 'पूर्वादिभ्यः नवभ्यः' से ग्रहण है है। गणसूत्रों से नित्य प्राप्त सर्वनाम संज्ञा प्राप्त होने के कारण यहाँ विकल्प से आदेशों का वि किया जा रहा है।

अन्तरायां पुरि। (१७७) तृतीयासमासे १।१।३०। अत्र सर्वनामता न। मास-

---

त्वेन स्वार्थोपस्थापकमुपसर्जनम्, तेषां सर्वादिगणे पाठो नास्तीति भावः। **अन्तरमिति सूत्रेऽपुरीति वक्तव्यमिति**। पुरिशब्देन सम्बन्धे सति अन्तरपदस्य सर्वनामसंज्ञा न भवतीत्यर्थः।

(१७७) सर्वादीनीत्यतः 'सर्वनाम' इति 'न बहुव्रीहौ' इत्यतो नेति चानुवर्तते। तदाह—**अत्रेत्यादि**।

उदाहरण—(१) पूर्व शब्द से पञ्चमी एकवचन में 'ङसि' आने पर पूर्व+ङसि ('ङसि'='स्मात्' विकल्प से—'पूर्वादिभ्यो०')=पूर्वस्मात्। पक्ष में—(ङसि=आत्) पूर्व+आत् (दीर्घ)=पूर्वात्।

(२) पूर्व शब्द से सप्तमी एकवचन में 'ङि' आने पर पूर्व+ङि ('ङि'='स्मिन्' विकल्प से) =पूर्वस्मिन्। पक्ष में पूर्व+इ (अ+इ='ए' 'गुण')=पूर्वे। इसी प्रकार 'पर' आदि शब्दों के रूप समझे जायँ।

पूर्वशब्द (पुंल्लिंग के रूप)

	एकवचन	द्विवचन	बहुवचन
प्रथमा-	पूर्वः	पूर्वौ	पूर्वे, पूर्वाः
द्वितीया-	पूर्वम्	पूर्वौ	पूर्वान्
तृतीया-	पूर्वेण	पूर्वाभ्याम्	पूर्वैः
चतुर्थी-	पूर्वस्मै	पूर्वाभ्याम्	पूर्वेभ्यः
पञ्चमी-	पूर्वस्मात्, पूर्वात्-द्	पूर्वाभ्याम्	पूर्वेभ्यः
षष्ठी-	पूर्वस्य	पूर्वयोः	पूर्वेषाम्
सप्तमी-	पूर्वस्मिन्, पूर्वे	पूर्वयोः	पूर्वेषु
सम्बोधन-	हे पूर्व !	हे पूर्वौ	हे पूर्वे, पूर्वाः

संख्यावाचक एक शब्द नित्य एकवचनान्त है।

संज्ञा तथा उपसर्जनीभूत की सर्वनाम संज्ञा नहीं होती। अर्थात् संज्ञाबोधक 'सर्व' आदि शब्द तथा विशेषणीभूत सर्वादि शब्द सर्वनामसंज्ञक नहीं होते हैं। अत एव—(१) किसी व्यक्ति-विशेष का नाम 'सर्व' रखने पर सर्वनाम संज्ञा के अभाव में तत्प्रयुक्त कार्य भी नहीं होंगे। सर्व+ङे (ङे=य)=सर्व+य (दीर्घ)=सर्वाय देहि। (२) इसी प्रकार 'अतिसर्व' शब्द में सर्व शब्द विशेषण (उपसर्जन) के रूप में प्रयुक्त होने से (सर्वादि न होने से) चतुर्थी विभक्ति में 'अतिसर्वाय' ही रूप बनेगा।

'अन्तरं बहिर्योगोपसंव्यानयोः' गणसूत्र में 'अपुरि' पद का समावेश भी होना चाहिए। अर्थात् स्त्रीत्वविशिष्ट नगरवाचक पद विशेष्य रहते 'अन्तर' शब्द को गणसूत्र से प्राप्त सर्वनाम संज्ञा नहीं होती। अत एव 'अन्तरायां पुरि' में 'स्याट्' का आगम नहीं होता।

(१७७) पद—तृतीया समासे। **अनुवृत्ति**—सर्वादीनि सर्वनामानि, न। **संज्ञा-(निषेध) सूत्र।**

मूलार्थ—तृतीया समास में तथा तृतीयासमासार्थ वाक्य में सर्वादि ~~की सर्वनाम संज्ञा नहीं~~ होती। मासपूर्वाय। मासेन पूर्वाय।

पूर्वाय । तृतीयासमासार्थवाक्येऽपि न । मासेन पूर्वाय । (१७८) **द्वन्द्वे च** १।१।३१ । द्वन्द्वे उक्ता संज्ञा न । वर्णाश्रमेतराणाम् । (१७९) **विभाषा जसि** १।१।३२ । जसाधारं शीभावाख्यं यत्कार्यं तत्र कर्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात् । वर्णाश्रमेतरे–वर्णाश्रमेतराः । (१८०) **प्रथमचरमतयाऽल्पार्धकतिपयनेमाश्च** १।१।३३ । एते जस्युक्त-

---

(१७८) **वर्णाश्रमेतराणामिति** । अत्र सर्वाद्यन्तत्वात्वात् प्राप्ता सर्वनामसंज्ञा निषिध्यते ।

(१७९) **विभाषा जसि इति** । द्वन्द्वेऽप्राप्ता सर्वनामसंज्ञा जसि वा स्यादिति तदर्थः ।

(१८०) **तयप्प्रत्यय इति** । 'संख्याया अवयवे तयप्' (५।२।४२) इति विहित

विमर्श—यहाँ 'सर्वादीनि सर्वनामानि' की तथा 'न बहुव्रीहौ' से 'न' की अनुवृत्ति आ रही है । तदनुसार तृतीया-तत्पुरुष समास में (सर्वादिगणपठित शब्दों की) सर्वनाम संज्ञा नहीं होती ।

उदाहरण—१. मासेन पूर्वाय=मासपूर्वाय 'मास+टा, पूर्व+सु' अलौकिक विग्रह । तृतीया-तत्पुरुष समास—'मासपूर्व+ङे' (सर्वनाम संज्ञा का निषेध होने से 'ङ' को 'स्मै' नहीं हुआ, (ङे='य'—दीर्घ होकर)=मासपूर्वाय ।

तृतीया समासार्थ विग्रह वाक्य में भी सर्वनाम संज्ञा नहीं होती । अत एव 'मासेन पूर्वाय' इस असमास स्थल में भी सर्वनाम संज्ञा का निषेध होने से 'पूर्वस्मै' न होकर 'पूर्वाय' रूप ही बना ।

(१७८) पद—द्वन्द्वे, च । **अनुवृत्ति**—न, सर्वादीनि, सर्वनामानि । **संज्ञा (निषेध)** सूत्र ।

मूलार्थ—द्वन्द्व समास में सर्वनाम संज्ञा नहीं होती । वर्णाश्रमेतराणाम् ।

विमर्श—प्रकृत सूत्र में भी पूर्ववत् 'सर्वादीनि, सर्वनामानि' तथा 'न' पदों की अनुवृत्ति आ रही है । तदनुसार—द्वन्द्व समास में सर्वादि शब्द सर्वनामसंज्ञक नहीं होते ।

उदाहरण—(१) वर्णाश्च आश्रमाश्च इतरे च=वर्णाश्रमेतराणाम् । वर्ण+जस्, आश्रम+जस्, इतर+जस्=वर्णाश्रमेतर, (द्वन्द्व समास—'चार्थे द्वन्द्वः') वर्णाश्रमेतर+आम् (प्रकृत सूत्र से सर्वनाम संज्ञा का निषेध होने पर सुट् नहीं; 'नुट्' का आगम होकर णत्व)=वर्णाश्रमेतराणाम् ।

(१७९) पद—विभाषा, जसि । **अनुवृत्ति**—द्वन्द्वे, सर्वादीनि, सर्वनामानि । **संज्ञा (निषेध)** सूत्र ।

मूलार्थ—जस् के स्थान में 'शी' आदेश किये जाने पर द्वन्द्व समास में सर्वनाम संज्ञा विकल्प से होती है । वर्णाश्रमेतरे—वर्णाश्रमेतराः ।

विमर्श—'द्वन्द्वे च' सूत्र से द्वन्द्वसमास में सर्वनाम संज्ञा का निषेध कहा गया है । प्रकृत सूत्र द्वारा उक्त व्यवस्था में संकोच किया गया है । प्रथमा बहुवचन 'जस्' के स्थान में 'शी' आदेश कर्तव्य होने पर सर्वनाम संज्ञा विकल्प से होती है ।

उदाहरण—(१) वर्णाश्रमेतर+जस् (सर्वनाम संज्ञा होने पर 'शी' ई)—वर्णाश्रमेतर+ई (अ+ई='ए' गुण)=वर्णाश्रमेतरे । (सर्वनाम संज्ञा के अभाव में) वर्णाश्रमेतर+जस् (अस्) दीर्घ—वर्णाश्रमेतरास्, (स्=र्)—वर्णाश्रमेतरार् (र्=:)=वर्णाश्रमेतराः ।

(१८०) पद—प्रथमचरमतयाल्पार्धकतिपयनेमाः, च । **अनुवृत्ति**—विभाषा, जसि, सर्वनामानि । **संज्ञासूत्र** ।

संज्ञा वा स्युः। प्रथमे-प्रथमाः। तयप्प्रत्ययः। द्वितये-द्वितयाः। शेषं रामवत्। नेमे-नेमाः। शेषं सर्ववत्। * तीयस्य ङित्सु वा वाच्या *। तीयप्रत्ययान्तस्य ङिद्वचनेषु सर्वनामसंज्ञा वा स्यात्। द्वितीयस्मै—द्वितीयायेत्यादि। एवं तृतीयः। निर्जरः।

इत्यर्थः। 'प्रत्ययग्रहणे तदन्तग्रहणमि'ति परिभाषयाऽत्र तयप्प्रत्ययान्ता ग्राह्याः। केवलप्रत्ययस्य सर्वनामत्वे प्रयोजनाभावात्। **तीयस्येति**। विभाषाप्रकरणे तीयस्य ङित्सूपसङ्ख्यानमित्यर्थः। अर्थवद्ग्रहणपरिभाषया प्रत्ययस्यैव तीयस्य ग्रहणम्।

मूलार्थ—प्रथम, चरम, तयप्प्रत्ययान्त, अल्प, अर्ध, कतिपय और नेम शब्दों को जस् परे रहते विकल्प से सर्वनाम संज्ञा होती है। प्रथमे-प्रथमाः। तयप् प्रत्यय है, तदन्त का ग्रहण होता है। द्वितये-द्वितयाः। शेष रचानाक्रम राम शब्द की तरह है। नेमे--नेमाः। शेष रूप सर्व शब्द के समान हैं। 'तीय' प्रत्ययान्त की 'ङित्' वचनों में विकल्प से सर्वनाम संज्ञा होती है। द्वितीयस्मै-द्वितीयाय। निर्जरः।

विमर्श—पूर्वसूत्रों से 'सर्वनामानि, विभाषा तथा जसि' पदों की अनुवृत्ति आ रही हैं। तदनुसार सूत्रोक्त प्रथम आदि शब्दों की 'जस्' के परे रहते विकल्प से सर्वनाम संज्ञा होती है।

उदाहरण—(१) प्रथम+जस् (प्रकृत सूत्र से विकल्प से सर्वनाम संज्ञा होने पर जस्=शी-ई)—प्रथम+ई (गुण)=प्रथमे। सर्वनाम संज्ञा के अभाव में—प्रथम+जस् (अस्) (दीर्घ, स् को रुत्वविसर्ग होकर)=प्रथमाः। (२) सूत्रोक्त तय पद प्रत्यय का बोधक है। तदन्तविधि होने से तयप्प्रत्ययान्त शब्दों का ग्रहण होता है। द्वितय+जस् (सर्वनाम संज्ञा होने पर—जस्=शी-ई)—द्वितय+ई, (गुण)=द्वितये। सर्वनाम संज्ञा के न होने पर-द्वितयाः। शेष रूप राम शब्द की तरह चलेंगे। (३) नेम+जस् (सर्वनाम संज्ञा होने पर—जस्=शी)—नेम+ई (गुण)=नेमे। सर्वनाम संज्ञा के अभाव में—नेमाः। शेष रूप सर्व शब्द के समान जाने जायँ।

(वा०) तीयप्रत्ययान्त शब्दों की ङित् (ङकारेत्संज्ञक) विभक्तियों के परे रहते विकल्प से सर्वनाम संज्ञा होती है। ङे, ङसि, ङस् तथा ङि—ये चार ङिद् विभक्तियाँ हैं। उदाहरण—द्वितीय+ङे (सर्वनाम संज्ञा होने पर ङे=स्मै)=द्वितीयस्मै। सर्वनाम संज्ञा के अभाव पक्ष में द्वितीयाय। इसी प्रकार तृतीय शब्द के रूप बनेंगे।

'द्वितीय' शब्द के रूप

	एकवचन	द्विवचन	बहुवचन
प्रथमा—	द्वितीयः	द्वितीयौ	द्वितीयाः
द्वितीया—	द्वितीयम्	द्वितीयौ	द्वितीयान्
तृतीया—	द्वितीयेन	द्वितीयाभ्याम्	द्वितीयैः
चतुर्थी—	द्वितीयस्मै द्वितीयाय	द्वितीयाभ्याम्	द्वितीयेभ्यः
पञ्चमी—	द्वितीयस्मात्-द् द्वितीयात्-द्	द्वितीयाभ्याम्	द्वितीयेभ्यः
षष्ठी—	द्वितीयस्य	द्वितीययोः	द्वितीयानाम्
सप्तमी—	द्वितीयस्मिन् द्वितये	द्वितीययोः	द्वितीयेषु

(१८१) जराया जरसन्यतरस्याम् ७।२।१०१ । जराया जरस् वा स्यादजादौ विभक्तौ । *पदाङ्गाधिकारे तस्य च तदन्तस्य च* । *निर्दिश्यमानस्यादेशा भवन्ति* । अनेकाल्त्वात्सर्वादेशे प्राप्ते । एकदेशविकृतस्याऽनन्यत्वाज्जरशब्दस्य जरस् । निर्जरसौ–निर्जरौ । निर्जरसः—इत्यादि । उपजीव्यविरोधान्न जरस् । निर्जरैः । पक्षे हलादौ च

---

(१८१) **जराया इति ।** जराशब्दस्य 'जरस्' आदेशो वा स्यादजादौ विभक्ताविति सूत्रार्थः । पदस्य अङ्गस्य चाधिकारे तस्य सूत्रोपात्तस्य तदन्तस्य च ग्रहणं भवति । तेनात्राङ्गाधिकारत्वेन निर्जरस्याप्यादेशो भवत्येव । **निर्दिश्यमानस्येति ।** यावन्मात्रस्य स्थानित्वेन सूत्रे निर्देशस्तावन्मात्रस्येत्यर्थः । **एकदेशेत्यादि ।** 'छिन्नेऽपि पुच्छे श्वा श्वैव, न चाश्वो न च गर्दभः' इति लौकिकन्यायादित्यर्थः । **निर्जरसाविति ।** निर्जरशब्दात् प्रथमाद्विवचने 'औ' विभक्तौ 'जराया जरसन्यतरस्याम्' इत्यनेन जराशब्दस्य 'जरस्' इत्यादेशे 'निर्जरसौ' इति । ननु सूत्रे 'जरा'शब्दस्य जरसादेशविधाने-

---

निर्जर शब्द देवतार्थक है । 'निर्गता जरा यस्मात्' (जिसको बुढ़ापा नहीं आता) इस बहुव्रीहि समास में जरा को 'गोः स्त्रियोरुपसर्जनस्य' से ह्रस्व अकार होकर निर्जर; प्रातिपदिकसंज्ञा प्रथमा एकवचन में 'सु' आने पर निर्जर+सु (इत्संज्ञा लोप, स् को र्, विसर्ग होकर)=निर्जरः ।

(१८१) पद—जरायाः, जरस्, अन्यतरस्याम् । **अनुवृत्ति**—विभक्तौ, अचि । **विधिसूत्र ।** (विकल्प) ।

मूलार्थ—जरा शब्द के स्थान में अजादि विभक्ति परे रहते 'जरस्' आदेश विकल्प से होता है । (प०) (१) 'पदाधिकार और अङ्गाधिकार में जो कार्य जिसको कहे गये हैं, वे उसको और तदन्त को होते हैं ।' (२) 'सूत्र में जितने का निर्देश किया गया है, तावन्मात्र को ही आदेश होते हैं ।' (३) 'एक भाग में विकार होने पर भी वस्तु के अभिन्न समझे जाने से 'जर्' के स्थान में 'जरस्' आदेश होता है । निर्जरसौ । निर्जरसः । उपजीव्य=निमित्त के विरोध से जरस् नहीं होता है—'निर्जरैः' । पक्ष में और हलादि विभक्ति में राम शब्द की तरह रूप बनेंगे ।

विमर्श—प्रकृत सूत्र में सूत्रार्थ की पूर्णता के लिए 'अष्टन आ विभक्तौ' (७।२।८४) सूत्र से 'विभक्तौ' तथा 'अचि र ऋतः' (७।२।१००) से अचि की 'अनुवृत्ति' आ रही है । 'विभक्तौ' का विशेषण होने से 'अचि' में तदादिविधि होती है । तदनुसार—अजादि विभक्तियों के परे रहते जरा शब्द के स्थान में 'जरस्' आदेश विकल्प से होता है । सूत्रस्थ 'अन्यतरस्याम्' पद का 'विकल्प' अर्थ है । 'निर्जर' शब्द में स्थानी के सम्बन्ध में सन्देह होता है कि यहाँ सूत्रोक्त 'जरा' शब्द नहीं है, अपितु 'निर्जर' शब्द है । अतः जरस् आदेश कैसे होगा ? इसका समाधान परिभाषा द्वारा दिया जा रहा है—(१) 'पद और अङ्ग के अधिकार में विहित कार्य उस शब्द को, अथवा वह शब्द जिसके अन्त में रहे, तदन्त समुदाय को होता है ।' अतः तदन्त ('जरा' शब्दान्त) सम्पूर्ण निर्जर के स्थान में 'अनेकाल्शित्सर्वस्य' परिभाषा की उपस्थिति से जरस् आदेश प्राप्त हुआ । उसका निषेध दूसरी परिभाषा द्वारा किया जा रहा है—'(निर्दिश्यमान) सूत्रों में उच्चरित पदों को ही आदेशों का विधान होता है ।' इस प्रकार 'निर्जर' शब्दावयव 'जर' के स्थान में आदेश का विधान होता है । परन्तु यहाँ 'निर्जर' शब्द में जरा शब्द नहीं है, 'जर' है । फिर आदेश की प्रसक्ति होगी ? इसके समाधान हेतु एक लौकिकन्याय को प्रस्तुत किया जा रहा है—'किसी अंग के विकृत हो जाने पर भी अवयवी (वस्तु) भिन्न नहीं समझा जाता ।

रामवत् । (१८२) पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु

नात्र कथं जरसादेश इत्याशङ्कायां 'पदाङ्गाधिकारे तस्य च तदन्तस्ये'ति नियमेन जरसादेशस्याङ्गाधिकारतया तदन्तेऽपि प्रवृत्तिसम्भवात् तदन्तस्यापि स्यादिति प्राप्ते—'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया जराशब्दस्यैव जरसादेशः स्यादिति कथमत्र जरशब्दस्य जरस् इति शङ्कायाम् 'एकदेशविकृतमनन्यवत्' इति परिभाषोपस्थित्या जरशब्दस्यापि जरसादेशे 'निर्जरसौ' इति ।

(१८२) **पद्दन्नोमासिति ।** सूत्रे समाहारद्वन्द्वः । 'अनुदात्तस्य चर्दुपधस्यान्य-

---

जैसे—पूँछ के कट जाने पर भी कुत्ता कुत्ता ही रहता है, अश्व आदि नहीं हो जाता । अतः 'जरा' के परिवर्तित रूप 'जर' (अंश) के स्थान पर 'जरस्' आदेश होता है ।

उदाहरण—(१) निर्जर+औ (जर्=जरस्)=निर्जरसौ । (२) निर्जर+जस् (अस्) (जर=जरस्), निर्जरसस् (स्=र्), निर्जरसर् (र्=:)=निर्जरसः । 'निर्जरैः' में उपजीव्य (निमित्त) विरोध के कारण 'जरस्' आदेश नहीं होता । यथा—अदन्त को मानकर भिस् के स्थान में 'ऐस्' आदेश होता है । वह 'ऐस्' अजादि होकर अदन्तत्व के विनाशक जरसादेश के प्रति निमित्त होगा तो उपजीव्य विरोध होगा । जो जिसको निमित्त मानकर हुआ है, वह उसका विनाशक नहीं होता । अतः उपजीव्य विरोध के कारण यहाँ जरसादेश नहीं होता । निर्जर+भिस् (भिस्=ऐस् 'अतो भिस ऐस्') निर्जर+ऐस् (अ+ऐ=ऐ) निर्जरैस् (स् को रुत्व, विसर्ग)= निर्जरैः । जरसादेश न होने पर पक्ष में तथा हलादि विभक्तियों के परे रहने पर 'राम' शब्द की तरह रूप चलेंगे ।

'निर्जर' शब्द के रूप (पुंल्लिंग)

	एकवचन	**द्विवचन**	**बहुवचन**
प्र०—	निर्जरः	निर्जरसौ निर्जरौ	निर्जरसः निर्जराः
द्वि०—	निर्जरसम् निर्जरम्	निर्जरसौ निर्जरौ	निर्जरसः निर्जरान्
तृ०—	निर्जरसा निर्जरेण	निर्जराभ्याम्	निर्जरैः
च०—	निर्जरसे निर्जराय	निर्जराभ्याम्	निर्जरेभ्यः
प०—	निर्जरसः निर्जराद्-द्	निर्जराभ्याम्	निर्जरेभ्यः
ष०—	निर्जरसः निर्जरस्य	निर्जरसोः निर्जरयोः	निर्जरसाम् निर्जराणाम्
स०—	निर्जरसि निर्जरे	निर्जरसोः निर्जरयोः	निर्जरेषु
सम्बो०—	हे निर्जर !	हे निर्जरसौ हे निर्जरौ	हे निर्जरसः हे निर्जराः

(१८२) पद—पद्दन्नोमास'''आसन्, शस्प्रभृतिषु । **अनुवृत्ति**—अन्यतरस्याम् । **विधिसूत्र ।**

६।१।६३। पाद दन्त नासिका मास हृदय निशा असृज् यूष् दोष यकृत् शकृत् उदक आस्य—एषां पदादय आदेशाः स्युः शसादौ वा। यत्तु 'आसनशब्दस्यासन्नादेश' इति काशिकायामुक्तं तत्प्रामादिकमेव। पादः। पादौ। पादाः। पादम्। पादौ। पदः-पादान्। पदा-पादेनेत्यादि। विश्वपाः। **(१८३) दीर्घाज्जसि च ६।१।१०५।** दीर्घाज्जसि इचि च न पूर्वसवर्णदीर्घः। वृद्धिः। विश्वपौ। विश्वपाः। हे विश्वपाः। हे

तरस्यामि'त्यतोऽन्यतरस्यामित्यनुवर्तते। 'शस्प्रभृतिषु' इति निमत्तोपादानात् पदाद्यादेशानुरूपाः प्रकृतिरूपाः स्थानिन आक्षिप्यन्ते। यथासङ्ख्यपरिभाषया पादादीनां पदादय आदेशा वा स्युरित्यर्थः। **विश्वपा इति**। विश्वं पाति रक्षतीति विश्वपाः। अत्र 'आतोऽनुपसर्गे कः' इति प्राप्ते 'आतो मनिन्क्वनिब्वनिपश्चे'ति चकाराद् विच्, तस्य लोपे कृदन्तत्वात् प्रातिपदिकसंज्ञायां सौ, तस्य रुत्वे विसर्गे च कृते 'विश्वपाः' इति।

मूलार्थ—पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष्, दोष्, यकृत्, शकृत्, उदक, आस्य शब्दों के स्थान में शसादि विभक्तियों के परे रहते विकल्प से क्रमशः पद्, दत्, नस्, मास्, हृद्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन् तथा आसन् आदेश होते हैं। काशिका में 'आसन' शब्द के स्थान पर 'आसन्' आदेश होने के विषय में जो कहा गया है, वह भ्रमात्मक है। पादः। पादौ इत्यादि।

विमर्श—प्रकृत सूत्र में 'अनुदात्तस्य०' (६।१।५९) सूत्र से 'अन्यतरस्याम्' की अनुवृत्ति आ रही है। 'पद्' आदि आदेशों का सूत्र में निर्देश है। अतः 'पद्' आदि के समान पाद आदि तदनुरूप स्थानीवाचक शब्दों का आक्षेप किया जाता है। 'शस्प्रभृतिषु' निमित्तवाचक है। तदनुसार—शस् से लेकर सुप् पर्यन्त विभक्तियों के परे रहने पर पादादि १३ शब्दो के स्थान में क्रम से पद् आदि आदेश विकल्प से होते हैं। 'यत्तु०' काशिका में ग्रन्थकार ने सादृश्य होने के कारण 'आसन' शब्द के स्थान में 'आसन्' आदेश होने की बात कही है। वह भ्रमपूर्ण है। क्योंकि वैदिक प्रयोगों में मुखवाचक 'आस्य' शब्द के स्थान में 'आसन्' आदेश देखा गया है। यथा—'हव्या जुहानि आसनि' (मुखे)। 'आसन्यं प्राणमूचुः' इत्यादि। **उदाहरण**—(१) प्रथमा एकवचन—पाद+सु, (स्=र्) पाद+र् (र=ः)=पादः। (२) प्रथमा द्वि० व०-पाद+औ (वृद्धि)=पादौ। (३) प्रथमा बहुवचन—पाद+जस् (अस्), (दीर्घ होकर) पादास् (रुत्व, विसर्ग)=पादाः। (४) द्वितीया ए० व०—पाद+अम्, (पूर्वरूप)=पादम्। (५) द्वितीया द्वि० व०—पाद+औट् (औ) वृद्धि=पादौ। (६) द्वितीया बहुव०—पाद+शस् (अस्) (पाद=पद् आदेश), पद्+अस्=पदस् (रुत्व, विसर्ग होकर)—पदः। पद् आदेश के विकल्प से होने के कारण पक्ष में पाद+अस् (दीर्घ)—पादास् (स्=न् 'तस्माच्छसो०')= पादान्। (७) तृतीया ए० व०—पाद+टा (आ) (पाद=पद् आदेश विकल्प से) पद्+आ =पदा। पक्ष में पाद+टा (टा=इन), पाद+इन (अ+इ=ए 'गुण')—पादेन। शेष रूप इसी प्रकार समझे जायें। विश्वपा+सु (स्=र्, र्=ः)=विश्वपाः। अर्थ—(विश्वं पाति) विश्व की रक्षा करने वाला (परमात्मा)।

(१८३) पद—दीर्घात्, जसि च। **अनुवृत्ति—**पूर्वसवर्णः, न, इचि। **विधिसूत्र।** (निषेध)।

विश्वपौ। हे विश्वपाः। (१८४) सुडनपुंसकस्य १।१।४३। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य। सुडिति प्रत्याहारः। (१८५) स्वादिष्वसर्वनामस्थाने १।४।१७। कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदं स्यात्।

(१८४) **सुडनपुंसकस्येति।** सुडिति 'सु' इत्यारभ्य औटश्टकारपर्यन्तं प्रत्याहारः। 'शि सर्वनामस्थानमि'त्यतः सर्वनामस्थानमित्यनुवर्तते। तदाह—**स्वादीत्यादि।**

(१८५) **स्वादिष्विति।** 'स्वौजसमौडि'त्येतत्सूत्रपठितशस्प्रत्ययमारभ्य कप्प्रत्ययान्तेषु प्रत्ययेषु ये यकारादयोऽजादयश्च तेषु परतः प्रकृतेर्भसंज्ञा। तद्भिन्नेषु प्रत्ययेषु परतः प्रकृतेः पदसंज्ञा भवतीति विवेकः।

मूलार्थ—दीर्घ के पश्चात् 'जस्' अथवा 'इच्' परे रहते पूर्वसवर्ण दीर्घ नहीं होता। वृद्धि होकर—विश्वपौ। विश्वपाः। हे विश्वपाः। हे विश्वपौ। हे विश्वपाः।

विमर्श—यहाँ 'प्रथमयोः पूर्वसवर्णः' से 'पूर्वसवर्णः' 'नादिचि' से 'न' तथा 'इच्' की अनुवृत्ति आती है। 'एकः पूर्वपरयोः' का अधिकार है। तदनुसार—'दीर्घ के अनन्तर 'जस्' अथवा 'इच्'—(इ, उ, ऋ, लृ, ए, ओ, ऐ, औ) परे रहने पर पूर्व-पर के स्थान में पूर्वसवर्ण दीर्घ नहीं होता।'

उदाहरण—(१) विश्वपा+औ ('प्रथमयोः०' से प्राप्त पूर्वसवर्ण दीर्घ का 'दीर्घाज्जसि च' से निषेध होने पर आ+औ='औ' वृद्धि—वृद्धिरेचि)=विश्वपौ।

(२) विश्वपा+जस् ('ज्' की इत्संज्ञा—अस्), विश्वपा+अस् (पूर्वसवर्ण दीर्घ का 'दीर्घाज्जसि च' से निषेध होने पर आ+अ='आ' दीर्घ—'अकः सवर्णे दीर्घः' से)=विश्वपास् ('स्' को रुत्व-विसर्ग)=विश्वपाः।

(१८४) पद—सुट्, अनपुंसकस्य। **अनुवृत्ति**—सर्वनामस्थानम्। **संज्ञासूत्र।**

मूलार्थ—नपुंसकलिंग को छोड़कर स्वादि (सु, औ, जस्, अम्, औट्) पाँच वचनों की 'सर्वनामस्थान' संज्ञा होती है। सुट् प्रत्याहार है।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'शि सर्वनामस्थानम्' (१।१।४२) से 'सर्वनामस्थानम्' की अनुवृत्ति आ रही है। तदनुसार पुंल्लिंग या स्त्रीलिंग शब्दों के पश्चाद्वर्ती सु आदि पाँच वचनों की 'सर्वनामस्थान' संज्ञा होती है।

(१८५) पद—स्वादिषु, असर्वनामस्थाने। **अनुवृत्ति**—पदम्। **संज्ञासूत्र।**

मूलार्थ—'सु' प्रत्यय से लेकर 'कप्' प्रत्यय-पर्यन्त सर्वनामस्थान-भिन्न प्रत्ययों के परे रहने पर पूर्व की पद संज्ञा होती है।

विमर्श—यहाँ 'सुप्तिङन्तं पदम्' (१।४।१४) से संज्ञाबोधक पद 'पदम्' की अनुवृत्ति आती है। 'स्वादिषु' में सप्तमी विभक्ति होने से 'तस्मिन्निति निर्दिष्टे पूर्वस्य' परिभाषा की उपस्थिति होती है। तदनुसार सर्वनामस्थान से भिन्न सु आदि प्रत्ययों से पूर्ववर्ती शब्द की पद संज्ञा होती है (सु आदिर्येषां ते स्वादयः, तेषु 'स्वादिषु'—बहुव्रीहिः)। स्वादि प्रत्ययों के अन्तर्गत 'स्वौजसमौट्०' (४।१।२) से लेकर 'उरःप्रभृतिभ्यः कप्' (५।४।१५०) सूत्र तक सभी प्रत्यय आते हैं। इस प्रकार सु, औ, जस्, अम्, औट्—इन पाँच प्रत्ययों को छोड़कर अन्य सभी कप्-प्रत्ययपर्यन्त प्रत्ययों के परे रहने पर पूर्व समुदाय पदसंज्ञक होता है।

(१८६) यचि भम् १।४।१८। यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात्। **(१८७) आकडारादेका संज्ञा १।४।१।** इत ऊर्ध्वं 'कडाराः कर्मधारये' इत्यतः प्रागेकस्यैव संज्ञा ज्ञेया, या पराऽनवकाशा च। तेन शसादावचि भसंज्ञैव, न पदत्वम्। **(१८८) आतो धातोः ६।४।१४०।** आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः। अलोऽन्त्यस्य। विश्वपः। विश्वपा। विश्वपाभ्यामित्यादि। एवं शङ्खध्मादयः। धातोः किम्? हाहान्

---

(१८८) विश्वप इति। विश्वपाशब्दात् शसि, अनुबन्धलोपे 'विश्वपा + अस्' इति जाते 'स्वादिष्वसर्वनामस्थाने' इति प्राप्तां पदसंज्ञां बाधित्वा 'आकडारादेका संज्ञा' इति सहकारेण परत्वानवकाशत्वाभ्यां 'यचि भम्' इति भसंज्ञायां सत्याम् 'आतो धातोः' इत्यनेन पूर्वसवर्णदीर्घं प्रबाध्य 'अलोऽन्त्यस्ये'ति परिभाषया पकारोत्तरवर्तिन आकारस्य लोपे 'विश्वप् + अस्' इति जाते विभक्तिसकारस्य रुत्वे विसर्गे च कृते 'विश्वपः' इति।

---

(१८६) पद—यचि, भम्। **अनुवृत्ति**—स्वादिषु, असर्वनामस्थाने। **संज्ञासूत्र।**

मूलार्थ—'सु' से लेकर 'कप्' प्रत्यय पर्यन्त सर्वनामस्थान से भिन्न यकारादि तथा अजादि प्रत्ययों के परे रहते पूर्व की भसंज्ञा होती है।

विमर्श—प्रकृत सूत्र से 'स्वादिष्वसर्वनामस्थाने' (१८५) सम्पूर्ण सूत्र की अनुवृत्ति आ रही है। तदनुसार—सु, औ, जस्, अम्, औट् (सर्वनामस्थान) से भिन्न यकारादि और अजादि-स्वादि प्रत्ययों के परे रहने पर उससे पूर्ववर्ती शब्द-समुदाय की भसंज्ञा होती है। यह पद संज्ञा का अपवाद सूत्र है।

इस प्रकार (पूर्व विवेचन के अनुसार) 'सुप्' विभक्तियों में आरम्भ के ५ प्रत्यय सर्वनामस्थानसंज्ञक, ७ हलादि प्रत्यय पदसंज्ञक तथा शेष ९ अजादि प्रत्यय भसंज्ञक होते हैं।

(१८७) पद—आकडारात्, एका, संज्ञा। **अधिकार सूत्र।**

मूलार्थ—यहाँ से 'कडाराः कर्मधारये' (२।२।३८) सूत्र से पूर्व तक एक की एक ही संज्ञा होती है; जो अष्टाध्यायी के क्रम से पर हो या अनवकाश हो। अतः शस् आदि अजादि-विभक्तियों में भसंज्ञा ही होती है, पद संज्ञा नहीं।

विमर्श—दो संज्ञाओं के एक ही स्थल में प्राप्त होने पर इस सूत्र द्वारा व्यवस्था की जा रही है—प्रकृत सूत्र (१।४।१) से लेकर 'कडाराः कर्मधारये' (२।२।३८) सूत्र तक जो सूत्र हैं, उनमें इस अधिकार सूत्र के प्रभाव से एक ही संज्ञा होगी, दो नहीं। कौन-सी संज्ञा हो? इसका समाधान यह है कि 'जो संज्ञा अष्टाध्यायी सूत्रक्रम में पर और निरवकाश हो अर्थात् जो अन्यत्र कहीं चरितार्थ न हुई हो।' अतः 'शस्' आदि अजादि (अस्) प्रत्ययों में पद संज्ञा तथा भसंज्ञा दोनों की प्राप्ति होने पर निरवकाश होने से भसंज्ञा के द्वारा पद संज्ञा का बाध हो जाता है। तथा सूत्रक्रम से भी भसंज्ञा पर है, अतः भसंज्ञा ही होती है।

(१८८) पद—आतो धातोः। **अनुवृत्ति**—लोपः, भस्य, अङ्गस्य। **विधिसूत्र।**

मूलार्थ—आकारान्त जो धातु तदन्त भसंज्ञक अङ्ग का लोप होता है। 'अलोऽन्त्यस्य' परिभाषा की उपस्थिति से अन्त्य वर्ण का लोप होगा। विश्वपः। विश्वपा। विश्वपाभ्याम्। इसी प्रकार 'शंखध्मा' आदि शब्दों के रूप बनेंगे। 'धातोः' क्यों कहा? हाहान्। सूत्र में 'आतः'—

'आत' इति योगविभागादधातोरप्याकारलोपः क्वचित् । क्त्वः । श्नः । हरिः । हरी । (१८९) जसि च ७।३।१०९ । ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे ।

आत इति । 'आतो धातोः' इत्यत्र 'आतः' इति योगो विभज्यते । तेन धातुभिन्नस्याप्याकारान्तस्य भस्याङ्गस्य लोपः स्यादित्यर्थः । एवं क्त्वाश्नाशब्दस्य 'क्त्वः, श्नः' इति शसि रूपं सिद्धयति ।

(१८९) हरय इति । हरिशब्दाज्जसि अनुबन्धलोपे 'हरि+अस्' इत्यत्र प्राप्तं पूर्वसवर्णदीर्घं प्रबाध्य 'अलोऽन्त्यस्ये'ति सहकारेण 'जसि चे'त्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अयादेशे, सस्य रुत्वे विसर्गे च कृते 'हरयः' इति ।

इस योगविभाग के करने से धातुभिन्न आकार का भी कहीं लोप होता है । क्त्वः । श्नः । हरिः । हरी ।

विमर्श—यहाँ 'अल्लोपोऽनः' (६।४।१३४) से 'लोपः' की अनुवृत्ति आती है । 'भस्य' तथा 'अङ्गस्य' का अधिकार है । 'आतः' 'धातोः' का विशेषण है । अतः तदन्त विधि होकर 'आकारान्त' अर्थ होता है । इस प्रकार आकारान्त धातु जिसके अन्त में हो, तदन्त भसंज्ञक अङ्ग का लोप होता है । 'अलोऽन्त्य' परिभाषा से भसंज्ञक अङ्ग के अन्तिम वर्ण का लोप होता है ।

उदाहरण—(१) विश्वपा+शस् (अस्), विश्वपा+अस् (पद संज्ञा को बाध कर 'यचि भम्' से भसंज्ञा, यहाँ आकारान्त धातु पा है, तदन्त अङ्ग है 'विश्वपा', उसके अन्त्य वर्ण 'आ' का 'आतो धातोः' से लोप)=विश्वप्+अस्—विश्वपस् ('स्' को रुत्व-विसर्ग)=विश्वपः । (२) विश्वपा+टा (आ) ('आ' का लोप)=विश्वपा । (३) विश्वपा+भ्याम् (पदसंज्ञा)= विश्वपाभ्याम् । इसी प्रकार 'शङ्खध्मा' आदि शब्दों के रूप बनेंगे ।

प्रत्युदाहरण—सूत्र में 'धातोः' पद के ग्रहण के अभाव में अव्युत्पन्न आकारान्त हाहा शब्द से द्वितीया बहुवचन में 'हाहा+शस्' (अस्) में भी आकार का लोप होने लगेगा, जो अभिमत नहीं है ।

आत इति० । 'आतो धातोः' सूत्र में 'आतः' पद का योगविभाग किया जाता है । तदनुसार धातुभिन्न आकारान्त शब्दों में भी आकार का लोप होता है । यथा—क्त्वा से 'ङसि' आने पर क्त्वा+अस् (ङसि) ('आ' का लोप)=क्त्वस् ('स्' को रुत्व-विसर्ग)=क्त्वः । इसी प्रकार श्ना+अस् (ङसि)—'आ' का लोप, श्न्+अस् स्=र्, र्=ः श्नः ।

'विश्वपा' शब्द के रूप (पुंल्लिङ्ग)

एकव०	द्वि० व०	बहुव०
प्र०—विश्वपा	विश्वपौ	विश्वपाः
द्वि०—विश्वपाम्	विश्वपौ	विश्वपः
तृ०—विश्वपा	विश्वपाभ्याम्	विश्वपाभिः
च०—विश्वपे	विश्वपाभ्याम्	विश्वपाभ्यः
पं०—विश्वपः	विश्वपाभ्याम्	विश्वपाभ्यः
ष०—विश्वपः	विश्वपोः	विश्वपाम्
स०—विश्वपि	विश्वपोः	विश्वपासु
सम्बो०—हे विश्वपाः !	हे विश्वपौ	हे विश्वपाः

हरयः। (१९०) ह्रस्वस्य गुणः ७।३।१०८। ह्रस्वस्य गुणः स्यात् सम्बुद्धौ। हे हरे। हरिम्। हरी। हरीन्। (१९१) शेषो घ्यसखि १।४।७। शेष इति स्पष्टार्थम्। अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्। (१९२)

(१९०) **ह्रस्वस्य गुण इति।** 'सम्बुद्धौ चे'त्यतः 'सम्बुद्धावि'त्यनुवर्तते। तदाह—**ह्रस्वस्येत्यादिना।**

(१९१) **शेष इति।** 'यू स्त्र्याख्यौ नदी' इत्यतो 'यू' इत्यनुवर्तते, 'ङिति ह्रस्वश्चे'-त्यतो 'ह्रस्वः' इति च। प्रोक्तात् नदीसंज्ञकादन्य इति शेषः। शब्दस्वरूपमित्यध्याहार्यम्, तच्च यूभ्यां विशेष्यते। तदन्तविधिः। तदाह—**अनदीसंज्ञावित्यादि।**

(१) इकारान्त पुंल्लिङ्ग हरि शब्द से 'सु' विभक्ति आने पर हरि+सु 'उ' की इत्संज्ञा—हरि+स् (स्=र्), हरिर् (र्=ः)=हरिः। (२) हरि+औ (इ+औ=ई 'प्रथमयोः पूर्वसवर्णः' से दीर्घ)=हरी।

(१८९) पद—जसि, च। **अनुवृत्ति**—ह्रस्वस्य गुणः, अङ्गस्य। **विधिसूत्र।**

मूलार्थ—'जस्' परे रहते ह्रस्वान्त अङ्ग को गुण होता है। हरयः।

विमर्श—यहाँ 'ह्रस्वस्य गुणः' (७।३।१०८) सम्पूर्ण सूत्र की अनुवृत्ति आती है। 'अङ्गस्य' का अधिकार है। 'ह्रस्व' पद अङ्गस्य का विशेषण होने से तदन्त विधि होती है। अलोऽन्त्य परिभाषा द्वारा अङ्ग के अन्तिम वर्ण को गुण होता है। यह सूत्र पूर्वसवर्ण दीर्घ का अपवाद है।

उदाहरण—हरि+जस्, (ज् की इत्संज्ञा लोप) हरि+अस् (इ='ए' गुण—'जसि च') =हरे+अस् (ए='अय्' आदेश)=हरय्+अस् (स्=र्), हरयर्, (र्=ः)=हरयः।

(१९०) पद—ह्रस्वस्य, गुणः। **अनुवृत्ति**—सम्बुद्धौ। **विधिसूत्र।**

मूलार्थ—सम्बुद्धि (सम्बोधन का एकवचन 'सु') परे रहते ह्रस्वान्त अङ्ग को गुण होता है। हे हरे! हरिम्। हरीन्।

विमर्श—अर्थ की पूर्णता के लिए 'सम्बुद्धौ च' (७।३।१०६) से 'सम्बुद्धौ' की अनुवृत्ति आ रही है। 'अङ्गस्य' का अधिकार है। तदनुसार—ह्रस्वान्त अङ्ग के अन्तिम वर्ण को सम्बुद्धि[1] परे रहते गुण होता है।

उदाहरण—(१) (हे) हरि+सु (स्)—(इ='ए'—गुण)—हरे+स् ('एङ् ह्रस्वात् सम्बुद्धेः' से 'स्' का लोप)=हे हरे! (२) हरि+अम् (इ+अ=इ—पूर्वरूप)=हरिम्। (३) हरि+औ (इ+औ='ई'—'पूर्वसवर्ण दीर्घ'=हरी। (४) हरि+शस् (अस्) (इ+अ=ई 'पूर्वसवर्णदीर्घ')—हरीस् (स्=न्—'तस्माच्छसो नः पुंसि')=हरीन्।

(१९१) पद—शेषः, घि, असखि। **अनुवृत्ति**—यू, ह्रस्वः। **संज्ञासूत्र।**

मूलार्थ—सखि शब्द को छोड़कर नदीसंज्ञक से भिन्न ह्रस्व इकारान्त तथा उकारान्त शब्दों की 'घि' संज्ञा होती है।

विमर्श—सूत्रार्थ को पूर्ण करने के लिए 'यू स्त्र्याख्यौ नदी' (१।४।३) से 'यू' (इश्च उश्चेति यू) तथा 'ङिति ह्रस्वश्च' से 'ह्रस्वः' की अनुवृत्ति आ रही है। 'शेष' पद का अर्थ 'उक्त नदीसंज्ञक से अन्य (भिन्न)' है। ह्रस्व इकारान्त शब्दों में 'सखि' शब्द इसका अपवाद है। अतः 'सखि'

---

[1] एकवचनं सम्बुद्धिः (२।३।४९)।

आङो नाऽस्त्रियाम् ७।३।१२०। घेः परस्याऽऽङो ना स्यादस्त्रियाम्। 'आङि'ति टासंज्ञा प्राचाम्। हरिणा। हरिभ्याम् ३। हरिभिः। **(१९३) घेर्ङिति ७।३।१११।** घिसंज्ञकस्य ङिति सुपि गुणः स्यात्। हरये। हरिभ्यः २। गुणे कृते। **(१९४) ङसिङसोश्च ६।१।११०।** एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्।

(१९२) **घेः परस्येति**। 'अच्च घेः' इत्यतो 'घि' इत्यस्यानुवृत्तेरित्यर्थः। **हरिणा इति**। हरिशब्दात् तृतीयैकवचने 'टा' प्रत्यये 'शेषो घ्यसखि' इत्यनेन घिसंज्ञायाम् 'आङो नाऽस्त्रियाम्' इत्यनेन 'टा' इत्यस्य स्थाने नाऽऽदेशे 'अट्कुप्वाङि'त्यादिना णत्वे 'हरिणा' इति।

(१९३) **'घेर्ङिति' इति**। 'सुपि च' इत्यतः 'सुपि' इति 'ह्रस्वस्य गुणः' इत्यतो गुण इति चानुवर्तते, तदाह—**घिसंज्ञकस्येति**।

(१९४) 'एङः पदान्तादति' इत्यतः एङः इति, अति इति च, 'अमि पूर्वः' इत्यतः पूर्व इति चानुवर्तते। 'एकः पूर्वपरयोः' इत्यधिक्रियते। अत आह—**एङो ङसिङसोरित्यादि**।

शब्द को छोड़कर नदी संज्ञा से भिन्न ह्रस्व इकारान्त एवं ह्रस्व उकारान्त शब्द घिसंज्ञक होते हैं।

(१९२) पद—आङः, ना, अस्त्रियाम्। **अनुवृत्ति**—घेः। **विधिसूत्र**।

मूलार्थ—स्त्रीलिंग को छोड़कर घिसंज्ञक शब्दों से परे 'आङ्' के स्थान पर 'ना' आदेश होता है। प्राचीन आचार्यों ने 'टा' को 'आङ्' कहा है।[1] हरिणा। हरिभ्याम्। हरिभिः।

विमर्श—यहाँ 'अच्च घेः' सूत्र से 'घेः' पद की अनुवृत्ति आ रही है। तदनुसार—स्त्रीलिंग को छोड़कर (अस्त्रियाम्) अन्य लिङ्गों में 'घि'संज्ञक शब्द के पश्चाद्वर्ती आङ् (टा) के स्थान में 'ना' आदेश होता है।

उदाहरण—(१) हरि+टा ('ट्' की इत्संज्ञा-'चुटू')=हरि+आ (घिसंज्ञा होकर आ=ना)—हरिना (न्=ण्)—'अट्कुप्वाङ्०' से)=हरिणा। (२) हरि+भ्याम्=हरिभ्याम्। (३) हरि+भिस्, हरिभिस् ('स्' को रुत्व-विसर्ग)=हरिभिः।

(१९३) पद—घेः, ङिति। **अनुवृत्ति**—सुपि, गुणः। **विधिसूत्र**।

मूलार्थ—ङित् 'सुप्' विभक्ति के परे रहते घिसंज्ञक को गुण होता है। हरये। हरिभ्यः।

विमर्श—सूत्रार्थ को पूर्ण करने के लिए 'सुपि च' से 'सुपि' तथा 'ह्रस्वस्य गुणः' से गुण की अनुवृत्ति आती है। तदनुसार ङकारेत्संज्ञक 'सुप्' विभक्तियों के परे रहते अलोऽन्त्य परिभाषा की उपस्थिति से घिसंज्ञक शब्दों के अन्तिम वर्ण के स्थान में गुण आदेश होगा।

उदाहरण—(१) हरि+ङे (ए) (घिसंज्ञा होकर इ='ए' गुण—'घेर्ङिति')=हरे+ए, (ए=अय्)=हरये। (२) हरि+भ्यस्, हरिभ्यस् (स्=र्), हरिभ्यर् (र्=ः)=हरिभ्यः।

(१९४) पद—ङसिङसोः, च। **अनुवृत्ति**—एङः, अति, पूर्वरूपम्। **विधिसूत्र**।

मूलार्थ—'एङ्' से ङसि तथा ङस् सम्बन्धी अकार परे रहते पूर्व-पर के स्थान में पूर्वरूप एकादेश होता है। हरेः। हर्योः। हरीणाम्।

---

[1] 'आङिति तृतीयैकवचनस्य पूर्वाचार्याणां संज्ञा'—रूपावतारः (पूर्वार्द्धः)।

हरेः २। हर्योः २। हरीणाम्। (१९५) **अच्च घेः ७।३।११९।** इदुद्भ्यामुत्तरस्य ङेरौत् घेरत् स्यात्। हरौ। हरिषु। एवं कव्यादयः। (१९६) **अनङ् सौ**

---

(१९५) **अच्च घेरिति।** अत्र 'इदुद्भ्याम्' इति 'औत्' इति च सूत्रमनुवर्तते। 'ङेरामि'त्यतो 'ङेः' इत्यनुवर्तते। तदाह—**इदुद्भ्यामित्यादिना।** **हरौ इति।** हरिशब्दात् सप्तम्येकवचने 'ङि' समागते ङस्येत्संज्ञायां लोपे च कृते 'हरि+इ' इति स्थिते घिसंज्ञायां 'घेर्ङिति' इति गुणे प्राप्ते तं प्रबाध्य 'अच्च घेः' इत्यनेन ङेः स्थाने औकारे इकारस्य अकारे च कृते 'हर+औ' इति जाते 'वृद्धिरेचि' इति वृद्धौ 'हरौ' इति रूपमिति।

(१९६) **अनङ् साविति।** 'सख्युरसम्बुद्धौ' इति सूत्रमनुवर्तते। 'अङ्गस्य' इत्यस्याधिकारः। तदाह—**सख्युरित्यादिना।**

विमर्श—यहाँ 'एङः पदान्तादति' (६।१।१०९) से 'एङः' एवम् 'अति' तथा 'अमि पूर्वः' (६।१।१०७) से 'पूर्वः' (पूर्वरूपम्) की अनुवृत्ति आती है। तदनुसार एङ् (ए, ओ) के पश्चात् ङसि अथवा ङस् सम्बन्धी अकार परे रहते पूर्व-पर के स्थान में पूर्वरूप एकादेश होता है।

उदाहरण—(१) हरि+अस् (ङसि) (इ='ए' गुण 'घेर्ङिति'=हरे+अस् (ए+अ=ए—पूर्वरूप 'ङसिङसोश्च' से), हरे स्, (स्=र्) हरेर्, (र्=ः) हरेः। इसी प्रकार षष्ठी एकवचन 'ङस्' में भी 'हरेः' रूप बनेगा। (२) हरि+ओस् (इ=य्—'यण्' हर्य्+ओस् (स्=र्) हर्योर्, (र्=ः)=हर्योः। (३) हरि+आम् (नुट् (न्) का आगम—'ह्रस्वनद्यापो नुट्') हरि+नाम् ('इ' को 'नामि' से दीर्घ)=हरीनाम् (न्=ण्)=हरीणाम्।

(१९५) पद—अत् च घेः। **अनुवृत्ति**—इदुद्भ्याम्, औत्। **विधिसूत्र।**

मूलार्थ—इकार एवम् उकार से परे 'ङि' के स्थान पर औत् (औ) तथा घिसंज्ञक के स्थान पर अत् (अ) आदेश होता है। हरौ। हरिषु। इसी प्रकार कवि आदि शब्दों के रूप चलते हैं।

विमर्श—सूत्रार्थ करने के लिए 'ङेराम्नद्याम्नीभ्यः (७।३।११६) सूत्र से 'ङेः' तथा 'इदुद्भ्याम्' (७।३।११७) एवम् 'औत्' (७।३।११८) सूत्रों की यहाँ अनुवृत्ति आ रही है। तदनुसार ह्रस्व इकार, उकार से पश्चाद्वर्ती 'ङि' के स्थान पर 'औ' तथा घिसंज्ञक शब्द के अन्तिम वर्ण को ह्रस्व अकार आदेश होता है।

उदाहरण—(१) हरि+ङि, (इ=अ तथा ङि=औ) हर+औ, (अ+औ=औ—'वृद्धिरेचि' से वृद्धि)=हरौ। (२) हरि+सुप् (सु), हरिसु (स्=ष्—'आदेशप्रत्यययोः')=हरिषु।

हरि शब्द के रूप (पुंल्लिङ्ग)

	एकव०	द्विव०	बहु०		एकव०	द्विव०	बहुव०
प्र०–	हरिः	हरी	हरयः	प०–	हरेः	हरिभ्याम्	हरिभ्यः
द्वि०–	हरिम्	हरी	हरीन्	ष०–	हरेः	हर्योः	हरीणाम्
तृ०–	हरिणा	हरिभ्याम्	हरिभिः	स०–	हरौ	हर्योः	हरिषु
च०–	हरये	हरिभ्याम्	हरिभ्यः	सं०–	हे हरे!	हे हरी!	हे हरयः!

इसी प्रकार कवि, रवि आदि इकारान्त पुंल्लिङ्ग शब्दों के रूप बनेंगे।

(१९६) पद—अनङ्, सौ। **अनुवृत्ति**—सख्युः, असम्बुद्धौ, अङ्गस्य। **विधिसूत्र।**

७।१।९३। सख्युरङ्गस्याऽनङादेशोऽसम्बुद्धौ सौ। (१९७) **अलोऽन्त्यात्पूर्व उपधा** १।१।६५। अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। (१९८) **सर्वनामस्थाने चाऽसम्बुद्धौ** ६।४।८। नान्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने। (१९९) **अपृक्त एकाल् प्रत्ययः**। १।२।४१। एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्। (२००) **हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्** ६।१।६८। हलन्तात्परं दीर्घौ यौ ङ्यापौ,

---

(१९८) **सर्वनामस्थान इति**। 'नोपधायाः' इत्यनुवर्तते 'अङ्गस्ये'ति चाधिकाराल्लभ्यते। न इति लुप्तषष्ठीकं पदम् अङ्गस्य विशेषणम्। तदन्तविधिः। 'ढ्रलोपे पूर्वस्य' इत्यतो दीर्घ इत्यनुवर्तते। तदाह—**नान्तस्येत्यादिना**।

(१९९) **अपृक्त इति**। एकालिति कर्मधारयः। असहायवाची एवात्र एकशब्दः। एकवर्णरूपः प्रत्ययोऽपृक्तसंज्ञः स्यादित्यर्थः।

(२००) **हल्ङ्याबिति**। 'लोपो व्योः' इत्यतो लोप इत्यनुवर्तते। हलन्तात्परं

मूलार्थ—अङ्गसंज्ञक सखि शब्द को अनङ् आदेश होता है, सम्बुद्धिभिन्न 'सु' के परे रहते।

विमर्श—प्रकृत सूत्र में स्थानीवाचक पद का अभाव है, अतः 'सख्युरसम्बुद्धौ' (७।२।९२) सूत्र की यहाँ अनुवृत्ति आ रही है। 'अङ्गस्य' का अधिकार है। इस प्रकार सम्बुद्धिभिन्न अर्थात् प्रथमा विभक्ति का एकवचन 'सु' परे रहते 'सखि' शब्द के अङ्ग के (ङित् होने से अन्त्य के स्थान पर) 'अनङ्' आदेश होता है।

(१९७) पद—अलः, अन्त्यात्, पूर्वः, उपधा। **संज्ञासूत्र**।

मूलार्थ—अन्त्य अल् से पूर्व वर्ण की उपधा संज्ञा होती है।

विमर्श—सूत्र पूर्ण है। 'अन्त्यादलः पूर्वः' सूत्रभाग संज्ञी है तथा 'उपधा' संज्ञा है।

(१९८) पद—सर्वनामस्थाने, च, असम्बुद्धौ। **अनुवृत्ति**—अङ्गस्य, नः, उपधायाः, दीर्घः। **विधिसूत्र**।

मूलार्थ—सम्बुद्धिभिन्न सर्वनामस्थान के परे रहने पर नकारान्त उपधा को दीर्घ होता है।

विमर्श—सूत्र में स्थानी और आदेशवाचक पद नहीं हैं, केवल निमित्तवाचक पद हैं। अतः 'नोपधायाः' (६।४।७) सूत्र की तथा 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६।३।१११) से 'दीर्घः' की अनुवृत्ति आ रही है। 'नः' में षष्ठी विभक्ति है। वह अधिकार—'अङ्गस्य' का विशेषण है, तदन्त विधि होती है। तदनुसार—सम्बुद्धि से भिन्न सर्वनामस्थानसंज्ञक प्रत्यय परे रहते नकारान्त अङ्ग की उपधा को दीर्घ होता है।

(१९९) पद—अपृक्तः, एकाल्, प्रत्ययः। **संज्ञासूत्र**।

मूलार्थ—एकाल्=एक वर्ण रूप प्रत्यय की 'अपृक्त' संज्ञा होती है।

विमर्श—(एकश्चासौ अल् च—कर्मधारयः) एक शब्द यहाँ असहायवाची अर्थात् केवलार्थक है। इस प्रकार एकवर्णात्मक प्रत्यय अपृक्तसंज्ञक होता है।

(२००) पद—हल्ङ्याब्भ्यः, दीर्घात्, सुतिसि, अपृक्तं, हल्। **अनुवृत्ति**—लोपः। **विधिसूत्र**।

मूलार्थ—हलन्त से परे सु, ति, सि सम्बन्धी अपृक्त हल् और दीर्घ ङी, आप् तदन्त से परे 'सु' सम्बन्धी अपृक्तसंज्ञक हल् का लोप होता है।

तदन्ताच्च परं 'सुतिसी'त्येतदपृक्तं हल् लुप्यते । (२०१) प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२ । प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात् । (२०२) नलोपः प्रातिपदिकान्तस्य ८।२।७ । प्रातिपदिकसंज्ञं यत्पदं तदन्तस्य नस्य लोपः । सखा । (२०३) सख्युरसम्बुद्धौ ७।१।९२ । सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् ।

'सुतिसि' इत्येतदपृक्तं हल्लुप्यते, दीर्घौ यौ ङ्यापौ तदन्ताच्च परं 'सुतिसि' इत्येतदपृक्तं हल्लुप्यत इति भावः ।

(२०२) **न लोप इति** । न इति लुप्तषष्ठ्यन्तं पृथक्पदम्, अन्तस्येति नस्य विशेषणम् । 'प्रातिपदिकान्तस्य' इत्यत्र प्रातिपदिक इति लुप्तषष्ठ्यन्तम्, अधिकारप्राप्तस्य पदस्येत्यस्य विशेषणम् । तदाह—**प्रातिपदिकेत्यादिना** । **सखा इति** । सखिशब्दात्सौ अनुबन्धलोपे सखि + स् इति स्थिते, अङ्गसंज्ञायाम् 'ङिच्चे'ति सहकारेण 'अनङ् सौ' इत्यनेन इकारस्यानङ्ङादेशेऽनुबन्धलोपे 'सखन् + स्' इति जाते 'अलोऽन्त्यात्पूर्व उपधा' इत्यनेन उपधासंज्ञायाम् 'सर्वनामस्थाने चाऽसम्बुद्धावि'ति दीर्घे 'अपृक्त एकाल् प्रत्ययः' इति सस्याऽपृक्तसंज्ञायाम् 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सस्य लोपे 'नलोपः प्रातिपदिकान्तस्य' इति नकारस्य लोपे 'सखे'ति रूपम् ।

विमर्श—'लोपो व्योर्वलि' (६।१।५६) सूत्र से 'लोपः' पद की अनुवृत्ति आती है । हल् च, ङी च, आप च् तेभ्यः='हल्ङ्याब्भ्यः ।' द्वन्द्व समास है । पंचमी विभक्ति होने से 'पर' पद का अध्याहार किया जाता है । 'दीर्घात्' ङी, आप् का विशेषण है । सु ति सि से आक्षिप्त प्रकृति का विशेषण होने से 'हल्ङ्याब्भ्यः' में तदन्त विधि होकर—हलन्त, दीर्घ ईकारान्त तथा दीर्घ आबन्त से परे सुतिसि' सम्बन्धी अपृक्त हल् का लोप होता है । हलन्त से परे सु, ति, सि, तीनों प्रत्यय मिलते हैं । ङी (ङीप्, ङीष्, ङीन्) और आप् (टाप्, चाप्, डाप्) से परे केवल 'सु' ही मिलता है ।

(२०१) पद—प्रत्ययलोपे, प्रत्ययलक्षणम् । **संज्ञासूत्र (नियम)** ।

मूलार्थ—प्रत्यय का लोप हो जाने पर भी तदाश्रित कार्य होता है ।

विमर्श—(प्रत्ययः लक्षणं यस्य तत् प्रत्ययलक्षणम् ।) प्रत्यय का लोप हो जाने पर भी प्रत्यय को निमित्त मानकर होने वाला कार्य होता है ।

(२०२) पद—नलोपः, प्रातिपदिकान्तस्य । **अनुवृत्ति**—पदस्य । **विधिसूत्र** ।

मूलार्थ—प्रातिपदिकसंज्ञक पद के अन्तिम नकार का लोप होता है ।

विमर्श—'नः' में षष्ठी विभक्ति है । 'अन्तस्य' 'नः' का विशेषण है । अधिकार द्वारा प्राप्त 'पदस्य' पद प्रातिपदिक का विशेषण है । अतः प्रातिपदिकसंज्ञक जो पद, तदन्त नकार (न्) का लोप होता है ।

उदाहरण—सखि+सु (इ=अनङ्–अन् आदेश) 'स ख्+अन् स्' ('अ' की उपधासंज्ञा होकर, उपधासंज्ञक वर्ण अ='आ' दीर्घ—'सर्वनामस्थाने चाऽसम्बुद्धौ')='सखान्+स्' ('स्' की अपृक्त संज्ञा होने पर—'हल्ङ्याब्भ्यो०' से स् का लोप) सखान्, ('नलोपः प्रातिपदिकान्तस्य' से 'न्' का लोप)=सखा । (मित्र)

(२०३) पद—सख्युः, असम्बुद्धौ । **अनुवृत्ति**—अङ्गस्य, सर्वनामस्थाने, णित् । **अतिदेशसूत्र** ।

(२०४) अचो ञ्णिति ७।२।११५ । अजन्ताङ्गस्य वृद्धिर्ञिति णिति च । सखायौ । सखायः । हे सखे । सखायम् । सखायौ । सखीन् । सख्या । सखिभ्याम् । सखिभिः । सख्ये । **(२०५) ख्यत्यात्परस्य ६।१।११२ ।** खितिशब्दाभ्यां खीतीशब्दाभ्यां कृत-

---

(२०४) **'अचो'** इति । 'मृजेर्वृद्धिः' इत्यतो वृद्धिरित्यनुवर्तते । अधिकारलब्धमङ्गस्येति पदमचा विशेष्यते । तदन्तविधित्वादाह—**अजन्ताङ्गस्येति** ।

(२०५) कृतयणादेशयोः खि-खीशब्दयोरनुकरणं ख्य इति, ति-तीशब्दयोरनुकरणं 'त्य' इति । ख्यश्च त्यश्चेति समाहारद्वन्द्वः । 'एङः पदान्तादति' इत्यतः 'अति' इति 'ङसिङसोश्चे'त्यतः 'ङसिङसोः' इति चानुवर्तते । अतीति षष्ठ्या विपरिणम्यते ।

मूलार्थ—अङ्गसंज्ञक सखि शब्द से परे सम्बुद्धिभिन्न सर्वनामस्थान णिद्वत् (णित् के समान) हो जाता है ।

विमर्श—अधिकार से प्राप्त 'अङ्गस्य' को 'अङ्गात्' पंचमी विभक्ति में परिवर्तित कर दिया जाता है । 'गोतो णित्' से 'णित्' पद की अनुवृत्ति आती है तथा 'इतोऽत्सर्वनामस्थाने' से 'सर्वनामस्थाने' की । अतिदेशसूत्र होने से यह सम्बुद्धिभिन्न सर्वनामस्थान (सु, औ, जस् , अम् , औट्) में यह णित् का आरोप करता है । अर्थात् ये प्रत्यय 'ण्' इत्संज्ञक के समान समझे जाँय । णित् सम्बन्धी कार्य होना 'णिद्वत्' का फल है ।

(२०४) पद—अचः, ञ्णिति । **अनुवृत्ति**—अङ्गस्य, वृद्धिः । **विधिसूत्र** ।

मूलार्थ—ञित्, णित् प्रत्यय के परे रहते अजन्त अङ्ग को वृद्धि होती है । सखायौ । सखायः । हे सखे । सखायम् इत्यादि ।

विमर्श—प्रकृत सूत्र में 'मृजेर्वृद्धिः' से 'वृद्धिः' की अनुवृत्ति आ रही है । 'अङ्गस्य' इस अधिकार सूत्र का 'अचः' विशेषण होने से तदन्त विधि होती है । इस प्रकार ञकार-इत्संज्ञक तथा णकारेत्संज्ञक प्रत्ययों के परे रहने पर अजन्त अङ्ग के स्थान में वृद्धि होती है । 'अलोऽन्त्यस्य' परिभाषा की उपस्थिति से अन्त्य वर्ण को वृद्धि होगी ।

उदाहरण—(१) सखि+औ (सर्वनामस्थान होने से औ को 'सख्युरसम्बुद्धौ' से णिद्वद्भाव तथा 'अचो ञ्णिति' से इ=ऐ 'वृद्धि')=सखै+औ (ऐ=आय्)=सखायौ । (२) सखि+जस् , सखि+अस् (णिद्वद्भाव तथा वृद्धि)=सखै+अस् , (ऐ=आय्) सखायस् (स्=र्), सखायर् (र्=ः)=सखायः । (३) हे सखि+सु (इ=ए-'ह्रस्वस्य गुणः')=सखे+सु (एङ्ह्रस्वात्०' से 'सु' का लोप)=हे सखे ! (४) सखि+अम् (णिद्वत् तथा वृद्धि)=सखै+अम् (ऐ=आय्)=सखायम् । (५) सखि+औट् (औ), सखि+औ, (णिद्वत्, वृद्धि) सखै+औ, (ऐ=आय्)=सखायौ । (६) सखि+शस् (अस्), सखि+अस् (पूर्वसवर्ण दीर्घ)=सखीस् (स्=न्)=सखीन् । (७) सखि+टा (ट् की इत्संज्ञा), सखि+आ ('इ=य् 'यणादेश')=सख्या । (८) सखि+भ्याम्=सखिभ्याम् । (९) सखि+भिस्—सखिभिस् (स् को रुत्वविसर्ग)=सखिभिः । (१०) सखि+ङे, ('ङ्' की इत्संज्ञा) सखि+ए (इ=य् 'यण्')=सख्ये ।

(२०५) पद—ख्यत्यात् , परस्य । **अनुवृत्ति**—अति, ङसिङसोः, उत् । **विधिसूत्र** ।

मूलार्थ—यण् आदेश हो जाने पर ह्रस्व खि-ति शब्द और दीर्घ खी-ती शब्दों से परे ङसि, ङस् सम्बन्धी अकार के स्थान में उकार आदेश होता है । सख्युः ।

यणादेशाभ्यां परस्य ङसिङसोरत उः । सख्युः । (२०६) औत् ७।३।११८ । इदुद्भ्यां परस्य ङेरौत् । सख्यौ । शेषं हरिवत् । (२०७) पतिः समास एव १।४।८ । पतिः समास एव घिसंज्ञः । पत्या । पत्ये । पत्युः २ । पत्यौ । शेषं हरिवत् । समासे तु–भूपतये ।

'ऋत उत्' इत्यत उदित्यनुवर्तते । तदाह—**खितिशब्दाभ्यामित्यादि । सख्युरिति ।** सखिशब्दात् 'ङसि' विभक्तौ ङकारस्येत्संज्ञायां लोपे 'सखि + अस्' इति जाते 'इको यणचि' इतीकारस्य यणादेशे 'सख् य् अस्' इति स्थिते 'ख्यत्यात्परस्ये'त्यनेन असोऽकारस्य उकारे सस्य रुत्वे विसर्गे च कृते 'सख्युः' इति ।

(२०६) **'औत्' इति ।** इदुद्भ्यामि'त्यत्रैकदेशे स्वरितत्वप्रतिज्ञयाऽऽह—इत इति ।

(२०७) **पति इति ।** 'शेषो घ्यसखि' इत्यतः 'घि' इत्यनुवर्तते । पतिशब्दः समास एव घिसंज्ञको भवति न तु केवल इत्यर्थः । **पत्या इति ।** पतिशब्दात् 'टा'

विमर्श—सूत्रार्थ करने के लिए 'एङः पदान्तादति' (६।१।१०९) से 'अति' 'ङसिङसोश्च' (६।१।११०) से 'ङसिङसोः' तथा 'ऋत उत्' से 'उत्' की अनुवृत्ति आती है। परस्य के सामीप्य से अनुवृत्त 'अति' पद षष्ठी विभक्ति में परिवर्तित हो जाता है। तदनुसार यणादेश हो जाने पर ह्रस्वान्त खि ति तथा दीर्घान्त खी ती शब्दों से परे ङसि, ङस् सम्बन्धी 'अ' के स्थान पर 'उ' हो जाता है।

उदाहरण—सखि+ङसि (अस्)=सखि+अस्, (इ=य् 'यण्') सख्य्+अस् (अ=उ—'ख्यत्यात्परस्य')=सख्युस्, (स्=र्) सख्युर् (र्=:)=सख्युः ।

(२०६) पद—औत् । **अनुवृत्ति**—इदुद्भ्याम्, ङे । **विधिसूत्र ।**

मूलार्थ—ह्रस्व इकार-उकार से परे 'ङि' के स्थान पर 'औत्' आदेश होता है। सख्यौ । शेष रूप हरि शब्द की तरह चलेंगे।

विमर्श—प्रकृत सूत्र 'इदुद्भ्याम्' (७।३।११७) सम्पूर्ण सूत्र तथा 'ङेराम्नद्याम्नीभ्यः' (७।३।११६) से 'ङे' की अनुवृत्ति आती है। तदनुसार इ, उ के पश्चाद्वर्ती 'ङि' के स्थान पर 'औ' आदेश होता है।

उदाहरण—सखि+ङि, ('ङि'='औ'—'औत्') सखि+औ (इ=य्—'यण्')=सख्यौ । अवशिष्ट रूप हरि शब्द के समान बनेंगे।

सखि शब्द के रूप (पुंल्लिङ्ग)

	एक०	द्वि०	बहु०		एक०	द्वि०	बहु०
प्र०—	सखा	सखायौ	सखायः	प०—	सख्युः	सखिभ्याम्	सखिभ्यः
द्वि०—	सखायम्	सखायौ	सखीन्	ष०—	सख्युः	सख्योः	सखीनाम्
तृ०—	सख्या	सखिभ्याम्	सखिभिः	स०—	सख्यौ	सख्योः	सखिषु
च०—	सख्ये	सखिभ्याम्	सखिभ्यः	सं०—	हे सखे !	हे सखायौ !	हे सखायः !

(२०७) पद—पतिः, समासः, एव । **अनुवृत्ति**—'घि' । **संज्ञासूत्र ।**

मूलार्थ—पति शब्द की समास में ही घिसंज्ञा होती है। पत्या । पत्ये । पत्युः । समास में—भूपतये ।

कतिशब्दो नित्यं बहुवचनान्तः। (२०८) बहुगणवतुडति संख्या १।१।२३। एते संख्यासंज्ञाः स्युः। (२०९) डति च १।१।२५। डत्यन्ता संख्या षट्संज्ञा स्यात्।

विभक्तौ टकारस्येत्संज्ञायां लोपे च घिसंज्ञाया अभावे 'इको यणचि' इत्यनेन यणि कृते 'पत्या' इति।

(२०९) **डति चेति।** अत्र 'बहुगण०' इत्यतः 'संख्या' इति, 'ष्णान्ता षट्' इत्यतः षडिति चानुवर्तते। प्रत्ययत्वात् तदन्तग्रहणम्। तदाह—**डत्यन्तेत्यादिना।**

विमर्श—'शेषो घ्यसखि' से 'घि' की अनुवृत्ति आ रही है तथा इस सूत्र द्वारा प्राप्त घि-संज्ञा का नियमन किया जा रहा है। इस प्रकार इकारान्त पति शब्द की 'घि' संज्ञा समास में ही होती है, अन्यत्र नहीं।

उदाहरण—(१) पति+टा (आ) ('घि-संज्ञा' का प्रकृत सूत्र द्वारा निषेध होने से 'ना' आदेश नहीं हुआ इ=य् 'यणादेश')=पत्या। (२) पति+ङे (ए) ('घि' संज्ञा के अभाव में 'घेर्ङिति' से गुण नहीं हुआ, यण्)=पत्ये। (३) पति+ङसि (अस्) यण् होकर, पत्य्+अस् (अ=उ 'ख्यत्यात्परस्य') पत्युस्, (स्=र्) पत्युर् (र्=ः)=पत्युः। (४) पति+ङि, (ङि=औ) पति+औ (इ=य् 'यण्')=पत्यौ। शेष रूप हरि शब्द की तरह चलेंगे। समास स्थल में पति शब्द की घि-संज्ञा होने से भूपति शब्द के रूप हरि शब्द की तरह बनेंगे। भूपति+ङे, (ए) (घि-संज्ञा होकर 'घेर्ङिति' से गुण इ=ए) भूपते+ए (अयादेश)=भूपतये।

पति शब्द के रूप (इकारान्त पुंल्लिङ्ग)

	एक०	**द्वि०**	**बहु०**		**एक०**	**द्वि०**	**बहु०**
प्र०	—पतिः	पती	पतयः	पं०	—पत्युः	पतिभ्याम्	पतिभ्यः
द्वि०	—पतिम्	पती	पतीन्	ष०	—पत्युः	पत्योः	पतीनाम्
तृ०	—पत्या	पतिभ्याम्	पतिभिः	स०	—पत्यौ	पत्योः	पतिषु
च०	—पत्ये	पतिभ्याम्	पतिभ्यः	सं०	—हे पते !	हे पती !	हे पतयः !

'कति' शब्द नित्य बहुवचनान्त है।

(२०८) पद—बहुगणवतुडति, संख्या। **संज्ञासूत्र।**

मूलार्थ—'बहु' शब्द, 'गण' शब्द, वतु-प्रत्ययान्त और डति-प्रत्ययान्त शब्दों की संख्या संज्ञा होती है।

विमर्श—सूत्र में समाहारद्वन्द्व समास है। बहुश्च, गणश्च, वतुश्च, डतिश्च—तेषां समाहारः 'बहुगणवतुडति।'—यह पद संज्ञी है तथा संख्या संज्ञा। सूत्रस्थ वतु और डति प्रत्यय हैं।

(२०९) पद—डति, च। **अनुवृत्ति**—षट्, संख्या। **संज्ञासूत्र।**

मूलार्थ—डति-प्रत्ययान्त संख्यावाचक पद की 'षट्' संज्ञा होती है।

विमर्श—यहाँ 'बहुगणवतु०' (२०८) से 'संख्या' तथा 'ष्णान्ता षट्' (१।१।२४) से 'षट्' की अनुवृत्ति आ रही है। 'षट्' संज्ञा है तथा 'डति' संज्ञी। इस प्रकार तदन्तविधि होने से डति प्रत्ययान्त पदों की षट् संज्ञा होती है। 'कति' (किम्+डति) शब्द डति-प्रत्ययान्त होने से षट्-संज्ञक हुआ।

(२१०) षड्भ्यो लुक् ७।१।२२ । जश्शसोः । प्रत्ययलोपे 'जसि चे'ति गुणे प्राप्ते । **(२११) प्रत्ययस्य लुक्श्लुलुपः १।१।६७ ।** लुक्श्लुलुप्शब्दैः कृतं प्रत्ययाऽदर्शनं क्रमात् तत्तत्संज्ञं स्यात् । **(२१२) न लुमताऽङ्गस्य १।१।६३ ।** लुक् श्लु लुप् एते लुमन्तः । लुमताशब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् । कति–२ । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनाम् । कतिषु । युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः । त्रिशब्दो नित्यं

---

(२१०) **षड्भ्यो लुगिति ।** 'जश्शसोः शी' इत्यतो जश्शसोरित्यनुवर्तते । तेन षट्संज्ञकेभ्यो जश्शसोर्लुक् स्यादित्यर्थः ।

(२१२) **न लुमतेति ।** अत्र 'प्रत्ययलोपे प्रत्ययलक्षणमि'ति सूत्रमनुवर्तते । लु इत्यस्यास्तीति लुमान् लुक्शब्दः, श्लुशब्दः लुप्शब्दश्च । तेन लुका श्लुना लुपा वा प्रत्ययलोपे विहिते सति तन्निमित्तकमङ्गकार्यं न स्यादित्यर्थः । **कति इति ।** बहुत्वविशिष्टवाचकत्वात् प्रथमाबहुवचने जस् प्रत्यये 'बहुगणवतुडति संख्या' इति सूत्रेण संख्यासंज्ञायां 'डति च' इत्यनेन षट्संज्ञायां ततः 'प्रत्ययस्य लुक्श्लुलुपः' इति लुक्

---

(२१०) पद—षड्भ्यः, लुक् । **अनुवृत्ति**—जश्शसोः । **विधिसूत्र ।**

मूलार्थ—षट्संज्ञक शब्द से परे जस् और शस् का लोप होता है ।

विमर्श—यहाँ 'जश्शसोः शिः' (७।१।२०) से 'जश्शसोः' की अनुवृत्ति आती है ।

(२११) पद—प्रत्ययस्य, लुक्श्लुलुपः । **अनुवृत्ति**—अदर्शनम् । **संज्ञासूत्र ।**

मूलार्थ—लुक्, श्लु, लुप् शब्दों से किया गया प्रत्यय का अदर्शन (लोप) वह क्रम से लुक्, श्लु और लुप् संज्ञक होता है ।

विमर्श—प्रकृत सूत्र का अर्थ करने के लिए 'अदर्शनं लोपः' (१।१।६४) से 'अदर्शनम्' की अनुवृत्ति आती है । वह अदर्शन (लोप) यदि लुक्, श्लु, लुप् द्वारा प्रत्यय का किया जाय तो उस लोप की क्रम से लुक्, श्लु और लुप् संज्ञा होती है ।

(२१२) पद—न, लुमता, अङ्गस्य । **अनुवृत्ति**—प्रत्ययलोपे, प्रत्ययलक्षणम् । **विधिसूत्र ।** (निषेध) ।

मूलार्थ—लुक्, श्लु और लुप् शब्दों द्वारा जहाँ प्रत्यय का लोप हुआ हो वहाँ (प्रत्यय लक्षण से) तन्निमित्तक अङ्ग कार्य नहीं होता । कति–२ । कतिभिः । कतिभ्यः–३ । कतीनाम् । कतिषु । युष्मद्, अस्मद् तथा षट्संज्ञक शब्द तीनों लिङ्गों में समान होते हैं । 'त्रि' शब्द नित्य बहुवचनान्त है । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः–२ ।

विमर्श—लुक्, श्लु और लुप्—तीनों 'लु' शब्द बोध्य हैं । पूर्वसूत्र 'प्रत्ययलोपे प्रत्ययलक्षणम्' की अनुवृत्ति आ रही है । अतः 'लु' शब्द द्वारा प्रत्यय का लोप होने पर प्रत्ययलक्षण द्वारा तदाश्रित अङ्ग कार्य का निषेध होता है ।

उदाहरण—(१) कति+जस् ('बहुगणवतुडति संख्या' से कति शब्द की 'संख्या' संज्ञा होने पर 'डति च' से षट् संज्ञा, 'प्रत्ययस्य लुक्०' से लुक् संज्ञा हुई, ततः 'षड्भ्यो लुक्' से जस् का लुक्) यहाँ 'प्रत्ययलोपे०' से प्रत्ययलक्षण मानकर 'जसि च' से 'गुण' प्राप्त होने पर 'न लुमताङ्गस्य' से अङ्गकार्य गुण का निषेध हो जाने से 'कति' रूप बना । (२) कति+भिस्, (स्=र्) कतिभिर्, (र्=ः)=कतिभिः । (३) कति+भ्यस्, (स्=र्) कतिभ्यर्,

बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ । **(२१३) त्रेस्त्रयः ७।१।५३ ।** आमि । त्रयाणाम् । त्रिषु । गौणत्वेऽपि–प्रियत्रयाणाम् । द्विशब्दो नित्यं द्विवचनान्तः । **(२१४) त्यदादीनामः ७।२।१०२ ।** एषामकारो विभक्तौ । *द्विपर्यन्तानामेवेष्टिः* । द्वौ–२ । द्वाभ्याम्–३ । द्वयोः–२ । द्विपर्यन्तानां किम् ? भवान् । भवन्तौ । पाति लोक-

---

संज्ञायां 'षड्भ्यो लुक्' इत्यनेन जसो लुकि, 'प्रत्ययलोपे प्रत्ययलक्षणमि'ति प्रत्ययलक्षणत्वात् 'जसि चे'ति गुणे प्राप्ते 'न लुमताङ्गस्ये'ति सूत्रेण प्रत्ययलक्षणनिषेधात् गुणाभावे 'कति' इति सिद्धम् ।

(२१३) त्रेस्त्रय इति । 'आमि सर्वनाम्नः' इत्यतः 'आमी'त्यनुवर्तते । त्रिशब्दस्य त्रयादेशः स्यादामीति भावः ।

(२१४) त्यदादीनाम इति । 'अष्टन आ विभक्तौ' इत्यतो 'विभक्तावि'त्यनुवर्तते ।

(र्=:)=कतिभ्यः । (४) कति+आम् (नुट् (न्) का आगम—'ह्रस्वनद्यापोः०') कति+नाम्, (दीर्घ—'नामि')=कतीनाम् । (५) कति+सु (सुप्), (स्=ष्—'आदेशप्रत्यययोः')=कतिषु ।

यहाँ प्रसङ्गतः यह बतलाया जा रहा है कि युष्मद्, अस्मद् तथा 'षट्संज्ञक' शब्दों के रूप तीनों लिङ्गों में समान होते हैं । त्रि शब्द बहुवचनान्त है । (१) त्रि+जस्, त्रि+अस्, ('इ' ='ए'—गुण—'जसि च') त्रे+अस्, (ए=अय् आदेश) त्रयस्, (स्=र्)—त्रयर्, (र्=:)=त्रयः । (२) त्रि+शस्—त्रि+अस्, (इ+अ='ई'—'पूर्वसवर्ण दीर्घ') त्रीस् (स्=न्—'तस्माच्छसो)=त्रीन् । (३) त्रि+भिस्, (स्=र्) त्रिभिर्, (र=:)= त्रिभिः । (४) त्रि+भ्यस् (स्=र्) त्रिभ्यर् (र्=:)=त्रिभ्यः ।

(२१३) पद—त्रेः, त्रयः । **अनुवृत्ति—**आम् । **विधिसूत्र ।**

मूलार्थ—आम् (विभक्ति) के परे रहते 'त्रि' शब्द को त्रय आदेश होता है । त्रयाणाम् । त्रिषु । 'त्रि' शब्द के गौण=अप्रधान रहने पर भी त्रय आदेश होता है । प्रियत्रयाणाम् । द्वि शब्द नित्य द्विवचनान्त है ।

विमर्श—यहाँ 'आमि सर्वनाम्नः सुट्' (७।१।५२) से निमित्तवाचक पद 'आमि' की अनुवृत्ति आ रही है ।

उदाहरण—(१) त्रि+आम्, (त्रि=त्रय) त्रय+आम् (नुट् (न) का आगम) त्रय+नाम् (दीर्घ 'नामि')–त्रयानाम्, (न्=ण्)=त्रयाणाम् । (२) त्रि+सुप् (सु), (स्=ष्) =त्रिषु ।

(गौणत्वेऽपि)—'प्रियास्त्रयो यस्य' विग्रह में 'प्रियत्रि' शब्द में 'त्रि' के गौण (अप्रधान) होने पर भी 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इस न्याय से 'प्रियत्रयाणाम्' में त्रयादेश का निषेध नहीं हुआ । क्योंकि इस न्याय की प्रवृत्ति केवल पदकार्य में ही होती है ।

'द्वि' शब्द का प्रयोग केवल द्विवचन में ही होता है ।

(२१४) पद—त्यदादीनाम्, अः । **अनुवृत्ति—**विभक्ती । **विधिसूत्र ।**

मूलार्थ—विभक्ति परे रहते त्यद् आदि को अकार अन्तादेश होता है । यह 'त्यद्' से लेकर द्विशब्दपर्यन्त 'त्यदादि' कहलाता है—यह भाष्यकार को इष्ट है । द्वौ । द्वाभ्याम् । द्वयोः । द्विप-

मिति पपीः—सूर्यः । पप्यौ । पप्यः । हे पपीः । पपीम् । पप्यौ । पपीन् । पप्या । पपीभ्याम्–३ । पपीभिः । पप्ये । पपीभ्यः–२ । पप्यः । पप्योः–२ । पप्याम् । ङौ च–पपी । पपीषु । एवं वातप्रम्यादयः । बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी । दीर्घङ्यन्तत्वाद्ध-

---

त्यद् इत्यारभ्य द्विपर्यन्तानामेव ग्रहणे भाष्यकृत इच्छेति—इष्टिः । **द्वाविति** । द्विशब्दात् प्रथमाद्विवचने 'औ' समागते 'त्यदादीनामः' इत्यकारान्तादेशे, पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति तन्निषेधे, 'वृद्धिरेची'ति वृद्धौ कृतायां 'द्वौ' इति ।

र्यन्त क्यों कहा ? भवान्, भवन्तौ । 'संसार की रक्षा करता है' इस अर्थ में पपीः (सूर्य) । पप्यौ । पप्य इत्यादि । इसी प्रकार 'वातप्रमी' आदि शब्दों के रूप बनेंगे ।

विमर्श—यहाँ 'अष्टन आ विभक्तौ' से 'विभक्तौ' पद की अनुवृत्ति आ रही है । त्यदादि शब्द सर्वादिगण के अन्तर्गत आते हैं । 'अलोऽन्त्यस्य' परिभाषा की उपस्थिति से 'अ' आदेश अन्तिम वर्ण के स्थान पर होता है । 'त्यद् से लेकर द्वि-पर्यन्त त्यदादि हैं ।' यह भाष्यकार ने स्वीकार किया है । इस प्रकार त्यदादि में—'त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक और द्वि' शब्दों का परिगणन किया जाता है ।

उदाहरण—(१) द्वि+औ, (इ='अ'—'त्यदादीनामः') द्व+औ (प्राप्त पूर्वसवर्ण दीर्घ का 'नादिचि' से निषेध, अ+औ=औ—'वृद्धिरेचि')=द्वौ । (२) द्वि+भ्याम् (इ=अ), द्व+भ्याम् (दीर्घ—'सुपि च')=द्वाभ्याम् । (३) द्वि+ओस्, (इ=अ), द्व+ओस्, (अ='ए'–'ओसि च') द्वे+ओस्, (ए=अय्) द्वयोस्, (स्=र्) द्वयोर्, (र्=:)=द्वयोः ।

प्रत्युदाहरण—द्विशब्दपर्यन्त 'त्यदादि' स्वीकार किये जाने से द्वि के अनन्तर पढ़े गये 'भवत्' शब्द के 'त्' के स्थान पर अकारान्त आदेश नहीं होता । भवान् । भवन्तौ ।

पाति लोकम् (जो संसार की रक्षा करता है) अर्थ में पपीः (सूर्य) । (१) पपी+सु (स् को रुत्व विसर्ग होकर पपीः । (२) पपी+औ (पूर्वसवर्ण दीर्घ का निषेध होकर यणादेश ई=य्)=पप्यौ । (३) पपी+जस् (अस्) यणादेश पप्यस्, (स्=र्) पप्यर्, (र्=:) =पप्यः । (४) हे पपी+सु (स्=र्, र्=:)=हे पपीः । (५) पपी+अम् (ई= अ='ई' पूर्वरूप—'अमि पूर्वः')=पपीम् । (६) पपी+औट् (औ) ई=य् 'यण्')= पप्यौ । (७) पपी+शस् (अस्) ('ई+अ=ई'—पूर्वसवर्ण दीर्घ), पपीस्, (स्=न्)= पपीन् । (८) पपी+टा (आ), यण्=पप्या । (९) पपी+भ्याम्=पपीभ्याम् । (१०) पपी+ भिस्, पपीभिस्, स्=र्, र्=:)=पपीभिः । (११) पपी+ङे (ए), यण्=पप्ये । (१२) पपी+भ्यस् (स्=र्, र्=:)=पपीभ्यः । (१३) पपी+ङसि, (अस्), इ=य् (यण्)= पप्यस्, (स=र्) पप्यर्, (र्=:)=पप्यः । (१४) पपी+ओस् (यण्) पप्योस् (स्=र्, र्=:)=पप्योः । (१५) पपी+आम् (दीर्घान्त न होने से दीर्घ नहीं हुआ, यण्)=पप्याम् । (१६) पपी+ङि (इ) (ई+इ='ई' सवर्णदीर्घ)=पपी । (१७) पपी+सुप् (सु) (स्=ष्) पपीषु । इसी प्रकार 'वातप्रमी' आदि शब्दों के रूप बनेंगे ।

बहुत श्रेष्ठ स्त्रियाँ हैं जिसकी, ऐसा पुरुष (बह्व्यः श्रेयस्यः यस्य सः—बहुव्रीहिः) इस अर्थ में 'बहुश्रेयसी' शब्द है । बहुश्रेयसी+सु (स्) (दीर्घङ्यन्त होने के कारण 'हल्ङ्याब्भ्यो०' से 'सु' का लोप=बहुश्रेयसी ।

ङ्याबिति सुलोपः । **(२१५) यू स्त्र्याख्यौ नदी १।४।३ ।** ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः । *** प्रथमलिङ्गग्रहणं च *** पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः । **(२१६) अम्बार्थनद्योर्ह्रस्वः ७।३।१०७ ।** अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्सम्बुद्धौ । हे बहुश्रेयसि । **(२१७) आण्नद्याः ७।३।११२ ।** नद्यन्तात्

---

(२१५) **यू स्त्र्याख्याविति ।** ईश्च ऊश्चेति 'यू' । 'स्त्र्याख्यौ' इत्युपस्थितस्त्रीवाचकशब्दस्य विशेष्यत्वात् तदन्तविधिः । स्त्रियमाचक्षात इति स्त्राख्यौ । तदाह—**ईदूदन्ताविति । पूर्वमिति ।** यः शब्दः पूर्वं स्त्रीलिङ्गः, पश्चादुपसर्जनत्वे लिङ्गविपर्ययेऽपि तस्य नदीत्वं वक्तव्यमित्यर्थः ।

(२१६) **अम्बार्थनद्योरिति ।** अत्र 'सम्बुद्धौ चे'त्यतः सम्बुद्धावित्यनुवर्तते । अङ्गस्ये'त्यधिकारात् तदन्तविधिः । तदाह—**अम्बार्थानामित्यादि ।**

(२१७) **आण्नद्या इति ।** 'घेर्ङिति' इत्यतो 'ङिति' इत्यनुवर्तते, 'ङिति' इति सप्तम्याः षष्ठ्या विपरिणामस्तदाह—**नद्यन्तादिति ।**

---

(२१५) पद—यू, स्त्र्याख्यौ, नदी । **संज्ञासूत्र ।**

मूलार्थ—ईकारान्त, ऊकारान्त नित्य स्त्रीलिङ्ग शब्दों की नदी संज्ञा होती है । शब्द की पूर्व (प्रथम) अवस्था का लिङ्ग ग्रहण किया जाता है अर्थात् जो शब्द पहले नित्य स्त्रीलिङ्ग हो, उपसर्जन होने से अन्य लिङ्ग हो जाने पर भी वह नदीसंज्ञक होता है ।

विमर्श—सूत्र में स्त्र्याख्यौ यू 'संज्ञी' है तथा नदी संज्ञा है । (ईश्च यूश्चेति यू–इतरेतरद्वन्द्व) 'यू' स्त्र्याख्यौ का विशेषण होने से तदन्तविधि होती है ।

(वा०) 'प्रथम०'—शब्द का नियम से लिङ्ग-परिवर्तन हो जाने पर भी पूर्वावस्था का लिङ्ग ग्रहण किया जाता है । यथा—बहुश्रेयसी शब्द में 'श्रेयसी' ङीप् प्रत्ययान्त होने पर भी समास में 'बहुश्रेयसी' शब्द पुंल्लिङ्ग है । परन्तु वार्तिककार के अनुसार 'श्रेयसी' शब्द के मौलिक लिङ्ग (स्त्रीलिङ्ग) का ग्रहण होने से नदी संज्ञा हुई ।

(२१६) पद—अम्बार्थनद्योः, ह्रस्वः । **अनुवृत्ति**—अङ्गस्य, सम्बुद्धौ । **विधिसूत्र ।**

मूलार्थ—सम्बुद्धि के परे रहने पर अम्बार्थक और नदीसंज्ञक शब्द को ह्रस्व होता है । हे बहुश्रेयसि !

विमर्श—यहाँ 'सम्बुद्धौ च' से 'सम्बुद्धौ' की अनुवृत्ति आ रही है । 'अङ्गस्य' का अधिकार है । तदनुसार—सम्बोधन के एकवचन 'सु' के परे रहते अम्बार्थक तथा नदी संज्ञा वाले शब्दों के अन्त्य वर्ण को ह्रस्व होता है । उदाहरण—हे बहुश्रेयसी+सु (स्) (नदीसंज्ञक होने से ई=इ 'ह्रस्व') हे बहुश्रेयसि+स् (स् का लोप—'एङ् ह्रस्वात्०')=हे बहुश्रेयसि !

(२१७) पद—आट्, नद्याः । **अनुवृत्ति**—अङ्गस्य, ङिति । **विधिसूत्र ।**

मूलार्थ—नद्यन्त से परे ङिद्वचनों को 'आट्' का आगम होता है ।

विमर्श—सूत्र में 'घेर्ङिति' सूत्र से 'ङिति' की अनुवृत्ति आती है । 'ङिति' पद षष्ठी विभक्ति में परिवर्तित हो जाता है । अधिकार प्राप्त अङ्गस्य का विशेषण 'नद्याः' पञ्चमी विभक्ति में होने से 'अङ्गस्य' में पञ्चमी होकर 'अङ्गात्' हो जाता है । विशेषण होने से 'नद्याः' में तदन्तविधि होती है । इस प्रकार नद्यन्त अङ्ग के अनन्तर ङित् विभक्तियों (ङे, ङसि, ङस्, ङि) को आट् (आ) का आगम होता है ।

परेषां ङिताम्भाडागमः । **(२१८) आटश्च ६।१।९० ।** आटोऽचि परे वृद्धिरेकादेशः स्यात् । बहुश्रेयस्यै । बहुश्रेयस्याः-२ । बहुश्रेयसीनाम् । **(२१९) ङेराम्नद्याम्नीभ्यः ७।३।११६ ।** नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् स्यात् । इह परत्वादाटा नुट् बाध्यते । 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' । बहुश्रेयस्याम् । शेषं पपी-

---

(२१८) आटश्चेति । 'इको यणची'त्यतः 'अचि' इति, 'वृद्धिरेचि' इत्यतो वृद्धिरिति चानुवर्तते । 'एकः पूर्वपरयोः' इत्यधिकारस्तदाह—**आटोऽचीत्यादिना ।** **बहुश्रेयस्यै इति ।** बहुश्रेयसीशब्दात् चतुर्थ्येकवचने 'ङे' विभक्तौ, अनुबन्धलोपे 'प्रथमलिङ्गग्रहणं चे'ति वार्तिकेन नदीसंज्ञायाम् 'आण्नद्याः' इति ङेराडागमेऽनुबन्धलोपे 'बहुश्रेयसी + आ + ए' इति जाते 'आटश्चे'त्यनेन वृद्धौ कृतायां 'इको यणची'त्यनेन यणि कृते 'बहुश्रेयस्यै' इति ।

(२१९) अङ्यन्तत्वादिति । ङीबन्तत्वाभावादित्यर्थः । लक्षेर्ण्यन्तात् 'लक्षेर्मुट् च' इत्युणादिसूत्रेण 'ई' प्रत्यये मुडागमे च 'लक्ष्मीः' तामतिक्रान्त इत्यर्थे 'अत्यादयः' इति समासः । अतः ङ्यन्तत्वाभावात् 'हल्ङ्याबि'ति सुलोपो न भवतीति ।

---

(२१८) पद—आटः, च । **अनुवृत्ति**—अचि, पूर्वपरयोः, वृद्धिः । **विधिसूत्र ।**

मूलार्थ—'आट्' के पश्चात् 'अच्' परे रहते पूर्व-पर के स्थान में वृद्धि रूप एकादेश होता है । बहुश्रेयस्यै ।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'इको यणचि' से 'अचि' तथा 'वृद्धिरेचि' से 'वृद्धि' की अनुवृत्ति आती है । 'एकः पूर्वपरयोः' का अधिकार है ।

उदाहरण—(१) बहुश्रेयसी + ङे (ए), ('ए' से पूर्व 'आट्' (आ) का आगम-'आण्नद्याः') बहुश्रेयसी + आ + ए (आ + ए = 'ऐ'—'आटश्च' से वृद्धि) बहुश्रेयसी + ऐ (ई = य्—'यण्') = बहुश्रेयस्यै । (२) बहुश्रेयसी + ङसि (अस्) (आट् (आ) का आगम) बहुश्रेयसी + आ + अस्, (आ + अ = 'आ'—वृद्धि) बहुश्रेयसी + आस्, (यण्)—बहुश्रेयस्यास् (स् = र्, र् = :) = बहुश्रेयस्याः । (३) बहुश्रेयसी + आम्, (नुट् (न्) का आगम—'ह्रस्वनद्यापो नुट्') = बहुश्रेयसीनाम् ।

(२१९) पद—ङेः, आम्, नद्याम्नीभ्यः । **अनुवृत्ति**—अङ्गस्य । **विधिसूत्र ।**

मूलार्थ—नद्यन्त, आबन्त और नी शब्द से परे 'ङि' के स्थान पर 'आम्' आदेश होता है । यहाँ 'आट्' का आगम पर होने के कारण नुट् का बाधक है । बहुश्रेयस्याम् । शेष रूप पपी शब्द के समान बनेंगे । अङ्यन्त होने से 'सु' का लोप नहीं हुआ—अतिलक्ष्मीः । शेष रूप बहुश्रेयसी की तरह होंगे । प्रधीः ।

विमर्श—'अङ्गस्य' का अधिकार है । अतः तदन्तविधि होती है । प्रत्यय में तदन्तविधि होने से 'आबन्त' होता है ।

इस प्रकार नद्यन्त, आप्प्रत्ययान्त तथा नीशब्द के पश्चाद्वर्ती 'ङि' को आम् आदेश होता है ।

उदाहरण—बहुश्रेयसी + ङि (ङि = आम्—'ङेराम्नद्याम्नीभ्यः') बहुश्रेयसी + आम्, (आट् का आगम—'आण्नद्याः') बहुश्रेयसी + आ + आम् (आ + आ = 'आ'—वृद्धिः) बहुश्रेयसी आम्, (ई = य्—'यण्') = बहुश्रेयस्याम् । शेष रूप 'पपी' शब्द की तरह बनेंगे ।

वत्। अङ्यन्तत्वान्न सुलोपः। अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। प्रधीः। (२२०) **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६।४।७७।** श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्येतस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे। इति प्राप्ते। (२२१) **एरनेकाचोऽसंयोगपूर्वस्य ६।४।८२।** धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे। प्रध्यौ। प्रध्यः।

---

(२२०) **अचि श्नु इति**। इश्च उश्च यू, तयोः य्वोरिवर्णोवर्णयोरित्यर्थः। श्नुश्च धातुश्च भ्रूश्चेति द्वन्द्वः, तेषाम्। प्रत्ययग्रहणपरिभाषया चात्र श्नुप्रत्ययान्तं गृह्यते। अङ्गस्येत्यधिकृतम्। अचीति तद्विशेषणम्। तदाह—**श्नुप्रत्ययान्तस्येत्यादि**।

(२२१) **एरनेकाच इति**। अत्र 'इणो यण्' इत्यतः यण् इत्यनुवर्तते। 'एः' इति षष्ठ्यन्तं पदम्, इवर्णस्येत्यर्थः। 'अचि श्नुधातुभ्रुवामि'त्यतः धातुमात्रमनुवर्तते, 'अचि' इति च। अङ्गस्येत्यधिकृतम्। ततश्च 'प्रत्यये परतः' इत्यर्थो लभ्यते। अचीति तद्विशेषणम्। तदादिविधिः। तदाह—**धात्ववयवेत्यादिना**। **प्रध्यौ इति**। प्रधीशब्दात्

'बहुश्रेयसी' शब्द के रूप (पुंल्लिङ्ग)

	एक०	द्वि०	बहु०		एक०	द्वि०	बहु०
प्र०–	बहुश्रेयसी	बहुश्रेयस्यौ	बहुश्रेयस्यः	पं०–	बहुश्रेयस्याः	बहुश्रेयसीभ्याम्	बहुश्रेयसीभ्यः
द्वि०–	बहुश्रेयसीम्	बहुश्रेयस्यौ	बहुश्रेयसीन्	ष०–	बहुश्रेयस्याः	बहुश्रेयस्योः	बहुश्रेयसीनाम्
तृ०–	बहुश्रेयस्या	बहुश्रेयसीभ्याम्	बहुश्रेयसीभिः	स०–	बहुश्रेयस्याम्	बहुश्रेयस्योः	बहुश्रेयसीषु
च०–	बहुश्रेयस्यै	बहुश्रेयसीभ्याम्	बहुश्रेयसीभ्यः	सं०–	हे बहुश्रेयसि !	हे बहुश्रेयस्यौ !	हे बहुश्रेयस्यः

अतिलक्ष्मी+सु (यहाँ 'लक्ष्मी' शब्द ङ्यन्त नहीं है। अतः 'सु' का लोप नहीं होता।) अतिलक्ष्मी+स् (स्=र्, र्=:)=अतिलक्ष्मीः। अवशिष्ट रूप बहुश्रेयसी शब्द के समान बनते हैं। प्रधी+सु ('स्' को रुत्व-विसर्ग होकर)=प्रधीः।

(२२०) पद—अचि, श्नुधातुभ्रुवां, य्वोः, इयङुवङौ। **अनुवृत्ति**—अङ्गस्य। **विधिसूत्र**।

मूलार्थ—श्नुप्रत्ययान्त तथा इवर्णान्त, उवर्णान्त धातु को और भ्रू शब्द के अङ्ग को इयङ्, उवङ् आदेश होता है, अजादि प्रत्यय के परे रहते। ङकार इत्संज्ञक होने से यह आदेश अन्तिम वर्ण के स्थान पर होगा।

विमर्श—सूत्रस्थ 'श्नुधातुभ्रुवाम्' पद में इतरेतर द्वन्द्व समास है (श्नुश्च, धातुश्च भ्रूश्च, तेषाम्)। 'य्वोः' पद में भी द्वन्द्व है—इश्च उश्च यू, तयोः। 'प्रत्ययग्रहणे तदन्ता ग्राह्याः' परिभाषा के अनुसार श्नुपद से श्नुप्रत्ययान्त का ग्रहण होता है। 'य्वोः' धातु का विशेषण है। 'अङ्गस्य' का अधिकार है। तदनुसार—श्नुप्रत्ययान्त, इवर्णान्त और उवर्णान्त धातु को तथा भ्रू रूप अंग को इयङ् और उवङ् आदेश होते हैं। स्थानकृत सादृश्य को मानकर यहाँ इ=इयङ् तथा उ=उवङ् आदेश होंगे।

(२२१) पद—एः, अनेकाचः, असंयोगपूर्वस्य। **अनुवृत्ति**—यण्, अचि, धातोः। **विधिसूत्र**।

मूलार्थ—धातु के अवयवों का संयोग पूर्व में न हो, ऐसा जो इवर्ण तदन्त जो धातु, तदन्त जो अनेकाच् अङ्ग, उसको अजादि प्रत्यय परे रहते यण् आदेश होता है।

प्रध्यम् । प्रध्यौ । प्रध्यः । प्रध्यि । शेषं पपीवत् । एवं ग्रामणीः । ङौ तु—ग्रामण्याम् । (२२२) गतिश्च १।४।६० । प्रादयः क्रियायोगे गतिसंज्ञाः स्युः । * गतिकारकेतरपूर्वपदस्य यण् नेष्यते * शुद्धधियौ । शुद्धधियः । (२२३) न भूसुधियोः ६।४।८५ ।

'औ' विभक्तौ 'प्रधी+औ' इति जाते प्राप्तस्य पूर्वसवर्णदीर्घस्य 'दीर्घाज्जसि चे'त्यनेन निषेधे, 'इको यणची'ति यणि प्राप्ते तं प्रबाध्य 'अचि श्नुधातुभ्रुवामि'त्यादिना इयङादेशे प्राप्ते तं बाधित्वा 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणि कृते 'प्रध्यौ' इति रूपम् ।

(२२२) **गतिकारकेति ।** गतिकारकाभ्यामितरद्भिन्नं पूर्वपदं यस्य तस्याङ्गस्य यण् न भवतीत्यर्थः ।

(२२३) **न भूसुधियोरिति ।** 'इको इणची'त्यतो 'यणि'ति, 'अची'ति चानुवर्तते

विमर्श—यहाँ 'इणो यण्' (६।४।८१) से आदेशवाचक 'यण्' पद की अनुवृत्ति आ रही है । 'अचि श्नु०' (२२०) से 'अचि' तथा 'धातोः' की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । 'धातोः' पद की आवृत्ति की जाती है । धातोः 'अङ्गस्य' तथा 'संयोग' का विशेषण है । इवर्ण धातु का विशेषण है, अतः तदन्तविधि होती है । तदनुसार—अजादि प्रत्ययों के परे रहने पर धातु का अवयव संयुक्त वर्ण पूर्व में न रहने पर जो इवर्णान्त धातु, तदन्त अनेकाच् अङ्ग के स्थान पर 'यण्' आदेश होता है ।

उदाहरण—(१) प्रधी+औ (पूवसवर्ण दीर्घ का 'दीर्घाज्जसि च' से निषेध होने पर 'इको यणचि' से यण् की प्राप्ति, उसका बाधकर 'अचि श्नु०' से इयङ् आदेश प्राप्त है । उसको बाधकर 'एरनेकाचो०' से ई=य्—'यण्')=प्रध्यौ । (२) प्रधी+जस् (अस्) (ई=य्—यण्) प्रध्यस् (स्=र्, र्=ः)=प्रध्यः । (३) प्रधी+अम् (यण्)=प्रध्यम् । (४) प्रधी+औट् (औ) यण्=प्रध्यौ । (५) प्रधी+शस् (अस्), (यण्)—प्रध्यस् (स्=र्, र्=ः)= प्रध्यः । (६) प्रधी+ङि (इ) यण्=प्रध्यि । शेष रूप पपी शब्द के समान बनेंगे । इसी तरह 'ग्रामणीः' शब्द के रूप बनते हैं । 'ङि' विभक्ति में 'ग्रामण्याम्' रूप बनेगा । ग्रामणी+ङि (ङि=आम्), ग्रामणी+आम् (यण्)=ग्रामण्याम् ।

(२२२) पद—गतिः, च । **अनुवृत्ति**—प्रादयः, क्रियायोगे । **संज्ञासूत्र ।**

मूलार्थ—प्रादि (प्र, परा, आदि उपसर्गों) की क्रिया के योग में गतिसंज्ञा होती है । (वार्तिक) गति एवम् कारक से इतर (भिन्न) अन्य शब्द पूर्व में रहने पर यण् नहीं होता । शुद्धधियौ । शुद्धधियः ।

विमर्श—यहाँ 'प्रादयः' (१।४।५८) सूत्र तथा 'उपसर्गाः क्रियायोगे' (१।४।५९) से 'क्रियायोगे' की अनुवृत्ति आ रही है । तदनुसार प्र आदि की क्रिया के योग में (उपसर्ग संज्ञा के अतिरिक्त) गति संज्ञा भी होती है ।

(वा०) 'गतिसंज्ञक एवं कारक से भिन्न शब्द पूर्वपद में रहने पर इवर्णान्त धातु को यण् नहीं होता ।'

उदाहरण—(१) शुद्धधी+औ (यहाँ 'धी' के पूर्व 'शुद्ध' शब्द के गतिसंज्ञक एवं कारक न होने से 'यण्' नहीं हुआ) ई=इयङ्, शुद्धधिय् औ=शुद्धधियौ । (२) शुद्धधी+जस् (यण् न होने से ई=इयङ्=इय्) शुद्धधिय्+अस् (स्=र्, र् =ः)=शुद्धधियः ।

(२२३) पद—न भूसुधियोः । **अनुवृत्ति**—यण्, अचि, सुपि । **विधिसूत्र** (निषेध) ।

एतयोरचि सुपि यण्न । सुधीः । सुधियौ । सुधियः—इत्यादि । सुखमिच्छतीति सुखीः । सुतीः । सुख्युः-२ । सुत्युः-२ । शेषं प्रधीवत् । शम्भुर्हरिवत् । एवं भान्वादयः । (२२४) तृज्वत्क्रोष्टुः ७।१।९५ । असम्बुद्धौ सर्वनामस्थाने 'क्रोष्टु' इत्यस्य स्थाने 'क्रोष्टृ' प्रयोक्तव्यमित्यर्थः । (२२५) ऋतो ङिसर्वनामस्थानयोः ७।३।११० ।

'ओः सुपी'त्यतः 'सुपी'ति चानुवर्तते । तदाह—**एतयोरित्यादि** । 'इको यणची'त्यनेन प्राप्तं यणादेशं प्रबाध्य 'अचि श्नु॰' इति इयङुवङौ प्राप्तौ, तौ बाधित्वा 'एरनेकाचो॰' 'ओः सुपि' इति सूत्राभ्यां यणादेशः प्राप्तस्तस्यानेन सूत्रेण निषेधः ।

(२२४) **तृज्वत्क्रोष्टुरिति** । अत्र 'इतोऽत्सर्वनामस्थाने' इत्यतः 'सर्वनामस्थाने' इति, 'सख्युरसम्बुद्धौ' इत्यतः 'असम्बुद्धौ' इति चानुवर्तते । एवमङ्गसंज्ञकः क्रोष्टुशब्दस्तृज्वन्तवद्रूपं लभते असम्बुद्धौ सर्वनामस्थाने परे इत्यर्थः । रूपातिदेशोऽयम् ।

मूलार्थ—अजादि सुप् प्रत्यय परे रहने पर भू और सुधी शब्द को यण् नहीं होता । सुधी। सुधियौ । सुधियः—इत्यादि ।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'अचि श्नु॰' (२२०) से 'अचि' 'इणो यण्' (६।४।८१) से 'यण्' तथा 'ओः सुपि' से 'सुपि' पद की अनुवृत्ति आ रही है । तदनुसार अजादि सुप् विभक्तियों के पश्चाद्वर्ती रहने पर भू और सुधी शब्दों के अन्तिम वर्ण के स्थान में यणादेश नहीं होता ।

उदाहरण—(१) सुधी+सु (स्=र्, र्=ः)=सुधीः । (२) सुधी+औ ('गतिश्च' से गति संज्ञा होकर, 'एरनेकाचो॰' से इ=य् 'यण्' की प्राप्ति, 'न भूसुधियोः' से निषेध होने पर 'अचि श्नु॰' से ई=इयङ्)=सुधियौ । (३) सुधी+जस् (अस्) (पूर्ववत् यण् का निषेध होने पर इयङ्)—सुधियस् (स्=र्, र्=ः)=सुधियः । सुष्ठु ध्यायतीति अथवा शोभना धीर्यस्येति सुधीशब्दः । (अच्छी बुद्धि है जिसकी, ऐसा पुरुष) ।

'सुधी' शब्द के रूप (पुंल्लिङ्ग)

एक॰	द्वि॰	बहु॰	एक॰	द्वि॰	बहु॰
प्र॰—सुधीः	सुधियौ	सुधियः	पं॰—सुधियः	सुधीभ्याम्	सुधीभ्यः
द्वि॰—सुधियम्	सुधियौ	सुधियः	ष॰—सुधियः	सुधियोः	सुधियाम्
तृ॰—सुधिया	सुधीभ्याम्	सुधीभिः	स॰—सुधियि	सुधियोः	सुधीषु
च॰—सुधिये	सुधीभ्याम्	सुधीभ्यः	सं॰—हे सुधीः	हे सुधियौ	हे सुधियः

'सुख का इच्छुक' इस अर्थ में सुखी शब्द है । प्रथमा एकवचन में—सुखीः । इसी प्रकार पुत्र का इच्छुक अर्थ में 'सुती' शब्द है । प्रथमा एकवचन सुती+सु (स्)—(स्=र्, र्=ः)= सुतीः । सुखी+ङसि तथा सुती+ङसि में 'सुख्युः' और 'सुत्युः' रूप बनते हैं । अविशिष्ट रूप प्रधी शब्द की तरह बनेंगे । शम्भु शब्द के रूप हरि शब्द के समान चलते हैं । इसी प्रकार भानु आदि शब्दों के रूप भी होंगे ।

(२२४) पद—तृज्वत्, क्रोष्टुः । **अनुवृत्ति**—सर्वनामस्थाने, असम्बुद्धौ । **अतिदेशसूत्र** ।

मूलार्थ—सम्बुद्धि-भिन्न सर्वनामस्थान परे रहते क्रोष्टु शब्द को तृज्वद्भाव होता है । अर्थात् 'क्रोष्टु' शब्द के स्थान में 'क्रोष्टृ' शब्द का प्रयोग होता है ।

ऋतोऽङ्गस्य गुणः स्यान्ङौ, सर्वनामस्थाने च । इति प्राप्ते । (२२६) ऋदुशनस्पुरुदंसोऽनेहसां च ७।१।९४ । ऋदन्तानामुशनसादीनां चाऽनङ् स्यादसम्बुद्धौ सौ । (२२७) अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ६।४।११ । अबादीनामुपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टा-

---

(२२५) **ऋतो ङीति ।** 'ह्रस्वस्य गुणः' इत्यतः गुण इत्यनुवर्तते । अङ्गस्येत्यधिकृतम्, ऋत इत्यनेन विशेष्यते । तदन्तविधिस्तदाह—'**ङौ इत्यादिना ।**

(२२६) **ऋदुशनस् इति ।** 'सख्युरसम्बुद्धावि'त्यतः 'असम्बुद्धौ' इति, 'अनङ् सौ' इत्यतो'ऽनङि'ति चानुवर्तते । अङ्गस्येत्यधिकृतम् ऋदादिभिर्विशेष्यते । तदन्तविधिः । तदाह—**ऋदन्तानामित्यादि ।**

(२२७) अत्र 'नोपधायाः' इत्यत उपधाया इति 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति सूत्रञ्चानुवर्तते । **क्रोष्टा इति ।** क्रोष्टुशब्दात्सौ 'तृज्वत्क्रोष्टुरि'ति सूत्रेण तृज्वद्-

---

विमर्श—यहाँ 'इतोऽत्सर्वनामस्थाने' (७।१।८६) से 'सर्वनामस्थाने' तथा 'सख्युरसम्बुद्धौ' (७।१।९२) से 'असम्बुद्धौ' की अनुवृत्ति आ रही है। तदनुसार सम्बुद्धि-भिन्न (सम्बोधन में प्रथमा एकवचन 'सु' को छोड़कर) सर्वनामस्थान (सु, औ, जस्, अम्, औट्) के पश्चाद्वर्ती रहने पर क्रोष्टु शब्द के स्थान में 'क्रोष्टृ' आदेश होता है।

सात प्रकार के अतिदेश सूत्र माने गये हैं। उनमें यह रूपातिदेश का उदाहरण है। क्रोष्टु+सु (क्रोष्टु=क्रोष्टृ), क्रोष्टृ+स् स्थिति हो जायेगी।

(२२५) पद—ऋतः, ङि, सर्वनामस्थानयोः । **अनुवृत्ति**—अङ्गस्य, गुणः । **विधिसूत्र ।**

मूलार्थ—ङि और सर्वनामस्थानसंज्ञक विभक्ति के परे रहते ऋकारान्त अङ्ग को गुण होता है। इस सूत्र से गुण प्राप्त है।

विमर्श—प्रकृत सूत्र में 'हस्वस्य गुणः' से 'गुणः' पद की अनुवृत्ति आती है। 'ऋतः' पद अधिकार-प्राप्त 'अङ्गस्य' का विशेषण है। 'अलोऽन्त्यस्य' परिभाषा के द्वारा अङ्ग के अन्तिम वर्ण के स्थान पर 'गुण' आदेश होगा।

(२२६) पद—ऋदुशनस्पुरुदंसोऽनेहसां च । **अनुवृत्ति**—अङ्गस्य, अनङ् सौ, असम्बुद्धौ । **विधिसूत्र ।**

मूलार्थ—ऋदन्त शब्द, उशनस्, पुरुदंशस् और अनेहस् शब्दों के अन्तिम वर्ण को अनङ् आदेश होता है, सम्बुद्धि-भिन्न 'सु' के परे रहते ।

विमर्श—यहाँ 'अनङ् सौ' (७।१।९३) सम्पूर्ण सूत्र तथा 'सख्युरसम्बुद्धौ' से 'असम्बुद्धौ' की अनुवृत्ति आ रही है। 'अनङ्' आदेश ङकार-इत्संज्ञक होने से अन्तिम वर्ण ऋ आदि के स्थान पर होता है। क्रोष्टृ+स् (ऋ=अनङ् (अन्)—'क्रोष्ट्+अन्+स्' यह स्थिति बनी।

(२२७) पद—अप्तृन्तृच्…प्रशास्तॄणाम् । **अनुवृत्ति**—उपधायाः, दीर्घः, सर्वनामस्थाने, असम्बुद्धौ । **विधिसूत्र ।**

मूलार्थ—अप् शब्द, तृन्, तृच् प्रत्ययान्त तथा स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ शब्दों की उपधा को सम्बुद्धि-भिन्न सर्वनामस्थान के परे रहते दीर्घ होता है। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टारम्—इत्यादि।

रम्। क्रोष्टारौ। क्रोष्टून्। (२२८) **विभाषा तृतीयादिष्वचि ७।१।९७**। तृतीयादिष्वजादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा, क्रोष्टुना। क्रोष्ट्रे, क्रोष्टवे। (२२९) ऋत

भावेन क्रोष्टुशब्दस्य क्रोष्टृभावे जाते 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे प्राप्ते तं प्रबाध्य 'ऋदुशनस्०' इत्यादिसूत्रेण ऋकारस्य स्थानेऽनङादेशेऽनुबन्धलोपे क्रोष्टन् + स् इति जाते 'अप्तृन्तृच्०' इत्यनेनोपधादीर्घे 'हल्ङ्याब्भ्यो दीर्घात्०' इति सुलोपे 'नलोपः प्रातिपदिकान्तस्ये'ति नलोपे कृते 'क्रोष्टा' इति।

(२२८) **विभाषेति**। अत्र 'तृज्वत्क्रोष्टुरि'ति सूत्रमनुवर्तते। अचीति तृतीयादिविभक्तिविशेषणम् 'यस्मिन्विधौ' इति तदादिविधिस्तदाह—**तृतीयादिष्वित्यादि**। **'क्रोष्ट्रा–क्रोष्टुना'** इति। क्रोष्टुशब्दात् टा विभक्तौ, अनुबन्धलोपे 'क्रोष्टु + आ' इत्यत्र 'विभाषा तृतीयादिष्वचि' इति विकल्पेन तृज्वद्भावे, यणि कृते 'क्रोष्ट्रा' इति। तृज्वद्भावाभावे तु 'शेषो घ्यसखि' इति घिसंज्ञायाम् 'आङो नाऽस्त्रियाम्' इत्यनेन 'टा' इत्यस्य स्थाने नादेशे कृते 'क्रोष्टुना' इति रूपम्।

विमर्श—यहाँ 'नोपधायाः' (६।४।७) से स्थानिवाचक 'उपधायाः' पद तथा 'ढ्लोपे पूर्वस्य दीर्घोऽणः' (६।३।१११) से आदेशवाचक 'दीर्घः' पद की अनुवृत्ति आती है। 'सर्वनामस्थाने चासम्बुद्धौ' से निमित्तवाचक 'सर्वनामस्थाने, असम्बुद्धौ' की अनुवृत्ति आती है। तदनुसार सम्बुद्धि-भिन्न सर्वनामस्थान के परवर्ती होने की दशा में—अप् (जल) शब्द, तृन्, तृच्-प्रत्ययान्त शब्द, स्वसृ (बहन), नप्तृ (नाती), नेष्टृ (दान देने वाला), त्वष्टृ (बढ़ई), क्षत्तृ (द्वारपाल), होतृ (हवन-कर्ता), पोतृ (पवित्र करनेवाला) और प्रशास्तृ (शासक) शब्दों की उपधा को दीर्घ आदेश होता है।

उदाहरण—(१) क्रोष्टन्+स् (उपधा 'अ'='आ'—दीर्घ), क्रोष्टान्+स् (स् का लोप—'हल्ङ्याब्भ्यः'), क्रोष्टान् ('न्' का लोप—'नलोपः प्राति०')=क्रोष्टा। (२) क्रोष्टु+औ (तृज्वद्भाव), क्रोष्टृ+औ, (ऋ=गुण रपर्—'अर्'—'ऋतो ङि-सर्वनामस्थानयोः') क्रोष्टर्+औ (उपधादीर्घ—'अप्तृन्तृच्०')=क्रोष्टारौ। (३) क्रोष्टु+अस् (जस्), (क्रोष्टु=क्रोष्टृ—तृज्वद्भाव)—क्रोष्टृ+अस्, (गुण, रपर्) क्रोष्टर्+अस् (स्=र्, र्=:)=क्रोष्टारः। (४) क्रोष्टु+अम्, (तृज्वद्भाव) क्रोष्टृ+अम्, (गुण—'अर्') क्रोष्टर्+अम् (उपधादीर्घ) =क्रोष्टारम्। (५) क्रोष्टु+औ (औट्) (तृज्वद्भाव)—क्रोष्टृ+औ (गुण—अर्, उपधादीर्घ)=क्रोष्टारौ। (६) क्रोष्टु+शस् (अस्), (पूर्वसवर्णदीर्घ) क्रोष्टूस् (स्=न्—'तस्माच्छसो०')=क्रोष्टून्।

(२२८) पद—विभाषा, तृतीयादिषु, अचि। **अनुवृत्ति**—तृज्वत् क्रोष्टुः। अतिदेशसूत्र।

मूलार्थ—अजादि तृतीयादि (टा, ङे, ङसि, ङस्, ओस्, आम्, ङि) विभक्ति परे रहते 'क्रोष्टु' शब्द को विकल्प से तृज्वद्भाव होता है।

विमर्श—'तृज्वत्क्रोष्टुः' (२२४) सम्पूर्ण सूत्र की अनुवृत्ति आ रही है। सूत्रस्थ 'अचि' पद 'तृतीयादिषु' का विशेषण होने से 'यस्मिन्विधिस्तदादावल्ग्रहणे' परिभाषा द्वारा तदादिविधि होती है।

उदाहरण—(१) क्रोष्टु+टा (आ), (क्रोष्टु='क्रोष्टृ' विकल्प से–'विभाषा तृतीयादिष्वचि')

उत् ६।१।१११। ऋतो ङसिङसोरति परे पूर्वपरयोरुदेकादेशः स्यात्। रपरः। (२३०) रात्सस्य ८।२।२४। रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। रस्य विसर्गः। क्रोष्टुः–२। क्रोष्टोः–२। क्रोष्ट्रोः–क्रोष्ट्वोः। * नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन *। क्रोष्टूनाम्। क्रोष्टरि। पक्षे हलादौ च शम्भुवत्। हूहूः। हूह्वौ।

---

(२२९) **ऋत उदिति।** अत्र 'एङः पदान्तादति' इत्यतोऽतीति, 'ङसिङसोश्च' इत्यतो 'ङसिङसोरि'ति चानुवर्तते। ङसिङसोरित्यवयवषष्ठ्यन्तं विशेषणतया 'अती'-त्यत्रान्वेति। अङ्गस्येत्यधिकृतम्।

(२३०) 'संयोगान्तस्य लोपः' इत्यनेनैव सस्य लोपे सिद्धे नियमार्थमिदं सूत्रम्। तदाह—**रेफात्परस्येति।** 'संयोगान्तस्थ लोपः' इत्यनुवर्तते। **नुमचिरेति** नुम्, 'अचि र ऋतः' तृज्वद्भावश्च—एतान् बाधित्वा पूर्वविप्रतिषेधेन नुडागमो भवती-

---

—क्रोष्टृ+आ (ऋ=र्—'यण्')=क्रोष्ट्रा। तृज्वद्भाव के न होने पर पक्ष में क्रोष्टु+आ (घिसंज्ञा होने से टा='ना'—'आङो नाऽस्त्रियाम्' से)=क्रोष्टुना। (२) क्रोष्टु+ङे (ए), (क्रोष्टु=क्रोष्टृ विकल्प से)—क्रोष्टृ+ए (ऋ=र्—'यण्')=क्रोष्ट्रे। पक्ष में क्रोष्टु+ए, (उ=ए गुण—'घेर्ङिति') क्रोष्टो+ए (ओ=अव् आदेश)=क्रोष्टवे।

(२२९) पद—ऋत उत्। **अनुवृत्ति**—अङ्गस्य, ङसिङसोः, अति। **विधिसूत्र।**

मूलार्थ—ह्रस्व ऋकारान्त अङ्ग से ङसि, ङस् सम्बन्धी अकार परे रहते पूर्व-पर (ऋ+अ) के स्थान में उकार आदेश होता है। रपर् होकर 'उर्' हो जाता है।

विमर्श—अधिकार से प्राप्त 'अङ्गस्य' का सूत्रस्थ 'ऋतः' पद विशेषण है। 'ऋतः' पद पञ्चम्यन्त है। अतः 'अङ्गस्य' भी पञ्चमी विभक्ति में परिवर्तित हो जाता है। तदन्तविधि होकर 'ऋकारान्त अङ्ग' अर्थ हो जाता है। 'एङः पदान्तादति' सूत्र से 'अति' तथा 'ङसिङसोश्च' से 'ङसिङसोः' की अनुवृत्ति आ रही है। 'एकः पूर्वपरयोः' का अधिकार है। अतः ऋकारान्त अङ्ग के पश्चात् ङसि, ङस् सम्बन्धी 'अ' परे रहते पूर्व-पर के स्थान में 'उ' (ऋ+अ=उर्) आदेश हो जाता है।

उदाहरण—क्रोष्टु+अस् (ङसि), ('क्रोष्टु'='क्रोष्टृ' विकल्प से—'विभाषा०') क्रोष्टृ+अस् (ऋ+अ='उ'—'ऋत उत्' रपर्)—'क्रोष्टुर् स्' इस दशा में 'संयोगान्तस्य लोपः' से अन्तिम वर्ण 'स्' के लोप की प्राप्ति होती है।

(२३०) पद—रात्, सस्य। **अनुवृत्ति**—संयोगान्तस्य लोपः। **नियमसूत्र।**

मूलार्थ—रेफ से परे संयोगान्त लोप केवल सकार का ही होता है; अन्य का नहीं। रेफ का विसर्ग होकर क्रोष्टुः–२। क्रोष्टोः–२। (वा०) नुम्, अच् परे रहते र्—आदेश तथा तृज्वद्भाव की अपेक्षा पूर्वविप्रतिषेध से नुट् का आगम ही होता है। क्रोष्टूनाम्। क्रोष्टरि। पक्ष में तथा हलादि विभक्तियों में शम्भु शब्द के समान रूप बनते हैं। हूहूः। 'अतिचमू' शब्द में नदीसंज्ञा-प्रयुक्त कार्य होते हैं। हे अतिचमु इत्यादि। खलपूः।

विमर्श—प्रकृत सूत्र में सम्पूर्ण 'संयोगान्तस्य लोपः' (८।२।२३) सूत्र की अनुवृत्ति आती है। तदनुसार 'र्' से परे संयोगान्त सकार का ही लोप होता है; अन्य वर्ण का नहीं। 'संयोगान्तस्य लोपः' से प्राप्त स् के लोप का इस सूत्र द्वारा नियमन किया गया है।

उदाहरण—(१) क्रोष्टुर्+स् (इस स्थिति में 'रात्सस्य' से 'स्' का लोप होने पर)–क्रोष्टुर्

हूहूम्। हूहून्। इत्यादि। अतिचमू शब्दे तु नदीकार्यं विशेषः। हे अतिचमु। अतिचम्वै। अतिचम्वाः-२। अतिचमूनाम्। अतिचम्वाम्। खलपूः। **(२३१) ओः सुपि**

त्यर्थः। **क्रोष्टूनामिति।** 'क्रोष्टु + आम्' इत्यत्र तृज्वद्भावं बाधित्वा नुटि कृते 'नामि' इति दीर्घे 'क्रोष्टूनामि'ति रूपम्।

(र्=:)=क्रोष्टुः। तृज्वद्भाव के अभाव पक्ष में—क्रोष्टु+अस् (गुण—'घेर्ङिति')-क्रोष्टो+अस्, (ओ+अ='ओ'—पूर्वरूप—'ङसिङसोश्च') क्रोष्टोस् (स=र्, र्=:)=क्रोष्टोः। (२) क्रोष्टु+ओस् (तृज्वद्भाव विकल्प से) क्रोष्टृ+ओस् (ऋ=र् 'यण्')=क्रोष्टोस् (स्=र्, र्= :)—क्रोष्ट्रोः। पक्ष में क्रोष्टु+ओस् (उ=व्—'यण्'), क्रोष्ट्वोस् (स्=र्, र्=:)=क्रोष्ट्वोः।

(वा०) नुम्, अच्-परक 'र' आदेश तथा तृज्वद्भाव की अपेक्षा पूर्वविप्रतिषेध से पहले 'आम्' को नुट् का आगम होता है।

उदाहरण—(३) क्रोष्टु+आम् ('विभाषा०' से तृज्वद्भाव की प्राप्ति, 'नुमचिर०' वार्तिक के नियम द्वारा 'ह्रस्वनद्यापो नुट्' से नुट् का आगम)—क्रोष्टु+नाम् (उ=ऊ—दीर्घ—'नामि') =क्रोष्टूनाम्। (४) क्रोष्टु+ङि (इ), (तृज्वद्भाव—विकल्प से) क्रोष्टृ+इ, (ऋ=अर् 'ऋतो ङि०')=क्रोष्टरि। पक्ष में—क्रोष्टु+ङि (इ) (घिसंज्ञा होकर 'अच्च घेः' से ङि=औ, उ=अ) —क्रोष्ट+औ (अ+औ=औ 'वृद्धि')=क्रोष्टौ। तृज्वद्भाव के अभाव पक्ष में और हलादि विभक्तियों में शम्भु शब्द के समान रूप बनेंगे।

क्रोष्टु (गीदड़, शृगाल) शब्द के रूप (पुंल्लिङ्ग)

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०—क्रोष्टा	क्रोष्टारौ	क्रोष्टारः	पं०—क्रोष्टुः, क्रोष्टोः	क्रोष्टुभ्याम्	क्रोष्टुभ्यः
द्वि—क्रोष्टारम्	क्रोष्टारौ	क्रोष्टून्	ष०—क्रोष्टुः, क्रोष्टोः	क्रोष्ट्रोः, क्रोष्ट्वोः	क्रोष्टूनाम्
तृ०—क्रोष्ट्रा, क्रोष्टुना	क्रोष्टुभ्याम्	क्रोष्टुभिः	स०—क्रोष्टरि, क्रोष्टौ	क्रोष्ट्रोः, क्रोष्ट्वोः	क्रोष्टुषु
च०—क्रोष्ट्रे, क्रोष्टवे	क्रोष्टुभ्याम्	क्रोष्टुभ्यः	सं०—हे क्रोष्टो	हे क्रोष्टारौ	हे क्रोष्टारः

(१) दीर्घ उकारान्त हूहू शब्द से प्रथमा एक व० 'सु' आने पर हूहू+सु (स् को रुत्व-विसर्ग)=हूहूः। (२) हूहू+औ (उ=व् 'यण्')=हूह्वौ। (३) हूहू+अम् (अ+अ=ऊ—'पूर्वरूप')=हूहूम्। (४) हूहू+शस् (अस्) (ऊ+अ='ऊ' पूर्वसवर्ण दीर्घ) हूहूस् (स=न्)=हूहून्। इत्यादि।

'अतिचमू'शब्द में समास होने से पूर्व दशा में 'चमू' नित्य स्त्रीलिंग है। अतः 'प्रथमलिङ्ग-ग्रहणं च' के अनुसार नदीसंज्ञा होकर तत्प्रयुक्त कार्य भी होते हैं। (१) हे अतिचमू+सु (ऊ =उ—'ह्रस्व'—'अम्बार्थनद्योर्ह्रस्वः') अतिचमु+स् (स् का लोप—'एंङ्ह्रस्वात्०')=हे अतिचमु! (२) अतिचमू+ङे (ए), (आट् का आगम) अतिचमू+आ+ए, (आ+ए='ऐ'—'आटश्च' से वृद्धि)—अतिचमू+ऐ (ऊ=व्—'यण्')=अतिचम्वै। (३) अतिचमू+ङसि (अस्)—(आट् (आ) का आगम), अतिचमू+आ+अस् (अ+आ='आ'—'वृद्धि') अतिचमू+आस् (यण्)—अतिचम्वास् (स्=र्, र्= :)=अतिचम्वाः। (४) अतिचमू+आम् (नुट् (न) का आगम) अतिचमू+नाम् (ऊ=ऊ 'दीर्घ')=अतिचमूनाम्। (५) अतिचमू+ङि, (ङि=आम्) अतिचमू+आम् (ऊ=व्—'यण्)=अतिचम्वाम्। शेष रूप 'हूहू' शब्द के समान बनते हैं। खलपू+सु (स्), (स्=र्) खलपूर् (र= :)=खलपूः।

६।४।८३। धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादचि सुपि। खलप्वौ। खलप्वः। एवं—सुल्वादयः। स्वयम्भूः। स्वयम्भुवौ। स्वयम्भुवः। एवं—स्वभूः। वर्षाभूः। **(२३२) वर्षाभ्वश्च ६।४।८४।** अस्य यण् स्यादचि सुपि। वर्षाभ्वावित्यादि। दृन्भूः। * दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः *। दृन्भ्वौ। दृन्भ्वः। खलपूवत्। एवं—करभूः। पुनर्भूः। दृन्भूकाराभूशब्दौ

---

(२३१) **ओः सुपीति।** एरिति पदरहितम् 'एरनेकाचः' इति सूत्रमनुवर्तते। 'अचि श्नु०' इत्यतः अचीत्यनुवृत्तम्, तेन सुपीति विशेष्यते। तदादिविधिः। 'इणो यण्' इत्यतः यणित्यनुवर्तते। तदाह—**धात्ववयवेत्यादि।**

(२३२) **वर्षाभ्वश्चेति।** अत्रापि 'ओः सुपी'ति सूत्रम् 'अचि श्नु०' इत्यतोऽचीति 'इणो यण्' इत्यतः यणित्यनुवर्तते। तदाह—**अस्येति।** वर्षाभूशब्दस्येत्यर्थः। **दृन्भ्वाविति।** दृन्भूः=ग्रन्थकर्ता। तस्मात् 'औ' विभक्तौ 'दृन्भू+औ' इत्यत्र 'ओः सुपि' इति

---

(२३१) पद—ओः, सुपि। **अनुवृत्ति**—अनेकाचः, असंयोगपूर्वस्य, अचि, यण्। **विधिसूत्र।**

मूलार्थ—धातु का अवयव संयोग पूर्व में न हो, ऐसा जो उवर्णान्त धातु, तदन्त अनेकाच् अङ्ग को अजादि सुप् विभक्तियों के परे रहते यण् आदेश होता है।

विमर्श—यहाँ 'इणो यण्' (६।४।८१) सूत्र से आदेशवाचक 'यण्' पद की अनुवृत्ति आती है। 'एरनेकाचः०' (६।४।८२) से 'अनेकाचः' और 'असंयोगपूर्वस्य' की तथा सूत्रस्थ सुपि का विशेषण—अचि, 'ओः' का विशेषण 'धातुः' पद 'अचि श्नुधातुभ्रुवाम्०' (६।४।७७) से अनुवृत्ति द्वारा लाये जाते हैं। 'अङ्गस्य' का अधिकार है। अतः धातु का अवयव संयुक्त वर्ण पूर्व में न हो, ऐसा उवर्णान्त धातु, तदन्त अनेकाच् अङ्ग के अन्तिम वर्ण को अजादि सुप् विभक्ति के परवर्ती रहने पर यण् होता है।

उदाहरण—(१) खलपू+औ (यहाँ 'ऊ' से पूर्व धातु का अवयव संयुक्त नहीं है, तदन्त धातु–पू, तदन्त अनेकाच् अङ्ग—'खलपू' है। उससे परे अजादि विभक्ति 'औ' है। अतः प्राप्त 'उवङ्' का बाधकर ओः सुपि' से ऋ=व् 'यण्')=खलप्वौ। (२) खलपू+जस् (अस्), (ऊ=व् 'यण्') खलप्वस् (स्=र्, र्=:)=खलप्वः। इसी प्रकार 'सुलू' आदि शब्दों के रूप बनेंगे। 'सुष्ठु लुनाति' इति सुलू+क्विप्=सुलू+सु=सुलूः (अच्छी प्रकार काटने वाला)। (३) स्वयम्भू+सु=स्वयम्भूः (स्वयं उत्पन्न होने वाला)। (४) स्वयम्भू+औ ('ओः सुपि' से प्राप्त 'यण्' का 'न भूसुधियोः' से निषेध, 'अचि श्नु०' से ऊ=उवङ्)=स्वयम्भुवौ। (५) स्वयम्भू+जस् (ऊ=उवङ् (उव्) स्वयम्भुवस् (स्=र्, र्= :)—स्वयम्भुवः। इसी प्रकार स्वभू शब्द के रूप बनेंगे। वर्षाभू+सु (स्=र्, र्=:)=वर्षाभूः (मेढक)।

(२३२) पद—वर्षाभ्वः, च। **अनुवृत्ति**—ओः, सुपि, अचि, यण्। **विधिसूत्र।**

मूलार्थ—अजादि सुप् विभक्ति के परे रहते 'वर्षाभू' शब्द के अवयव अवर्ण के स्थान में यण् आदेश होता है।

विमर्श—यहाँ 'अचि श्नु०' (६।४।७७) से 'अचि', 'इणो यण्' (६।४।८१) से 'यण्' तथा 'ओः सुपि' (२३१) सूत्र की अनुवृत्ति आ रही है। तदनुसार 'अलोऽन्त्य' परिभाषा की उपस्थिति

स्वयम्भूवत् । धाता । हे धातः । धातारौ । धातारः । * ऋवर्णान्नस्य णत्वं वाच्यम् । * धातृणाम् । एवं नप्त्रादयः । 'अप्तृन्नि'ति सूत्रे नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम् । तेनेह न–पिता । पितरौ । पितरः । पितरम् । पितरौ । शेषं धातृवत् । एवं

यणि प्राप्ते 'न भूसुधियोः' इति तस्य निषेधे कृते 'दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः' इति यणि कृते 'दृन्भ्वौ' इति । **नप्त्रादिग्रहणमिति ।** व्युत्पत्तिपक्षे तृन्तृजन्तत्वादेव सिद्धे नप्त्रादिग्रहणं किमर्थमिति चेदुच्यते—'उणादिनिष्पन्नानां तृन्तृच्प्रत्ययान्तानामुपधादीर्घश्चेत्तर्हि नप्त्रादीनामेवे'ति नियमार्थम्; तेन पितृभ्रातृप्रभृतिषु न दीर्घः ।

उक्तञ्च—'पिता माता ननान्दा च सव्येष्टृभ्रातृयातरः ।
जामाता दुहिता देवा तृन्तृज्भ्यां रहिता नव ॥'

से अजादि सुब्विभक्ति परे रहने पर वर्षाभू शब्द के ऊवर्ण के स्थान में यण् (ऊ=व्) आदेश होता है ।

उदाहरण—वर्षाभू+औ (पूर्वसवर्ण दीर्घ को बाधकर 'अचि श्नु०' से उवङ् की प्राप्ति, उवङ् का बाधकर 'ओः सुपि' से यण् की प्राप्ति 'न भूसुधियोः' से निषेध 'वर्षाभ्वश्च' से ऊ=व्—'यण्') =वर्षाभ्वौ । दृन्भू+सु=दृन्भूः । अर्थ—वृक्ष । (वा०)—'अजादि सुप् विभक्ति के परे रहते दृन्, कर, पुनः पूर्वक भू धातु के ऊवर्ण को यण् होता है ।'

उदाहरण—(१) दृन्भू+औ (ऊ=व् 'यण्') दृन्भ्वौ । (२) दृन्भू+जस् (अस्) ऊ=व्—'यण्'=दृन्भ्वस् (स्=र्, र्=:)=दृन्भ्वः । इसी शब्द के समान 'करभूः' शब्द के रूप बनेंगे । करभूः (नाखून), पुनर्भूः (पुनः उत्पन्न होने वाला), दृग्भू (दृष्टि से उत्पन्न होने वाला) तथा काराभूः (कारागृह में उत्पन्न होने वाला) शब्दों के रूप 'स्वयम्भू' शब्द के समान बनेंगे ।

(१) धातृ+सु (ऋ=अनङ् (अन्)—'ऋदुशनस्०') धातन् स्, (अ='आ' दीर्घ—'अप्तृन्तृच्०') धातान्+स्, (स्—का लोप—'हल्ङ्याब्भ्यो०') धातान् ('न्' लोप)=धाता । (अर्थ=ब्रह्मा) । (२) हे धातृ+सु (स्) 'ऋ'='अर्'—गुण—'ऋतो ङि') धातर्+स् ('स्' का लोप) (र्=:)=हे धातः । (३) धातृ+औ (ऋ=अर् 'गुण') धातर्+औ (उपधादीर्घ—'अप्तृन्०')=धातारौ । (४) धातृ+जस् (अस्) (ऋ='अर्' गुण) धातर्+अस्, (दीर्घ) धातारस् (स्=र्, र्=:)=धातारः । (वा०) "ऋवर्ण से परे 'न्' के स्थान पर ण् (णत्व) होता है ।" (५) धातृ+आम् (नुट् का आगम—'ह्रस्व०') धातृ+नाम् ('नामि' से दीर्घ) धातॄनाम् (न्=ण्)=धातॄणाम् । इसी प्रकार नप्तृ, होतृ आदि शब्दों के रूप बनेंगे ।

'अप्तृन्निति'—'उणादि व्युत्पन्न प्रातिपदिक हैं'—इस पक्ष में तृन् तथा तृजन्त होने से नप्तृ आदि शब्दों में 'दीर्घ' सिद्ध है, पुनः नप्त्रादि का 'अप्तृन्तृच्०' सूत्र में ग्रहण क्यों किया ? इसका समाधान यह है कि—'उणादि से निष्पन्न तृन्प्रत्ययान्त तथा तृच्प्रत्ययान्त शब्दों को यदि उपधादीर्घ होता है तो सूत्र-पठित नप्त्रादि शब्दों की उपधा को ही हो; अन्य को नहीं' इस प्रकार के नियम के लिए 'नप्तृ' आदि शब्दों का सूत्र में ग्रहण किया गया है । फलतः पितृ, भ्रातृ आदि शब्दों में दीर्घ नहीं होता । (१) पितृ+सु (स्) (ऋ=अनङ् (अन्)–'ऋदुशनस्०') पितन्+स् (उपधादीर्घ—'सर्वनामस्थाने चासम्बुद्धौ'), पितान् स्, ('स्' लोप) पितान् ('न्' का लोप

जामात्रादयः । ना । नरौ । नरः । (२३३) नॄ च ६।४।६ । अस्य नामि वा दीर्घः । नॄणाम्-नृणाम् । (२३४) गोतो णित् ७।१।९० । ओकाराद्विहितं सर्वनामस्थानं णिद्वत् । ओतो णिदिति वाच्यम् । गौः । गावौ । गावः । (२३५) औतोऽम्शसोः

---

(२३३) **नॄ चेति ।** अत्र 'नामि' इति सूत्रम्, 'ढ्रलोपे०' इत्यतः 'दीर्घः' इति, 'छन्दस्युभयथा' इत्यतः 'उभयथा' इत्यनुवर्तते । **नॄणामिति ।** नृशब्दादामि, नुडागमेऽनुबन्धलोपे 'नामि' इति नित्यं दीर्घे प्राप्ते 'नृ च' इत्यनेन नामि परे वा दीर्घे 'नॄणाम्' इति, पक्षे नृणामिति रूपम् ।

(२३४) **गोतो णिदिति ।** अत्र 'इतोऽत्सर्वनामस्थाने' इत्यतः 'सर्वनामस्थाने' इत्यनुवर्तते । तच्च प्रथमया विपरिणम्यते । तदाह—**ओकारादित्यादिना । गौरिति ।**

'नलोपः०')=पिता । (२) पितृ+औ (ऋ='अर्' गुण) पितर्+औ=पितरौ । (३) पितृ+जस् (अस्) (ऋ='अर्'—गुण)—पितरः । (४) पितृ+अम् (ऋ=अर्)=पितरम् । शेष रूप धातृ शब्द के समान बनेंगे ।

पितृ शब्द के रूप (पिता) पुंल्लिङ्ग

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०— पिता	पितरौ	पितरः	प०—पितुः	पितृभ्याम्	पितृभ्यः
द्वि०— पितरम्	पितरौ	पितॄन्	ष०—पितुः	पित्रोः	पितॄणाम्
तृ०— पित्रा	पितृभ्याम्	पितृभिः	स०-पितरि	पित्रोः	पितृषु
च०— पित्रे	पितृभ्याम्	पितृभ्यः	सं०-हे पितः !	हे पितरौ !	हे पितरः !

इसी प्रकार जामातृ आदि शब्दों के रूप बनेंगे । (१) नृ+सु (स्) (ऋ=अनङ् (अन्) 'ऋदुशनस्०') न्+अन् स् (दीर्घ—'सर्वनामस्थाने०') नान् स् ('स्' का लोप) नान् ('न्' का लोप)=ना (मनुष्य) । (२) नृ+औ ('अर्'—गुण)=नरौ । (३) नृ+जस् (अस्) ('अर्'—गुण) नरस् (स् को रुत्व-विसर्ग)=नरः ।

(२३३) पद—नृ च । **अनुवृत्ति**—नामि, दीर्घः, उभयथा । **विधिसूत्र ।**

मूलार्थ—'नाम्' के परे रहते 'नृ' शब्द को विकल्प से दीर्घ होता है । नॄणाम्-नृणाम् ।

विमर्श—सूत्रार्थ की पूर्णता हेतु 'ढ्रलोपे पूर्वस्य' (६।३।१११) से 'दीर्घः', 'नामि' (६।४।४) सम्पूर्ण सूत्र तथा 'छन्दस्युभयथा' (६।४।५) से 'उभयथा' पद की अनुवृत्ति आती है । परिणामतः 'नाम् के परवर्ती होने पर नृ-शब्दावयव ऋ के स्थान में विकल्प से दीर्घ होता है' । यहाँ 'अचश्च' परिभाषासूत्र की उपस्थिति होती है ।

उदाहरण—नृ+आम्, (नुट् का आगम) नृ+नाम् (ऋ=ॠ—दीर्घ 'नृ च') विकल्प से—नॄनाम्, (न्=ण्)=नॄणाम् । दीर्घ के न होने पर—नृणाम् ।

(२३४) पद—गोतः, णित् । **अनुवृत्ति**—सर्वनामस्थाने । **अतिदेशसूत्र ।**

मूलार्थ—ओकार से विहित सर्वनामस्थान णिद्वत् होता है । 'गोतो णित्' के स्थान पर 'ओतो णित्' ऐसा कहना चाहिए । गौः । गावौ । गावः ।

विमर्श—यहाँ 'इतोऽत्सर्वनामस्थाने' (७।१।८६) से 'सर्वनामस्थाने' की अनुवृत्ति आ रही है । अनुवृत्त 'सर्वनामस्थाने' पद प्रथमान्त में परिवर्तित हो जाता है । तदनुसार गोशब्द के

६।१।९३ । 'आ-ओत' इतिच्छेदः । औतोऽम्शसोरचि आकार एकादेशः । गाम् । गावौ । गाः । गवा । गवे । गोः–२ । (२३६) **रायो हलि ७।२।८५** । रैशब्दस्याऽऽकारादेशो हलि विभक्तौ । राः । रायौ । रायः । राभ्यामित्यादि । ग्लौः । ग्लावौ । ग्लावः । ग्लौभ्यामित्यादि ।

इत्यजन्ताः पुँल्लिङ्गाः

गोशब्दात्सौ 'गोतो णित्' इति णिद्वद्भावे 'अचो ञ्णिति' इति वृद्धौ सस्य रुत्वे विसर्गे च कृते 'गौरि'ति रूपम् ।

(२३५) **औतोऽम्शसोरिति** । 'आ ओतः' इति च्छेदः । 'इको यणची'त्यतः 'अची'त्यनुवर्तते । 'एकः पूर्वपरयोरि'त्यधिकृतम् । तदाह—**ओकारादिति** ।

(२३६) **रायो हलीति** । 'अष्टन आ विभक्तौ' इत्यतः विभक्ताविति, आ इति चानुवर्तते । तदाह—**रैशब्दस्येत्यादिना** । **रा इति** । **आत्वे रुत्वविसर्गाविति** । राः धनमित्यर्थः ।

इत्यजन्ताः पुंल्लिङ्गाः ।

ओकार से विहित सर्वनामस्थानसंज्ञक प्रत्यय (सु, औ, जस्, अम्, औट्) ण्-इत् के समान समझे जाते हैं । यह अतिदेश सूत्र है ।

उदाहरण—(१) गो+सु (स्) (णिद्वद्भाव) फलतः 'अचो ञ्णिति' से 'ओ'='औ' वृद्धि) गौ स् (स्=र्, र्= :)=गौः । (२) गो+औ (णिद्वत, वृद्धि)–गौ+औ (औ=आव्) =गावौ । (३) गो+जस् (अस्), (णिद्वत्, वृद्धि) गौ+अस् (औ=आव्) गावस् (स्= र्, र्= :)=गावः ।

(२३५) पद—आ ओतः, अम्शसोः । **अनुवृत्ति**—अचि, एकः पूर्वपरयोः । **विधिसूत्र ।**

मूलार्थ—ओकार से अम् तथा शस् सम्बन्धी अच् परे रहते पूर्व-पर के स्थान में आकार एकादेश होता है । गाम् । गावौ । गावः । गाः । गवा । गवे । गोः–२ ।

विमर्श—प्रकृत सूत्र में 'इको यणचि' (६।१।७७) से 'अचि' पद की अनुवृत्ति आ रही है । 'एकः पूर्वपरयोः' का अधिकार है । तदनुसार ओकारान्त शब्द के अनन्तर अम् तथा शस् सम्बन्धी अच् वर्ण के परे रहते (ओ+अ=आ) आकार एकादेश होता है ।

उदाहरण—(१) गो+अम् (ओ+अ='आ')=गाम् । (२) गो+औ=गावौ । (३) गो+शस् (अस्), (ओ+अ='आ') गास् (स्=र्, र्=:)=गाः । (४) गो+टा (आ), (ओ=अव् आदेश)=गवा । (५) गो+ङे (ए), (ओ=अव्) गवे । (६) गो+ङसि (अस्) (ओ+अ=ओ—पूर्वरूप—'ङसिङसोश्च') गोस् ('स्' को रुत्व-विसर्ग)=गोः ।

(२३६) पद—रायः, हलि । **अनुवृत्ति**—आ, विभक्तौ । **विधिसूत्र ।**

मूलार्थ—हलादि विभक्ति के परे रहने पर 'रै' शब्द को आकार अन्तादेश होता है । राः । रायौ । रायः । इत्यादि ।

अथ अजन्तस्त्रीलिङ्गाः

रमा । (२३७) औङ आपः ७।१।१८ । आबन्तादङ्गात्परस्यौङः शी स्यात् । 'औङ्' इत्यौकारविभक्तेः संज्ञा । रमे । रमाः । (२३८) सम्बुद्धौ च ७।३।१०६ ।

रमा इति । रमत इति रमा । 'रमु क्रीडायाम्' इति पचाद्यचि, टाप् । रमा + सु हल्ङ्याबिति सुलोपः । रमा = लक्ष्मीः ।

(२३७) **औङ आपः ।** 'आपः' इति पञ्चम्यन्तम् । प्रत्ययग्रहणपरिभाषया आबन्तं विवक्षितम् । अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते 'जसः शी' इत्यतः 'शी' इत्यनुवर्तते । तदाह—**आबन्तादित्यादि । रमे इति ।** 'रमा + औ' इति स्थिते 'औङ आपः' इत्यनेन औकारस्य स्थाने 'शी' इत्यादेशे, प्रत्ययत्वात् 'लशक्वतद्धिते' इति शस्येत्संज्ञायां लोपे 'आद् गुणः' इत्यनेन गुणे 'रमे' इति ।

विमर्श—यहाँ निमित्तवाचक पद विभक्तौ तथा आदेशवाचक पद 'आ' दोनों 'अष्टन आ विभक्तौ' (७।२।८४) से अनुवृत्ति द्वारा लाये जाते हैं। 'हलि' पद 'विभक्तौ' का विशेषण होने से तदादि विधि होती है। यहाँ अलोऽन्त्य परिभाषा की उपस्थिति होने से—'रै' शब्द के ऐकार के स्थान में 'आ' आदेश होगा।

उदाहरण—(१) रै+सु (स्)—(ऐ=आ) रा स्, (स्=र्)-रार्, (र्=:)=राः । (अर्थ—धन) । (२) रै+औ (ऐ=आय्)=रायौ । (३) रै+जस् (अस्) (ऐ=आय्)—रायस् (स्=र्, र्=:)=रायः । (४) रै+भ्याम् (ऐ=आ)—राभ्याम् ।

औकारान्त ग्लौशब्द की रूप-सिद्धि का प्रकार—(१) ग्लौ+सु (स्) (स् को रुत्व-विसर्ग होकर) ग्लौः । (२) ग्लौ+औ (औ=आव्)=ग्लावौ । (३) ग्लौ+जस् (अस्) (औ=आव्) ग्लावस् (स्=र्, र्=:)=ग्लावः । (४) ग्लौ+भ्याम्=ग्लौभ्याम् इत्यादि । ग्लौः=चन्द्रमा ।

अजन्तपुंल्लिङ्गप्रकरण समाप्त ।

पूर्व प्रकरण में माहेश्वर सूत्रों के क्रमानुसार अजन्त पुंल्लिङ्ग शब्द की रचना-प्रक्रिया बतलायी गयी । अब प्रस्तुत प्रकरण में भी उसी क्रम से सर्वप्रथम आकारान्त स्त्रीलिङ्ग 'रमा' शब्द के रूपों की सिद्धि प्रदर्शित की जा रही है ।

रमा+सु (स्) (रमा—आबन्त (टाप्प्रत्ययान्त) होने से 'हल्ङ्याब्भ्यो दीर्घात्०' से 'स्' का लोप)=रमा (लक्ष्मी) ।

(२३७) पद—औङः, आपः । **अनुवृत्ति**—अङ्गस्य, शी । **विधिसूत्र ।**

मूलार्थ—आबन्त अङ्ग से परे औङ् (औ—विभक्ति) को शी आदेश होता है । प्राचीन आचार्यों के मत में औकारान्त विभक्तियों को 'औङ्' कहा जाता है । रमे । रमाः ।

विमर्श—यहाँ 'जसः शी' से आदेशवाची पद 'शी' की अनुवृत्ति आती है । अङ्गस्य का अधिकार है । 'आपः' उसका विशेषण है, तदनुसार 'अङ्गस्य' पद भी पञ्चम्यन्त में परिवर्तित हो जाता है । तदन्तविधि होकर 'आबन्त' अर्थ हुआ । इस प्रकार आबन्त अङ्ग से 'औङ्' विभक्ति परे रहने पर (शित् होने से सम्पूर्ण) 'औ' के स्थान में 'शी' आदेश होता है ।

आप एकारः स्यात्सम्बुद्धौ । हे रमे । हे रमे । हे रमाः । रमाम् । रमे । रमाः । (२३९) आङि चापः ७।३।१०५ । आङि, ओसि चाऽऽप एकारः । रमया । रमाभ्याम् । रमाभिः । (२४०) याडापः ७।३।११३ । आपः परस्य ङिद्वचनस्य

---

(२३८) हे रमा + स् इति स्थितौ । सम्बुद्धौ चेति । अत्र 'बहुवचने झल्येत्' इत्यतः 'एत्' इति, 'आङि चापः' इत्यतः 'आपः' इति चानुवर्तते । तदाह—**आप** इत्यादि ।

(२३९) **आङि चाप** इति । अत्र 'ओसि च' इति, 'बहुवचने झल्येत्' इत्यतः 'एदि'ति चानुवर्तते । अङ्गस्येत्यधिकृतम् । तदन्तविधिस्तदाह—**आङि ओसि चेत्यादिना** ।

उदाहरण—(१) रमा+औ, (औ=शी-ई) रमा+ई, (आ+ई=ए 'गुण')=रमे । (२) रमा+जस् (अस्), (आ+अ=आ—'पूर्वसवर्णदीर्घ')—रमास्, (स्=र्) रमार् (र्= :)=रमाः ।

(२३८) पद—सम्बुद्धौ, च । **अनुवृत्ति**—अङ्गस्य, आपः, एत् । **विधिसूत्र** ।

मूलार्थ—सम्बुद्धि के परे रहते आबन्त अङ्ग को एकार आदेश होता है । हे रमे !

विमर्श—प्रकृत सूत्र में 'आङि चापः' (७।३।१०५) से स्थानिवाचक पद 'आपः' तथा 'बहुवचने झल्येत्' (७।३।१०३) से आदेशवाचक पद 'एत्' की अनुवृत्ति आ रही है । अधिकार से प्राप्त अङ्गस्य का 'आपः' विशेषण होने से तदन्तविधि होती है । इस प्रकार सम्बुद्धि (सम्बोधन का एकवचन सु) के पश्चाद्वर्ती रहने पर आबन्त अङ्ग के अन्तिम वर्ण (अलोऽन्त्य परिभाषा द्वारा) के स्थान में 'ए' आदेश होता है ।

उदाहरण—(१) हे रमा+सु (स्), (आ=ए 'सम्बुद्धौ च') हे रमे+स् (स् का लोप —'एङ्ह्रस्वात्सम्बुद्धेः')=हे रमे । (२) हे रमा+औ (औ=शी-ई)—(२३७), हे रमा+ई (आ+ई='ए'—गुण)=हे रमे । (३) हे रमा+जस् (अस्), (आ+अ='आ' दीर्घ)—रमास् (स्=र्)-रमार् (र्=:)=हे रमाः । (४) रमा+अम् (आ+अ='आ'—पूर्वरूप) =रमाम् । (५) रमा+औट् (औ) (औ=शी-ई)—रमा+ई, (आ+ई='ए' गुण)= रमे । रमा+शस् (अस्), (आ+अ='आ'—दीर्घ) रमास् (स्त्रीलिंग होने से स्=न् नहीं हुआ, स्=र्)—रमार् (र्= :)=रमाः ।

(२३९) पद—आङि, च आपः । **अनुवृत्ति**—अङ्गस्य, ओसि, एत् । **विधिसूत्र** ।

मूलार्थ—आङ् (टा) तथा ओस् परे रहते आबन्त अङ्ग को एकार होता है । रमया । रमाभ्याम् । रमाभिः ।

विमर्श—प्रकृत सूत्र में 'बहुवचने झल्येत्' (७।३।१०३) से 'एत्' तथा 'ओसि च' से 'ओस्' पद की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है, उसका विशेषण होने से 'आपः' में तदन्त विधि होती है । तदनुसार आङ् (टा) तथा ओस् विभक्तियों के पश्चाद्वर्ती होने पर आबन्त अङ्ग के अन्त्य वर्ण (अलोऽन्त्य परिभाषा की उपस्थिति से) के स्थान पर 'ए' आदेश होगा ।

उदाहरण—(१) रमा+टा (आ), (आ=ए) रमे+आ (ए=अय्)=रमया । (२) रमा+भ्याम्=रमाभ्याम् । (३) रमा+भिस्, (स्=रुत्व-विसर्ग)=रमाभिः ।

याडागमः । वृद्धिरेचि । रमायै । रमाभ्याम् । रमाभ्यः । रमायाः–२ । रमयोः–२ । रमाणाम् । रमायाम् । रमासु । एवं दुर्गादयः । (२४१) सर्वनाम्नः स्याड्ढ्रस्वश्च ७।३।११४ । आबन्तात्सर्वनाम्नो ङितः स्याड्, आपश्च ह्रस्वः । याटोऽपवादः । सर्वस्यै ।

(२४०) **याडाप इति ।** आप इति पञ्चम्यन्तम् । 'घेर्ङिति' इत्यतो ङितीत्यनुवृत्तं षष्ठ्या विपरिणम्यते । तदाह—**आपः परस्येत्यादि । रमायै इति ।** 'रमा + ङे' इत्यत्र 'याडापः' इति याडागमेऽनुबन्धलोपे रमा + या + ए इति जाते 'वृद्धिरेची'त्यनेन वृद्धौ 'रमायै' इति रूपम् ।

(२४१) **सर्वनाम्न इति ।** 'याडापः' इत्यतः पञ्चम्यन्तम् 'आपः' इत्यनुवृत्तम् । तच्च 'सर्वनाम्नः' इत्यस्य विशेषणम्, तेन तदन्तविधिः । 'घेर्ङिति' इत्यतः 'ङिती'-

(२४०) पद—याड् आपः । **अनुवृत्ति**—अङ्गस्य, ङिति । **विधिसूत्र ।**

मूलार्थ—आबन्त अङ्ग से परे ङित् वचन (ङकारेत्संज्ञक विभक्तियों) को याट् का आगम होता है । वृद्धि । रमायै । रमाभ्याम् । रमाभ्यः । रमायाः–२ । रमयोः–२ । रमाणाम् । रमायाम् । रमासु । इसी प्रकार दुर्गा आदि शब्दों के रूप बनते हैं ।

विमर्श—यहाँ 'घेर्ङिति' (७।३।१११) से 'ङिति' की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । सूत्रस्थ 'आपः' पञ्चम्यन्त के अनुसार 'अङ्गस्य' भी पञ्चम्यन्त में परिवर्तित हो जाता है । 'याट्' आगम **टकार**—इत्संज्ञक होने के कारण 'आद्यन्तौ टकितौ' परिभाषा द्वारा ङित (ङे, ङसि, ङस् तथा ङि) विभक्तियों के आदि अवयव के रूप में 'या' स्थित रहेगा ।

उदाहरण—(१) रमा+ङे (ए), (याट् (या) का आगम) रमा+या+ए (आ+ए= 'ऐ'—वृद्धि—'वृद्धिरेचि')=रमायै । (२) रमा+भ्याम्=रमाभ्याम् । (३) रमा+भ्यस् (स् को रुत्व-विसर्ग)—रमाभ्यः । (४) रमा+अस् (ङसि तथा ङस्), (याट् का आगम)—रमा +या+अस्, (आ+अ='आ'–दीर्घ)-रमायास् (स्=र्, र्=:)=रमायाः । (५) रमा+ ओस् (आ=ए—'आङि चापः') रमे+ओस्, (ए=अय्)—रमयोस् (स्=र्, र्=:)= रमयोः । (६) रमा+आम् (नुट् (न्) का आगम), रमा+नाम्, (आ=आ—दीर्घ 'नामि') रमानाम् (न्=ण्)=रमाणाम् । (७) रमा+ङि (ङि=आम्—'ङेराम्नद्याम्नीभ्यः')— रमा+आम्, (याट् का आगम) रमा या आम्, (आ+आ='आ'—सवर्णदीर्घ)= रमायाम् । (८) रमा+सुप् (सु)=रमासु ।

आकारान्त स्त्रीलिङ्ग—'रमा' शब्द के रूप (अर्थ—लक्ष्मी)

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०—रमा	रमे	रमाः	पं०—रमायाः	रमाभ्याम्	रमाभ्यः
द्वि०—रमाम्	रमे	रमाः	ष०—रमायाः	रमयोः	रमाणाम्
तृ०—रमया	रमाभ्याम्	रमाभिः	स०—रमायाम्	रमयोः	रमासु
च०—रमायै	रमाभ्याम्	रमाभ्यः	सं०—हे रमे !	हे रमे !	हे रमाः !

इसी प्रकार दुर्गा, अम्बा आदि आकारान्त स्त्रीलिङ्ग शब्दों के रूप बनते हैं ।

(२४१) पद—सर्वनाम्नः, स्याट्, ह्रस्वः, च । **अनुवृत्ति**—अङ्गस्य, आपः, ङिति । **विधिसूत्र ।**

सर्वस्याः–२। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादामि सर्वनाम्न इति सुट्। सर्वासाम्। सर्वस्याम्। शेषं रमावत्। एवं विश्वादयोऽप्याबन्ताः। **(२४२) विभाषा दिक्समासे बहुव्रीहौ १।१।२८।** अत्र सर्वनामता वा। उत्तरपूर्वस्यै। उत्तरपूर्वायै। इत्यादि। 'दिङ्नामान्यन्तराले' इति प्रतिपदोक्तस्यैव समासस्य ग्रहणान्नेह—योत्तरा सा

त्यनुवृत्तं षष्ठ्या विपरिणम्यते। ततश्च आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यात्। ततश्चानुवृत्तम् 'आपः' इति पदमावर्त्तते, षष्ठ्यन्ततया च विपरिणम्यते आपश्च ह्रस्वो भवतीति तदर्थः। **सर्वस्यै इति।** 'सर्वा + ङे (ए) इत्यत्र 'याडापः' इति याडागमे प्राप्ते, तं प्रबाध्य 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याटि, आबन्तस्य च ह्रस्वे 'सर्व स्या ए' इति जाते 'वृद्धिरेचि' इति वृद्धौ 'सर्वस्यै' इति।

(२४२) **विभाषा दिक्समासे।** 'सर्वादीनि' इत्यतः सर्वनामग्रहणमनुवर्तते।

मूलार्थ—आबन्त सर्वनाम से ५ ङकारेत्संज्ञक विभक्तियों को स्याट् का आगम होता है तथा आप् (आ) को ह्रस्व होता है। सर्वस्यै। सर्वस्याः। सर्वासाम्। सर्वस्याम्। अवशिष्ट रूप रमा शब्द की तरह बनेंगे। इसी प्रकार विश्वा आदि आकारान्त सर्वनाम शब्दों के रूप बनते हैं।

विमर्श—सूत्रार्थ हेतु—'याडापः' (२४०) से 'आपः' घेर्ङिति (१९३) से 'ङिति' की अनुवृत्ति लायी जाती है। 'अङ्गस्य' का अधिकार है। 'सर्वनाम्नः' पद का विशेषण होने से 'आपः' में तदन्तविधि होती है। अनुवृत्त ङिति पद षष्ठ्यन्त में परिवर्तित हो जाता है। तदनुसार आबन्त सर्वनाम से परवर्ती ङित् विभक्तियों को स्याट् (स्या) का आगम होता है। सूत्र के द्वितीय वाक्यांश 'ह्रस्वश्च' में भी 'आपः' की अनुवृत्ति आने से 'आप्' (स्त्री-प्रत्ययान्त 'आ') को ह्रस्व होता है। यह सूत्र 'याट्' का अपवाद है।

उदाहरण—(१) सर्वा+ङे (ए), (स्याट् (स्या) का आगम तथा आ=अ—ह्रस्व)—सर्वस्या+ए (आ+ए='ऐ'–वृद्धि)=सर्वस्यै। (२) सर्वा+ङसि अथवा ङस् (अस्), (स्याट् का आगम तथा 'आ' को ह्रस्व) सर्वस्या+अस्, (आ+अ='आ'—दीर्घ) सर्वस्यास्, (स्=र्)—सर्वस्यार् (र्=:)=सर्वस्याः। (३) सर्वा+आम् (आम् के पूर्व सुट् (स्) का आगम —'आमि सर्वनाम्नः०') सर्वा+स्+आम्=सर्वासाम्। (४) सर्वा+ङि, (ङि=आम्), सर्वा+आम् (स्याट् का आगम व 'आ' को ह्रस्व), सर्वस्या+आम् (आ+आ='आ'—दीर्घ) =सर्वस्याम्। शेष रूपों की रचना-प्रक्रिया रमा शब्द की तरह होगी। इसी प्रकार आकारान्त स्त्रीलिंग 'विश्वा' आदि शब्दों के रूप बनेंगे।

स्त्रीलिङ्ग 'सर्वा' शब्द के रूप

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०—सर्वा	सर्वे	सर्वाः	पं०—सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
द्वि०—सर्वाम्	सर्वे	सर्वाः	ष०—सर्वस्याः	सर्वयोः	सर्वासाम्
तृ०—सर्वया	सर्वाभ्याम्	सर्वाभिः	स०—सर्वस्याम्	सर्वयोः	सर्वासु
च०—सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः	सं०—हे सर्वे !	हे सर्वे !	हे सर्वाः !

(२४२) पद—विभाषा, दिक्समासे, बहुव्रीहौ। **अनुवृत्ति**—सर्वादीनि सर्वनामानि। **संज्ञासूत्र।**

पूर्वा यस्या उन्मुग्धायास्तस्यै उत्तरपूर्वायै । बहुव्रीहिग्रहणं स्पष्टार्थम् । अन्तरस्यै शालायै । अपुरीत्युक्तेर्नेह–अन्तरायै नगर्यै । तीयस्येति ङित्सु वा । द्वितीयस्यै । द्वितीयायै । एवं तृतीया । अम्बार्थनद्योर्ह्रस्वः । हे अम्ब । हे अक्क । हे अल्ल । * असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न * । हे अम्बाडे । हे अम्बाले । हे अम्बिके । जरा । जरसौ । जरे । इत्यादि । पक्षे हलादौ च रमावत् । गोपा–विश्वपावत् । मतीः । मत्या । (२४३)

दिग्वाचके बहुव्रीहिसमासे सर्वनामता वा स्यादित्यर्थः । **उत्तरपूर्वस्यै इति** । उत्तरस्याः पूर्वस्याश्च दिशोऽन्तरालम्–उत्तरपूर्वा, तस्यै उत्तरपूर्वस्यै, स्याड्ढ्रस्वौ । सर्वनामत्वाभावपक्षे याट्—'उत्तरपूर्वायै' इति । अत्र 'दिङ्नामान्यन्तराले' इति बहुव्रीहिसमासः ।

मूलार्थ—बहुव्रीहि समास में दिग्वाचक शब्दों की सर्वनाम संज्ञा विकल्प से होती है। उत्तरपूर्वस्यै–उत्तरपूर्वायै । सूत्र में बहुव्रीहि पद स्पष्टार्थक है—अन्तरस्यै शालायै । 'अन्तरं बहिर्योग०' इस गणसूत्र में 'अपुरि' कहे जाने से सर्वनाम संज्ञा नहीं हुई—'अन्तरस्यै नगर्यै' ।

विमर्श—यहाँ 'सर्वादीनि सर्वनामानि' (१।१।२७) सूत्र की अनुवृत्ति आ रही है। इस प्रकार दिशावाचक शब्दों के बहुव्रीहि समास में सर्वादिगण पठित शब्दों की सर्वनामसंज्ञा विकल्प से होती है।

उदाहरण—(विग्रह—उत्तरस्याः पूर्वस्याश्च दिशोऽन्तरालम्=उत्तरपूर्वा—उत्तर और पूर्व के बीच का कोण—ईशान)। उत्तरपूर्वा+ङे (ए)—(विकल्प से सर्वनाम संज्ञा होने पर स्याट् (स्या) का आगम 'आ' को ह्रस्व) उत्तरपूर्वस्या+ए (आ+ए=ऐ—वृद्धि)=उत्तरपूर्वस्यै । सर्वनाम संज्ञा न होने पर (याट् का आगम, वृद्धि)—उत्तरपूर्वायै ।

यहाँ 'दिङ्नामान्यन्तराले' सूत्र से प्रतिपदोक्त (साक्षात्) दिशावाची शब्दों का विशेष अर्थ में बहुव्रीहि समास होने से उसी का ग्रहण होता है। अतः अन्यपदार्थप्रधान दिशावाची उत्तरपूर्वा शब्द के चतुर्थी एकवचन में 'उत्तरपूर्वायै' रूप बनेगा । यथा—या उत्तरा सा पूर्वा यस्या उन्मुग्धायास्तस्यै—उत्तरपूर्वायै । अर्थ=पूर्व को उत्तर दिशा समझने वाली मूर्ख स्त्री के लिए।

सूत्र में 'बहुव्रीहौ' कहने की आवश्यकता नहीं थी, क्योंकि दिशावाची प्रतिपदोक्त समास बहुव्रीहि के अधिकार में प्रसिद्ध है। परन्तु यहाँ स्पष्ट प्रतीति के बहुव्रीहि का ग्रहण किया गया है।

'अन्तरा' शब्द का चतुर्थी विभक्ति के एकवचन में 'अन्तरस्यै' रूप बनता है। क्योंकि अन्तर शब्द बाह्य तथा परिधान अर्थ में सर्वनाम है। अर्थ=बाहरी शाला । सर्वनाम संज्ञा के प्रकरण में 'अपुरीति वक्तव्यम्' कहा गया है। अर्थात् नगरी अर्थ से भिन्न अर्थ में 'अन्तरा' शब्द को सर्वनाम संज्ञा हो । अत एव नगरी अर्थ में अन्तरा शब्द का चतुर्थी एकवचन में 'अन्तरायै' रूप होगा ।

तीयस्येति । तीय-प्रत्ययान्त शब्दों को ङित् विभक्तियों के परे रहते विकल्प से सर्वनाम संज्ञा होती है। उदाहरण—द्वितीया+ङे (ए), (विकल्प से सर्वनामसंज्ञा होने से स्याट् का आगम, 'आ' को ह्रस्व) द्वितीय+स्या+ए, (आ+ए=ऐ—'वृद्धि')—द्वितीयस्यै । पक्ष में (याट् का आगम) द्वितीया+या+ए (आ+ए='ऐ'—'वृद्धि')=द्वितीयायै । इसी प्रकार तृतीया शब्द के रूप बनेंगे ।

'माता' अर्थ वाले अम्बा, अक्का तथा अल्ला शब्दों के सम्बोधन के एकवचन 'सु' विभक्ति में 'अम्बार्थनद्योर्ह्रस्वः' से ह्रस्व होने के बाद 'स्' (सु) का लोप होने पर क्रमशः हे अम्ब ! हे अक्क ! तथा हे अल्ल ! रूप बनते हैं।

ङिति ह्रस्वश्च १।४।६ । इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ, ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति । मत्यै—मतये । मत्याः-२—मतेः-२ । नदीत्वपक्षे परत्वात् 'औत्' इति ङेरौत्वे प्राप्ते । (२४४) **इदुद्भ्याम् ७।३।११७ ।**

(२४३) **ङिति ह्रस्वश्चेति ।** अत्र च-ग्रहणाद्वाक्यद्वयम् । 'ङिति' इत्येकम् । अत्र 'यू स्त्र्याख्यौ नदी' इति, 'वामि' इत्यतो 'वे'ति, 'नेयङुवङ्स्थानावस्त्री' इति सूत्रञ्च नञ्वर्जमनुवर्तते । इयङुवङोः स्थानं स्थितिर्योग्यता ययोस्ताविति विग्रहः । इयङुवङ्प्राप्तियोग्यावित्यर्थः । तदाह—**इयङुवङ्स्थानावित्यादि ।** ह्रस्वश्चेति द्वितीयं वाक्यम् । अत्र 'यू' इति, 'नदी' इति, 'स्त्र्याख्यावि'ति, वेति चानुवर्तते । एवञ्च—'स्त्रीवाचकौ ह्रस्वौ चेदुतौ ङिति वा नदीसंज्ञौ स्तः' इति द्वितीयवाक्यार्थः । अप्राप्तविभाषेयम् । **मत्यै इति ।** 'मति+ङे' इत्यत्र 'ङिति ह्रस्वश्चे'त्यनेन विकल्पेन नदीसंज्ञायाम् 'आण्नद्याः'

(वा०) 'असंयुक्ता०'—अम्बार्थक शब्दों में ड, ल तथा क वर्णों के संयुक्त न होने पर उनको ह्रस्व नहीं होता है। अर्थात् इन वर्णों के संयुक्त होने पर ही ह्रस्व होता है। अतः अम्बार्थक अम्बाडा, अम्बाला तथा अम्बिका शब्दों में ह्रस्व नहीं हुआ।

'जरा' (वृद्धावस्था) शब्द के विशेष रूपों का सिद्धि-प्रकार बतलाया जा रहा है—(१) जरा+सु (स्) (स् का लोप)=जरा। (२) जरा+औ (यहाँ जरसादेश तथा औ को 'शी' दोनों की युगपत् प्राप्ति होती है, परन्तु पर होने से जरा=जरस् आदेश होकर)=जरसौ। जरसादेश विकल्प से होने के कारण पक्ष में जरा+औ (औ=शी-ई)—जरा+ई (आ+ई =ए 'गुण')=जरे। जरसादेश न होने पर पक्ष में तथा हलादि विभक्तियों में 'रमा' शब्द की तरह रूप चलते हैं। 'गोपा' शब्द के रूप 'विश्वपा' शब्द के समान बनेंगे।

इकारान्त स्त्रीलिङ्ग शब्दों में सर्वप्रथम 'मति' शब्द के विशेष रूपों की सिद्धि प्रदर्शित की जा रही है। (१) मति+शस् (अस्), (इ+अ=ई 'पूर्वसवर्ण दीर्घ') मतीस् (स्=र्)—मतीर् (र्=:)=मतीः। (२) मति+टा (आ) ('इ'='य्'—यण्)=मत्या।

(२४३) पद—ङिति, ह्रस्वः, च। **अनुवृत्ति**—यू, स्त्र्याख्यौ, नदी, इयङुवङ्स्थानावस्त्री, वा। **संज्ञासूत्र।**

मूलार्थ—ङित् विभक्तियों के परे रहते इयङ्, उवङ् के स्थानी, स्त्रीशब्द से भिन्न, नित्य स्त्रीलिङ्गवाची ईकारान्त एवं ऊकारान्त तथा ह्रस्व इकारान्त व उकारान्त (शब्दों) की विकल्प से नदीसंज्ञा होती है। मत्यै-मतये। मत्याः-मतेः। 'ङि' विभक्ति में पर होने के कारण 'औत्' सूत्र से ङि='औ' प्राप्त है।

विमर्श—इस सूत्र में चकार से दो वाक्य हैं—'ङिति' और 'ह्रस्वश्च'। प्रथम भाग में 'यू स्त्र्याख्यौ नदी' (१।४।३) सूत्र, नञ्रहित 'नेयङुवङ्स्थानावस्त्री' (१।४।४) सूत्र तथा 'वामि' (१।४।२) से 'वा' पद की अनुवृत्ति आ रही है। तदनुसार—'इयङुवङ्स्थानौ नित्यस्त्रीलिङ्गावीदूतौ नदीसंज्ञौ वा स्तो ङिति परे' 'ङिति' का अर्थ है। अर्थात्—इयङ्, उवङ् स्थानिक नित्य स्त्रीलिङ्ग स्त्री शब्द से भिन्न दीर्घ ईकार और ऊकार को ङित् विभक्ति के परे रहते विकल्प से नदीसंज्ञा होती है। 'ह्रस्वः' यह अपर वाक्य है। द्वितीय वाक्य में भी पूर्वोक्त 'यू स्त्र्याख्यौ नदी', 'इयङुवङ्स्थानौ' तथा 'वा' पद की अनुवृत्ति आती है। तदनुसार—'इयङुवङ्स्थानौ स्त्रीलिङ्गौ ह्रस्वौ च इदुतौ ङिति

नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात् । पक्षे—अच्च घेः । मत्याम्–मतौ । शेषं हरिवत् । एवं बुद्ध्यादयः । (२४५) त्रिचतुरोः स्त्रियां तिसृचतसृ ७।२।९९ । स्त्रीलिङ्गयोरेतयोरेतौ स्तो विभक्तौ । (२४६) अचि र ऋतः ७।२।१०० । तिसृ-

---

इत्याडागमेऽनुबन्धलोपे 'मति + आ + ए' इति जाते 'आटश्च' इति वृद्धौ 'इको यणचि' इति यणादेशे 'मत्यै' इति । पक्षे (नदीसंज्ञाऽभावे)—घिसंज्ञायां 'घेर्ङिति' इति गुणेऽयादेशे 'मतये' इति ।

(२४४) **इदुद्भ्याम् इति ।** अत्र 'ङेराम्नद्याम्नीभ्यः' इति सूत्रात् 'ङेरामि'ति, 'नदी' इति चानुवर्तते । तदाह—**नदीसंज्ञकाभ्यामिति । एवं बुद्ध्यादय इति ।** आदिना भूति-धृति-क्रान्ति-गति-रुचि-दीप्ति-श्रुति-स्मृतिप्रभृतयो ग्राह्याः ।

(२४५) **त्रिचतुर इति ।** 'अष्टन आ विभक्ता'वित्यतो विभक्तावित्यनुवर्तते । अङ्गस्येत्यधिकृतम् ।

नदीसंज्ञकौ वा स्तः ।' अर्थात् इयङ्, उवङ् स्थानिक स्त्रीलिंगवाची ह्रस्व इ-उवर्णान्त शब्दों की ङित् विभक्तियों में विकल्प से नदीसंज्ञा होती है ।

उदाहरण—(१) मति+ङे (ए), (विकल्प से नदीसंज्ञा होने से आट् का आगम—'आण्नद्याः') मति+आ+ए, (आ+ए='ऐ'—वृद्धि—'आटश्च') मति+ऐ (इ=य् 'यण्')= मत्यै । नदीसंज्ञा न होने पर पक्ष में मति+ए (घिसंज्ञा, गुण, अयादेश)=मतये । (२) मति+ अस् (ङसि, अथवा ङस्), (विकल्प से नदीसंज्ञा होकर 'आट्' का आगम) मति+आ+अस्, (वृद्धि) मति=आस्, (यण्) मत्यास्, (स्=र्) मत्यार्, (र्=:)=मत्याः । नदीसंज्ञा के अभाव पक्ष में—मति+अस् (घि संज्ञा, गुण, पूर्वरूप)=मतेः ।

(२४४) पद—इदुद्भ्याम् । **अनुवृत्ति**—नदी, ङे, आम् । **विधिसूत्र ।**

मूलार्थ—नदीसंज्ञक ह्रस्व इकार, उकार से परे 'ङि' के स्थान पर 'आम्' आदेश होता है । मत्याम्–मतौ ।

विमर्श—प्रकृत सूत्र में 'ङेराम्नद्याम्नीभ्यः' से 'ङे, आम् तथा नदी' की अनुवृत्ति आती है । 'इदुद्भ्याम्' के अनुसार 'नदी' पद को भी पञ्चम्यन्त में परिवर्तित कर दिया जाता है । इस प्रकार नदीसंज्ञक ह्रस्व इकारान्त, उकारान्त से परे 'ङि' को 'आम्' आदेश होता है ।

उदाहरण—मति+ङि (ङि=आम्)—मति+आम् (यण्)=मत्याम् । नदीसंज्ञा के अभाव में मति+ङि (घि संज्ञा, 'अच्च घेः' से 'इ'='अ' तथा 'ङि'='औ')—मत+औ (अ+ औ='औ'—वृद्धि)=मतौ । शेष रूप 'हरि' शब्द के समान बनेंगे ।

इकारान्त स्त्रीलिङ्ग 'मति' शब्द के रूप (अर्थ=बुद्धि)

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०- मतिः	मती	मतयः	पं०- मत्याः, मतेः	मतिभ्याम्	मतिभ्यः
द्वि०-मतिम्	मती	मतीः	ष०- मत्याः, मतेः	मत्योः	मतीनाम्
तृ०-मत्या	मतिभ्याम्	मतिभिः	स०-मत्याम्, मतौ	मत्योः	मतिषु
च०-मत्यै, मतये	मतिभ्याम्	मतिभ्यः	सं०-हे मते	हे मती	हे मतयः

इसी प्रकार बुद्धि, श्रुति, स्मृति आदि शब्दों के रूप बनते हैं ।

(२४५) पद—त्रिचतुरः, स्त्रियां, तिसृचतसृ । **अनुवृत्ति**—विभक्तौ । **विधिसूत्र ।**

चतस्रो ऋतो रादेशोऽचि । गुणदीर्घोत्वानामपवादः । तिस्रः–२ । तिसृभिः । तिसृभ्यः–२ । आमि नुट् । **(२४७) न तिसृचतसृ ६।४।४ ।** एतयोर्नामि दीर्घो न । तिसृणाम् । तिसृषु । द्वे–२ । द्वाभ्याम्–३ । द्वयोः–२ । गौरी । गौर्यौ । गौर्यः । हे गौरि ! गौर्यै—इत्यादि । शेषं बहुश्रेयसीवत् । एवं नद्यादयः । लक्ष्मीः । शेषं गौरीवत् । एवं

---

(२४६) **तिस्र इति ।** 'त्रिशब्दाज्जसि 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन तिसृ आदेशे 'तिसृ+अस्' इति जाते, प्राप्तं यणादेशं प्रबाध्य 'ऋतो ङि०' इत्यनेन गुणे प्राप्ते, तमपि प्रबाध्य 'अचि र ऋतः' इत्यनेन ऋकारस्य रेफादेशे सस्य रुत्वे विसर्गे च कृते 'तिस्रः' इति रूपम् ।

(२४७) **न तिसृचतसृ इति ।** 'ढ्रलोपे' इत्यतः 'दीर्घः' इति, 'नामि' इति सूत्रश्चानुवर्तते । तदाह—**एतयोरिति ।**

मूलार्थ—विभक्ति के परे रहते स्त्रीलिङ्ग में वर्तमान त्रि और चतुर् शब्दो को क्रमशः तिसृ और चतसृ आदेश होता है ।

विमर्श—इस सूत्र में 'अष्टन आ विभक्तौ' से निमित्तवाचक पद 'विभक्तौ' की अनुवृत्ति आती है । स्थानी त्रि और चतुर् तथा आदेश तिसृ और चतसृ दोनों की संख्या समान होने से यथासंख्य परिभाषा द्वारा क्रम से त्रि=तिसृ और चतुर्=चतसृ आदेश होते हैं ।

(२४६) पद—अचि, रः, ऋतः । **अनुवृत्ति**—तिसृचतसृ । **विधिसूत्र ।**

मूलार्थ—अच् के परे रहने पर तिसृ, चतसृ शब्द के 'ऋ' के स्थान पर 'र्' आदेश होता है । गुण, दीर्घ तथा उत्व का यह अपवाद है । तिस्रः ।

विमर्श—सूत्र में स्थानीवाचक पद का अभाव है । अतः पूर्वसूत्र (२४५) से 'तिसृचतसृ' की अनुवृत्ति आती है । यह सूत्र 'ऋतो ङिसर्वनामस्थानयोः' से प्राप्त गुण, 'प्रथमयोः पूर्वसवर्णः' से प्राप्त दीर्घ तथा 'ऋत उत्' से प्राप्त उत्व विधि का बाधक है ।

उदाहरण—(१) त्रि+(अस्) जस् अथवा शस्, (त्रि=तिसृ—'त्रिचतुरोः स्त्रियाम्०') तिसृ+अस् ('ऋतो ङि०' से प्राप्त गुण को बाधकर 'अचि र ऋतः' से ऋ=र्)—तिस्रस् (स्=र्) तिस्रर् (र्=ः)=तिस्रः । (२) त्रि+भिस् (त्रि=तिसृ)—तिसृभिस् (स्=र्, र्=ः)=तिसृभिः । (३) त्रि+भ्यस् (त्रि=तिसृ) तिसृभ्यस् (स्=र्, र्=ः)=तिसृभ्यः ।

(२४७) पद—न, तिसृचतसृ । **अनुवृत्ति**—दीर्घः, नामि । **विधिसूत्र (निषेध) ।**

मूलार्थ—'नाम्' परे रहते तिसृ और चतसृ शब्द को दीर्घ नहीं होता ।

विमर्श—प्रकृत सूत्र में 'ढ्रलोपे पूर्वस्य०' (६।३।१११) से 'दीर्घः' तथा 'नामि' (६।४।३) सूत्र की अनुवृत्ति आ रही है । इस प्रकार नाम् (नुम् सहित 'आम्' विभक्ति) के परवर्ती रहने पर तिसृ, चतसृ शब्द को दीर्घ नहीं होता ।

उदाहरण—(१) त्रि+आम्, (त्रि=तिसृ) तिसृ+आम् (नुट् का आगम) तिसृ+नाम् ('नामि' से प्राप्त दीर्घ का 'न तिसृचतसृ' से निषेध; ऋ के पश्चाद्वर्ती 'न्' को 'ण'—'ऋवर्णान्नस्य णत्वं वाच्यम्')=तिसृणाम् । (२) त्रि+सुप् (सु), (त्रि=तिसृ)—तिसृसु (स्=ष्)= तिसृषु ।

द्वि शब्द से प्रथमा द्विवचन में औ 'द्वि+औ' ('इ'='अ'—त्यदादीनामः) **द्व+औ** (टाप्

तरीतन्त्र्यादयः । स्त्री । हे स्त्रि ! (२४८) स्त्रियाः ६।४।७९ । अस्येयङजादौ प्रत्यये । स्त्रियौ । स्त्रियः । (२४९) वाऽम्शसोः ६।४।८० । अमि शसि च स्त्रिया इयङ्

(२४८) **स्त्रिया इति ।** 'अचि श्नु०' इत्यतोऽचीति, इयङिति चानुवर्तते । तदाह—**स्त्रीशब्दस्येत्यादिना । स्त्रियाविति ।** स्त्रीशब्दात् 'औ' विभक्तौ 'स्त्री + औ' इति जाते 'स्त्रियाः' इति इयङादेशे कृते 'स्त्रियौ' इति ।

(२४९) **वाऽम्शसोरिति ।** स्त्रिया इति इयङ् इति चानुवर्तते । तदाह—**अमि शसि चेत्यादि । स्त्रीणामिति ।** स्त्रीशब्दादामि 'स्त्री + आम्' इति स्थिते 'स्त्रियाः'

तथा दीर्घ)=द्वा+औ (औ=शी—'ई') द्वा+ई (आ+ई='ए'—'गुण')=द्वे । (२) द्वि+भ्याम् (इ=अ) द्व+भ्याम्, (टाप् तथा दीर्घ)=द्वाभ्याम् । (३) द्वि+ओस् (इ=अ) द्व+ओस्, (टाप् तथा दीर्घ) द्वा+ओस्, (आ=ए—'आङि चापः')—द्वे+ओस् (ए=अय् आदेश)=द्वयोस्, (स्=र्, र्=:)—द्वयोः ।

दीर्घ ईकारान्त गौरीशब्द—गौर+ङीष् स्त्रीप्रत्यय होने पर निष्पन्न होता है । (१) गौरी+सु ('हल्ङ्याब्भ्यो०' से स् का लोप)=गौरी । (२) गौरी+औ, (पूर्वसवर्ण दीर्घ का निषेध—'दीर्घाज्जसि च' यण्)=गौर्यौ । (३) गौरी+जस् (अस्) (इ='य्'-यण्)—गौर्यस्, (स्=र्, र्=:)=गौर्यः । (४) हे गौरी+सु (ई=इ—ह्रस्व—'अम्बार्थनद्योर्ह्रस्वः') हे गौरि+स् (स् का लोप—'एङ्ह्रस्वात्सम्बुद्धेः')=हे गौरि ! (५) गौरी+ङे (ए), (आट् का आगम) गौरी+आ+ए, (आ+ए=ऐ—'आटश्च' से वृद्धि) गौरी+ऐ (ई=य्—'यण्')=गौर्यै । इत्यादि । शेष रूप 'बहुश्रेयसी' शब्द की तरह बनते हैं । इसी प्रकार नदी, वाणी आदि शब्दों के रूप सिद्ध होंगे ।

लक्ष्मी+सु (यहाँ स्त्रीप्रत्यय सम्बन्धी ईकार न होने से सुलोप नहीं हुआ (स्=र्, र्=:) =लक्ष्मीः । अवशिष्ट रूप गौरी शब्द के समान बनते हैं । इसी प्रकार तरी=(नाव), तन्त्री=(वीणा) आदि शब्दों के रूप निष्पन्न होंगे ।

'स्त्री' शब्द के रूपों की रचना-प्रक्रिया बतलायी जा रही है—(१) स्त्री+सु (स् का लोप—'हल्ङ्याब्भ्यः०')=स्त्री । (२) हे स्त्री+सु (ई=इ 'ह्रस्व'—'अम्बार्थनद्योर्ह्रस्वः') हे स्त्रि+स् ('स्' का लोप—'एङ्ह्रस्वात्०')=हे स्त्रि ।

(२४८) पद—स्त्रियाः । **अनुवृत्ति**—इयङ्, अचि । **विधिसूत्र ।**

मूलार्थ—अजादि प्रत्यय के परे रहने पर 'स्त्री' शब्द को 'इयङ्' आदेश होता है । स्त्रियौ । स्त्रियः ।

विमर्श—यहाँ 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६।४।७७) से आदेशवाचक पद—इयङ तथा निमित्तवाची 'अचि' की अनुवृत्ति आती है । 'प्रत्यये' पद का अध्याहार करने पर 'अचि' में तदादि विधि होकर 'अजादि प्रत्यय परे होने पर स्त्री शब्द को इयङ् आदेश होता है । 'ङिच्च' सूत्र के द्वारा ई के स्थान पर 'इयङ्' होगा ।

उदाहरण—(१) स्त्री+औ (ई=इयङ्-इय्)=स्त्रियौ । (२) स्त्री+जस् (अस्), (ई=इय्) स्त्रिय्+अस् (स्=र्, र्= :)=स्त्रियः ।

(२४९) पद—वा, अम्शसोः । **अनुवृत्ति**—स्त्रियाः, इयङ् । **विधिसूत्र** (विकल्प) ।

मूलार्थ—अम् और शस् विभक्ति के परे रहते 'स्त्री' शब्द को इयङ् आदेश विकल्प से होता है। स्त्रियम्-स्त्रीम् । स्त्रियः-स्त्रीः । इत्यादि ।

वा । स्त्रियम्-स्त्रीम् । स्त्रियः-स्त्रीः । स्त्रिया । स्त्रियै । स्त्रियाः-२ । स्त्रियोः-२ । परत्वान्नुट्-स्त्रीणाम् । स्त्रियाम् । स्त्रीषु । श्रीः । श्रियौ । श्रियः । श्रियम् । श्रियौ । श्रियः । श्रिया । श्रीभ्याम् । श्रीभिः । **(२५०) नेयङुवङ्स्थानावस्त्री १।४।४ ।** इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री । हे श्रीः । ङिति ह्रस्वश्चेति

इति प्राप्तम् इयङादेशं परत्वात् बाधित्वा 'ह्रस्वनद्यापो नुट्' इति नुडागमेऽनुबन्धलोपे पर्जन्यवल्लक्षणप्रवृत्त्या दीर्घे णत्वे च कृते 'स्त्रीणामि'ति ।

(२५०) नदीसंज्ञाया निषेधकमाह—**नेयङुवङिति** । अत्र 'यू स्त्र्याख्यौ नदी' इत्यतो यू नदीत्यनुवर्तते । इयङुवङोः स्थाने स्थितिर्ययोरिति व्यधिकरणबहुव्रीहिः ।

विमर्श—प्रकृत सूत्र में स्थानी तथा आदेशवाची पदों का अभाव है । अतः 'स्त्रियाः' (२४८) से स्त्री तथा 'अचि श्नु०' (२२०) से आदेशवाचक पद 'इयङ्' की अनुवृत्ति आती है । अतः द्वितीया एकवचन अम् तथा बहुवचन शस् परे रहते 'स्त्री' शब्द के 'ई' को इयङ् विकल्प से होगा ।

उदाहरण—(१) स्त्री+अम् (ई=इय्—विकल्प से)=स्त्रियम् । इयङ् न होने पर पक्ष में पूर्वरूप होकर—स्त्रीम् । (२) स्त्री+शस् (अस्), (ई=इय् विकल्प से) स्त्रियस्, (स्=र्, र्=ः)=स्त्रियः । पक्ष में—स्त्री+अस् (ई+अ='ई' पूर्वसवर्ण दीर्घ) स्त्रीस् (स्=र्, र्=ः) =स्त्रीः । (३) स्त्री+टा (आ), (ई=इय्)=स्त्रिया । (४) स्त्री+ङे (ए), (ई=इय्)—स्त्रिय्+ए, (आट् का आगम) स्त्रिय्+आ+ए (आ+ए='ऐ' वृद्धि—'आटश्च')=स्त्रियै । (५) स्त्री (ङसि अथवा ङस्)+अस्, (आट् का आगम) स्त्री+आ+अस् ('आटश्च' से वृद्धि) स्त्री+आस् (ई=इयङ्) स्त्रियास् (स्=र्, र्=ः)=स्त्रियाः । (६) स्त्री+ओस् (ई=इयङ्) स्त्रियोस् (स् को रुत्व-विसर्ग)=स्त्रियोः । (७) स्त्री+आम्, ('स्त्रियाः' से प्राप्त इयङ् को बाधकर पर होने से 'ह्रस्वनद्यापो नुट्' से नुट् (न्) का आगम) स्त्री+नाम् (दीर्घ, न्=ण्)= स्त्रीणाम् । (८) स्त्री+ङि (ङि=आम्), स्त्री+आम् (ई=इय्—'स्त्रियाः')=स्त्रियाम् । (९) स्त्री+सु (सुप्) (स्=ष्—'आदेशप्रत्यययोः')=स्त्रीषु ।

ईकारान्त स्त्रीलिङ्ग 'स्त्री' शब्द के रूप

एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०—स्त्री	स्त्रियौ	स्त्रियः	पं०—स्त्रियः	स्त्रीभ्याम्	स्त्रीभ्यः
द्वि०—स्त्रियम्, स्त्रीम्	स्त्रियौ	स्त्रियः, स्त्रीः	ष०—स्त्रियाः	स्त्रियोः	स्त्रीणाम्
तृ०—स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः	स०—स्त्रियाम्	स्त्रियोः	स्त्रीषु
च०—स्त्रियै	स्त्रीभ्याम्	स्त्रीभ्यः	सं०—हे स्त्रि !	हे स्त्रियौ	हे स्त्रियः

'श्री' (शोभा, लक्ष्मी) शब्द के रूपों की रचना-प्रक्रिया बतलायी जा रही है । (१) √श्रि +क्विप्, दीर्घ—'क्विब्वचिप्रच्छि०')=श्री । श्री+सु (ङीप्-प्रत्ययान्त न होने से स् का लोप नहीं हुआ, स्=रुत्व-विसर्ग)=श्रीः । (२) श्री+औ (ई=इयङ् (इय्)—'अचि श्नु०')= श्रियौ । (३) श्री+जस् (अस्), (ई=इय्) श्रियस् (रुत्व-विसर्ग)=श्रियः । (४) श्री+अम् (ई=इय्)=श्रियम् । (५) श्री+औट् (औ), (ई=इय्)=श्रियौ । (६) श्री+शस् (अस्), (ई=इय्)—श्रियस् (स्=र्, र्=ः) श्रियः । (७) श्री+टा (आ), (ई=इय्) =श्रिया । (८) श्री+भ्याम्=श्रीभ्याम् । (९) श्री+भिस् (स् को रुत्व-विसर्ग)=श्रीभिः ।

(२५०) पद—न, इयङुवङ्स्थानौ, अस्त्री । **अनुवृत्ति**—यू, नदी । **संज्ञासूत्र** (निषेध) ।

वा नदीत्वम् । श्रियै–श्रिये । श्रियाः–श्रियः–२ । (२५१) वाऽऽमि १।४।५ । इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो, न तु स्त्री । श्रीणाम्–श्रियाम् । ङौ–

इयङुवङ्योग्याविति यावत् । **श्रियै इति ।** 'श्री + ङे' इत्यत्र 'यू स्त्र्याख्यौ नदी' इत्यनेन नदीसंज्ञायां प्राप्तायाम्, 'नेयङुवङ्स्थानावस्त्री' इति निषेधे 'ङिति ह्रस्वश्चे'ति विकल्पेन नदीसंज्ञायाम् 'आण्नद्याः' इत्याटि 'आटश्चे'ति वृद्धौ 'अचि श्नु०' इत्यादिना इयङादेशे कृते 'श्रियै' इति । नदीसंज्ञाया अभावपक्षे तु—इयङि 'श्रिये' इति रूपम् ।

(२५१) **वाऽऽमीति ।** अत्र 'यू स्त्र्याख्यौ नदी' नञ्वर्जं 'नेयङुवङ्स्थानावस्त्री' इति सूत्रद्वयमनुवर्तते । वा आमीति छेदः । आमि नदीकार्याभावात् । **श्रीणामिति ।** नदीत्वपक्षे आमि 'ह्रस्वनद्यापः' इति नुटि पर्जन्यवन्न्यायेन दीर्घे णत्वे च 'श्रीणाम्' इति । नदीत्वाभावे इयङि श्रियामिति ।

मूलार्थ—'स्त्री' शब्द को छोड़कर, इयङ्-उवङ् के स्थानी नित्य स्त्रीलिंग ईकार एवम् ऊकार की नदीसंज्ञा नहीं होती । हे श्रीः । 'ङिति ह्रस्वश्च' से विकल्प से नदीसंज्ञा होकर—श्रियै–श्रिये । श्रियाः–श्रियः–२ ।

विमर्श—प्रकृत सूत्र में 'यू स्त्र्याख्यौ नदी' (१।४।३) से 'यू' तथा 'नदी' पदों की अनुवृत्ति आती है । तदनुसार स्त्री शब्द से भिन्न इयङ्, उवङ् आदेश जिनके स्थान पर होते हों, ऐसे ही 'ई' और 'ऊ' को नदीसंज्ञा नहीं होती ।

(२९१) **किमः क इति । विभक्ताविति** । 'अष्टन आ विभक्तौ' इत्यतस्तदनुवृत्तेरिति भावः ।

(२९२) **इदमो म इति** । अत्र 'तदोः सः सौ' इत्यतः 'सावि'त्यनुवर्तते । 'इदम्' शब्दस्य मस्य मः स्यात् सौ' इत्यर्थः । मकारस्य मकारविधानं 'त्यदादीनामः' इत्यत्वबाधनार्थम् ।

विमर्श—सूत्र में आदेशवाचक पद का अभाव है । अतः 'खरवसानयोः०' (८।३।१५) से 'विसर्जनीयः' पद की अनुवृत्ति आती है । यह नियम सूत्र है । तदनुसार सप्तमी एकवचन सुप् में 'रु' के स्थान पर ही विसर्ग होता है, अन्य रेफ को नहीं ।

उदाहरण—(९) चतुर्+सुप् (सु), (स्=ष्—'आदेशप्रत्यययोः') चतुर्षु ('खरवसानयोः०' से र्= : की प्राप्ति 'रोः सुपि' नियम से विसर्ग नहीं हुआ) 'अचो०' से ष् को द्वित्व प्राप्त, उसका 'शरोऽचि' से निषेध)=चतुर्षु ।

(२९०) पद—मः, नः, धातोः । **अनुवृत्ति**—पदस्य, अन्ते । **विधिसूत्र ।**

मूलार्थ—पदान्त में मान्त धातु के 'म्' के स्थान में 'न्' आदेश होता है । प्रशान् ।

विमर्श—'पदस्य' का अधिकार है । 'स्कोः संयोगाद्योरन्ते च' (८।२।२९) से 'अन्ते' की अनुवृत्ति आती है । तदनुसार—पद के अन्त में स्थित धातु सम्बन्धी 'म्' को 'न्' आदेश होता है ।

उदाहरण—(१) प्रशाम्+सु, ('सु' विभक्ति का लोप) प्रशाम्, (म्=न्)=प्रशान् । (२) प्रशाम्+औ=प्रशामौ ।

(२९१) पद—किमः, कः । **अनुवृत्ति**—विभक्तौ । **विधिसूत्र ।**

मूलार्थ—विभक्ति के पर रहते 'किम्' के स्थान में 'क' आदेश होता है । कः । कौ । के ।

विमर्श—यहाँ 'अष्टन आ विभक्तौ' (३२१) से निमित्त-वाचक 'विभक्तौ' पद की अनुवृत्ति आ रही है । क आदेश (क्+अ) अनेकाल् होने से सम्पूर्ण 'किम्' के स्थान में होगा ।

उदाहरण—(१) किम्+सु (स्); (किम्=क)—क+स्, (स्=र्=:)=कः । (२) किम्+औ, (किम्=क)—क+औ (अ+औ='औ'—'वृद्धि')=कौ । (३) किम्+अस्, (किम्=क)—क+जस्, (जस्=शी)—क+ई, (अ+ई='ए'—गुण)=के । शेष रूप सर्व शब्द की तरह बनेंगे ।

(२९२) पद—इदमः, मः । **अनुवृत्ति**—सौ । **विधिसूत्र ।**

मूलार्थ—'सु' के पर रहते 'इदम्' शब्द के 'म्' के स्थान में 'म्' ही आदेश होता है । 'त्यदादीनामः' से प्राप्त अ आदेश का यह अपवाद है ।

परे । त्यदाद्यत्वापवादः । (२९३) इदोऽय् पुंसि ७।२।१११ । इदम इदोऽय् सौ पुंसि । अयम् । त्यदाद्यत्वे । (२९४) अतो गुणे ६।१।९७ । अपदान्तादतो गुणे पररूपमेकादेशः स्यात् । (२९५) दश्च ७।२।१०९ । इदमो दस्य मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः । (२९६) अनाप्यकः ७।२।११२ ।

(२९३) **इदोऽयिति ।** 'यः सौ' इत्यतः सावित्यनुवर्तते । **अयमिति ।** 'इदम् + सु' इत्यत्र 'त्यदादीनामः' इति प्राप्तमकारं प्रबाध्य 'इदमो मः' इति मस्य मकारे कृते 'इदम् + स्' इति स्थिते 'इदोऽय् पुंसि' इति इद्भागस्य अयादेशे, 'हल्ङ्याब्भ्यः' इति सस्य लोपे अयमिति ।

(२९४) **अतो गुणे इति ।** अत्र 'एङि पररूपमि'त्यतः पररूपमित्यनुवर्तते, 'उस्यपदान्तादि'त्यत अपदान्तादिति च । तदाह—**अपदान्तादित्यादि ।**

(२९५) **दश्चेति ।** 'इदमो मः' इत्यत इदम इति, 'अष्टन आ विभक्तौ' इत्यतः विभक्ताविति चानुवर्तते । तदाह—**इदमो दस्येत्यादिना । इमाविति ।** 'इदम् + औ' इत्यत्र 'त्यदादीनामः' इति मस्य अत्वे 'अतो गुणे' इति पररूपे 'इद + औ' इति जाते 'दश्चे'त्यनेन दकारस्य मकारे वृद्धौ च कृतायाम् 'इमौ' इति रूपम् ।

विमर्श—यहाँ 'तदोः सः सावनन्त्ययोः' (७।२।१०६) से 'सौ' पद की अनुवृत्ति आने से—सु विभक्ति के परवर्ती होने पर इदम् शब्द के मकार के स्थान पर 'म्' ही आदेश होता है ।

(२९३) पद—इदः, अय्, पुंसि । **अनुवृत्ति**—इदमः, सौ । **विधिसूत्र ।**

मूलार्थ—'इदम्' शब्द के 'इद्' भाग को 'अय्' आदेश होता है, पुँल्लिङ्ग में 'सु' के परे रहते । अयम् ।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'इदमो मः' (२९२) से 'इदमः' तथा 'यः सौ' (७।२।११०) से 'सौ' पद की अनुवृत्ति आ रही है । तदनुसार 'पुंलिङ्ग में सु विभक्ति के परे रहते 'इदम्' शब्दावयव इद् के स्थान पर 'अय्' आदेश होगा ।

उदाहरण—इदम्+सु (इद्=अय्) अय्-अम्+स् ('स्' विभक्ति का लोप)=अयम् ।

(२९४) पद—अतः, गुणे । **अनुवृत्ति**—अपदान्तात्, पररूपम् । **विधिसूत्र ।**

मूलार्थ—अपदान्त अकार से गुण पर रहते पूर्व-पर के स्थान में पररूप एकादेश होता है ।

विमर्श—प्रकृत सूत्र में 'उस्यपदान्तात्' (६।१।९६) से 'अपदान्तात्' तथा 'एङि पररूपम्' से 'पररूपम्' की अनुवृत्ति आ रही है । तदनुसार—'पदान्त-भिन्न ह्रस्व अकार से गुणसंज्ञक वर्ण (अ, ए, ओ) पश्चाद्वर्ती रहने पर पूर्व-पर वर्णों के स्थान में परवर्ण रूप एकादेश हो जाता है ।

(२९५) पद—दः, च । **अनुवृत्ति**—इदमः, मः, विभक्तौ । **विधिसूत्र ।**

मूलार्थ—विभक्ति के परवर्ती रहने पर 'इदम्' शब्द सम्बन्धी दकार के स्थान में मकार आदेश होता है । इमौ । इमे । त्यदादि शब्दों का सम्बोधन में प्रयोग नहीं होता ।

विमर्श—सूत्रार्थ की स्पष्टता के लिए—'इदमो मः' (२९२) सूत्र तथा 'अष्टन आ०' से 'विभक्तौ' पद की अनुवृत्ति आती है । तदनुसार (सुभिन्न) विभक्ति के परे रहते 'इदम्' शब्द के 'द्' के स्थान पर 'म्' आदेश होता है ।

उदाहरण—(१) इदम्+औ (म्=अ 'त्यदादीनामः' इद अ+औ, (अ+अ='अ'

अककारस्य इदम इदोऽन्, आपि विभक्तौ । 'आबि'ति प्रत्याहारः । अनेन । (२९७) **हलि लोपः ७।२।११३ ।** अककारस्य इदम इदो लोप आपि हलादौ । *** नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे *** । **(२९८) आद्यन्तवदेकस्मिन् १।१।२१ ।** एकस्मिन् क्रिय-

---

(२९६) **अनाप्यक इति ।** 'अन् + आपि + अकः' इति पदच्छेदः । न विद्यते कोऽस्येति अक् तस्य अकः ककाररहितस्येति भावः । 'इदमो मः' इत्यत इदम इति, 'इदोऽय्०' इत्यतः इद इति, 'अष्टन आ विभक्तावि'त्यतः विभक्ताविति चानुवर्तते । एवं ककाररहितस्य 'इदम्'शब्दस्य यः इद्भागस्तस्य 'अन्' आदेशः स्यादापि विभक्ती परत इत्यर्थः । **अनेनेति ।** 'इदम् + (टा) आ' इत्यत्र 'त्यदादीनामः' इत्यकारान्तादेशे पररूपे 'इद + आ' इति जाते 'अनाप्यकः' इत्यद्भागस्य अनादेशे 'आद् गुणः' इति गुणे 'अनेन' इति रूपम् ।

(२९७) **हलि लोप इति ।** पूर्वसूत्रादाप्यक इति, 'इदमो मः' इत्यतः 'इदमः' इति, 'इदोऽय्०' इत्यत इद इति 'अष्टन आ' इत्यतः विभक्ताविति चानुवर्तते । विभक्तौ हलीत्यस्य विशेषणत्वेन तदादिविधिस्तदाह—**अककारस्येत्यादि । नानर्थक इति ।** अभ्यासविकारं वर्जयित्वाऽनर्थकेऽलोऽन्त्यविधिर्न भवतीत्यर्थः । अभ्यासविकारे त्वनर्थकेऽपि तत्प्रवर्त्तते यथा 'बिभर्ति' ।

पररूप—'अतो गुणे')—इद+औ (द्=म्—'दश्च') इम+औ (पूर्वसवर्णदीर्घ का बाधकर अ+औ='औ'—वृद्धि)=इमौ । (२) इदम्+जस् (म्=अ) इद+अ+जस्, (अ+अ= 'अ'—पररूप)—इद+जस्, (जस्=शी-ई)—इद+ई (द्=म्—'दश्च') इम+ई(अ+ ई='ए'—गुण)=इमे ।

(२९६) पद—अन्, आपि, अकः । **अनुवृत्ति**—इदमः, इदः, विभक्तौ । **विधिसूत्र ।**

मूलार्थ—'आप्' विभक्ति के पर रहते ककाररहित इदम् शब्द के 'इद्'भाग को 'अन्' आदेश होता है । टा से लेकर 'सुप्' के पकार पर्यन्त 'आप्' प्रत्याहार है । अनेन ।

विमर्श—सूत्रार्थ की स्पष्टता के लिए—'इदमो मः' (२९२) से 'इदमः', 'इदोऽय् पुंसि' (२९३) से 'इदः' तथा 'अष्टन आ विभक्तौ' (३२१) से 'विभक्तौ' पद की अनुवृत्ति लाई जा रही है । आप् प्रत्याहार के अन्तर्गत तृतीया एकवचन टा (आ) से लेकर सुप् (सप्तमी बहुवचन) पर्यन्त विभक्तियों का समावेश होता है ।

उदाहरण—(३) इदम्+टा (म्=अ, पररूप) इद+टा (इद्=अन्—'अनाप्यकः') अन+टा (टा=इन)—अन+इन (अ+इ='ए'—गुण)=अनेन ।

(२९७) पद—हलि, लोपः । **अनुवृत्ति**—आपि, अकः, इदमः, इदः । **विधिसूत्र ।**

मूलार्थ—हलादि आप् विभक्ति के पर रहते, ककार-रहित इदम् शब्द के इद्भाग का लोप होता है । ('अभ्यास-विकार को छोड़कर अनर्थक में अलोऽन्त्य परिभाषा की प्रवृत्ति नहीं होती' परि०) ।

विमर्श—यहाँ—'इदमो मः' (२९२) से 'इदमः', 'इदोऽय्०' (२९३) से 'इद्', 'अनाप्यकः' (२९६) से 'आपि' एवं 'अकः', तथा 'अष्टन आ०' (३२१) से विभक्तौ पदों की अनुवृत्ति अपेक्षित है । तदनुसार हलादि आप् (तृतीयादि) विभक्ति के पर रहने पर ककार रहित इदम् शब्द के अवयव 'इद्' का लोप होता है ।

माणं कार्यमादाविवान्त इव स्यात्। 'सुपि चे'ति दीर्घः। आभ्याम्। (२९९) **नेदमदसोरकोः ७।१।११।** अककारयोरिदमदसोर्भिस ऐस् न स्यात्। एभिः। अस्मै।

---

(२९८) **आद्यन्तवदिति।** एकशब्दश्चात्राऽसहायवाची। सप्तम्यन्तात् 'तत्र तस्येव' इति वतिः, 'एकस्मिन्' इत्युपमेये सप्तमीदर्शनात्। वतिश्चोभाभ्यां सम्बध्यते; 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नियमात्। तदाह—**एकस्मिन्निति।** तदादितदन्तयोः क्रियमाणं कार्यं तदादौ तदन्त इवाऽसहाये केवलेऽपि स्यादित्यर्थः। **आभ्यामिति।** 'इदम् + भ्याम्' इत्यत्र 'त्यदादीनामः' इत्यकारान्तादेशे पररूपे 'इद + भ्याम्' इति जाते 'हलि लोपः' इतीद्भागस्य लोपे प्राप्ते 'अन्लोऽन्त्यस्ये'ति अत्यस्य लोपे प्राप्ते 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' इति परिभाषयाऽलोऽन्त्यविध्यभावे इद्भागस्यैव लोपे 'अ + भ्यामि'ति स्थिते 'आद्यन्तवदेकस्मिन्' इति एकस्मिन्नेवाकारेऽन्तवद्भावेन अदन्तत्वात् 'सुपि चे'ति दीर्घे कृते 'आभ्यामि'ति।

(२९९) **नेदमदसोरकोरिति।** अत्र 'अतो भिस ऐस्' इत्यतो 'भिस ऐसि'त्यनु-

---

यहाँ अलोऽन्त्य परिभाषा की प्रवृत्ति इद्भाग के अनर्थक होने से नहीं हुई। क्योंकि—'अभ्यास (द्वित्व के पूर्व भाग) को छोड़कर अन्यत्र अनर्थक में अलोऽन्त्यपरिभाषा से विधि नहीं होती।'

(२९८) पद—आद्यन्तवद्, एकस्मिन्। **अतिदेशसूत्र।**

मूलार्थ—एक (असहाय) में किया जाने वाला कार्य आदि और अन्त की तरह होता है। 'सुपि च' से दीर्घ—आभ्याम्।

विमर्श—यह अतिदेशसूत्र है। एक शब्द यहाँ असहायवाची है। इस प्रकार जहाँ एक ही वर्ण को मानकर आदि या अन्त सम्बन्धी कोई विधान करना हो तो ऐसी अवस्था में उसी (एक) में आदिवत् तथा अन्तवद्भाव हो जाता है। यह लोकन्याय से सिद्ध है। यथा—'देवदत्तस्यैक एव पुत्रः, स एव ज्येष्ठः, स एव कनिष्ठः, स एव मध्यमः।' अर्थात् किसी व्यक्ति का एक ही पुत्र होने पर उसी में ज्येष्ठ, मध्यम एवं कनिष्ठादि का व्यवहार होता है। इसी को व्यपदेशिवद्भाव भी कहा जाता है।

उदाहरण—(४) इदम्+भ्याम्, (द्=अ, पररूप)—इद+भ्याम्, (अलोऽन्त्य परिभाषा की उपस्थिति से 'हलि लोपः' सूत्र द्वारा 'द्' के लोप की प्राप्ति, 'नानर्थके०' से निषेध होकर इद्भाग का लोप) अ+भ्याम्, ('आद्यन्तवदेकस्मिन्' से 'अ' को ही आदि और अन्त मानकर 'सुपि च' से अदन्त अंग 'अ'='आ'—दीर्घ=आभ्याम्।

(२९९) पद—न, इदमदसोः, अकोः। **अनुवृत्ति**—भिसः, ऐस्। **विधि (निषेध) सूत्र।**

मूलार्थ—ककार रहित इदम् औ अदस् शब्द से परे 'भिस्' को ऐस् नहीं होता। एभिः। अस्मै। एभ्यः। अस्मात्। अस्य। अनयोः। एषाम्। अस्मिन्। एषु।

विमर्श—प्रकृत सूत्र में 'अतो भिस ऐस्' (१५९) से 'भिसः' पदों की अनुवृत्ति आ रही है। तदनुसार ककार युक्त प्रत्ययों से रहित इदम् तथा अदस् शब्द से पश्चाद्वर्ती 'भिस्' के स्थान पर 'ऐस्' आदेश नहीं होगा।

उदाहरण—(१) इदम्+भिस् (म्=अ—'त्यदादीनामः', पररूप)—इद+भिस् ('इद्'

एभ्यः–२ । अस्मात् । अस्य । अनयोः । एषाम् । अस्मिन् । एषु । (३००) **द्वितीयाटौस्वेनः** २।४।३४। द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानम्–अन्वादेशः । यथा–'अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापये'ति । 'अनयोः पवित्रं कुलम्, एनयोः प्रभूतं

वर्तते । अकोरिति षष्ठी । तदाह—**अककारयोरित्यादिना । अस्मै इति ।** 'इदम् ए' इत्यत्र त्यदाद्यत्वे पररूपे स्मैभावे कृते हलि लोपः ।

(३००) **द्वितीयाटौस्वेन इति ।** द्वितीया च, टा च ओश्चेति द्वितीयाटौसः, तेष्विति द्वन्द्वः । 'इदमोऽन्वादेशे' इत्यत इदम इति, अन्वादेशे इति, 'एतदस्त्रतसोः' इत्यत एतदिति चानुवर्तते । तदाह—**द्वितीयायामित्यादि ।**

का लोप–'हलि लोपः')—अ+भिस् ('अतो भिस॰' से भिस्=ऐस् प्राप्त, उसका 'नेदमदसोरकोः' से निषेध, 'बहुवचने झल्येत्' से अ=ए)—ए भिस् (स्=रु=:)=एभिः । (२) इदम्+ङे, (म्=अ, पररूप) इद+ङे, (ङे=स्मै)—इद+स्मै ('इद्'भाग का लोप)=अस्मै । (३) इदम्+भ्यस् (पूर्ववत्, एत्व)=एभ्यः । (४) इदम्+ङसि, (अ, पूर्वरूप)—इद+ङसि, (ङसि=स्मात्) इद+स्मात्, ('इद्' का लोप)=अस्मात् । (५) इदम्=ङस् (अ, पररूप) इद+ङस्, (ङस्=स्य)—इद+स्य, (इद्भाग का लोप)=अस्य । (६) इदम्+ओस् (म्=अ, पररूप)—इद+ओस्, इद्=अन्—'अनाप्यकः') अन्+अ+ओस् ('ओसि च' से अ=ए) अने+ओस् (ए=अय् आदेश)—अनयोस् (स्=रु=:)=अनयोः । (७) इदम्+आम् (म्=अ, पररूप) इद+आम्, (सुट् (स्) का आगम)—इद+स्+आम्, (इद्भाग का लोप) अ+स्+अम् (अ=ए)—एसाम्, (स्=ष्)=एषाम् । (८) इदम्+ङि, (म्=अ, पररूप)—अद+ङि (ङि=स्मिन्, इद्भाग का लोप)=अस्मिन् । (९) इदम्+सुप् (सु), (अ, पररूप)—इद+सु (इद् का लोप, एत्व) एसु (स्=ष्)=एषु ।

मकारान्त सर्वनाम इदम् (=यह) शब्द के रूप (पुंल्लिङ्ग)

एक॰	द्वि॰	बहु॰	एक॰	द्वि॰	बहु॰
प्र॰—अयम्	इमौ	इमे	पं॰—अस्मात्	आभ्याम्	एभ्यः
द्वि॰—इमम्	इमौ	इमान्	ष॰—अस्य	अनयोः	एषाम्
तृ॰—अनेन	आभ्याम्	एभिः	स॰—अस्मिन्	अनयोः	एषु
च॰—अस्मै	आभ्याम्	एभ्यः			

प्रचुरप्रयोगादर्शनात् त्यदादेः सम्बोधनं नास्ति ।

(३००) पद—द्वितीयाटौस्सु, एनः । **अनुवृत्ति**—एतदः, इदमः, अन्वादेशे, अनुदात्तः । **विधिसूत्र ।**

मूलार्थ—अन्वादेश में द्वितीया विभक्ति एवम् टा और ओस् विभक्ति पर रहते इदम् और एतद् शब्द के स्थान में 'एन' आदेश होता है । किसी कार्य के विधान के लिए जिसका उपादान किया गया हो, उसी का कार्यान्तर विधान के लिए पुनः उपादान करना, अन्वादेश है । जैसे—'इसने व्याकरण पढ़ लिया, अब छन्द पढ़ाओ' । 'इन दोनों का कुल बड़ा पवित्र है, इनके पास बहुत धन भी है ।' एनम् । एनौ । एनान् । एनेन । एनयोः–२ । राजा ।

स्वमि'ति । एनम् । एनौ । एनान् । एनेन-२ । एनयोः । राजा । **(३०१) न ङिसम्बुद्धयोः ८।२।८ ।** नस्य लोपो न स्यात् ङौ सम्बुद्धौ च । हे राजन् । * ङावुत्तरपदे प्रतिषेधः * । ङौ तुच्छन्दस्युदाहरणम् । परमे व्योमन् सर्वा भूतानि । ब्रह्मनिष्ठः । राजानौ । राजानः । राजानम् । राजानौ । जञोर्ज्ञः । अल्लोपोऽनः । चुत्वम् । राज्ञः ।

---

(३०१) **न ङिसम्बुद्धयोरिति ।** 'नलोपः०' इत्यतः 'न' इति लुप्तषष्ठीकं 'लोपः' इति चानुवर्तते । तदुक्तं—**ङौ सम्बुद्धौ चेति । ङावुत्तरेति ।** समासोत्तरपदे परतो यो ङिस्तस्मिन्परे 'न ङिसम्बुद्धयोः' इति प्राप्तस्य निषेधस्य प्रतिषेधो वक्तव्य इति निष्कृष्टोऽर्थः । तेन 'ब्रह्मनिष्ठः' इत्यत्र नलोपो भवत्येव, समासे 'निष्ठा' इत्यस्योत्तरपदत्वात् ।

विमर्श—सूत्र में स्थानीवाचक पद का अभाव है । अतः 'इदमोऽन्वादेशे' (२।४।३२) से 'इदमः' तथा 'अन्वादेशे' एवम् 'एतदस्त्रतसोः' (२।४।३३) से 'एतदः' की अनुवृत्ति की जाती है । इस प्रकार द्वितीया विभक्ति, टा और ओस् के परवर्ती रहने पर अन्वादेश में इदम् तथा एतद् शब्द के स्थान पर 'एन' आदेश होता है । किसी कार्य के सम्पन्न करने में पूर्व में ही किसी की प्रवृत्ति हो चुकी हो, पुनः उसी को अन्य कार्य के लिए प्रेरित करना 'अन्वादेश' कहलाता है । अनेकाच् होने से 'एन' सर्वादेश है । उदाहरण—'अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापय' वाक्य में किसी ने अपने पुत्र आदि के व्याकरण अध्ययन के विषय में ज्ञात कराया । पुनः उसको वेद पढ़ाने के लिए निवेदन किया । यहाँ द्वितीय वाक्य में एन आदेश युक्त 'एनम्' पद का प्रयोग किया गया है । इदम्+अम् (इदम्=एन) एन+अम् (पूर्वरूप) =एनम् । इसी प्रकार—'अनयोः कुलं पवित्रम्, एनयोः प्रभूतं स्वमिति ।' इस वाक्य में भी 'एनयोः' अन्वादेश का रूप है । षष्ठी द्विवचन में—एतद्+ओस् , (एतद्=एन)—एन+ओस् (अ=ए—'ओसि च') एने+ओस् (ए=अय् आदेश)—एनयोस् (स्=रु=ः)= एनयोः । इसी प्रकार अन्वादेश में एनौ (औ), एनान् (शस्), एनेन (टा) रूप बनेंगे ।

नकारान्त पुंलिङ्ग राजन् (=राजा) शब्द के रूपों की रचना-प्रक्रिया का उल्लेख किया जा रहा है—राजन्+सु (उपधा दीर्घ)—राजान्+स् , ('स्' का लोप—'हल्ङ्याब्भ्यः') राजान् ('न्' का लोप—'नलोपः प्राति०')=राजा ।

(३०१) पद—न, ङि, सम्बुद्धयोः । **अनुवृत्ति**—नलोप । **विधि(निषेध)सूत्र ।**

मूलार्थ—'ङि' और 'सम्बुद्धि' (सम्बोधन का एकवचन 'सु') के पर होने पर 'न्' का लोप नहीं होता । हे राजन् ।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'नलोपः प्रातिपदिकान्तस्य' (२०२) से 'नलोपः' की अनुवृत्ति आती है । यह सूत्र 'नलोपः प्राति०' का बाधक है ।

उदाहरण—हे राजन्+सु (स् का लोप हो जाने पर 'नलोपः प्राति०' से 'न्' के लोप की प्राप्ति, उसका 'न ङिसम्बुद्धयोः' से निषेध)=हे राजन् !

(वा०) 'ङि' के विषय में उत्तरपद पर रहते 'न ङिसम्बुद्धयोः' से प्राप्त नलोप के निषेध का प्रतिषेध कहना चाहिए । इस वार्तिक द्वारा ब्रह्मन्+निष्ठः='ब्रह्मनिष्ठः' इत्यादि समासयुक्त स्थान में नलोप हो जाने से इष्ट रूप निष्पन्न होता है ।

(३०२) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ८।२।२। सुब्विधौ, स्वरविधौ, संज्ञाविधौ, कृति-तुग्विधौ च नलोपोऽसिद्धो, नान्यत्र —'राजाश्व' इत्यादौ । इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्याम् । राजभिः । राजभ्यः । राज्ञि–राजनि । यज्वा । यज्वानौ । यज्वानः । **(३०३) न संयोगाद्वमन्तात् ६।४।१३७।** वमन्तसंयोगादनो-

---

(३०२) नलोप इति । सुप्च, स्वरश्च, संज्ञा च तुक् चेति द्वन्द्वः, तेषां विधयस्तेषु सम्बन्धसामान्यषष्ठ्या समासः । 'द्वन्द्वान्ते श्रूयमाणमि'ति नियमेन विधिशब्दस्य प्रत्येकं सम्बन्धः । 'पूर्वत्रासिद्धमि'त्यतः 'असिद्धमि'त्यनुवर्तते । तदाह—**सुब्विधाविति । राजभ्यामिति ।** 'राजन् + भ्याम्' इत्यत्र नलोपे कृते 'नलोपः' इत्यादिना नलोपस्यासिद्धत्वात् 'सुपि चे'ति दीर्घो न भवति, राजभ्यामिति ।

ङि प्रत्यय का उदाहरण वेद में प्राप्त होता है। 'परमे व्योमन्' यहाँ ङि विभक्ति 'सुपां सुलुक्०' से लोप होने पर 'न्' लोप प्राप्त था, उसका प्रकृत सूत्र द्वारा निषेध किया गया है ।

(१) राजन्+औ (उपधादीर्घ)=राजानौ । (२) राजन्+जस् (अस्)—(उपधादीर्घ) —राजानस्, (स्=रु= :)=राजानः । (३) राजन्+अम् (उपधादीर्घ)—राजानम् । (४) राजन्+(औट्) औ (उपधादीर्घ)=राजानौ । (५) राजन्+(शस्) अस्, ('अन्' के 'अ' का लोप—'अल्लोपोऽनः') राज्न्+अस्, (न्=ञ्—श्चुत्व) राज्ञ्+अस् (ज्+ञ=ज्ञ्)—राज्ञस् (स=र्= :)=राज्ञः ।

(३०२) पद—नलोपः, सुप्स्वरसंज्ञातुग्विधिषु, कृति । **अनुवृत्ति**—असिद्धः । **नियमसूत्र ।**

मूलार्थ—सुप्विधि, स्वरविधि, संज्ञाविधि तथा कृत्प्रत्ययपरक तुक्विधि में न का लोप असिद्ध रहता है, अन्यत्र 'राजाश्वः' इत्यादि प्रयोगों में असिद्ध नहीं रहता । इस प्रकार नलोप असिद्ध होने से आत्व, एत्व तथा ऐस् विधियाँ नहीं होतीं । राजभ्याम् । राजभिः । राजभ्यः । राज्ञि । राजनि । यज्वा । यज्वानौ । यज्वानः ।

विमर्श—यहाँ 'पूर्वत्राऽसिद्धम्' (८।२।१) से विभक्ति-विपरिणाम के द्वारा 'असिद्धः' पद की अनुवृत्ति आती है । तदनुसार सुप्विधि (कार्य), स्वर्विधि, संज्ञाविधि तथा कृत्प्रत्यय पर रहने पर तुक् (आगम) विधि में 'न्' का लोप असिद्ध होता है । इनके अतिरिक्त दीर्घ आदि कार्यों में नलोप असिद्ध नहीं होता । यथा—(राज्ञः अश्वः) राजन्+अश्वः (न् लोप) राज+अश्वः (न् का लोप असिद्ध न होने से सवर्णदीर्घ)=राजाश्वः ।

उदाहरण—(१) राजन्+भ्याम् ('न्' लोप होने पर, प्रकृत सूत्र द्वारा नलोप असिद्ध हो जाने से 'सुपि च' से दीर्घ नहीं होता)=राजभ्याम् । (२) राजन्+भिस् ('न' का लोप) राजभिस् (स्=रु=:)=राजभिः (यहाँ न लोप असिद्ध होने से भिस्=ऐस् नहीं होता । (३) राजन्+भ्यस् (नलोप, स=र्=:)=राजभ्यः (यहाँ न् लोप असिद्ध होने से 'बहुवचने झल्येत्' से एत्व नहीं होता) । (४) राजन्+ङि (इ), ('अन्' के अ का विकल्प से लोप—'विभाषा ङिश्योः') राज्न्+इ (श्चुत्व न्=ञ्, ज्+ञ्=ज्ञ्)=राज्ञि । पक्ष में—राजनि ।

(१) यज्वन् (=यज्ञकर्ता)+सु (स्), (उपधादीर्घ सु लोप) यज्वान् (न् का लोप) =यज्वा । (२) यज्वानौ (३) यज्वानः (राजन् शब्द की तरह बनते हैं) ।

(३०३) पद—न संयोगात्, वमन्तात् । **अनुवृत्ति**—अल्लोपः, अनः । **विधि(निषेध)सूत्र ।**

ऽकारस्य लोपो न । यज्वनः । यज्वना । यज्वभ्याम् । ब्रह्मणः । ब्रह्मणा । (३०४) इन्हन्पूषार्यम्णां शौ ६।४।१२। एषां शावेवोपधाया दीर्घः । (३०५) सौ च ६।४।१३ । इन्नादीनामुपधाया दीर्घोऽसम्बुद्धौ सौ । वृत्रहा । हे वृत्रहन् । (३०६)

---

(३०३) **न संयोगादिति ।** वश्च मश्चेति द्वन्द्वः, वयावन्तौ यस्येति बहुव्रीहिः । 'अल्लोपोऽनः' इति सूत्रमनुवर्तते । अन्तग्रहणं स्पष्टार्थम् । तदाह—**वमन्तेत्यादिना ।**

(३०४) **इन्हन्निति ।** 'ढ्रलोपे' इत्यतो दीर्घ इति, 'नोपधायाः' इत्यत उपधाया इति चानुवर्तते । 'सर्वनामस्थाने चासम्बुद्धौ' इत्येव दीर्घे सिद्धे नियमार्थमिदमित्याह—**शावेति ।**

(३०५) **सौ च इति ।** 'शौ'वर्जं इन्हन्निति सूत्रम्, 'ढ्रलोपे' इत्यतो दीर्घ इति, 'सर्वनामस्थाने' इत्यतः 'असम्बुद्धौ' इति चानुवर्तते । तदाह—**इन्नादीनामिति । वृत्रहा इति ।** वृत्रं हतवानिति वृत्रहा इन्द्रः । 'वृत्रहन् + सु' इत्यत्र 'हल्ङ्याब्भ्यः' इति सुलोपे 'सौ च' इति दीर्घे 'नलोपः प्रातिपदिकान्तस्ये'ति नलोपे 'वृत्रहा' इति ।

मूलार्थ—वकारान्त और मकारान्त संयोग से परे 'अन्' के अकार का लोप नहीं होता। यज्वनः । यज्वना । यज्वभ्याम् । ब्रह्मणः । ब्रह्मणा ।

विमर्श—सूत्रार्थ की पूर्णता के लिए सम्पूर्ण 'अल्लोपोऽनः' सूत्र की अनुवृत्ति लाई जा रही है । तदनुसार मकारान्त और वकारान्त संयोग से परवर्ती 'अन्' के 'अ' का लोप नहीं होता ।

उदाहरण—(१) यज्वन्+शस् (अस्) ('अल्लोपोऽनः' से प्राप्त 'अ' लोप का प्रकृत सूत्र से निषेध, क्योंकि यहाँ वकारान्त संयोग से परे अन् है, लोप नहीं हुआ) यज्वनस् (स्=र्=ः)=यज्वनः । (२) यज्वन्+टा ('अ' के लोप का निषेध)=यज्वना । (३) यज्वन्+भ्याम् (न् का लोप)=यज्वभ्याम् ।

इसी प्रकार नकारान्त ब्रह्मन् शब्द से शस् में 'ब्रह्मणः' तथा 'टा' विभक्ति में 'ब्रह्मणा' रूप बनते हैं ।

(३०४) पद—इन्हन्पूषार्यम्णां, शौ । **अनुवृत्ति**—दीर्घः, उपधायाः । **नियमसूत्र ।**

मूलार्थ—केवल 'शि' के पर रहते—इन्, हन्, पूषन् और अर्यमन् शब्दों की उपधा को दीर्घ होता है; अन्यत्र नहीं ।

विमर्श—सूत्रार्थ की स्पष्टता के लिए—'ढ्रलोपे०' (६।३।१११) से 'दीर्घः' तथा 'नोपधायाः (६।४।७) से 'उपधायाः' पदों की अनुवृत्ति आती है । सूत्रस्थ नकारान्त शब्दों में 'सर्वनामस्थाने चाऽसम्बुद्धौ' सूत्र से स्वतः दीर्घ सिद्ध था; पुनः यह सूत्र नियम करता है कि इन् आदि शब्दों की उपधा को 'शि' परवर्ती होने पर ही दीर्घ हो, अन्यत्र नहीं ।

(३०५) पद—सौ, च । **अनुवृत्ति**—इन्हन्पूषार्यम्णाम्, दीर्घः, उपधायाः, असम्बुद्धौ । **विधिसूत्र ।**

मूलार्थ—सम्बुद्धि-भिन्न 'सु' के पर रहते इन् आदि की उपधा को दीर्घ होता है । वृत्रहा । हे वृत्रहन् ।

विमर्श—यह पूर्वसूत्र का अपवाद है । 'इन्हन्पूषार्यम्णाम्', 'ढ्रलोपे' (६।३।१११) से 'दीर्घः', 'सर्वनामस्थाने' (६।४।८) से 'असम्बुद्धौ' पदों की अनुवृत्ति आ रही है । तदनुसार—'सम्बुद्धि-भिन्न सु विभक्ति के परवर्ती होने पर इन्, हन्, पूषन् और अर्यमन् शब्दों की उपधा को दीर्घ होता है ।

एकाजुत्तरपदे णः ८।४।१२। एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात् परस्य प्रातिपदिकान्त-नुम्-विभक्तिस्थस्य नस्य णत्वं स्यात्। वृत्रहणौ। वृत्रहणः। **(३०७) हो हन्तेर्ञ्णिन्नेषु ७।३।५४।** ञ्णिति णिति प्रत्यये ने च परे हन्तेर्हस्य कुत्वं

---

(३०६) **एकाजिति।** एकः अच् यस्मिन् तत् एकाच्। उत्तरपदश्च समासस्य चरमावयवे रूढः, तेन समास आक्षिप्यते। अत्र 'रषाभ्यां णो नः' इति, 'पूर्वपदात्संज्ञायामि'त्यतः 'पूर्वपदादि'ति, 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति चानुवर्तते। तदाह—**एकाजुत्तरपदमित्यादिना।** 'वृत्रहणावि'त्यत्र एकाजुत्तरपदं 'हन्' इति, तस्मिन्समासे 'वृत्रहन्नि'ति समुदायरूपे पूर्वपदं वृत्रेति, तत्र स्थितं निमित्तं रकारः, तस्मात्परस्य प्रातिपदिकान्तनकारस्य णकारः।

(३०७) **हो हन्तेरिति।** ह इति स्थानषष्ठी, हन्तेरित्यवयवषष्ठी। हन्तेरित्यत्र स्तिपा निर्देशाद् हन्धातोरिति लभ्यते। अङ्गस्येत्यधिकारात् ञ्णितोर्प्रत्ययत्वं लभ्यते। 'चजोः कु घिण्यतोः' इत्यतः 'कु' इत्यनुवर्तते। तदाह—**ञितीत्यादिना।**

उदाहरण—(१) वृत्रहन्+सु (उपधा दीर्घ)—वृत्रहान् स् (स् का लोप-'हल्ङ्याब्भ्यः') वृत्रहान् ('न्' का लोप)=वृत्रहा। (२) हे वृत्रहन्+सु (सम्बुद्धि परे होने से दीर्घ नहीं हुआ, नलोप का 'न ङि०' से निषेध, 'स्' का लोप)=हे वृत्रहन्।

(३०६) पद—एकाजुत्तरपदे णः। **अनुवृत्ति**—रषाभ्यां नः, पूर्वपदात्, प्रातिपदिकान्त-नुम् विभक्तिषु च। **विधिसूत्र।**

मूलार्थ—एक अच् है उत्तरपद में जिसके, ऐसा जो समास, उसमें पूर्वपदस्थित निमित्त रेफ सकार से परे प्रातिपदिकान्त नुम् और विभक्ति में स्थित 'न्' को 'ण्' होता है। वृत्रहणौ। वृत्रहणः।

विमर्श—सूत्र में स्थानीवाचक पद का निर्देश नहीं किया गया है। अतः 'रषाभ्यां नो णः समानपदे' (८।४।१) से 'रषाभ्याम् नः', 'पूर्वपदात्संज्ञायामगः' से 'पूर्वपदात्' तथा 'प्रातिपदिकान्तनुम्विभक्तिषु च' सूत्र की अनुवृत्ति आती है। इस प्रकार सूत्र का आशय यह है कि "जिस समस्त पद में उत्तरपद एक अच् वर्णात्मक हो, उस समास युक्त शब्द के पूर्व पद में स्थित र्, ष् से परे प्रातिपदिक के अन्त्य नकार, 'नुम्' के नकार तथा विभक्ति के नकार के स्थान पर णकार होता है।"

उदाहरण—(१) वृत्रहन्+औ (दीर्घ नहीं हुआ (३०४), 'न्'='ण्'—'एकाजुत्तरपदे णः')=वृत्रहणौ। (२) वृत्रहन्+जस् (अस्) (न्=ण्, स्=र्=:)=वृत्रहणः।

(३०७) पद—हः, हन्तेः, ञ्णिन्नेषु। **अनुवृत्ति**—'कु'। **विधिसूत्र।**

मूलार्थ—ञित्, णित् प्रत्यय तथा नकार परे रहते हन् धातु के 'ह्' को कुत्व (कवर्ग) होता है।

विमर्श—यहाँ 'चजोः कु घिण्यतोः' (७।३।५२) से 'कु' पद की अनुवृत्ति आ रही है। 'अङ्गस्य' का अधिकार है। तदनुसार ञ्-इत्संज्ञक, ण्-इत्संज्ञक अथवा 'न्' पर रहते ह् के स्थान पर (कु) कवर्गीय वर्ण 'घ्' होता है। क्योंकि कवर्गीय वर्णों में ह् के सदृश संवार, नाद, घोष तथा महाप्राण प्रयत्नवान् 'घ्' ही है।

स्यात् । **(३०८) हन्तेः ८।४।२२ ।** उपसर्गस्थान्निमित्ताद्धन्तेर्नस्य णः । प्रहण्यात् । **(३०९) अत्पूर्वस्य ८।४।२२ ।** हन्तेरत्पूर्वस्यैव नस्य णो नान्यस्य । प्रघ्नन्ति । योगविभागसामर्थ्यादनन्तरस्य विधिर्वा भवति, प्रतिषेधो वेति न्यायं बाधित्वा 'कुमति चे'ति णत्वमपि निवर्त्तते । वृत्रघ्नः इत्यादि । एवं शार्ङ्गिन् । यशस्विन् । अर्यमन् । पूषन् । **(३१०) मघवा बहुलम् ६।४।१२८ ।** मघवन्शब्दस्य वा 'तृ' इत्यन्तादेशः । ऋ इत् ।

---

(३०८) **हन्तेरिति ।** 'हन्तेरत्पूर्वस्ये'ति सूत्रं योगविभागेन व्याचष्टे । 'रषाभ्यां णो नः' इति 'उपसर्गादसमासेऽपि' इत्यत उपसर्गादिति चानुवर्तते । तदाह—**उपसर्गस्थादिति ।**

(३०९) **अत्पूर्वस्येति ।** अत्र 'हन्तेः' इति, 'रषाभ्यां नो णः' इति चानुवर्तते । उपसर्गादिति तु निवृत्तम् । हन्तेरत्पूर्वस्य नस्य णः स्यादिति लभ्यते । 'हन्तेः' इत्यनेनैव णत्वे सिद्धे नियमार्थमिदमित्याह—**हन्तेरत्पूर्वस्यैवेति ।**

(३१०) **मघवेति ।** 'अवर्णस्त्रसौ' इत्यतः तृ इत्यनुवर्तते । तदनुरोधात् 'मघवे'ति षष्ठ्यर्थे प्रथमा । तदाह—**मघवन्नित्यादि ।**

---

(३०८) पद—हन्तेः । **अनुवृत्ति**—रषाभ्यां नः णः, उपसर्गात् । **विधिसूत्र ।**

मूलार्थ—उपसर्गस्थ निमित्त से परे हन् धातु के 'न्' के स्थान पर 'ण्' होता है ।

विमर्श—योगविभाग से 'हन्तेरत्पूर्वस्य' सूत्र को विभक्त कर प्रथम भाग 'हन्तेः' का विवेचन किया जा रहा है । सूत्रार्थ हेतु 'रषाभ्याम्' (८।४।१) से 'रषाभ्याम् नः णः' तथा 'उपसर्गादसमासेऽपि' (८।४।१४) से 'उपसर्गात्' की अनुवृत्ति लाई जा रही है । तदनुसार—"उपसर्ग में स्थित निमित्त 'र्' तथा 'ष्' से पर 'हन्' धातु के 'न्' के स्थान पर 'ण्' होता है ।"

उदाहरण—'प्र+हन्+यात्' (यहाँ 'प्र' उपसर्ग में स्थित 'र्' से पर हन् धातु के न्=ण्) =प्रहण्यात् ।

(३०९) पद—अत्पूर्वस्य । **अनुवृत्ति**—हन्तेः, रषाभ्यां नः णः, उपसर्गात् । **नियमसूत्र ।**

मूलार्थ—हन् धातु के अत् (ह्रस्व अकार) पूर्वक 'न्' को ही 'ण्' होता है, अन्य को नहीं । सूत्र का योगविभाग करने से 'अनन्तरस्य विधिर्वा भवति, प्रतिषेधो वा' न्याय का बाधकर 'कुमति च' से प्राप्त णविधान की निवृत्ति हो जाती है । वृत्रघ्नः' इत्यादि ।

विमर्श—'हन्तेरत्पूर्वस्य' के द्वितीय भाग की व्याख्या प्रस्तुत की जा रही है । 'अत्पूर्वस्य' में 'हन्तेः', 'रषाभ्यां नो णः' तथा 'उपसर्गात्' की पूर्ववत् अनुवृत्ति आती है । तदनुसार "ह्रस्व अकार के पूर्व में रहने पर ही हन् धातु के 'न्' को 'ण्' होता है ।" सूत्र द्वितीय भाग के नियम के लिए है । पृथक् योगविभाग का फल यह है कि 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' अर्थात् अनन्तर=अव्यवहित को विधान या निषेध होता है । परिभाषा का बाधकर 'एकाजुत्तरपदे णः' (८।४।१२), 'कुमति च' (८।४।१३) तथा 'प्रातिपदिकान्त०' (८।४।११) से प्राप्त णत्व का भी यह निवर्तक होता है ।

उदाहरण—वृत्रहन्+शस् (अस्), ('अ्' का लोप—'अल्लोपोऽनः')—वृत्रह् न्+अस् (ह्=घ्—'हो हन्तेर्ञ्णिन्नेषु'—वृत्रघ् नस् (यहाँ 'आ' पूर्व न होने से णत्व नहीं—'अत्पूर्वस्य' स्=र्=ः)=वृत्रघ्नः । इसी प्रकार शार्ङ्गिन्, यशस्विन्, अर्यमन् तथा पूषन् शब्दों के रूप बनेंगे ।

(३१०) पद—मघवा, बहुलम् । **अनुवृत्ति**—'तृ' । **विधिसूत्र ।**

(३११) उगिदचां सर्वनामस्थानेऽधातोः ७।१।७० । अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात्सर्वनामस्थाने । मघवान् । इह उपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति, बहुलग्रहणात् । मघवन्तौ । मघवन्तः । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवद्भ्याम् । तृत्वाभावे सुटि—राजवत् । **(३१२) श्वयुवमघो-**

---

(३११) उगिदचामिति । उक् प्रत्याहार इद् येषान्ते उगितः, ते च अच्च उगिदचस्तेषाम् । 'अच्' इति लुप्तनकारस्य 'अञ्चु गतिपूजनयोः' इति धातोर्ग्रहणम् । अधातोरित्युगितामेव विशेषणम्, न त्वचः, असम्भवात् । 'इदितो नुम्धातोः' इत्यतो नुमित्यनुवर्तते । तदाह—**अधातोरुगित इत्यादि । मघवानिति ।** 'मघवन् + सु' इत्यत्र 'मघवा बहुलम्' इति विकल्पेन 'तृ' इत्यन्तादेशेऽनुबन्धलोपे मघवत् + स् इति जाते 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमि 'मघवन् त् स्' इति स्थिते 'हल्ङ्याब्भ्यः' इति सस्य लोपे, तकारस्य संयोगान्तलोपे उपधादीर्घे 'मघवान्' इति । तृत्वाभावपक्षे—'मघवा' इति ।

मूलार्थ—मघवन् शब्द को विकल्प से 'तृ' अन्तादेश होता है ।

विमर्श—'अर्वणस्त्रसावनञः' (६।४।१२७) सूत्र से 'तृ' पद की अनुवृत्ति आ रही है । अलोऽन्त्य परिभाषा द्वारा मघवन् के अन्त्य वर्ण 'न्' के स्थान पर 'तृ' आदेश होता है; 'तृ' में ऋ की इत्संज्ञा होती है ।

(३११) पद—उगिदचां, सर्वनामस्थाने, अधातोः । **अनुवृत्ति**—नुम् । **विधिसूत्र** ।

मूलार्थ—सर्वनामस्थान के पर होने पर धातुभिन्न जो उगित् और नलोपी अञ्च् धातु को 'नुम्' का आगम होता है । मघवान् । सूत्र में 'बहुल' पद का ग्रहण होने से दीर्घ की कर्तव्यता में संयोगान्त लोप असिद्ध नहीं होता । मघवन्तौ । मघवतः । मघवता । तृत्व के अभाव में मघवा । सुट् में—राजन् की तरह ।

विमर्श—यहाँ 'इदितो नुम्धातोः' (७।१।५८) से 'नुम्' की अनुवृत्ति आती है । सूत्रस्थ उगित् का तात्पर्य है—जिसमें उक्—उ, ऋ, ऌ वर्णों की इत्संज्ञा हो । 'अच्' पद से नलोप युक्त 'अञ्च्' धातु का ग्रहण किया जाता है । इस प्रकार सर्वनामस्थानसंज्ञक प्रत्ययों के पश्चाद्वर्ती होने पर धातुभिन्न उगित् और नकार लोप वाले अञ्च् धातु को नुम् का आगम होता है । 'नुम्' मित् होने से अन्त्य अच् से परे होगा ।

उदाहरण—(१) मघवन्+औ, (न्=तृ-त्)—मघवत्+औ, (नुम् (न्) का आगम)—मघवन् त्+औ=मघवन्तौ । (२) मघवन्+जस् (अस्) (न्=त्), मघवत्+औ (नुम् का आगम)=मघवन्तस्, (स्=र्=:)=मघवन्तः । (३) मघवन्+अम्=मघवन्तम् (पूर्ववत्प्रक्रिया) । (४) मघवन्+औट् (औ)=मघवन्तौ । (५) मघवन्+शस् (अस्) (सर्वनामस्थान परे न होने से नुम् नहीं हुआ)—मघवतस् (स्=र्=:)=मघवतः । (६) मघवत्+टा (आ)=मघवता । (७) मघवन्+भ्याम् (न्=त्; त्=द्—जश्त्व)=मघवद्भ्याम् । तृ—अन्तादेश के वैकल्पिक होने से उसके अभाव में सुट् (सु, औ, जस् , अम्, औट्) में—राजन् शब्द की तरह रूप बनते हैं ।

नामतद्धिते ६।४।१३३ । अन्नन्तानां भानामेषामतद्धिते परे सम्प्रसारणं स्यात् । मघोनः मघवभ्यामित्यादि । एवं श्वन्, युवन् । **(३१३) न सम्प्रसारणे सम्प्रसारणम् ६।१।**

---

(३१२) **श्वयुवमघोनामिति ।** [1]श्वा च युवा च मघवा चेति द्वन्द्वस्तेषाम् । 'वसोः सम्प्रसारणमि'त्यतः सम्प्रसारणमित्यनुवर्तते । 'अल्लोपोऽनः' इत्यत अन इत्यनुकृष्यते । तच्च त्रयाणां विशेषणम्, तदन्तविधिः । भस्येत्यधिकृतमित्याह—**अन्नन्ताना-**

---

(३१२) पद—श्वयुवमघोनाम्, अतद्धिते । **अनुवृत्ति**—अनः, भस्य, सम्प्रसारणम् । **विधिसूत्र ।**

मूलार्थ—तद्धितभिन्न प्रत्यय के पर रहते अन्नन्त भसंज्ञक श्वन्, युवन् और मघवन् शब्दों को सम्प्रसारण होता है । मघोनः । मघवभ्याम्—इत्यादि ।

विमर्श—प्रकृत सूत्र में 'अल्लोपोऽनः' (६।४।१३४) से 'अनः' तथा 'वसोः सम्प्रसारणम्' (६।४।१३१) से 'सम्प्रसारणम्' पद की अनुवृत्ति आ रही है । 'श्वयुवमघोनाम्' का 'अनः' पद विशेषण होने से तदन्तविधि होती है । 'भस्य' का अधिकार है, विशेष्यानुसार बहुवचन में परिवर्तित हो जाता है । तदनुसार—तद्धितभिन्न प्रत्यय के परवर्ती रहने पर अन्नन्त भसंज्ञक श्वन् आदि को सम्प्रसारण होता है ।

उदाहरण—(१) मघवन्+शस् (अस्), (व्=उ—'सम्प्रसारण') मघ उ अन्+अस्, (उ+अ='उ'—पूर्वरूप) मघ उ नस् (अ+उ='ओ'—गुण)—मघोनस् (स्=र्=:) =मघोनः । (२) मघवन्+भ्याम् (न् लोप)=मघवभ्याम् । इसी प्रकार श्वन् और युवन् शब्द के रूप बनते हैं ।

नकारान्त पुँल्लिङ्ग मघवन् (=इन्द्र) शब्द के रूप

'तृ' अन्तादेश पक्ष में			तृत्वाभाव पक्ष में		
एक०	द्वि०	बहु०	एक०	द्वि०	बहु०
प्र०–मघवान्	मघवन्तौ	मघवन्तः	प्र०–मघवा	मघवानौ	मघवानः
द्वि०–मघवन्तम्	मघवन्तौ	मघवतः	द्वि०–मघवानम्	मघवानौ	मघोनः
तृ०–मघवता	मघवद्भ्याम्	मघवद्भिः	तृ०–मघोना	मघवभ्याम्	मघवभिः
च०–मघवते	मघवद्भ्याम्	मघवद्भ्यः	च०–मघोने	मघवभ्याम्	मघवभ्यः
पं०–मघवतः	मघवद्भ्याम्	मघवद्भ्यः	पं०–मघोनः	मघवभ्याम्	मघवभ्यः
ष०–मघवतः	मघवतोः	मघवताम्	ष०–मघोनः	मघोनोः	मघोनाम्
स०–मघवति	मघवतोः	मघवत्सु	स०–मघोनि	मघोनोः	मघवसु
सं०–हे मघवन्	हे मघवन्तौ	हे मघवन्तः	सं०–हे मघवा	हे मघवानौ	हे मघवानः

---

[1] अस्मिन् सूत्रे सुभाषितमेतत्प्रसिद्धं वर्तते—

'काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नासि बाले किमिदं विचित्रम् । (प्रश्नः)
विचारवान् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह ॥' (उत्तरम्)

हिन्दी अर्थ—माला गूँथती हुई बाला से किसी ने प्रश्न किया कि तुम काँच, मणि और स्वर्ण को एक ही माला में क्यों गूँथ रही हो ? यह तो बड़ी विचित्र स्थिति है । तब उस बाला ने उत्तर दिया कि विचारशील आचार्य पाणिनि ने भी एक ही सूत्र में श्वन् (कुत्ता), युवन् (युवक) और मघवन् (इन्द्र) को गूँथ दिया है ।

३७। सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। इति यकारस्य न सम्प्रसारणम्। यूनः। युवभ्यामित्यादि। अर्वा। हे अर्वन्! **(३१४) अर्वणस्त्रसावनञः ६।४।१२७।** नञा रहितस्यार्वन्नित्यस्य 'तृ' इत्यन्तादेशो न तु सौ। अर्वन्तौ। अर्वन्तः।

मिति। **मघोन इति।** 'मघवन्+(शस्) अस्' इत्यत्र भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारणे वकारस्य उकारे 'सम्प्रसारणाच्चे'ति पूर्वरूपैकादेशो 'मघ उ नस्' इति जाते 'आद् गुणः' इति गुणे, सस्य रुत्वे तस्य विसर्गे च कृते मघोनः' इति।

(३१३) **न सम्प्रसारण इति।** 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति परिभाषया 'पूर्वस्ये'त्युपतिष्ठते। तदाह—**सम्प्रसारणे परत इत्यादि। यून इति।** 'युवन्+शस्' इत्यत्र शस्येत्संज्ञायां लोपे भसंज्ञायां 'श्वयुवमघोनामि'ति सम्प्रसारणे वकारस्योकारे पूर्वरूपे 'यु उन् अस्' इति जाते पुनः यकारस्य सम्प्रसारणे प्राप्ते, 'न सम्प्रसारणे सम्प्रसारणमि'त्यनेन निषेधे सवर्णदीर्घे सस्य रुत्वे विसर्गे च 'यूनः' इति।

(३१४) **अर्वणस्त्रसावनञ इति।** अर्वणः, तृ, असौ, अनञ इतिच्छेदः। न विद्यते नञ् यस्येति बहुव्रीहिः। अङ्गस्येत्यधिकृतम्, तच्चार्वणा विशेष्यते। तेन तदन्तविधिस्तदाह—**नञेत्यादिना।**

---

(३१३) पद—न सम्प्रसारणे, सम्प्रसारणम्। **विधि(निषेध)सूत्र।**

मूलार्थ—सम्प्रसारण पर रहते पूर्व यण् को सम्प्रसारण नहीं होता। अतः 'य्' को इकार सम्प्रसारण नहीं हुआ। यूनः। युवभ्याम्—इत्यादि।

विमर्श—सूत्र पूर्ण है। यहाँ 'तस्मिन्निति निर्दिष्टे पूर्वस्य' परिभाषा द्वारा 'पूर्वस्य' पद की उपस्थिति होती है। तदनुसार—यदि पूर्व वर्ण 'यण्' हो और पर वर्ण सम्प्रसारण हो तो पूर्व यण् को सम्प्रसारण नहीं होता।

उदाहरण—(१) युवन्+शस् (अस्), (व=उ सम्प्रसारण—'श्वयुव०', पूर्वरूप) यु उ न्+अस्, (उ+उ=ऊ—'दीर्घ')—यूनस् (य् को सम्प्रसारण की प्राप्ति, उसका 'न सम्प्रसारणे०' से निषेध, स्=र्=:)=यूनः। (२) युवन्+भ्याम् ('न्' का लोप)= युवभ्याम् इत्यादि।

अर्वन् (=घोड़ा) शब्द के विशिष्ट रूपों का उल्लेख किया जा रहा है—(१) अर्वन्+सु (सुलोप, दीर्घ—'सर्वनामस्थाने०')—अर्वान् ('न्' का लोप—'नलोपः प्राति०')=अर्वा। (२) हे अर्वन्+सु ('स्' विभक्ति का लोप)=हे अर्वन्!

(३१४) पद—अर्वणः, तृ, असौ, अनञः। **विधिसूत्र।**

मूलार्थ—सु-भिन्न विभक्ति के पर रहते नञ् रहित अर्वन् शब्द को 'तृ' अन्तादेश होता है। अर्वन्तौ। अर्वन्तः। अर्वतः। अर्वद्भ्याम्।

विमर्श—यहाँ 'अङ्गस्य' का अधिकार है। वह अर्वन् का विशेषण है। इस प्रकार नञ् रहित अर्वन् अङ्ग के स्थान पर 'तृ' अन्तादेश होता है, किन्तु 'सु' परे रहते नहीं होता।

उदाहरण—(१) अर्वन्+औ, (न्=तृ (त)—'अर्वणः०') अर्वत+औ, ('नुम्'—'उगिदचाम्') अर्वन् त औ=अर्वन्तौ। (२) अर्वन्+जस् (अस्) (न्=त, नुम्)—अर्वन्तस् (स्=र्=:)=अर्वन्तः। (३) अर्वन्+ङसि अथवा ङस् (अस्), (न्=त)—अर्वतस्

अर्वतः । अर्वद्भ्याम् । (३१५) पथिमथ्यृभुक्षामात् ७।१।८५ । एषामकारोऽन्तादेशः स्यात्सौ परे । (३१६) इतोऽत्सर्वनामस्थाने ७।१।८६ । पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने । (३१७) थो न्थः ७।१।८७ । पथिमथोस्थस्य न्थादेशः सर्वनाम-

---

(३१५) **पथिमथ्यृभुक्षामादिति** । अत्र 'सावनडुहः' इत्यतः सावित्यनुवर्तते । 'अलोऽन्त्यस्ये'ति परिभाषयाऽन्त्यस्यादेशो भवतीति आह—**एषामिति** ।

(३१६) **इतोऽदिति** । 'पथिमथ्यृभुक्षामि'त्यनुवर्तते । भाव्यमानत्वादेव सवर्णाग्राहकत्वे अदिति तपरकरणं स्पष्टार्थमेवेत्याह—**पथ्यादेरित्यादि** ।

(३१७) **थो न्थ इति** । 'थः' इति षष्ठ्यन्तम् । आदेशेऽकार उच्चारणार्थः । पूर्वसूत्रात् पथिमथिग्रहणमनुवर्तते 'इतोऽत्सर्वनामस्थाने' इत्यतः 'सर्वनामस्थाने' इति च । तदाह—**पथिमथोरित्यादिना** । **पन्था इति** । 'पथिन्+सु' इत्यत्र 'पथिमथ्यृभुक्षामात्' इत्यनेन आकारान्तादेशे, 'इतोऽत्सर्वनामस्थाने' इत्यनेन चेकारस्याकारादेशे 'पथ आ सु' इति जाते 'थो न्थः' इति थस्य न्थादेशे, सवर्णदीर्घे सस्य रुत्वे विसर्गे च कृते 'पन्थाः' इति रूपम् ।

(स्=रु=:)=अर्वतः । (४) अर्वन्+भ्याम् (न्=त्=द्—जश्त्व)=अर्वद्भ्याम् । शेष रूप 'मघवत्' शब्द की तरह बनेंगे ।

(३१५) पद—पथिमथ्यृभुक्षाम्, आत् । **अनुवृत्ति**—सौ । **विधिसूत्र** ।

मूलार्थ—सुविभक्ति पर रहते पथिन्, मथिन् और ऋभुक्षिन् शब्दों को आकार अन्तादेश होता है ।

विमर्श—सूत्रार्थ की पूर्ति के लिए—'सावनडुहः' (२८१) से 'सौ' पद की अनुवृत्ति आती है ।

(३१६) पद—इतः, अत्, सर्वनामस्थाने । **अनुवृत्ति**—पथिमथ्यृभुक्षाम् । **विधिसूत्र** ।

मूलार्थ—सर्वनामस्थान पर रहते पथिन् आदि शब्दों के इकार को अकार अन्तादेश होता है ।

विमर्श—यहाँ 'पथिमथ्यृभुक्षामात्' (३१५) से 'पथिमथ्यृभुक्षाम्' पद की अनुवृत्ति आ रही है । तदनुसार सर्वनामसंज्ञक विभक्तियों के परवर्ती होने की स्थिति में पथिन्, मथिन् तथा ऋभुक्षिन् शब्दों के इकार के स्थान में ह्रस्व अकार आदेश होता है ।

(३१७) पद—थः, न्थः । **अनुवृत्ति**—पथिमथोः, सर्वनामस्थाने । **विधिसूत्र** ।

मूलार्थ—सर्वनामस्थान पर रहते पथिन् और मथिन् के 'थ्' को 'न्थ्' आदेश होता है । पन्थाः । पन्थानौ । पन्थानः ।

विमर्श—यहाँ 'इतोऽत्सर्वनामस्थाने' (३१६) से 'सर्वनामस्थाने' तथा 'पथिमथ्यृभुक्षामात्' (३१५) से 'पथिमथोः' की अनुवृत्ति आती है । 'ऋभुक्षिन्' में 'थ्' न होने से उसकी अनुवृत्ति नहीं आती । इस प्रकार सर्वनामस्थानसंज्ञक विभक्तियों के पर रहने पर पथिन्, मथिन् के शब्दावयव 'थ्' के स्थान पर न्थ् आदेश होता है ।

उदाहरण—(१) पथिन्+सु (न्=आ 'पथिमथ्यृभुक्षामात्') पथि+आ+स्, (इ=अ —'इतोऽत्०') पथ आ+स् ('थ्'='न्थ्—'थो न्थः') पन्थ+आ+स् (अ+आ='आ' सवर्ण-

स्थाने । पन्थाः । हे पन्थाः । पन्थानौ । पन्थानः । **(३१८) भस्य टेर्लोपः ७।१।८८ ।** भस्य पथ्यादेष्टेर्लोपः स्यात् । पथः । पथिभ्याम् । पथिभ्यः । एवं मन्थाः । ऋभुक्षाः । **(३१९) ष्णान्ता षट् १।१।२४ ।** षान्ता नान्ता च संख्या षट्संज्ञा स्यात् । पञ्च-२ । पञ्चभिः । पञ्चभ्यः-२ । 'षट्चतुर्भ्यश्चे'ति नुट् । **(३२०) नोपधायाः ६।४।७ ।**

---

(३१८) **भस्य टेर्लोप इति ।** 'पथिमथ्यृभुक्षामि'त्यनुवर्तते । तदाह—**भस्येति । पथ इति ।** 'पथिन् अस्' इति स्थिते इनो लोपे सस्य रुत्वे विसर्गे च पथ इति ।

(३१९) **ष्णान्ता षडिति ।** ष् च नश्च ष्णौ ष्टुत्वेन नकारस्य णकारः । ष्णौ अन्तौ यस्याः सा ष्णान्ता । 'बहुगण' इत्यतः 'संख्या' इत्यनुवर्तते । संख्याशब्देनात्र स्वरूपपरतया संख्याप्रकारकसंख्येयविशेष्यकबोधजनकाः पञ्चादयो गृह्यन्ते । तदाह—**षान्तेत्यादिना । पञ्च इति ।** 'पञ्चन्+जस्' इत्यत्र 'ष्णान्ता षट्' इति पञ्चन्शब्दस्य षट्संज्ञायां 'षड्भ्यो लुक्' इति जसो लुकि, 'नलोपः प्राति०' इति नकारस्य लोपे 'पञ्च' इति रूपम् । एवमेव शसि 'पञ्च' इति रूपम् ।

दीर्घ, स्=र्=:)=पन्थाः । (२) इसी प्रकार—हे पन्थाः । (३) पथिन्+औ, (इ=अ—'इतोऽत्०' (पथ न्+औ, (थ्=न्थ्)—पन्थन्+औ (उपधादीर्घ)=पन्थानौ । (४) पथिन्+जस् (अस्), (इ=अ, थ्=न्थ्) पन्थन्+अस्, (उपधादीर्घ, स्=रु=:)=पन्थानः ।

(३१८) पद—भस्य, टेः, लोपः । **अनुवृत्ति**—पथिमथ्यृभुक्षाम् । **विधिसूत्र ।**

मूलार्थ—भसंज्ञक पथिन् आदि की 'टि' का लोप होता है । पथः । पथिभ्याम् । पथिभ्यः । एवम्—मन्थाः, ऋभुक्षाः ।

विमर्श—'पथिमथ्यृभुक्षामात्' (३१५) से 'पथिमथ्यृभुक्षाम्' की अनुवृत्ति आ रही है। तदनुसार 'भसंज्ञक पथिन्, मथिन् तथा ऋभुक्षिन् की टि (अन्त्य अच् वर्ण सहित समुदाय) का लोप होता है ।'

उदाहरण—(१) पथिन्+शस् (अस्) (टि-इन् का लोप)—पथ्+अस् (स्=र्=:) =पथः । (२) पथिन्+भ्याम् ('न्' का लोप)=पथिभ्याम् । (३) पथिन्+भ्यस् ('न्' लोप, स्=र्=:)=पथिभ्यः ।

पथिन् (=रास्ता) शब्द के रूप—पुँल्लिङ्ग

	एक०	द्वि०	बहु०		एक०	द्वि०	बहु०
प्र०	पन्थाः	पन्थानौ	पन्थानः	पं०	पथः	पथिभ्याम्	पथिभ्यः
द्वि०	पन्थानम्	पन्थानौ	पथः	ष०	पथः	पथोः	पथाम्
तृ०	पथा	पथिभ्याम्	पथिभिः	स०	पथि	पथोः	पथिषु
च०	पथे	पथिभ्याम्	पथिभ्यः	सं०	हे पन्थाः	हे पन्थानौ	हे पन्थानः

इसी प्रकार मथिन् (=मथने वाली रई) तथा ऋभुक्षिन् (=इन्द्र) शब्दों के रूप बनेंगे ।

(३१९) पद—ष्णान्ता, षट् । **अनुवृत्ति**—संख्या । **संज्ञासूत्र ।**

मूलार्थ—षान्त, नान्त संख्यावाचक शब्दों की 'षट्' संज्ञा होती है । पञ्च । पञ्चभिः । पञ्चभ्यः ।

विमर्श—यह संज्ञासूत्र है । यहाँ 'बहुगणवतुडति संख्या' से 'संख्या' पद की अनुवृत्ति आती है । संख्यावाची शब्द जो षकारान्त और नकारान्त हों—षट्संज्ञक होते हैं ।

नान्तस्योपधाया दीर्घो, नामि । पञ्चानाम् । पञ्चसु । (३२१) अष्टन आ विभक्तौ ७।२।८४ । 'अष्टन्'शब्दस्याऽऽत्वं वा हलादौ । (३२२) अष्टाभ्य औश् ७।१।२१ । कृताऽऽकारादष्टनो जश्शसोरौश् । 'अष्टभ्यः' इति वक्तव्ये कृताऽऽत्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति । वैकल्पिकश्चेदमष्टन आत्वम्, 'अष्टनो दीर्घादि'ति ज्ञापकात् । अष्टौ–२ । अष्टाभिः । अष्टाभ्यः–२ । अष्टानाम् । अष्टासु । आत्वाभावे–अष्ट । पञ्च-

---

(३२०) **नोपधाया इति ।** नुटि नलोपे तु तस्याऽसिद्धत्वान्नामीति न प्रवर्तते, अत एवेदं सूत्रमारभ्यते । नेति लुप्तषष्ठीकं पदम्, तच्चाङ्गस्य विशेषणतया तदन्तग्राहकम् । 'ढ्रलोपे' इत्यतः 'दीर्घः' इति, 'नामि' इति सूत्रञ्चानुवर्तते । तदाह—**नान्तस्येत्यादि ।**

(३२१) **अष्टन इति ।** 'रायो हलि' इत्यतः 'हली'त्यपकृष्यते, तस्य विभक्तेर्विशेषणतया यस्मिन्विधिरिति परिभाषया तदादिविधिः । 'अष्टनो दीर्घादि'ति सूत्रे दीर्घग्रहणसामर्थ्यादस्य आत्वस्य वैकल्पिकत्वं ज्ञायते । तदाह—**अष्टन्निति ।**

(३२२) **अष्टाभ्य इति ।** अत्र 'जश्शसोः शिः' इत्यतः जश्शसोरित्यनुवर्तते । यस्मिन्नष्टन् शब्दे आत्वं कृतं तस्मात्कृताकारादष्टाशब्दात्परयोर्जश्शसोरौश् स्यादित्यर्थः ।

उदाहरण—(१) पञ्चन्+जस् (षट्संज्ञा होने पर जस् का लुक्—'षड्भ्यो लुक्')= पञ्च । इसी प्रकार 'शस्' में भी=पञ्च । (२) पञ्चन्+भिस् ('न्' का लोप, स्=र्=:)= पञ्चभिः । (३) पञ्चन्+भ्यस् (न् का लोप, स्=रु=:)=पञ्चभ्यः ।

(३२०) पद—नः, उपधायाः । **अनुवृत्ति**—दीर्घः, नामि, अङ्गस्य । **विधिसूत्र ।**

मूलार्थ—नाम् पर रहते नान्त की उपधा को दीर्घ होता है । पञ्चानाम् । पञ्चसु ।

विमर्श—सूत्रार्थ को स्पष्ट करने के लिए—'ढ्रलोपे पूर्वस्य' (१२८) से 'दीर्घः' तथा 'नामि' (१६६) सूत्र की अनुवृत्ति आ रही है । अङ्गस्य का अधिकार है । 'नः' पद उसका विशेषण है । अंतः तदन्तविधि होती है । तदनुसार—नकारान्त अङ्ग की उपधा को 'नाम्' के पश्चाद्वर्ती रहने पर दीर्घ होता है ।

उदाहरण—(१) पञ्चन्+आम्, (नुट् (न्) का आगम—'षट्चतुर्भ्यश्च') पञ्चन् न् आम्, (उपधादीर्घ—'नोपधायाः') पञ्चान् नाम्, (न् का लोप—'नलोपः प्राति०')=पञ्चानाम् । (२) पञ्चन्+सुप् (सु), (न् का लोप)=पञ्चसु ।

(३२१) पद—अष्टनः, आ, विभक्तौ । **अनुवृत्ति**—हलि । **विधिसूत्र ।**

मूलार्थ—हलादि विभक्ति के पर रहते अष्टन् शब्द को विकल्प से आत्व होता है ।

विमर्श—प्रकृत सूत्र में 'रायो हलि' से 'हलि' पद की अनुवृत्ति आती है । 'हलि' पद 'विभक्तौ' का विशेषण होने से तदादि विधि होती है । इस प्रकार—हलादि विभक्ति के परवर्ती होने पर अष्टन् शब्द के अन्त्य वर्ण 'न्' को (अलोऽन्त्यपरिभाषा से) 'आ' आदेश होता है ।

(३२२) पद—अष्टाभ्यः, औश् । **अनुवृत्ति**—जश्शसोः । **विधिसूत्र ।**

मूलार्थ—कृताकार अष्टन् शब्द से परे जस्-शस् को औश् आदेश होता है । 'अष्टभ्यः' के स्थान पर 'अष्टाभ्यः' कहना जश्-शस् के विषय में आत्व विधि का ज्ञापन है । अष्टौ । अष्टाभिः । अष्टाभ्यः । अष्टानाम् । अष्टासु । आत्व के अभाव में—अष्ट । पञ्चन् शब्द की तरह ।

वत्। **(३२३) ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ३।२।५९।** एभ्यः क्विन्। अञ्चेः सुप्युपपदे। युजिक्रुञ्चोः—केवलयोः क्रुञ्चेर्नलोपाभावश्च निपात्यते। कनावितौ। **(३२४) कृदतिङ् ३।१।९३।** अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्।

अष्टौ। अष्टन्शब्दाज्जसि 'अष्टन आ विभक्तौ' इत्यनेनाकारान्तादेशे सवर्णदीर्घे 'अष्टा+जस्' इति जाते, 'अष्टाभ्य औश्' इति जसः स्थाने 'औश्' इत्यादेशेऽनुबन्धलोपे 'वृद्धिरेचि' इति वृद्धौ 'अष्टौ' इति।

(३२३) **ऋत्विगिति।** अत्र 'धातोः' इत्यधिक्रियते। 'स्पृशोऽनुदके क्विन्' इत्यतः 'क्विन्' इत्यनुवर्तते, पञ्चम्यर्थेऽत्र षष्ठी। तदाह—**एभ्य इति।**

(३२४) **कृदतिङ् इति।** धातोरित्यधिक्रियते प्रत्यय इति च। धातोरिति विहितविशेषणम्, धातोर्विहितो यः प्रत्यय इति लभ्यते। तदाह—**अत्रेति।**

विमर्श—सूत्रार्थ की स्पष्टता हेतु 'जश्शसोः शिः' से 'जश्शसोः' की अनुवृत्ति आ रही है। तदनुसार—'आकार अन्तादेश होने पर अष्टन् शब्द से पर जस्, शस् के स्थान में 'औश्' (औ) आदेश होता है। यह सूत्र 'षड्भ्यो लुक्' का अपवाद है।

उदाहरण—(१) अष्टन्+जस् (न्=आ—'अष्टन आ') अष्ट आ+जस्, (जस्=औश् (औ)—'अष्टाभ्य ओश्') अष्ट आ+औ, (अ+आ='आ'—सवर्णदीर्घ)—अष्टा+औ (आ+औ=औ—'वृद्धि')=अष्टौ। शस् में भी पूर्वोक्त प्रक्रिया के अनुसार 'अष्टौ' रूप बनता है। (२) अष्टन्+भिस्, (न्=आ, सवर्णदीर्घ)—अष्टा+भिस् (स्=र्=:)=अष्टाभिः। (३) अष्टन्+भ्यस् (न्=आ, दीर्घ, स्=रु=:)=अष्टाभ्यः। (४) अष्टन्+आम्, (नुट् का आगम)—अष्टन्+नाम्, (नुट् होने पर हलादि विभक्ति मानकर न्=आ—सवर्णदीर्घ) =अष्टानाम्। (५) अष्टन्+सुप् (सु), (न्=आ, दीर्घ)=अष्टासु। आत्व के विकल्प से होने पर उसके अभाव में पञ्चन् शब्द की तरह रूप बनेंगे। जश्, शस् में—अष्ट–२।

(३२३) पद—ऋत्विक्दधृक्स्रग्दिगुष्णिगन्चुयुजिक्रुञ्चां, च। **अनुवृत्ति**—धातोः, प्रत्ययः, परश्च, क्विन्। **विधिसूत्र।**

मूलार्थ—ऋत्विज् आदि शब्द क्विन्प्रत्ययान्त निपातित होते हैं। अञ्च् धातु से सुप् उपपद रहते। युजि, क्रुञ्च् केवल धातु से क्विन् प्रत्यय होता है। क्रुञ्च् धातु से क्विन् और नलोप का अभाव भी निपातनात् होता है। क्विन् प्रत्यय में क् और न् की इत्संज्ञा लोप होता है।

विमर्श—यहाँ 'प्रत्ययः' 'परश्च' तथा 'धातोः' का अधिकार है। 'स्पृशोऽनुदके क्विन्' (३।२।५८) से 'क्विन्' पद की अनुवृत्ति आती है। इस प्रकार सूत्रोक्त ऋत्विक्, दधृक्, स्रक्, दिक् और उष्णिक् शब्द क्विन्प्रत्ययान्त निपातन से सिद्ध होते हैं। √अन्चु, √युजि एवं √क्रुञ्च धातुओं से भी क्विन् प्रत्यय होता है। सूत्रोक्त सिद्ध रूपों के निर्देश से यह ज्ञात होता है कि तत्तद् रूपों में आचार्य पाणिनि को सूत्रों से विधान न किये गये कुछ अन्य कार्य भी स्वीकार्य हैं। इस प्रकार के कार्यों को 'निपातन'[1] कहा गया है। अतः अन्चु धातु से सुबन्त उपपद रहते ही क्विन् प्रत्यय होता है। युज् और क्रुञ्च् धातुओं से बिना उपपद के ही क्विन्प्रत्यय होता है। क्रुञ्च् में न् लोप के अभाव का भी निपातन होता है।

---

१. 'धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च।
अनुबन्धविकाराणां रूढ्यर्थं च निपातनम् ॥'—महाभाष्यप्रदीपः (५।१।११४)

(३२५) वेरपृक्तस्य ६।१।६७। लोपः। (३२६) क्विन्प्रत्ययस्य कुः ८।२।६२। क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात्पदान्ते। ऋत्विक्–ऋत्विग्। ऋत्विजौ।

(३२५) **वेरपृक्तस्येति**। 'लोपो व्योर्वलि' इत्यतः लोप इत्यनुवर्तते। विशब्देनात्र क्विन्क्विप्विज्रां ग्रहणम्, केवलस्य वेः प्रत्ययस्याभावादिति।

(३२६) **क्विन्प्रत्ययस्येति**। पदस्येत्यधिकृतम्। 'झलां जशोऽन्ते' इत्यतः 'अन्ते' इत्यनुवर्तते। क्विन्प्रत्ययो यस्मात्सः क्विन्प्रत्यय इति तद्गुणसंविज्ञो बहुव्रीहिः। तदाह—**क्विन्प्रत्यय इत्यादि**। **ऋत्विगिति**। ऋतुपदे उपपदे युज्धातोः 'ऋत्विग्दधृक्–' इत्यादिना क्विनि 'लशक्वतद्धिते' इति ककारस्येत्संज्ञायां, 'हलन्त्यमि'ति नकारस्येत्संज्ञायां तयोर्लोपे, इकारस्योच्चारणार्थत्वे 'वचिस्वपि०' इति यजेः सम्प्रसारणे पूर्वरूपैकादेशे 'कृदतिङ्' इति प्रत्ययस्य कृत्संज्ञायां 'वेरपृक्तस्य' इति वस्य लोपे 'ऋतु + इज्' इति जाते यणि कृदन्तत्वात्प्रातिपदिकसंज्ञायां सौ ऋत्विज् + स् इति स्थिते, 'हल्ङ्याब्भ्यः' इति सुलोपे 'क्विन्प्रत्ययस्य कुः' इति कवर्गान्तादेशे जकारस्य गकारे 'वाऽवसाने' इति विकल्पेन चर्त्वेन ककारे ऋत्विक्, पक्षे ऋत्विगिति।

(३२४) पद—कृत्, अतिङ्। **अनुवृत्ति**—धातोः, प्रत्ययः। **संज्ञासूत्र**।

मूलार्थ—इस (सन्निहित) 'धातोः' के अधिकार में पठित तिङ्भिन्न प्रत्ययों की कृत्संज्ञा होती है।

विमर्श—यहाँ 'धातोः' (३।१।९२) तथा 'प्रत्ययः' (३।१।१) का अधिकार है। तदनुसार—'धातु के अधिकार में पठित तिङ्भिन्न प्रत्यय कृत्संज्ञक होते हैं।'

(३२५) पद—वेः, अपृक्तस्य। **अनुवृत्ति**—लोपः। **विधिसूत्र**।

मूलार्थ—अपृक्तसंज्ञक वकार का लोप होता है।

विमर्श—सूत्रार्थ की पूर्ति हेतु 'लोपो व्योर्वलि' (६।१।६६) से 'लोपः' पद की अनुवृत्ति आती है।

(३२६) पद—क्विन्प्रत्ययस्य, कुः। **अनुवृत्ति**—पदस्य, अन्ते। **विधिसूत्र**।

मूलार्थ—क्विन्प्रत्यय जिससे किया जाय, उसको पदान्त में कवर्ग अन्तादेश होता है। ऋत्विक्–ऋत्विग्। ऋत्विजौ। ऋत्विग्भ्याम्।

विमर्श—'पदस्य' का अधिकार है। 'स्कोः संयोगाद्योरन्ते च' से 'अन्ते' पद की अनुवृत्ति आ रही है। 'पदस्य' का अन्ते के साथ अन्वय होता है। इस प्रकार क्विन् प्रत्यय जिससे विहित हो, उसको पदान्त में कवर्ग अन्तादेश होगा।

उदाहरण—ऋतु + √यज् (क्विन्प्रत्यय—'ऋत्विग्दधृक्०' से, क्विन् में 'लशक्वतद्धिते' से 'क्' की तथा 'हलन्त्यम्' से न् की इत्संज्ञा होती है, इकार उच्चारणार्थक है। अवशिष्ट 'व' की कृत्संज्ञा 'कृदतिङ्' से। 'वेरपृक्तस्य' से व् का लोप) (उ=व्—यण्)=ऋत्विज् ('कृत्तद्धितसमासाश्च' से प्रातिपदिक संज्ञा होने पर 'सु') (१) ऋत्विज् (यज्ञकर्ता)+सु (स्), (स्—विभक्ति का लोप) ऋत्विज्, (ज्=ग्—'क्विन्प्रत्ययस्य कुः')—ऋत्विग् (ग्=क्—विकल्प से—'वाऽवसाने')=ऋत्विक्। पक्ष में—ऋत्विग्। (२) ऋत्विज्+औ=ऋत्विज्+भ्याम् (ज्=ग्)=ऋत्विग्भ्याम्।

ऋत्विग्भ्याम् । (३२७) **युजेरसमासे ७।१।७१ ।** युजेः सर्वनामस्थाने नुम् स्यादसमासे । सुलोपः । संयोगान्तस्य लोपः । कुत्वेन नस्य ङः । युङ् । युञ्जौ । युञ्जः । युग्भ्याम्–३ । असमासे किम् ? (३२८) **चोः कुः ८।२।३० ।** चवर्गस्य कवर्गः स्याज्झलि पदान्ते च । सुयुक्–सुयुग् । सुयुजौ । सुयुजः । सुयुजा । सुयुग्भ्याम् । खन् । खञ्जौ ।

(३२७) **युजेरसमासे इति ।** अत्र 'उगिदचाम्०' इत्यतः 'सर्वनामस्थाने' इति, 'इदितो नुम्' इत्यतः 'नुमि'त्यनुवर्तते । तदाह—**युजेरित्यादिना ।**

(३२८) **चोः कुरिति ।** अत्र 'पदस्ये'त्यधिक्रियते । 'स्कोः' इत्यतः 'अन्ते' इत्यनुवर्तते । तदाह—**चवर्गस्येत्यादिना ।**

(३२७) पद—युजेः, असमासे । **अनुवृत्ति**—नुम् , सर्वनामस्थाने । **विधिसूत्र ।**

मूलार्थ—समास के अतिरिक्त सर्वनामस्थान पर रहते युज् धातु को 'नुम्' होता है । सुलोप । संयोगान्त लोप । कुत्व से न्=ङ् । युङ् । युञ्जौ । युञ्जः । युग्भ्याम् । असमासे क्यों कहा ?

विमर्श—सूत्रार्थ की पूर्णता के लिए—'उगिदचाम्०' (७।१।७०) से 'सर्वनामस्थाने' तथा 'इदितो नुम् धातोः' (७।१।८५) से 'नुम्' की अनुवृत्ति अपेक्षित है । तदनुसार—समास-भिन्न क्विन्प्रत्ययान्त 'युज्' को नुम् का आगम होता है, सर्वनामस्थान संज्ञक प्रत्यय पर रहते ।

उदाहरण—(१) √युज्+क्विन् (पूर्ववत् क्–न् की इत्संज्ञा लोप होने पर 'व्' की कृत्संज्ञा 'वेरपृक्तस्य' से व् का लोप)=युज् (=योग देने वाला)+सु (स्), (नुम् (न्) का आगम—'युजेरसमासे') युन् ज्+स् (स् का लोप, ज् का संयोगान्त लोप) युन् (न्=ङ् 'क्विन्प्रत्ययस्य कुः')=युङ् । (२) युज्+औ, (नुम्)—यु न् ज्+औ (न्=अनुस्वार—'नश्चापदान्तस्य झलि', अनुस्वार='ञ्' परसवर्ण)=युञ्जौ । (३) युज्+जस्=युञ्जः (पूर्ववत्) । (४) युज्+भ्याम् (ज्=ग्—'कुत्व')=युग्भ्याम् ।

प्रत्युदाहरण—सूत्र में 'असमास में नुम् हो' ऐसा कहने से 'सुष्ठु युनक्ती'ति 'सुयुज्'—(सु+√युज्+क्विप्) में नुम् नहीं होता । पूर्वसूत्र से प्राप्त कुत्व असिद्ध होने के कारण कुत्व-विधायक सूत्र का उल्लेख किया जा रहा है ।

(३२८) पद—चोः, कुः । **अनुवृत्ति**—झलि, अन्ते, पदस्य । **विधिसूत्र ।**

मूलार्थ—झल् पर रहते और पदान्त में चवर्ग को कवर्ग आदेश होता है । सुयुक्–सुयुग् । सुयुजौ । सुयुजः । सुयुजा । सुयुग्भ्याम् । खन् । खञ्जौ । खञ्जः ।

विमर्श—सूत्र में निमित्तवाचक पदों का अभाव है । अतः 'झलो झलि' (८।२।२६) से 'झलि' तथा 'स्कोः' (३३१) से 'अन्ते' पद की अनुवृत्ति आती है । 'पदस्य' कां अधिकार है, उसका 'अन्ते' के साथ अन्वय होता है । इस प्रकार पदान्त में अथवा झल्-प्रत्याहारस्थ वर्णों के पर रहते 'च' वर्ग के स्थान में 'क' वर्ग आदेश होता है ।

उदाहरण—(१) सुयुज्+सु (स्), (विभक्ति का लोप, ज्=ग्)—सुयुग् (ग्=क्—'वैकल्पिक चर्त्व')=सुयुक् । पक्ष में=सुयुग् । (२) सुयुज्+औ=सुयुजौ । (३) सुयुज्+जस् (अस्), (स्=रु=ः)=सुयुजः । (४) सुयुज्+टा (आ)=सुयुजा । (५) सुयुज्+भ्याम् (ज्=ग्)=सुयुग्भ्याम् ।

खञ्ज् (=लंगड़ा) शब्द की रूप-प्रक्रिया प्रदर्शित की जा रही है—(√खजि+क्विप् (क्विप् का सर्वापहारी लोप नुम्) खन्ज् (अनुस्वार, परसवर्ण)=खञ्ज । (१) खञ्ज्+सु

खञ्जः । खन्भ्याम् । (३२९) व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८।२।३६ । व्रश्चादीनां सप्तानां छशान्तयोश्च षः स्याज्झलि, पदान्ते च । जश्त्वचर्त्वे । राट्–राड् । राजौ । राजः । राड्भ्याम् । एवं—विभ्राट् । देवेट् । विश्वसृट् । परिमृट् । * परौ व्रजेः षः पदान्ते * परावुपपदे व्रजेः क्विप् दीर्घश्च, पदान्ते षत्वमपि । परित्यज्य सर्वं व्रज-

---

(३२९) **व्रश्चेति ।** 'झलो झलि' इत्यतः 'झलि' इति, 'स्कोः संयोगाद्योरन्ते च' इत्यतः 'अन्ते' इति चानुवर्तते । पदस्येत्यधिकृतम् । तदाह—**व्रश्चादीनामित्यादि । 'राट्' इति ।** राज्+सु इत्यत्र सोर्लोपे 'वश्चभ्रस्ज०' इति षकारान्तादेशे 'झलां जशोऽन्ते' इति षस्य डत्वे 'वाऽवसाने' इति विकल्पेन डस्य टत्वे 'राट्' इति । पक्षे 'राडि'ति रूपम् ।

(स्), (स्—विभक्ति का लोप, संयोगान्त ज् का लोप, ञ्=न्—'निमित्तापाये नैमित्तिकस्याप्यपायः' के अनुसार निमित्त ज् के हट जाने से, उसी के कारण होने वाले अनुस्वार-परसवर्ण भी हट गए)=खन् । (२) खञ्+औ=खञौ । (३) खञ्+जस्=खञः । (४) खञ्ज्+भ्याम् (ज् का लोप, ञ्=न्)=खन्भ्याम् ।

(३२९) पद—व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां, षः । **अनुवृत्ति—**झलि, अन्ते, पदस्य । **विधिसूत्र ।**

मूलार्थ—झल् पर रहते अथवा पदान्त में व्रश्च आदि सात धातुओं को तथा छकारान्त और शकारान्त को षकारान्त आदेश होता है । राट्–राड् । राजौ । राजः । राड्भ्याम् । (वा०—परिपूर्वक व्रज् धातु से क्विप् होता है, (उपधा अकार) को दीर्घ होता है तथा पदान्त में षत्व भी होता है ।) सब कुछ छोड़कर जाने वाला—अर्थ वाले परिव्राज् शब्द के 'सु' में परिव्राट् । परिव्राजौ ।

विमर्श—सूत्रार्थ की पूर्ति के लिए—'झलो झलि' से 'झलि' तथा 'स्कोः' (३३१) से 'अन्ते' पद की अनुवृत्ति अपेक्षित है । 'पदस्य' का अधिकार है । तदनुसार—"√व्रश्च् (=काटना), भ्रस्ज् (=भूनना), सृज् (=उत्पन्न करना), मृज् (=पवित्र करना), यज् (=यज्ञ करना), राज् (=शोभित होना), भ्राज् (=प्रदीप्त होना) धातुओं तथा छकारान्त और शकारान्त शब्दों के अन्त्यवर्ण के स्थान पर 'ष्' आदेश होगा ।"

उदाहरण—(१) (राज्+क्विप्)=राज्+सु (स्), (सु लोप, ज्=ष्—'व्रश्चभ्रस्ज०') राष्, (ष्=ड्—जश्त्व, ड=ट् विकल्प से—'वाऽवसाने')=राट् । पक्ष में=राड् । (२) राज्+औ=राजौ । (३) राज्+जस् (अस्), (स्=रु=ः)=राजः । (४) राज्+भ्याम् (ज्=ष्, जश्त्व से ष्=ड्)=राड्भ्याम् ।

इसी प्रकार विभ्राज् (=सूर्य), देवेज् (=देवताओं का पूजक), विश्वसृज् (=संसार का सृष्टिकर्ता) और परिमृज् (=शुद्ध करने वाला) शब्दों के प्रथमा एकवचन सु विभक्ति में क्रमशः—विभ्राट्, देवेट्, विश्वसृट् और परिमृट् रूप बनते हैं । (वा०) परि-उपसर्गपूर्वक √व्रज् धातु से क्विप् प्रत्यय दीर्घ तथा पदान्त में 'ष्' आदेश होता है । सर्वं परित्यज्य व्रजति (सब कुछ त्यागकर जाता है) अर्थ में 'परिव्राज्' शब्द है । (१) परिव्राज्+सु (स्), (स् लोप, ज्=ष्)—परिव्राष्, (ष्=ड् तथा वैकल्पिक चर्त्व ड्=ट्)=परिव्राट् । पक्ष में=परिव्राड् । (२) परिव्राज्+औ=परिव्राजौ ।

तीति—परिव्राट् । परिव्राजौ । (३३०) **विश्वस्य वसुराटोः ६।३।१२८ ।** विश्वस्य दीर्घः स्याद्वसौ राट्शब्दे च परे । राडिति पदान्तोपलक्षणार्थम् । विश्वाराट् । विश्वाराजौ । विश्वाराड्भ्याम् । (३३१) **स्कोः संयोगाद्योरन्ते च ८।२।२९ ।** पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः । भृट्–भृड् । सस्य श्चुत्वेन शः । 'झलां जश् झशि' इति शस्य जः । भृज्जौ । भृज्जः । भृड्भ्याम् । त्यदाद्यत्वं, पररूप-

---

(३३०) **विश्वस्येति** । अत्र 'ढ्रलोपे पूर्वस्ये'त्यतः 'दीर्घः' इति सम्बध्यते ।

(३३१) **'स्कोः संयोगाद्योरन्ते चे'ति** । पदस्येत्यधिक्रियते । चकारात् 'झलो झलि' इत्यतो झलीत्यनुवर्तते । 'संयोग' इति लुप्तषष्ठीकं पृथक्पदम् । स् च् क् च स्कौ, तयोः स्कोरिति । 'संयोगान्तस्य लोपः' इत्यत 'लोपः' इत्यनुवर्तते । तदाह—**पदान्त इत्यादिना** । **भृट् इति** । भृस्ज् + सु इति स्थिते 'हल्ङ्याब्भ्यः' इति सोर्लोपे 'स्कोः' इत्यादिना सकारस्य लोपे 'व्रश्चे'त्यादिना जकारस्य षकारे, तस्य 'झलां जशोऽन्ते' इति डकारे 'वाऽवसाने' इति वैकल्पिकचर्त्वे 'भृट्' इति । पक्षे 'भृड्' इत्युभयं रूपं सिद्धम् ।

---

(३३०) पद—विश्वस्य, वसुराटोः । **अनुवृत्ति**—दीर्घः । **विधिसूत्र ।**

मूलार्थ—वसु और राट् शब्द के पर रहते विश्व शब्द को दीर्घ होता है ।

विमर्श—यहाँ 'एकाचो द्वे प्रथमस्य' (६।१।१) सूत्र से 'द्वे' पद की अनुवृत्ति आ रही है। तदनुसार—अष्टाध्यायी के षष्ठाध्याय में स्थित द्वित्व-प्रकरण के सम्मिलित दोनों रूपों की अभ्यस्त संज्ञा होती है।

अभ्यस्तात्परस्य शतुर्नुम् न । ददत् । ददतौ । (३७४) **जक्षित्यादयः षट्** ६।१।६ । षड्धातवोऽन्ये, जक्षितिश्च सप्तमः एतेऽभ्यस्तसंज्ञाः स्युः । जक्षत् । जक्षतौ । जक्षतः । एवं—जाग्रत् । दरिद्रत् । शासत् । चकासत् । 'दीधीङ् दीप्तिदेवनयोः' । 'वेवीङ् वेतिना तुल्ये'—एतौ छान्दसौ । दीध्यत् । वेव्यत् ।

जक्षि जागृ दरिद्रा शास् दीधीङ् वेवीङ् चकास्तथा ।
अभ्यस्तसंज्ञा विज्ञेया धातवो मुनिभाषिताः ॥ १ ॥

---

(३७३) **नाभ्यस्ताच्छतुरिति ।** 'इदितो' इत्यतो नुमित्यनुवर्तते । तदाह—**अभ्यस्तादिति । ददिति ।** 'ददत् + सु' इत्यत्र हल्ङ्यादिना सुलोपे नुमि प्राप्ते अभ्यस्तसंज्ञायां 'नाभ्यस्ताच्छतुः' इति निषेधे 'झलां जशोऽन्ते' इति तकारस्य दकारे 'वाऽवसाने' इति विभाषया दकारस्य तकारे 'ददत्' इति । पक्षे ददिति ।

(३७४) **जक्षित्यादय इति ।** अत्र 'उभे अभ्यस्तम्' इत्यतः 'अभ्यस्तमि'त्यनुवृत्तं बहुवचनान्ततया विपरिणम्यते । 'जक्षित्यादयः' इत्यत्राऽतद्-गुणसंविज्ञानो बहुव्रीहिरित्यत आह मूले—**षडित्यादिना । जक्षदिति ।** 'जक्षत् + सु' इत्यत्र 'उगिदचाम्०' इति नुमि प्राप्ते 'जक्षित्यादयः षट्' इति अभ्यस्तसंज्ञायां 'नाभ्यस्ताच्छतुः' इति नुमो निषेधे 'हल्ङ्याब्भ्यः' इति सुलोपे पदसंज्ञायां जश्त्वेन तकारस्य दकारे 'वाऽवसाने' इति वैकल्पिकचर्त्वे 'जक्षत्' इति । पक्षे 'जक्षदि'ति ।

---

(३७३) पद—न, अभ्यस्तात्, शतुः । **अनुवृत्ति**—नुम् । **विधि(निषेध)सूत्र ।**

मूलार्थ—अभ्यस्तसंज्ञक से पर 'शतृ' को नुम् नहीं होता । ददत् । ददतौ ।

विमर्श—यहाँ 'इदितो नुम्धातोः' (७।१।५८) से नुम् की अनुवृत्ति अपेक्षित है । तदनुसार—'अभ्यस्तसंज्ञक से परवर्ती शतृ प्रत्यय को नुम् आगम नहीं होता ।'

उदाहरण—(१) ददत्+सु (स्), ('उगिदचां०' से प्राप्त नुम् का 'नाभ्यस्ताच्छतुः' से निषेध, क्योंकि यहाँ दा को द्वित्व होकर अभ्यस्त संज्ञा हुई है) ददत्+स्, ('स्' का लोप, त्=द्—जश्त्व) ददद् (द्=त्—'पाक्षिक चर्त्व')=ददत्–ददद् । (२) ददत्+औ=ददतौ ।

(३७४) पद—जक्षित्यादयः, षट् । **अनुवृत्ति**—अभ्यस्तम् । **संज्ञासूत्र ।**

मूलार्थ—जागृ आदि छः धातु और जक्ष् धातु की अभ्यस्त संज्ञा होती है । जक्षत् । जक्षतौ । जक्षतः । जाग्रत्, दरिद्रत्, शासत् तथा चकासत् भी इसी प्रकार बनते हैं । दीधीङ् और वेवीङ् धातु का प्रयोग वेद में ही होता है । इनके भी दीध्यत् और वेव्यत् रूप बनते हैं ।

अभ्यस्तसंज्ञक सात धातुओं का परिगणन प्रस्तुत कारिका में किया गया है । गुप्–गुब् । गुपौ । गुपः ।

विमर्श—प्रस्तुत सूत्र में 'उभे अभ्यस्तम्' से 'अभ्यस्तम्' की अनुवृत्ति आती है । तदनुसार—'जक्षि, जागृ, द्ररिद्रा, शास्, दीधीङ्, वेवीङ् तथा चकास—ये सात धातुएँ अभ्यस्तसंज्ञक होती हैं ।'

उदाहरण—(१) जक्षत्+सु, ('उगिदचाम्०' से नुम् की प्राप्ति, 'जक्षित्यादयः षट्' से अभ्यस्त संज्ञा होकर 'नाभ्यस्ताच्छतुः' से नुम् का निषेध, 'हल्ङ्याब्भ्य०' से विभक्ति का लोप) जक्षत्, (त्=द्—'झलां जशोऽन्ते') जक्षद् (द्=त् 'वाऽवसाने' से वैकल्पिक चर्त्व)=जक्षत्, जक्षद् । (२) जक्षतौ (औ) । (३) जक्षतः (जस्) । जक्षत्=खाता हुआ । इसी प्रकार जाग्रत्

गुप्-गुब् । गुपौ । गुपः । गुब्भ्याम् । **(३७५) त्यदादिषु दृशोऽनालोचने कञ्च ३।२।६०।** त्यदादिषूपपदेषु अज्ञानार्थात् दृशेर्धातोः कञ् स्यात्, चात्क्विन् । **(३७६) आ सर्वनाम्नः ६।३।९१ ।** सर्वनाम्न आकारोऽन्तादेशः स्याद् दृग्दृश्वतुषु । तादृक्-तादृग् । तादृशौ । तादृशः । तादृग्भ्याम् । 'व्रश्चे'ति षः । जश्त्वचर्त्वे । विट्-

---

(३७५) **त्यदादिष्विति** । सूत्रस्थचकारेण 'स्पृशोऽनुदके क्विन्' इत्यतः क्विन् अनुकृष्यते । आलोचनमिह ज्ञानसामान्यम्, न तु चाक्षुषज्ञानम् । तदाह–**त्यदादिष्विति** ।

(३७६) **आ सर्वनाम्न इति** । आ इति लुप्तविभक्तिकं पदम् । 'दृग्दृश्वतुषु' इत्यनुवर्तते । तदाह—**सर्वनाम्न इत्यादि** ।

(=जागता हुआ), दरिद्रत् (=दुर्गति को प्राप्त होता हुआ), शासत् (=शासन करता हुआ), दीध्यत् (=देता हुआ), वेव्यत् (=देता हुआ) तथा चकासत् (=चमकता हुआ) शब्दों के रूप भी बनेंगे । इनमें दीधीङ् तथा वेवीङ् धातुओं के शतृ प्रत्ययान्त रूप वेद में ही होते हैं ।

क्विप् प्रत्ययान्त√ गुप् (=रक्षा करना) से गुप् शब्द के रूप इस प्रकार बनते हैं—(१) गुप्+सु (स्)—(विभक्ति का लोप)—गुप् (जश्त्व एवं पाक्षिक चर्त्व)=गुप्, गुब् । (२) गुपौ (औ) । (३) गुपः (जस्) । (४) गुब्भ्याम् ।

(३७५) पद—त्यदादिषु, दृशः, अनालोचने, कञ् च । **अनुवृत्ति**—क्विन् । **विधिसूत्र** ।

मूलार्थ—त्यदादि उपपद रहने पर अज्ञानार्थक दृश् धातु से कञ् प्रत्यय होता है और क्विन् भी ।

विमर्श—सूत्रस्थ 'च' पद के द्वारा 'स्पृशोऽनुदके क्विन्' (३७८) से 'क्विन्' की अनुवृत्ति आती है । इस प्रकार 'त्यद् आदि सर्वनाम शब्दों के उपपद रहने पर अज्ञानार्थक √दृश् से कञ् तथा क्विन् प्रत्यय होते हैं ।'

(३७६) पद—आ, सर्वनाम्नः । **अनुवृत्ति**—दृग्दृश्वतुषु । **विधिसूत्र** ।

मूलार्थ—दृग्, दृश् तथा वतु के पर रहने पर सर्वनाम को आकार अन्तादेश होता है । तादृक्-तादृग् । तादृशौ । तादृशः । तादृग्भ्याम् । व्रश्चेति षः । विट्-विड् । विशौ । विशः । विड्भ्याम् ।

विमर्श—यहाँ पूर्वसूत्र 'दृग्दृश्वतुषु' (६।३।८९) की अनुवृत्ति आती है । 'अलोऽन्त्यस्य' परिभाषा की उपस्थिति होने से—'दृग्, दृश् और वतु पर रहते सर्वनामवाची शब्दों के अन्त्य वर्ण के स्थान पर 'आ' आदेश होता है ।

उदाहरण—(१) तद्+दृश्, (क्विन्—'त्यदादिषु०' उसका सर्वापहारी लोप) तद्+दृश्, (द्=आ 'आ सर्वनाम्नः') त आ+दृश्, (सवर्णदीर्घ) तादृश्+सु (स्)—(विभक्ति का लोप, श=ष्—'व्रश्च') तादृष् (ष्=ड्—'जश्त्व' ड्=ग्—कुत्व—'क्विन्प्रत्ययस्य कुः')—तादृग् (ग्=क्—'पाक्षिक चर्त्व—'वाऽवसाने')=तादृक् । पक्ष में=तादृग् (=वैसा) । (२) तादृश्+औ=तादृशौ । (३) तादृश्+जस् (अस्) (स्=र्=ः)=तादृशः । (४) तादृश्+भ्याम् (श्=ष्, ष्=ड्=ग्)=तादृग्भ्याम ।

√दिश् से क्विप् प्रत्यय होने पर विश् (=प्रवेश करने वाला) शब्द बनता है । (१) विश्+सु (स्), (विभक्ति का लोप, श्=ष्—'व्रश्च०') विष् (ष्=ड्—'जश्त्व' ड्=ट—

विड् । विशौ । विशः । विड्भ्याम् । **(३७७) नशेर्वा ८।२।६३ ।** नशेः कवर्गोऽन्तादेशो वा पदान्ते । नक्–नग् । नट्–नड् । नशौ । नशः । नग्भ्याम्–नड्भ्याम् । **(३७८) स्पृशोऽनुदके क्विन् ३।२।५८ ।** अनुदके सुप्युपपदे स्पृशेः क्विन् । घृतस्पृक्–घृतस्पृग् । घृतस्पृशौ । घृतस्पृशः । दधृक्–दधृग् । दधृषौ । दधृषः । दधृग्भ्याम् । रत्नमुट्–

---

(३७७) **नशेर्वा इति ।** अत्र 'क्विन्प्रत्ययस्य कुः' इत्यतः 'कुरि'ति 'स्कोः संयोगाद्योरन्ते च' इत्यतश्च 'अन्ते' इति चानुवर्तते । 'पदस्य' इत्यधिकृतम् । तदाह—**नशेः कवर्ग इत्यादि । नक्–नगिति ।** कुत्वपक्षे जश्त्वचर्त्वाभ्यां रूपे । **नट्–नडिति ।** षत्वपक्षे जश्त्वचर्त्वाभ्यां रूपे ।

(३७८) **स्पृशोऽनुदके इति ।** 'सुपि स्थः' इत्यतः सुपीत्यनुवर्तते । उदकशब्दभिन्ने सुबन्ते उपपदे स्पृशेः क्विन् स्यादिति सूत्रार्थः । **घृतस्पृक् इति ।** घृतं स्पृशतीति

'पाक्षिक चर्त्व')=विट्, विड् । (२) विशौ (औ) । (३) विशः (जस्) । (४) विड्भ्याम् (भ्याम्) ।

(३७७) पद—नशेः, वा । **अनुवृत्ति**—पदस्य, अन्ते, कुः । **विधिसूत्र ।**

मूलार्थ—पदान्त में नश् को विकल्प से कवर्ग अन्तादेश होता है । नक्–नट् । नट्–नड् । नशौ । नशः । नड्भ्याम्—नग्भ्याम् ।

विमर्श—यहाँ 'क्विन्प्रत्ययस्य कुः' (८।१।६३) से 'कुः' तथा 'स्कोः संयोगाद्योरन्ते च' (३३१) से 'अन्ते' की अनुवृत्ति आ रही है । 'पदस्य' का अधिकार है । इस प्रकार—'पद के अन्त में नश् के स्थान पर विकल्प से ('अलोऽन्त्यस्य' परिभाषा द्वारा) क वर्ग अन्तादेश होता है ।'

उदाहरण—√नश्+क्विप्—नश् (=दिखलायी न देना) शब्द के रूपों की रचना-प्रक्रिया इस प्रकार हैं—(१) नश्+सु (स्), (विभक्ति का लोप, श्=ष्)—नष् ('ष्'='ड्'—जश्त्व) नड्, (ड्=ग्—विकल्प से कुत्व—'नशेर्वा') नग् (ग्=क् 'विकल्प से चर्त्व')=नक् । चर्त्व के अभाव में=नग् । कुत्व के अभाव में पाक्षिक चर्त्व ड्=ट् होकर—नट्, नड् । (२) नशौ (औ) । (३) नशः (जस्) । (४) नड्भ्याम् (भ्याम्); यहाँ विकल्प से कुत्व होकर—नग्भ्याम्, नड्भ्याम् ।

(३७८) पद—स्पृशः, अनुदके, क्विन् । **अनुवृत्ति**—सुपि । **विधिसूत्र ।**

मूलार्थ—उदक-भिन्न सुबन्त उपपद रहते 'स्पृश्' धातु से क्विन् प्रत्यय होता है । घृतस्पृक्–ग् । घृतस्पृशौ । घृतस्पृशः । दधृक्–ग् । दधृषौ । दधृषः । दधृग्भ्याम् । रत्नमुट्–ड् । रत्नमुषौ । रत्नमुषः । रत्नमुड्भ्याम् । षट्–षड् । षड्भिः । षण्णाम् । षट्त्सु, षट्सु ! प्राचीन आचार्यों ने जो 'षण्णाम्, षड्णाम्' दो उदाहरण प्रस्तुत किये हैं, वह प्रमाद ही है; क्योंकि यहाँ 'प्रत्यये भाषायां नित्यम्' से नित्य ड्=ण् होता है ।

विमर्श—सूत्रार्थ की पूर्ति हेतु 'सुपि स्थः' (३।२।४) सूत्र से 'सुपि' की अनुवृत्ति आ रही है । अनुवृत्त 'सुपि' पद का 'अनुदके' के साथ अन्वय होता है । तदनुसार—'उदकपद-भिन्न सुबन्त उपपद रहते स्पृश् धातु से क्विन्प्रत्यय होता है ।'

उदाहरण—'घृतं स्पृशति' विग्रह में घृत उपपदपूर्वक स्पृश् धातु से क्विन्, उसका सर्वापहारी लोप, उपपद समास होकर—घृतस्पृश् (=घी का स्पर्श करने वाला) शब्द बनता है । (१)

रत्नमुड् । रत्नमुषौ । रत्नमुषः । रत्नमुड्भ्याम् । षट्-षड् । षड्भिः । षड्भ्यः-२ । षण्णाम् । षट्त्सु-षट्सु । यत्तु प्राचा षण्णां षड्णामित्युदाहृतं, तत्प्रामादिकमेव, प्रत्यये नित्यवचनात् । रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषोरिति रुत्वम् । (३७९)

क्विन्, तस्य सर्वापहारिलोपे, उपपदसमासे सुब्लुकि घृतस्पृश्शब्दात् सौ, हल्ङ्यादिना सोर्लोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वस्याऽसिद्धत्वात् पूर्वं 'व्रश्चे'ति शस्य षत्वे, जश्त्वेन तस्य डत्वे, तस्य 'क्विन्प्रत्ययस्य कुः' इत्यनेन कुत्वे गकारे 'वाऽवसाने' इति वैकल्पिकचर्त्वेन ककारे 'घृतस्पृक्' इति । पक्षे 'घृतस्पृग्' इति । 'घृतस्पर्शकारी' इत्यर्थः ।

घृतस्पृश्+सु (स्), (विभक्ति का लोप, कुत्व असिद्ध होने से श्=ष, ष्=ड्—'जश्त्व', ड्=ग—'कुत्व', ग्=क्—पाक्षिक चर्त्व)=घृतस्पृक्, घृतस्पृग् । (२) घृतस्पृशौ (औ) । (३) घृतस्पृशः (जस्) ।

षकारान्त दधृष् शब्द की रूपसिद्धि प्रदर्शित की जा रही है—(धृष्णोतीति विग्रहे √धृष् (ञिधृषा)+क्विन् 'ऋत्विग्०' द्वित्व आदि निपातन से होकर दधृष् शब्द निष्पन्न होता है ।) (१) दधृष्+सु, (विभक्ति लोप, ष्=ड्—'जश्त्व') दधृड्, (ड्=ग्–'कुत्व') दधृग्, (ग्=क्—'पाक्षिक चर्त्व')=दधृक् । पक्ष में=दधृग् । (२) दधृषौ (औ) । (३) दधृषः (जस्) । (४) दधृग्भ्याम् (भ्याम्) इत्यादि ।

रत्नानि मुष्णाति (रत्न चुराने वाला) अर्थ में रत्न+मुष् धातु से क्विन् प्रत्यय होकर 'रत्नमुष्' शब्द बनता है । (१) रत्नमुष्+सु (स्), (विभक्ति का लोप, ष्=ड्) रत्नमुड्, (ड्=ट्—'पाक्षिक चर्त्व')=रत्नमुट्, रत्नमुड् । (२) रत्नमुष्+औ=रत्नमुषौ । (३) रत्नमुष्+(जस्) अस् (स्=र्=ः)=रत्नमुषः । (४) रत्नमुष्+भ्याम् (ष्=ड्)=रत्नमुड्भ्याम् ।

वहुवचनान्त संख्यावाचक 'षष्' शब्द की रूपसिद्धि का उल्लेख किया जा रहा है—(१) षष्+जस्, (षट् संज्ञा 'षड्भ्यो लुक्' से जस् का लुक्) षष्, (जश्त्व से ष्=ड्) षड्, (ड्=ट्—'पाक्षिक चर्त्व')=षट्, षड् । (२) षष्+भिस् (ष्=ड्—'जश्त्व', स्=र्=ः)=षड्भिः । (३) षष्+भ्यस् (ष्=ड्, स्=र्=ः)=षड्भ्यः । (४) षष्+आम्, (नुट् का आगम—'षट्चतुर्भ्यश्च') षष्+नाम्, ('ष्'='ड्'—'जश्त्व') षड्+नाम्, ('न्'='ण्' ष्टुत्व,) षड्+णाम् (ड्=ण्—'प्रत्यये भाषायां नित्यम्')=षण्णाम् । (५) षष्+सुप् (सु), (ष्=ड्)—षड्+सु, (विकल्प से धुट् (ध्) का आगम—'डः सि धुट्') षड् ध्+सु (ड्=ट्, ध्=त्–चर्त्व)=षट्त्सु । धुट् का आगम न होने पर ड्=ट् 'चर्त्व')=षट्सु ।

यहाँ षष्ठी विभक्ति में प्राचीन आचार्यों ने दो रूप षण्णाम् और 'षड्नाम्' उदाहृत किये हैं । वह उनका प्रमाद ही है । क्योंकि 'प्रत्यये भाषायां नित्यम्' इस वार्तिक वचन से नित्य अनुनासिक ड्=ण् विधान किया जाता है ।

'पठितुमिच्छति' (पढ़ने की इच्छा करने वाला) अर्थ में 'पिपठिष्' शब्द है । पिपठिष्+सु (स्), (विभक्ति का लोप) पिपठिष् (यहाँ सन् सम्बन्धी स् के स्थान में विधीयमान 'ष' रुत्व विधायक शास्त्र 'ससजुषो रुः' की दृष्टि में असिद्ध होने से ष्=स्=रु)—पिपठिर् (आगे दीर्घ विधायक शास्त्र का उल्लेख किया जा रहा है—

र्वोरुपधाया दीर्घ इकः ८।२।७६। रेफवान्तस्य धातोरुपधाया इको दीर्घः पदान्ते। पिपठीः। पिपठिषौ। पिपठिषः। पिपठीर्भ्याम्। (३८०) **नुम्विसर्जनीयशर्व्यवायेऽपि ८।३।५८।** एतैः प्रत्येकं व्यवधानेऽपीण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात्। ष्टुत्वेन पूर्वस्य षः। पिपठीष्षु–पिपठीःषु। चिकीः। चिकीर्षौ। चिकीर्षः। चिकीर्षु।

---

(३७९) **र्वोरुपधाया इति।** 'र् च व् चे'ति द्वन्द्वे 'र्वौ' तयोरिति विग्रहे 'र्वोः' इति। 'सिपि धातो रुर्वा' इत्यतो धातोरित्यनुवर्तते, 'स्कोः' इत्यत अन्ते इति चानुवर्तते। 'पदस्ये'त्यधिकृतम्। 'र्वोः' इति धातोरित्यस्य विशेषणम्, तेन तदन्तविधिस्तदाह—**रेफवान्तस्येत्यादिना। पिपठीरिति।** 'पिपठिष् + सु' इत्यत्र 'हल्ङ्याबि'ति सुलोपे रुत्वे कर्तव्ये 'पूर्वत्रासिद्धमि'ति षत्वस्यासिद्धत्वात् 'ससजुषो रुः' इति रुत्वे पिपठिर् इति जाते 'र्वोरुपधाया दीर्घ इकः' इति इकारस्य दीर्घे, रेफस्य विसर्गे कृते 'पिपठीः' इति।

(३८०) **नुम्विसर्जनीय इति।** अत्र 'इण्कोः' इति, मूर्द्धन्य इति चानुवर्तते। तदाह—**एतैरित्यादि। पिपठीष्षु इति।** पिपठिष्शब्दात् सुप्यनुबन्धलोपे 'पिपठिष् + सु' इत्यत्र 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां षत्वस्यासिद्धत्वात् 'ससजुषो रुः'

---

(३७९) पद—र्वोः, उपधायाः, दीर्घः, इकः। **अनुवृत्ति**—पदस्य, अन्ते, धातोः। **विधिसूत्र।**

मूलार्थ—पदान्त में रेफान्त और वान्त धातु की उपधा को दीर्घ होता है। पिपठीः। पिपठिषौ। पिपठिषः। पिपठीर्भ्याम्।

विमर्श—प्रकृत सूत्र में 'सिपि धातो रुर्वा' (८।२।७४) से 'धातोः' तथा 'स्कोः संयोगाद्योरन्ते च' (३३१) से 'अन्ते' पद की अनुवृत्ति आती है। 'पदस्य' का अधिकार है। 'र्वोः' पद धातो का विशेषण होने से उसमें तदन्त विधि होती है। तदनुसार 'पदान्त में रकारान्त और वकारान्त धातु की उपधा के इक् (इ, उ, ऋ, लृ) को दीर्घ होता है।'

उदाहरण—(१) पूर्वोक्त रूप पिपठिर् (रेफान्त धातु की उपधा 'इ' को दीर्घ—'र्वोरुपधाया')—पिपठीर् (र्=ः)=पिपठीः। (२) पिपठिषौ (औ)। (३) पिपठिषः (जस्)। (४) पिपठीर्भ्याम् (दीर्घ)।

(३८०) पद—नुम् विसर्जनीयशर्व्यवाये, अपि। **अनुवृत्ति**—मूर्द्धन्यः, सः, इण्कोः। **विधिसूत्र।**

मूलार्थ—नुम, विसर्ग और शर् इनमें किसी एक के व्यवधान होने पर भी इण्, कवर्ग से पर विसर्ग को 'ष्' होता है। पिपठीष्षु। 'वा शरि'। पिपठीःषु। चिकीः। चिकीर्षौ। चिकीर्षः। चिकीर्षु। विद्वान्। विद्वांसौ। हे विद्वन्!

विमर्श—सूत्रार्थ की पूर्ति हेतु—'अपदान्तस्य मूर्द्धन्यः' (८।३।५५) से 'मूर्द्धन्यः', 'सहेः साडः सः' (२८४) से 'सः', तथा 'इण्कोः' (८।३।५७) सूत्र की अनुवृत्ति आती है। तदनुसार—"नुम्, विसर्ग तथा शर्—इनमें से किसी एक का व्यवधान होने पर इण् और कवर्ग से परवर्ती 'स्' के स्थान पर मूर्द्धन्य (ष्) आदेश होता है।"

उदाहरण—पिपठिष्+सु (सुप्), (रुत्व की कर्तव्यता में षत्व के असिद्ध होने से स्=र्) पिपठिर्+सु, (इ='ई' दीर्घ 'र्वोरुपधायाः') पिपठीर्+सु, (र्=ः 'खरवसानयोः') पिपठीः

विद्वान् । विद्वांसौ । हे विद्वन् । **(३८१) वसोः सम्प्रसारणम् ६।४।१३१ ।** वस्वन्तस्य भस्य सम्प्रसारणम् । विदुषः । वसुस्रंस्विति दत्वम् । विद्वद्भ्याम् । **(३८२) पुंसोऽसुङ् ७।१।८९ ।** पुंसोऽसुङ् स्यात् सर्वनामस्थाने । पुमान् । हे पुमन् । पुमांसौ ।

इति रुत्वेऽनुबन्धलोपे 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे 'रोः सुपि' इति रेफस्य विसर्गे 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सुपः सकारस्य षत्वे 'ष्टुना ष्टुरि'ति पूर्वसकारस्य ष्टुत्वेन षकारे 'पिपठीष्षु' इति । पक्षे 'वा शरि' इति विसर्गस्य विसर्गे पिपठीःषु इति ।

(३८१) **वसोः सम्प्रसारणमिति।** 'प्रत्ययग्रहणे तदन्ताः ग्राह्या' इति परिभाषयाऽत्र वसोरिति तदन्तग्रहणम् । 'भस्ये'त्यधिक्रियते । तदाह—**वस्वन्तस्येति ।**

(३८२) **पुंसोऽसुङिति ।** अत्र 'इतोऽत्सर्वनामस्थाने' इत्यतः 'सर्वनामस्थाने'

सु; ('नुम्विसर्जनीयशर्व्यवायेऽपि' से स्=ष्)—पिपठीःषु ('वा शरि' से विकल्प से विसर्ग के स्थान में विसर्ग होने से पक्ष में विसर्ग के स्थान पर 'विसर्जनीयस्य सः' से स्, स्=ष् 'ष्टुत्व')=पिपठीष्षु ।

कर्तुमिच्छति (=करने की इच्छा वाला) अर्थ में चिकीर्ष् शब्द है । (१) चिकीर्ष्+सु (स्), (विभक्ति लोप)—चिकीर्ष् (षत्व के असिद्ध होने से स् का लोप 'रात्सस्य') चिकीर् (र्=ः)=चिकीः । (२) चिकीर्षौ (औ) । (३) चिकीर्षः (जस्) । (४) चिकीर्ष्+सु (स् का लोप, षत्व)=चिकीर्षु ।

विद्वस् शब्द की रूपसिद्धि का उल्लेख किया जा रहा है—(ज्ञानार्थक √विद्+लट्, (लट्=शतृ-अत) विद्+अत, (शप्)—विद् अ अत (शप् का लोप व शतृ=वस्)=विद्वस् =विद्वान् ।) (१) विद्वस्+सु (स्), (नुम् का आगम, 'उगिदचाम्') विद्वन् स्, (दीर्घ अ='आ'—'सान्तमहतः') विद्वान् स्+स् (विभक्तिलोप, स् का संयोगान्त लोप)=विद्वान् । (२) विद्वस्+औ (नुम्, दीर्घ न्=अनुस्वार)=विद्वांसौ । (३) हे विद्वस्+स् ('स्' का लोप, नुम् संयोगान्त लोप, यहाँ सम्बोधन में दीर्घ नहीं होता)=हे विद्वन् !

(३८१) पद—वसोः, सम्प्रसारणम् । **अनुवृत्ति**—अङ्गस्य, भस्य । **विधिसूत्र ।**

मूलार्थ—वस्वन्त भसंज्ञक अंग को सम्प्रसारण होता है । विदुषः । 'वसुस्रंसु०' से द् । त्रिद्वद्भ्याम् ।

विमर्श—यहाँ 'अङ्गस्य' तथा 'भस्य' का अधिकार है । 'वसोः' पद अङ्गस्य का विशेषण है । अतः तदन्त विधि होती है । इस प्रकार वस्वंन्त भसंज्ञक अंग के स्थान पर सम्प्रसारण (व्=उ) होता है ।

उदाहरण—(१) विद्वस्+शस् (अस्), (व्=उ 'सम्प्रसारण') विद् उ अस्+अस्, (उ+अ=उ पूर्वरूप 'सम्प्रसारणाच्च') विदुस्+अस्, (स्=ष्—'आदेशप्रत्यययोः') विदुषस् (स्=र्=ः)=विदुषः । (२) विद्वस्+भ्याम् (स्=द् 'वसुस्रंसु०')=विद्वद्भ्याम् ।

(३८२) पद—पुंसः, असुङ् । **अनुवृत्ति**—सर्वनामस्थाने । **विधिसूत्र ।**

मूलार्थ—सर्वनामस्थान की विवक्षा में पुंस् को 'असुङ्' होता है । पुमान् । पुमांसौ । पुंसः । पुंभ्याम् । पुंसु । 'ऋदुशनस्०' से अनङ् । उशना । उशनसौ । (वा०) इसके सम्बुद्धि में अनङ्

पुंसः । पुंभ्याम् । पुंसु । ऋदुशनेत्यनङ् । उशना । उशनसौ । * अस्य सम्बुद्धौ वाऽनङ्, नलोपश्च वा वाच्यः * । हे उशन–हे उशनन्–हे उशनः ! उशनोभ्याम् । अनेहा । अनेहसौ । अनेहसः । हे अनेहः । वेधा । वेधसौ । वेधसः । वेधोभ्याम् ।

इत्यनुवर्तते । तदाह—**सर्वनामस्थान इत्यादि** । **पुमान् इति** । पुंस्शब्दात्सौ 'ङिच्चे'-ति सूत्रबलात् 'पुंसोऽसुङ्' इति सकारस्य स्थानेऽसुङि 'पुमसुङ् + सु' इति जाते, ङकारोकारयोरित्संज्ञायां लोपे च 'पुमस् + सु' इति स्थिते 'हल्ङ्याब्भ्यः' इति सोर्लोपे प्रत्ययलक्षणे 'उगिदचामि'ति नुमि 'सान्तमहतः' इति दीर्घे सस्य संयोगान्तलोपे 'पुमान्' इति ।

और नलोप भी विकल्प से होते हैं। हे उशन–हे उशनन्–हे उशनः ! उशनोभ्याम् । अनेहा। अनेहसौ । अनेहसः । हे अनेहः ! वेधा । वेधसौ । वेधसः । वेधोभ्याम् ।

विमर्श—यहाँ 'इतोऽत्सर्वनामस्थाने' (७।१।८६) से 'सर्वनामस्थाने' की अनुवृत्ति अपेक्षित है। तदनुसार 'सर्वनामस्थान (सु, औ, जस्, अम् , औट्) पर रहते पुंस् शब्द के अन्त्य वर्ण स् के स्थान पर (अलोऽन्त्य परिभाषा की उपस्थिति से) असुङ् (अस्) आदेश होगा ।'

उदाहरण—(१) पुंस्+स् , (स्=असुङ्–अस्) पुम् अस्+स् (यहाँ अनुस्वार अपनी पूर्व स्थिति में आ गया—'निमित्तापाये नैमित्तिकस्याप्युपायः') नुम् का आगम—पुमन् स्+स् , (दीर्घ—'सान्तमहतः') पुमान् स्+स् (विभक्तिलोप, स् का संयोगान्त लोप)=पुमान् (=पुरुष) । (२) पुंस्+औ, (स्=अस्) पुमस्+औ (नुम् , दीर्घ, न्=अनुस्वार)= पुमांसौ । (३) पुंस्+शस् (अस्) (यहाँ सर्वनामस्थान न होने से असुङ् नहीं हुआ, स्= र्=:)=पुंसः । (४) पुंस्+भ्याम् (स् लोप तथा म् को अनुस्वार=परसवर्ण)=पुंभ्याम् । (५) पुंस्+सुप् (सु), (स् का संयोगान्तलोप म्=अनुस्वार)=पुंसु ।

उशनस् (=शुक्राचार्य) शब्द के रूपों की प्रक्रिया का प्रदर्शन किया जा रहा है—

(१) उशनस्+सु (स्), (स्=अन्—'ऋदुशनस्पुरुदंसः') उशनअन्+स् , (अ+अ= अ—'पररूप') उशनन्+स्, (उपधादीर्घ) उशनान् स् ('स्' विभक्ति का लोप, न् का लोप) =उशना । (२) उशनस्+औ=उशनसौ ।

(वा०)—उशनस् शब्द में सम्बुद्धि के विषय में अनङ् और नलोप भी विकल्प से होते हैं। (१) हे उशनस्+स् , (स्=अन् विकल्प से) पररूप तथा विभक्तिलोप होकर=हे उशनन् ! उक्त कार्यों के अतिरिक्त न् लोप होने पर=हे उशन ! अनङ् न होने पर विभक्तिलोप के बाद स्=र्=:)=हे उशनः । (२) उशनस्+भ्याम् (स्=रु=उ, अ+उ=ओ 'गुण')= उशनोभ्याम् ।

सकारान्त अनेहस् (=काल) शब्द के रूप सम्बोधन के अतिरिक्त अन्य विभक्तियों में 'उशनस्' के समान बनते हैं। प्रथमा—अनेहा, अनेहसौ, अनेहसः । सम्बोधन में—अनेहस्+स् (विभक्तिलोप, दीर्घ का अभाव, स्=र्=:)=हे अनेहः !

वेधस् (=ब्रह्मा) शब्द की रूप-प्रक्रिया इस प्रकार है—(१) वेधस्+सु (स्), ('अ'= 'आ' दीर्घ—'अत्वसन्तस्य चाधातोः') वेधास्+स् , (विभक्ति का लोप)—वेधास् (स्=र्=:) =वेधाः । (२) वेधस्+औ=वेधसौ । (३) वेधस्+(जस्) अस् (स्=र्=:)=वेधसः । (४) वेधस्+भ्याम् (स्=रु=उ) वेध उ भ्याम् (गुण)=वेधोभ्याम् ।

(३८३) अदस औ सुलोपश्च ७।२।१०७ । अदस औकारोऽन्तादेशः स्यात् सौ परे सुलोपश्च । 'तदोरि'ति सः । असौ । * औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः * । प्रतिषेधपक्षे सादुत्वं च । असकौ । असुकः । त्यदाद्यत्वं पररूपम् । वृद्धिः । **(३८४) अदसोऽसेर्दादु दो मः ८।२।८० ।** अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च आन्तरतम्याद् ह्रस्वस्य उः । दीर्घस्य ऊः । अमू । 'जशः शी' । गुणः । (३८५)

(३८३) **अदस औ इति ।** 'अदसः' इति षष्ठ्यन्तं पदम् । 'औ' इत्यविभक्तिकनिर्देशः । इह 'तदोः सः सावि'त्यतः सावित्यनुवर्तते । अलोऽन्त्यस्येति परिभाषेहोपतिष्ठते । तदाह—**अदस औकार इत्यादिना । असौ इति ।** 'अदस् + स्' इति स्थिते 'अदस औ सुलोपश्च' इति सकारस्यौत्वे सुलोपे च विहिते 'अद् +औ' इति जाते, 'तदोः सः सावनन्त्ययोः' इति दस्य सत्वे 'वृद्धिरेची'ति वृद्धौ 'असौ' इति ।

(३८४) **अदसो इति ।** अत्र अदसः, असेः, दात्, उ, दः, मः इति पदच्छेदः । न विद्यते सि=सकारो यस्य सोऽसिस्तस्य सकाररहितस्येत्यर्थः । असेरिति अदसो

(३८३) पद—अदसः, औ, सुलोपः, च । **अनुवृत्ति**—सौ । **विधिसूत्र** ।

मूलार्थ—'सु' पर रहते अदस् को 'औ' अन्तादेश होता है और सु का लोप होता है । 'तदोः सः' से द्=स् । असौ । (वा०)—'अकच् सहित अदस् को औत्व का निषेध विकल्प से कहना चाहिए । निषेधपक्ष में सकार से उत्तरवर्ती वर्ण अकार को उत्व भी होता है ।' असकौ । असुकः ।

विमर्श—सूत्रार्थ की पूर्ति हेतु 'तदोः सः सावनन्त्ययोः' (७।२।१०६) से 'सौ' पद की अनुवृत्ति आती है। तदनुसार "सु विभक्ति के परवर्ती रहने पर अदस् शब्द के स् के स्थान पर 'औ' आदेश होता है तथा विभक्ति का लोप भी होता है ।"

उदाहरण—(१) अदस्+सु (स्), (स्=औ, और विभक्ति का लोप—'अदस औ') अद+औ, (द्=स्—'तदोः सः') अस औ, (अ+औ=औ—'वृद्धि')=असौ । (वा०)—"अकच् प्रत्यय सहित अदस् शब्द को 'औ' का विकल्प से निषेध होता है तथा से पर 'अ' के स्थान पर 'उ' भी विकल्प से होता है" । (२) अदस्+अकच् (अक्)=अद्—अक्—अस्+सु, (सु का लोप, स्=औ) **अदक**+औ, (द्=स्—'तदोः सः') असक औ (अ+औ='औ'-'वृद्धि')=असकौ । औकार न होने पर अदकस्+स् (स्=अ 'त्यदादीनामः' से पररूप) अदक+स्, (द्=स्) असक+स् (सकारोत्तरवर्ती अ=उ, विभक्ति के स्=र्=ः)=असुकः ।

प्रसङ्गतः अकच् प्रत्यय सहित अदस् शब्द के रूपों की विशेषता का उल्लेख कर पुनः अदस् शब्द के अन्य रूपों का उल्लेख किया जा रहा है—

(३८४) पद—अदसः, असे, दात, उः, दः, मः । **विधिसूत्र** ।

मूलार्थ—सान्त-भिन्न 'अदस्' शब्द के दकार से पर ह्रस्व को 'उ', दीर्घ को 'ऊ' और द् को म् आदेश होता है । अमू ।

विमर्श—सूत्र स्वयं में पूर्ण है । अतः यहाँ कोई अनुवृत्ति नहीं आती । 'स्थानेऽन्तरतमः' सूत्र (परिभाषा) की उपस्थिति से—'सकारान्त-भिन्न अदस् शब्द के दकार से पर वर्ण को उ एवं ऊ (ह्रस्व को उ, दीर्घ को ऊ) आदेश तथा द्=म् आदेश होता है । यह प्रमाणकृत सादृश्य का उदाहरण है ।

एत ईद् बहुवचने ८।२।८१। अदसो दात्परस्यैत ईत् दस्य च मो, बह्वर्थोक्तौ। अमी । 'पूर्वत्राऽसिद्धमि'ति विभक्तिकार्यं प्राक्, पश्चादुत्वमत्वे । अमुम् । अमू । अमून् । मुत्वे कृते घिसंज्ञायां 'ना'भावः। **(३८६) न मु ने ८।२।३ ।** 'ना'भावे कर्तव्ये,

---

विशेषणम् । दादिति पञ्चमी, परस्येत्यध्याहार्यम् । तदाह—**अदसोऽसान्तस्येति** । **अमू इति** । 'अदस् + औ' इत्यत्र 'त्यदादीनामः' इत्यकारान्तादेशे पररूपे 'अद + औ' इति जाते 'वृद्धिरेची'ति वृद्धौ 'अदसोऽसेर्दादुदोमः' इत्यौकारस्य ऊकारे दस्य मत्वे च 'अमू' इति रूपम् ।

(३८५) **एत ईदिति ।** अत्र 'अदसोऽसेर्दा दु दोमः' इत्यतः 'अदसः' इति, 'दादि'-ति, 'दः' इति, 'मः' इति पदचतुष्टयमनुवर्तते । तेन 'अदसो दात्परस्य एत ईत्स्याद् दस्य च मो बहुवचने' इत्यर्थः । **अमी इति ।** 'अदस् + जस्' इत्यत्र त्यदाद्यत्वे पररूपे 'जसः शी' इति जसः स्थाने 'शी' इत्यादेशेऽनुबन्धलोपे गुणे 'अदे' इति जाते, 'एत ईद् बहुवचने' इति ईत्वे दस्य मकारे च कृते 'अमी' इति सिद्धम् ।

(३८६) **न मु ने इति ।** 'पूर्वत्राऽसिद्धमि'त्यतः 'असिद्धमि'त्यनुवर्तते । म् च उश्चेति समाहारद्वन्द्वः । 'ने' इति नाशब्दस्य सप्तम्येकवचनम् । विषयसप्तमी चैषा । तथा च नाभावे कृते कर्तव्ये च लभ्यते । तदाह—**नाभाव इत्यादि । अमुना इति ।**

उदाहरण—(१) अदस्+औ, (स्=अ—'त्यदादीनामः' से पररूप) अद+औ (अ+औ=औ—'वृद्धि')—अदौ (द्=म् , औ=ऊ 'अदसोऽसेर्दादु दो मः')=अमू ।

(३८५) पद—एतः, ईत्, बहुवचने । **अनुवृत्ति**—अदसः, दात्, दः, मः । **विधिसूत्र ।**

मूलार्थ—बहुवचन में अदस् शब्द के द् से पर एकार को ईत् तथा द् के स्थान पर म् आदेश होते हैं। अमी । 'पूर्वत्रासिद्धम्' के नियम के अनुसार पहले विभक्तिकार्य, पश्चात् उकार और मकार होते हैं। अमुम् । अमू । अमून् । मुत्व हो जाने पर, घि संज्ञा होकर टा के स्थान पर 'ना' आदेश होगा ।

विमर्श—सूत्रार्थ की स्पष्टता के लिए—'अदसोऽसेर्दादु दो मः' (३८४) से 'अदसः, दात्, दः और मः' की अनुवृत्ति की जाती है। तदनुसार "बहुवचन में अदस् शब्द के अवयव 'द्' से पर 'ए' के स्थान पर 'ई' (ईत्) आदेश होता है तथा द् के स्थान पर म् होता है।"

उदाहरण—(१) अदस्+जस् (स्=अ, पररूप)—अद+जस् , (जस्=शी-ई) अद+ई, (अ+ई=ए 'गुण') अदे (ए=ई, द्=म्—'एत ईद् बहुवचने')=अमी। (२) अदस्+अम् (स्=अ, पररूप) अद+अम् , (अ+अ='अ' 'अमि पूर्वः')—अदम् (द्=म्, अ=उ 'अदसोऽसेः')=अमुम् । (३) अदस्+औ='अमू' (पूर्ववत्)। (४) अदस्+शस् (स्=अ, पररूप)—अद+अस् (पूर्वसवर्णदीर्घ, स्=न् 'तस्माच्छसो')—अदान् (द्=म्, आ=ऊ)=अमून् ।

(३८६) पद—न, मु, ने । **अनुवृत्ति**—असिद्धम् । **असिद्ध निषेधसूत्र ।**

मूलार्थ—नाभाव कर्तव्य होने पर या कर चुकने पर मुभाव असिद्ध नहीं होता । अमुना । अमूभ्याम् । अमीभिः । अमुष्मै । अमीभ्यः। अमुष्मात् । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमुयोः । अमीषु ।

कृते च मुभावो नाऽसिद्धः । अमुना । अमूभ्याम् । अमीभिः । अमुष्मै । अमीभ्यः । अमुष्मात् । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमुयोः । अमीषु ।

॥ इति हलन्ताः पुंल्लिङ्गाः ॥

अदस्शब्दाट्टाविभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपे च 'अदसोऽसेः' इति अकारस्योत्वे दस्य मत्वे 'अमु+आ' इति जाते घिसंज्ञायाम् 'आङो नाऽस्त्रियाम्' इति नाभावे कर्तव्ये मुत्वस्यासिद्धत्वे प्राप्ते 'न मु ने' इत्यनेन मुत्वस्याऽसिद्धत्वाऽभावबोधनात् 'टा' इत्यस्य नादेशे कृते 'अमुना' इति । अत्र मुत्वस्यासिद्धत्वात् 'सुपि चे'ति दीर्घस्तु न शङ्क्यः, तेनैव सूत्रेण नाभावे कृतेऽपि मुत्वस्याऽसिद्धत्वनिषेधादिति ।

इति हलन्ताः पुंल्लिङ्गाः ।

विमर्श—प्रकृत सूत्र द्वारा असिद्ध विधान का निषेध किया जा रहा है। अतएव 'पूर्वत्रासिद्धम्' (३४) से 'असिद्धम्' की अनुवृत्ति आ रही है। सूत्र का 'ने' पद सप्तमी का एकवचन है। यहाँ वैषयिक सप्तमी अभीष्ट है। अतः 'ना' आदेश के विषय में अथवा 'ना' हो जाने पर मुभाव ('म्' और 'उ' आदेश) असिद्ध नहीं होते।

उदाहरण—(१) अदस्+टा (स्=अ, पररूप)—अद+टा, (द्=म् , अ=उ—'अदसोऽसेः') अमु+टा (आ), (यहाँ 'आ' के स्थान पर 'ना' विधायक सूत्र—'आङो नाऽस्त्रियाम्' (७।२।११०) के प्रति त्रिपादीस्थ सूत्र—'अदसोऽसेर्दादु दो मः' (८।२।८०) के द्वारा विधीयमान 'म्' और 'उ' असिद्ध होने से उकारान्त पद के अभाव में आ=ना प्राप्त नहीं है। किन्तु 'न मु ने' सूत्र द्वारा असिद्ध का निषेध होने से घिसंज्ञा होकर 'आ'='ना' आदेश हो जाता है)=अमुना। (२) अदस्+भ्याम्, (स्=अ, पररूप) अद+भ्याम्, (दीर्घ-'सुपि च') अदा+भ्याम् (द्=म्, आ=ऊ 'अदसोऽसेः')=अमूभ्याम्। (३) अदस्+भिस् , (अत्व, पररूप) अद+भिस् (अ=ए 'बहुवचने', द्=म् , ए=ई—'एत ईद् बहुवचने')—अमीभिस् (स्=र्=:)= अमीभिः। (४) अदस्+ङे, (अत्व, पररूप) अद+ङे (ङे=स्मै 'सर्वनाम्नः स्मै')—अद+स्मै (द्=म् , अ=उ, स्=ष्)=अमुष्मै। (५) अदस्+भ्यस् , (स्=अ, पररूप) अद+भ्यस् (अ=ए—'बहुवचने झल्येत्')—अदे+भ्यस् , (द्=म्, ए=ई 'एत ईद्बहुवचने') अमीभ्यस् (स्=र्=:)=अमीभ्यः। (६) अदस्+ङसि, (अत्व, पररूप) अद+ङसि, (ङसि=स्मात्) अद+स्मात् (द्=म् , अ=उ)=अमुस्मात्। (७) अदस्+ङस् , (अत्व, पररूप) अद+ङस् (ङस्=स्य)—अद+स्य (द्=म् , अ=उ)—अमुस्य (स्=ष्)=अमुष्य। (८) अदस्+ओस् , (अत्व, पररूप) अद+ओस् , (एत्व—'ओसि च' ए=अय्) अदयोस् , (मुत्व) अमुयोस् (स्=र्=:)=अमुयोः। (९) अदस्+आम्, (अत्व, पररूप) अद+आम् , (सुट् का आगम—'आमि सर्वनाम्नः') अद स् आम्, (अ=ए—'बहुवचने झल्येत्') अदे+साम् , (द्=म् , ए=ई 'एत ईद् बहुवचने') अमी+साम् (स्=ष्)=अमीषाम्। (१०) अदस्+ङि, (अत्व, पररूप, ङि=स्मिन्) अद+स्मिन्, (द्=म्, अ=उ) अमुस्मिन् (स्=ष्)=अमुष्मिन्। (११) अदस्+ओस्=अमुयोः (पूर्ववत्)। (१२) अदस्+सुप् (सु,)

अथ हलन्ताः स्त्रीलिङ्गाः

(३८७) नहो धः ८।२।३४ । नहो हस्य धः स्यात् झलि पदान्ते च । (३८८) नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ६।३।११६ । क्विबन्तेष्वेषु पूर्वपदस्य दीर्घः । उपानत्–उपानद् । उपानहौ । उपानहः । उपानद्भ्याम् । उपानत्सु । निपातनाद्दलोपषत्वे । क्विन्नन्तत्वात्कुत्वेन हस्य घः । जश्त्वचर्त्वे । उष्णिक्–उष्णिग् । उष्णिहौ ।

---

(३८७) **नहो ध इति ।** अत्र ‘हो ढः’ इत्यतः ‘ह’ इति, ‘झलो झलि’ इत्यतः ‘झलि’ इति ‘स्कोः’ इत्यतः ‘अन्ते’ इति चानुवर्तते । ‘पदस्ये’त्यधिकृतम् । तदाह—**नहो हस्येति ।**

(३८८) **नहिवृति इति ।** दीर्घविधिः, ‘ढ्रलोपे पूर्वस्य दीर्घोऽणः’ इत्यतस्तदनुवृत्तेः । तदाह—**क्विबन्तेष्वित्यादिना ।**

उपानत् इति । उपपूर्वकात् ‘णह् बन्धने’ इत्यतः ‘णो नः’ इति णस्य नत्वे उपनह्यते इति विग्रहे कर्मणि क्विपि ‘नहिवृति’ इत्यादिना पूर्वपदस्य दीर्घे उपानह्शब्दः स्त्रीलिङ्गः । तस्मात्सौ ‘उपानह्+स्’ इति स्थिते ‘हल्ङ्याब्भ्यः’ इति सोर्लोपे ‘नहो

(अत्व, पररूप) अद+सु (एत्व)—अदे+सु, (द्=म् , ए=ई ‘एत ईद०’) अमीसु (स्=ष्)=अमीषु ।

सकारान्तपुंल्लिङ्ग अदस् (=वह) शब्द के रूप

	एक०	द्वि०	बहु०		एक०	द्वि०	बहु०
प्र०	असौ	अमू	अमी	पं०	अमुष्मात्	अमूभ्याम्	अमीभ्यः
द्वि०	अमुम्	अमू	अमून्	ष०	अमुष्य	अमुयोः	अमीषाम्
तृ०	अमुना	अमूभ्याम्	अमीभिः	स०	अमुष्मिन्	अमुयोः	अमीषु
च०	अमुष्मै	अमूभ्याम्	अमीभ्यः				

हलन्तपुँल्लिङ्ग-प्रकरण समाप्त ।

(३८७) पद—नहः, धः । **अनुवृत्ति**—हः, झलि, पदस्य, अन्ते । **विधिसूत्र ।**

मूलार्थ—झल् पर रहते अथवा पदान्त में नह् धातु के हकार को धकार आदेश होता है ।

विमर्श—सूत्रार्थ की पूर्ति हेतु—‘हो ढः’ (२७२) से ‘हः’, ‘झलो झलि’ (८।२।२६) से ‘झलि’ तथा ‘स्कोः’ (८।२।२९) से ‘अन्ते’ पद की अनुवृत्ति आती है । ‘पदस्य’ का अधिकार है । तदनुसार—“झल्-प्रत्याहारस्थ वर्ण के पर रहते अथवा पदान्त में ‘नह्’ धातु के ह् के स्थान पर ‘ध्’ आदेश होता है ।”

(३८८) पद—नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु, क्वौ । **अनुवृत्ति**—पूर्वस्य, दीर्घः ।

मूलार्थ—क्विबन्त √नह्, वृत्, वृष् , व्यध् , रुच् , सह् और तन् धातु के पर रहते पूर्व अण् को दीर्घ होता है । उपानत् । उपानहौ । उपानहः । उपानद्भ्याम् । उपानत्सु । क्विबन्त होने के कारण कुत्व से ह्=घ् । जश्त्व तथा चर्त्व होकर—उष्णिक्–उष्णिग् । उष्णिहौ । उष्णिहः । उष्णि-

उष्णिग्भ्याम् । द्यौः । दिवौ । दिवः । द्युभ्याम् । गीः । गिरौ । गिरः । एवं—पूः । चतस्रः-२ । चतसृभिः । चतसृभ्यः-२ । चतसृणाम् । चतसृषु । का । के । काः ।

धः' इति हस्य धत्वे 'झलां जशोऽन्ते' इति जश्त्वेन धकारस्य दत्वे 'वाऽवसाने' इति विकल्पेन चर्त्वे 'उपानत्' इति । पक्षे—'उपानद्' इति ।=पादत्राणमित्यर्थः ।

ग्भ्याम् । द्यौः । दिवौ । दिवः । द्युभ्याम् । गीः । गिरौ । गिरः । इसी प्रकार—पूः । चतस्रः । चतसृभिः । चतसृभ्यः । चतसृणाम् । चतसृषु । का । के । काः । 'सर्वा' शब्द की तरह रूप बनते हैं ।

विमर्श—प्रकृत सूत्र में 'ढ्लोपे पूर्वस्य दीर्घोऽणः' (१२८) से 'पूर्वस्य' तथा 'दीर्घः' पदों की अनुवृत्ति आ रही है । तदनुसार—'क्विप्-प्रत्ययान्त नह्, वृत्, वृष्, व्यध्, रुच्, सह् और तन् धातुओं के परवर्ती रहने पर पूर्व अण् को दीर्घ होता है ।'

उदाहरण—(१) उपानह् (=जूता) शब्द की व्युत्पत्ति प्रदर्शित की जा रही है—उप+√नह् से कर्म में क्विप्, (क्विप् का सर्वापहारी लोप)—उपनह् (पकारोत्तरवर्ती अकार को दीर्घ—'नहिवृति०')—उपानह्+सु (स्) (स् का हल्ङ्यादि लोप)—उपानह्, (ह्=ध्—'नहो धः') उपान ध्, ('ध्'='द्'—जश्त्व)—उपानद् (द्=त्—वैकल्पिक चर्त्व)=उपानत् । पक्ष में=उपानद् । (२) उपानह्+औ=उपानहौ । (३) उपानह्+जस् (अस्) (स्=र्=:)=उपानहः । (४) उपानह्+भ्याम् (ह्=ध्, ध्=द्)=उपानद्भ्याम् । (५) उपानह्+सुप् (सु) (ह्=ध्=द्=त्)=उपानत्सु ।

हकारान्त स्त्रीलिङ्ग उष्णिह् (=वैदिक छन्द) के रूपों का उल्लेख किया जा रहा है—(उत्+√स्निह्+क्विन्, निपातन से 'त्' का लोप=उष्णिह्) (१) उष्णिह्+सु (स्), (स् का लोप, ह्=घ् 'कुत्व'—'क्विन्प्रत्ययस्य कुः') उष्णिघ् (घ्=ग्—'जश्त्व')—उष्णिग् (ग्=क्—पाक्षिक चर्त्व)=उष्णिक् । पक्ष में—उष्णिग् । (२) उष्णिहौ (औ) । (३) उष्णिहः (जस्) । (४) उष्णिह्+भ्याम् (ह्=घ्—'कुत्व', घ्=ग्—'जश्त्व')=उष्णिग्भ्याम् ।

वकारान्त दिव् (=आकाश) शब्द के रूपभेदों का उल्लेख किया जा रहा है । प्रथमा विभक्ति में—(१) दिव्+सु, (व्=औ 'दिव औत्') दि औ+स् (इ=य्—'यण्' स्=र्=:)=द्यौः । (२) दिवौ (औ) । (३) दिवः (जस्) । (४) द्युभ्याम् (भ्याम्) ।

रेफान्त गिर् (=वाणी) शब्द के विशेष रूपों का प्रदर्शन किया जा रहा है—' √गॄ+क्विप् (क्विप् का लोप ऋ=इर्=गिर् ।) (१) गिर्+सु (स्) ('स्' का लोप)—गिर् (उपधादीर्घ—'र्वोरुपधायाः', र्=:)=गीः । (२) गिरौ । (३) गिरः । इसी प्रकार पुर् (=नगरी) शब्द के 'पूः' आदि रूप बनते हैं ।

संख्यावाचक चतुर् शब्द के रूप इस प्रकार सिद्ध होते हैं—(१) चतुर्+जस् (अस्), (चतुर्=चतसृ—'त्रिचतुरोः स्त्रियाम्') चतसृ+अस् (ऋ=र् 'यण्', स्=र्=:)=चतस्रः । द्वितीया बहुवचन में भी—चतस्रः । (२) चतसृभिः (भिस्) । (३) चतसृभ्यः (भ्यस्) । (४) चतसृणाम् (आम्) । (५) चतसृषु (सुप्) ।

'किम्' (=कौन) शब्द के स्त्रीलिङ्ग के रूप बतलाये जा रहे हैं—(किम्=क) क+टाप् (आ), क+आ (दीर्घ)=का । (१) का+सु (स्) (स् का लोप)=का । (२) का+औ (औ=शी, गुण)=के । (३) का+जस् (अस्) (पूर्वसवर्णदीर्घ, स्=र्=:)=काः । शेष रूप सर्वा शब्द की तरह बनेंगे ।

सर्वावत् । (३८९) **यः सौ ७।२।११० ।** इदमो दस्य यः स्यात्सौ । 'इदमो मः' । इयम् । त्यदाद्यत्वम् । टाप् । 'दश्चे'ति मः । इमे । इमाः । इमाम् । इमे । इमाः । अनया । 'हलि लोपः' । आभ्याम् । आभिः । अस्यै । अस्याः–२ । अनयोः–२ । आसाम् । अस्याम् । आसु । अन्वादेशे तु—एनाम् । एने । एनाः । एनया । एनयोः–२ । 'ऋत्विगा'दिना सृजेः क्विन्, अमागमश्च निपात्यते । स्रक् । स्रजौ । स्रजः । स्रग्भ्याम् । त्यदाद्यत्वे टाप् । स्या । त्ये । त्याः । एवम्–तद् । यद् । एतद् ।

---

(३८९) **यः सौ इति ।** अत्र 'इदमो मः' इत्यतः 'इदमः' इति, 'दश्चे'त्यतः 'दः' इति च षष्ठ्यन्तमनुवर्तते । तदाह—**इदमो दस्येत्यादिना । इयमिति ।** 'इदम् + स्' इत्यत्र 'यः सावि'ति दकारस्य स्थाने यकारादेशे 'इयम् + स्' इति जाते, 'त्यदादीनामः' इति प्राप्तमकारं प्रबाध्य 'इदमो मः' इति मकारस्य मकारादेशे 'हल्ङ्याब्भ्यः' इति स्लोपे इयमिति ।

---

(३८९) पद—यः, सौ । **अनुवृत्ति**—इदमः, दः । **विधिसूत्र ।**

मूलार्थ—'सु' पर रहते स्त्रीलिङ्ग में 'इदम्' शब्द के 'द्' को 'य्' आदेश होता है । 'इदमो मः' से म्=म् । इयम् । 'त्यदादि' सूत्र से 'अ', टाप्, 'दश्च' से द्=म् । इमे । इमाः । इमाम् । इमे । इमाः । अनया । आभ्याम् । आभिः । अस्यै । अस्याः–२ । अनयोः । आसाम् । अस्याम् । आसु । अन्वादेश में—एनाम्, एने, एनाः, एनया, एनयोः । √सृज् से 'ऋत्विग्०' सूत्र से क्विन् तथा अम् का आगम निपातन से होता है । स्रक्-स्रग्, स्रजौ, स्रजः, स्रग्भ्याम् । 'त्यदादीनामः' से अ तथा टाप्—स्या, त्ये, त्याः । इसी तरह—तद्, यद्, एतद् शब्दों के रूप बनेंगे । वाक्–वाग् । वाचौ । वाचः । वाग्भ्याम् । अप् शब्द नित्य बहुवचनान्त है । 'अप्तृन्०' से दीर्घ । आपः । अपः ।

विमर्श—प्रकृत सूत्र में 'इदमो मः' (२९२) से 'इदमः' तथा 'दश्च' (२९५) से 'दः' की अनुवृत्ति आती है । तदनुसार—'सु' पर रहते 'इदम्' शब्द के 'द्' के स्थान में 'य्' आदेश होता है ।

उदाहरण—(१) इदम्+सु (स्), (द्=य् 'यः सौ') इयम्+स् (विभक्ति का लोप, 'त्यदादीनामः' से प्राप्त 'अ' को बाधकर म्=म्—'इदमो मः')=इयम् । (२) इदम्+औ, (म्=अ, पररूप) इद+औ, (टाप्, दीर्घ)—इदा+औ, (द्=म्) इमा+औ, (औ=शी 'औङ आपः') इमा+ई (आ+ई=ए 'गुण')=इमे । (३) इदम्+जस् (अस्), (अ, पररूप) इद+अस्, (टाप्, दीर्घ, द्=म्) इमा+अस् (पूर्वसवर्णदीर्घ, स्=र्=ः)=इमाः । (४) इदम्+अम्, (म्=अ, पररूप, टाप्, दीर्घ) इदा+अम् (द्=म, पूर्वरूप)=इमाम् । (५) इमे (औट्) । (६) इमाः (शस्) । (७) इदम्+टा (आ), (अत्व, पररूप, टाप् दीर्घ) इदा+आ, (इद्=अन् 'अनाप्यकः') अन् आ+आ, (आ=ए—'आङि चापः') अने+आ (ए=अय्)=अनया । (८) इदम्+भ्याम्, (अत्व, पररूप, टाप्, दीर्घ) इदा+भ्याम् ('इद्' का लोप 'हलि लोपः', दीर्घ)=आभ्याम् । (९) इदम्+भिस्, (अत्व, पररूप, टाप्, दीर्घ) इदा+भिस् ('इद्' का लोप, स्=र्=ः)=आभिः । (१०) इदम्+ङे (ए), (अ, पररूप, टाप्, दीर्घ) इदा+ए, ('इद्' का लोप, स्याट् का आगम तथा 'आप्' को ह्रस्व—'सर्वनाम; स्याड्०') अ+स्या+ए (आ+ए=ऐ 'वृद्धि')=अस्यै । (११) इदम्+(ङसि) अस्

वाक्-वाग् । वाचौ । वाचः । वाग्भ्याम् । अप्शब्दो नित्यं बहुवचनान्तः । 'अप्तृन्नि'ति दीर्घः । आपः । अपः । (३९०) अपो भि ७।४।४८ । अपस्तकारो भादौ प्रत्यये । अद्भिः । अद्भ्यः-२ । अपाम् । अप्सु । दिक्-दिग् । दिशौ । दिशः । दिग्भ्याम् । त्यदादिष्विति दृशेः क्विन्विधानादन्यत्रापि कुत्वम् । दृक् । दृशौ । दृशः । दृग्भ्याम् ।

---

(३९०) **अपो भि इति ।** अत्र 'अच उपसर्गात्तः' इत्यतः 'तः' इत्यनुवर्तते । 'अङ्गस्ये'त्यधिक्रियते । तच्च 'भि' इति सप्तम्यन्तेन विशेष्यते, तदादिविधिस्तदाह—**अपस्तकार इत्यादिना । अद्भिरिति ।** नियतस्त्रीलिङ्गात् बहुवचनान्तात् अप्शब्दात् प्रातिपदिकात् तृतीयाबहुवचने भिसि प्रत्यये 'अप्+भिस्' इति जाते, 'अपो भि'

(अत्व, पररूप, टाप्, दीर्घ)—इदा+अस् (स्याट् का आगम, ह्रस्व, 'इद्' का लोप)—अस्या +अस् (दीर्घ—स्=र्=:)=अस्याः । (१२) इदम्+ओस्, (अत्व, पररूप, टाप्, दीर्घ) इदा+ओस्, (इद्=अन्, आ=ए) अने+ओस् (ए=अय्, स्=र्=:)=अनयोः । (१३) इदम्+आम्, (अत्व, पररूप, टाप्, दीर्घ) इदा+आम् (सुट् का आगम, इद् का लोप)= आसाम् । (१४) इदम्+ङि (अत्व, पररूप, टाप्, दीर्घ)—इदा+ङि (ङि=आम्, स्याट् का आगम तथा 'आ' को ह्रस्व, 'इद्' का लोप)=अस्याम् । (१५) इदम्+सुप् (सु), (अत्व, पररूप, टाप्, दीर्घ) इदा+सु ('इद्' का लोप)=आसु । अन्वादेश में 'द्वितीयाटौस्स्वेनः' से एन आदेश होने पर, टाप् के पश्चात् 'एनाम्, एने, एनाः, एनया, एनयोः' रूप बनते हैं ।

जकारान्त स्रज् (=माला) शब्द के रूपभेदों का उल्लेख किया जा रहा है—(१) स्रज्+सु (स्) (विभक्ति का लोप)—स्रज् (ज्=ग्—'कुत्व') स्रग् (ग्=क्—'पाक्षिक चर्त्व')= स्रक्, स्रग् । (२) स्रजौ (औ) । (३) स्रजः (जस्) । (४) स्रग्भ्याम् (भ्याम्, कुत्व) ।

'त्यद्' शब्द के रूपों की प्रक्रिया बतलायी जा रही है—(१) त्यद्+स्, (द्=अ, 'त्यदादीनामः', पररूप) त्य+स्, (टाप्, दीर्घ) त्या+स्, (त=स्—'तदोः सः') स्या+स् (विभक्ति का लोप)=स्या । (२) त्यद्+औ, (अत्व, पररूप, टाप्, दीर्घ) त्या+औ, (औ=शी) त्या +ई (आ+ई=ए 'गुण')=त्ये । (३) त्यद्+जस्, (अत्व, पररूप, टाप्, दीर्घ) त्या+अस् (पूर्वसवर्णदीर्घ, स्=र्=:)=त्याः । इसी प्रकार तद्, यद्, एतद् शब्दों के रूप बनेंगे ।

चकारान्त 'वाच्' (=वाणी) शब्द के रूपभेदों का उल्लेख किया जा रहा है—(१) वाच् +सु (स्) (विभक्ति का लोप)—वाच्, (च्=क् 'चोः कुः') वाक् (क्=ग् 'पाक्षिक चर्त्व') =वाक्, वाग् । (२) वाच्+औ=वाचौ । (३) वाच्+जस् (अस्) (स्=र्=:)=वाचः । (४) वाच्+भ्याम् (च्=क् 'कुत्व', क्=ग् 'जश्त्व')=वाग्भ्याम् ।

अप् (=जल) शब्द नित्य बहुवचनान्त है । (१) अप्+जस् (अस्), ('अ'='आ'—दीर्घ—'अप्तृन्०') आपस् (स्=र्=:)=आपः । (२) अप्+शस् (अस्)—अपस् (स्= र्=:)=अपः । सर्वनामस्थान न होने से दीर्घ की प्राप्ति नहीं है ।

(३६०) पद—अपः, भिः । **अनुवृत्ति**—तः, अङ्गस्य । **विधिसूत्र** ।

मूलार्थ—भकार आदि प्रत्यय पर रहते 'अप्' शब्द को तकार अन्तादेश होता है । अद्भिः । अद्भ्यः । अपाम् । अप्सु । दिक्-दिग् । दिशौ । दिशः । दिग्भ्याम् । 'त्यदादिषु' सूत्र में √दृश् से क्विन्प्रत्यय विधान होने से अन्यत्र भी कुत्व होता है । दृक् । दृशौ । दृशः । दृग्भ्याम् । त्विट् । त्विषौ । त्विषः । त्विड्भ्याम् । त्विट्त्सु-त्विट्सु । 'ससजुषो रुः' से रुत्व होकर—सजूः । सजुषौ ।

त्विट् । त्विषौ । त्विषः । त्विड्भ्याम् । त्विट्त्सु–त्विट्सु । ‘ससजुषोरि’ति रुत्वम् । सजूः । सजुषौ । सजूर्भ्याम् । आशीः । आशिषौ । आशीर्भ्याम् । असौ । त्यदाद्यत्वम् । टाप् । औङः शी । उत्वमत्वे । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमूभ्यः । अमुष्याः–२ । अमुयोः–२ । अमूषाम् । अमुष्याम् । अमूषु ।

इति हलन्ताः स्त्रीलिङ्गाः ।

इत्यनेन पस्य तकारे ‘झलां जशोऽन्ते’ इति तस्य दत्वे ‘अद् भिस्’ इति स्थिते सस्य रुत्वे विसर्गे च कृते ‘अद्भिः’ इति । **अमुष्यामिति** । ‘अदस् + ङि’ इत्यत्र त्यदाद्यत्वे पररूपे, टापि, सवर्णदीर्घे ‘अदा + ङि’ इति स्थिते ‘ङेराम्नद्याम्नीभ्यः’ इति ङेरामादेशे ‘सर्वनाम्नः’ इति स्याडागमे पूर्वस्य ह्रस्वे ‘आदेशप्रत्यययोः’ इति सस्य षत्वे ‘अदसोऽसेः’ इति अकारस्य उत्वे दस्य मत्वे च ‘अमुष्या आम्’ इति जाते सवर्णदीर्घे ‘अमुष्यामि’ति सिद्धम् ।

इति हलन्तस्त्रीलिङ्गप्रकरणम् ।

सजूर्भ्याम् ॥ आशीः । आशिषौ । आशिषः । आशीर्भ्याम् । असौ । ‘त्यदादीनामः’ से अत्व, टाप्, औ के स्थान पर शी आदेश, उकार तथा मकार होने पर अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमूभ्यः । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमूषु ।

विमर्श—सूत्र में आदेशवाचक पद का अभाव है । अतः ‘अच्च उपसर्गात्तः’ से ‘तः’ पद की अनुवृत्ति आती है । ‘अङ्गस्य’ का अधिकार है । उससे ‘प्रत्यये’ का आक्षेप किया जाता है । ‘भि’ पद ‘प्रत्यये’ का विशेषण होने के कारण उससे तदादि विधि होती है । तदनुसार अलोऽन्त्य परिभाषा की उपस्थिति से—“भकारादि प्रत्यय पर रहते ‘अप्’ शब्द के ‘प्’ के स्थान पर ‘त्’ आदेश होता है ।”

उदाहरण—(१) अप्+भिस्, (प्=त् ‘अपो भि’)—अत् भिस्, (त्=द्—जश्त्व) अद्+भिस् (स्=र्=:)=अद्भिः । (२) अप्+भ्यस् (प्=त्, त्=द्)=अद्भ्यस् (स्=र्=:)=अद्भ्यः । (३) अप्+आम्=अपाम् । (४) अप्+सु=अप्सु । (सुप्) । शकारान्त दिश् (=दिशा) शब्द के रूपभेद प्रदर्शित किये जा रहे हैं—(१) दिश्+स् (सु), (विभक्तिलोप)—दिश्, (कुत्व असिद्ध होने से ‘श्’=‘ष्’—‘व्रश्च’) दिष्, (ष्=ड्—‘जश्त्व’, ड्=ग् ‘कुत्व’) दिग् (ग्=क्—‘अवसान’ में वैकल्पिक चर्त्व)=दिक् । पक्ष में=दिग् । (२) दिशौ । (३) दिशः । (४) दिश्+भ्याम् (श्=ष्=ड्=ग्)=दिग्भ्याम् ।

क्विप्प्रत्ययान्त दृश् (=आँख) शब्द के रूपभेदों की विशेषता बतलायी जा रही है—(१) दृश्+सु (स्), (विभक्तिलोप) दृश् (श्=ष्—‘व्रश्च’)—दृष्, (ष्=ड्—जश्त्व, ड्=ग् ‘कुत्व’) दृग् (ग्=क्—विकल्प से ‘वाऽवसाने’)=दृक् । पक्ष में—दृग् । (२) दृशौ । (३) दृशः । (४) दृग्भ्याम् ।

त्विष् (=दीप्ति) शब्द की विशेष विभक्तियों का उल्लेख किया जा रहा है—(१) त्विष्+स् (विभक्तिलोप, जश्त्व तथा पाक्षिक चर्त्व) त्विट्-त्विड् । (२) त्विषौ । (३) त्विषः । (४)

अथ हलन्ता नपुंसकलिङ्गाः

स्वमोर्लुक्। दत्वम्। स्वनडुत्। स्वनडुही। 'चतुरनडुहोरि'त्याम्। स्वनड्वांहि। पुनस्तद्वत्। शेषं पुंवत्। वाः। वारी। वारि। वारा। वार्भ्याम्। चत्वारि। किम्।

स्वनडुत् इति। सु—शोभनाः अनड्वाहः यस्येति विग्रहे स्वनडुह्शब्दात् प्रथमैकवचने सौ 'स्वनडुह्+स्' इति स्थिते 'स्वमोर्नपुंसकात्' इति सोर्लोपे 'वसुस्रंसुध्वंस्वन-

---

त्विष्+भ्याम् (ष्=ड्, जश्त्व)=त्विड्भ्याम्। (५) त्विष्+सुप् (सु), (ष्=ड्, धुट् का आगम, ध्=त ड्=ट्, चर्त्व)=त्विट्त्सु। धुट् के अभाव पक्ष में—त्विट्सु।

क्विबन्त सजुष् (=साथ में प्रीति करने वाले) शब्द के रूपभेदों का उल्लेख किया जा रहा है—(१) सजुष्+सु (स्) (विभक्तिलोप ष्=र् 'ससजुषो रुः' उपधादीर्घः, र्=ः)=सजूः। (२) सजुषौ। (३) सजूर्भ्याम् (ष्=र्, उपधादीर्घ)।

क्विप्प्रत्ययान्त आशिष् (=आशीर्वाद) शब्द के प्रमुख रूपों की विशेषता बतलाई जा रही है—(१) आशिष्+सु (स्), (विभक्तिलोप, ष् के असिद्ध होने से स्=रु) आशि र्, (उपधादीर्घ—'र्वोरुपधायाः') आशीर् (र्=ः)=आशीः। (२) आशिषौ। (३) आशिषः। (४) आशीर्भ्याम्।

अदस् शब्द के रूपों की रचना-प्रक्रिया का उल्लेख किया जा रहा है—(१) अदस्+सु (स्)=असौ (पुंल्लिङ्ग के समान)। (२) अदस्+औ, (स्=अ—'त्यदादीनामः', अ+अ ='अ' पररूप—'अतो गुणे') अद+औ, (टाप्, दीर्घ) अदा+औ, (औ=शी, आ+ई=ए 'गुण') अदे (द्=म्, ए=ऊ 'अदसोऽसेः')=अमू। (३) अदस्+जस् (अस्), (अत्व, पररूप, टाप्, दीर्घ) अदा+अस् (पूर्वसवर्णदीर्घ), अदास् (आ=ऊ, द्=म्) अमूस् (स्=र्=ः)=अमूः। (४) अदस्+टा (आ), (अत्व, पररूप, टाप्, दीर्घ) अदा+आ (आ=ए 'आङि चापः' ऐ=अय्) अदया, (उत्व एवं मत्व)=अमुया। (५) अमूभ्याम् (अत्व, पररूप, टाप्, ऊत्व तथा मत्व)। (६) अमूभिः (भिस् में पूर्ववत्)। (७) अदस्+ङे, (अत्व, पररूप, टाप्, दीर्घ) अदा+ए, (स्याट् का आगम तथा 'आ' को ह्रस्व—'सर्वनाम्नः') अदस्या+ए (आ+ए='ऐ' वृद्धि) अदस्यै (उत्व, मत्व तथा षत्व होकर)=अमुष्यै। (८) अमूभ्यः। (९) अदस्+ङसि (अस्), (अत्व, पररूप, टाप्) अदा+अस् (स्याट् का आगम, 'आ' को ह्रस्व) अदस्या+अस् (उत्व, मत्व, सवर्णदीर्घ)—अमुस्यास् (षत्व, स्=र्=ः)=अमुष्याः। इसी प्रकार ङस् में भी 'अमुष्याः'। (१०) अमुयोः (अत्व, पररूप, टाप् होने पर आ=ए तथा अय् आदेश, मुभाव, स्=र्=ः)। (११) अदस्+आम्, (अत्व, पररूप, टाप्, दीर्घ, सुट् का आगम) अदा+साम् (आ=ऊ, द्=म्, षत्व)=अमूषाम्। (१२) अमुष्याम् (ङि=आम्, शेष कार्य पूर्ववत्। (१३) अदस्+सुप् (सु) (अत्व, पररूप, टाप्, अत्व, मत्व तथा षत्व होकर)=अमूषाम्।

हलन्तस्त्रीलिङ्ग-प्रकरण समाप्त।

पूर्वोक्त क्रमानुसार सर्वप्रथम 'स्वनडुह्' शब्द के रूपभेदों का उल्लेख किया जा रहा है— (सु—शोभनाः अनड्वाहः यस्य कुलस्येति=अर्थात् सुन्दर बैल वाला कुल, बहुव्रीहि समास में

के। कानि। इदम्। इमे। इमानि। * अन्वादेशे नपुंसके एनद्वक्तव्यः *। एनत्। एने। एनानि। एनेन। एनयोः–२। व्योम। व्योम्नी–व्योमनी। व्योमानि। ब्रह्म। * सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः *। हे ब्रह्म–हे ब्रह्मन्। ब्रह्मणी। ब्रह्माणि।

डुहां दः' इत्यनेन हस्य दत्वे 'वाऽवसाने' इति वैकल्पिकचर्त्वेन दस्य तत्वे 'स्वनडुत्, स्वनडुद्' इति रूपद्वयम्।

स्वनडुह् शब्द निष्पन्न होता है। (१) स्वनडुह्+सु (स्), (सु का लुक्—'स्वमोर्नपुंसकात्') स्वनडुह् (ह्=द्—'वसुस्रंसु०') स्वनडुद् (द्=त् 'पाक्षिक चर्त्व')=स्वनडुत्, पक्ष में=स्वनडुद्। (२) स्वनडुह्+औ (औ=शी—'नपुंसकाच्च') स्वनडुह्+ई=स्वनडुही। (३) स्वनडुह्+जस् (जस्=शि—'जश्शसोः शिः')—स्वनडुह्+इ, (आम् (आ) का आगम 'चतुरनडुहोरामुदात्तः') स्वनडु आह्+इ, (नुम् का आगम—'नपुंसकस्य झलचः' उ=व्—'यण्') स्वनड्वान् ह्+इ, (न्=अनुस्वार 'नश्चापदान्तस्य झलि')=स्वनड्वांहि। द्वितीया विभक्ति में भी इसी प्रकार रूप बनते हैं। तृतीयादि विभक्तियों में पुंल्लिङ्ग के समान रूप बनेंगे।

रेफान्त वार् (=जल) शब्द के रूपों की प्रक्रिया का दिग्दर्शन कराया जा रहा है—(१) वार्+सु ('सु' का लुक्, र्=ः)=वाः। (२) वार्+औ (औ=शी)=वारी। (३) वार्+जस् (जस्=शि)=वारि। (४) वार्+टा (आ)=वारा। (५) वार्+भ्याम्=वार्भ्याम्।

संख्यावाचक चतुर् शब्द से जस्—चतुर्+जस्, (जस्=शि) चतुर्+इ, ('उ' से पर आम् (आ) का आगम) चतु आ र्+इ (उ=व् 'यण्')=चत्वारि।

मकारान्त 'किम्' (=कौन) शब्द के विशिष्ट रूपों का उल्लेख किया जा रहा है—(१) किम्+सु ('सु' का लुक्)=किम्। (२) किम्+औ, (औ=शी) किम्+ई, (किम्=क) क+ई (अ+ई=ए 'गुण')=के। (३) किम्+जस् (जस्=शि, किम्=क), क+इ (नुम् का आगम, उपधादीर्घ)=कानि।

इदम् शब्द के रूपभेदों की प्रक्रिया इस प्रकार है—(१) इदम्+सु ('सु' का लुक्)=इदम्। (२) इदम्+औ, (अत्व, पररूप) इद+औ (औ=शी)—इद+ई (गुण)—इदे (द्=म्—'दश्च')=इमे। (३) इदम्+जस्, (अत्व, पररूप) इद+जस्, (जस्=शि) इद+इ (नुम् का आगम, उपधादीर्घ, द्=म्)=इमानि।

(वा०)—नपुंसकलिङ्ग में अन्वादेश के विषय में इदम् और एतद् शब्द के स्थान पर 'एनत्' आदेश होता है। इदम्+अम् ('अम्' का लुक्, इदम्=एनत्)=एनत्। इसी प्रकार आगे एने। एनानि। एनेन। एनयोः आदि।

नकारान्त 'व्योमन्' शब्द के विशेष रूपों की रचना-प्रक्रिया बतलायी जा रही है—(१) व्योमन्+सु (सु का लुक्, न् का लोप)=व्योम। (२) व्योमन्+औ, (औ=शी) व्योमन्+ई (विकल्प से उपधा 'अ' का लोप—'विभाषा ङिश्योः')=व्योम्नी। पक्ष में—व्योमनी। (३) व्योमन्+जस्, (जस्=शि) व्योमन्+इ (उपधादीर्घ)=व्योमानि।

नकारान्त प्रातिपदिक ब्रह्मन् (=वेद अथवा ब्रह्म) शब्द के रूपभेदों का उल्लेख किया जा रहा है—(१) ब्रह्मन्+सु ('सु' का लुक् तथा 'न्' का लोप)=ब्रह्म। (२) हे ब्रह्मन्+सु (सु का लुक्, विकल्प से 'न्' का लोप—'सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः')=हे ब्रह्म।

'रोऽसुपि' । अहः । 'विभाषा ङिश्योः' । अह्नी–अहनी । अहानि । (३९१) अहन् ८।२।६८ । अहन्नित्यस्य रुः पदान्ते । अहोभ्याम् । दण्डि । दण्डिनी । दण्डीनि । सुपथि । टिलोपः–सुपथी । सुपन्थानि । ऊर्क् । ऊर्जी । ऊर्न्जि । नरजानां संयोगः । त्यद् । त्ये । त्यानि । तत् । ते । तानि । यत् । ये । यानि । एतत् । एते । एतानि । 'अवङ् स्फोटायनस्ये'ति अवङ् ।

---

(३९१) अहन्निति । अत्र 'ससजुषो रुः' इत्यतः 'रुः' इति, 'स्कोः संयोगाद्योरन्ते च' इत्यतः 'अन्ते' इति चानुवर्तते । 'अहन्' इति लुप्तषष्ठीकं पदम् । 'पदस्ये'त्यधिक्रियते । तदाह—**अहन्नित्यस्येत्यादि** । **अहोभ्याम् इति** । 'अहन् + भ्याम्' इत्यत्र 'अहन्' इत्यनेन नस्य रुत्वे 'हशि चे'त्युत्वे 'आद् गुणः' इति गुणे 'अहोभ्याम्' इति ।

'न्' का लोप न होने पर—है ब्रह्मन् । (३) ब्रह्मन्+औ (औ=शी)—ब्रह्मन्+ई (न्=ण्) =ब्रह्मणी । (४) ब्रह्मन्+जस् (जस्=शि, सर्वनामस्थान संज्ञा, उपधादीर्घ)=ब्रह्माणि ।

अहन् (=दिन) शब्द की रूप-प्रक्रिया बतलायी जा रही है—(१) अहन्+सु, ('सु' का लुक्, न्=र्—'रोऽसुपि') अहर् (र्=:)=अहः । (२) अहन्+औ, (औ=शी) अहन्+ई (भ संज्ञा, विकल्प से 'अन्' के 'अ' का लोप)=अह्नी । 'अ' का लोप न होने पर=अहनी । (३) अहन्+जस् (जस्=शि, उपधादीर्घ)=अहानि ।

(३९१) पद—अहन् । **अनुवृत्ति**—रुः, अन्ते, पदस्य । **विधिसूत्र** ।

मूलार्थ—पदान्त में अहन् शब्द के 'न्' को 'रु' होता है । अहोभ्याम् । दण्डि । दण्डिनी । दण्डीनि । सुपथि । टिलोप होकर—सुपथी । सुपन्थानि । ऊर्क् । ऊर्जी । ऊर्ञ्जि । न् र् ज् का संयोग है । त्यद् । त्ये । त्यानि । तद् । ते । तानि । यद् । ये । यानि । एतद् । एते । एतानि । 'अवङ् स्फोटायनस्य' से अवङ् ।

कारिकार्थ—'गो' उपपदपूर्वक √अञ्चु धातु से निष्पन्न गवाक् शब्द के नपुंसकलिङ्ग में (धातु के पूजा तथा गति अर्थों की भिन्नता से) सन्ध्यभाव, अवङ् आदेश, पूर्वरूप आदि होकर १०९ रूप बनते हैं । उसमें सु, अम् तथा सुप् में प्रत्येक के नौ रूप, भकारादि छः प्रत्ययों में प्रत्येक के छः रूप, जस् एवं शस् में प्रत्येक के तीन रूप तथा अन्य दस विभक्तियों में प्रत्येक के चार रूपों का योग करके १०९ रूप होते हैं ।' गवाक्–ग् । गोची । गवाञ्चि । गोचा । गवाग्भ्याम् । यकृद् । शकृद् । शकृती । शकृन्ति । शकृद्भ्याम् । ददद् । ददती ।

विमर्श—प्रकृत सूत्रार्थ की पूर्ति हेतु—'ससजुषो रुः' (८।२।६६) से 'रुः' तथा 'स्कोः संयोगाद्योरन्ते च' से 'अन्ते' पद की अनुवृत्ति आती है । 'पदस्य' का अधिकार है । तदनुसार अलोऽन्त्य परिभाषा की उपस्थिति द्वारा—"पद के अन्त में 'अहन्' शब्द के 'न्' के स्थान में 'रु' आदेश होता है ।"

उदाहरण—(१) अहन्+भ्याम्, (न्=रु–'अहन्') अह रु+भ्याम्, (रु=उ 'हशि च') अह उ+भ्याम् (गुण)=अहोभ्याम् ।

दण्डिन् (=दण्डधारी संन्यासी कुल) शब्द के रूपों की सिद्धि प्रदर्शित की जा रही है—(१) दण्डिन्+सु (विभक्ति तथा 'न्' का लोप)=दण्डि । (२) दण्डिन्+औ=दण्डिनी । (३) दण्डिन्+जस्=दण्डीनि (पूर्ववद्) ।

सुपथिन् (=सुन्दर मार्ग वाला नगर) शब्द के रूपों की प्रक्रिया इस प्रकार है—(१)

गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ।। १ ।।
स्वमसुप्सु नव, षड् भादौ षट्के स्युस्त्रीणि जश्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय ।। २ ।।

गवाक्-गवाग् । गोची । गवाञ्चि । पुनस्तद्वत् । गोचा । गवाग्भ्याम् । यकृत् । शकृत् । शकृती । शकृन्ति । शकृद्भ्याम् । ददत् । ददती । (३९२) वा नपुंसकस्य

सुपथिन्+सु (विभक्तिलोप तथा 'न्' का लोप)=सुपथि । (२) सुपथिन्+औ (औ=शी)—सुपथिन्+ई (भ-संज्ञा, टि (इन्) का लोप)=सुपथी । (३) सुपथिन्+जस् (जस्=शि)—सुपथिन्+इ (सर्वनामस्थान संज्ञा—'शि सर्वनामस्थानम्', इ=अ—'इतोऽत्सर्वनामस्थाने') सुपथन्+इ (थ=न्थ—'थो न्थः', उपधादीर्घ)=सुपन्थानि ।

ऊर्ज् (=बलवान्) शब्द के रूपभेदों का उल्लेख किया जा रहा है—(१) ऊर्ज्+सु ('सु' का लुक्)—ऊर्ज्, (ज्=ग्—'कुत्व') ऊर्ग् (ग्=क्—वैकल्पिक चर्त्व)=ऊर्क्, ऊर्ग् । (२) ऊर्ज्+औ (औ=शी)=ऊर्जी । (३) ऊर्ज्+जस् (जस्=शि)—ऊर्ज्+इ, ('ऊ' के अनन्तर नुम् का आगम) ऊर्न्जि (अनुस्वार, परसवर्ण)=ऊर्ञ्जि ।

सर्वनामवाचक त्यद् के रूप इस प्रकार है—(१) त्यद्+सु ('सु' का लुक्)=त्यद् । (२) त्यद्+औ (औ=शी)—त्यद्+ई (द्=अ, पररूप, गुण)=त्ये । (३) त्यद्+जस् (जस्=शि)—त्यद्+इ (अत्व, पररूप, नुम्, उपधादीर्घ)=त्यानि । इसी प्रकार—तद्, यद् तथा एतद् शब्द के रूप बनेंगे ।

(१) गो+√अन्च् (=गति और पूजा) से क्विन् प्रत्यय (क्विन् का लोप) (ओ=अवङ् (अव)—'अवङ् स्फोटायनस्य')—गव+अन्च् (सवर्णदीर्घ, 'अनिदिताम्' से न् का लोप)=गवाच्+सु, (विभक्ति का लुक्, च्=क् 'कुत्व'-'क्विन्प्रत्ययस्य कुः') गवाक्, (क्=ग्-जश्त्व) गवाग् (ग्=क् विकल्प से—'वाऽवसाने')=गवाक् । 'क्' न होने पर गवाग् । (२) गो+अन् च्+औ, ('न्' का लोप, औ=शी) गो अच्+ई, (भसंज्ञा, 'अचः' से अ का लोप)=गोची । (३) गो+अन् च्+जस्, ('न्' का लोप, जस्=शि) गो अच्+इ (नुम्)—गो अन् च्+इ (ओ=अवङ् (अव), सवर्णदीर्घ, 'न्' को अनुस्वार, परसवर्ण)=गवाञ्चि । (४) गोचा (टा) । (५) गवाग्भ्याम् (भ्याम्) ।

इस गवान्च् या गवाच् शब्द के १०९ रूप बनते हैं, यह मूलार्थ में स्पष्ट किया जा चुका है । √अन्चु धातु के दो अर्थ—गति तथा पूजन के कारण प्रकृतिभाव (असन्धि), अवङ् आदेश तथा पूर्वरूप के विधान होने से १०९ रूपों की सिद्धि होती है । जो इस प्रकार हैं—

गवाक्-गवाग्, गोअक्-गोअग्, गोऽक्-गोऽग्, गवाङ्, गोअङ्, गोऽङ् (९) । गोची, गवाञ्ची, गोअञ्ची, गोऽञ्ची (४) । गवाञ्चि, गोअञ्चि, गोऽञ्चि (३) । गोचा, गवाञ्चा, गोअञ्चा, गोऽञ्चा (४) । गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्, गवाङ्भ्याम्, गोऽङ्भ्याम्, गोअङ्भ्याम् (६) । गवाग्भिः, गोअग्भिः, गोऽग्भिः, गवाङ्भिः, गोअङ्भिः, गोऽङ्भिः (६) । गोचे, गवाञ्चे, गोअञ्चे, गोऽञ्चे (४) । गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्, गवाङ्भ्याम्, गोअङ्भ्याम्, गोऽङ्भ्याम् (६) । गवाग्भ्यः, गोअग्भ्यः, गोऽग्भ्यः, गवाङ्भ्यः, गोअङ्भ्यः, गोऽङ्भ्यः (६) । गोचः, गवाञ्चः, गोअञ्चः, गोऽञ्चः (४) । गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्, गवाङ्भ्याम्, गोअङ्भ्याम्, गोऽङ्भ्याम् (६) । गवाग्भ्यः, गोअग्भ्यः, गोऽग्भ्यः, गवाङ्भ्यः, गोअङ्भ्यः,

७।१।७९। अभ्यस्तात्परो यः शतुरवयवस्तदन्तस्य क्लीबस्य नुम्वा स्यात् सर्वनामस्थाने। ददन्ति–ददति। तुदत्। (३९३) आच्छीनद्योर्नुम् ७।१।८०। अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्य नुम्वा, शीनद्योः। तुदन्ती–तुदती। तुदन्ति।

---

(३९२) **वा नपुंसकस्येति**। अत्र 'नाभ्यस्ताच्छतुः' इति सूत्रं नञ्रहितमनुवर्तते। 'इदितो नुम्' इत्यतो 'नुमि'ति, 'उगिदचामि'त्यतः 'सर्वनामस्थाने' इति चानुवर्तते। तदाह—**अभ्यस्तादित्यादिना। ददन्ति इति।** 'ददत्+जस्' इत्यत्र 'जश्शसोः शिः' इति जसः स्थाने 'शि' इत्यादेशेऽनुबन्धलोपे सर्वनामस्थानसंज्ञायां 'नपुंसकस्ये'ति नुमि प्राप्ते 'नाभ्यस्ताच्छतुरि'ति निषेधे 'वा नपुंसकस्ये'ति विकल्पेन नुमि 'नश्चापदान्तस्ये'ति अनुस्वारे परसवर्णे च कृते 'ददन्ति' इति। नुमभावे 'ददति' इति।

(३९३) **आच्छीनद्योर्नुमिति**। 'नाभ्यस्तादि'त्यतः शतुरिति, 'वा नपुंसकस्ये'त्यतो वेति चानुवर्तते। 'अङ्गस्ये'त्यधिक्रियते। तच्च पञ्चम्या विपरिणम्यते। आदित्यनेन विशेष्यत्वात् तदन्तविधिः। तदाह—**अवर्णान्तादित्यादि**।

गोऽङ्भ्यः (६)। गोचः, गवाञ्चः, गोअञ्चः, गोऽञ्चः (४)। गोचोः, गवाञ्चोः, गोअञ्चोः, गोऽञ्चोः, (४)। गोचाम्, गवाञ्चाम्, गोअञ्चाम्, गोऽञ्चाम् (४)। गोचि, गवाञ्चि, गोअञ्चि, गोऽञ्चि (४)। गोचोः, गवाञ्चोः, गोअञ्चोः, गोऽञ्चोः (४)। गवाक्षु, गोअक्षु, गोऽक्षु, गवाङ्क्षु, गोअङ्क्षु, गोऽङ्क्षु, गवाङ्षु, गोअङ्षु, गोऽङ्षु (९)=१०९ रूप हुए।

(३९२) पद्—वा, नपुंसकस्य। **अनुवृत्ति**—अभ्यस्तात्, शतुः। नुम्, सर्वनामस्थाने। **विधिसूत्र।**

मूलार्थ—अभ्यस्तसंज्ञक से पर शतृप्रत्ययान्त नपुंसक अङ्ग को विकल्प से नुम् का आगम होता है, सर्वनामस्थान पर रहते। ददन्ति–ददति। तुदत्।

विमर्श—सूत्रार्थ की पूर्ति हेतु 'नाभ्यस्ताच्छतुः' (७।१।७८) से 'अभ्यस्तात्' एवम् 'शतुः' 'इदितो नुम्धातोः' (७।१।५८) से 'नुम्' तथा 'उगिदचाम्०' (७।१।७०) से 'सर्वनामस्थाने' की अनुवृत्ति आती है। 'अङ्गस्य'-का अधिकार है। इस प्रकार 'अभ्यस्तसंज्ञक से पर शतृप्रत्ययान्त नपुंसकलिङ्ग अङ्ग को विकल्प से नुम् का आगम सर्वनामस्थान में होता है।'

उदाहरण—ददत्+जस् (जस्=शि)—ददत्+इ, (यहाँ द्वित्व होने से अभ्यस्त संज्ञा हुई है—'उभे अभ्यस्तम्' अतः 'वा नपुंसकस्य' से विकल्प से नुम् का आगम)=ददन्ति। नुम् न होने पर—ददति।

तुदत्+सु (विभक्ति का लुक् होने पर)=तुदत्।

(३९३) पद्—आत्, शीनद्योः, नुम्। **अनुवृत्ति**—वा, नुम्, शतुः। **विधिसूत्र**।

मूलार्थ—अवर्णान्त अङ्ग से पर शतृप्रत्ययान्त शब्दस्वरूप को विकल्प से नुम् का आगम होता है—शी प्रत्यय और नदीसंज्ञक के पश्चाद्वर्ती रहने पर। तुदन्ती–तुदती। तुदन्ति। भात्, भाती, भान्ति। पचत्।

विमर्श—प्रकृत सूत्र में 'नाभ्यस्ताच्छतुः' (७।१।७८) से 'शतुः', 'वा नपुंसकस्य' (३९२) से 'वा' तथा 'इदितो' (७।१।५८) से 'नुम्' की अनुवृत्ति आ रही है। तदनुसार—"शी प्रत्यय अथवा नदीसंज्ञक के पर रहते अवर्णान्त अङ्ग के पश्चाद्वर्ती शतृप्रत्ययान्त शब्द को विकल्प से 'नुम्' का आगम होता है।"

भात् । भाती । भान्ति । पचत् । **(३९४) शप्श्यनोर्नित्यम् ७।१।८१ ।** शप्श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नुम्, शीनद्योः । पचन्ती । पचन्ति । दीव्यत् । दीव्यन्ती । दीव्यन्ति । धनुः । धनुषी । 'सान्ते'ति दीर्घः । नुम्विसर्जनीयेति षः । धनूंषि । धनुषा । धनुर्भ्याम् । एवं चक्षुर्हविरादयः । पयः । पयसी । पयांसि । पयोभ्याम् । सुपुम् । सुपुंसी । सुपुमांसि । अदः । विभक्तिकार्यम् । उत्वमत्वे । अमू । अमूनि । शेषं पुंवत् ।

इति हलन्ता नपुंसकलिङ्गाः ।

---

(३९४) **शप्श्यनोर्नित्यमिति ।** अत्र 'आच्छीनद्योर्नुम्' इति सूत्रम्, 'नाभ्यस्ताच्छतुः' इत्यतः शतुरिति चानुवर्तते । अवयव इत्यध्याह्रियते । तदाह—**शप्श्यनोरादित्यादिना । धनूंषि इति ।** 'धनुष्+जस्' इत्यत्र जसः स्थाने 'शि' इत्यादेशेऽनुबन्धलोपे सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमागमेऽनुबन्धलोपे 'सान्तमहतः' इत्युपधादीर्घे 'नश्चापदान्तस्ये'ति अनुस्वारे 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सस्य षत्वे संयोगे च कृते 'धनूंषि' इति ।

इति हलन्तनपुंसकलिङ्गप्रकरणम् ।

उदाहरण—(१) तुदत्+औ (औ=शी)—तुदत्+ई (विकल्प से नुम् का आगम—'आच्छीनद्योर्नुम्')=तुदन्ती । नुम् के अभाव में—तुदती । (२) तुदत्+जस् (जस्=शि)—तुदत्+इ (नुम्—'उगिदचाम्०')=तुदन्ति ।

दीप्त्यर्थक √भा से शतृ प्रत्यय करने पर तकारान्त भात् शब्द के रूपभेदों की प्रक्रिया बतलायी जा रही है—(१) भात्+सु ('सु' लुक्)=भात् । (२) भात्+औ (औ=शी, विकल्प से नुम्)=भान्ती-भाति । (३) भात्+जस् (जस्=शि, नुम्)=भान्ति । √पच् से शतृ प्रत्यय से निष्पन्न 'पचत्' शब्द के विशेष रचना-क्रम का उल्लेख किया जा रहा है—पचत्+सु ('सु' का लुक्)=पचत् ।

(३९४) पद—शप्श्यनोः, नित्यम् । **अनुवृत्ति**—शीनद्योः, नुम्, शतुः, अङ्गस्य । **विधिसूत्र ।**

मूलार्थ—शप् और श्यन् सम्बन्धी अकार से पर शतृ के अवयवान्त शब्दस्वरूप को नित्य 'नुम्' का आगम होता है, शी अथवा नदीसंज्ञक पर रहते । पचन्ती । पचन्ति । दीव्यत्, दीव्यन्ती । दीव्यन्ति । धनुः । धनुषी । 'सान्तमहतः' से दीर्घ । 'नुम्विसर्जनीयशर्व्यवायेऽपि' से षत्व । धनूंषि । धनुषा । धनुर्भ्याम् । इसी प्रकार चक्षुष्, हविष् आदि शब्दों के रूप बनेंगे । पयः । पयसी । पयांसि । पयोभ्याम् । सुपुम् । सुपुंसी । सुपुमांसि । अदः । विभक्तिकार्य, उत्व और मत्व । अमू । अमूनि । शेष पुंल्लिङ्ग की तरह बनते हैं ।

विमर्श—यहाँ 'नाभ्यस्ताच्छतुः' (७।१।७८) से 'शतुः' तथा 'आच्छीनद्योर्नुम्' (३९३) से 'शनिद्योः' और 'नुम्' की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । इस प्रकार 'शी और

अथाव्ययानि

(३९५) स्वरादिनिपातमव्ययम् १।१।३७ । स्वरादयो निपाताश्चाऽव्ययसंज्ञाः स्युः । स्वर् । अन्तर् । प्रातर् । पुनर् । सुनुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् ।

---

(३९५) **स्वरादिनिपातमव्ययमिति** । स्वर् आदिर्येषां ते स्वरादयः, ते च निपाताश्चेति समाहारद्वन्द्वः । फलितार्थमाह—**स्वरादय इत्यादिना** । स्वरादीनां चादीनां

नदीसंज्ञक के पश्चाद्वर्ती होने की स्थिति में शप् और श्यन् सम्बन्धी अकार से पर शतृ को नित्य नुम् का आगम होता है ।'

उदाहरण—(१) पचत्+औ (औ=शी)—पचत्+ई, (शतृ के अन्त्य अ से पर नुम्) पचन् त्+ई (अनुस्वार, परसवर्ण)=पचन्ती । (२) पचत्+जस्, (जस्=शि) पचत्+इ (नुम्—'उगिदचाम्')=पचन्ति ।

√दिव् से श्यन् प्रत्यय होकर निष्पन्न 'दीव्यत्' (=चमकता हुआ) शब्द के रूप भी 'पचत्' की तरह बनते हैं—दीव्यत्, दीव्यन्ती, दीव्यन्ति ।

√धन धातु से औणादिक उस् प्रत्यय होकर तथा स्=षत्व होकर धनुष् शब्द बनता है । (१) धनुष्+सु (सु का लुक्, षत्व के असिद्ध होने से स्=र्=:)=धनुः । (२) धनुष्+औ (औ=शी)=धनुषी । (३) धनुष्+जस्, (जस्=शि) धनुष्+इ (नुम्, 'नपुंसकस्य झलचः') धनुन् ष्+इ ('सान्तमहतः' से उ=ऊ दीर्घ, न=ं)=धनूंषि । (४) धनुष्+टा =धनुषा । (५) धनुष्+भ्याम् (षत्व के असिद्ध होने से स्=र्)=धनुर्भ्याम् ।

इसी प्रकार चक्षुष् (=नेत्र) तथा हविष् (=होम पदार्थ) शब्दों के रूप बनेंगे ।

सकारान्त पयस् (=दूध अथवा जल) शब्द के रूपभेदों का उल्लेख किया जा रहा है—(१) पयस्+सु ('सु' का लुक्, स्=र्=:)=पयः । (२) पयस्+औ (औ=शी)= पयसी । (३) पयस्+जस् (जस्=शि)—पयस्+इ (नुम्, दीर्घ तथा म्=अनुस्वार)= पयांसि । (४) पयस्+भ्याम् (स्=रु=उ—'हशि च', गुण)=पयोभ्याम् ।

सुपुंस् (=अच्छे पुरुष वाला कुल) शब्द के रूपभेद प्रदर्शित किये जा रहे हैं—(१) सुपुंस्+सु (विभक्ति का लुक्, स् का संयोगान्त लोप 'निमित्तापाये नैमित्तिकस्याप्यपायः' नियम से अनुस्वार=म्)=सुपुम् । (२) सुपुंस्+औं (औ=शी)=सुपुंसी । (३) सुपुंस्+जस् (जस्=शि) सुपुंस्+इ, (शि की सर्वनामस्थानसंज्ञा होने से स्=अस् 'पुंसोऽसुङ्') सुपुमस् +इ (नुम्, दीर्घ न्=अनुस्वार 'नश्चा०')=सुपुमांसि ।

अदस् (=वह) शब्द के नपुंसकलिङ्ग में रूपभेदों का उल्लेख किया जा रहा है—(१) अदस्+सु (विभक्ति का लुक्, स्=र्=:)=अदः । (२) अदस्+औ (औ=शी)—अदस्+ ई, (स्=अ, पररूप) अद+ई (अ+ई=ए 'गुण')—अदे (ए=ऊ, द्=म्—'अदसोऽसेः') =अमू । (३) अदस्+जस्, (जस्=शि, अत्व, पररूप) अद+इ, (नुम्—'नपुंसकस्य झलचः') अद न्+इ, (उपधादीर्घ) अदानि (आ=ऊ, द्=म्—'अदसोऽसेः')=अमूनि । इसी प्रकार द्वितीया विभक्ति में भी रूप बनते हैं । अवशिष्ट विभक्तियों के रूप पुंल्लिङ्ग के समान बनेंगे ।

हलन्तनपुंसकलिङ्ग-प्रकरण समाप्त ।

---

(३९५) पद—स्वरादिनिपातम्, अव्ययम् । **संज्ञासूत्र** ।

ऋते । युगपत् । आरात् । पृथक् । ह्यस् । श्वस् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । अवस् । समया । निकषा । स्वयम् । वृथा । नक्तम् । नञ् । हेतौ । इद्धा । अद्धा । सामि । ब्राह्मणवत् । क्षत्रियवत् । सना । सनत् । सनात् । तिरस् । उपधा । अन्तरा । अन्तरेण । ज्योक् । कम् । शम् । सहसा । विना । नाना । स्वस्ति । स्वाहा । स्वधा । अलम् । वषट् । श्रौषट् । वौषट् । अन्यत् । अस्ति । उपांशु । क्षमा । विहायसा । दोषा । मृषा । मिथ्या । मुधा । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रबाहुकम् । प्रवाहिका । आर्यहलम् । अभीक्षणम् । साकम् । सार्धम् । नमस् । हिरुक् । धिक् । अथ । अम् । आम् । प्रताम् । प्रशाम् । प्रतान् ।

पृथक्पाठस्तु 'निपाता आद्युदात्ताः' इति स्वरभेदार्थः । एवञ्च चादीनामसत्त्ववाचिनामेवाव्ययत्वम्, स्वरादीनान्तु सत्त्ववाचिनामसत्त्ववाचिनां चाव्ययत्वमिति भावः ।

मूलार्थ—स्वरादिगणपठित शब्द एवं निपातसंज्ञक शब्दों की अव्यय संज्ञा होती है ।

विमर्श—अजन्त आदि छः प्रकरणों में लिङ्ग, वचन तथा विभक्ति द्वारा शब्द-विषयक परिवर्तनों का निरूपण करने के अनन्तर प्रस्तुत अव्यय-प्रकरण में लिङ्गादिरहित अव्यय शब्दों का निर्वचन किया जा रहा है । अव्ययसंज्ञक शब्द तीनों लिङ्गों, वचनों तथा सभी विभक्तियों में एक रूप ही रहते हैं ।

स्वर् आदि शब्दों का परिगणन इस प्रकार है—(१) स्वर् (स्वः)=स्वर्ग । (२) अन्तर् (अन्तः)=मध्य । (३) प्रातर् (प्रातः)=प्रातःकाल । (४) पुनर् (पुनः)=फिर । (५) सुनुतर् (सुनुतः)=अन्तर्धान । (६) उच्चैस् (उच्चैः)=ऊँचा या ऊर्ध्वभाग में । (७) नीचैस् (नीचैः)=नीचा या अधोभाग में । (८) शनैस् (शनैः)=धीरे । (९) ऋधक्=सत्य । (१०) ऋते=बिना । (११) युगपत्=एकसाथ । (१२) आरात्=दूर या समीप में । (१३) पृथक्=अलग । (१४) ह्यस् (ह्यः)=गत दिन । (१५) श्वस् (श्वः)=आगामी दिन । (१६) दिवा=दिन । (१७) रात्रौ=रात में । (१८) सायम्=सायंकाल । (१९) चिरम्=देर तक । (२०) मनाक्=थोड़ा, अल्प । (२१) ईषत्=बहुत थोड़ा । (२२) जोषम्=सुख से, चुपचाप । (२३) तूष्णीम्=चुप । (२४) बहिस् (बहिः)=बाहर । (२५) अवस्=बाहर । (२६) समया=समीप । (२७) निकषा=समीप (निकट) । (२८) स्वयम्=अपने से । (२९) वृथा=व्यर्थ । (३०) नक्तम्=रात में । (३१) नञ्=नहीं, निषेध । (३२) हेतौ=कारण । (३३) इद्धा=प्राकाश्य, स्पष्ट । (३४) अद्धा=स्पष्टता । (३५) सामि=आधा । (३६) वत्=तुल्य, तरह (ब्राह्मणवत्, क्षत्रियवत् इत्यादि) । (३७) सना=नित्य । (३८) सनत्=नित्य । (३९) सनात्=नित्य । (४०) उपधा=भेद, विभाग । (४१) तिरस्=टेढ़ा, अनादर । (४२) अन्तरा=मध्य, बिना । (४३) अन्तरेण=बिना । (४४) ज्योक्=चिरकाल, शीघ्र, प्रश्न, सम्प्रति । (४५) कम्=जल, सुख, निन्दा । (४६) शम्=सुख, कल्याण । (४७) सहसा=अकस्मात्, अविचार । (४८) विना=छोड़कर । (४९) नाना=अनेक । (५०) स्वस्ति=कल्याण, मङ्गल । (५१) स्वाहा=देव-हविदान में । (५२) स्वधा=पितरों को हव्यादि दान में । (५३) अलम्=निषेध । (५४) वषट् (५५) श्रौषट् (५६) वौषट्=देवसम्बन्धी हविदान में । (५७) अन्यत्=पुनः और दूसरा । (५८) अस्ति=वर्तमान । (५९) उपांशु=गुप्त, अप्रकटित उच्चारण । (६०) क्षमा=माफ करना । (६१) विहायसा=आकाश । (६२) दोष,

मा । माङ् । आकृतिगणोऽयम् । च । वा । ह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । भूयस् । कूपत् । सूपत् । कुवित् । नेत् । चेत् । चण् । यत्र । कच्चित् । नह । हन्त । माकिः । माकिम् । नकिः । नकिम् । आकीम् । माङ् । नञ् । यावत् । त्वै । न्वै । द्वै । रै । श्रौषट् । वौषट् । स्वाहा । स्वधा । अलम् । वषट् । तुम् । तथाहि । खलु । किल । अथ । सुष्ठु । स्म । आदह । (उपसर्गविभक्तिस्वरप्रतिरूपकाश्च ।) अवदत्तम् । अहंयुः । अस्तिक्षीरा । अ । आ । इ । ई । उ । ऊ । ए । ऐ । ओ । औ । पशु । शुकम् । यथा । कथाच । पाट् । प्याट् । अङ्ग । है । हे । भोः । अये । द्य । विषु । एकपदे । युत् । आतः । चादिरप्याकृतिगणः ।

=रात्रि । (६३) मृषा=असत्य । (६४) मिथ्या=असत्य । (६५) मुधा=व्यर्थ । (६६) पुरा=प्राचीन काल में, पहले । (६७) मिथस् (मिथः)=परस्पर । (६८) प्रायस् (प्रायः)= बहुधा, अधिकतर । (६९) मुहुस् (मुहुः)=बार-बार । (७०) प्रबाहुकम्=एक ही समय । (७१) आर्यहलम्=बलात् (७२) आभीक्ष्णम्=पुनः-पुनः या बार-बार । (७३) साकम् तथा (७४) सार्धम्=साथ । (७५) नमस्=नमस्कार । (७६) हिरुक्=बिना । (७७) धिक्= धिक्कार । (७८) अथ=अनन्तर । (७९) अम्=शीघ्रता । (८०) आम्=स्वीकार । (८१) प्रताम्=ग्लानि । (८२) प्रशाम्=समान । (८३) प्रतान्=विस्तार । (८४) मा, माङ्= नहीं, अस्वीकार । स्वरादि आकृति गण है । अतः इस प्रकार के अन्य शब्द भी स्वरादि के अन्तर्गत आते हैं । जैसे—**कामम्**=स्वच्छन्दता । आशु=शीघ्रता । संवत्=वर्ष । अवश्यम्=निश्चय । सपदि=शीघ्रता । रोदसी=पृथिवी–आकाश । झटिति=शीघ्र । ओम्=स्वीकार, ब्रह्म । वरम्= अच्छा । आदि ।

चादि अव्ययों का परिगणन किया जा रहा है—(१). च=और । (२) वा=विकल्प । (३) ह=प्रसिद्धि । (४) अह=निश्चय । (५) एव=ही, केवल । (६) एवम्=इस प्रकार । (७) नूनम्=निश्चय । (८) शश्वत्=निरन्तर । (९) युगपत्=एक साथ । (१०) भूयस् =बार-बार । (११) कूपत् तथा (१२) सूपत्=अच्छी तरह । (१३) कुवित्=अधिकता, प्रशंसा । (१४) नेत्=निषेध । (१५) चेत्=यदि । (१६) चण्=यदि । (१७) यत्र=जहाँ । (१८) नह=नहीं । (१९) हन्त=हर्ष, विषाद में । (२०) माकिः, माकिम्, नकिः= वर्जन में । (२१) नकिम्=नहीं । (२२) आकीम्=नहीं । (२३) माङ्=मत, नहीं । (२४) नञ्=नहीं । (२५) यावत्=जब तक । (२६) तावत्=तब तक । (२७) त्वै, न्वै, द्वै=तथा, सम्भवतः । (२८) रै=दान । (२९) श्रौषट्, वौषट्, स्वाहा=देवताओं के हविर्दान में । (३०) अलम्=पर्याप्त । (३१) वषट्=पितृहविर्दान । (३२) तुम्=तुम । (३३) तथाहि=जैसे । (३४) खलु, किल=निश्चय । (३५) अथ=अनन्तर । (३६) सुष्ठु=अच्छा । (३७) स्म=भूतकाल । (३८) आदह=निन्दा ।

उपसर्ग०—उपसर्ग-प्रतिरूपक (सदृश), विभक्त्यन्त-सदृश एवं स्वर-सदृश शब्दों का भी चादिगण में पाठ समझना चाहिए । उदाहरण—(१) (उपसर्ग-सदृश) अवदत्तम्=दिया । (२) (सुबन्त-सदृश)—अहंयुः=अहङ्कारी । (३) (तिङन्त-सदृश) अस्तिक्षीरा=दूधवाली । (४) अ=सम्बोधन, निषेध । (५) आ=वाक्य, स्मरण । (६) इ=सम्बोधन । (७) ई, उ, ऊ, ए, ऐ, ओ, औ=सम्बोधन । (८) पशु=सम्यक् । (९) शुकम्=शीघ्र । (१०) यथा कथा च=जब कभी । (११) पाट्, प्याट्, अङ्ग, हे, है, भोः, अये=संबोधन । (१२) द्य=

(३९६) तद्धितश्चासर्वविभक्तिः १।१।३८। यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्तव्यम्। तसिलादयः प्राक् पाशपः। शस्प्रभृतयः प्राक्समासान्तेभ्यः। अम्। आम्। कृत्वोऽर्थाः। तसिवती। ननाञौ–इति। एतदन्तमप्यव्ययम्। अत इत्यादि। (३९७) कृन्मेजन्तः १।१।३९। कृद्यो मान्त एजन्तश्च तदन्तमप्यव्ययम्। स्मारं स्मारम्। जीवसे। पिबध्यै। (३९८) क्त्वातोसुन्कसुनः

(३९६) **तद्धितश्चेति।** अत्र 'स्वरादिनिपातमव्ययमि'त्यतः 'अव्ययमि'त्यनुवर्तते। तद्धितपदेनात्र प्रत्ययग्रहणपरिभाषया तद्धितान्ततदादेर्ग्रहणम्। असर्वविभक्तिरिति बहुव्रीहिः। तदाह—**यस्मात्सर्वा इति। तसिलादय इति।** 'पञ्चम्यास्तसिल्' इत्यतः 'याप्ये पाशप्' इति पर्यन्तमित्यर्थः।

(३९७) **कृन्मेजन्त इति।** कृत् मेजन्त इति पदद्वयात्मकं सूत्रम्। म् च एच् चेति मेचौ, तौ अन्तौ यस्य कृतः स मेजन्त इति बहुव्रीहिरित्यत आह—**कृद्यो मान्त इति।**

(३९८) **क्त्वातोसुन्कसुन इति।** क्त्वा-तोसुन्-कसुन्—एतदन्तमव्ययसंज्ञं भवति।

हिंसा। (१३) विषु=अनेक (१४) एकपदे=सहसा। (१५) युत्=निन्दा। (१६) आतः=यहाँ से।

च—आदि भी आकृतिगण है। अतः इसके **अन्तर्गत** यत्, तत्, आहोस्वित्, इव, व आदि अव्यय शब्दों का पाठ समझना चाहिए।

(३९६) पद—तद्धितः, च, असर्वविभक्तिः। **अनुवृत्ति**—अव्ययम्। **संज्ञासूत्र।**

मूलार्थ—जिससे सभी विभक्तियाँ न हों, ऐसा तद्धितान्त शब्द भी अव्ययसंज्ञक होता है।

विमर्श—पूर्वसूत्र 'स्वरादिनिपातमव्ययम्' (३९५) से 'अव्ययम्' की अनुवृत्ति आती है। तदनुसार—'जिस शब्द से सब विभक्तियाँ उत्पन्न न हों, ऐसा तद्धितान्त पद भी अव्ययसंज्ञक होगा'। ऐसे शब्दों का परिगणन करना चाहिए। (१) 'पञ्चम्यास्तसिल्' (५।३।७) से प्रारम्भ होकर 'याप्ये पाशप्' (५।३।४७) से पूर्व तक के प्रत्ययों का इसमें समावेश होता है। (२) इसी प्रकार 'बह्वल्पार्थात्……शस्' (५।४।५२) से लेकर 'समासान्ताः' (५।४।६८) से पूर्व तक के प्रत्ययों की भी अव्ययसंज्ञा होती है।

उदाहरण—(१) अम्, आम्, कृत्वसुच्, सुच् आदि। (२) तसि, वति, इत्यादि। ना और नाञ् प्रत्ययों का भी परिगणन किया गया है। इस प्रकार उक्त-प्रत्ययान्त पद अव्ययसंज्ञक होते हैं। यथा—'अतः' (तसिल्) आदि।

(३९७) पद—कृत्, मेजन्तः। **अनुवृत्ति**—अव्ययम्। **संज्ञासूत्र।**

मूलार्थ—मान्त और एदन्त कृत्प्रत्ययान्त शब्द की अव्यय संज्ञा होती है।

विमर्श—यहाँ पूर्वसूत्र (३९५) से 'अव्ययम्' पद की अनुवृत्ति आ रही है। तदनुसार 'मकारान्त तथा एजन्त (ए, ओ, ऐ, औ वर्णान्त) कृत्प्रत्ययान्त शब्द भी अव्ययसंज्ञक होते हैं।

उदाहरण—मकारान्त प्रत्यय—(१) स्मारं स्मारम् (=बार-बार स्मरण करके)। एजन्त प्रत्यय—(२) जीवसे (=जीने के लिए)। (३) पिबध्यै (=पीने के लिए)।

(३९८) पद—क्त्वातोसुन्कसुनः। **अनुवृत्ति**—अव्ययम्। **संज्ञासूत्र।**

१।१।४०। एतदन्तमप्यव्ययम्। कृत्वा। उदेतोः। विसृपः। (३९९) अव्ययीभावश्च १।१।४१। अव्ययं स्यात्। अधिहरि। (४००) अव्ययादाप्सुपः २।४।८२। अव्ययाद्विहितस्याऽऽपः सुपश्च लुक्। तत्र शालायाम्। अथ। विहितविशेषणान्नेह— अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति तथापि न गौणे। आब्ग्रहणं व्यर्थम्, अव्ययस्याऽलिङ्गत्वात्। तथा च श्रुतिः—

कृत्वेति। 'समानकर्तृकयोः' इति भावे क्त्वा प्रत्ययः। **उदेतोरिति।** उत्पूर्वादिणः 'भावलक्षणे' इत्यादिना तोसुन्प्रत्ययः। **विसृप इति।** विपूर्वकात्सृपेः 'सृपितृदोः कसुन्' इति भावे कसुन्प्रत्ययः।

(३९९) **अधिहरीति।** अत्राव्ययीभावसमासेऽव्ययत्वे च 'अव्ययादाप्सुपः' इति सुपो लुक्।

(४००) **अव्ययादाप्सुप इति।** अत्र 'ण्यक्षत्रियाऽऽर्ष' इत्यतो लुगित्यनुवर्तते। तदाह—**अव्ययाद्विहितस्येति। तत्रेति।** 'तत्र' इत्यतः स्त्रीत्वे टाप्, तस्य लुग्भवतीति।

मूलार्थ—क्त्वा, तोसुन् और कसुन् प्रत्ययान्त शब्दों की अव्ययसंज्ञा होती है।

विमर्श—प्रकरणवश पूर्वसूत्र से 'अव्ययम्' पद की अनुवृत्ति अपेक्षित है।

उदाहरण—(१) कृत्वा (=करके)। (२) उदेतोः (=उठकर, उदय प्राप्त करने के लिए)। (३) विसृपः (=फैलकर)।

(३९९) पद—अव्ययीभावः, च। **अनुवृत्ति**—अव्ययम्। **संज्ञासूत्र।**

मूलार्थ—अव्ययीभाव समास की भी अव्ययसंज्ञा होती है।

विमर्श—यहाँ भी प्रकरणवश पूर्वसूत्र (३९५) से 'अव्ययम्' की अनुवृत्ति आती है। तदनुसार—'अव्ययीभाव समास भी अव्ययसंज्ञक होगा।'

उदाहरण—अधिहरि (=हरि में)।

(४००) पद—अव्ययात्, आप्सुपः। **अनुवृत्ति**—लुक्। **विधिसूत्र।**

मूलार्थ—अव्यय से विहित आप् और सुप् का लुक् होता है।

विमर्श—प्रकृत सूत्र में 'ण्यक्षत्रियाऽऽर्ष०' (२।४।५८) से आदेशवाचक पद—'लुक्' की अनुवृत्ति आती है। तदनुसार—'अव्यय से विहित आप् (=टाप्, डाप्, चाप्) तथा सुप् का लुक् (लोप) होता है।'

उदाहरण—(१) तत्र शालायाम् (=उस घर में)। यहाँ 'तत्र' शब्द त्रल्-प्रत्ययान्त है। उससे स्त्रीलिङ्गवाची टाप् प्रत्यय का प्रकृत सूत्र से लुक् हुआ। (२) अथ (=अनन्तर)। यहाँ भी प्रकृत सूत्र (अव्ययादाप्सुपः) से विभक्ति का लुक् हुआ।

यहाँ 'अव्ययात्' पद विहित विशेषण (अर्थात् 'अव्यय से विहित' इस प्रकार विशेषता सूचित करने से अत्युच्चैसौ (=ऊँचे स्थान का अतिक्रमण करने वाले दो जन) में सुप् (औ) का लुक् नहीं हुआ। क्योंकि यहाँ 'औ' विभक्ति 'उच्चैस्' अव्यय से विहित नहीं है, किन्तु समस्त पद 'अत्युच्चैस्' से विहित है। यद्यपि अव्ययसंज्ञा में तदन्त विधि होती है। तो भी गौण में तदन्त विधि की प्रवृत्ति नहीं होती। 'अत्युच्चैस्' पद का अवयव 'उच्चैस्' समास में उपसर्जन होने से गौण हो गया है। अतः सुप् का लुक् नहीं होता।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥
वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥ २ ॥

अवगाहः । वगाहः । अपिधानम् । पिधानम् । इत्यव्ययानि ।

इति सुबन्तप्रकरणम् ।

सदृशमिति । त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु, सर्वेषु वचनेषु च यद्विकारं न प्राप्नोति, किन्तु सदृशम्, एकप्रकारमेव भवति तदव्ययमिति भाष्योक्ता आथर्वणश्रुतियोजना । **वष्टीति ।** भागुरिनामक आचार्यः अव-अपि एतयोरुपसर्गयोः अकारस्य लोपं वष्टि—इच्छतीत्यर्थः । तथा च हलन्तानामपि पदानाम् आपं=टाप्प्रत्ययम् इच्छतीत्यर्थः । 'वाचा, निशा दिशा' इत्याद्युदाहरणानीति भावः । **वगाह इति ।** एतदप्युदाहरणमात्रमिति शम् ।

इत्यव्ययप्रकरणम् ।

सूत्र में 'आप्' पद की कोई आवश्यकता नहीं है, क्योंकि अव्यय लिङ्ग रहित होता है । अतः अव्ययवाची पदों से टाप् आदि स्त्री-प्रत्ययों की प्राप्ति ही नहीं होती । पूर्वोक्त 'तत्र' आदि उदाहरणों में विभक्ति का लुक् होना ही अव्यय का प्रयोजन है ।

प्रक्रिया-ग्रन्थकारों ने अव्यय-प्रकरण के अन्त में दो कारिकाओं द्वारा अव्ययवाचक पदों की विशेषता बतलायी है ।

कारिकार्थ—(१) जो शब्द तीनों लिङ्गों (पुंल्लिङ्ग, स्त्रीलिङ्ग तथा नपुंसकलिङ्ग), सभी विभक्तियों तथा सभी वचनों में एक-सा रहता है, कुछ भी न बदले (न व्येति=न विकृतं भवति), वह अव्यय कहलाता है ।

(२) आचार्य भागुरि के मतानुसार—'अव' और 'अपि' उपसर्ग के आदि वर्ण अकार का लोप होता है । हलन्त शब्दों से स्त्रीलिङ्ग में (आप्) टाप् भी होता है ।

उदाहरण—(१) अव+√गाह्+घञ्=अवगाहः । 'अव' उपसर्ग के अकार का लोप होकर=वगाहः । लोप न होने पर=अवगाहः (स्नान, गोता) । (२) अपि+√धा+ल्युट्=अपिधानम् (=ढक्कन) । यहाँ 'अ' का लोप होकर=पिधानम् । पक्ष में=अपिधानम् ।

हलन्त पदों से 'टाप्' के उदाहरण—(१) वाच्+आ (टाप्)=वाचा (वाणी) । (२) निश्+आ (टाप्)=निशा (रात्रि) । (३) दिश्+आ (टाप्)=दिशा । 'आप्' के अभाव में वाच्, निश् तथा दिश् शब्द भी स्त्रीलिङ्ग में प्रयुक्त होते हैं ।

अव्यय-प्रकरण समाप्त ।

इति सुबोधिन्याख्यायां मध्यसिद्धान्तकौमुद्याः संस्कृत-हिन्दीव्याख्याया-मव्ययप्रकरणान्तः प्रथमो भागः ।

वार्तिकादि-सूची

	पृष्ठाङ्काः
अक्षादूहिन्यामुपसङ्ख्या	२७
अध्वपरिमाणे च	२०
अनव्ययस्येति वाच्यम्	५८
अनाम्नवतिनगरीणामिति	४३
अन्तरं बहिर्योगोपसंव्यानयोः (ग)	८५
अन्तरमिति गणसूत्रेऽपुरीति	८९
अन्वादेशे नपुंसके	२११
अयोगवाहानामस्योपरि शर्षु	७४
असंयुक्ता येऽलकास्तद्वतां	१२७
अस्य सम्बुद्धौ वाऽनङ्	२०१
अहरादीनां पत्यादिषु	६७
ऋति सवर्णे ऋ वा	३३
ऋते च तृतीयासमासे	२७
ऋलृवर्णयोर्मिथः सावर्ण्यं	११
ऋवर्णान्नस्य णत्वं वाच्यम्	१२०
एकतरात्प्रतिषेधो वा	१३८
एकवाक्ये निघातयुष्मदस्मदा	१८५
एते वान्नावादय आदेशा	१८५
एवे चानियोगे	३०
ओत्वोष्ठयोः समासे वा	३१
औङः श्यां प्रतिषेधो	१३६
औत्वप्रतिषेधः साकच्कस्य	२०८
काम्ये रोरेवेति वाच्यम्	५८
खर्परे शरि वा विसर्गलोपो	६२
ख्याञादेशे न	५६
गतिकारकेतरपूर्वपदस्य	११३
ङावुत्तरपदे प्रतिषेधो	१५९
चयो द्वितीयाः शरि पौष्कर	५२
छत्वममीति वाच्यम्	४८
तीयस्य ङित्सु वा	९२
दृन्करपुनः पूर्वस्य भुवो	११९
द्विपर्यन्तानामेवेष्टिः	१०८
न समासे	४१
नानर्थकेऽलोन्त्यविधि (प)	१५६
निर्दिश्यमानस्यादेशा (प)	९३
नुमचिरतृज्वद्भावगुणेभ्यो	११७
पदाङ्गाधिकारे तस्य (प)	९३
परौ व्रजेः षः पदान्ते	१७३
पाशकल्पक-काम्येष्विति	५८
पूर्वपराऽवरदक्षिणो (ग)	८५
प्रत्यये भाषायां नित्यम्	४५
प्रथमलिङ्गग्रहणं च	११०
प्रवत्सतरकम्बलवसना	२८
प्रादूहोढोढ्येषैष्येषु	२७
यणः प्रतिषेधो वाच्यः	१९
यवलपरे यवला वेति	५१
रूपरात्रिरथन्तरेषु रुत्वं	६७
वाक्यस्मरणयोरङित्	३९
वृद्ध्यौत्वतृज्वद्भाव	१४०
शकन्ध्वादिषु पररूपं	३०
संपुकानां सो वक्तव्यः	५५
सम्बुद्धौ नपुंसकानां	२११
स्वमज्ञातिधनाख्यायाम् (ग)	८५
स्वादीरेरिणोः	२७

सूत्र-सूची

सूत्राणि पृष्ठाङ्काः

अ

अकः सवर्णे दीर्घः ३२
अचः १८९
अचि र ऋतः १२९
अचि श्नुधातुभ्रुवां ११२
अचोऽन्त्यादि टि ३०
अचो ञ्णिति १०४
अचो रहाभ्यां द्वे २९
अच्च घेः १०१
अट्कुप्वाङ्नुम्व्यवाये ७९
अणुदित्सवर्णस्य १३
अतोऽम् १३५
अतो गुणे १५५
अतो भिस ऐस् ८०
अतो रोरप्लुतादप्लुते ६३
अत्पूर्वस्य १६३
अत्रानुनासिकः पूर्वस्य ५४
अत्वसन्तस्य १९३
अदर्शनं लोपः ६
अदस औ सुलोपश्च २०२
अदसोऽसेर्दादु २०२
अदसो मात् ३७
अदेङ्गुणः २२
अद्ड्डतरादिभ्यः १३८
अनङ् सौ १०१
अनचि च १८
अनाप्यकः १५५
अनिदितां हल १८८
अनुनासिकात्परो ५५
अनुस्वारस्य ययि ५०
अनेकाल्शित्सर्वस्य ३४
अन्तरं बहिर्योगोप ८९
अपो भि २०८
अपृक्त एकाल् १०२
अप्तृन्तृच्स्वसृनप्तृ ११५
अम्बार्थनद्योर्ह्रस्वः ११०
अमि पूर्वः ७८

सूत्राणि पृष्ठाङ्काः

अम् सम्बुद्धौ १५०
अर्थवदधातुरप्रत्ययः ७१
अर्वणस्त्रसावनञः १६६
अलोऽन्त्यस्य १८
अलोऽन्त्यात्पूर्व उपधा १०२
अल्लोपोऽनः १४२
अवङ् स्फोटायनस्य ३४
अव्ययादाप्सुपः २२०
अव्ययीभावश्च २२०
अष्टन आ विभक्तौ १६९
अष्टाभ्य औश् १६९
अस्थिदधिसक्थ्य १४२
अहन् २१२

आ

आकडारादेका संज्ञा ९७
आङि चापः १२४
आङो नाऽस्त्रियाम् १००
आङ्माङोश्च ६०
आच्छीनद्योर्नुम् २१४
आटश्च १११
आण्नद्याः ११०
आतो धातोः ९७
आदेः परस्य ४६
आदिरन्त्येन सहेता ७
आदेशप्रत्यययोः ८४
आद् गुणः २३
आद्यन्तवदेकस्मिन् १५६
आद्यन्तौ टकितौ ५२
आमन्त्रितं पूर्व १८७
आमि सर्वनाम्नः ८६
आ सर्वनाम्नः १९६

इ

इकोऽचि विभक्तौ १४०
इकोऽसवर्णे शाकल्यस्य ४०
इको यणचि १६
इग्यणः सम्प्रसारणम् १४८
इणः षः ५८

सूत्राणि पृष्ठाङ्काः

इतोऽत्सर्वनामस्थाने १६७
इदमो मः १५४
इदुद्भ्याम् १२८
इन्द्रे च ३५
इन्हन्पूषार्यम्णां १६१
इयोऽय् पुंसि १५५

ई

ईदूदेद्द्विवचनं ३६

उ

उगिदचां सर्वनाम १६४
उच्चैरुदात्तः ८
उद ईत् १९०
उदः स्थास्तम्भोः ४६
उपदेशेऽजनुनासिक २४
उपसर्गाः क्रियायोगे २८
उपसर्गादृति धातौ २९
उभे अभ्यस्तम् १९४
उरण् रपरः २४

ऊ

ऊकालोऽज्झ्रस्व ७

ऋ

ऋत उत् ११६
ऋतो ङिसर्वनाम ११४
ऋत्यकः ४१
ऋत्विग्दधृक्स्रग् १७०
ऋदुशनस्पुरुदंसो ११५
ऋन्नेभ्यो ङीप् १३४

ए

एकवचनं सम्बुद्धिः ७६
एकवचनस्य च १८०
एकाचो बशो भश् १४६
एकाजुत्तरपदे णः १६२
एङः पदान्तादति ३३
एङ्ह्रस्वात्सम्बुद्धे ७७
एङि पररूपम् ३०
एच इग्घ्रस्वादेशे १४४
एचोऽयवायावः १९

सूत्राणि	पृष्ठाङ्काः
एत ईद् बहुवचने	२०३
एतत्तदो सुलोपो	६९
एत्येधत्यूठ्सु	२७
एरनेकाचोऽसंयोग	११२
ओ	
ओतो गार्ग्यस्य	६६
ओत्	३९
ओमाङोश्च	३२
ओसि च	८३
ओः सुपि	११८
औ	
औङ आपः	१२३
औतोऽम्शसोः	१२१
औत्	१०५
क	
कस्कादिषु च	५९
किमः कः	१५४
कुप्वोः≍क≍पौ च	५७
कृत्तद्धितसमासाश्च	७१
कृदतिङ्	१७०
कृन्मेजन्तः	२१९
क्त्वातोसुन्कसुनः	२१९
क्रयस्तदर्थे	२२
क्रानाम्रेडिते	६०
क्विन्प्रत्ययस्य	१७१
क्षय्यजय्यौ शक्यार्थे	२२
ख	
खरवसानयोर्विसर्जं	५५
खरि च	४७
ख्यत्यात्परस्य	१०४
ग	
गतिश्च	११३
गुरोरनृतोऽनन्त्यस्या	३६
गोतो णिच्	१२१
घ	
घेर्ङिति	१००
ङ	
ङमो ह्रस्वादचि	५४
ङसिङसोश्च	१००
ङसिङ्योः स्मात्	८६
ङिच्च	३४
ङिति ह्रस्वश्च	१२८
ङे प्रथमयोरम्	१७५
ङेराम्नद्याम्नीभ्यः	१११
ङेर्यः	८०
ङ्णो कुक् टुक् शरि	५२
ङ्याप्प्रादिपदिकात्	७३
च	
चतुरनडुहोरामुदात्तः	१४९
चादयोऽसत्त्वे	३८
चुटू	७६
चोः कुः	१७२
चौ	१८९
छ	
छे च	६०
ज	
जक्षित्यादयः षट्	१९५
जराया जरसन्य	९३
जशः शी	८५
जश्शसोः शिः	१३७
जसि च	९८
झ	
झयो होऽन्यतरस्याम्	४७
झरो झरि सवर्णे	४७
झलां जशोऽन्ते	४४
झलां जश् झशि	१८
ट	
टाङसिङसामिनात्स्याः	८०
टेः	१३८
ड	
डति च	१०६
डः सि धुट्	५१
ढ	
ढो ढे लोपः	६८
ढ्रलोपे पूर्वस्य	६८
त	
तदोः सः सावनन्त्ययोः	१७५
तद्धितश्चासर्वं	२१९
तपरस्तत्कालस्य	२३
तवममौ ङसि	१८१
तस्माच्छसो नः पुंसि	७९
तस्मादित्युत्तरस्य	४६
तस्मिन्निति निर्दिष्टे	१६
तस्य परमाम्रेडितम्	५९
तस्य लोपः	६
तिरसस्तिर्यलोपे	१९१
तुभ्यमह्यौ ङयि	१८०
तुल्यास्यप्रयत्नं	१०
तृतीयादिषु भाषित	१४०
तृतीयासमासे	९०
तृज्वत्क्रोष्टुः	११४
तेमयावेकवचनस्य	१८४
तोर्लि	४६
तोः षि	४४
त्यदादिषु दृशो	१९६
त्यदादीनामः	१०८
त्रिचतुरोः स्त्रियां	१२९
त्रेस्त्रयः	१०८
त्वमावेकवचने	१७८
त्वामौ द्वितीयायाः	१८४
त्वाहौ सौ	१७५
थ	
थो न्थः	१६७
द	
दश्च	१५५
दादेर्धातोर्घः	१४६
दिव उत्	१५२
दिव औत्	१५२
दीर्घ च	३६
दीर्घाज्जसि च	९५
दीर्घात्	६०
दूराद्धूते च	३५
द्वन्द्वे च	९१
द्वितीयाटौस्स्वेनः	१५८
द्वितीयायां च	१७८
द्व्येकयोर्द्विवचनैक	७४
ध	
धातोस्तन्निमितस्यैव	२१
धात्वादेः षः सः	१४८

सूत्राणि पृष्ठाङ्काः

न

न ङिसम्बुद्ध्योः १५५
न चवाहाहैवयुक्ते १८५
न तिसृचतसृ ११०
नपुंसकस्य झलचः ११७
नपुंसकाच्च ११५
न पदान्ताट्टोरनाम् ४३
नपरे नः ५१
न भूसुधियोः ११३
न मु ने २०३
न लुमताङ्गस्य १०७
नलोपः प्रातिपदि १०३
नलोपः सुप्स्वरसंज्ञा १६०
न विभक्तौ तुस्माः ७६
नशेर्वा १९७
नश्च ५३
नश्चापदान्तस्य ४९
नश्छव्यप्रशान् ५६
न षट्स्वस्रादिभ्यः १३४
न संयोगाद्वमन्तात् १६०
न सम्प्रसारणे १६५
नहिवृतिवृषिव्यधि २०५
नहो धः २०५
नाञ्चेः पूजायाम् १९२
नादिचि ७६
नाभ्यस्ताच्छतुः १९४
नाऽऽमन्त्रिते समाना १८७
नामि ८३
निपात एकाजनाङ् ३८
नीचैरनुदात्तः ८
नुम्विसर्जनीय १९९
नृ च १२१
नॄन्पे ५७
नेदमदसोरकोः १५७
नेयङुवङ्स्थाना १३२
नोपधायाः १६८

प

पञ्चम्या अत् १८१
पतिः समास एव १०५

सूत्राणि पृष्ठाङ्काः

पथिमथ्यृभुक्षामात् १६७
पदान्तस्य ७९
पदान्ताद्वा ६०
पद्दन्नोमास्हृन्निशसन् ९४
परश्च ७३
परः सन्निकर्षः २५
पश्यार्थैश्चानालोचने १८६
पादः पत् १८७
पुंसोऽसुङ् २००
पुमः खय्यम्परे ५५
पूर्वत्रासिद्धम् २५
पूर्वपरावरदक्षिणो ८७
पूर्वादिभ्यो नवभ्यो ८९
प्रत्ययः ७२
प्रत्ययलोपे प्रत्यय १०३
प्रत्ययस्य लुक्श्लु १०७
प्रथमचरमतयाल्पा ९१
प्रथमयोः पूर्वसवर्णः ७५
प्रथमायाश्च द्विवचने १७७
प्रादयः ३८
प्लुतप्रगृह्या अचि ३५

ब

बहुगणवतुडति १०६
बहुवचनस्य १८३
बहुवचने झल्येत् ८२
बहुषु बहुवचनम् ७६

भ

भस्य टेर्लोपः १६८
भूवादयो धातवः २८
भोभगोअघो-अपूर्वस्य ६५
भ्यसोऽभ्यम् १८०

म

मघवा बहुलम् १६३
मय उञो वो वा ४०
मिदचोऽन्त्यात्परः १३७
मुखनासिकावचनो ९
मोऽनुस्वारः ४९
मो नो धातोः १५४
मो राजि समः ५०

सूत्राणि पृष्ठाङ्काः

य

यचि भम् १७
यथासंख्यमनुदेशः २०
यरोऽनुनासिके ४५
यस्मात्प्रत्ययविधि ७७
यस्येति च १३६
याडापः १२४
युजेरसमासे १७२
युवावौ द्विवचने १७६
युष्मदस्मदोरनादेशे १७१
युष्मदस्मदोः षष्ठी १८३
युष्मदस्मद्भ्यां १८१
यूयवयौ जसि १७७
यू स्त्र्याख्यौ नदी ११०
योऽचि १७९
यः सौ २०७

र

रषाभ्यां नो णः १५३
रात्सस्य ११७
रायो हलि १२२
रोऽसुपि ६७
रो रि ६८
रोः सुपि १५३

ल

लशक्वतद्धिते ७८
लोपः शाकल्यस्य २५

व

वर्षाभ्वश्च ११९
वसुस्रंसुध्वंस्वन १५१
वसोः सम्प्रसारणम् २००
वा द्रुहमुहष्णुह १४७
वा नपुंसकस्य २१३
वान्तो यि प्रत्यये २०
वा पदान्तस्य ५०
वाऽऽमि १३३
वाऽम्शसोः १३१
वाऽवसाने ८२
वा शरि ६२
वा सुप्यापिशलेः २९
वाह ऊठ् १४८

सूत्राणि पृष्ठाङ्काः
विप्रतिषेधे परं ६९
विभक्तिश्च ७६
विभाषा ङिश्योः १४२
विभाषा जसि ९१
विभाषा तृतीयादि ११६
विभाषा दिक्समासे १२६
विरामोऽवसानम् ७४
विश्वस्य वसुराटोः १७४
विसर्जनीयस्य सः ५६, ६१
वृद्धिरादैच् २६
वृद्धिरेचि २६
वेरपृक्तस्य १७१
र्वोरुपधाया दीर्घं १९९
व्योर्लघुप्रयत्नतरः ६५
व्रश्चभ्रस्जसृजमृज १७३

श
शप्श्यनोर्नित्यम् २१५
शश्छोऽटि २१५
शरोऽचि २९
शर्परे विसर्जनीयः ६१
शसो नः १७८
शात् ४२
शि तुक् ५३
शि सर्वनामस्थानम् १३७
शेषे लोपः १७६
शेषो घ्यसखि ९९
श्वयुवमघोनाम १६४

ष
षट्चतुर्भ्यश्च १५३
षड्भ्यो लुक् १०७

सूत्राणि पृष्ठाङ्काः
ष्टुना ष्टुः ४२
ष्णान्ता षट् १६८

स
संयोगान्तस्य लोपः १८
संयोगे गुरुः ३६
सख्युरसम्बुद्धौ १०३
सपूर्वायाः प्रथमाया १८६
समः समि १९०
समः सुटि ५४
समाहारः स्वरितः ९
सम्प्रसारणाच्च १४८
सम्बुद्धौ च १२३
सम्बुद्धौ शाकल्य ३९
सरूपाणामेकशेष ७५
सर्वत्र विभाषा गोः- ३३
सर्वनामस्थाने १०२
सर्वनाम्नः स्मै ८५
सर्वनाम्नः स्याड्ढ्र १२५
सर्वादीनि सर्वनामानि ८४
ससजुषो रुः ६३
सहस्य सध्रिः १९१
सहेः साडः सः १५२
सान्तमहतः १९३
साम आकम् १८२
सामन्त्रितम् १८६
सावनडुहः १४९
सुडनपुंसकस्य ९६
सुपः ७३
सुपि च ८०
सुप्तिङन्तं पदम् १५

सूत्राणि पृष्ठाङ्काः
सोऽचि लोपे चेत् ७०
सोऽपदादौ ५८
सौ च १६१
स्कोः संयोगाद्यो १७४
स्तोः श्चुना श्चुः ४२
स्त्रियाश्च १३४
स्त्रियाः १३१
स्थानिवदादेशो ८१
स्थानेऽन्तरतमः १७
स्पृशोऽनुदके क्विन् १९७
स्वमज्ञातिधनाख्या ८८
स्वमोर्नपुंसकात् १३९
स्वरादिनिपातमव्ययम् २१६
स्वादिष्वसर्वनाम ९६
स्वौजसमौट्छष्टाभ्यां ७३

ह
हन्तेः १६३
हलन्त्यम् ५
हलि लोपः १५६
हलि सर्वेषाम् ६६
हलोऽनन्तराः संयोगः १५
हल्ङ्याब्भ्यो दीर्घात् १०२
हशि च ६४
हे मपरे वा ५१
हो ढः १४५
हो हन्तेर्ञ्णिन्नेषु १६२
ह्रस्वं लघु ३६
ह्रस्वनद्यापो नुट् ८३
ह्रस्वस्य गुणः ९९
ह्रस्वो नपुंसके १३९

THE
CHAUKHAMBA SURBHARATI GRANTHAMALA
185

MADHYASIDDHĀNTA-KAUMUDĪ

OF

ŚRĪ VARADARĀJĀCĀRYA

(Part 2 : Bhwadi to Churadigana)

Edited with
'Subodhini'-Sanskrit & Hindi Commentaries

By
Dr. Suresh Chandra Sharma
Vyakaranacharya, M. A., Ph. D.

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

Publishers :

CHAUKHAMBA SURBHARATI PRAKASHAN
(Oriental Publishers & Distributors)
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
Varanasi 221001
Tel. : 2335263

© All rights reserved

Also can be had from :

CHAUKHAMBA PUBLISHING HOUSE
4697/2, Ground Floor
Gali No. 21-A, Ansari Road
Daryaganj, New Delhi 110002
Tel. : 32996391
e-mail : chaukhamba_neeraj@yahoo.com

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U.A. Bungalow Road, Jawahar Nagar
Post Box No. 2113
Delhi 110007
Tel. : 23856391

CHOWKHAMBA VIDYABHAWAN
Chowk (Behind to Bank of Baroda Building)
Post Box No. 1069
Varanasi 221001
Tel. : 2420404

निवेदनम्

विदितमेव तत्रभवतां श्रीमतां यत्संस्कृतवाङ्मयज्ञानाय व्याकरणमेव मुख्यं साधनम् । ऐन्द्रचान्द्रादिषु नैकेषु व्याकरणेषु सत्स्वपि सर्वत्राधुना पाणिनीयव्याकरणमेव प्रचलति । तच्च व्याकरणं लक्ष्यलक्षणात्मकम् । तत्र शब्दो हि लक्ष्यः, लक्षणन्तु सूत्रम् । अनयोः सम्यग्ज्ञानार्थं पाणिनीयाष्टाध्याय्या अध्ययनं परमावश्यकम् । अतः 'अष्टाध्यायी'ति ग्रन्थस्य गूढाभिप्रायं ज्ञातुं काशिकावृत्तिग्रन्थानां पठनपाठनयोः परम्परा प्रचलिता । परिवर्तनशीलेऽस्मिन् युगेऽध्ययनाध्यापनविधावपि परिवर्तनं स्वाभाविकमेव । अत एव सरलरीत्या व्याकरणशास्त्रज्ञानाय अष्टाध्यायीक्रमस्यकाठिन्यनिवारणाय च प्रक्रियाक्रमस्यारम्भो जातः । रूपावतारादुद्गतेयं प्रक्रियापरम्परा रूपमालया प्रक्रियाकौमुद्या च पल्लविता, सिद्धान्तकौमुद्या च पुष्पिता तत्रैव पर्यवसिताऽपि । श्रीमद्भट्टोजिदीक्षितविदुषा विरचिता वैयाकरणसिद्धान्तकौमुदी प्रौढा पाण्डित्यपरिपूर्णा च वर्तते । अतः सुकुमारमतीनां बालानां प्रवेशोऽत्र दुष्कर इति विचार्य तच्छिष्येण पण्डितप्रवरेण वरदराजाचार्येण प्राथमिकाध्येतृणां बालानामनायासेन बुद्धिप्रवेशलाभाय लघुसिद्धान्तकौमुदी, लब्धकिञ्चित्प्रवेशानां माध्यमिकानाञ्च बालानां व्याकरणशास्त्रबोधसम्पत्तये मध्यसिद्धान्तकौमुदी विरचिता ।

सेयं मध्यसिद्धान्तकौमुदी स्वल्पेन कालेन बहुबोधाधायनीति विदन्त्येव विद्वांसः । ग्रन्थस्यास्य परमोपादेयतामभिलक्ष्य कैश्चिद्विश्वविद्यालयैः माध्यमिककक्षासु विनिर्धारितोऽयं ग्रन्थः । यद्यप्यद्यत्वे मध्यसिद्धान्तकौमुद्याः संस्कृतहिन्दीव्याख्योपेतानि नैकानि संस्करणानि प्रकाशितानि सन्ति । परं 'विद्यार्थिजनोपयोगि सरलटीकोपेतं किञ्चित्संस्करणं नैव समुपलभ्यते' इत्यभावमनुभवता चौखम्बासुरभारतीप्रकाशनाध्यक्षस्याग्रहवशंवदेन छात्रहितैषिणा मया 'सुबोधिनी'ति संस्कृत-हिन्दीव्याख्योपेतायाः मध्यसिद्धान्तकौमुद्याः द्वितीयो भागः प्रकाशितः । तस्य लोकप्रियतामवेक्ष्य सम्प्रति द्वितीयो भागः प्रकाश्यते । आशासे यदनेन संस्करणेनापि छात्राणां नूनमेवोपकारो भविष्यति ।

कार्येऽस्मिन् व्याकरण-साहित्य-वेदान्ताद्यनेकशास्त्रमर्मविदुषां व्याकरणविभागाध्यक्षाणां पूज्यगुरुवर्याणां श्रीमतां केशवदेवतिवारीमहाभागानां हार्दिकीमधमर्णतामावहामि, यैरत्यन्तवात्सल्यभावेन पदे पदे काठिन्यं निरस्यास्माकं साहाय्यं कृतम् । अत्र कियत्साफल्यमधिगतं मयेत्यत्र तु विद्वांसः प्रेक्षका एव प्रमाणम् । प्रमादेनात्र काश्चन त्रुटयः स्युस्ताः संशोध्य विद्वद्भिः सूचनीयोऽप्ययं जन इति शम् ।

विदुषामाश्रवः—
सुरेशचन्द्र शर्मा

भूमिका

संस्कृत भाषा भारत की ही नहीं, अपितु विश्व की प्राचीनतम भाषा है। सभ्यता के उष:काल में इस भाषा का उदय हुआ और सर्वप्रथम भारत को ही इस उदय के दर्शन का श्रेय प्राप्त हुआ। 'वेद संसार के प्राचीनतम ग्रन्थ हैं' यह सभी विद्वानों और ऐतिह्यविदों ने स्वीकार किया है।

किसी भी भाषा की सुरक्षा और उसका मौलिक ज्ञान उसके व्याकरण में निहित होता है। बिना व्याकरण के भाषा प्राय: विश्रृंखल और अपूर्ण रहती है। संस्कृत-वाङ्मय में व्याकरणशास्त्र का विशिष्ट स्थान है। 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्।' अर्थात् जिससे साधु शब्दों का ज्ञान होता है, उसे **'व्याकरण'** की संज्ञा से अभिहित किया जाता है। महाभाष्यकार ने इसी को **'शब्दानुशासन'**[1] भी कहा है। शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष—इन षडङ्गों में 'व्याकरण' वेद का मुख रूप से प्रधान अङ्ग माना जाता है। जैसा कि पाणिनीयशिक्षा में कहा गया है—

> 'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
> ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
> शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्॥'[2]

भगवान् पतञ्जलि ने भी कहा है—**'प्रधानं च षडङ्गेषु व्याकरणम्।'**[3]

व्याकरण-वाङ्मय में ऐन्द्र व्याकरण सबसे प्राचीन है। शब्दोपदेश के लिए प्रकृति-प्रत्यय विभाग की कल्पना सर्वप्रथम सुरगुरु बृहस्पति के शिष्य इन्द्र ने की थी। देवराज इन्द्र से लेकर महर्षि पाणिनि पर्यन्त[4] अनेक आचार्यों ने व्याकरणशास्त्र का निर्माण किया था, परन्तु आज पाणिनीय व्याकरण ही सर्वाङ्ग परिपूर्ण उपलब्ध होता है। यद्यपि यह संस्कृत के प्राचीन आर्ष

---

[1] 'अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनम्, शब्दानामनुशासनं शब्दानुशासनं सूत्रवार्तिकभाष्यव्याख्यानादिरूपं शास्त्रम्।'

[2] पाणिनीय-शिक्षा (४१-४२)।

[3] महाभाष्यम् (पस्पशाह्निकम्)।

[4] बोपदेव ने इन्द्र आदि आठ वैयाकरणों का उल्लेख किया है—

> 'इन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः।
> पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः॥' (कविकल्पद्रुमः)

व्याकरणों में सबसे अन्तिम और संक्षिप्ततम है; तथापि लौकिक और वैदिक दोनों प्रकार के संस्कृत-वाङ्मय को आलोकित करने वाला एक महान् प्रकाश-स्तम्भ है। विश्व की किसी भी भाषा का व्याकरण इतना सरल और परिष्कृत नहीं बन सका है। संसार के सभी विद्वानों ने इसकी वैज्ञानिकता की मुक्तकण्ठ से प्रशंसा की है। पाणिनीय व्याकरण का मूलग्रन्थ भगवान् पाणिनि की 'अष्टाध्यायी' है। इसमें ३९९५ सूत्र हैं।[1] इस अष्टाध्यायी के माध्यम से उन्होंने संस्कृत भाषा के परिष्कृत रूप को स्थायित्व प्रदान किया। कालान्तर में महर्षि कात्यायन ने 'अष्टाध्यायी' की समीक्षा करते हुए उसके पूरक के रूप में वार्तिकग्रन्थ की रचना की। सूत्र तथा वार्तिकों के पारस्परिक समन्वय को समझाने के लिए शेषावतार भगवान् पतञ्जलि ने विशद विवरणात्मक ग्रन्थ 'महाभाष्यम्' की रचना की। उन्होंने पूर्ववर्ती दोनों आचार्यों की रचनाओं में सत्यान्वेषण किया और सिद्धान्ततः निष्कर्ष प्रस्तुत किया, जिससे विद्वानों ने उनके सिद्धान्तों को विशेष मान्यता प्रदान की—'यथोत्तरं मुनीनां प्रामाण्यम्।' इस प्रकार सूत्रकार 'पाणिनि', वार्तिककार 'कात्यायन' और भाष्यकार 'पतञ्जलि' ये तीनों आचार्य व्याकरण के 'त्रिमुनि' कहलाते हैं।

पाणिनि

महर्षि पाणिनि के जन्मस्थान, जन्मकाल आदि के विषय में इतिहासकार एकमत नहीं हैं। 'त्रिकाण्डशेष' कोष में पाणिनि के छह नामों का उल्लेख मिलता है। पाणिन, आहिक, दाक्षीपुत्र, शालङ्कि, पाणिनि और शालातुरीय। इन नामों द्वारा इनके गोत्र, माता-पिता तथा देश का निर्णय किया जा सकता है। इनमें पाणिन और पाणिनि दोनों नाम गोत्र-व्यपदेशज हैं। कुछ विद्वानों का मत है कि 'आहिक' इनका मूल नाम है। इनकी माता का नाम दाक्षी था, अतः इनका एक नाम दाक्षीपुत्र भी है। महाभाष्यकार पतञ्जलि का कथन है—'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः।' कुछ गवेषकों के अनुसार इनके पिता का नाम शलङ्क था। अतः इनको 'शालङ्कि' कहा गया। 'शालातुरीय' नाम इनके जन्मप्रदेश को स्पष्ट करता है। 'गणरत्नमहोदधि' नामक ग्रन्थ में 'शालातुरीय' की व्युत्पत्ति इस प्रकार की गई है—**'शलातुरो नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्रभवान् पाणिनिः।'** इससे स्पष्ट होता है कि पाणिनि का जन्मस्थान 'शलातुर' नामक ग्राम ही है, जो वर्तमान

---

[1] 'चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह॥'
(स्वरसिद्धान्तचन्द्रिका, श्लो० १५)

में 'लाहौर' नाम से प्रसिद्ध है और पाकिस्तान का विशाल नगर है। इनकी प्रारम्भिक शिक्षा सम्भवतः तक्षशिला में हुई थी, पश्चात् अपने ज्ञान की अभिवृद्धि के लिए यह अन्यत्र चले गये। इनके गुरु का नाम उपवर्षाचार्य था, जो नालन्दा विश्वविद्यालय के सुप्रसिद्ध आचार्य कहे जाते थे। इन्होंने अपने अध्ययन काल में ही कठिन तपस्या करके आशुतोष भगवान् शङ्कर को प्रसन्न किया और उनके उपदेश से 'अष्टाध्यायी' नामक व्याकरणशास्त्र की रचना की। महर्षि पाणिनि की बन्दना में आचार्यों ने कहा भी है—

'येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥'

महर्षि पाणिनि के काल के सम्बन्ध में इतिहासकारों के भिन्न-भिन्न मत हैं। अष्टाध्यायी के 'कुमारः श्रमणादिभिः' (२।१।७०) सूत्र में 'श्रमण' पद प्रयुक्त हुआ है। इससे आलोचक पाणिनि को बुद्धकालीन अथवा तत्पश्चात्कालीन सिद्ध करते हैं। इसी प्रकार कुछ विद्वान् 'इन्द्रवरुण०' (४।१।४९) सूत्र में 'यवन' पद को देखकर इन्हें 'सिकन्दर' के समकालीन स्वीकार करते हैं। परन्तु यह नितान्त भ्रमपूर्ण है। क्योंकि वैदिक ब्राह्मणग्रन्थों में भी श्रमण पद का उल्लेख मिलता है।[१] इसी प्रकार सिकन्दर के भारतागमन से भारतीय लोग यवनों से परिचित हुए। यह भी भ्रम ही है, क्योंकि महाभारत में यवन सैनिकों के द्वारा युद्ध करने का प्रसङ्ग है।

पं० युधिष्ठिर मीमांसक का मत है कि पाणिनि विक्रम से २८०० वर्ष पूर्व हुए हैं। किन्तु भाण्डारकर और गोल्डस्टुकर ने पाणिनि का समय ५०० ई० पू० से पहले निश्चित किया है। इसी प्रकार भारतीय और पाश्चात्य मतों पर सम्यग् विचार करने के उपरान्त डॉ० वासुदेवशरण अग्रवाल ने पाणिनि का समय ५०० ई० पू० निश्चित किया है।[२]

कात्यायन

पाणिनि की 'अष्टाध्यायी' पर आवश्यकतानुसार अनेक आचार्यों ने वार्तिकग्रन्थ लिखे थे। उनमें महामुनि कात्यायन का स्थान प्रमुख है। पाणिनीय व्याकरण को सम्पूर्ण एवं समृद्ध बनाने के लिए कात्यायन का विशेष महत्त्व है। पाणिनि और कात्यायन समकालीन और सतीर्थ्य थे। इनका कात्यायन

---

१. 'अत्र पिता अपिता भवति, माता अमाता, लोका अलोकाः, देवा अदेवाः, श्रमणोऽश्रमणः, तापसोऽतापसः।' (शतपथब्राह्मण)

२. द्रष्टव्य—श्रीवासुदेवशरण अग्रवाल : 'पाणिनिकालीन भारतवर्ष'। (पृ० ४७०–४८०)

नाम गोत्रज है। आपका मूल नाम 'वररुचि' था। महाभाष्य के प्रथमाह्निक में 'यथा लौकिकवैदिकेषु' इस वार्तिक पर 'प्रियतद्धिता दाक्षिणात्याः, यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते।' इस पतञ्जलि-वचन से विदित होता है कि ये दाक्षिणात्य थे। ये केवल वार्तिककार ही नहीं अपितु महाकवि भी थे। इनके 'स्वर्गारोहण' नामक काव्य की प्रशंसा अनेक ग्रन्थों में है। यथा—

'यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।
काव्येन रुचिरेणैव ख्यातो वररुचिः कविः॥'

महाभाष्यकार पतञ्जलि

इस समय पाणिनीय व्याकरण पर पतञ्जलि-विरचित एक ही भाष्य-ग्रन्थ उपलब्ध होता है। यह विशालकाय होने से महाभाष्य के नाम से प्रसिद्ध है। भाष्य का तात्पर्य निम्नाङ्कित है—

'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥'

महामुनि पतञ्जलि एवं उनके महाभाष्य की सभी विद्वानों ने मुक्तकण्ठ से प्रशंसा की है। उनका महाभाष्य न केवल व्याकरणशास्त्र का ही प्रामाणिक ग्रन्थ है, अपितु अनेक विषयों का आकर ग्रन्थ है। इस ग्रन्थ की भाषा यद्यपि अत्यन्त सरल है, तथापि कहीं-कहीं भाव-गाम्भीर्य अत्यधिक है।

भगवान् पतञ्जलि ने मनोवाक्कायदोषनिरसनार्थ 'योगसूत्र', 'महाभाष्य' और 'चरकसंहिता' इन तीन विश्वप्रसिद्ध ग्रन्थों की रचना की, जैसा कि किसी विद्वान् ने भगवान् पतञ्जलि की स्तुति करते हुए कहा है—

'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥'

महाभाष्यकार पतञ्जलि ने अपने परिचय के विषय में कुछ नहीं लिखा है, किन्तु 'महाभाष्य' में कुछ स्थलों पर 'गोर्नदीयस्त्वाह' तथा 'गोणिकापुत्रः' का उल्लेख मिलता है। इससे ज्ञात होता है कि यह गोर्नंद प्रदेश के निवासी थे। यह गोर्नंद प्रदेश कहाँ है? इस पर आधुनिक विद्वान् गोण्डा जनपद को ही गोर्नंद मानते हैं। इनके महाभाष्य में 'पुष्यमित्रो जयते, इह पुष्यमित्रं याजयामः' इत्यादि प्रयोग मिलते हैं। इससे प्रतीत होता है कि ये राजा पुष्यमित्र के समकालिक थे। पुष्यमित्र का समय ईसा की द्वितीय शताब्दी निश्चित किया गया है। भारतीय पौराणिक गणना के आधार पर पं० युधिष्ठिर मीमांसक ने पतञ्जलि का समय विक्रम से १२०० वर्ष पूर्व निश्चित किया है।

पाणिनीय व्याकरण के ये तीनों आचार्य 'त्रिमुनि' के नाम से प्रसिद्ध हैं। आशुतोष भगवान् शंकर के डमरू से पाणिनि के चतुर्दशसूत्र प्राप्त हुए और उन्हीं सूत्रों के आधार पर उन्होंने अष्टाध्यायी की रचना की। उसकी पूर्ति के लिए कात्यायन ने वार्तिकों की रचना की और भगवान् शेषावतार पतञ्जलि ने जिज्ञासु विद्यार्थियों और मनीषियों के हितार्थ 'महाभाष्य' का प्रवचन किया। ये तीनों व्याकरणशास्त्र के प्रवर्तक हैं।

अष्टाध्यायी के टीकाकार

पाणिनीय व्याकरण के मूल ग्रन्थ 'अष्टाध्यायी' पर अनेक वृत्तिग्रन्थ लिखे गये। वृत्तिकारों में श्वोभूति, व्याडि, कुणि, माथुर, वररुचि आदि प्रमुख हैं। परन्तु इस समय उपलब्ध वृत्ति-ग्रन्थों में वामन और जयादित्य द्वारा विरचित 'काशिकावृत्ति' अत्यन्त सराहनीय है। इसका निर्माणकाल विद्वानों ने वि० सं० ६५०-७०० के मध्य स्वीकार किया है।

इस प्रकार अध्येता को सर्वप्रथम सम्पूर्ण 'अष्टाध्यायी' कण्ठस्थ करके प्रयोग के लिए 'काशिका' का अध्ययन करना होता था। अनन्तर विशेषज्ञानार्थ महाभाष्य पढ़कर ही विशिष्ट पाण्डित्य प्राप्त होता था।

प्रक्रिया-क्रम

प्रौढ़ एवं विशेष परिश्रम न करने वाले विद्यार्थियों को उक्त प्रणाली में कष्ट और गौरव का अनुभव होने लगा था। अतः सरल रीति से व्याकरण-शास्त्र के ज्ञान के लिए तथा अष्टाध्यायी-क्रमस्थ कठिनाई को दूर करने के लिए सर्वप्रथम बौद्धमतावलम्बी धर्मकीर्ति ने वि० सं० १३०० में 'रूपावतार' नामक प्रक्रिया-ग्रन्थ की रचना की। पश्चात् विमल सरस्वती ने 'रूपमाला' और पं० रामचन्द्राचार्य ने 'प्रक्रियाकौमुदी' की रचना की। किन्तु इन प्रक्रिया-ग्रन्थों में अष्टाध्यायी के समस्त सूत्रों का सन्निवेश नहीं था। इस न्यूनता की पूर्ति के लिए म० म० श्रीभट्टोजि दीक्षित ने 'वैयाकरण सिद्धान्त-कौमुदी' की रचना की। विद्वानों ने भट्टोजि दीक्षित का समय वि० सं० १५०० से १५७५ के मध्य स्वीकार किया है। उक्त ग्रन्थ अष्टाध्यायी के समस्त सूत्रों सहित उणादिसूत्र, फिट्सूत्र, लिङ्गानुशासन, गणपाठ और धातुपाठ से सर्वाङ्गपरिपूर्ण है। यह ग्रन्थ इतना उपयोगी सिद्ध हुआ कि सम्पूर्ण भारतवर्ष में पाणिनीय व्याकरण का अध्ययन इसी के द्वारा होने लगा। 'सिद्धान्तकौमुदी' पर अनेक टीकाएँ लिखी गयीं, जिनमें दीक्षित जी की प्रौढमनोरमा, ज्ञानेन्द्र सरस्वती की तत्त्वबोधिनी, वासुदेव दीक्षित की बालमनोरमा तथा नागेश का लघुशब्देन्दुशेखर प्रसिद्ध है।

आचार्य वरदराज

आचार्य वरदराज दाक्षिणात्य पण्डित थे। इनके पिता दुर्गातनय और गुरु भट्टोजिदीक्षित थे। अपने अध्ययन के पश्चात् इन्होंने पाणिनि-व्याकरण में प्रवेशार्थी सुकुमार मति वाले बालकों के लिए 'सिद्धान्तकौमुदी' का पथ-प्रदर्शक 'लघुसिद्धान्तकौमुदी' नामक ग्रन्थ की रचना की। वरदराज का यह लघु प्रयास प्रारम्भिक छात्रों के लिए परमोपयोगी है।

मध्यसिद्धान्तकौमुदी

इस प्रकार 'लघुसिद्धान्तकौमुदी' द्वारा साधारण ज्ञान प्राप्त हो जाने पर विद्यार्थियों की ज्ञानवृद्धि के लिए वरदराज ने द्वितीय सोपान रूप 'मध्य-सिद्धान्तकौमुदी' का प्रणयन किया। मध्यसिद्धान्तकौमुदी के अन्त में श्रीवरद-राज ने कहा है—

'कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी।
तस्याः सङ्ख्या तु विज्ञेया खबाणकरवह्निभिः॥'

यह किंवदन्ती है कि आचार्य वरदराज की इस कृति को देखकर गुरुवर भट्टोजिदीक्षित को सन्देह हो गया था कि मध्यकौमुदी को पढ़ने के पश्चात् मेरी 'सिद्धान्तकौमुदी' को कौन पढ़ेगा? क्योंकि सिद्धान्तकौमुदी का सार-सर्वस्व मध्यसिद्धान्तकौमुदी है।

इस ग्रन्थ में सिद्धान्तकौमुदी की अपेक्षा संक्षेप के अतिरिक्त प्रकरण-क्रम में भी भिन्नता है। वाक्य में सर्वप्रथम अर्थज्ञान के लिए पदच्छेद अपेक्षित होता है। अतः पूर्व में सन्धि-प्रकरण को रखा गया है। अनन्तर सुबन्त पदों के ज्ञान के लिए षड्लिङ्ग-प्रकरण और अव्यय-प्रकरण का संघटन किया गया है। इसके बाद स्त्रीप्रत्यय की अपेक्षा तिङन्त पदों के ज्ञान के लिए तिङन्त-प्रकरण का विन्यास सर्वथा उचित है। क्योंकि स्त्रीप्रत्यय कृत्तद्धित-समास के बाद ही अपेक्षित है। अतः अन्त में 'स्त्री-प्रत्यय' का होना ही उचित है। इसी प्रकार कारक का भी समास से पूर्व होना युक्तिसङ्गत प्रतीत होता है। क्योंकि विभक्त्यर्थ-ज्ञान पर ही समास-प्रक्रिया आधारित है।

मध्यसिद्धान्तकौमुदी की एक अत्यन्त प्राचीन टीका 'मध्यमनोरमा' है; ऐसा कुछ विद्वानों ने स्वीकार किया है। परन्तु इसका मुद्रित संस्करण अद्यावधि अप्राप्य है।

आजकल मध्यसिद्धान्तकौमुदी के संस्कृत-हिन्दी टीकाओं सहित अनेक संस्करण उपलब्ध हैं। उनमें पं० सदाशिव शास्त्री की 'सुधा' संस्कृत व्याख्या तथा पं० रामचन्द्र झा द्वारा रचित 'इन्दुमती' हिन्दी टीका का प्रमुख स्थान रहा है।

प्रस्तुत संस्करण में 'सुबोधिनी' संस्कृत-हिन्दी व्याख्या का संक्षेप में वर्ण्यविषय इस प्रकार है—संस्कृत में जिज्ञासु छात्रों को सूत्रार्थ समझाना ही उद्देश्य रहा है। हिन्दी में प्रत्येक सूत्र का पदच्छेद, अनुवृत्ति तथा सूत्रभेद प्रदर्शित कर विद्यार्थियों को सूत्रार्थ समझने की ओर स्वतः उन्मुख होने की प्रणाली बतलायी गई है। अनन्तर ग्रन्थ की 'वृत्ति' के अनुसार सूत्रार्थ किया गया है। 'विमर्श' में अनुवृत्त सूत्रों का उल्लेख करते हुए सूत्रस्थ पदों के साथ उनका सम्बन्ध प्रदर्शित कर सूत्रार्थ स्पष्ट किया गया है। प्रक्रियानुसार क्रम से उदाहरणों की सिद्धि की गई है और प्रत्युदाहरणों के द्वारा सूत्रस्थ पदों की सार्थकता दिखलायी गई है। प्रसङ्गवश कठिन स्थलों का स्पष्टीकरण भी किया गया है। नवीन प्रकरणों के आरम्भ में पूर्वापर सङ्गति उपक्रम के रूप में की गई है। इसके अतिरिक्त अन्य ज्ञातव्य तथ्यों का प्रतिपादन किया गया है।

प्रस्तुत संस्करण की व्याख्या के विषय में गुण-दोषों का विवेचन सुधी पाठकजन ही करेंगे। मेरे प्रमाद एवं अज्ञानवश कुछ त्रुटियाँ हुई होंगी। अतः नीर-क्षीर-विवेकी विद्वानों से निवेदन है कि वे उन्हें सुधारकर सूचित करने का कष्ट करें। आशा एवं विश्वास है कि 'मध्यसिद्धान्तकौमुदी' के इस संस्करण से छात्रगण अवश्य ही लाभ उठायेंगे।

मकरसङ्क्रान्ति
२०४७ वि०

विदुषां वशंवदः
सुरेशचन्द्र शर्मा

प्रकरण-सूची

	पृ०
१ भ्वादिप्रकरणम्	१
२ अदादिप्रकरणम्	१३९
३ जुहोत्यादिप्रकरणम्	१९४
४ दिवादिप्रकरणम्	२१४
५ स्वादिप्रकरणम्	२३९
६ तुदादिप्रकरणम्	२५०
७ रुधादिप्रकरणम्	२६८
८ तनादिप्रकरणम्	२७८
९ क्र्यादिप्रकरणम्	२८६
१० चुरादिप्रकरणम्	२९६
(क) सूत्र-सूत्री	३०९
(ख) धातु-सूची	३१३
(ग) वार्तिक-सूची	३१८

॥ श्रीः ॥

मध्यसिद्धान्तकौमुदी

'सुबोधिनी'-संस्कृत-हिन्दीव्याख्योपेता

अथ तिङन्ते भ्वादयः

(४०१) धातोः ३।१।९१ । अधिकारोऽयम् । वक्ष्यमाणाः प्रत्यया धातोर्ज्ञेयाः । लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । एषु पञ्चमो लकार-

---

(४०१) **धातोरिति** । तृतीयाध्यायसमाप्तिपर्यन्तस्याधिकारः । **पञ्चम इति** । स्वोक्तक्रमेण पञ्चमो लकारो लेट् वेदविषयकोऽन्यथा प्रतिलोमसङ्ख्यया लोट्लकारेऽपि पञ्चत्वमापतेत् । 'लिङर्थे लेडि'ति सूत्रे 'छन्दसि लुङ्लङ्लिटः' इत्यतः 'छन्दसी'त्यनुवृत्तेः लेट्लकारस्य छन्दोमात्रविषयकत्वात् तस्य रूपाणीह न प्रदर्श्यन्त इति भावः ।

'सुप्तिङन्तं पदम्' (१।४।१४) सूत्रस्थ क्रम का अनुसरण करके पूर्वार्द्ध भाग में सुबन्त पदों का विवेचन किया गया । अब क्रमप्राप्त तिङन्त पदों के विवेचन हेतु सर्वप्रथम भ्वादि-प्रकरण का प्रारम्भ किया जा रहा है ।

(४०१) पद—धातोः । **अधिकारसूत्र** ।

मूलार्थ—यह अधिकार सूत्र है । आगे कहे गये तिङ् प्रत्यय धातु से विहित होते हैं ।

विमर्श—पाणिनीय अष्टाध्यायी के तृतीयाध्याय की समाप्ति तक 'धातोः' (३।१।९१) सूत्र का अधिकार है । लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । और लृङ्—ये दश लकार हैं । इनमें पाँचवें लेट् लकार का प्रयोग केवल वेद में ही होता है, लोक में नहीं । इनके आदि में 'ल्' वर्ण होने से इनको 'लकार' कहा जाता है । इनमें पहले छः लकार टित् हैं और शेष चार ङित् । लकारों का प्रयोग धातुओं के आगे किया जाता है । अतः इनके द्वारा धातुवाच्य क्रिया के काल आदि का बोध होता है ।

लकारों का सामान्य अर्थ

१. लट्—वर्तमान काल ।
२. लिट्—परोक्ष अनद्यतन भूतकाल ।
३. लुट्—अनद्यतन भविष्यत् काल ।
४. लृट्—सामान्य भविष्यत् काल ।
५. लेट्—लिङर्थ में (वैदिक भाषा में) ।
६. लोट्—विधि (आज्ञा, प्रेरणा देना) आदि ।
७. लङ्—अनद्यतन भूतकाल ।

श्छन्दोमात्रगोचरः । (४०२) लः कर्मणि च भावे चाऽकर्मकेभ्यः ३।४।६९। लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च । (४०३)

(४०२) **लः कर्मणि इति** । वाक्यद्वयं सूत्रम् । 'लः कर्मणि चे'ति प्रथमं वाक्यम् । ल इति प्रथमाबहुवचनान्तम् । चकारेण 'कर्तरि कृदि'त्यतः 'कर्तरि' इत्यनुकृष्यते । धातोरित्यधिकृतम् । लकारः कर्मणि कर्तरि च धातोः स्युरिति लभ्यते । एवं सकर्मकेभ्यो भावे लकारा न भवन्ति । 'भावे कर्मकेभ्यः' इति द्वितीयं वाक्यम् । अत्र चकारेण कर्त्रैवानुकृष्यते, न तु कर्म; असम्भवात् । तदाह—**अकर्मकेभ्य** इति । अत्र के सकर्मकाः के चाकर्मकाः ? इति जिज्ञासायामुच्यते—फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् ।

८. लिङ् (१) विधि, निमंत्रण आदि ।
(२) आशीर्वाद ।
९. लुङ्—सामान्य भूत ।
१०. लृङ्—हेतुहेतुमद्भाव अर्थात् लिङ् के अर्थ में जब क्रिया की असिद्धि अर्थ गम्यमान हो ।

(४०२) पद—लः कर्मणि च भावे च अकर्मकेभ्यः । **अनुवृत्ति**—कर्तरि । **विधिसूत्र ।**

मूलार्थ—सकर्मक धातुओं से कर्म और कर्ता में तथा अकर्मक धातुओं से भाव और कर्ता में लकार होते हैं ।

विमर्श—प्रकृत सूत्र में दो वाक्य हैं । 'लः कर्मणि च' यह प्रथम वाक्य है । यहाँ 'कर्तरि कृत्' (३।४।६७) पूर्वसूत्र से 'कर्तरि' पद की अनुवृत्ति आती है । 'धातोः' (३।१।९१) का अधिकार है । इस प्रकार लकार (सकर्मक) धातुओं से कर्म और कर्ता में होते हैं । 'भावे चाकर्मकेभ्यः' द्वितीय वाक्य है । यहाँ भी चकार पद से 'कर्तरि' पद की अनुवृत्ति होती है । अतः अकर्मक धातुओं से लकार भाव और कर्ता में होते हैं ।

यहाँ यह जानना आवश्यक है कि धातु के दो अर्थ होते हैं—फल और व्यापार । व्यापार का आश्रय कर्ता और फल का आश्रय कर्म होता है ।[1]

जिस उद्देश्य के लिए क्रिया की जाती है, उसे फल कहते हैं । यथा—'पचति' में विक्लित्ति (=गलना) के उद्देश्य से पाक क्रिया सम्पन्न की जाती है । अतः विक्लित्ति फल है । फल की सिद्धि के लिए जो क्रिया की जाती है, उसे व्यापार कहते हैं । जैसे 'पचति' में आग जलाना तथा पात्र को चूल्हे पर चढ़ाने से लेकर उतारने तक जो भी क्रिया की जाती है, वह सब व्यापार के अन्तर्गत आता है । फल कर्म में और व्यापार कर्ता में रहता है । 'पचति' में विक्लित्ति रूप फल का आश्रय तण्डुल है; अतः तण्डुल कर्म है और विक्लित्ति के साधक अग्नि प्रज्वलित करना आदि क्रिया के आश्रय देवदत्त आदि हैं; अतः वह कर्ता है ।

जिन धातुओं के फल और व्यापार के आश्रय भिन्न-भिन्न हों, उनको सकर्मक कहते हैं । यथा—'देवदत्तः तण्डुलं पचति' यहाँ विक्लित्ति रूप फल तण्डुल में और पाकानुकूल व्यापार देवदत्त में है; अतः पच् धातु सकर्मक है ।[2] जिन धातुओं के फल और व्यापार एक ही आश्रय में हों, उनको अकर्मक कहते हैं । यथा—'देवदत्तः शेते' यहाँ विश्राम रूप फल और चक्षुः-निमीलनादि रूप व्यापार एक ही आश्रय देवदत्त में हैं; अतः शीङ् धातु अकर्मक है ।[3]

---

[1] "फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।"—वैयाकरण-भूषणसार, कारिका-२ ।

[2] "फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् ।"

[3] "फल-समानाधिकरणव्यापारवाचकत्वम् अकर्मकत्वम् ।"

वर्तमाने लट् ३।२।१२३ । वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात् । अटावितौ । उच्चारणसामर्थ्यान्न लस्येत्वम् । भू सत्तायाम् । कर्तृविवक्षायां 'भू ल्' इति स्थिते । (४०४)

यथा—'देवदत्तः तण्डुलं पचति' इत्यत्र विक्लित्तिरूपं फलं तण्डुले, पाकानुकूलो व्यापारश्च देवदत्ते वर्तते । अतः पच्धातुः सकर्मकः । फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । यथा—'देवदत्तः शेते' इत्यत्र विश्रामरूपं फलं चक्षुर्निमीलनादिरूपो व्यापारश्चैकस्मिन् देवदत्त एव । अतः शीङ्धातुरकर्मकः ।

(४०३) **वर्तमाने लडिति** । धातोरित्यधिकृतम् । 'वर्तमाने' इति तत्रान्वेति । वर्तमानेऽर्थे विद्यमानाद्धातोः लडिति फलितार्थः । वर्तमानत्वञ्च प्रारब्धापरिसमाप्तिक्रियाश्रयत्वं कालगतं बोद्धयम् । **भू सत्तायामिति** । आत्मधारणं सत्ता, स्वरूपेणावस्थानमिति यावत् ।

सामान्यतया साकांक्षित क्रिया सकर्मक होती है । जैसे—'पठति, खादति' आदि में क्या पढ़ता है ? क्या खाता है ? की अपेक्षा रहती है । अतः पठ् आदि धातुएँ सकर्मक हैं एवं निराकांक्षित क्रिया अकर्मक होती है । जैसे—'शेते, हसति, जागर्ति' आदि में क्या सोता है ? क्या हँसता है ? क्या जागता है ? इत्यादि आकाङ्क्षा नहीं होती ।[1]

क्रिया के प्रकार को वाच्य कहते हैं, जो तीन प्रकार का है—

१. कर्तृवाच्य, २. कर्मवाच्य और ३. भाववाच्य ।

इन भ्वादि आदि दश गणों और प्रक्रियाओं में 'कर्तृवाच्य' के रूप ही प्रदर्शित किये गये हैं । केवल भावकर्म-प्रक्रिया में भाववाच्य और कर्मवाच्य के रूप बतलाये गये हैं । इस प्रकार सकर्मक और अकर्मक धातुओं से कर्ता में लकार आने से कर्ता उक्त (अभिहित) हुआ । कर्म में द्वितीया तथा कर्ता में प्रथमा विभक्ति का प्रयोग होता है । यथा—'देवदत्तः गृहं गच्छति' (कर्तृवाच्य) । कर्म में सकर्मक धातु से लकार आने से कर्मवाच्य होता है । कर्मवाच्य में कर्म में प्रथमा और कर्ता में तृतीया विभक्ति का प्रयोग होता है तथा क्रिया के पुरुष-वचन कर्म के अनुसार होते हैं । यथा—'देवदत्तेन वेदाः पठ्यन्ते ।' अकर्मक धातु से भाव में लकार होने पर कर्ता में तृतीया विभक्ति होती है । कर्म नहीं होता तथा क्रिया सदैव प्रथमपुरुष की एकवचनान्त ही होती है । यथा—'अस्माभिः स्थीयते' ।[2]

(४०३) पद—वर्तमाने लट् । **विधिसूत्र ।**

मूलार्थ—वर्तमानकालिक क्रियावृत्ति धातु से लट् लकार होता है । लट् लकार के अकार और टकार की इत्संज्ञा होती है । उच्चारण-सामर्थ्य से 'ल्' की इत्संज्ञा नहीं होती । भू धातु का अर्थ सत्ता (होना) है । कर्ता की विवक्षा में (कर्तृवाच्य में) लकार आने पर 'भू ल्' इस प्रकार की स्थिति हुई ।

---

[1] "क्रियापदं कर्तृपदेन युक्तं व्यपेक्षते यत्र किमित्यपेक्षाम् ।
सकर्मकं तं सुधियो वदन्ति शेषंस्ततो धातुरकर्मकः स्यात् ॥"

[2] "प्रयोगे कर्तृवाच्यस्य कर्तरि प्रथमा भवेत् । द्वितीया कर्मणि तथा क्रियाकर्तृपदान्विता ॥
प्रयोगे कर्मवाच्यस्य तृतीया स्यात्तु कर्तरि । कर्मणि प्रथमा चैव क्रिया कर्मानुसारिणी ॥
कर्माभावः सदा भावे तृतीया चैव कर्तरि । प्रथमः पुरुषश्चैकवचनं च क्रियापदे ॥"
(हरिकारिका)

लस्य ३।४।७७ । इत्यधिकृत्य । (४०५) **तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथां ध्व-मिड्वहि-महिङ् ३।४।७८ ।** एतेऽष्टादश लादेशाः स्युः । (४०६) **लः परस्मैपदम् १।४।९९ ।** लादेशाः परस्मैपदसंज्ञाः स्युः । (४०७) **तङानावात्मनेपदम् १।४।१०० ।** तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः । पूर्वसंज्ञाऽपवादः ।

---

(४०५) **तिप्तस्झि इति ।** तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ्—एषां समाहारद्वन्द्वात् प्रथमैकवचनम् । अत्र सूत्रे महिङो ङकारस्तिङादिप्रत्याहारार्थः । लस्येति स्थानषष्ठ्यन्तमधिकृतम् । अत आह—**एत इति ।**

(४०६) **ल इति ।** ल इति स्थानषष्ठी । आदेश इति पदमध्याहार्यम् । तदाह—**लादेशा इति ।**

(४०७) **तङान्नाविति ।** तङ् च आनश्चेति द्वन्द्वः । पूर्वसूत्राल्ल इत्यनुवर्तते । आनग्रहणेनात्र शानच्कानचावेव गृह्येते । तदाह—**तङित्यादिना ।**

विमर्श—यहाँ 'धातोः' का अधिकार है। 'वर्तमाने' पद का 'धातोः' के साथ अन्वय होता है। इस प्रकार वर्तमान काल अर्थ में विद्यमान धातु से लट् लकार होता है।

क्रिया के उस काल को वर्तमान कहते हैं, जिसमें क्रिया का आरम्भ होना तो पाया जाता हो, परन्तु समाप्त होना नहीं। जैसे—'सः गच्छति' इस वाक्य में गमन क्रिया का आरम्भ होना पाया जाता है, परन्तु समाप्त होना नहीं। अतः यह वर्तमानकालिक प्रयोग है।

'लट्' लकार में अकार और टकार की इत्संज्ञा होने से उनका लोप होता है। लकार की इत्संज्ञा नहीं होती, उच्चारण-सामर्थ्य से। अन्यथा 'ल्' की इत्संज्ञा लोप होने से उच्चारण ही व्यर्थ हो जायेगा। भू धातु का अर्थ सत्ता (होना) है। कर्तृवाच्य में लट् लकार आने पर 'भू ल्' यह स्थिति हुई।

(४०४) पद—लस्य। **अधिकारसूत्र।**

मूलार्थ—यह अधिकार सूत्र है।

(४०५) पद—तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ्। **विधिसूत्र।**

मूलार्थ—लकार के स्थान में तिप्, तस् इत्यादि १८ आदेश होते हैं।

विमर्श—'लस्य' का अधिकार है। अतः तिबादि १८ आदेश लकारों के स्थान में होते हैं। इन अठारहों को तिङ् कहते हैं। आरम्भ के 'ति' से लेकर अन्तिम 'ङ्' तक 'तिङ्' प्रत्याहार बनता है। प्रारम्भ के नौ प्रत्ययों को छोड़कर 'त' से लेकर 'महिङ्' के 'ङ्' तक 'तङ्' प्रत्याहार बनता है।

(४०६) पद—लः परस्मैपदम्। **संज्ञासूत्र।**

मूलार्थ—लकार के स्थान में होने वाले आदेश की परस्मैपद संज्ञा होती है।

उदाहरण—(१) भू+लङ् (ल्=प्रथमपुरुष एकवचन–तिप्=ति)—भू ति (सार्वधातुक संज्ञा होकर शप्–'अ'—'कर्तरि शप्')—भू अ ति (सार्वधातुक संज्ञा होकर 'ऊ' 'ओ' गुण—'सार्वधातु०' 'ओ'='अव्'—'एचोऽयवायावः')—भवति (अट्='अ' का आगम—'लुङ्लङ्लृङ्क्ष्वडुदात्तः')—अ भ व ति ('इ' का लोप—'इतश्च')=अभवत् । (२) भू+लङ् (ल्=प्र० पु० द्विवचन–'तस्')—भू तस् (शप्, गुण, अवादेश, अट् का आगम)—अभव तस् (तस्=ताम्—'तस्थस्थमिपाम्०')=अभवताम् । (३) भू+लङ् (ल्=प्र० पु० बहुवचन—झि)—भू+झि (अट् तथा शेष कार्य लट् के समान)—अभवन्ति ('इ' का लोप–'इतश्च')—अ भ व न् त् ('त्' का लोप—'संयोगान्तस्य लोपः')=अभवन् । (४) भू+लङ् (ल्=म० पु० एकवचन सिप्=सि)—भू+सि (शप्, गुण, अवादेश, अट्, इकार लोप)—अभवस् (स्=र्=ः)=अभवः । (५) भू+लङ् (ल्=म० पु० द्विवचन–थस्)—भू+थस् (थस्=तम्, शप्, गुण, अवादेश, अट् का आगम)=अभवतम् । (६) भू+लङ् (ल्=म० पु० बहुवचन 'थ')—भू+थ (थ=त, शप्, गुण, अवादेश, 'अट्' का आगम)=अभवत । (७) भू+लङ् (ल्=उ० पु० एकवचन मिप्)—भू मिप् (मिप्='अम्' आदेश, शप्, गुण, अवादेश, अट्)—अ भ व अम् (अ+अ='अ' पररूप—'अतो गुणे')=अभवम् । (८) भू+लङ् (ल्=उ० पु० द्विवचन–वस्)—भू+वस् (अट्, शप्, गुण, अवादेश)—अभव वस् ('अ'='आ' दीर्घ—'अतो दीर्घो यञि')—अभवावस् ('स्' का लोप-'नित्यं ङितः')=अभवाव । (९) भू+लङ् (ल्=उ० पु० बहुवचन—'मस्')—भू+मस् (अट्, शप्, गुण, अवादेश, दीर्घ)—अभवामस् (पूर्ववत् 'स्' का लोप)=अभवाम ।

भू धातु, 'लङ्' लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अभवत्	अभवताम्	अभवन्
म० पु०—	अभवः	अभवतम्	अभवत
उ० पु०—	अभवम्	अभवाव	अभवाम

(४५८) **पद**—विधिनिमन्त्रणामन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु, लिङ् । **विधिसूत्र** ।

मूलार्थ—विधि, निमन्त्रण, आमन्त्रण, अधीष्ट,[1] संप्रश्न और प्रार्थना अर्थों में धातु से 'लिङ्' लकार का प्रयोग होता है ।

---

[1] "विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्त्तनम् । निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनम् । आमन्त्रणं कामचारानुज्ञा । अधीष्टः सत्कारपूर्वको व्यापारः । 'प्रवर्त्तनायां लिङ्' इत्येव सुवचम् ।"—सिद्धान्तकौमुदी

(४५९) यासुट् परस्मैपदेषूदात्तो ङिच्च ३।४।१०३। लिङः परस्मैपदानां यासुडागमो ङिच्च । ङित्वोक्तेर्ज्ञायते —क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेध इति । तेन

श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनम्, 'इह भुञ्जीत' । आमन्त्रणम्=कामचारानुज्ञा । अधीष्टः=सत्कारपूर्वको व्यापारः, 'पुत्रमध्यापयेद् भवान्' । सम्प्रश्नः =सम्प्रधारणम्= उचितानुचितपरिपृच्छा, 'भो वेदमधीयीय उत तर्कम्' । प्रार्थनम्=याञ्चा, 'भो भोजनं लभेय' इति ।

(४५९) **ङित्वोक्तेरिति** । ननु लिङ्वृत्तिङित्त्वस्य यदागमन्यायेन तिप्यतिदेशेन पुनः यासुटः ङित्करणं व्यर्थमिति चेन्न, अनल्विधाविति तन्निषेधात् । न च 'प्रदाय, प्रधाये'त्यादौ क्त्वावृत्तिकित्त्वस्य ल्यबारोपे 'घुमास्थे'ति ईत्वप्राप्त्या 'न ल्यपी'ति व्यर्थं सज्ज्ञापयति 'अनुबन्धकार्येऽनल्विधाविति निषेधो न प्रवर्तत इति । तेन स्थानिवद्भावात्

विमर्श—विधि आदि छः अर्थों में धातु से लिङ् लकार होता है। विधि आदि का विस्तृत विवेचन इस प्रकार है—

(१) **विधि**—विधि का अर्थ 'प्रेरणा' (=आज्ञा देना) है। आज्ञा अपने से पद या उम्र में छोटे भृत्य, शिष्य, पुत्र आदि को दी जाती है (भृत्यादेर्निकृष्टस्य प्रवर्त्तनम्)। जैसे—'त्वं कार्यं कुरु, त्वं पठ पठेः वा, त्वं गच्छ गच्छेः वा'।

(२) **निमन्त्रण**—निमन्त्रण का अर्थ है—'नियोगकरण'। नियोग=प्रवृत्ति का करण अर्थात् जनक। आवश्यक श्राद्ध के भोजन में दौहित्र (कन्या के पुत्र) आदि की प्रवृत्ति का व्यापार करना। इस प्रकार की प्रेरणा को आग्रह कहते हैं। जैसे—'भो भागिनेय ! श्राद्धभोजने त्वमागच्छ आगच्छेः वा'।

(३) **आमन्त्रण**—'आमन्त्रणं कामचारानुज्ञा' अर्थात् आमन्त्रण उस प्रेरणा को कहते हैं, जिसमें निमन्त्रण से कम बल रहता है। कामचार=स्वेच्छा के लिए प्रेर्यमाण व्यक्ति स्वतन्त्र होता है। अतः आमन्त्रित व्यक्ति जिस कार्य के लिए आमन्त्रित किया गया है, उसमें सम्मिलित होना या न होना उसकी इच्छा पर निर्भर होता है। जैसे—'मित्रवर ! भ्रातुः विवाहमुपलक्ष्य क्रियमाणे प्रीतिभोजोत्सवे भवान् आगच्छतु आगच्छेत् वा'। आजकल की भाषा में इसको 'अनुरोध' कहा जा सकता है।

(४) **अधीष्ट**—'अधीष्ट' का अर्थ है—सत्कारपूर्वक किसी कार्य में लगना। जैसे—किसी अध्यापक से सम्मानपूर्वक कहा जाता है कि 'भवान् मम पुत्रान् अध्यापयतु अध्यापयेत् वा'।

(५) **संप्रश्न**—'संप्रश्न' में प्रेरणा के साथ परामर्श का भाव भी रहता है। 'सम्प्रधारणं सम्प्रश्नः' अर्थात् निश्चय के लिए कहना। जैसे—'किं भो वेदमधीयीय उत वा न्यायशास्त्रम्' (मैं वेद पढ़ूँ या न्यायशास्त्र)।

(६) **प्रार्थना**—प्रार्थना अपने से बड़े जनों से की जाती है, इसमें याचना रहती है। जैसे—'अहं पुस्तकं लभे, लभेयं वा' (मुझे पुस्तक दीजिए)।

इस प्रकार उक्त विधि आदि (=प्रेरणा) अर्थों में लिङ् और लोट् दोनों लकारों का प्रयोग किया जाता है।

(४५९) पद—यासुट्, परस्मैपदेषु, उदात्तः, ङित् च। **अनुवृत्ति**—लिङः। **विधिसूत्र।**

मूलार्थ—लिङ् के स्थान में होने वाले परस्मैपदसंज्ञक प्रत्ययों को यासुट् का आगम होता है, वह उदात्त एवं ङिद्वद् भी होता है।

'वक्ष्यमाणे'त्यत्र टित्त्वादुगित्वाच्च ङीब्न। (४६०) **लिङः सलोपोऽनन्त्यस्य** ७।२। ७९। सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः। इति प्राप्ते। (४६१) **अतो येयः** ७।२। ८०। अतः परस्य सार्वधातुकावयवस्य 'यास्' इत्यस्य इय्। गुणः। 'लोपो व्योर्वलि'।

ङित्त्वप्रयुक्ते कार्ये सिद्धे 'यासुट्०' इत्यादिसूत्रे ङिद्ग्रहणं व्यर्थमिति वाच्यम्, 'क्वचिदनुबन्धकार्येऽपि अनल्विधाविति निषेधः प्रवर्त्तते' इति ज्ञापनार्थं तस्यावश्यकत्वात्। तेन 'वक्ष्यमाणे'त्यत्र टित्त्वादुगित्वाच्च ङीब्न। अन्यथा ऌडादेशस्य शानचः स्थानिवत्वेन टित्त्वात् 'टिड्ढाणञि'ति ङीप् स्यादेव।

(४६०) **लिङः सलोपोऽनन्त्यस्येति**। सेति लुप्तषष्ठीकं पदम्। 'रुदादिभ्यः सार्वधातुके' इत्यतः सार्वधातुक इत्यनुवृत्तं षष्ठ्या विपरिणम्यते। अत आह—**सार्वधातुक इत्यादि**।

(४६१) **अतो येय इति**। अत्र 'या' इति लुप्तषष्ठीकं पदम्। अत इति पञ्चमी। अनुवृत्तं सार्वधातुक इति पदमवयवषष्ठ्या विपरिणम्यते। तदाह—**अत इति**। **भवेदिति**।

विमर्श—प्रकृत सूत्र में 'लिङः सीयुट्' (३।४।१०२) से 'लिङः' पद की अनुवृत्ति आती है। तदनुसार—"लिङ् के परस्मैपदसंज्ञक प्रत्ययों को यासुट् (='यास्'-) का आगम होता है और वह उदात्त और ङित् भी होता है"।

ङित्त्वोक्तेरिति। भू+लिङ् (ल्=तिप्, शप्, गुण, अवादेश, यासुट्='यास्' का आगम)—भव यास् त्। यहाँ लिङ् वृत्ति ङित्त्व स्थानिवद्भाव से 'तिप्' में भी रहेगा। यह अतिदिष्ट ङित्त्व 'यास्' आगम से युक्त आगमी परस्मैपद में भी रहेगा। इस प्रकार यासुट् स्वतः ही ङित् है। पुनः इस सूत्र में ङित् ग्रहण क्यों किया ? इस प्रश्न के उत्तर में कहा गया है कि उपर्युक्त प्रकार से सूत्रस्थ यासुट् का ङिद् ग्रहण व्यर्थ होकर ज्ञापन करता है कि "क्वचित् अनुबन्ध कार्य करने में भी 'अनल्विधौ' की प्रवृत्ति होती है"। अर्थात् 'अनल्विधौ' से स्थानिवद्भाव का निषेध होता है। अतः 'वक्ष्यमाणा' में टित् और उगित् होने पर भी ङीप् नहीं होता, अन्यथा 'ऌट्' के स्थान पर आदेश 'शानच्' को स्थानिवद्भाव से टित् और उगित् ('ऋ' की इत्संज्ञा) होने से 'ङीप्' हो जाता।

(४६०) **पद**—लिङः, सलोपः, अनन्त्यस्य। **अनुवृत्ति**—सार्वधातुके। **विधिसूत्र**।

मूलार्थ—सार्वधातुक 'लिङ्' के अनन्त्य सकार का लोप होता है। 'स्' लोप के प्राप्त होने पर।

विमर्श—यहाँ 'रुदादिभ्यः सार्वधातुके' (७।२।७६) से अनुवृत्त 'सार्वधातुके' पद का षष्ठ्यन्त में विपरिणाम होता है। अतः सार्वधातुक लिङ् सम्बन्धी अनन्त्य (जो अन्त में स्थित न हो) 'स्' का लोप होता है।

(४६१) **पद**—अतः, येयः। **अनुवृत्ति**—सार्वधातुके। **विधिसूत्र**।

मूलार्थ—अत् से परवर्ती सार्वधातुक के अवयव 'यास्' के स्थान पर 'इय्' आदेश होता है। गुण। 'लोपो व्योर्वलि'। भवेत्। भवेताम्।

विमर्श—'या' लुप्तषष्ठ्यन्त पद है। 'अतः' पञ्चम्यन्त पद है। 'परस्य' का अध्याहार किया जाता है। 'रुदादिभ्यः०' (७।२।७६) से 'सार्वधातुके' पद की अनुवृत्ति आती है। जिसका अवयवषष्ठ्यन्त में विपरिणाम होता है। तदनुसार—"अत् से परे सार्वधातुकावयव 'यास्' को 'इय्' आदेश होता है"।

भवेत् । भवेताम् । (४६२) झेर्जुस् ३।४।१०८ । लिङो झेर्जुस् । (४६३) उस्यपदान्तात् ६।१।९६ । अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात् । इति प्राप्ते । परत्वान्नित्यत्वाच्चाऽतो येय इति प्राञ्चः । यद्यप्यन्तरङ्गत्वात्पररूपं न्याय्यम्, तथापि 'यास्' इत्यस्य 'इय्' इति व्याख्येयम् । एवञ्च सलोपस्याऽपवाद इय् । 'अतो येय' इत्यत्र

भूधातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति लिङ्यनुबन्धलोपे, तत्स्थाने प्रथमपुरुषैकवचने तिपि, पकारस्येत्संज्ञायां लोपे च सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शप्यनुबन्धलोपे शित्त्वात्सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणेऽवादेशे 'इतश्च' इतीकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्चे'ति सूत्रेण यासुटयनुबन्धलोपे टित्त्वादाद्यवयवे 'लिङः सलोपोऽनन्त्यस्ये'ति यासः सकारस्य लोपे प्राप्ते 'अतो येयः' इत्यनेन यासः स्थाने इयादेशे 'आद् गुणः' इति गुणे 'भवे य् त्' इति जाते 'लोपो व्योर्वलि' इति यकारस्य लोपे 'भवेत्' इति सिद्धम् ।

(४६३) **उस्येत्यादि** । 'एकः पूर्वपरयोरि'त्यधिकृतम् । 'आद् गुणः' इत्यत 'आदि'त्यनुवर्तते, 'एङि पररूपमि'त्यस्मात् 'पररूपमि'ति । तदाह—**अपदान्तादिति** । **भवेयुः** । भूधातोः लिङ्यनुबन्धलोपे तत्स्थाने प्रथमपुरुषगतबहुत्वविवक्षायां 'झि'

उदाहरण—(१) भू+लिङ् (ल्=प्रथमपुरुष एकवचन तिप्=ति)—भू ति (सार्वधातुक संज्ञा होकर शप्-अ)—भू अ ति (सार्वधातुक संज्ञा होकर 'ऊ'='ओ'—गुण—'सार्वधातु०', 'ओ'='अव्' आदेश)—भव ति ('इ' का लोप—'इतश्च', यासुट्='यास्' का आगम—'यासुट् परस्मैपदेषूदात्तो ङिच्च')—भव यास् त ('लिङः सलोपोऽनन्त्यस्य' से 'स्' लोप की प्राप्ति होने पर 'यास्'='इय्'—'अतो येयः' से)—भव इय् त (अ+इ='ए'—'आद् गुणः')—भवे य् त ('य्' का लोप—'लोपो व्योर्वलि')=भवेत । (२) भू+लिङ्=(ल्=प्र० पु० द्विवचन तस्)—भू तस् (शप्, गुण, अवादेश, यासुट्='यास्' का आगम)—भव यास् तस् (तस्=ताम् , यास्=इय् , गुण)—भवेय् ताम् ('य्' का लोप 'लोपो व्योर्वलि')=भवेताम् ।

(४६२) **पद**—झेः, जुस् । **अनुवृत्ति**—लिङ् । **विधिसूत्र** ।

मूलार्थ—'लिङ्' लकार सम्बन्धी 'झि' के स्थान में जुस् आदेश होता है ।

विमर्श—प्रकृत सूत्र में 'लिङः सीयुट्' (३।४।१०२) सूत्र से 'लिङः' पद की अनुवृत्ति आती है । तदनुसार—"लिङ् लकार सम्बन्धी झि के स्थान पर जुस्='उस्' आदेश होता है" ।

(४६३) **पद**—उसि, अपदान्तात् । **अनुवृत्ति**—आत् , पररूपम् । **विधिसूत्र** ।

मूलार्थ—अपदान्त अवर्ण से 'उस्' के परवर्ती रहने पर पूर्व-पर के स्थान में पररूप एकादेश होता है । भवेयुः । भवेः । भवेतम् । इत्यादि ।

विमर्श—प्रकृत सूत्र में 'एकः पूर्वपरयोः' का अधिकार है । 'आद् गुणः' (६।१।८७) से 'आत्' तथा 'एङि पररूपम्' (६।१।९४) से 'पररूपम्' पदों की अनुवृत्ति आ रही है । तदनुसार—'अपदान्त अ वर्ण से उस् के परे रहने पर पूर्व-पर के स्थान में पररूप एक आदेश होता है' । "भव या उस्' यहाँ यद्यपि 'उस्यपदान्तात्' से पररूप की प्राप्ति हुई, तथापि पर एवं नित्य होने के कारण 'अतो येयः' से या=इय् आदेश हुआ" यह प्राचीन वैयाकरणों का मत है । जो उचित प्रतीत नहीं होता । क्योंकि पररूप अन्तरङ्ग होने के कारण पर एवं नित्य से भी प्रबल है । अतः पररूप होना

तु सन्धिरार्षः । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम । (४६४) लिङाशिषि ३।४।११६ । आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात् । (४६५) किदा-

---

प्रत्यये सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे शित्त्वात् सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणेऽवादेशे, 'झोऽन्त.' इति प्राप्तं झस्यान्तादेशं प्रबाध्य 'झेर्जुस्' इति झेर्जुसादेशेऽनुबन्धलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति यासुटयनुबन्धलोपे 'लिङः सलोपोऽनन्त्यस्ये'ति सकारस्य लोपे प्राप्ते 'अतो येयः' इति 'यास्' इत्यस्येयादेशे 'आद् गुणः' इति गुणे सस्य रुत्वे विसर्गे च कृते भवेयुरिति ।

(४६४) आशीर्लिङि विशेषमाह—**लिङाशिषीति** । लिङिति लुप्तषष्ठीकं पदम् । 'तिङ्शित्सार्वधातुकमि'त्यतः 'तिङि'त्यनुवर्तते । अत आह—**आशिषीत्यादिना** ।

ही उचित है । इस आशङ्का के समाधानार्थ 'अतो येयः' की नवीन व्याख्या प्रस्तुत करते हैं—"यास् को 'इय्' आदेश होता है ।" अतएव 'लिङः सलोपोऽनन्त्यस्य' से प्राप्त सकार के लोप का बाधकर यास्=इय् आदेश हुआ । सूत्र 'अतो येयः' में (यास्+इय्) सौत्रत्वात् सलोप कर गुणसन्धि का विधान किया गया है ।

उदाहरण—(१) भू+लिङ् (ल्=प्र० पु० बहुवचन झि)—भू झि (शप्, गुण, अवादेश, यासुट्=यास्, झि=जुस्=उस्)—भव यास् उस् ('उस्यपदान्तात्' से प्राप्त पररूप का बाधकर यास्=इय्—'अतो येयः')—भव इय् उस् (अ+इ='ए'—गुण, स्=र=ः)=भवेयुः । (२) भू+लिङ् (ल्=म० पु० एकवचन सिप्=सि)—भू सि (शप्, गुण, अवादेश, यासुट्, यास्=इय्, गुण)—भवे य् सि ('इ' का लोप—'इतश्च', 'य्' का लोप-'लोपो व्योर्वलि')—भवे स् (स्=र्=ः)=भवेः । (३) भू+लिङ् (ल्=म० पु० द्विवचन थस्)—भू थस् (शप्, गुणावादेश, यास्, थस्=तम्)—भव यास् तम् (यास्=इय्, गुण, य् का लोप) =भवेतम् । (४) भू+लिङ् (ल्=म० पु० बहुवचन थ)—भू थ (शप्, गुणावादेश, यास्=इय्, थ=त, गुण)—भवेय् त ('य्' का लोप)=भवेत । (५) भू+लिङ् (ल्=उ० पु० एकवचन मिप्=मि)—भू मि (शप्, गुणावादेश, यास्, यास्=इय्, गुण, मिप्=अम्) =भवेयम् । (६) भू+लिङ् (ल्=उ० पु० द्विवचन वस्)—भू वस् (पूर्वोक्त शप् आदि कार्य)—भवेय् वस् ('स्' का लोप—'नित्यं ङितः', 'य्' का लोप—'लोपो०')=भवेव । (७) भू+लिङ् (ल्=उ० पु० बहुवचन मस्)—भू मस् (पूर्वोक्त शप् आदि कार्य)—भवेय् मस् ('स्' का लोप 'नित्यं ङितः' 'य्' का लोप)=भवेम ।

भू धातु, विधिलिङ् के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	भवेत्	भवेताम्	भवेयुः
म० पु०—	भवेः	भवेतम्	भवेत
उ० पु०—	भवेयम्	भवेव	भवेम

(४६४) पद—लिङ्, आशिषि । **अनुवृत्ति**—तिङ् । **संज्ञासूत्र** ।

मूलार्थ—आशीर्वाद अर्थ में लिङ् के तिङ् की आर्धधातुक संज्ञा होती है ।

विमर्श—प्रकृत सूत्र में 'तिङ्शित्सार्वधातुकम्' (४१६) से 'तिङ्' पद की अनुवृत्ति आती है । अतः आशीर्वाद अर्थ में लिङ् के स्थान में विहित तिङ् की आर्धधातुक संज्ञा होती है । फलस्वरूप आशीर्लिङ् में 'शप्' नहीं होता ।

शिषि ३।४।१०४ । **आशिषि लिङो यासुट् कित् स्यात् । स्कोरिति सलोपः । (४६६) क्ङिति च १।१।५ । गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ।**

---

(४६५) **किदाशिषि** । अत्र 'लिङः सीयुट्' इत्यतः लिङ इत्यनुवर्तते । 'यासुट् परस्मैपदेष्वि'त्यतः यासुडिति च । तदाह—**अशिषि लिङ इति ।**

(४६६) **क्ङिति च** । अत्र ग् क् ङ् इत्येषां समाहारद्वन्द्वः । कात्पूर्वं गकारस्य चर्त्त्वेन ककारः । अतः क् क् ङ् च इत् यस्येति विग्रहः । द्वन्द्वान्ते श्रूयमाणत्वात् इच्छब्दः प्रत्येकमन्वेति । 'इको गुणवृद्धी' इति सूत्रमनुवर्तते । 'न धातुलोप०' इत्यतः 'ने'त्यनुवर्तते । तदाह मूले—**गित्किन्ङिन्निमित्त इत्यादि । भूयात् ।** भूधातोः 'आशिषि लिङ्लोटौ' इत्यनेन लिङ्यनुबन्धलोपे, तत्स्थाने 'तिप्तस्झि०' इत्यादिना प्रथमपुरुषैकवचने तिपि, अनुबन्धलोपे 'लिङाशिषि' इत्यनेन तिपः आर्धधातुकसंज्ञायां शपोऽभावे 'इतश्च' इतीकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुडागमेऽनुबन्ध-

---

(४६५) **पद**—कित, आशिषि । **अनुवृत्ति**—लिङ्, यासुट् । **विधिसूत्र ।**

मूलार्थ—आशीर्वाद अर्थ में लिङ् सम्बन्धी यासुट् कित होता है ।

विमर्श—यहाँ 'लिङः सीयुट्' (३।४।१०२) सूत्र से 'लिङः' तथा 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (४५९) से 'यासुट्' पद की अनुवृत्ति आ रही है । तदनुसार—'आशीर्वाद अर्थ में लिङ् को विहित यासुट् का आगम कित होता है' ।

(४६६) **पद**—क्ङिति, च । **अनुवृत्ति**—इको गुणवृद्धी, न । **विधिसूत्र (निषेध) ।**

मूलार्थ—गित , कित, ङित को निमित्त मानकर इग्लक्षण गुण और वृद्धि नहीं होते । भूयात । भूयास्ताम् इत्यादि ।

विमर्श—'ग् क् ङ्' में समाहारद्वन्द्व है । सूत्रस्थ 'इत' शब्द का प्रत्येक के साथ अन्वय होता है—गित , कित, ङित । 'इको गुणवृद्धी' (१।३।३) सूत्र की तथा 'न धातुलोप आर्धधातुके' (१।१।४) सूत्र से 'न' पद की अनुवृत्ति आती है । तदनुसार—'गित, कित और ङित प्रत्ययों के परवर्ती रहते इक्-लक्षण गुण और वृद्धि का निषेध होता है' ।

उदाहरण—(१) भू+आशीर्लिङ् (=प्रथमपुरुष एकवचन तिप्=ति)—भू ति ('लिङाशिषि' से तिप् की आर्धधातुक संज्ञा होने से 'शप्' का अभाव, यासुट्='यास्' का आगम)—भू यास् ति ('इ' का लोप—'इतश्च', सुट् का आगम—'सुट् तिथोः')—भूयास् स् त (दोनों 'स्' का लोप—'स्कोः संयोगाद्योरन्ते च' 'सार्वधातु०' से प्राप्त गुण का 'क्ङिति च' से निषेध)= भूयात । (२) भू+लिङ् (ल्=प्र० पु० द्विवचन तस्)—भू तस् ('तस्'='ताम्'—'तस्थस्थमिपाम्०' आर्धधातुक संज्ञा, शप् का अभाव, यासुट्=यास्)—भू यास् ताम् (सुट्='स्' का आगम, कित होने से गुण-निषेध, 'स्' का लोप—'स्कोः०')=भूयास्ताम् । (३) भू+लिङ् (ल् =प्र० पु० बहुवचन 'झि')—भू झि (झि=जुस्=उस्, यासुट्=यास् आगम)—भू यास् उस् (कित होने से गुण-निषेध, स्=र्=ः)=भूयासुः । (४) भू+लिङ् (ल्=म० पु० एकवचन सिप्=सि)—भू सि (यासुट्=यास् आगम, इकार लोप—'इतश्च')—भू यास् स् ('स्' का संयोगादि लोप, स्=र्=ः)=भूयाः । (५) भू+लिङ् (ल्=म० पु० द्विवचन थस्)—भू थस् (थस्=तम् , यासुट्, कित्त्व, गुण-निषेध)=भूयास्तम् । (६) भू+लिङ् (ल्=म० पु०

(४६७) लुङ् ३।२।११०। भूतार्थे धातोर्लुङ्। (४६८) माङि लुङ् ३।३।१७५। माङ्युपपदे धातोर्लुङ् स्यात्। सर्वलकारापवादः। (४६९) स्मोत्तरे लङ् च ३।३।१७६। स्मोत्तरे माङि लङ् स्याल्लुङ् च। (४७०) च्लि लुङि ३।१।४३। शबाद्यपवादः। (४७१) च्लेः सिच् ३।१।४४। इचावितौ। (४७२) गातिस्थाघुपाभूभ्यः

लोपे 'सुट् तिथोः' इति सुटि, अनुबन्धलोपे 'किदाशिषि' इत्यनेन कित्त्वे 'स्कोः संयोगाद्योरन्ते च' इति सकारयोः लोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'क्ङिति च' इति सूत्रेण निषेधे 'भूयात्' इति सिद्धम्।

(४६८) **माङि लुङ्।** मास्तु इत्यादौ तु निषेधार्थो मा शब्दो न माङिति न दोषः। माङ्प्रयोगे सर्वलकाराणां स्थाने लुङेव भवतीत्यर्थः।

बहुवचन थ) भू थ (थ=त, यासुट् पूर्ववत्)=भूयास्त। (७) भू+लिङ् (ल्=उ० पु० एकवचन मिप्)—भू मिप् (मिप्=अम्, यासुट् आदि पूर्ववत्)=भूयासम्। (८) भू+लिङ् (ल्=उ० पु० द्विवचन 'वस्')—भू वस् (यासुट् आदि पूर्ववत्, 'स्' का लोप—'नित्यं ङितः')=भूयास्व। (९) भू+लिङ् (ल्=उ० पु० बहुवचन 'मस्')—भू मस् (यासुट् आदि पूर्ववत्, 'स्' का लोप)=भूयास्म।

'भू' धातु, आशीर्लिङ् के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०	—भूयात्	भूयास्ताम्	भूयासुः
म० पु०	—भूयाः	भूयास्तम्	भूयास्त
उ० पु०	—भूयासम्	भूयास्व	भूयास्म

(४६७) पद—लुङ्। **विधिसूत्र।**

मूलार्थ—भूतार्थक धातु से 'लुङ्' लकार होता है।

विमर्श—भूत अर्थ में विद्यमान धातु से लुङ् लकार होता है। इस सूत्र की प्रवृत्ति सामान्यतः भूतमात्रविवक्षा में ही होती है, विशेष में नहीं।

(४६८) पद—माङि, लुङ्। **विधिसूत्र।**

मूलार्थ—'माङ्' उपपद रहते धातु से 'लुङ्' लकार होता है।

विमर्श—सभी लकारों का बाधकर निषेधार्थक 'माङ्' के उपपद रहने पर 'लुङ्' लकार का प्रयोग होता है।

(४६९) पद—स्म, उत्तरे, लङ्, च। **विधिसूत्र।**

मूलार्थ—'स्म' उत्तरपरक 'माङ्' के उपपद रहते धातु से 'लुङ्' तथा चकारात् 'लङ्' लकार का प्रयोग होता है।

विमर्श—सूत्रस्थ 'च' पद से 'माङि लुङ्' (३।३।१७५) का अनुकर्षण होता है। तदनुसार—'स्म पद के परवर्ती रहने पर माङ् के योग में धातु से उत्तर लङ् और लुङ् लकार होता है'।

(४७०) पद—च्लि, लुङि। **विधिसूत्र।**

मूलार्थ—'लुङ्' के परवर्ती रहने पर धातु से च्लि प्रत्यय होता है। यह शप् आदि विकरण का अपवाद है।

(४७१) पद—च्लेः, सिच्। **विधिसूत्र।**

सिचः परस्मैपदेषु २।४।७७ । एभ्यः परस्य सिचो लुक् स्यात्परस्मैपदेषु । गापाविहेणादेशपिबती गृह्येते । (४७३) भूसुवोस्तिङि ७।३।८८ । 'भू' 'सू' एतयोः सार्वधातुके तिङि परे गुणो न । अभूत् । अभूताम् । अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् ।

(४७२) **गापाविहेति ।** व्याख्यानात् इण् आदेशो 'गा', पिब् आदेशो यस्य भवति स पा गृह्यते । अत एव 'गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्' इत्युक्तं भाष्ये ।

(४७३) **भूसुवोस्तिङि ।** 'मिदेर्गुणः' इत्यतः गुण इति 'नाभ्यस्तस्याचि पिती'-त्यतो नेति सार्वधातुक इति चानुवर्तते । **अभूत् ।** भूधातोः 'लुङ्' इत्यनेन लुङ्यनुबन्धलोपे तत्स्थाने प्रथमपुरुषगतैकत्वविवक्षायां तिप्यनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमे 'च्लि लुङि' इति च्लिप्रत्यये तस्य 'च्लेः सिच्' इति सिजादेशेऽनुबन्धलोपे 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुकि 'इतश्च' इतीकारलोपे, 'सार्वधातुकार्धधातुकयोरि'त्यनेन गुणे प्राप्ते 'भूसुवोस्तिङि' इति सूत्रेण निषेधे 'अभूत्' इति सिद्धम् ।

मूलार्थ—'च्लि' के स्थान में 'सिच्' आदेश होता है। ('सिच्' में इकार और चकार की इत्संज्ञा होती है ।

(४७२) पद—गातिस्थाघुपाभूभ्यः, सिचः, परस्मैपदेषु । **अनुवृत्ति**—लुक् । **विधिसूत्र ।**

मूलार्थ—गा, स्था, घुसंज्ञक, पा और भू धातु से परे सिच् का लुक् होता है ।

विमर्श—यहाँ 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' से 'लुक्' पद की अनुवृत्ति आती है। तदनुसार—"गा, स्था, घुसंज्ञक, पा तथा भू धातुओं से परवर्ती 'सिच्' का लुक् होता है ।"

गापाविहेति—'गा' से यहाँ इण् के स्थान में होने वाला 'गा' ('इणो गा लुङि') तथा 'पा' से पिब् आदेश वाला 'पा पाने' का ग्रहण होता है ।[1]

(४७३) पद—भूसुवोः, तिङि । **अनुवृत्ति**—गुणः, न । **विधि(निषेध)सूत्र ।**

मूलार्थ—'भू' तथा 'सू' धातुओं को सार्वधातुक तिङ् के परवर्ती रहने पर गुण नहीं होता है । अभूत् । अभूताम् । अभूवन् इत्यादि ।

विमर्श—प्रकृत सूत्र में मिदेर्गुणः' (७।३।८२) से 'गुणः' तथा 'नाभ्यस्तस्याचि पिति' (७।३।८७) से 'न' पद की अनुवृत्ति आती है। अतः 'भू' एवं 'सू' धातुओं को सार्वधातुक तिङ् परे रहते गुण का निषेध होता है ।

उदाहरण—(१) भू+लुङ् (ल्=प्रथमपुरुष एकवचन—तिप्=ति)—भू ति (शप् का बाधकर 'च्लि' प्रत्यय—'च्लि लुङि', च्लि=सिच्=स्—'च्लेः सिच्')—भू स् ति ('सिच्' का लुक्—'गातिस्था०' अट् का आगम—'लुङ्लङ्लृङ्क्ष्वडुदात्तः', 'इ' का लोप—'इतश्च')—अभूत ('सावधातु०' से प्राप्त गुण का 'भूसुवोस्तिङि' से निषेध)=अभूत । (२) भू+लुङ् (ल्= प्र० पु० द्विवचन 'तस्'='ताम्'—'तस्थस्थमिपाम्०')—भू ताम् ('अट्'='अ' का आगम, च्लि, च्लि=सिच्, सिच् का लुक्)=अभूताम् । (३) भू+लुङ् (ल्=प्र० पु० बहुवचन 'झि')—भू झि ('अट्' का आगम, 'झ्'='अन्त्' आदेश—'झोऽन्तः')—अ भू अन्ति (वुक्='व्' का आगम, च्लि, च्लि=सिच्, सिच् का लुक्, 'इ' का लोप—'इतश्च' 'त्' का लोप—'संयोगान्तस्य

---

[1] "गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्"—महाभाष्यम् ।

अभूव । अभूम । **(४७४) न माङ्योगे ६।४।७४ । माङ्योगे अडाटौ न स्तः । मा भवान्भूत् । मा स्म भवत् । मा स्म भूत् । (४७५) लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३९ ।** हेतुहेतुमद्भावादि लिङ्निमित्तं, तत्र भविष्यदर्थाद्धातोर्लृङ्, क्रियाया

---

(४७४) **मास्म भूदिति** । मास्म-पूर्वाद् भूधातोः 'स्मोत्तरे लङ् च' इत्यनेन लुङ्यनुबन्धलोपे, तत्स्थाने तिपि, 'च्लि लुङि' इति च्लौ, तस्य सिजादेशेऽनुबन्धलोपे, अडागमे प्राप्ते 'न माङ्योगे' इत्यनेन तन्निषेधे 'इतश्च' इतीकारलोपे, सिचो लुकि कृते 'मास्म भूत्' इति ।

(४७५) **लिङ्निमित्त इति** । हेतुहेतुमतोर्लिङ्, इच्छार्थेषु 'लिङ्लोटावि'त्यादि । लिङो निमित्तं, तस्मिन् लिङ्निमित्ते, क्रियाया अतिपत्तिः=अनिष्पत्तिः, तस्यां क्रियातिपत्तौ, 'भविष्यति मर्यादावचने' इत्यतो भविष्यतीत्यनुवर्तते । एवं मूलोक्तार्थः निष्पद्यते । **अभविष्यत्** । भूधातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङि तत्स्थाने

लोपः')=अभूवन् । (४) भू+लुङ् (ल्=म० पु० एकवचन 'सिप्'='सि')—भू सि (अट् का आगम, च्लि=सिच्, सिच् का लुक्, 'इ' का लोप)—अभू स् (स्=र्=ः)=अभूः । (५) भू+लुङ् (ल्=म० पु० द्विवचन थस्)—भू थस् ('अट्' का आगम, थस्=तम्)—अभू तम् (च्लि=सिच्, सिच् का लुक्)=अभूतम् । (६) भू+लुङ् (ल्=म० पु० बहुवचन 'थ')—भू थ ('अट्' का आगम, थ=त, च्लि=सिच्, सिच् का लुक्, गुण-निषेध)=अभूत । (७) भू+लुङ् (ल्=उ० पु० एकवचन-मिप्=मि)—भू मि (अट्, मि=अम्, च्लि=सिच्, सिच् का लुक्, 'वुक्'='व्' का आगम—'भुवो वुग्०')=अभूवम् । (८) भू+लुङ् (ल्=उ० पु० द्विवचन वस्)—भू वस् ('अट्' का आगम, च्लि, सिच्, सिच् का लुक्)—अभूवस् ('स्' का लोप—'नित्यं ङितः')=अभूव । (९) भू+लुङ् (ल्=उ० पु० बहुवचन 'मस्')—भू मस् (अट् का आगम, च्लि=सिच्, सिच् का लुक्)—अभूमस् ('स्' का लोप)=अभूम ।

भू धातु, लुङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अभूत्	अभूताम्	अभूवन्
म० पु०—	अभूः	अभूतम्	अभूत
उ० पु०—	अभूवम्	अभूव	अभूम

(४७४) पद—न, माङ्, योगे । **अनुवृत्ति**—अट्, आट् । **विधि(निषेध)सूत्र** ।

मूलार्थ—'माङ्' के योग में 'अट्' और 'आट्' आगम नहीं होते ।

विमर्श—यहाँ 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (सू० ४५६) से 'अट्' तथा 'आडजादीनाम्' (६।४।७२) से 'आट्' की अनुवृत्ति आ रही है । तदनुसार—"निषेधार्थक 'माङ्' के योग में धातुओं को 'अट्' एवं 'आट्' आगम नहीं होते" ।

उदाहरण—'मा भवान्भूत्' में 'अट्' आगम प्राप्त था, उसका 'न माङ्योगे' से निषेध होने पर 'भूत्' ही रूप लुङ् के प्र० पु० एकवचन में हुआ । इसी प्रकार 'मास्म भवत्' और 'मास्म भूत्' ।

(४७५) पद—लिङ्, निमित्ते, लृङ्, क्रियातिपत्तौ । **अनुवृत्ति**—भविष्यति । **विधिसूत्र** ।

मूलार्थ—क्रिया की अनिष्पत्ति गम्यमान रहने पर भविष्यत् अर्थ में विद्यमान धातु से हेतुहेतुमद्भावादि अर्थ में 'लृङ्' लकार होता है । अभविष्यत्—इत्यादि ।

अनिष्पत्तौ गम्यमानायाम् । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम । 'सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्' इत्यादि ज्ञेयम् । 'प्रणिभवति' इत्यादौ उपसर्गाणामसमस्तत्वेऽपि संहिता नित्या । तदुक्तम्—

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ १ ॥

तिप्यनुबन्धलोपे 'इतश्च' इतीकारलोपे प्राप्तं शपं प्रबाध्य 'स्यतासी ऌलुटोः' इति स्यप्रत्यये 'आर्धधातुकं शेषः' इत्यार्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड् वलादेः' इतीडागमेऽनुबन्धलोपे गुणेऽवादेशे अडागमेऽनुबन्धलोपे 'आदेशप्रत्यययोः' इति षत्वे 'अभविष्यत्' इति । **संहितेति** । एकपदे = अखण्डपदे संहिता (सन्धिः) नित्या = अवश्यं कर्तव्या ।

विमर्श—प्रकृत सूत्र में 'भविष्यति मर्यादावचने' (३।३।१३६) से 'भविष्यति' पद की अनुवृत्ति आती है। लिङ् का निमित्त हेतुहेतुमद्भावादि है, उसमें यदि क्रिया का भविष्यत् काल में होना प्रतीत हो तो धातु से 'लृङ्' लकार होता है।

उदाहरण—(१) भू+लृङ् (ल्=प्रथमपुरुष एकवचन तिप्='ति')—भू ति ('अट्'='अ' का आगम, 'इ' का लोप—'इतश्च')—अ भू त (शप् का बाधकर 'स्य' प्रत्यय—'स्यतासी ऌलुटोः', आर्धधातुक संज्ञा, इट्='इ' का आगम, 'उ'='ओ'—गुण, ओ='अव्' आदेश, स्=ष्—'आदेशप्रत्यययोः')=अभविष्यत्। (२) भू+लृङ् (ल्=प्र० पु० द्विवचन तस्)—भू तस् (अट् का आगम, तस्=ताम्, स्य, इट्, गुण, अवादेश, षत्व पूर्वोक्त कार्य)=अभविष्यताम्। (३) भू+लृङ् (ल्=प्र० पु० बहुवचन 'झि')—भू झि (अट्, इकारलोप, झ्=अन्त् आदेश, स्य, इट्, गुण, अवादेश, 'त्' का संयोगान्त लोप और षत्व होकर)=अभविष्यन्। (४) भू+लृङ् (ल्=म० पु० एकवचन सिप्='सि')—भू सि (अट्, 'इ' का लोप, इट्, गुण, अवादेश, षत्व, स्=र्=ः)=अभविष्यः। (५) भू+लृङ् (ल्=म० पु० द्विवचन थस्)—भू थस् (अट्, थस्=तम्, स्य, इट्, गुण, अवादेश, षत्व)=अभविष्यतम्। (६) भू+लृङ् (ल्=म० पु० बहुवचन 'थ')—भू थ (अट्, थ=त, इट्, गुण, अवादेश, षत्व)=अभविष्यत। (७) भू+लृङ् (ल्=उ० पु० एकवचन—'मिप्')—भू मिप् (अट्, मिप्=अम्, स्य, इट्, गुण, अवादेश, षत्व)=अभविष्यम्। (८) भू+लृङ् (ल्=उ० पु० द्विवचन 'वस्')—भू वस् (अट्, स्य, इट्, गुण, अवादेश, षत्व, दीर्घ—'अतो दीर्घो यञि', 'स्' का लोप—'नित्यं ङितः') =अभविष्याव। (९) भू+लृङ् (ल्=उ० पु० बहुवचन 'मस्')—भू मस् (अट्, स्य, इट्, गुण, अवादेश, षत्व, दीर्घ, 'स्' का लोप पूर्ववत्)=अभविष्याम।

भू धातु लृङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अभविष्यत्	अभविष्यताम्	अभविष्यन्
म० पु०—	अभविष्यः	अभविष्यतम्	अभविष्यत
उ० पु०—	अभविष्यम्	अभविष्याव	अभविष्याम

सुवृष्टिरिति। 'यदि अच्छी वृष्टि=वर्षा होगी तो सुकाल होगा।' यह उदाहरण क्रिया की असिद्धि स्पष्ट रूप से दिखलाने के लिए दिया गया है। 'प्रणिभवति' इत्यादि प्रयोगों में उपसर्गों के असमस्त होने पर भी सन्धि नित्य होती है। जैसा कि कहा गया है—

धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते ।
विशिनष्टि तमेवाऽर्थमुपसर्गगतिस्त्रिधा ॥ २ ॥ इति ।

सत्ताद्यर्थनिर्देशश्चोपलक्षणं, 'यागात्स्वर्गो भवती'त्यादौ 'उत्पद्यते' इत्याद्यर्थात् । उपसर्गास्त्वर्थविशेषस्य द्योतकाः । प्रभवति । पराभवति । सम्भवति । अनुभवति । अभिभवति । उद्भवति । परिभवति—इत्यादौ विलक्षणार्थावगतेः । उक्तञ्च—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ १ ॥

तेन 'भवति, नायकः, पावकः' इत्यादौ नित्यमेव संहिताकार्यम् । धातूपसर्गयोः संतोः सन्धिरावश्यकः, यथा—प्रेजते, उपोषति इत्यादौ । समासेऽपि संहिता नित्या, तेन 'सुध्युपास्यः, सूर्योदयः' इत्यादौ नित्यमेव संहिताकार्यम् । किन्तु वाक्ये वक्तुर्विवक्षायां सत्यामेव सन्धिर्भवति । अर्थात् वाक्ये सन्धिकार्याणां विकल्पः सिद्ध्यति । यथा 'पश्यतीन्दुम्, पश्यति इन्दुमि'ति वा ।

धात्वर्थं बाधत इति । शाकटायनाचार्या उपसर्गाणां द्योतकत्वं स्वीकुर्वन्ति, गार्ग्याचार्यास्तेषां वाचकत्वं कथयन्ति । अपरे वैयाकरणास्तु द्योतकत्वमेव मन्वते । कश्चिदुपसर्गो धात्वर्थं बाधते । यथा—भूधातुः आत्मधारणानुकूलव्यापारे वर्तते, प्रोपसर्गेणात्मधारणानुकूलव्यापारस्य बाधो भवति । तेन 'प्रभवती'त्यस्योत्पत्त्यनुकूलो व्यापारोऽर्थः । कश्चिदुपसर्गो धात्वर्थस्यानुसरणं करोति । यथा 'अधीते' इत्यत्राधिरुपसर्गः । कश्चिदुपसर्गः तस्मिन् व्यापारे प्रकर्षं करोति । यथा 'प्रपचती'त्यत्र विक्लित्त्यनुकूले व्यापारे प्रकर्षं विदधाति ।

संहितैकेति । एक पद में, धातु और उपसर्ग की तथा समास में भी संहिता (=सन्धि) नित्य होती है । किन्तु वाक्य में वक्ता की इच्छा पर निर्भर रहती है । (यथा—'देवी उवाच' अथवा 'देव्युवाच' ।

धात्वर्थमिति । कोई उपसर्ग धातु के मुख्यार्थ का बाधकर नूतन अर्थ का बोध कराता है, कोई धात्वर्थ का ही अनुसरण करता है और कोई विशेषण होकर उसी धात्वर्थ को और भी अधिक स्पष्ट कर देता है । इस प्रकार उपसर्ग की गति तीन प्रकार की होती है ।

सत्ताद्यर्थ०—सत्ता इत्यादि धातुओं के अर्थ-प्रदर्शन अन्य-अन्य अर्थों का भी उपलक्षण है । अर्थात् 'भू सत्तायाम्' इत्यादि धातुपाठ दर्शित ही अर्थ नहीं है, अपितु अन्य भी अर्थ है । 'यागात् स्वर्गो भवति' (याग से उत्पन्न अदृष्ट से स्वर्ग उत्पन्न होता है) यहाँ भू धात्वर्थ उत्पत्त्यनुकूल व्यापारार्थ है । उत्पत्ति रूप फल अन्य उसका व्यापारजनक है । उपसर्ग वाचक नहीं हैं । अर्थविशेष का वाचक धातु ही है । उपसर्ग तो केवल द्योतक हैं । निकटस्थ पद में रहने वाली शक्ति के बोधक को ही द्योतक कहते हैं । 'प्रभवति=उत्पन्न होता है, पराभवति=पराजित होता है, सम्भवति=सम्यक् उत्पन्न होता है, अनुभवति=अनुभव करता है, अभिभवति=सर्वतोभाव से उत्पन्न होता है । उद्भवति=उत्पन्न होता है, परिभवति=तिरस्कृत होता है ।' इस प्रकार एक ही भू धातु के अनेक विलक्षण अर्थ प्रतीत होते हैं । जैसा कि कहा भी गया है—

उपसर्गेणेति । उपसर्ग के बल से धात्वर्थ भिन्न-भिन्न प्रतीत होने लगता है । जैसे—हरणार्थक 'हृ' धातु 'प्र' उपसर्ग लगने पर प्रहार (=आघात), 'आ' लगने पर आहार (=भोजन),

अत सातत्यगमने । अतति । अततः । अतन्ति । अतसि । अतथः । अतथ । अतामि । अतावः । अतामः । (४७६) अत आदेः ७।४।७० । अभ्यासस्याऽऽदेरतो दीर्घः स्यात् । पररूपापवादः । आत । आततुः । आतुः । आतिथ । आतथुः । आत । आत । आतिव ।

उपलक्षणमिति । उपलक्षणं नाम 'स्वार्थबोधकत्वे सति स्वेतरार्थबोधकत्वम्' । **उपसर्गेणेति ।** उपसर्गेण धातोः सम्बन्धे सति निर्दिष्टं यद्रूपं तदतिरिक्तरूपविशिष्टस्य प्रतीतिर्भवति । यथा 'हृ हरणे' इत्यस्य निर्दिष्टं रूपं हरणत्वं तदतिरिक्तं यद्रूपम्—आघातत्वं तद्विशिष्टाघातार्थो हृधातोः उपसर्गबलात्प्रतीयते । यथा प्रहारः = कशाद्याघातः, आहारः = भक्षणम्, संहारः = बधः, विहारः = क्रीडा, परिहारः = परित्यागः ।

(४७६) अत आदेः । 'अत्र लोप०' इत्यस्मादभ्यासस्येत्यनुवर्तते । 'दीर्घ इण' इत्यतो दीर्घ इति च । तदाह—**अभ्यासस्येत्यादि । आत ।** 'अत सातत्यगमने' इत्यस्मा-

---

'सम्' उपसर्ग जोड़ने पर संहार (=विनाश), 'वि' लगने पर विहार (=क्रीडा) और 'परि' उपसर्ग लगने पर परिहार (=समाधान) इत्यादि । **अत[1] इति ।** 'अत्' धातु का अर्थ निरन्तर गमन (=जाना) है ।

उदाहरण—अत्+लट् (ल्=प्रथमपुरुष एकवचन तिप्=ति)—अत् ति (सार्वधातुक संज्ञा, शप्–अ)=अतति । इसी प्रकार अन्य रूप भी सिद्ध होते हैं ।

अत् धातु, लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अतति	अततः	अतन्ति
म० पु०—	अतसि	अतथः	अतथ
उ० पु०—	अतामि	अतावः	अतामः

(४७६) पद—अतः, आदेः । **अनुवृत्ति**—अभ्यासस्य, दीर्घः । **विधिसूत्र ।**

मूलार्थ—अभ्यास के आदि अकार को दीर्घ होता है ।

विमर्श—यहाँ 'अत्र लोप०' (७।४।५८) से 'अभ्यासस्य' तथा 'दीर्घ इणः किति' से 'दीर्घः' पदों की अनुवृत्ति आ रही है । तदनुसार अभ्यास के आदि अकार को दीर्घ रूप आदेश होता है ।

उदाहरण—(१) अत्+लिट् (ल्=प्रथमपुरुष एकवचन तिप्, तिप्=णल्='अ')—अत् अ (द्वित्व—'लिटि धातोरनभ्यासस्य' अभ्यास संज्ञा, हलादिशेष)—अ अत् अ (अ+अ='आ' दीर्घ—'अत आदेः')=आत । (२) आततुः (लिट् प्र० पु० द्विवचन में पूर्वोक्त प्रकार से सिद्ध होता है । (३) इसी प्रकार प्र० पु० बहुवचन में—आतुः । (४) आतिथ (यहाँ वलादि आर्धधातुक होने से इट् का आगम । (५) आतिव, आतिम (यहाँ लिट् के उ० पु० द्विवचन, बहुवचन में वलादि होने से इट् का आगम विशेष ।

अत् धातु, लिट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	आत	आततुः	आतुः
म० पु०—	आतिथ	आतथुः	आत
उ० पु०—	आत	आतिव	आतिम

---

[1] यहाँ अन्त्य अकार उदात्त और इत्संज्ञक है । तदनुसार परस्मैपद होता है । यदि अनुदात्त होता तो 'अनुदात्तङित आत्मनेपदम्' से आत्मनेपद हो जाता ।

आतिम । अतिता । अतिष्यति । अततु । (४७७) आडजादीनाम् ६।४।७२ । अजादेरङ्गस्याऽऽड् लुङ्लङ्ल्लृङ्क्षु । आतत् । अतेत् । अत्यात् । अत्यास्ताम् । लुङि सिचि

द्धातोः लिटयनुबन्धलोपे तत्स्थाने तिपि 'परस्मैपदानामि'त्यादिना तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इति लोपे 'अ अत् अ' इति जाते 'अत आदेः' इत्यभ्यासस्य दीर्घे आत इति ।

(४७७) **आडजादीनामिति** । 'लुङ्लङ्ल्लृङ्क्ष्वडुदात्तः' इत्यस्मात् 'लुङ्लङ्ल्लृङ्क्षु' इत्यनुवर्तते । तदाह मूले—**अजादेरित्यादि** । **आतत्** । अत्धातोर्लङ्यनुबन्धलोपे

अतिता—अत्+लुट् (ल्=प्र० पु० एकवचन तिप्)—अत तिप् ('तास्'—'स्यतासी लृलुटोः', आर्धधातुक संज्ञा, इट्, तिप्=डा='आ')—अत् इ तास् आ (टिलोप—'डित्वसामर्थ्यादभस्यापि टेर्लोपः')=अतिता ।

अत् धातु, लुट् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०—	अतिता	अतितारौ	अतितारः
म० पु०—	अतितासि	अतितास्थः	अतितास्थ
उ० पु०—	अतितास्मि	अतितास्वः	अतितास्मः

अतिष्यति—अत्+लृट् (ल्=प्र० पु० एकवचन तिप्=ति)—अत ति ('स्य'—'स्यतासी०', आर्धधातुक संज्ञा, इट्, षत्व)=अतिष्यति ।

अत् धातु लृट् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०—	अतिष्यति	अतिष्यतः	अतिष्यन्ति
म० पु०—	अतिष्यसि	अतिष्यथः	अतिष्यथ
उ० पु०—	अतिष्यामि	अतिष्यावः	अतिष्यामः

अततु—अत्+लोट् (ल्=प्र० पु० एकवचन तिप्=ति)—अत ति (शप्, इ=उ)=अततु ।

अत् धातु, लोट् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०—	अततु, अततात्	अतताम्	अतन्तु
म० पु०—	अत, अततात्	अततम्	अतत
उ० पु०—	अतानि	अताव	अताम

(४७७) पद—आट्, अजादीनाम् । **अनुवृत्ति**—लुङ्लङ्लृङ्क्षु । **विधिसूत्र** ।

मूलार्थ—लुङ्, लङ् और लृङ् के परवर्ती रहने पर अजादि अङ्ग को 'आट्' का आगम होता है । आतत् । अतेत् इत्यादि ।

विमर्श—प्रकृत सूत्र में 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (४५६) से 'लुङ्लङ्लृङ्क्षु' की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । तदनुसार—"अजादि अङ्ग को 'आट्' का आगम होता है; लुङ्, लङ् और लृङ् के परे होने पर" । यह सूत्र अट् आगम का बाधक है ।

उदाहरण—(१) अत्+लङ् (ल्=प्र० पु० एकवचन—तिप्=ति)—अत ति (शप्—'अ', 'आट्'='आ' का आगम—'आडजादीनाम्' आ+अ='आ'—वृद्धि—'आटश्च')—आतति ('इ' का लोप—'इतश्च')=आतत् ।

इडागमे कृते (४७८) अस्तिसिचोऽपृक्ते ७।३।९६ । विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः । (४७९) इट ईटि ८।२।२८ । इटः परस्य सस्य लोपः स्या-

---

तत्स्थाने तिपि सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति प्राप्तमटं प्रबाध्य 'आडजादीनाम्' इत्याडागमे, 'आटश्चे'ति वृद्धौ 'इतश्च' इतीकारलोपे 'आतत्' इति सिद्धम् ।

(४७८) **अस्तिसिचोऽपृक्ते ।** सिच्च अस् चेति समाहारद्वन्द्वः, ततो विद्यमानार्थकास्तीत्यव्ययेन कर्मधारयः, अस्ति चासौ सिचः अस्तिसिचस्, ततः पञ्चम्याः सौत्रो लुक् । तथैवाह वृत्तौ—**विद्यमानात्सिच इत्यादि ।**

अत् धातु लङ् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०	—आतत्	आतताम्	आतन्
म० पु०	—आतः	आततम्	आतत
उ० पु०	—आतम्	आताव	आताम

(२) अत्+लिङ् (ल्=तिप्=ति)—अत् ति (शप्-अ, यासुट्=यास्)—अत् अ यास् ति (यास्=इय्, अ+इ='ए'—गुण, 'य्' का लोप—'लोपो व्योर्वलि' 'इ' का लोप—'इतश्च')=अतेत् । (३) अत्+आशीर्लिङ् (ल्=प्र० पु० एकवचन तिप्=ति)—अत् ति ('लिङाशिषि' से आर्धधातुक संज्ञा होकर शप् का अभाव, यासुट्=यास्, इ का लोप सुट्='स्' का आगम—'सुट् तिथोः')—अत्यास् स् त् (स्+स् का लोप—'स्कोः०')=अत्यात् । (४) अत्+आशीर्लिङ् (ल्=प्र० पु० द्विवचन तस्=ताम्)—अत् ताम् (यासुट्=यास्)=अत्यास्ताम् ।

अत् धातु, लिङ् लकार के रूप

विधिलिङ्

	एक०	**द्वि०**	**बहु०**
प्र० पु०	—अतेत्	अतेताम्	अतेयुः
म० पु०	—अतेः	अतेतम्	अतेत
उ० पु०	—अतेयम्	अतेव	अतेम

आशीर्लिङ्

	एक०	**द्वि०**	**बहु०**
प्र० पु०	—अत्यात्	अत्यास्ताम्	अत्यासुः
म० पु०	—अत्याः	अत्यास्तम्	अत्यास्त
उ० पु०	—अत्यासम्	अत्यास्व	अत्यास्म

(४७८) पद—अस्तिसिचः, अपृक्ते । **अनुवृत्ति**—ईट् । **विधिसूत्र ।**

मूलार्थ—विद्यमान सिच् और अस् से परे अपृक्त हल् को ईट् का आगम होता है ।

विमर्श—'भ्रुव ईट्' (७।३।९३) से 'ईट्' की अनुवृत्ति आ रही है। 'सिच्च अस् च' समाहारद्वन्द्व है । अस्ति शब्द के साथ सिचस् का कर्मधारय समास है । इस प्रकार विद्यमान सिच् एवं अस् धातु से उत्तर में स्थित अपृक्तसंज्ञक हल् को ईट् (ई) का आगम होता है ।

(४७९) पद—इटः, ईटि । **अनुवृत्ति**—सस्य, लोपः । **विधिसूत्र ।**

दीटि । * सिज्लोप एकादेशे सिद्धो वाच्यः * । आतीत् । आतिष्टाम् । (४८०) सिजभ्यस्तविदिभ्यश्च ३।४।१०९ । सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्सम्बन्धिनो झेर्जुस् । आतिषुः । आतीः । आतिष्टम् । आतिष्ट । आतिषम् । आतिष्व । आतिष्म । आतिष्यत् । एवम्–अव रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छा-

---

(४७९) **इट ईटि** । 'इटः' इत्यत्र पञ्चमी । 'रात्सस्ये'त्यतः सस्येति, 'संयोगान्तस्ये'त्यतो लोप इति चात्रानुवर्तते । तदाह—**इटः परस्येति** । **आतीत्** । अत् धातोर्लुङ्यनुबन्धलोपे तत्स्थाने तिपि, 'च्लि लुङि' इति च्लौ, 'च्लेः सिच्' इति सिच्यनुबन्धलोपे 'अत् स् ति' इति जाते 'आडजादीनाम्' इत्याटि 'आटश्चे'ति वृद्धौ सिचः सकारस्यार्धधातुकत्वे 'आर्धधातुकस्येड् वलादेः' इतीडागमे 'आत् इ स् ति' इति स्थिते 'इतश्च' इतीकारलोपे 'त्' इत्यस्याऽपृक्तसंज्ञायाम् 'अस्तिसिचोऽपृक्ते' इतीडागमे 'आत् इ स् ई त्' इति जाते 'इट ईटि' इति सलोपे, सलोपस्य त्रैपादिकत्वात् 'पूर्वत्राऽसिद्धमि'त्यसिद्धत्वेन दीर्घत्वाऽभावे प्राप्ते 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति वार्तिकेन सिज्लोपस्यासिद्धत्वाभावेन सवर्णदीर्घे 'आतीत्' इति रूपम् ।

(४८०) **सिजभ्यस्त इति** । झेर्जुसिति सूत्रमनुवर्तते । 'नित्यं ङितः' इत्यतः 'ङितः' इति चानुवर्तते । तदाह वृत्तौ—**सिचोऽभ्यस्तादित्यादि** । **आतिषुः** । अत् धातोः

मूलार्थ—इट् से परवर्ती सकार का लोप होता है, ईट् परे रहते ।

वा०—एकादेश करने में सिच् का लोप सिद्ध होता है । आतीत् । आतिष्टाम् ।

विमर्श—यहाँ 'रात्सस्य' (८।२।२४) से 'सस्य' एवं 'संयोगान्तस्य लोपः' (८।२।२३) से 'लोपः' पद की अनुवृत्ति आती है । तदनुसार—'इट् से परे सिच् के सकार का लोप होता है; ईट् के परवर्ती रहने पर ।

उदाहरण—(१) अत्+लुङ् (ल्=प्र० पु० एकवचन तिप्=ति)—अत् ति (च्लि, च्लि=सिच्=स्)—अत् स् ति (आट्='आ' का आगम—'आडजादीनाम्', आ+अ='आ' वृद्धि—'आटश्च')—आत् स् ति (आर्धधातुक संज्ञा होकर इट्='इ' का आगम, 'इ' का लोप)—आत् इ स् त् (अपृक्त संज्ञा, ईट्='ई' का आगम—'अस्तिसिचोऽपृक्ते' 'स्' का लोप—'इट ईटि' सलोप-विधायक सूत्र के त्रिपादी होने से 'पूर्वत्राऽसिद्धम्' से असिद्ध होने पर दीर्घाभाव प्राप्त हुआ, 'सिज्लोप एकादेशे सिद्धो वाच्यः' वार्तिक से सिच् लोप के सिद्ध होने पर इ+ई='ई'-सवर्णदीर्घ) =आतीत् । (२) अत्+लुङ् (ल्=प्र० पु० द्विवचन तस्=ताम्)—अत् ताम् (आट्, वृद्धि, च्लि=सिच्=स्, इट्, स्=ष्—'षत्व' 'त्'='ट्'—ष्टुत्व)=आतिष्टाम् ।

(४८०) पद—सिजभ्यस्तविदिभ्यः, च । **अनुवृत्ति**—झेर्जुस्, ङितः । **विधिसूत्र** ।

मूलार्थ—सिच्, अभ्यस्तसंज्ञक और विद् से परे ङित् सम्बन्धी 'झि' के स्थान में 'जुस्' आदेश होता है । आतिषुः । आतीः । आतिष्टम् इत्यादि ।

विमर्श—'झेर्जुस्' (३।४।१०८) सूत्र तथा 'नित्यं ङितः' (३।४।९९) से 'ङितः' पद की अनुवृत्ति आती है । तदनुसार—"सिच्प्रत्यय, अभ्यस्तसंज्ञक जागृ इत्यादि धातुओं और विद् धातु से परवर्ती ङित् लकार सम्बन्धी 'झि' को जुस् आदेश होता है" ।

उदाहरण—(१) अत्+लुङ् (ल्=प्र० पु० बहुवचन झि)—अत् झि (च्लि=सिच्=स्, आट्, वृद्धि, झि=जुस्='उस्'—'सिजभ्यस्तविदिभ्यश्च' इट्–'इ')—आतिस् उस् (स्=ष्, स्=र्= :)=आतिषुः । 'आतीः' आदि अन्य रूप भी इसी प्रकार सिद्ध होते हैं ।

दीप्त्यालिङ्गन-हिंसा-दान-भागवृद्धिषु । अवतीत्यादि । षिध गत्याम् । (४८१) **पुगन्तलघूपधस्य च ७।३।८६।** पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः, सार्वधातुकार्धधातुकयोः । 'धात्वादे'रिति सः । सेधति । षत्वम् । सिषेध ।

सेक्सृप्सृस्तृसृजस्तृस्त्यान्ये दन्त्याजन्तसादयः ।
एकाचः षोपदेशाः स्युः ष्वष्क्स्विद्स्वद्स्वञ्जस्वप्स्मिङः ॥

लुङ्यनुबन्धलोपे तत्स्थाने प्रथमपुरुषबहुवचनविवक्षायां झिप्रत्यये सार्वधातुकसंज्ञायां शपं प्रबाध्य च्लौ, तस्य सिच्यनुबन्धलोपे इडागमे षत्वे 'आडजादीनाम्' इत्यादि वृद्धौ 'सिजभ्यस्तविदिभ्यश्चे'ति झेर्जुसादेशेऽनुबन्धलोपे सस्य रुत्वे विसर्गे च कृते 'आतिषुः' इति ।

(४८१) **पुगन्तलघूपधस्येति** । 'मिदेर्गुणः' इत्यतो गुण इत्यनुवर्तते । अङ्गस्येत्यधिकृतमवयवषष्ठ्यन्तमाश्रीयते । पुक् अन्ते यस्य तत्पुगन्तम्, लघ्वी उपधा यस्य तल्लघूपधम्, पुगन्तञ्च लघूपधञ्चेत्यनयोः समाहारः पुगन्तलघूपधम्, तस्येति । **सेधति** । गत्यर्थक–षिध्धातोर्लटि तत्स्थाने प्रथमपुरुषैकवचनविवक्षायां तिपि, सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे शित्त्वात्सार्वधातुकसंज्ञायां 'धात्वादेः षः सः' इत्यनेन षकारस्य

अत् धातु, लुङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	आतीत्	आतिष्टाम्	आतिषुः
म० पु०	आतीः	आतिष्टम्	आतिष्ट
उ० पु०	आतिषम्	आतिष्व	आतिष्म

अत् धातु, लृङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	आतिष्यत्	आतिष्यताम्	आतिष्यन्
म० पु०	आतिष्यः	आतिष्यतम्	आतिष्यत
उ० पु०	आतिष्यम्	आतिष्याव	आतिष्याम

'अव' धातु रक्षण, गति, कान्ति, प्रीति, तृप्ति, ज्ञान, प्रवेश, श्रवण, स्वाम्यर्थ, याचन, क्रिया, इच्छा, दीप्ति, प्राप्ति, आलिङ्गन, हिंसा, दान, भाग और वृद्धि अर्थों में है । 'अवति' इत्यादि रूप बनते हैं । 'षिध्' धातु का अर्थ गति (=जाना) है ।

(४८१) पद—पुगन्तलघूपधस्य, च । **अनुवृत्ति**—गुणः । **विधिसूत्र** ।

मूलार्थ—पुगन्त और लघूपध अङ्ग के अवयव इक् को सार्वधातुक-आर्धधातुक प्रत्यय के परे रहने पर गुण होता है। सेधति इत्यादि ।

विमर्श—'मिदेर्गुणः' (७।३।८२) से 'गुणः' की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । 'इको गुणवृद्धी' परिभाषा द्वारा 'इक्' पद की उपस्थिति होती है । तदनुसार पूर्वोक्त अर्थ निष्पन्न होता है ।

उदाहरण—(१) षिध्+लट् (ल्=तिप्=ति)—षिध् ति (शप्–अ, 'ष्'='स्'—'धात्वादेः षः सः' इ='ए'—गुण—'पुगन्तलघूपधस्य च')=सेधति । (२) षिध्+लिट् (ल्=तिप्, ष=सत्व, 'लिट् च' से आर्धधातुक संज्ञा, शप् का अभाव, तिप्=णल्='अ')—सिध् अ (द्वित्व, अभ्यास संज्ञा, हलादि शेष, गुण—'पुगन्त०' स्=षत्व—'आदेशप्रत्यययोः')=सिषेध ।

दन्त्यः केवलदन्त्यो, न तु दन्त्योष्ठजोऽपि, ष्वष्कादीनां पृथग् ग्रहणात् । (४८२) **असंयोगाल्लिट् कित् १।२।५ ।** असंयोगात्परोऽपि लिट् कित्स्यात् । सिषिधतुः । सिषिधुः । सिषेधिथ । सिषिधथुः । सिषिध । सिषेध । सिषिधिव । सिषिधिम । सेधिता । सेधिष्यति । सेधतु । असेधत् । सेधेत् । सिध्यात् । असेधीत् । असेधिष्यत् ।

सत्वे 'पुगन्तलघूपधस्य च' इति लघूपधायाः गुणे 'सेधति' इति सिद्धम् । **सिषेध इति ।** 'षिध्'धातोः 'परोक्षे लिट्' इति लिटचनुबन्धलोपे तत्स्थाने तिपि, षस्य सत्वे, 'लिट् चे'त्यनेनार्धधातुकसंज्ञायां शपोऽभावे 'परस्मैपदानामि'त्यादिना सूत्रेण तिपः णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन धकारस्य लोपे 'पुगन्तलघूपधस्य चे'त्यनेन गुणे 'आदेशप्रत्यययोः' इति षत्वे कृते सिषेध इति ।

(४८२) **असंयोगाल्लिट् कित् ।** 'सार्वधातुकमपित्' इत्यतः 'अपिदि'त्यनुवर्तते । तदाह—**असंयोगादित्यादिना । सिषिधतुः ।** षिध्धातोर्लिट्यनुबन्धलोपे तत्स्थाने प्रथमपुरुषद्विवचनविवक्षायां तस्प्रत्यये 'धात्वादेः षः सः' इति सत्वे, 'परस्मैपदानामि'-त्यादिना सूत्रेण तसः स्थाने अतुसादेशे 'लिट् चे'त्यार्धधातुकसंज्ञायां शपोऽभावे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'असंयोगाल्लिट् कित्' इत्यनेनातुसः कित्त्वे 'पुगन्तलघूपधस्य चे'त्यनेन गुणे प्राप्ते 'क्ङिति चे'ति निषेधे, षत्वे रुत्वे विसर्गे च कृते 'सिषिधतुः' इति सिद्धम् ।

सेक्सृप् इति । कारिकार्थ—सेक्, सृप्, सृ, स्तृ, सृज्, स्तॄ, स्त्यै—इनसे भिन्न जो दन्त्यान्त अथवा अजन्त सकारादि एकाच् धातु, वह षोपदेश है; तथा ष्वष्क्, स्विद्, स्वद्, स्वञ्ज्, स्वप्—ये भी षोपदेश हैं।

(४८२) पद—असंयोगात, लिट्, कित । **अनुवृत्ति—**अपित । **विधिसूत्र।**

मूलार्थ—असंयोग से परे अपित (पित भिन्न) लिट् कित होता है। सिषिधतुः । सिषिधुः इत्यादि ।

विमर्श—यहाँ 'सार्वधातुकमपित' (१।२।४) सूत्र से 'अपित्' पद की अनुवृत्ति आती है। तदनुसार—'संयोग भिन्न से परवर्ती अपित् लिट् कित होता है'।

उदाहरण—षिध्+लिट् (ल्=प्र० पु० द्विवचन तस्)—षिध् तस् (ष्=स्, तस्=अतुस्) —सिध् अतुस् (द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'असंयोगाल्लिट् कित' से अतुस् को कित्त्व होने पर 'इ'='ए'—गुण की प्राप्ति, कित होने से 'क्ङिति च' से गुण-निषेध, षत्व, स्=र्=ः)= सिषिधतुः । इसी प्रकार अन्य रूप सिद्ध होंगे—

लिट् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०-	सिषेध	सिषिधतुः	सिषिधुः
म० पु०-	सिषेधिथ	सिषिधथुः	सिषिध
उ० पु०-	सिषेध	सिषिधिव	सिषिधिम

लुट् में—सेधिता, लृट् में—सेधिष्यति, लोट् में—सेधतु, लङ् में—असेधत, विधिलिङ् में—सेधेत, आशीर्लिङ् में—सिध्यात, लुङ् में—असेधीत एवं लृङ् में—असेधिष्यत ।

(४८३) सात्पदाद्योः ८।३।१११ । सातेः पदादेश्च सस्य षो न । इति निषेधे प्राप्ते । (४८४) उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ८।३।६५ । उपसर्गस्थान्निमित्तादेषां सस्य षः । (४८५) सदिरप्रतेः ८।३।३६ । प्रतिभिन्नादुपसर्गात्सदेः सस्य षः । (४८६) स्तन्भेः ८।३।६७ । स्तन्भेः

असेधीत् । षिध्धातोर्लुङि, तत्स्थाने तिपि, षस्य सत्वे सार्वधातुकसंज्ञायां प्राप्तं शपं प्रबाध्य च्लौ, च्लेः सिचि, इचोरित्संज्ञायां लोपे च कृते 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमेऽनुबन्धलोपे सकारस्यार्धधातुकसंज्ञायाम् इडागमेऽनुबन्धलोपे 'इतश्च' इतीकारलोपे अपृक्तसंज्ञायाम् 'अस्तिसिचोऽपृक्ते' इति ईटि 'इट ईटि' इति सलोपे, तस्य 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति वार्तिकेन सिद्धत्वेन सवर्णदीर्घे 'असेधीत्' इति रूपम् ।

(४८३) **सात्पदाद्योरिति** । षश्च नेत्यनुवर्तते । तेन सातेः सस्य पदादेः सस्य च प्राप्तं षत्वं न भवति ।

(४८४) **उपसर्गादिति** । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते । 'अपदान्तस्य मूर्धन्यः' इत्यधिकारात् सस्य षः स्यादित्यर्थो लभ्यते ।

(४८५) **सदिरप्रतेरिति** । अत्र 'निषीदति' इत्युदाहरणम् । सदिरिति षष्ठ्यर्थे प्रथमा ।

(४८६) **स्तन्भेरिति** । 'स्तन्भुस्तुन्भु' इति सूत्रनिर्दिष्टस्य नोपधस्येत्यर्थः । अत आह—**सौत्रस्येति** ।

---

(४८३) पद—सात्पदाद्योः । **अनुवृत्ति**—षः, न । **विधिसूत्र (निषेध)** ।

मूलार्थ—'साति' प्रत्यय के सकार और पदादि के सकार को षत्व नहीं होता ।

विमर्श—यहाँ 'अपदान्तस्य मूर्द्धन्यः' (८।३।५५) से 'मूर्धन्यः' तथा 'न रपर०' (८।३।११०) से 'न' पद की अनुवृत्ति आती है । तदनुसार—'साति प्रत्यय के सकार को तथा पदादि सकार को षकार नहीं होता' ।

(४८४) पद—उपसर्गात्, सुनोति-सुवति-स्यति-स्तौति-स्तोभति-स्था-से-नय-सेध-सिच्-सञ्ज-स्वञ्जाम् । **अनुवृत्ति**—सः । **विधिसूत्र** ।

मूलार्थ—उपसर्गस्थ निमित्त से परवर्ती सुनोतीत्यादि धातुओं के सकार को षकार (षत्व) होता है ।

विमर्श—'सहेः साडः सः' (८।३।५६) से षष्ठ्यन्त 'सः' पद की अनुवृत्ति आती है । 'अपदान्तस्य मूर्द्धन्यः' का अधिकार होने से—'उपसर्गस्थ निमित्त से पर में स्थित सु, सू, सो, स्तु, स्तुभ्, स्था, सेनय्, सेध्, सिच्, सञ्ज् और स्वञ्ज धातुओं के सकार को षकार आदेश होता है ।'

(४८५) पद—सदिः, अप्रतेः । **विधिसूत्र** ।

मूलार्थ—प्रति-भिन्न उपसर्ग से परे सद् धातु के सकार को षकार आदेश होता है ।

विमर्श—'अपदान्तस्य मूर्धन्यः' का अधिकार है । यहाँ भी 'उपसर्गस्थान्निमित्तात्' का अन्वय होता है । अतः प्रति से भिन्न उपसर्ग से परवर्ती 'सद्' के सकार को षत्व होता है ।

(४८६) पद—स्तन्भेः । **विधिसूत्र** ।

सौत्रस्य सस्य षः । (४८७) अवाच्चालम्बनाविदूर्ययोः ८।३।६८ । अवात्स्तम्भेरेतयोरर्थयोः सस्य षः । (४८८) वेश्च स्वनो भोजने ८।३।६९ । व्यवाभ्यां स्वनतेः सस्य षो, भोजने । (४८९) परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ८।३।७० । परिनिविभ्यः परेषामेषां सस्य षः स्यात् । निषेधति । (४९०) प्राक् सितादड्व्यवायेऽपि ८।३।८३ । 'सित्'-शब्दात्प्राग् य सुनोत्यादयस्तेषामड्व्यवायेऽपि

---

(४८७) **अवाच्चेति** । अवोपसर्गपूर्वकात्स्तन्भेः आलम्बनवैदूर्यार्थे गम्ये सस्य षत्वं भवतीत्यर्थः ।

(४८८) **वेश्चेति** । अवादित्यनुकर्षणार्थश्चकारः ।

(४८९) **परिनिविभ्य इति** । सेवेत्यकार उच्चारणार्थः । 'षेवृ सेवायामि'ति धातोर्ग्रहणम् । सितेत्यनेन 'षिञ् बन्धने' इति क्तान्तस्य ग्रहणम् । **निषेधति** । 'नि' इत्युपसर्गपूर्वकात् षिध्धातोर्लटचनुबन्धलोपे 'धात्वादेः षः सः' इति षस्य सत्वे, लटः स्थाने तिप्यनुबन्धलोपे सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे 'पुगन्तलघूपधस्य चे'त्यनेन गुणे 'निसेधति' इति जाते 'उपसर्गात् सुनोती'त्यादिना षत्वे 'निषेधति' इति ।

(४९०) **प्राक्सितादिति** । 'उपसर्गात्सुनोती'त्यादिसूत्रे स्थाधातुमारभ्य 'परिनिविभ्यः' इत्यत्र सितशब्दात्प्राक् ये धातव उपात्ताः तेषु दशस्वित्यर्थः । **न्यषेधत्**

मूलार्थ—उपसर्गस्थ निमित्त से परे सौत्र स्तम्भ धातु के 'स्' के स्थान पर 'ष्' आदेश होता है।

(४८७) पद—अवात्, च, आलम्बनाविदूर्ययोः । **विधिसूत्र।**

मूलार्थ—आलम्बन (=आश्रय) एवं अविदूर्य्य (=समीप) अर्थ में अव् उपसर्गपूर्वक स्तम्भ धातु के सकार को षकार आदेश होता है।

(४८८) पद—वेः, च, स्वनः, भोजने । **विधिसूत्र।**

मूलार्थ—'वि' एवं 'अव्' उपसर्गपूर्वक 'स्वन्' के सकार को मूर्धन्य (षकार) आदेश होता है, भोजन अर्थ में।

(४८९) पद—परिनिविभ्यः, सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् । **विधिसूत्र।**

मूलार्थ—परि, नि और वि उपसर्गों से परवर्ती सेव सित आदि धातुओं के 'स्' के स्थान में 'ष्' आदेश होता है। निषेधति।

विमर्श—पूर्ववत् 'सहेः साडः सः' (८।३।५६) से षष्ठ्यन्त 'सः' की अनुवृत्ति आ रही है। 'अपदान्तस्य मूर्धन्यः' का अधिकार है। अतः 'परि, नि, वि' इनसे परे सेव; सित, सय, सिवु, सह, सुट्, स्तु, स्वञ्ज् धातुओं के सकार को षकार आदेश होता है।

उदाहरण—नि+सेधति ('स्'='ष्'--'परिनिविभ्यः०')=निषेधति।

(४९०) पद—प्राक्, सितात्, अड्, व्यवाये, अपि । **विधिसूत्र।**

मूलार्थ—सित शब्द से पूर्व सुनोति आदि धातु सम्बन्धी सकार को अट का व्यवधान रहने पर भी षत्व होता है। न्यषेधत्। न्यषेधीत्। न्यषेधिष्यत्।

विमर्श—प्रकृत सूत्र में भी पूर्ववत् षष्ठ्यन्त 'सः' की अनुवृत्ति आती है। 'अपदान्तस्य मूर्धन्यः' का अधिकार है। 'सेवसित०' में सित शब्द से पूर्व जो सुनोति आदि पन्द्रह धातुओं के सकार को अट् के व्यवधान में भी षकार आदेश होता है।

सस्य षः स्यात् । न्यषेधत् । न्यषेधीत् । न्यषेधिष्यत् । (४९१) **स्थादिष्वभ्यासेन चाऽभ्यासस्य ८।३।६४** । प्राक्-सितात्स्थादिष्वभ्यासेन व्यवायेऽपि षत्वं स्यात्, एषामेव चाऽभ्यासस्य न तु सुनोत्यादीनाम् । निषिषेध । निषिषिधतुः । (४९२) **सेधतेर्गतौ ८।३।११३** । गत्यर्थस्य सेधतेः सस्य षो न । गङ्गां विसेधति । एवम्—चिती संज्ञाने ।

इत्यादि । 'नि + असेधत्, नि + असेधीत्, नि + असेधिष्यत्' इत्यत्र अडागमेन व्यवधानात् 'उपसर्गात्सुनोती'त्यादिना षत्वेऽप्राप्ते 'प्राक्सितादड्व्यवायेऽपि' इत्यनेनाऽटा व्यवधानेऽपि षत्वमित्युक्तरूपसिद्धिः ।

(४९१) **स्थादिष्विति** । यद्यपि 'निषिषेध' इत्यत्राभ्यासस्य 'उपसर्गात्सुनोती'त्यादिना षत्वं सिद्धम्, ततः परस्य सस्य 'आदेशप्रत्यययोः' इत्यनेन षत्वं भविष्यतीति नास्य सूत्रस्य प्रयोजनं, तथापि 'अधितिष्ठौ' इत्यादौ अवर्णान्तोऽभ्यासस्तत्र षत्वविधानार्थमिदमावश्यकमिति ।

(४९२) **सेधतेर्गतौ** । 'न रपरे'त्यतो नेत्यनुवर्तते । **गङ्गां विसेधति** । 'वि + सेधति' इत्यवस्थायाम् 'उपसर्गात्सुनोती'त्यादिना षत्वे प्राप्ते 'सेधतेर्गतौ' इत्यनेन निषेधे 'विसेधति' इति सिद्धम् ।

उदाहरण—(१) नि+असेधत् ('स्'='ष्'—'प्राक्सितादड्व्यवायेऽपि', 'इ'='य्'—'यण्')=न्यषेधत् । (२) नि+असेधीत् ('स्'='ष्', यण्)=न्यषेधीत् । (३) नि+असेधिष्यत् ('स्'='ष्' यण्)=न्यषेधिष्यत् ।

(४९१) पद—स्थादिषु, अभ्यासेन, च, अभ्यासस्य । **अनुवृत्ति**—प्राक् सितात्, सः । **विधिसूत्र** ।

मूलार्थ—सित शब्द से पूर्व स्था आदि धातुओं के सकार को अभ्यास के व्यवधान में भी षकार (मूर्धन्य) आदेश होता है । इन धातुओं के ही अभ्यास व्यवधान होने से षत्व होता है, अर्थात् सुनोति (सु) आदि के अभ्यास के व्यवधान में नहीं । निषिषेध । निषिषिधतुः ।

विमर्श—यहाँ पूर्वसूत्र (४९०) से 'प्राक्सितात्' पद की अनुवृत्ति आती है । 'सहेः साडः सः' से षष्ठ्यन्त 'सः' की अनुवृत्ति आती है । 'अपदान्तस्य मूर्धन्यः' का अधिकार होने से उक्त सूत्रार्थ निष्पन्न होता है ।

उदाहरण—(१) लिट्—प्र० पु० ए० व०—नि+सिसेध (पूर्व सकार का 'उपसर्गात्०' से षत्व)—नि षिसेध ('स्'='ष्'—'स्थादिष्वभ्यासेन चाभ्यासस्य')=निषिषेध । (२)लिट्—प्र० पु० द्विवचन—नि+सिसिधतुः (पूर्व सकार का 'ष्'—'उपसर्गात्०')—नि षिसिधतुः ('स्'='ष्' 'स्थादिष्व०')=निषिषिधतुः ।

(४९२) पद—सेधतेः, गतौ । **अनुवृत्ति**—सः, न । **विधिसूत्र** (निषेध) ।

मूलार्थ—गत्यर्थक सिध धातु के 'स्' के स्थान में 'ष्' नहीं होता । गङ्गां विसेधति ।

विमर्श—पूर्ववत् षष्ठ्यन्त 'सः' तथा 'न रपर०' (८।३।११०) सूत्र से 'न' पद की अनुवृत्ति आती है । 'अपदान्तस्य मूर्धन्यः' का अधिकार होने से 'गति अर्थ युक्त सिध धातु के सकार को षकार आदेश नहीं होता ।

उदाहरण—गङ्गां विसेधति (=गच्छति)—'वि+सेधति' ('स्'='ष्'—'उपसर्गात्सुनोति०' से प्राप्ति 'सेधतेर्गतौ' से निषेध होने पर)=विसेधति । इसी प्रकार 'चिती संज्ञाने' (=होश में आना), 'शुच शोके' (=चिन्ता या शोक करना) धातुओं के रूप भी बनते हैं । गद् धातु 'स्पष्ट

शुच शोके । गद व्यक्तायां वाचि । गदति । (४९३) नेर्गद-नद-पत-पद-घु-मा-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-देग्धिषु च ८।४।१७ । उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्यात् गदादिषु परेषु । प्रणिगदति । (४९४) कुहोश्चुः ७।४।६२ । अभ्यासकवर्गहकारयोश्चवर्गादेशः । (४९५) अत उपधायाः ७।२।११६ । उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये । जगाद । जगदतुः । जगदुः ।

---

(४९३) **नेर्गद इति** । अत्र 'रषाभ्यां नो णः' इति, 'उपसर्गादसमासेऽपि' इत्यत उपसर्गादिति चानुवर्तते । तदाह—**उपसर्गस्थादित्यादि** । **प्रणिगदति** । 'प्र + नि' इत्युपसर्गपूर्वकात् गद्धातोर्लटचनुबन्धलोपे तत्स्थाने तिपि, सार्वधातुकत्वे शप्यनुबन्धलोपे 'नेर्गदनद०' इति णत्वे 'प्रणिगदति' इति रूपम् ।

(४९४) **कुहोश्चुरिति** । कुश्च हुश्च कुहू, तयोः कुहोः । 'अत्र लोपोऽभ्यासस्ये'-त्यत अभ्यासस्येत्यनुवर्तते । तदाह—**अभ्यासस्येति** ।

(४९५) **अत इति** । अत्र 'मृजेर्वृद्धिः' इत्यतः 'वृद्धिरि'त्यनुवर्तते, 'अचो ञ्णिति' इत्यतः ञिति णिति चेति । तदाह—**उपधाया इत्यादि** । **जगाद** । गद्धातोर्लिटचनुबन्धलोपे, तत्स्थाने प्रथमपुरुषैकवचने तिपि, 'परस्मैपदानामि'ति तिपो णलि, अनुबन्ध-

---

बोलना' अर्थ में है। √गद्+लट् (ल्=प्र० पु० एकवचन तिप्=ति)—गद् ति (शप्–अ) =गदति ।

(४९३) पद—नेः, गद-नद-पत-पद-घु-मा-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-देग्धिषु, च । **अनुवृत्ति**—रषाभ्यां नो णः, उपसर्गात् । **विधिसूत्र** ।

मूलार्थ—उपसर्गस्थ निमित्त से परवर्ती 'नि' के नकार को णकार आदेश होता है; गदादि धातुओं के परे रहते । प्रणिगदति ।

विमर्श—प्रकृत सूत्र में 'रषाभ्यां नो णः समानपदे' (८।४।१) से 'रषाभ्यां नो णः' की तथा 'उपसर्गादसमासेऽपि०' (८।४।१४) से 'उपसर्गात्' पद की अनुवृत्ति आ रही है। तदनुसार—"उपसर्गस्थ निमित्त (र्, ष्) से परे 'नि' उपसर्ग के नकार को णकार आदेश होता है; 'गद्, नद्' आदि धातुओं में से कोई धातु परे रहने पर ।"

उदाहरण—प्र+नि+गदति ('न्'='ण्'—'नेर्गदनद०')=प्रणिगदति ।

(४९४) पद—कुहोः, चुः । **अनुवृत्ति**—अभ्यासस्य । **विधिसूत्र** ।

मूलार्थ—अभ्यास के कवर्ग और हकार को चवर्ग आदेश होता है ।

विमर्श—यहाँ 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' पद की अनुवृत्ति आती है। (कुश्च हुश्च कुहू, तयोः=कवर्गहकारयोः) अभ्याससंज्ञक कवर्ग (क्, ख्, ग्, घ्, ङ्) के स्थान में क्रमशः चवर्ग (च्, छ्, ज्, झ्, ञ्) तथा 'ह्' के स्थान में आन्तरतम्य (बाह्य प्रयत्न देखकर) से 'झ्' होता है ।

(४९५) पद—अतः, उपधायाः । **अनुवृत्ति**—वृद्धिः, ञिति, णिति । **विधिसूत्र** ।

मूलार्थ—ञित, णित् प्रत्यय के परवर्ती रहने पर उपधा के अकार को वृद्धि होती है। जगाद । जगदतुः । जगदुः । इत्यादि ।

विमर्श—प्रकृत सूत्र में 'मृजेर्वृद्धिः' (७।२।११४) से 'वृद्धिः' और 'अचो ञ्णिति' (७।२।११५) से 'ञ्णिति' पदों की अनुवृत्ति आती है। तदनुसार—'ञकारेत्संज्ञक और णकारेत्संज्ञक प्रत्ययों के परे रहने पर उपधा अकार को वृद्धि होती है' ।

जगदिथ । जगदथुः । जगद । (४९६) णलुत्तमो वा ७।१।९१ । उत्तमो णल् वा णित् स्यात् । जगाद । जगद । गदिता । गदिष्यति । गदतु । अगदत् । गदेत् । गद्यात् । (४९७) अतो हलादेर्लघोः ७।२।७ । हलादेर्लघोरतो वृद्धिर्वेडादौ सिचि परस्मैपदे ।

मूलार्थ—उपदेशावस्था में अकारवान् तथा 'तासि' प्रत्यय के परे रहते नित्य अनिट् जो धातु, उससे परवर्ती 'थल्' को 'इट्' का आगम नहीं होता।

विमर्श—'अचः' को छोड़कर पूर्वसूत्र (५२४) तथा उक्त सूत्र में जिन पदों की अनुवृत्ति आती है, वह प्रकृत सूत्र में भी आ रही है। तदनुसार—"उपदेश अवस्था में अकार से युक्त धातु से परे तथा तास् प्रत्यय के परे रहते नित्य अनिट् धातु से परे थल् को 'इट्' का आगम नहीं होता।"

(५२६) पद—ऋतः, भारद्वाजस्य। **अनुवृत्ति**—तासि, नित्यम्, अनिटः, थलि, इट् , न। **नियमसूत्र।**

मूलार्थ—'तासि' प्रत्यय के परे नित्य अनिट् जो ऋकारान्त धातु, उससे परवर्ती थल् को भारद्वाज के मत से 'इट्' का आगम नहीं होता। अन्य आचार्यों के मत से इट् होता है।

विमर्श—प्रकृत सूत्र में भी पूर्ववत् 'तासि, नित्यम्, अनिटः, थलि, इट् न' पदों की अनुवृत्ति आती है। तदनुसार—"तास् प्रत्यय में नित्य अनिट् ऋदन्त धातु से परवर्ती थल् को भारद्वाज के मत से इट् नहीं होता। अतः ऋदन्त भिन्न धातु से परवर्ती थल् को इट् का आगम होता ही है"।

आचार्य पाणिनि ने 'अचस्तास्वत्थल्यनिटो नित्यम्' सूत्र से सभी अजन्तों को 'थल्' में 'इट्' का निषेध किया है। किन्तु भारद्वाज ऋषि केवल ऋदन्त को ही 'थल्' में इट् का निषेध स्वीकार करते हैं। अतः विकल्प से प्रयोग सिद्ध हुआ। प्रकृत सूत्र के विषय को भारद्वाज-नियम भी कहा जाता है। उक्त चारों सूत्रों से प्रतिपादित विषय का इस कारिका में संग्रह किया गया है।

अजन्त इत्यादि—(१) अजन्त (या, पा, वा आदि) अथवा अकारवान् (पच् आदि) धातु तथा 'तासि' प्रत्यय के परे नित्य अनिट् जो धातु, उसको थल् में विकल्प से इट् होता है। (२) तथा 'तासि' प्रत्यय के परे नित्य अनिट् ऋदन्त धातु को थल् में नित्य अनिट् ('इट्' का नित्य निषेध) होता है और (३) कृ-सृ-भृ आदि आठ धातुओं को छोड़कर सभी अनिट् धातुओं को लिट् में 'इट्' (सेट्) ही होता है।

प्रकृत 'श्रि' धातु अनिट् और अजन्त है। अतः इससे परवर्ती थल् को भारद्वाज-नियम से विकल्प से 'इट्' होता है। व तथा म को क्रादि नियम से नित्य इट् होता है।

चिक्षयिथ । चिक्षेथ । चिक्षियथुः । चिक्षिथ । चिक्षाय–चिक्षय । चिक्षियिव । चिक्षियिम । क्षेता । क्षेष्यति । क्षयतु । अक्षयत् । **(५२७) अकृत्सार्वधातुकयोर्दीर्घः ७।४।२५ ।** अजन्ताङ्गस्य दीर्घः स्याद् यादौ प्रत्यये, न तु कृत्सार्वधातुकयोः । क्षीयात् । **(५२८) सिचि वृद्धिः परस्मैपदेषु ७।२।१ ।** इगन्ताङ्गस्य वृद्धिः परस्मैपदे सिचि । अक्षैषीत् । अक्षेष्यत् । तप सन्तापे । तपति । तताप । तेपतुः । तेपुः । तेपिथ । ततप्थ ।

नित्यमिट् प्राप्तः, स च अचस्तास्वदित्यादिना पाणिनिमतेन थलि निषिध्यते । परं 'ऋतो भारद्वाजस्ये'ति नियमाद् विधीयते । एवं ह्रस्वाकारवान् तासि नित्यानिट् यो धातुस्तस्मादपि थलि भारद्वाजस्य मतेन विकल्पेनेड् विधीयते । क्रमेणोदाहरणम्—चिक्षयिथ, चिक्षेथ इति । किञ्च ईदृक् तासो नित्यानिट् ऋदन्तो धातुस्थलि नित्यमनिड् भवति, प्राप्तस्येटः थलि अजन्तत्वात् 'अचस्तास्वदि'ति पाणिनिमतेन 'ऋतो भारद्वाजस्ये'ति भारद्वाजमतेनापीड् निषेधात् । यथा—जहर्थ इत्यादौ । यस्तु न स्यादजन्तो नाप्यकारवान् स च तासौ नित्यानिडपि लिटि सर्वं सेट् एव क्रादिनियमात् ।

(५२७) **अकृदिति ।** अङ्गस्येत्यधिकृतम् । 'अयङ् यी'त्यतः यीति सप्तम्यन्तमनुवर्तते । दीर्घश्रुत्या च 'अचः' इत्युपस्थितं भवति, अङ्गविशेषणत्वात् तदन्तविधिस्तदाह—**अजन्ताङ्गस्येति ।**

(५२८) **सिचि वृद्धि इति ।** अङ्गस्येत्यधिकृतम् । वृद्धिश्रुत्या इक इत्युपस्ति-

---

उदाहरण—(१) √क्षि+लिट् (ल्=सिप्=थल्='थ')—क्षि थ (द्वित्व, अभ्यास संज्ञा, हलादिशेष, क्=च्)—चि क्षि थ (थल् को विकल्प से इट्=इ—'ऋतो भारद्वाजस्य' इ=ए—'गुण', ए='अय्')=चिक्षयिथ । इट् के अभावपक्ष में गुण होकर—चिक्षेथ । (२) √क्षि+लिट् (=थस्=अथुस्, द्वित्वादि कार्य पूर्ववत्, 'अथुस्' अपित् लिट् होने से कित् है । अतः गुण-निषेध, इ=इयङ्)—चिक्षियथुस् (स्=र्= :)=चिक्षियथुः । इसी प्रकार—अ, व और म में भी गुण नहीं होता, अपितु इयङ् होता है । उ० पु० एकवचन में 'णलुत्तमो वा' से विकल्प से णित् होने से वृद्धि, पक्ष में गुण । क्रमशः **उदाहरण**—चिक्षिय । उ० पु०—चिक्षाय–चिक्षय । चिक्षयिव । चिक्षयिम ।

√क्षि+लुट् (=तिप्, तास्, प्राप्त इट् का निषेध—'एकाच उपदेशे०' गुण, तिप्=डा=आ)—क्षेतास् आ (टिलोप)=क्षेता । लृट्—क्षेष्यति । लोट्—क्षयतु । लङ्—अक्षयत् ।

(५२७) पद—अकृत्, सार्वधातुकयोः, दीर्घः । **विधिसूत्र ।**

मूलार्थ—यकारादि प्रत्यय के परवर्ती रहने पर अजन्त अङ्ग को दीर्घ होता है, परन्तु यकारादि कृत् और सार्वधातुक के परवर्ती रहने पर दीर्घ नहीं होता । क्षीयात् ।

विमर्श—'अङ्गस्य' का अधिकार है । 'अयङ् यि०' (७।४।२२) सूत्र से सप्तम्यन्त 'यि' पद की अनुवृत्ति आती है । दीर्घ श्रुति से 'अचः' पद की उपस्थिति होने पर तदन्त विधि होती है । तदनुसार—उक्त सूत्रार्थ निष्पन्न होता है ।

उदाहरण—√क्षि+आशीर्लिङ् (ल्=तिप्=ति, यासुट्=यास्, आर्धधातुक संज्ञा—'लिङाशिषि')—क्षि यास् ति (दीर्घ—'अकृत्सार्वधातुकयोः', इ लोप, स् लोप)=क्षीयात् ।

(५२८) पद—सिचि, वृद्धिः, परस्मैपदेषु । **विधिसूत्र ।**

मूलार्थ—परस्मैपदपरक 'सिच' के परे रहने पर इगन्त अङ्ग को वृद्धि होती है । अक्षैषीत् । अक्षेष्यत् ।

तप्ता । तप्स्यति । तपतु । अतपत् । तपेत् । तप्यात् । अताप्सीत् । अताप्ताम् । अतप्स्यत् । (५२९) **निसस्तपतावनासेवने ८।३।१०२ ।** षः स्यात् । आसेवनं पौनःपुन्यं, ततोऽन्यस्मिन्विषये । निष्टपति । क्रमु पादविक्षेपे । (५३०) **वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ३।१।७० ।** एभ्यः श्यन्वा, कर्तरि सार्वधातुके । पक्षे शप् ।

मङ्गस्येत्यस्य विशेषणम्, तदन्तविधिस्तदाह—**इगन्ताङ्गस्येत्यादिना । अक्षैषीत् ।** क्षिधातोर्लुङि तत्स्थाने तिपि, अडागमेऽनुबन्धलोपे च्लौ, च्लेः सिच्यनुबन्धलोपे इडभावे तिप इकारलोपे 'अस्तिसिचोऽपृक्ते' इतीडागमेऽनुबन्धलोपे—'अ क्षि स् ई त्' इति जाते 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ, सस्य षत्वे च कृते 'अक्षैषीदि'ति रूपम् ।

तेपतुः । तप्धातोर्तसि, तत्स्थानेऽतुसि द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'ततप् अतुस्' इति जाते, 'असंयोगाल्लिट् कित्' इति लिटः कित्त्वे 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्येत्वेऽभ्यासलोपे च कृते 'तेपतुः' इति रूपम् ।

(५२९) **निसस्तपताविति ।** 'अपदान्तस्य मूर्धन्यः' इत्यधिक्रियते ।

(५३०) अत्र 'दिवादिभ्यः' इत्यस्मात् श्यन्निति, 'कर्तरि शबि'त्यतः 'कर्तरी'ति, 'सार्वधातुके यगि'त्यतः सार्वधातुक इति चानुवर्तते । तदाह—**एभ्य इति ।**

विमर्श—'अङ्गस्य' का अधिकार है । 'वृद्धि' पद से वृद्धि का विधान होने से 'इकः' षष्ठ्यन्त पद की उपस्थिति होती है । 'अङ्गस्य' का विशेषण होने से तदन्त विधि होती है । अतः 'इगन्त अङ्ग को वृद्धि होती है, परस्मैपद सिच् के परे रहने पर' ।

उदाहरण—(१) क्षि+लुङ् (ल्=तिप्=ति, अट्, च्लि=सिच्=स्, इ का लोप)—अ क्षि स त् (ईट्, वृद्धि—'सिचि वृद्धिः' स्=षत्व)=अक्षैषीत् । (२) क्षि+लृङ् (ल्=तिप्=ति, अट्, स्य, गुण)—अ क्षे स्य ति ('इ' का लोप, षत्व)=अक्षेष्यत् ।

√तप् धातु का अर्थ सन्तप्त होना=जलना है ।

(१) √तप्+लट् (=तिप्=ति, शप्)=तपति । (२) √तप्+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास-कार्य, उपधा को दीर्घ)=ततap । (३) एत्व, अभ्यासलोप, तस्=अतुस्=तेपतुः । (४) लिट्—'झि' में—तेपुः । (५) √तप्+लिट् (=सिप्=थल्=थ, द्वित्व, अभ्यास-कार्य, इट्, विकल्प से एत्व-अभ्यास का लोप)=तेपिथ । पक्ष में—ततप्थ । (६) लुट्—तप्ता । (७) लृट्—तप्स्यति । (८) लोट्—तपतु । (९) लङ्—अतपत् । (१०) विधिलिङ्—तपेत् । (११) आशीर्लिङ्—तप्यात् । (१२) लुङ्—अताप्सीत्, अताप्ताम् । (१३) लृङ्—अतप्स्यत् ।

(५२९) पद—निसः, तपतोः, अनासेवने । **विधिसूत्र** ।

मूलार्थ—पौनःपुन्य से भिन्न अर्थ में तप् धातु के परवर्ती रहने पर निस् के स् को ष् (षत्व) होता है । निष्टपति ।

विमर्श—'अपदान्तस्य मूर्धन्यः' का अधिकार है । 'आसेवनम्' का अर्थ पुनः-पुनः है । उससे भिन्न अर्थ में 'निस्' के सकार को षत्व होता है, तप् धातु के परवर्ती रहने पर ।

उदाहरण—निस्+√तप्+लट् (=तिप्=ति, शप्, स्=ष्—'निसस्तपतावनासेवने') =निष्टपति । √क्रमु धातु का अर्थ—चलना है ।

(५३०) पद—वा, भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः । **अनुवृत्ति**—श्यन्, कर्तरि, सार्वधातुके । **विधिसूत्र** ।

(५३१) **क्रमः परस्मैपदेषु** ७।३।७६। क्रमेर्दीर्घः, परस्मैपदे शिति। क्राम्यति। क्रामति। चक्राम। (५३२) **स्नुक्रमोरनात्मनेपदनिमित्ते** ७।२।३६। अत्रेट्। क्रमिता। क्रमिष्यति। क्राम्यतु। क्रामतु। अक्राम्यत्। अक्रामत्। क्राम्येत्। क्रामेत्। क्रम्यात्। अक्रमीत्। अक्रमिष्यत्। चमु छमु जमु झमु अदने। (५३३) **ष्ठिवुक्लमु-**

---

(५३१) **क्रम** इति। 'शमामष्टानामि'त्यतः 'दीर्घः' इत्यनुवर्तते। **क्राम्यति, क्रामति**। क्रम्धातोर्लटि तत्स्थाने तिप्यनुबन्धलोपे सार्वधातुकसंज्ञायां प्राप्तं शपं प्रबाध्य 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलसः' इति विकल्पेन श्यनि अनुबन्धलोपे 'क्रमः परस्मैपदेषु' इति क्रम उपधायाः दीर्घे 'क्राम्यति' इति। पक्षे शपि दीर्घे च कृते—'क्रामति' इति रूपम्।

(५३२) **स्नुक्रमोरिति**। स्नुक्रमोरित्यत्र पञ्चम्यर्थे षष्ठी। आत्मनेपदनिमित्ताभावे स्नुक्रमभ्यां परस्य वलादेरार्धधातुकस्य इट् स्यादित्यर्थः। स्नुक्रमोरनुदात्तोपदेशान्तर्भावादिटि सिद्धे वचनमिदं नियमार्थमत आह—**अत्रेवेति**। तेन 'उपस्नोष्यते जलेन' इति भावार्थलकारे इण्न। **अक्रमीत्**। क्रम्धातोर्लुङस्तिपि, अडागमेऽनुबन्धलोपे,

---

मूलार्थ—कर्त्रर्थक सार्वधातुक के परवर्ती रहने पर भ्राश् आदि धातुओं से विकल्प से 'श्यन्' प्रत्यय होता है। पक्ष में—'शप्'।

विमर्श—प्रकृत सूत्र में 'दिवादिभ्यः श्यन्' (३।१।६९) से 'श्यन्', 'कर्तरि शप्' (४१७) से 'शप्' और 'सार्वधातुके यक्' (३।१।६७) से 'सार्वधातुके' पदों की अनुवृत्ति आती है। तदनुसार—'भ्राश्, भ्लाश्, भ्रम्, क्रम्, क्लम्, त्रस्, त्रुट् और लष् धातुओं से विकल्प से श्यन् प्रत्यय होता है, कर्त्रर्थक (कर्तृवाच्य) सार्वधातुक के परवर्ती रहने पर।

(५३१) पद—क्रमः, परस्मैपदेषु। **अनुवृत्ति**—दीर्घः शिति। **विधिसूत्र**।

मूलार्थ—परस्मैपदपरक शित् के परवर्ती रहने पर क्रम् धातु को दीर्घ होता है।

विमर्श—यहाँ 'शमामष्टानाम्०' (७।३।८४) से 'दीर्घः' तथा 'ष्ठिवुक्लमु०' (५३३) से 'शिति' पदों की अनुवृत्ति आ रही है। तदनुसार—'क्रम् धातु के अच् को दीर्घ होता है, परस्मैपद शित् प्रत्यय के परे रहने पर'।

उदाहरण—(१) √क्रम्+लट् (=तिप्=ति, सार्वधातुक संज्ञा, शप् का बाधकर विकल्प से श्यन्=य—'वा भ्राश०')—क्रम् य ति (उपधा को दीर्घ—'क्रमः परस्मैपदेषु')=क्राम्यति। श्यन् के अभाव पक्ष में शप्=क्रामति। लिट्—चक्राम।

(५३२) पद—स्नुक्रमोः, अनात्मनेपदनिमित्ते। **अनुवृत्ति**—आर्धधातुकस्येड् वलादेः। **विधिसूत्र**।

मूलार्थ—आत्मनेपद निमित्त हीन 'स्नु' और 'क्रम्' धातु से परे ही वलादि आर्धधातुक को इट् का आगम होता है। क्रमिता। क्रमिष्यति इत्यादि।

विमर्श—यहाँ पूर्वसूत्र 'आर्धधातुकस्येड् वलादेः' (७।२।३५) की अनुवृत्ति आ रही है। तदनुसार—'आत्मनेपद निमित्त रहने पर स्नु एवं क्रम् धातु से परवर्ती वलादि आर्धधातुक को इट् का आगम होता है'।

उदाहरण—(१) √क्रम्+लुट् (=तिप्)—क्रम् ति (तास्, इट्, तिप्=डा='आ')—क्रमितास् आ (टि लोप)=क्रमिता। (२) लृट्—क्रमिष्यति। (३) लोट्—क्राम्यतु, क्रामतु ('वा भ्राश०'—विकल्प से श्यन्, पक्ष में शप्, दीर्घ)। (४) लङ्—अक्राम्यत्, अक्रामत्।

चमां शिति ७।३।७५। एषामचो दीर्घः स्याच्छिति । * आङि चम इति वक्तव्यम्* । आचामति । आङि किम्? चमति । विचमति । अचमीत् । स्खल सञ्चलने । स्खलति । चस्खाल । (५३४) अतो लरान्तस्य ७।२।२ । अतः समीपौ यौ लरौ, तदन्तस्याङ्गस्यातो वृद्धिः परस्मैपदपरे सिचि । अस्खालीत् । अस्खलिष्यत् । त्सर छद्मगतौ ।

च्लौ, च्लेः सिच्यनुबन्धलोपे, इटि, तिप इकारलोपे, ईटि, सलोपे 'अतो हलादेर्लघोः' इति वृद्धौ प्राप्तायाम्, 'ह्मयन्तक्षण०' इति निषेधे 'अक्रमीदि'ति ।

(५३३) **ष्ठिवुक्लमु इति** । 'शमामष्टानामि'त्यतः दीर्घ इत्यनुवर्तते । दीर्घश्रुत्या च 'अचः' इत्युपतिष्ठते । तदाह—**एषामित्यादि** ।

(५३४) **अतो लरान्तस्येति** । 'अङ्गस्ये'त्यधिकृतम् । 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवर्तते । **अस्खालीत्** । स्खल्धातोर्लुङि तत्स्थाने तिपि, च्लौ, च्लेः सिच्यनुबन्धलोपे आर्धधातुकत्वे 'आर्धधातुकस्येड् वलादेः' इति इडागमेऽनुबन्धलोपेऽपृक्तसंज्ञायाम् 'अस्तिसिचोऽपृक्ते' इतीडागमे 'इट ईटि' इति सलोपे सवर्णदीर्घे 'अतो लरान्तस्ये'ति वृद्धौ इकारलोपे 'अस्खालीत्' इति ।

---

(५) विधिलिङ्—क्राम्येत्, क्रामेत् । (६) आशीर्लिङ्—क्रम्यात् । (७) लुङ्—अक्रमीत् । (८) लृङ्—अक्रमिष्यत् ।

√**चमु, छमु, जमु** और **झमु** धातुओं का अर्थ भक्षण (=खाना) है ।

(५३३) पद—ष्ठिवु-क्लमु-चमां, शिति । **अनुवृत्ति**—दीर्घः । **विधिसूत्र** ।

मूलार्थ—ष्ठिवु, क्लमु और चम् धातुओं के 'अच्' को दीर्घ होता है, शित् के परवर्ती रहने पर । **वा०**—'आङ्' उपसर्गपूर्वक चम् धातु को दीर्घ होता है—ऐसा कहना चाहिए । आचामति इत्यादि ।

विमर्श—'शमामष्टानाम्०' (७।३।७४) से 'दीर्घः' पद की अनुवृत्ति आती है । दीर्घ पद की श्रुति से 'अचः' षष्ठ्यन्त पद की उपस्थिति होती है । तदनुसार—शित् प्रत्यय के परवर्ती रहने पर ष्ठिवु, क्लमु और चम् धातु के अच् को दीर्घ होता है ।

उदाहरण—आ+√चम् (उकारेत्संज्ञक)+लट् (=तिप्=ति, शप्=अ, 'आङि चम इति वक्तव्यम्' इस वार्तिक के सहकार से 'ष्ठिवुक्लमुचमां शिति' से दीर्घ)=आचामति ।

प्रत्युदाहरण—वार्तिक में आङ् पद का ग्रहण होने से केवल √चम् से लट् में दीर्घ नहीं हुआ—'चमति' । विचमति । लुङ्—अचमीत् ।

√स्खल् का अर्थ संचलन (=चलना) है । लट्—स्खलति । लिट्—चस्खाल ।

(५३४) पद—अतः, लरान्तस्य । **अनुवृत्ति**—सिचि, वृद्धिः, परस्मैपदेषु । **विधिसूत्र** ।

मूलार्थ—अत् के समीपवर्ती जो लकार रेफ, तदन्त अङ्ग के अत् को वृद्धि होती है, परस्मैपद 'सिच्' के परवर्ती रहने पर । अस्खालीत् ।

विमर्श—'अङ्गस्य' का अधिकार है । 'सिचि वृद्धिः परस्मैपदेषु' (५२८) की अनुवृत्ति आती है । तदनुसार—'परस्मैपदसंज्ञक सिच् के परवर्ती रहने पर अकार-समीपवर्ती लकारान्त, रेफान्त अङ्ग के अवयव अकार को वृद्धि होती है ।

उदाहरण—√स्खल्+लुङ् (=तिप्=ति, अट्, च्लि=सिच्=स्, आर्धधातुक संज्ञा, इट्, ईट्, 'स्' का लोप—'इट ईटि' सवर्णदीर्घ, अ='आ'—वृद्धि—'अतो लरान्तस्य')=अस्खालीत् ।

अत्सारीत्। पा पाने। (५३५) पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ७।३।७८। पाबीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे। पिबादेशोऽदन्तस्तेन न गुणः। पिबति। (५३६) आत औ णलः ७।१।३४। आदन्ताद्धातोर्णल औकारादेशः स्यात्। पपौ। (५३७)

---

(५३५) **पाघ्राध्मेति।** यथासंख्यमादेशा भवन्ति। 'ष्ठिवुक्लमुचमां शिती'त्यतः शितीत्यनुवर्तते। अङ्गाक्षिप्तप्रत्ययविशेषणत्वात्तदादिविधिस्तदाह—**पाबीनामित्यादि।** **पिबति।** पाधातोः लटि, तत्स्थाने तिपि सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे 'पाघ्राध्मा०' इत्यादिना पास्थाने पिबादेशे, पिबादेशस्यादन्तत्वाद् गुणाभावे 'अतो गुणे' इति पररूपे 'पिबती'ति।

(५३६) **आत औ'ति।** अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते। 'आत' इति तद्विशेषणत्वात्तदन्तविधिस्तदाह—**आदन्तादिति।** **पपौ।** पाधातोर्लिटि, तत्स्थाने तिपि, तिपो णलादेशे, धातोर्द्वित्वेऽभ्यासत्वे 'ह्रस्वः' इति ह्रस्वे 'प पा अ' इति जाते 'आत औ णलः' इति णलः स्थाने औत्वे वृद्धौ च कृतायाम् 'पपौ' इति सिद्धम्।

लृङ्—अस्खलिष्यत्। √त्सर का अर्थ—कपटपूर्वक गमन है। लुङ् में वृद्धि होकर—अत्सारीत्। √'पा' धातु का अर्थ—पीना है।

(५३५) पद—पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्य-र्ति-सर्ति-शद-सदाम्, पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-र्च्छ-धौ-शीय-सीदाः। **अनुवृत्ति**—शिति। **विधिसूत्र।**

मूलार्थ—इत्संज्ञक शकारादि प्रत्यय के परे रहने पर पा आदि धातुओं को पिब् आदि आदेश होते हैं। पिबति।

विमर्श—प्रकृत सूत्र में 'ष्ठिवुक्लमुचमां शिति' (५३३) से 'शिति' की अनुवृत्ति आती है। अतः इत्संज्ञक शकारादि प्रत्यय के परवर्ती रहने पर पा आदि धातुओं को क्रमशः पिब् आदि आदेश होते हैं। यथा—

पा=पिब्
घ्रा=जिघ्र
ध्मा=धम
स्था=तिष्ठ
म्ना=मन
दाण्=यच्छ

दृश्=पश्य
ऋ=ऋच्छ
सृ=धौ
शद=शीय
सद=सीद

ये पिब आदि आदेश अकारान्त हैं। अतः उपधा न होने से इकार को लघूपध गुण नहीं होता।

उदाहरण—(१) √पा+लट्, (=तिप्=ति, शप्=अ, पा=पिब—'पाघ्राध्मा०')—पिब अ ति (अ+अ='अ' पररूप—'अतो गुणे')=पिबति।

(५३६) पद—आतः, औ, णलः। **विधिसूत्र।**

मूलार्थ—आदन्त धातु से परवर्ती णल् के स्थान में 'औ' आदेश होता है। पपौ।

उदाहरण—(१) √पा+लिट् (=तिप्=णल्, द्वित्व, अभ्यास संज्ञा, ह्रस्व, णल्='औ'—'आत औ णलः')—प पा औ (आ+औ='औ'—वृद्धि)=पपौ।

आतो लोप इटि च ६।४।६४। अजाद्योरार्द्धधातुकयोः क्ङिदिटोः परयोरातो लोपः। पपतुः। पपुः। पपिथ। पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्। (५३८) **एर्लिङि ६।४।६७।** घुसंज्ञानां मास्थागापिबतिजहातिस्यतीनां चाऽऽत एत्वमार्द्धधातुके किति लिङि। पेयात्। 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्।' तेन 'पा रक्षणे' इत्यस्य नैत्वम्। 'गातिस्थे'ति

---

(५३७) **आतो लोप इति।** 'आर्धधातुके' इत्यधिकृतम्। 'दीङो युडची'त्यतः अचि 'क्ङिती'ति चानुवर्नते, तदादिविधिः। क्ङिति अजाद्यार्धधातुके इटि च आतो लोप इति लभ्यते। **पपतुः।** पाधातोर्लिटि, तत्स्थाने तसि, तसः स्थाने अतुसि, द्वित्वेऽभ्याससंज्ञायां ह्रस्वे 'प पा अतुस्' इति जाते 'आतो लोप इटि च' इत्याकारलोपे सस्य रुत्वे विसर्गे च कृते 'पपतुः' इति।

(५३८) **एर्लिङीति।** 'आर्धधातुके' इत्यधिकृतम्। 'घुमास्थागापाजहातिसाम्' इत्यनुवर्तते। तदाह—**घुसंज्ञानामिति।** **अपात्।** पाधातोर्लुङि तत्स्थाने तिपि, च्लौ, च्लेः स्थाने सिजादेशेऽनुबन्धलोपे 'गातिस्थे'त्यादिना सिचो लोपे अडागमे तिप इकारलोपे 'अपात्' इति।

---

(५३७) पद—आतः, लोपः, इटि च। **अनुवृत्ति**—अचि क्ङिति। **विधिसूत्र।**

मूलार्थ—अजादि कित् ङित् आर्धधातुक और इट् के परवर्ती रहने पर आकार का लोप होता है। पपतुः। इत्यादि।

विमर्श—'आर्धधातुके' का अधिकार है। 'दीङो युडचि' (६।४।६३) सूत्र से 'अचि' और 'क्ङिति' पदों की अनुवृत्ति आती है। तदनुसार—'आर्धधातुक अजादि कित्, ङित् प्रत्यय और इट् के परे रहते धातु के अवयव आकार का लोप होता है'।

उदाहरण—(१) √पा+लिट् (=तस्=अतुस्, कित्—'असंयोगाल्लिट् कित्' द्वित्व, अभ्यास संज्ञा, ह्रस्व, हलादिशेष)—प पा अतुस् ('आ' का लोप—'आतो लोप इटि च' स्=र्=:)=पपतुः। 'पपुः' में 'उस्' परे रहने पर आ का लोप। थल्, व, म में इट् होने से 'आ' का लोप हो जाता है। यह अजन्त अनिट् धातु होने से थल् में विकल्प से इट् होता है (भारद्वाज के नियम से)।

√पा धातु (=पीना) लिट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०–	पपौ	पपतुः	पपुः
म० पु०–	पपिथ–पपाथ	पपथुः	पप
उ० पु०–	पपौ	पपिव	पपिम

लुट्—पाता। लृट्—पास्यति। लोट्—पिबतु। लङ्—अपिबत्। विधिलिङ्—पिबेत्।

(५३८) पद—एः, लिङि। **अनुवृत्ति**—घुमास्थागापाजहातिसाम्, किति। **विधिसूत्र।**

मूलार्थ—घुसंज्ञक धातु तथा—मा, ष्ठा, गै, पा, हा, औ, षो धातु को एत्व होता है, आर्धधातुक कित् लिङ् के परे रहते।

विमर्श—'घुमास्थागापाजहातिसाम्' (६।४।६६) की अनुवृत्ति आती है। 'दीङो युडचि' (६।४।६३) से किति की अनुवृत्ति आती है। 'आर्धधातुके' का अधिकार है। इस प्रकार—आर्धधातुक कित् लिङ् के परवर्ती रहने पर घुसंज्ञक तथा मा स्था आदि धातु को एत्व होता है'।

सिचो लुक् । अपात् । अपाताम् । (५३९) **आतः** ३।४।११० । सिज्लुकि आदन्तादेव झेर्जुस् । (५४०) **उस्यपदान्तात्** ६।१।९६ । अपदान्तादवर्णादुसि पररूपमेकादेशः । अपुः । अपास्यत् । ग्लै म्लै हर्षक्षये । ग्लायति । (५४१) **आदेच उपदेशेऽशिति** । ६।१।४५ । उपदेशे एजन्तस्य धातोरात्वं, न तु शिति । जग्लौ । ग्लाता । ग्लास्यति ।

---

(५३९) **आत इति** । 'झेर्जुस्' इति सूत्रमत्रानुवर्तते । 'आतः सिज्लुगन्तादि'ति वार्तिकात् सिज्लुकीति लभ्यते । पूर्वसूत्रेणैव सिद्धे नियमार्थमिदं सूत्रम् ।

(५४०) **उस्यपदान्तादिति** । 'आद् गुणः' इत्यस्मात् आदित्यनुवर्तते, 'एङि पररूपमि'त्यस्मात्पररूपमिति च । तदाह—**अपदान्तादिति** ।

(५४१) **आदेच इति** । 'लिटि धातोः' इत्यत अनुवृत्तं धातोरिति पदमेचा विशेष्यते, तेन तदन्तविधिस्तदाह—**उपदेशे एजन्तस्येति** । **जग्लौ** । ग्लैधातोर्लिटस्तिपि, तिपो णलादेशे, 'आदेच उपदेशेऽशिति' इत्यात्वे 'लिटि धातोरनभ्यासस्ये'ति द्वित्वेऽभ्याससंज्ञायां ह्रस्वे 'हलादिः शेषः' इति ललोपे 'कुहोश्चुः' इति चुत्वेन गस्य जत्वे 'आत औ णलः' इत्यौत्वे 'वृद्धिरेचि' इति वृद्धौ 'जग्लौ' इति रूपम् ।

उदाहरण—(१) पा+आशीर्लिङ् (=तिप्=ति, यासुट्=यास्, इ का लोप, यासुट् कित् 'किदाशिषि' से आ=ए—'एर्लिङि' 'स्' का लोप)=पेयात् ।

'लुग्विकरण और अलुग्विकरण धातुओं में अलुग्विकरण धातु का ही ग्रहण होता है ।' इस नियम से यहाँ 'पा पाने' धातु का ही ग्रहण होता है । अतः 'पा रक्षणे' धातु से लिङ् में एत्व नहीं होता । लुङ् में 'गातिस्था०' से सिच् का लुक् होने पर—अपात् । अपाताम् ।

(५३९) पद—आतः । **अनुवृत्ति**—झेर्जुस् , सिज्लुकि । **नियमसूत्र** ।

मूलार्थ—सिच् का लुक् होने पर आदन्त धातु से परे ही 'झि' को जुस् होता है ।

विमर्श—यहाँ 'झेर्जुस्' (३।४।१०८) सूत्र की अनुवृत्ति आती है । **वार्तिक**—'आतः सिच्लुगन्तादिति वक्तव्यम्' से 'सिच्लुकि' पद का अनुवर्तन होता है । तदनुसार—"जहाँ सिच् का लोप हुआ हो वहाँ आदन्त धातु से परे ही 'झि' को जुस् होता है" ।

(५४०) पद—उसि, अपदान्तात् । **अनुवृत्ति**—आत्, पररूपम् । **विधिसूत्र** ।

मूलार्थ—अपदान्त अवर्ण से 'उस्' परे रहते पररूप एकादेश होता है । अपुः । अपास्यत् ।

विमर्श—प्रकृत सूत्र में 'आद् गुणः' से 'आत्' और 'एङि पररूपम्' से 'पररूपम्' पद की अनुवृत्ति आती है । तदनुसार—अपदान्त अवर्ण से परे उस् हो तो पूर्व-पर दोनों के स्थान में पररूप एकादेश होता है ।

उदाहरण— √पा+लुङ् (=झि=जुस्=उस्—'आतः' अट्, च्लि=सिच्, सिच् का लुक्—'गातिस्था०')—अ पा उस् (आ+उ=उ—पररूप 'उस्यपदान्तात्')—अपुस् (स्=र्=:)=अपुः । लृङ्—अपास्यत् ।

√ग्लै, म्लै धातुओं का अर्थ—हर्ष का क्षय (ग्लानि करना) है ।

उदाहरण—(१) √ग्लै+लट् (=तिप्=ति, शप् , ऐ=आय्)=ग्लायति ।

(५४१) पद—आत्, एचः, उपदेशे, अशिति । **अनुवृत्ति**—धातोः । **विधिसूत्र** ।

मूलार्थ—उपदेश में एजन्त धातु को आत्व होता है, किन्तु शित् के परे रहते आत्व नहीं होता । जग्लौ इत्यादि ।

ग्लायतु । अग्लायत् । ग्लायेत् । (५४२) **वाऽन्यस्य संयोगादेः ६।४।६८ ।** घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा, आर्द्धधातुके किति लिङि । ग्लेयात्–ग्लायात् । (५४३) **यमरमनमातां सक् च ७।२।७३ ।** एषां सक् स्यात्, एभ्यः सिच इट्, परस्मैपदेषु । अग्लासीत् । अग्लास्यत् । एवं म्लायतीत्यादि । धेट् पाने । धयति । दधौ ।

---

(५४२) वाऽन्यस्येति । 'आर्धधातुके' इत्यधिकृतम् । 'एर्लिङि' इति, 'आतो लोपः' इत्यत 'आत' इति चानुवर्तते । कस्मादन्यस्येत्यपेक्षायां 'घुमास्थागापाजहातिसां हली'ति पूर्वोपात्तत्वात् तेभ्योऽन्यस्येति फलति । तदाह—**घुमास्थादेरिति । ग्लेयात्, ग्लायात् ।** ग्लैधातोराशीर्लिङस्तिपि तस्यार्धधातुकत्वे, यासुडागमेऽनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे तिप इकारलोपे 'स्कोः संयोगाद्योरन्ते च' इति सकारलोपे 'वाऽन्यस्य संयोगादेः' इत्येत्वे ग्लेयात् । एत्वाऽभावपक्षे ग्लायात् ।

(५४३) **यमरमेति ।** आदित्यनेन आदन्तं गृह्यते । चकारेण 'इडत्यर्ति' इत्यतः इडिति 'स्तुसुधूञ्भ्य' इत्यतः 'परस्मैपदेष्वि'ति चानुकृष्यते, 'अञ्जेः सिची'त्यतः सिचीति च तच्चानुवृत्तं पदं षष्ठ्या विपरिणम्यते । तदाह—**एषामिति । अग्लासीत् ।** ग्लैधातोर्लुङस्तिपि, च्लौ, च्लेः सिच्यनुबन्धलोपे, अडागमे 'अ ग्लै स् त्' इति जाते

विमर्श—'लिटि धातोरनभ्यासस्य' (६।१।८) से 'धातोः' पद की अनुवृत्ति आती है । तदनुसार—'शित भिन्न प्रत्यय के परवर्ती रहने पर उपदेशावस्था में एजन्त धातु को आत्व होता है'।

उदाहरण—(१) √ग्लै+लिट् (=तिप्=णल्='अ', ऐ='आ'—'आदेच उपदेशेऽशिति'—ग्ला अ (द्वित्व, अभ्यास संज्ञा, ह्रस्व, हलादिशेष—'ल' लोप)—ग्ग्ला अ (ग्=ज्—'कुहोश्चुः'- णल्=औ—'आत औ णलः' वृद्धि)=जग्लौ । लुट्—ग्लाता । लृट्—ग्लास्यति । लोट्—ग्लायतु । लङ्—अग्लायत् । विधिलिङ्—ग्लायेत् ।

(५४२) पद—वा, अन्यस्य, संयोगादेः । **अनुवृत्ति**—एर्लिङि, आतः । **विधिसूत्र ।**

मूलार्थ—आर्धधातुक लिङ् के परवर्ती रहने पर घुमास्थादि से अन्य संयोगादि धातु के अकार को विकल्प से एकार होता है । ग्लेयात्, ग्लायात् ।

विमर्श—'आर्धधातुके' का अधिकार है । एर्लिङि (५३९) सूत्र तथा 'आतो लोपः' (५३८) से 'आतः' पद की अनुवृत्ति आती है । प्रकृत सूत्र से पूर्व 'घुमास्थागापाजहातिसां हलि' (६।४।६६) सूत्र पठित होने से 'अन्यस्य' पद से 'घुमास्थागापाहा से भिन्न धातु' का ग्रहण होता है । अतः पूर्वोक्त 'घु, मा, स्था आदि से भिन्न संयोगादि धातु के आकार को विकल्प से एकार होता है, आर्धधातुक कित् लिङ् के परे होने पर' ।

उदाहरण— √ग्लै+आशीर्लिङ् (=तिप्=ति, आर्धधातुक संज्ञा, यासुट्=यास् , ऐ=आ—'आदेच उपदेशे०' 'इ' का लोप)—ग्ला यास् त् (स् का लोप—'स्कोः०' आ=विकल्प से 'ए'—वाऽन्यस्य संयोगादेः')=ग्लेयात् । पक्ष में—ग्लायात् ।

(५४३) पद—यम-रम-नमातां, सक् च । **अनुवृत्ति**—इट् , परस्मैपदेषु, सिच् । **विधिसूत्र ।**

मूलार्थ—यम् , रम् , नम् और आदन्त धातु को 'सक्' का आगम होता है और सिच् को परस्मैपद में 'इट्' का आगम होता है । अग्लासीत् इत्यादि ।

विमर्श—'आत्' पद से आदन्त धातुओं का ग्रहण होता है । चकार से 'इडत्यर्त्ति०' (७।२।६६) सूत्र से 'इट्' 'स्तुसुधूञ्भ्यः' (७।२।७२) से 'परस्मैपदेषु' तथा 'अञ्जेः सिचि' (७।२।७१) से 'सिचि' पदों की अनुवृत्ति आती है । तदनुसार—'यम् (=निवृत्त होना), रम्

धाता । धास्यति । धयतु । अधयत् । धियेत् । (५४४) **दाधा घ्वदाप् १।१।२०।** दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना । धेयात् । (५४५) **विभाषा धेट्श्व्योः ३।१।४९।** आभ्यां च्लेश्चङ् वा । (५४६) **चङि ६।१।११।** **अनभ्यासधात्ववयवस्य प्रथमस्यैकाचो द्वे स्तोऽजादेर्द्वितीयस्य** । अदधत् । अदधताम् । अदधन् ।

'आदेच उपदेशेऽशिति' इति ग्लैधातोरात्वे 'यमरमनमातां सक्च' इत्यङ्गस्य सकागमे इडागमे च कृते 'इतश्चे'तीकारलोपे 'अस्तिसिचोऽपृक्ते' इतीडागमे 'इट ईटि' इति सकारलोपे सवर्णदीर्घे 'अग्लासीत्' इति ।

(५४४) **दाधाघ्वेति ।** 'गा-मा-दाग्रहणेष्वविशेषः' इति परिभाषायां दाग्रहणेन धारूपस्यापि ग्रहणम् । तेन धाग्रहणे 'धेट् पाने' इत्यादीनामपि ग्रहणम् ।

(५४५) **विभाषेति ।** अत्र 'च्लि लुङी'त्यनुवर्तते । 'णिश्रि' इत्यतः कर्तरि चङीति चानुवर्तते । तदाह—**आभ्यामिति ।**

(५४६) **चङीति ।** 'एकाचो द्वे प्रथमस्य', 'अजादेर्द्वितीयस्य' इति चाधिकृतम् । 'लिटि धातोरि'त्यतः 'धातोरनभ्यासस्ये'त्यनुवर्तते । तदाह मूले—**चङि पर इत्यादिना ।**

(=क्रीडा करना, रमग करना), नम् (=नम्र होना, प्रणाम करना) और आकारान्त धातुओं को सक् का आगम होता है तथा इससे परवर्ती सिच् को इट् का आगम होता है, परस्मैपद में' ।

उदाहरण—√ग्लै+लुङ् (=तिप्=ति, च्लि=सिच्=स्, अट्, 'इ' लोप)—अ ग्लै स् त ('ऐ'='आ'—'आदेच उपदेशे०', सक्=स् और इट् का आगम—'यमरमनमातां सक्च')—अग्ला स् इ स् त् (ईट्, स् का लोप, सवर्णदीर्घ)=अग्लासीत् । अग्लासिष्टाम् । अग्लासिषुः इत्यादि ।

लृङ्—अग्लास्यत् । इसी प्रकार √म्लै+लट्=म्लायति इत्यादि ।

√धेट् का अर्थ—पीना है । √धे+लट् (=तिप्=ति, शप्, अय्)=धयति । लिट्—णल्='औ'—दधौ । लुट्—धाता । लृट्—धास्यति । लोट्—धयतु । लङ्—अधयत् । विधिलिङ्—धियेत् ।

(५४४) पद—दा-धा-घु, अदाप् । **संज्ञासूत्र ।**

मूलार्थ—दाप्, दैप् को छोड़कर दारूप और धारूप धातुओं की घु संज्ञा होती है । धेयात् ।

विमर्श—यहाँ, 'गामादाग्रहणेष्वविशेषः' परिभाषा के द्वारा 'दा' के ग्रहण से डुदाञ् दाने, दाण् दाने और कृतात्व—'दो अवखण्डने, देङ् रक्षणे' आदि लाक्षणिक का भी ग्रहण होता है ।

उदाहरण—धे+आशीर्लिङ् (=तिप्=ति, इ का लोप, ए='आ'—'आदेच')—धा त् (यासुट्=यास्, घुसंज्ञा—'दाधाघ्वदाप्' आ='ए'—'एर्लिङि' 'स्' लोप)=धेयात् ।

(५४५) पद—विभाषा, धेट्श्व्योः । **अनुवृत्ति**—च्लेः, चङ् । **विधिसूत्र ।**

मूलार्थ—'धेट्' धातु और श्वि धातु से परे 'च्लि' के स्थान में 'चङ्' विकल्प से होता है ।

विमर्श—प्रकृत सूत्र में 'च्लेः सिच्' (३।१।४४) सूत्र से 'च्लेः' तथा 'णिश्रिद्रुस्रुभ्यः' (३।१।४८) से 'चङ्' पदों की अनुवृत्ति आती है । तदनुसार—"धेट् एवं श्वि से परवर्ती 'च्लि' को 'चङ्' विकल्प से होता है" ।

(५४६) पद—चङि । **अनुवृत्ति**—धातोः, अनभ्यासस्य । **विधिसूत्र ।**

मूलार्थ—'चङ्' के परे रहने पर अनभ्यास धातु के अवयव प्रथम एकाच् को द्वित्व होता है । अजादि धातु के अवयव द्वितीय एकाच् को द्वित्व होता है । अदधत् ।

(५४७) विभाषा घ्राधेट्शाच्छासः २।४।७८। एभ्यः सिचो लुग्वा स्यात् परस्मैपदे । अधात् । अधाताम् । अधुः । पक्षे इट्सकौ । अधासीत् । अधासिष्टाम् । अधासिषुः । ग्लै न्यक्करणे । ग्लायति । द्रै स्वप्ने । द्रायति । ध्रै तृप्तौ । ध्रायति । ध्यै चिन्तायाम् । ध्यायति । दध्यौ । रै शब्दे । रायति । स्त्यै ष्ट्यै शब्दसङ्घातयोः ।

अदधत् । 'धेट् पाने' इत्यस्माद् धातोः 'आदेच उपदेशेऽशिति' इत्यात्वे लुङि, तत्स्थाने तिप्यनुबन्धलोपे च्लौ 'विभाषा धेट्श्व्योः' इति च्लेश्चङि 'चङि' इति द्वित्वेऽभ्याससंज्ञायां 'ह्रस्वः' इति ह्रस्वे 'अभ्यासे चर्च' इति धस्य दत्वे, अडागमेऽनुबन्धलोपे 'अ द धा अ त्' इति जाते 'आतो लोप इटि च' इत्याकारलोपे कृते 'अदधत्' इति रूपं निष्पन्नम् ।

(५४७) **विभाषा घ्राधेडिति ।** 'ण्यक्षत्रियार्ष०' इत्यतः लुगिति, 'गातिस्था' इत्यतः 'सिचः परस्मैपदेष्वि'ति चानुवर्तते । तदाह—**एभ्य इत्यादिना ।**

अधादिति । धेट्धातोः 'आदेच उपदेशेऽशिति' इत्यात्वे लुङि तत्स्थाने तिपि इकारलोपे, च्लौ 'च्लेः सिच्' इति सिचि 'विभाषा घ्राधेट्शाच्छासः' इति विकल्पेन सिचो लोपे अङ्गस्याडागमेऽनुबन्धलोपे 'अधात्' इति ।

विमर्श—'एकाचो द्वे प्रथमस्य' और 'अजादेर्द्वितीयस्य' का अधिकार है । 'लिटि धातोः' (४२७) से 'धातोरनभ्यासस्य' की अनुवृत्ति आती है । तदनुसार—'चङ् के परवर्ती रहने पर अनभ्यास धातु के अवयव प्रथम एकाच् को द्वित्व होता है; अजादि धातु के द्वितीय एकाच् को द्वित्व होता है' ।

उदाहरण—(१) √धेट्+लुङ् (ल्=तिप्=ति, आत्व—'आदेच उपदेशेऽशिति')—धा ति (च्लि, च्लि=चङ्='अ' विकल्प से—'विभाषा धेट्श्व्योः', 'धा' को द्वित्व—'चङि' अभ्यास संज्ञा, ह्रस्व, ध्=द्—'अभ्यासे चर्च', अट् का आगम)—अ द धा अति ('इ' का लोप, 'आ' का लोप—'आतो लोप इटि च')=अदधत् । (२) प्र० पु० द्विवचन (तस्=ताम्, पूर्वोक्त कार्य)=अदधताम् । (३) प्र० म० बहुवचन झि—अदधन् ।

(५४७) पद—विभाषा, घ्राधेट्शाच्छासः । **अनुवृत्ति**—लुक्, सिचः, परस्मैपदेषु । **विधिसूत्र ।**

मूलार्थ—घ्रा, धेट्, शो, छो और षो धातुओं से परवर्ती 'सिच्' का विकल्प से लुक् होता है, परस्मैपद के परे रहते । अधात् । अधाताम् इत्यादि ।

विमर्श—प्रकृत सूत्र में 'ण्यक्षत्रियार्ष०' (२।४।५८) से 'लुक्' और 'गातिस्था०' (२।४।७७) से 'सिचः, परस्मैपदेषु' पदों की अनुवृत्ति आती है । तदनुसार—'परस्मैपदसंज्ञक प्रत्यय परवर्ती रहते—घ्रा, धेट्, शो, छो और षो से परे सिच् के सकार का विकल्प से लोप होता है' ।

उदाहरण—(१) धेट् (टकारेत्संज्ञक) (आत्व—'आदेच उपदेशे०')—धा+लुङ् (ल्=तिप्=ति, अट्, इ का लोप, च्लि, 'विभाषा धेट्श्व्योः' से च्लि=चङ् न होने पर पक्ष में—च्लि=सिच्, सिच् का विकल्प से लुक्—'विभाषा घ्राधेट्शाच्छासः')=अधात् ।

सिच् के लुक् के अभाव पक्ष में—अ धा स् त् (अपृक्त संज्ञा, ईट्, सक् का आगम और इट्—'यमरमनमातां सक्च')—अ धा स्, इ स् ई त् (स् का लोप—'इट ईटि' सवर्णदीर्घ)=अधासीत् । (२) लुङ् प्र० पु० द्वि० व०—अधाताम्, अधासिष्टाम् । (३) लुङ् प्र० पु० ब० व०—अधुः, अधासिषुः ।

स्त्यायति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यम्, षोपदेशफलं तु 'तिष्टचासती'त्यादौ भविष्यति। खै खदने। खायति। क्षै जै षै क्षये। क्षायति। जायति। सायति। 'घुमास्थे'त्यत्र 'विभाषा घ्राधेट्' इत्यत्र च स्यतेरेव गहणं; न त्वस्य, तेन एत्वसिज्लुकौ न। सायात्। असासीत्। कै गै शब्दे। शै श्रै पाके। पै ओवै शोषणे। पायात्। अपासीत्। 'घुमास्थे'तीत्वं तदपवाद 'एर्लिङी'त्येत्वं 'गातिस्थे'ति सिज्लुक् च न, 'लक्षणप्रतिपदोक्तयो: प्रतिपदोक्तस्यैव ग्रहणमि'ति पारूपस्य लाक्षणिकत्वात्। ष्टै वेष्टने। स्तायति। स्नै वेष्टने, शोभायां चेत्येके। स्नायति॥ दैप् शोधने। दायति। अघुत्वादेत्वसिज्लुकौ न। दायात्। अदासीत्। घ्रा गन्धोपादाने। जिघ्रति। घ्रायात्–घ्रेयात्। अघ्रासीत्। अघ्रास्यत्। ध्मा शब्दाग्निसंयोगयो:। धमति। ष्ठा गतिनिवृत्तौ। तिष्ठति।

घुमास्थेत्यत्रेति। अत्र व्याख्यानमेव शरणम्। 'विभाषा घ्राधेट्शाच्छास:' इत्यत्र श्यन्विकरणाभ्यां साहचर्य्यम्—'सहचरिताऽसहचरितयोर्मध्ये सहचरितस्यैव ग्रहणमि'ति परिभाषाबलात्।

√धै धातु का अर्थ=तिरस्कार करना है। (१) √धै+लट् (=तिप्=ति, शप्, ऐ=आय्)=धायति। √द्रै का अर्थ=स्वप्न है। द्रायति। √ध्रै का अर्थ=तृप्ति होना है। ध्रायति। √ध्यै का अर्थ=चिन्तन करना है। ध्यायति। लिट्—दध्यौ। √रै धातु का अर्थ=शब्द करना है। लट्—रायति। √स्त्यै और ष्ट्यै धातु—शब्द और संघात अर्थ में है। स्त्यायति। षोपदेश धातु के 'ष्' को सकारादेश होने पर समान ही रूप बनता है। फिर भी षोपदेश धातु का फल 'तिष्ट्यासति' इत्यादि में षत्व की प्रवृत्ति होना है।

√खै धातु का अर्थ=खदन=हिंसा है। खायति। √क्षै, जै, षै का अर्थ—क्षय होना है। क्षायति। जायति। सायति। 'घुमास्था०' एवं 'विभाषा घ्राधेट्०' सूत्रों में 'षोऽन्तकर्मणि' का ग्रहण किया गया है, इसका नहीं। अतः एकारादेश एवं सिच् का लुक् नहीं होता। लिङ्—सायात्। लुङ्०—असासीत्। √कै, गै धातु का अर्थ—शब्द करना है। √शै, श्रै का अर्थ—पाक है। √पै एवं 'ओ वै' धातु शोषण अर्थ में है। लिङ् (आत्व)—पायात्। लुङ्—अपासीत्। 'लक्षणप्रतिपदोक्तयो: प्रतिपदोक्तस्यैव ग्रहणम्' (लाक्षणिक और प्रतिपदोक्त में प्रतिपदोक्त का ही ग्रहण होता है।) लक्षण=सूत्र, तद्द्वारा सम्पन्न को लाक्षणिक और उपदेशावस्था को प्रतिपदोक्त कहते हैं। यहाँ 'पै' का आकारादेश होकर 'पा' बना है, जो लाक्षणिक है। अतः ईत्व, एकारादेश और सिच्-लुक् कार्य नहीं होते।

√ष्टै का अर्थ=लपेटना है। स्तायति। √स्नै का अर्थ=लपेटना है। कुछ आचार्यों के मतानुसार इसका अर्थ 'शोभा' है। स्नायति। √दैप् का अर्थ=शोधन=शुद्ध करना है। दायति। घुसंज्ञा-विधायक सूत्र में 'अदाप्' (५४४) पद होने से इस धातु की घुसंज्ञा नहीं हुई। अतः एत्व एवं सिच् का लुक् भी नहीं हुआ। लिङ्—दायात्। लुङ्—अदासीत्।

√'घ्रा' धातु का अर्थ—सूँघना है। (१) √घ्रा+लट् (=तिप्, शप्, घ्रा=जिघ्र, पररूप) =जिघ्रति। (२) आशीर्लिङ् में जिघ्र आदेश न होने पर—घ्रेयात्, घ्रायात्। (३) √घ्रा+लुङ् (=तिप्, इकार का लोप, च्लि=सिच्, सिच् का विकल्प से लोप—'विभाषा घ्राधेट्०' [illegible] अघ्रात्। सिच् लोप के अभावपक्ष में (इट्, सक्, ईट्, स् का लोप, सवर्णदीर्घ)=अघ्रासीत्। लृङ्—अघ्रास्यत्।

√ध्मा धातु का अर्थ—शब्द एवं अग्निसंयोग है। √ध्मा+लट् (=तिप्=ति, शप्,

स्थादिष्विति षत्वम् । अधितिष्ठौ । 'उपसर्गादि'ति षत्वम् । अध्रिष्ठाता । स्थेयात् । सत्वे कृते प्रकृतिस्तवर्गः स्यात् । उक्तञ्च--

'नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारश्च षाट्टवर्गस्तवर्गजः ॥'

'गातिस्थे'ति सिचो लुक् । अस्थात् । म्ना अभ्यासे । मनति ॥ दाण् दाने । प्रणियच्छति । ह्वृ कौटिल्ये । ह्वरति । (५४८) **ऋतश्च संयोगादेर्गुणः ७।४।१० ।** ऋदन्तस्य संयोगादेरङ्गस्य गुणो, लिटि । उपधाया वृद्धिः । जह्वार । जह्वरतुः । जह्वरुः ।

नकारजाविति । धातुषु झलि परतोऽनुस्वारः पञ्चमश्च ङकारो ञकारो णकारो नकारो मकारो वा नकाराज्जातौ अनुस्वारपञ्चमौ, तथा सकाराज्जातः शकारस्तथा च षकारात्परो विद्यमानः तवर्गाज्जातः टवर्गोऽपि प्रकृतस्थितिं लभत इत्यर्थः । तेन 'ष्ठा' इत्यत्र षकारात्परो तवर्गस्थकारो मूलस्थितिं प्राप्नोति, ठकारस्य थकाराज्जायमानत्वात् ।

(५४८) **ऋतश्चेति ।** 'दयतेर्दिगि लिटि' इत्यतः लिटीत्यनुवर्तते । तदाह—**ऋदन्तस्येत्यादिना । जह्वार ।** ह्वृधातोः लिटस्तिपि, तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्ये'ति द्वित्वेऽभ्याससंज्ञायाम् 'उरत्' इत्यत्वे रपरे च जाते 'हलादिः शेषः'

ध्मा=धम, पररूप)=धमति । √ष्ठा का अर्थ=ठहरना है । √ष्ठा+लट् (=ति, शप्, ष्ठा=तिष्ठ, पररूप)=तिष्ठति । 'अधितष्ठौ' यहाँ लिट् में 'स्थादिषु०' सूत्र से अभ्यासोत्तर सकार को षकारादेश हुआ है । लुट्—'अधिष्ठाता' में 'उपसर्गात्सुनोति०' से षत्व हुआ । लिङ्—स्थेयात् में 'वाऽन्यस्य' से एकारादेश होता है । 'ष्ठा' में 'धात्वादेः' से सत्व होने पर 'ठ्' भी अपनी मूल स्थिति तवर्ग–'थ्' को प्राप्त करता है । यथा (कारिकार्थ)—

नकारजाविति । धातुओं में झल् परे रहते जो अनुस्वार और पंचम वर्ण (ङ्, ञ्, ण्, न्, म्) हैं, वे नकार के स्थान में ही हुए हैं । तथा च् छ् परे रहते शकार सकार-स्थानिक है और रेफ सकार से परे टवर्ग तवर्ग-स्थानिक है ।

लुङ् में 'गातिस्था०' से सिच् का लुक् होने पर—अस्थात् । √म्ना का अर्थ=अभ्यास करना है । (१) म्ना+लट् (=तिप्, शप्, म्ना=मन आदेश—'पाघ्राध्मा०', पररूप)=मनति । √दाण् का अर्थ—दान करना है । प्र+√नि+दाण्+लट् (=तिप्, शप्, दाण्=यच्छ, पररूप, णत्व—'नेर्गदनद०')=प्रणियच्छति ।

√ह्वृ धातु का अर्थ—कुटिल आचरण करना है । ह्वृ+लट् (=तिप्, शप्, सार्वधातुक गुण ऋ=अर्—रपर)=ह्वरति ।

(५४८) पद—ऋतः, च, संयोगादेः, गुणः । **अनुवृत्ति**—लिटि, अङ्गस्य । **विधिसूत्र ।**

मूलार्थ—लिट् के परवर्ती रहने पर ऋदन्त संयोगादि अङ्ग को गुण होता है ।

विमर्श—यहाँ 'दयतेर्दिगि लिटि' (७।४।९) से 'लिटि' पद की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । तदनुसार—'संयोग है आदि में जिसके, ऐसे अङ्ग को भी लिट् परे रहते गुण होता है' ।

उदाहरण—(१) √ह्वृ+लिट् (=तिप्=णल्=अ, धातु को द्वित्व, अभ्यास संज्ञा, 'ऋ'='अ'—'उरत्' रपर)—ह्वर् ह्वृ अ (व् र् का लोप—'हलादिः शेषः' 'ह्'='झ्'—'कुहोश्चुः'

जह्वर्थ । जह्वरथुः । जह्वर । जह्वार-जह्वर । जह्वरिव । जह्वरिम । ह्वर्ता । (५४९) **ऋद्धनोः स्ये ७।२।७० ।** ऋतो हन्तेश्च स्यस्य इट् । ह्वरिष्यति । ह्वरतु । अह्वरत् । ह्वरेत् । (५५०) **गुणोऽर्तिसंयोगाद्योः ७।४।२९ ।** अर्तेः संयोगादेर्ऋदन्तस्य च गुणो यकि, यादावार्द्धधातुके लिङि च । ह्वर्यात् । अह्वार्षीत् । अह्वरिष्यत् । स्वृ शब्दोपतापयोः । स्वरति । 'स्वरती'ति वेट् । सस्वरिथ-सस्वर्थ । वमयोस्तु स्वरत्यादिविकल्पं

इति वकारस्य रकारस्य च लोपे 'कुहोश्चुः' इति हस्य झत्वे 'अभ्यासे चर्च' इति झस्य जकारे जह्व अ' इति जाते 'ऋतश्च संयोगादेर्गुणः' इति गुणेऽकारे रपरे च कृते 'अत उपधायाः' इति वृद्धौ 'जह्वार' इति ।

(५४९) **ऋद्धनोरिति ।** ऋत् हन् अनयोर्द्वन्द्वः, पञ्चम्यर्थे षष्ठी, 'स्ये' इति षष्ठ्यर्थे सप्तमी । 'आर्धधातुकस्येडि'त्यतः इडित्यनुवर्तते । तदाह—**ऋत इत्यादिना ।**

(५५०) **गुणोऽर्तीति ।** अङ्गस्येत्यधिकृतम् । 'रीङृतः' इत्यत ऋत इत्यनुवर्तते । तस्याङ्गविशेषणत्वात्तदन्तविधिः । 'अकृत्सार्वधातुकयोः' इत्यतोऽसार्वधातुकग्रहणमनुवर्तते, तेन 'आर्धधातुके' इति लभ्यते । 'रिङ्शयग्लिङ्क्षु' इत्यतः यकि लिङीति च लभ्यते । 'अयङ् यि' इत्यतः 'यी'ति सप्तम्यन्तमनुवर्तते । तदाह—**अर्तेरित्यादि ।** **ह्वर्यात् ।** ह्वृधातोराशीर्लिङि, तत्स्थाने तिपि 'यासुट् परस्मैपदेषूदात्तो ङिच्चे'ति

झ्=ज्—'अभ्यासे चर्च')—ज ह् वृ अ (ऋ='अ' गुण—'ऋतश्च संयोगादेर्गुणः' रपर, वृद्धि—'अत उपधायाः')=जह्वार । (२) लिट् (प्र० पु० द्विवचन तस्=अतुस्, पूर्वोक्त कार्य, गुण, रपर, स्=र्=ः)=जह्वरतुः । (३) लिट् (प्र० पु० बहुवचन झि=उस्, पूर्वोक्त कार्य)= जह्वरुः । (४) लिट् म० पु० ए० व०—जह्वर्थ । (५) लिट्—म० पु० द्वि० व०—जह्वरथुः । (६) लिट्—म० पु० बहुव०—जह्वर । (७) लिट् उ० पु० एक व०—जह्वार, 'णलुत्तमो वा' से णित्व के अभाव पक्ष में—जह्वर । (८) लिट् उ० पु० द्वि० व०—जह्वरिव । (९) लिट् उ० पु० व० व०—जह्वरिम । (१०) √ह्वृ+लुट् (=तिप्=डा=आ, तास्)—ह्वृ तास् आ (ह्वृ धातु अजन्त है । 'ऊदृृदन्तैः' संग्रह कारिका में ग्रहण न होने से यह अनुदात्त है । अतः वलादि आर्धधातुक को इट् का आगम नहीं होता । गुण, रपर, टिलोप)=ह्वर्ता ।

(५४९) पद—ऋद्धनोः, स्ये । **अनुवृत्ति**—इट्, । **विधिसूत्र ।**

मूलार्थ—ऋदन्त और हन् धातु से परे स्य को इट् (इ) का आगम होता है ।

विमर्श—प्रकृत सूत्र में 'आर्धधातुकस्येड् वलादेः' (७।२।३५) से 'इट्' की अनुवृत्ति आ रही है । अतः "ऋकारान्त और 'हन्' धातु से परे 'स्य' को इट् का आगम होता है" ।

उदाहरण—(१) √ह्वृ+लृट् (=तिप्=ति)—ह्वृ ति (स्य, इट्—'ऋद्धनोः स्ये' गुण, रपर)=ह्वरिष्यति । (२) लोट्—ह्वरतु । (३) लङ्—अह्वरत् । (४) विधिलिङ्—ह्वरेत् ।

(५५०) पद—गुणः, अर्तिसंयोगाद्योः । **अनुवृत्ति**—ऋतः, असार्वधातुकस्य, यकि, लिङि, यि, अङ्गस्य । **विधिसूत्र ।**

मूलार्थ—यक् के परे रहने पर और यकारादि आर्धधातुक लिङ् के परे रहते ऋ धातु और संयोगादि ऋदन्त धातु को गुण होता है ।

विमर्श—यहाँ 'रीङृतः (७।४।२७) सूत्र से 'ऋतः' की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । 'अकृत्सार्वधातुकयोः' (७।४।२५) से 'असार्वधातुकस्य' की अनुवृत्ति आने से

बाधित्वा पुरस्तात् प्रतिषेधकाण्डारम्भसामर्थ्यात् 'श्युकः किती'ति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । सस्वरिव । सस्वरिम । परत्वादृद्धनोरिति नित्यमिट् । स्वरिष्यति । अस्वारीत्, अस्वार्षीत् । स्मृ चिन्तायाम् । स्मरति । ह्वृ संवरणे । ह्वरति । सृ गतौ । क्रादित्वान्नेट् । ससार । ससर्थ । ससृव । ससृम । (५५१) **रिङ्शयग्लिङ्क्षु ७।४।२८ । शे, यकि यादावार्द्धधातुके लिङि च ऋतो रिङ् । रीङि प्रकृते रिङ्विधानसाम-**

यासुडागमेऽनुबन्धलोपे, 'इतश्चे'तीकारलोपे 'ह्व यात्' इति स्थिते कित्त्वाद्गुणनिषेधे प्राप्ते 'गुणोऽर्तिसंयोगाद्योः' इति गुणे रपरे 'ह्वर्यादि'ति रूपम् ।

वमयोस्तु इति । 'स्वरतिसूति' इति विकल्पो यद्यपि परस्तथापि 'आर्धधातुकस्येड् वलादेः' इति विधिप्रकरणारम्भात् प्रागेव 'नेड् वशि कृति' (७।२।८) 'श्युकः किति' (७।२।११) इत्यादिनिषेधकाण्डारम्भसामर्थ्यात् अयं 'श्युकः किती'ति निषेधः स्वरत्यादिविकल्पं बाधते । लिटि वमयोस्तु निषेधमेतं क्रादिनियमो बाधत इति नित्यमिट् भवतीति भावः ।

(५५१) **रिङ्शयगिति ।** अत्र 'अयङ् यि क्ङिती'त्यतः 'यी'त्यनुवृत्तं लिङो विशेषणम् । तदादिविधिः । 'अकृत्सार्वधातुकयोः' इत्यनुवृत्तमपि लिङ एव विशेषणम् । तदाह—**शे यकि इत्यादिना ।**

'आर्धधातुक' अर्थ का लाभ होता है । 'रिङ्शयग्लिङ्क्षु' (७।४।२८) से 'यकि' तथा 'लिङि' और 'अयङ् यि' (७।४।२२) से 'यि' की अनुवृत्ति आती है । तदनुसार—'ऋ और संयोगादि ऋदन्त धातु को गुण होता है, यक् और यकारादि आर्धधातुक लिङ् के परवर्ती रहने पर' ।

उदाहरण—(१) √ह्वृ+आशीर्लिङ् (=तिप्=ति)—ह्वृ ति (आर्धधातुक संज्ञा, 'लिङाशिषि' यासुट्=यास्, गुण—'गुणोऽर्तिसंयोगाद्योः', स् का लोप)=ह्वर्यात् । (२) ह्वृ+लुङ् (=तिप्=ति)—ह्वृ ति (अट्, इलोप, च्लि=सिच्, ईट्, ऋ='आ'—वृद्धि—'सिचि वृद्धिः' रपर, स्=ष्—'आदेशप्रत्यययोः')=अह्वार्षीत् । (३) लृङ् में—ह्वरिष्यत् ।

√स्वृ का अर्थ—शब्द एवं उपताप है । (१) स्वृ+लट् (=तिप्=ति; शप्–अ, गुण, रपर)=स्वरति । (२) √स्वृ+लिट् (=सिप्=थल्=थ)—स्वृ थ (द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'स्वरतिसूति०' से विकल्प से इट्, गुण, रपर)=सस्वरिथ । इट् के अभाव पक्ष में—सस्वर्थ । (३) लिट् के उत्तमपुरुष वस्, मस् (=व, म) में 'स्वरतिसूति०' से विकल्प से इट् प्राप्त है । उसको प्रतिषेध के प्रथम करण के सामर्थ्य से बाधकर 'श्रयुकः किति' से निषेध प्राप्त हुआ । इस निषेध को बाधकर क्रादि-नियम से नित्य इट् हुआ—सस्वरिव । सस्वरिम । 'स्वरिष्यति' में परत्वात् 'ऋद्धनोः स्ये' से नित्य इट् हुआ । (४) स्वृ+लुङ् (=तिप्=ति)—ति (अट्, च्लि=सिच्, इट् विकल्प से 'स्वरति०' ईट्, 'स्' का लोप, वृद्धि, रपर)=अस्वारीत् । इट् के अभाव पक्ष में—वृद्धि—'सिचि वृद्धिः०' रपर, षत्व=अस्वार्षीत् ।

√स्मृ धातु—चिन्ता अर्थ में है । (१) √स्मृ+लट् (=तिप्=ति, शप्–अ, गुण, रपर) =स्मरति । √ह्वृ धातु—संवरण अर्थ में है । लट् प्र० पु० ए० व०—ह्वरति । √सृ धातु का अर्थ-गति (=जाना) है । यहाँ क्रादि-नियम से इट् का अभाव है । लिट् प्र० पु० ए० व०—ससार । लिट् म० पु० ए० व०—ससर्थ । लिट् उ० पु० द्वि० व०—ससृव । लिट् उ० पु० ब० व०—ससृम ।

(५५१) पद्—रिङ्, शयग्लिङ्क्षु । **अनुवृत्ति**—ऋतः, असार्वधातुके, यि, अङ्गस्य । **विधिसूत्र ।**

श्यान्न दीर्घः । स्त्रियात् । असार्षीत् । असरिष्यत् । शीघ्रगतौ तु 'पाघ्रे'ति शिति धौरादेशः । धावति । गृ घृ सेचने । गरति । घरति । ध्वृ हूर्च्छने । ध्वरति । दृशिर् प्रेक्षणे । पश्यति । ददर्श । ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन । ददृशतुः । ददृशुः । (५५२) विभाषा सृजिदृशोः ७।२।६५ । आभ्यां थल इड् वा । (५५३)

स्त्रियादिति । सृधातोराशीर्लिङि तिपि, 'इतश्चे'तीकारलोपे यासुडागमेऽनुबन्धलोपे 'रिङ्शयग्लिङ्क्षु' इति रिङादेशेऽनुबन्धलोपे रिङादेशविधानसामर्थ्याद् दीर्घाभावे 'स्त्रियादि'ति रूपम् ।

(५५२) **विभाषेति ।** 'गमेरिट्' इत्यतः इडिति, 'अचस्तास्वत्' इत्यतश्च 'थली'ति अनुवर्तते । सृज्धातोः दृश्धातोश्च क्रादिनियमान्नित्यमिट् प्राप्तस्तत्र विभाषया इड् भवतीत्याह—**आभ्यामिति ।**

मूलार्थ—शकार, यक् और यकारादि आर्धधातुक लिङ् के परे रहते—ऋत् को रिङ् आदेश होता है । स्त्रियात् इत्यादि ।

विमर्श—प्रकृत सूत्र में 'रीङ् ऋतः' (७।४।२७) से 'ऋतः' 'अकृत्सार्वधातुकयोः' (७।४।२५) से 'असार्वधातुके' तथा 'अयङ् यि' (७।४।२२) से 'यि' पदों की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । तदनुसार—'ऋकारान्त अङ्ग को श, यक् तथा यकारादि सार्वधातुक भिन्न लिङ् के परवर्ती रहने पर रिङ् आदेश होता है' । यहाँ 'रीङ् ऋतः' सूत्र से 'रीङ्' की अनुवृत्ति करके 'शयग्लिङ्क्षु' इतना ही सूत्र बनाया जाता और रीङ् का विधान किया जाना उचित था, पुनः सूत्र में रिङ् ग्रहण क्यों किया गया ? अतः ज्ञापन किया जाता है कि रिङ् आदेश के इकार को 'अकृत्सार्व०' से दीर्घ नहीं होता ।

उदाहरण—(१) √सृ+आशीर्लिङ् (=तिप्=ति, इ का लोप, यासुट्=यास्)—सृ यास् त ('स्' का लोप, ऋ=रिङ्-रि—'रिङ् शयग्लिङ्क्षु')=स्त्रियात् । (२) लुङ्—असार्षीत् । लृङ्—असरिष्यत् ।

√सृ धातु के शीघ्रगति (=दौड़ना) अर्थ में शित् प्रत्यय के परे रहते 'पाघ्राध्मा' से सृ के स्थान में 'धौ' आदेश होता है । लट् प्र० पु० ए० व०—धावति । √गृ, घृ सेचन अर्थ में हैं । गरति । घरति ।

√ध्वृ धातु का अर्थ हूर्च्छन (=कुटिलता) है । लट्—ध्वरति ।

√दृशिर् धातु का अर्थ—देखना है । √दृशिर् ('इर इत्संज्ञा वाच्या' से इर् की इत्संज्ञा लोप)—दृश्+लट् (=तिप्=ति, शप्, दृश्=पश्य्—'पाघ्राध्मा०')=पश्यति । लिट् प्र० पु० ए० व०—ददर्श । लिट् प्र० पु० द्वि० व०—ददृशतुः ।

ऋदुपधेभ्यः—ऋदुपध धातुओं से परवर्ती लिट् गुण की अपेक्षा पूर्वविप्रतिषेध से कित् होता है । अतः 'ददृशतुः' में गुण नहीं हुआ । लिट् प्र० पु० ब० व०—ददृशुः ।

(५५२) पद—विभाषा, सृजिदृशोः । **अनुवृत्ति**—इट्, थलि । **विधिसूत्र ।**

मूलार्थ—सृज् तथा दृश् धातु से परवर्ती थल् को विकल्प से इट् होता है ।

विमर्श—यहाँ 'गमेरिट्०' (७।२।५८) से 'इट्' और 'अचस्तास्वत्०' (७।२।६१) से 'थलि' की अनुवृत्ति आती है । तदनुसार—'सृज् एवं दृश् धातु से परे थल् को विकल्प से इट् का आगम होता है' ।

सृजिदृशोर्झल्यमकिति ६।१।५८। अनयोरमागमः स्याज्झलादावकिति। दद्रष्ठ–ददर्शिथ। द्रष्टा। **(५५४) षढोः कः सि ८।२।४१।** षस्य ढस्य च कः स्यात्सकारे परे। द्रक्ष्यति। दृश्यात्। इरित्त्वादङ् वा। **(५५५) ऋदृशोऽङि गुणः ७।४।१६।** ऋवर्णान्तानां दृशेश्च गुणः स्यादङि। अदर्शत्। अङभावे–**(५५६) न दृशः ३।१।४७।**

(५५३) **सृजिदृशोरिति।** नित्यार्थमिदं सूत्रम्। **दद्रष्ठ इति।** 'दृशिर् प्रेक्षणे' इत्यस्माद्धातोः' इरित्संज्ञायां लोपे च कृते लिटि, तत्स्थाने सिपि, सिपः थलादेशेऽनुबन्धलोपे, द्वित्वेऽभ्याससंज्ञायाम् उरदत्वे हलादिशेषे 'विभाषा सृजिदृशोः' इति विकल्पेन इडागमे 'ददृश् इ थ' इति जाते, लघूपधगुणे रपरे 'ददर्शिथ' इति। इडागमाभावपक्षे तु—'सृजिदृशोर्झल्यमकिति' इत्यमागमे मित्त्वादन्त्यादचः परे यणि द द्र श् थ इति जाते 'व्रश्चभ्रस्ज०' इति शकारस्य षकारे 'ष्टुना ष्टुः' इति ष्टुत्वे च कृते 'दद्रष्ठ' इति रूपम्।

(५५४) **द्रक्ष्यति।** दृश्धातोर्लृटि तिपि 'स्यतासी लृलुटोः' इति स्यप्रत्यये 'व्रश्चभ्रस्ज०' इत्यादिना शकारस्य षत्वे 'सृजिदृशोर्झल्यमकिति' इत्यमागमे यणि 'षढोः कः सि' इति षस्य कत्वे 'आदेशप्रत्यययोः' इति स्यस्य सस्य षत्वे क्षयोः संयोगे क्षत्वे कृते द्रक्ष्यतीति।

(५५५) **ऋदृशोऽङि गुण इति। अदर्शत्।** दृश्धातोः लुङि तिपि, 'इतश्चे'ति इकारलोपे च्लौ, 'इरितो वा' इति च्लेः विभाषयाऽङादेशे 'ऋदृशोऽङि गुणः' इति गुणेऽङ्गस्याडागमेऽनुबन्धलोपे 'अदर्शत्' इति।

(५५३) पद—सृजिदृशोः, झलि, अम् , अकिति। **विधिसूत्र।**

मूलाथ—कित्-भिन्न झलादि प्रत्यय के परवर्ती रहने पर सृज् और दृश् धातु को 'अम्' आगम होता है।

विमर्श—यह अम् आगम मित् होने से अन्त्य अच् से परे होगा। ('मिदिचोऽन्त्यात्परः')।

उदाहरण—(१) √दृश्+लिट् (=सिप्=थल्=थ)—दृश् थ (द्वित्व, अभ्यास संज्ञा, 'ऋ'='अ'—'उरत्', रपर, हलादिशेष, इट्=इ का आगम—विकल्प से—'विभाषा सृजिदृशोः') —द दृश् इ थ (गुण—'पुगन्त०'—रपर)=ददर्शिथ। इट् के अभाव पक्ष में (अम्–अ का आगम—'सृजिदृशोः०')—द दृ अ श् थ ('ऋ'='र'—यण्, श्=ष्—'व्रश्च०', थ्=ठ्—ष्टुत्व)=दद्रष्ठ।

(५५४) पद—षढोः, कः सि। **विधिसूत्र।**

मूलार्थ—सकार के परवर्ती रहने पर ष् और ढ् के स्थान में क् आदेश होता है।

उदाहरण—(१) √दृश्+लृट् (=तिप्=ति, स्य,)—दृश् स्य ति (श्=ष्—'व्रश्च०', 'अम्'='अ'—'सृजिदृशोः', यण्)—द्रष् स्य ति (ष्=क्—'षढोः कः सि', 'स्'='ष्'—'आदेशप्रत्यययोः' क्+ष्=क्ष्)=द्रक्ष्यति। लिङ्—दृश्यात्। यहाँ कित् होने से अम् नहीं हुआ।

(५५५) पद—ऋदृशः, अङि, गुणः। **विधिसूत्र।**

मूलार्थ—'अङ्' के परवर्ती रहने पर ऋवर्णान्त धातु और दृश् धातु को गुण होता है।

उदाहरण—(१) √दृश्+लुङ् (=तिप्=ति, 'इ' का लोप, अट् , च्लि, च्लि=अङ् विकल्प से—'इरितो वा')—अ दृ श् त् ('ऋ'='अ'—गुण—'ऋदृशोऽङि गुणः', रपर)= अदर्शत्। अङ् के अभावपक्ष में—

दृशश्च्लेर्वक्ष्यमाणः क्सो न । अद्राक्षीत् । अद्रक्ष्यत् । श्रु श्रवणे । (५५७) श्रुवः शृ च ३।१।७४ । श्रुवः शृ आदेशः श्नुप्रत्ययश्च कर्तरि सार्वधातुके । शृणोति । (५५८) सार्वधातुकमपित् १।२।४ । अपित्सार्वधातुकं ङिद्वत् स्यात् । शृणुतः । (५५९)

---

(५५६) **न दृश इति ।** 'च्लेः सिच्' इत्यतः च्लेरिति, 'शल इगुपधात्' इत्यतः क्स इति चानुवर्तते । तदाह—**दृश इति ।**

(५५७) **श्रुव इति ।** चकारेणात्र 'स्वादिभ्यः श्नुः' इति सूत्रस्थः श्नुः समुच्चीयते । तदाह—**श्रुवः शृ इत्यादेश इत्यादिना । शृणोतीति ।** श्रुधातोर्लटि तिपि शपि प्राप्ते 'श्रुवः शृ चे'त्यनेन 'श्रु' इत्यस्य 'शृ' इत्यादेशे श्नुप्रत्यये च कृतेऽनुबन्धलोपे श्नुप्रत्ययस्याऽपित्त्वेन ङित्त्वात् 'शृ' इत्येतस्य गुणाभावे, श्नु इत्यस्य उकारस्य गुणे 'शृणोति' इति ।

(५५८) **सार्वधातुकमपिदिति ।** 'गाङ्कुटादिभ्यः' इत्यतः ङिदित्यनुवर्तते । तदाह—**अपिदिति ।** तसादीनां ङित्त्वात् श्नोर्न गुणः । **शृणुत इति ।**

---

(५५६) पद—न, दृशः । **अनुवृत्ति—**च्लेः, क्सः । **विधिसूत्र ।**

मूलार्थ—दृश् धातु से परे 'च्लि' को 'क्स' आदेश नहीं होता । अद्राक्षीत् ।

विमर्श—प्रकृत सूत्र में 'च्लेः सिच्' (३।१।४४) से 'च्लेः' और 'शल इगुपधात्०' से 'क्सः' पदों की अनुवृत्ति आती है । अतः दृश् धातु से परवर्ती 'च्लि' को 'क्स' आदेश नहीं होता ।

उदाहरण—(१) अङ् के अभावपक्ष में—अ दृश् च्लि त् ('शल इगुपधादनिटः क्सः' से प्राप्त क्स आदेश का 'न दृशः' से निषेध, च्लि=सिच्=स्, श्=ष्—'व्रश्च०', 'ष्'='क्'—'षढोः कः सि', स्=ष्—'आदेशप्रत्यययोः' क्+ष्=क्ष्, ईट्, अम्, यण्, वृद्धि—'वदव्रज०') =अद्राक्षीत् । लृट्—अद्रक्ष्यत् ।

√श्रु धातु का अर्थ सुनना है ।

(५५७) पद—श्रुवः, शृ, च । **अनुवृत्ति—**श्नु । **विधिसूत्र ।**

मूलार्थ—कर्त्रर्थक सार्वधातुक के परवर्ती रहते श्रु धातु को 'शृ' आदेश होता है और श्नु प्रत्यय होता है ।

विमर्श—प्रकृत सूत्रस्थ 'च' पद से 'स्वादिभ्यः श्नुः' (३।१।७३) सूत्र से 'श्नु' पद की अनुवृत्ति होती है ।

उदाहरण—(१) √श्रु+लट् (=तिप्=ति)—श्रु ति ('श्रु'='शृ' और श्नु)—शृ नु ति ('उ'='ओ' गुण—'सार्वधातु०' 'न्'='ण्'—'ऋवर्णान्नस्य णत्वं वाच्यम्')=शृणोति । यहाँ श्नु प्रत्यय के अपित् होने से 'सार्वधातुकमपित्' से ङित् होने पर 'शृ' के ऋकार को गुण नहीं होता ।

(५५८) पद—सार्वधातुकम्, अपित् । **अनुवृत्ति—**ङित् । **अतिदेशसूत्र ।**

मूलार्थ—पित्-भिन्न सार्वधातुक ङिद्वत् होता है । शृणुतः ।

विमर्श—प्रकृत सूत्र में 'गाङ्कुटादिभ्योऽञ्णिङित्' (१।२।१) से 'ङित्' की अनुवृत्ति आती है । तदनुसार उक्त अर्थ निष्पन्न होता है ।

उदाहरण—(१) √श्रु+लट् (=तस्, श्रु=शृ, श्नु)—शृ नु तस् (णत्व, स्=र्=:) =शृणुतः । यहाँ 'नु' के उकार को सार्वधातुक निमित्तक गुण प्राप्त होता है । तस् अपित्

हुश्नुवोः सार्वधातुके ६।४।८७। जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्यासंयोगपूर्वोवर्णस्य यण् स्यादचि सार्वधातुके। शृण्वन्ति। शृणोषि। शृणुथः। शृणुथ। शृणोमि। **(५६०) लोपश्चान्यतरस्यां म्वोः ६।४।१०७।** असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा, म्वोः परयोः। शृण्वः–शृणुवः। शृण्मः–शृणुमः। शुश्राव। शुश्रव। शुश्रुव। शुश्रुम। श्रोता। श्रोष्यति। शृणोतु। शृणुयात्। शृणुताम्। शृण्वन्तु। (५६१)

---

(५५९) **हुश्नुवोरिति।** 'इणो यण्' इत्यतः यण् इत्यनुवर्तते, 'अचि श्नु' इत्यतः अचीति, 'ओः सुपी'त्यतः ओरिति, 'एरनेकाचः' इति सूत्रम् एरिति वर्जमनुवर्तते। तदाह—**जुहोतेरित्यादिना।**

(५६०) **लोपश्चेति।** अस्येत्यनेन 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति पूर्वसूत्रोक्त उकारः परामृश्यते। असंयोगपूर्वात् प्रत्ययादिति चोकारेऽन्वेति। तस्याङ्गविशेषणत्वात्तदन्तविधिंस्तदाह—**असंयोगपूर्वस्येति। शृण्वः, शृणुवः।** श्रुधातोः लटो वसि 'श्रुवः शृ च' इति श्रुवः 'शृ' इत्यादेशे शब्विषये श्नुप्रत्यये च कृते सार्वधातुकसंज्ञायां

सार्वधातुक होने से 'सार्वधातुकमपित्' से ङिद्वद्भाव हो जाता है। अतः 'क्ङिति च' से गुण का निषेध हो जाता है।

(५५९) पद—हुश्नुवोः, सार्वधातुके। **अनुवृत्ति**—अनेकाचोऽसंयोगपूर्वस्य, अचि, यण्, ओः, अङ्गस्य। **विधिसूत्र।**

मूलार्थ—अजादि सार्वधातुक प्रत्यय के परवर्ती रहने पर हु धातु और श्नु-प्रत्ययान्त जो अनेकाच् अङ्ग, तदवयव जो असंयोगपूर्वक उ वर्ण, उसको यण् आदेश होता है। शृण्वन्ति इत्यादि।

विमर्श—यहाँ 'इणो यण्' (६।४।८१) से 'यण्' 'अचि श्नु०' (६।४।७७) से अचि, 'ओः सुपि' (६।४।८३) से मण्डूकप्लुत्या 'ओः' तथा 'एरनेकाचोऽसंयोगपूर्वस्य' (६।४।८२) से 'अनेकाचोऽसंयोगपूर्वस्य' की अनुवृत्ति आती है। तदनुसार—"अजादि सार्वधातुक प्रत्यय के परे रहते 'हु' धातु तथा अनेकाच् श्नु-प्रत्ययान्त अङ्ग के असंयोगपूर्वक उवर्ण को यण् आदेश होता है"।

उदाहरण—(१) √श्रु+लट् (=झि, श्रु=शृ, श्नु=नु, झ्=अन्त)—शृ नु अन्ति ('अन्ति' को ङिद्वद्भाव होने से गुण-निषेध, णत्व, उ=व् 'यण्'—'हुश्नुवोः सार्वधातुके')= शृण्वन्ति। (२) श्रु+लट् (=सिप्=सि, श्रु=शृ, श्नु, गुण, णत्व, षत्व)=शृणोषि। (३) शृणुथः, शृणुथ—'थस्' और 'थ' के अपित् सार्वधातुक होने से ङिद्वद्भाव होने पर गुण-निषेध। (४) श्रु+लट् (=मिप्=मि, पूर्ववत्)=शृणोमि।

(५६०) पद—लोपः, च, अन्यतरस्याम्, म्वोः। **अनुवृत्ति**—उतः, प्रत्ययात्, असंयोगपूर्वात्। **विधिसूत्र।**

मूलार्थ—वकार और मकार के परवर्ती रहने पर असंयोगपूर्वक प्रत्यय के उकार का विकल्प से लोप होता है। शृण्वः–शृणुवः इत्यादि।

विमर्श—प्रकृत सूत्र में 'उतश्च प्रत्ययादसंयोगपूर्वात्' (६।४।१०६) की अनुवृत्ति आ रही है। तदनुसार—'मकारादि तथा वकारादि प्रत्ययों के परे रहते असंयोगपूर्वक प्रत्यय के उकार का विकल्प से लोप होता है'।

उदाहरण—(१) श्रु+लट् (=वस्, श्रु=शृ, श्नु)—शृ नु वस् (णत्व, 'उ' का विकल्प से लोप, णत्व)—शृण्वस्=(स्=र्, र्=:)=शृण्वः। उकार का लोप न होने पर—शृणुवः।

उतश्च प्रत्ययादसंयोगपूर्वात् ६।४।१०६। असंयोगपूर्वात्प्रत्ययोतो हेर्लुक्। शृणु-शृणुतात्। शृणुतम्। शृणुत। गुणावादेशौ। शृणवानि। शृणवाव। शृणवाम। अशृणोत्। अशृणुताम्। अशृण्वन्। अशृणोः। अशृणुतम्। अशृणुत। अशृणवम्। अशृण्व-अशृणुव। अशृण्म-अशृणुम। शृणुयात्। शृणुयाताम्। (५६२) उस्य-

---

'सार्वधातुकमपित्' इति श्नोर्ङित्त्वे 'क्ङिति चे'ति गुणाभावे, णत्वे 'शृ णु व स्' इति जाते 'लोपश्चान्यतरस्यां म्वोः' इति विभाषया उकारलोपे सस्य रुत्वे विसर्गे च कृते 'शृण्वः' इति। लोपाऽभावपक्षे 'शृणुवः' इति।

(५६१) **उतश्चेति।** 'चिणो लुगि'त्यतः 'लुगि'ति, 'अतो हेः' इत्यतश्च 'हेरि'-त्यनुवर्तते। अङ्गस्येत्यधिकृतम्। तदाह—**असंयोगपूर्व इत्यादि। शृणुयात्।** श्रुधातोर्लिङस्तिपि 'श्रुवः शृ च' इति श्रुवः श्रादेशे श्नुप्रत्यये च कृते णत्वे यासुडागमेऽनुबन्धलोपे 'लिङः सलोपोऽनन्त्यस्ये'ति सलोपे 'इतश्चे'तीकारलोपे 'शृणुयात्' इति।

---

(२) लट् (मस्-पूर्ववत्)=शृण्मः-शृणुमः। (३) श्रु+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यासकार्य, वृद्धि और 'आव्' आदेश)=शुश्राव। लिट् (वस्, मस्)=शुश्रुव, शुश्रुम। (४) लुट्—श्रोता (आर्धधातुक गुण)। (५) लृट्—श्रोष्यति। (६) श्रु+लोट् (=तिप्=ति, शप् के विषय में श्नु, श्रु=शृ, 'उ'='ओ'—गुण, णत्व)—शृणोति (ति=तातङ् विकल्प से) =शृणुतात्। पक्ष में (इ=उ)=शृणोतु। (७) ('तस्' के अपित् सार्वधातुक होने से ङिद्वद्-भाव होने पर गुण-निषेध)=शृणुताम्। (८) श्रु+लोट् (=झि, झ्=अन्त, शृ, श्नु, णत्व)—शृणु अन्ति (उ=व्—'यण्'—'हुश्नुवोः')—शृण्वन्ति (इ=उ)=शृण्वन्तु।

(५६१) पद—उतः, च, प्रत्ययात्, असंयोगपूर्वात्। **अनुवृत्ति**—हेः, लुक्। **विधिसूत्र।**

मूलार्थ—असंयोगपूर्वक प्रत्यय के उकार से परे 'हि' का लुक् होता है। शृणु-शृणुतात् इत्यादि।

विमर्श—'अङ्गस्य' का अधिकार है। 'चिणो लुक्' (६।४।१०४) से 'लुक्' और 'अतो हेः' से 'हेः' पदों की अनुवृत्ति आती है। इस प्रकार—"असंयोगपूर्व जो प्रत्यय का उकार, तदन्त अङ्ग से परवर्ती 'हि' का लुक् हो जाता है"।

उदाहरण—(१) श्रु+लोट् (=सिप्=सि, श्रु=शृ, श्नु, णत्व, सि=हि)—शृणु हि (हि=तातङ्='तात्'—विकल्प से)=शृणुतात्। तातङ् के अभाव पक्ष में ('हि' का लुक्—'उतश्च प्रत्ययादसंयोगपूर्वात्')=शृणु।

(२) मध्यमपुरुष 'थस्', 'थ' में 'तम्' और 'त' आदेश होने पर—शृणुतम्, शृणुत।

(३) श्रु+लोट् (=मिप्=मि, श्रु=शृ, श्नु, णत्व, मि=नि—'मेर्निः')—शृ णु नि (आट्='आ'—'आडुत्तमस्य पिच्च' 'उ=ओ'—गुण, ओ=आव्)=शृणवानि।

(४) उ० पु० वस्, मस् में—शृणवाव, शृणवाम।

लङ् लकार—(१) प्रथमपुरुष ए० व०—अशृणोत्। द्वि० व०—अशृणुताम्। ब० व०—यण् होकर—अशृण्वन्।

(२) मध्यमपुरुष ए० व०—अशृणोः। द्वि० व०—अशृणुतम्। ब० व०—अशृणुत।

(३) उत्तमपुरुष ए० व०—अशृणवम्। द्वि० व०, बहुवचन में विकल्प से उकार का लोप—'लोपश्चान्यतरस्याम्०'—अशृण्व-अशृणुव। अशृण्म-अशृणुम।

विधिलिङ्—(१) श्रु+लिङ् (=तिप्, श्रु=शृ, श्नु, णत्व, यासुट्=यास्)—शृणु यास् ति ('इ' का लोप, 'स्' का लोप)=शृणुयात्। (२) तस्—शृणुयाताम्।

पदान्तात् ६।१।९३। अपदान्तादवर्णादुसि पररूपमेकादेशः स्यात् । शृणुयुः । शृणुयाः । शृणुयातम् । शृणुयात । शृणुयाम् । शृणुयाव । शृणुयाम । श्रूयात् । अश्रौषीत् । अश्रोष्यत् । गम्लृ, सृप्लृ गतौ । **(५६३) इषुगमियमां छः ७।३।७७।** शिति ।

---

(५६२) **उस्यपदान्तादिति** । अत्र 'एकः पूर्वपरयोः' इत्यधिकृतम् । 'आद् गुणः' इत्यस्मादादित्यनुवर्तते, 'एङि पररूपम्' इत्यस्मात्पररूपमिति च । तदाह—**अपदान्तादिति** । **शृणुयुः** । श्रुधातोर्लिङः स्थाने झिप्रत्यये झेर्जुसादेशेऽनुबन्धलोपे 'श्रुवः शृ चे'-त्यनेन 'शृ'आदेशे श्नुप्रत्यये णत्वे यासुटि, सकारलोपे 'उस्यपदान्तात्' इति पररूपे सस्य रुत्वे विसर्गे च कृते 'शृणुयुः' इति ।

(५६३) **इषुगमीति** । अत्र 'ष्ठिवुक्लमुचमामि'त्यतः 'शिती'त्यनुवर्तते । **गच्छति** । गम्धातोः लटि, तिपि, अनुबन्धलोपे 'तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शप्यनुबन्धलोपे 'गम् अ ति' इति जाते 'इषुगमियमां छः' इति

---

(५६२) पद—उसि, अपदान्तात् । **अनुवृत्ति**—एकः पूर्वपरयोः, आत्, पररूपम् । **विधिसूत्र** ।

मूलार्थ—अपदान्त अवर्ण से 'उस्' परे रहते पूर्व-पर के स्थान में पररूप एकादेश होता है। शृणुयुः। इत्यादि ।

विमर्श—'एकः पूर्वपरयोः' का अधिकार है। 'आद् गुणः' (६।१।८४) से 'आत्' तथा 'एङि पररूपम्' (६।१।९१) से 'पररूपम्' की अनुवृत्ति आ रही है। तदनुसार—"अपदान्त अवर्ण से (उत्तर में) 'उस' परे रहते पूर्व-पर (अ+उ) के स्थान में पररूप एकादेश होता है" ।

उदाहरण—(१) श्रु=लिङ् (=झि=जुस्=उस् , श्रु=शृ, श्नु, णत्व)—शृ णु उस् (यासुट्=यास्, स् का लोप, आ+उ=उ—पररूप, स्=र् , र्=:)=शृणुयुः । विधिलिङ् के रूप इस प्रकार हैं—

	एक०	द्वि०	बहु०
प्र० पु०—	शृणुयात्	शृणुयाताम्	शृणुयुः
म० पु०—	शृणुयाः	शृणुयातम्	शृणुयात
उ० पु०—	शृणुयाम	शृणुयाव	शृणुयाम

(२) आशीर्लिङ् में 'अकृत्सार्व०' से दीर्घ होकर—श्रूयात् ।

(३) लुङ् में 'सिचि वृद्धि०' से वृद्धि होकर—अश्रौषीत् ।

लुङ् लकार के रूप—

	एक०	द्वि०	बहु०
प्र० पु०—	अश्रौषीत्	अश्रौष्टाम्	अश्रौषुः ।
म० पु०—	अश्रौषीः	अश्रौष्टम्	अश्रौष्ट ।
उ० पु०—	अश्रौषम्	अश्रौष्व	अश्रौष्म ।

(४) लृङ् लकार में—अश्रोष्यत्

√गम्लृ और √सृप्लृ धातुओं का अर्थ=जाना है।

(५६३) पद—इषुगमियमाम् , छः । **अनुवृत्ति**—शिति । **विधिसूत्र**।

मूलार्थ—'शित्' प्रत्यय के परवर्ती रहने पर इष्, गम् और यम् धातुओं को छकारान्त आदेश होता है।

गच्छति । जगाम । (५६४) गमहनजनखनघसां लोपः क्ङित्यनङि ६।४।९८ । एषामुपधाया लोपः स्यादजादौ क्ङिति, न त्वङि । जग्मतुः । जग्मुः । जगमिथ, जगन्थ । जग्मथुः । जग्म । जगाम-जगम । जग्मिव । जग्मिम । गन्ता । (५६५) गमेरिट् परस्मैपदेषु ७।२।५८ । गमेः परस्य सादेरार्द्धधातुकस्येट् परस्मैपदेषु । गमिष्यति ।

'अलोऽन्त्यस्ये'ति परिभाषया अन्त्यस्य मकारस्य स्थाने छादेशे जाते 'छे च' इति तुकि 'स्तोः श्चुना श्चुः' इति श्चुत्वे 'गच्छति' इति रूपम् । **जगाम इति ।** गम्धातोर्लिटि, तिपि, 'परस्मैपदानामि'त्यादिना तिपः स्थाने णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्ये'ति .द्वित्वेऽभ्यासत्वे हलादिशेषे 'कुहोश्चुः' इति गकारस्य जकारे 'अत उपधायाः' इति वृद्धौ 'जगाम' इति रूपम् ।

(५६४) **गमहनेति ।** 'ऊदुपधायाः' इत्यतः 'उपधायाः' इत्यनुवर्तते । 'अचि श्नु०' इत्यस्मादनुवृत्तस्य अचीत्यस्य अङ्गाक्षिप्तप्रत्ययविशेषणतया तदादिविधिरित्याह—**एषामित्यादिना ।**

(५६५) **गमेरिडिति ।** 'सेऽसिचि' इत्यस्मात् 'से' इत्यनुवर्तते । तेन आर्धधातु-

विमर्श—यहाँ 'ष्ठिवुक्लमुचमां शिति' (७।३।७५) से 'शिति' पद की अनुवृत्ति आती है । इस प्रकार इष्, गम् और यम् धातुओं के अन्त्य अल् को 'छ्' आदेश होता है, शित् परे रहते ।

उदाहरण—(१) √गम्+लट् (=तिप्=ति, शप्-अ, 'अलोऽन्त्यस्य' परिभाषा के सहकार से 'इषुगमि०' से म्=छ् आदेश, तुक्, श्चुत्व)=गच्छति । (२) √गम्+लिट् (=तिप्=णल्=अ)—गम् अ, (द्वित्व, अभ्यास संज्ञा, हलादि शेष, ग्=ज्—'कुहोश्चुः', वृद्धि—'अत उपधायाः')=जगाम ।

(५६४) पद—गमहनजनखनघसाम्, लोपः, क्ङिति, अनङि । **अनुवृत्ति—**अचि, उपधायाः । **विधिसूत्र ।**

मूलार्थ—अजादि कित्, ङित् प्रत्यय के परवर्ती रहने पर गम्, हन्, जन्, खन्, घस् धातुओं की उपधा का लोप होता है । किन्तु अङ् के परे लोप नहीं होता । जग्मतुः, जग्मुः । इत्यादि ।

विमर्श—'अङ्गस्य' का अधिकार है । 'अचि श्नु०' (६।४।७७) से 'अचि' तथा 'ऊदुपधाया गोहः' (६।४।८९) से 'उपधायाः' की अनुवृत्ति आती है । तदनुसार—'अङ्-भिन्न अजादि कित्, ङित् प्रत्यय के परे रहते गम् आदि अङ्गों की उपधा का लोप हो जाता है' ।

उदाहरण—(१) √गम्+लिट् (=तस्=अतुस्)—गम् अतुस् (द्वित्व, अभ्यास संज्ञा, हलादिशेष, ग्=ज्)—जगम् अतुस् ('अ' उपधा का लोप—'गमहन०', स्=रु=ः)= जग्मतुः । लिट् के रूप इस प्रकार होते हैं—

√गम् लिट् लकार

	एक०	**द्वि०**	**बहु०**
प्र० पु०—	जगाम	जग्मतुः	जग्मुः
म० पु०—	जगमिथ-जगन्थ,	जग्मथुः	जग्म
उ० पु०—	जगाम-जगम,	जग्मिव	जग्मिम

(२) √गम्+लुट् (=तिप्, तास्, तिप्=डा=आ)—गम् तास् आ (म्=ं'नश्चापदान्तस्य झलि', परसवर्ण—'अनुस्वारस्य ययि०')=गन्ता ।

(५६५) पद—गमेः, इट्, परस्मैपदेषु । **अनुवृत्ति—**से, आर्धधातुकस्य । **विधिसूत्र ।**

गच्छतु । अगच्छत् । गच्छेत् । गम्यात् । (५६६) **पुषादिद्युताद्यॢदितः परस्मैपदेषु ३।१।५५** । श्यन्विकरणपुषादेर्द्युतादेर्ऌदितश्च परस्य च्लेरङ्, परस्मैपदेषु । अगमत् । अगमिष्यत् । सर्पति । (५६७) **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ६।१।५८** । उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम्वा, झलादावकिति । स्रप्ता–सर्प्ता । स्रप्स्यति–

कस्येत्यनुवृत्तं विशेष्यते । तदादिविधिस्तदाह—**गमेः परस्येत्यादि** । **गमिष्यति** । गम्धातोर्लृटि, तिपि 'स्यतासी लृलुटोः' इति स्यप्रत्यये 'गमेरिट् परस्मैपदेषु' इतीडागमेऽनुबन्धलोपे षत्वे कृते 'गमिष्यती'ति ।

(५६६) **पुषादीति** । अत्र 'च्लेः सिच्' इत्यतः च्लेरिति, 'अस्यतिवक्ति०' इत्यतः अङिति चानुवर्तते । पुषादिधातवस्तु दिवादय एव गृह्यन्ते । तदाह—**श्यन्विकरणेति** । **अगमत्** । गम्धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपेऽडागमेऽनुबन्धलोपे च 'अगम् ति' इति जाते च्लौ 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति च्लेरङादेशे 'इतश्च' इतीकारलोपे 'अगमत्' इति रूपम् ।

(५६७) **अनुदात्तस्येति** । अत्र 'सृजिदृशोर्झल्यमकिति' इत्यस्मात् झलीति, अमिति, अकिति, 'उपदेशेऽज्०' इत्यतः उपदेश इति चानुवर्तते । अत आह—**उपदेश इत्यादिना** । **स्रप्तेति** । सृप्धातोः लुटि, तिपि 'स्यतासी लृलुटोः' इति तास्प्रत्यये 'लुटः प्रथमस्ये'ति

मूलार्थ—परस्मैपद के परवर्ती रहने पर गम् धातु से परे सादि आर्धधातुक को 'इट' का आगम होता है । गमिष्यति इत्यादि !

विमर्श—प्रकृत सूत्र में 'आर्धधातुकस्येड् वलादेः' (७।२।३५) से 'आर्धधातुकस्य' तथा 'सेऽसिचि' (७।२।५७) से 'से' पद की अनुवृत्ति आ रही है । अतः 'गम् धातु से उत्तर सकारादि आर्धधातुक को परस्मैपदसंज्ञक प्रत्यय के परे रहते इट् (इ) का आगम होता है' ।

उदाहरण—(१) √गम्+लृट् (=तिप्, स्य, इट् का आगम—'गमेरिट्०' षत्व)= गमिष्यति । (२) √गम्+लोट् (=तिप्=ति, शप्–अ, म्=छ्—'इषुगमि०' तुक्, श्चुत्व)—गच्छति (इ=उ—'एरुः')=गच्छतु । (३) लङ्—अगच्छत् । (४) विधिलिङ्—गच्छेत् । (५) आशीर्लिङ्—गम्यात् ।

(५६६) **पद**—पुषादिद्युताद्यॢदितः, परस्मैपदेषु । **अनुवृत्ति**—च्लेः, अङ् । **विधिसूत्र** ।

मूलार्थ—परस्मैपद के परे रहते श्यन्-विकरण पुषादि, द्युतादि तथा ऌदित् धातुओं से परे 'च्लि' के स्थान में 'अङ' आदेश होता है । अगमत् इत्यादि ।

विमर्श—यहाँ पूर्वसूत्र 'च्लेः सिच्' (३।१।४४) से 'च्लेः' और 'अस्यतिवक्तिख्यातिभ्योऽङ्' (३।१।५२) से 'अङ्' पद की अनुवृत्ति आती है । तदनुसार—'पुषादि, द्युतादि और ऌदित् धातुओं से च्लि के स्थान में अङ् (=अ) आदेश होता है, परस्मैपद के परे रहते' ।

उदाहरण—(१) √गम्+लुङ् (=तिप्=ति, अट्, च्लि, इ का लोप, च्लि=अङ्= अ—'पुषादि०')=अगमत् । (२) लृङ्—अगमिष्यत् । (३) √सृप्+लट् (=तिप्=ति, शप्–अ, 'पुगन्त०' से गुण—ऋ=अ, रपर)=सर्पति ।

(५६७) **पद**—अनुदात्तस्य, च, ऋदुपधस्य, अन्यतरस्याम् । **अनुवृत्ति**—झल्यमकिति, उपदेशे । **विधिसूत्र** ।

मूलार्थ—कित्-भिन्न झलादि प्रत्यय के परे रहते उपदेशावस्था में जो अनुदात्त ऋदुपध धातु, उसको अम् (=अ) आगम विकल्प से होता है । स्रप्ता–सर्प्ता । असृपत् इत्यादि ।

सर्प्स्यति । ससृपत् । ञिक्ष्विदा अव्यक्ते शब्दे । क्ष्वेदति । यभ मैथुने । यभति । वेट् । येभिथ । (५६८) **झषस्तथोर्धोऽधः ८।२।४०** । झषः परयोस्तथयोर्धः स्यान्न तु दधातेः । ययब्ध । यब्धा । णम प्रह्वत्वे, शब्दे च । नेमिथ–ननन्थ । नन्ता । नंस्यति । अनंसीत् । अनंसिष्टाम् । त्यज हानौ । त्यजति । तत्याज । तत्यजिथ–तत्यक्थ । त्यक्ता ।

तिपः डादेशे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति विकल्पेन अमागमे यणि 'स्रप्ता' इति । अमागमाऽभावे तु—लघूपधगुणे रपरे 'सर्प्ता' इति ।

(५६८) **झषस्तथोरिति** । झष इति पञ्चमी । तश्च थश्चेति द्वन्द्वः । 'अधः' इति षष्ठ्यन्तं पदम् । तेन धाधातुभिन्नस्येति लभ्यते । अत आह—**झषः परयोरिति** ।

नमिथ । णमधातोः 'णो नः' इति णस्य नत्वे लिटि सिपि थलि, द्वित्वे भारद्वाजमते वेटि एत्वेऽभ्यासलोपे च कृते 'नेमिथ' इति । इडागमाभावपक्षे तु 'ननम् थ' इति जाते मस्यानुस्वारे परसवर्णे च कृते 'ननन्थ' इति ।

विमर्श—प्रकृत सूत्र में 'सृजिदृशोर्झल्यमकिति' (६।१।५७) सूत्र से 'झलि, अम् , अकिति' तथा—'उपदेशेऽशिति' (६।१।४४) से 'उपदेशे' की अनुवृत्ति आ रही है । तदनुसार—'झलादि कित्-भिन्न प्रत्यय के परवर्ती रहने पर उपदेश अवस्था में अनुदात्त ऋकारोपध धातु को अम् (=अ) का आगम विकल्प से होता है' ।

उदाहरण—(१) √सृप्+लुट् (=तिप् , तास् , तिप्=डा=आ, टिलोप)—सृप् आ (विकल्प से अम्=अ आगम—'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्', ऋ=र्—यण्)=स्रप्ता । 'अम्' के अभावपक्ष में—गुण—ऋ=अ, रपर=सर्प्ता । (२) इसी प्रकार लृट् में—स्रप्स्यति, सर्प्स्यति । (३) √सृप्+लुङ् (=तिप्=ति, इलोप, च्लि, च्लि=अङ्=अ—'पुषादिद्युताद्य॰' ङित् होने से गुण का निषेध, अट् आगम)=असृपत् ।

√ञिक्ष्विदा का अर्थ—अस्पष्ट शब्द करना है । 'ञि' की इत्संज्ञा होकर लोप हो जाता है । (१) √क्ष्विद्+लट् (तिप्=ति, शप्–अ, गुण—'पुगन्त॰')=क्ष्वेदति ।

√यभ धातु मैथुन अर्थ में है । (१) लट्—यभति ।

(५६८) पद—झषः, तथोः, धः, अधः । **विधिसूत्र** ।

मूलार्थ—'दधाति' को छोड़कर 'झष्' से परे 'त, थ' को 'ध' होता है ।

उदाहरण—(१) √यभ्+लिट् (=सिप्=थल्=थ, द्वित्व, अभ्यास संज्ञा, हलादिशेष—य यभ् थ (भारद्वाज-नियम से विकल्प से इट्, एत्व, अभ्यास का लोप—'थलि च सेटि)= येभिथ । इट् न होने पर पक्ष में—ययभ् थ (थ्=ध्—'झषस्तथोर्धोऽधः', भ्=ब्—जश्त्व)= ययब्ध । (२) √यभ्+लुट् (=तिप्=डा=आ, तास्)—यभ् तास् आ (टिलोप, त=ध्—'झषस्तथोः' जश्त्व)=यब्धा ।

√णम धातु का अर्थ प्रह्वत्व और शब्द है ।

(१) णम् ('णो नः' से 'ण्'='न्')—नम्+लिट् (=सिप्=थल्=थ, द्वित्व, अभ्यास संज्ञा, हलादिशेष)—ननम् थ (भारद्वाज मत से विकल्प से इट्=इ, एत्व, अभ्यासलोप)= नेमिथ । इट् के अभावपक्ष में एत्वाभ्यासलोप न होने पर ('न नम् थ' म्=-अनुस्वार, परसवर्ण)=ननन्थ । (२) लुट्—नन्ता । (३) लृट्—नंस्यति । (४) लुङ्—अनंसीत्, अनंसिष्टाम् ।

अत्याक्षीत् । अत्याक्ताम् अत्यक्ष्यत् । अक्षू व्याप्तौ । **(५६९) अक्षोऽन्यतरस्याम् ३।१।७५ । श्नुः स्याद्वा कर्तरि सार्वधातुके । पक्षे-शप् । अक्ष्णोति । अक्षति । आनक्ष । आनक्षतुः । आनक्षुः । आनक्षिथ-आनष्ठ । अक्षिता-अष्टा । अक्षिष्यति । 'स्कोरि'ति कलोपः । (५७०) षढोः कः सि ८।२।४१ । अक्ष्यति । अक्ष्णोतु । अक्ष्णुहि । अक्ष्णवानि ।**

---

(५६९) **अक्षोऽन्यतरस्यामिति** । अत्र 'स्वादिभ्यः श्नुरि'त्यतः श्नुरिति 'कर्तरि शबि'त्यतः कर्तरीति 'सार्वधातुके यगि'त्यतः सार्वधातुक इति चानुवर्तते । **अक्ष्णोतीति** । अक्षधातोर्लटि तिपि शपि प्राप्ते 'अक्षोऽन्यतरस्याम्' इति शपं बाधित्वा श्नुप्रत्ययेऽनुबन्धलोपे सार्वधातुकसंज्ञायां गुणे णत्वे 'अक्ष्णोती'ति । श्नुप्रत्ययस्याऽभावपक्षे शपि 'अक्षति' इति ।

अक्षिता । ऊदित्—अक्षूधातोर्लुटि तिपि, तिपः डादेशे, तासि, डित्वाट्टिलोपे 'स्वरतिसूति०' इति ऊदित्वाद् वैभाषिके इडागमे सति 'अक्षिता' इति । इडभावे च संयोगान्तलोपे कुत्वे 'अष्टा' इति ।

(५७०) **षढोः कः सीति** । स्पष्टम् ।

√त्यज् धातु का अर्थ—हानि (=त्यागना) है । (१) लट्—त्यजति । (२) लिट्-तत्याज । (३) लिट् म० पु० ए० व०—विकल्प से इट् होकर—तत्यजिथ-तत्यक्थ । (४) लुट्—त्यक्ता । (५) लुङ् प्र० पु० एकव०—अत्याक्षीत् (हलन्तलक्षणा वृद्धि) । (६) लुङ् प्र० पु० द्वि० व०—अत्याक्ताम् । (७) लृङ्—अत्यक्ष्यत् ।

√अक्षू (ऊदित्) धातु का अर्थ—व्याप्त होना है ।

(५६९) पद—अक्षः, अन्यतरस्याम् । **अनुवृत्ति**—श्नुः, कर्तरि, सार्वधातुके । **विधिसूत्र**।

मूलार्थ—कर्त्रर्थक सार्वधातुक के परे रहते अक्ष् धातु से विकल्प से श्नु प्रत्यय होता है । अक्ष्णोति-अक्षति ।

विमर्श—यहाँ—'स्वादिभ्यः श्नुः' (३।१।७३) से 'श्नुः', 'कर्तरि शप्' (३।१।६८) से 'कर्तरि' और 'सार्वधातुके यक्' (३।१।६७) से 'सार्वधातुके' की अनुवृत्ति आती है । इस प्रकार—'कर्तृवाची सार्वधातुक परे रहते अक्ष् धातु से विकल्प से श्नु प्रत्यय होता है' ।

उदाहरण—(१) √अक्ष्+लट् (=तिप्=ति, प्राप्त 'शप्' का बाधकर विकल्प से श्नु =नु—'अक्षोऽन्यतरस्याम्' सार्वधातुक संज्ञा, गुण, णत्व)=अक्ष्णोति । 'श्नु' के अभावपक्ष में शप्—अक्षति । (२) अक्ष्+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, हलादिशेष)—अ अक्ष् अ (अभ्यास को दीर्घ—'अत आदेः' नुट्=न्—'तस्मान्नुड् द्विहलः')=आनक्ष । (३) लिट् प्र० पु० द्वि० व०—आनक्षतुः । (४) लिट् प्र० पु० ब० व०—आनक्षुः । (४) लिट् म० पु० ए० व०—भारद्वाज-मत में विकल्प से इट् होकर—आनक्षिथ । 'इट्' के अभावपक्ष में—आ न क्ष् थ (संयोगान्त लोप, ष्टुत्व)=आनष्ठ ।

(५) √अक्ष्+लुट् (=तिप्=डा=आ, तास्)—अक्ष् तास् आ (विकल्प से इट्='इ' का आगम—'स्वरतिसूति०', टिलोप)=अक्षिता । इट् के अभाव में—अक्ष् ता ('स्कोः' से 'क्' का लोप, ष्टुत्व—त=ट्)=अष्टा ।

(६) लृट्—अक्षिष्यति (विकल्प से इट्) ।

(५७०) पद—षढोः, कः सि । **विधिसूत्र**।

मूलार्थ—सकार के परे रहते ष् और ढ् के स्थान में 'क्' आदेश होता है ।

आक्ष्णोत् । आक्ष्णवम्-अक्ष्णुयात् । अक्ष्णुयाताम् । अक्ष्णुयुः । अक्ष्यात् । आक्षीत् । आक्षिष्टाम् । आष्टाम् । आक्षिषुः । तक्षू त्वक्षू तनूकरणे । (५७१) तनूकरणे तक्षः ३।१।७६ । श्नुर्वा शब्विषये । तक्ष्णोति, तक्षति वा काष्ठम् । ततक्ष । ततक्षिथ-ततष्ठ । अतक्षीत् । अतक्षिष्टाम् । अताक्षीत् । अताष्टाम् । तनूकरणे किम् ? वाग्भिः सन्तक्षति ।

---

(५७१) **तनूकरण इति ।** अत्र 'स्वादिभ्यः श्नुरि'त्यतः श्नुरिति, 'कर्तरि शबि'-त्यतः कर्तरीति, 'सार्वधातुके यगि'त्यतश्च सार्वधातुके इति चानुवर्तते । तनूकरणेऽर्थे विद्यमानाद्धातोः श्नुः स्यात्कर्त्रर्थे सार्वधातुके परे इति फलितार्थः । **तक्ष्णोति ।** तक्षधातोर्लटि तिपि, प्राप्तं शपं प्रबाध्य 'तनूकरणे तक्षः' इति विकल्पेन श्नुप्रत्ययेऽनुबन्ध-

---

उदाहरण—लृट् में 'इट्' के अभावपक्ष में—अक्ष् स्य ति ('क्' का लोप—'स्कोः०', षत्व, 'ष्'='क्'—'षढोः कः सि', क् ष्=क्ष्)=अक्ष्यति ।

(२) अ√क्ष्=लोट् (=तिप्=ति, विकल्प से श्नु=नु)—अ क्ष् नु ति (णत्व, गुण, 'इ'='उ'—'एरुः')=अक्ष्णोतु । (३) लोट् म० पु० ए० व०—अक्ष्णुहि । (४) लोट् उ० पु० ए० व०—अक्ष्णवानि । (५) अक्ष्+लङ्=आक्ष्णोत् । (६) लङ्—उ० पु० एकवचन—आक्ष्णवम् । (७) विधिलिङ् प्र० पु० ए० व०—अक्ष्णुयात् । द्वि० व०—अक्ष्णुयाताम् । ब० व०—अक्ष्णुयुः । (८) आशीर्लिङ्—अक्ष्यात् । (९) लुङ् प्र० पु० ए० व०—आक्षीत् । (१०) अक्ष्+लुङ् (=तस्=ताम्, च्लि=सिच्=स्, विकल्प से इट्)—अक्ष् इ स् ताम् (आट्, वृद्धि, षत्व, ष्टुत्व)=आक्षिष्टाम् । इट् न होने पर पक्ष में—आक्ष् स् ताम् ('झलो झलि' से 'स्' का लोप, 'स्कोः०' से 'क्' का लोप, ष्टुत्व से 'त्'='ट्')=आष्टाम् ।

(११) लुङ् प्र० पु० ब० व०—आक्षिषुः, आक्षुः ।

√तक्षू, त्वक्षू धातु तनूकरण (=कम करना) अर्थ में हैं ।

(५७१) पद—तनूकरणे, तक्षः । **अनुवृत्ति**—श्नुः, कर्तरि, सार्वधातुके । **विधिसूत्र ।**

मूलार्थ—तनूकरण (सूक्ष्म) अर्थ में तक्ष् धातु से विकल्प से श्नु होता है, शप् के विषय में । तक्ष्णोति, तक्षति वा काष्ठम् इत्यादि ।

विमर्श—प्रकृत सूत्र में 'स्वादिभ्यः श्नुः' (३।१।७३) से 'श्नुः' 'कर्तरि शप्' (३।१।६८) से 'कर्तरि' और 'सार्वधातुके यक्' (३।१।६७) से 'सार्वधातुके' पद की अनुवृत्ति आ रही है । 'अक्षोऽन्यतरस्याम्' (३।१।७५) से 'अन्यतरस्याम्' की अनुवृत्ति आती है । इस प्रकार—'तक्ष् धातु से तनूकरण (=सूक्ष्म करना, छीलना) अर्थ में कर्तृवाची सार्वधातुक के परवर्ती रहने पर विकल्प से 'श्नु' प्रत्यय होता है ।

उदाहरण—(१) √तक्ष्+लट् (=तिप्=ति, विकल्प से 'श्नु'—'तनूकरणे तक्षः')—तक्ष् नु ति (गुण—उ=ओ, णत्व)=तक्ष्णोति । 'श्नु' के अभाव पक्ष में (शप्-अ)=तक्षति । (२) लिट् प्र० पु० ए० व०—ततक्ष । (३) लिट् म० पु० ए० व० (विकल्प से इट्)=ततक्षिथ । इट् के अभाव में—ततष्ठ । (४) √तक्ष्+लुङ् (=तिप्=ति, इ का लोप, अट्, च्लि=सिच्=स्)—अ तक्ष स त् (विकल्प से इट्, ईट्, 'स्' का लोप, प्राप्त हलन्तलक्षणा वृद्धि का 'नेटि' से निषेध)=अतक्षीत् । इट् के अभाव पक्ष में वृद्धि—अताक्षीत् । (५) लुङ् प्र० पु० द्वि० व०—अतक्षिष्टाम्, अताष्टाम् (विकल्प से इट्) ।

प्रत्युदाहरण—प्रकृत सूत्र के द्वारा तनूकरण (=छीलना) अर्थ में ही श्नु प्रत्यय होता है । अतः 'भर्त्सना' अर्थ में श्नु नहीं होता । 'वाग्भिः सन्तक्षति ।'

भर्त्सयतीत्यर्थः। रक्ष पालने। रक्षति। णिक्ष चुम्बने। प्रणिक्षति। वक्ष रोषे। सङ्घाते इत्येके। वक्षति। मृक्ष सङ्घाते। मक्ष इत्येके। तक्ष त्वचने। त्वचनं संवरणम्, त्वचो ग्रहणं च। पक्ष परिग्रहे इत्येके। सूर्क्ष आदरे। सूर्क्षति। सुसूर्क्ष। काक्षि वाक्षि माक्षि काङ्क्षायाम्। द्राक्षि ध्राक्षि ध्वाक्षि घोरवाशिते च। चूष पाने। तूष तुष्टौ। पूष वृद्धौ। पूषति। मूष स्तेये। लूष रूष भूषायाम्। शूष प्रसवे। यूष हिंसायाम्। जूष च। भूष अलङ्कारे। जि जये। जयति। **(५७२) सन्लिटोर्जेः ७।३।५७।** सन्लिण्निमित्तादभ्यासात्परस्य जेः कुत्वम्। जिगाय। जिग्यतुः। जिगयिथ–जिगेथ। जीव प्राणधारणे। जीवति। पीव् मीवं तीव णीव स्थौल्ये। पीवति। पिपीव। मुर्वी

लोपे 'तक्ष् नु ति' इति जाते, गुणे णत्वे च कृते 'तक्ष्णोति' इति। श्नोरभावे तु—शपि 'तक्षति' इति।

(५७२) **सन्लिटोर्ज इति**। सूत्रेऽस्मिन् 'सन्लिटोरि'त्यत्र निमित्तसप्तमी, अभ्यासेऽन्वेति। 'अभ्यासाच्चे'ति सूत्रात् 'अभ्यासात्' चजोः कु घिण्ण्यतोः' इत्यस्मात् 'कु' इति चानुवर्तते। तदाह मूले—**सन्लिण्निमित्त इत्यादिना**। **जिगाय**। जिधातोर्लिटि, तत्स्थाने तिपि, तिपः णलादेशेऽनुबन्धलोपे, धातोर्द्वित्वे पूर्वस्याभ्यासत्वे 'जि जि अ' इति जाते 'अचो ञ्णिति' इति वृद्धौ आयादेशे 'सन्लिटोर्जेः' इति जकारस्य कुत्वेन गकारे कृते 'जिगाय' इति सिद्धम्।

√रक्ष् धातु का अर्थ—पालन करना है। रक्षति।

√णिक्ष् धातु का अर्थ—चुम्बन करना है। प्रणिक्षति।

√वक्ष धातु का अर्थ—क्रोध करना है। कोई आचार्य संघात अर्थ में इसका प्रयोग करते हैं। √मृक्ष संघात अर्थ में है। कोई 'म्रक्ष' को संघात में कहते हैं।

√तक्ष्—त्वचन अर्थ में है। त्वचन का अर्थ—संवरण है। √त्वच् का अर्थ—ग्रहण करना है। √सूर्क्ष का अर्थ—आदर करना है। लट्—सूर्क्षति। लिट् में—सुसूर्क्ष।

√काक्षि, वाक्षि, माक्षि—आकाङ्क्षा अर्थ में हैं। √द्राक्षि, ध्राक्षि और ध्वाक्षि—घोर शब्द करना अर्थ में हैं। √चूष धातु का अर्थ—चूषना है। √तूष का अर्थ—तुष्टि प्राप्त करना है। √पूष का अर्थ—बढ़ना है। √मूष् का अर्थ—चोरी करना है। √लूष, रूष—भूषा (=सँवरना) अर्थ में हैं। √शूष का अर्थ—प्रसव है। √यूष और जूष धातुएँ—हिंसा अर्थ में हैं। भूष् का अर्थ—अलंकृत होना है।

√जि धातु का अर्थ—जीतना है।

(५७२) पद—सन्लिटोः, जेः। **अनुवृत्ति**—अभ्यासात्, कु। **विधिसूत्र**।

मूलार्थ—सन् और लिट् निमित्तक अभ्यास से परवर्ती 'जि' धातु को कुत्व होता है। जिगाय इत्यादि।

विमर्श—यहाँ 'अभ्यासाच्च' (७।३।५५) सूत्र से 'अभ्यासात्' और 'चजोः कु घिण्ण्यतोः' (७।३।५२) से 'कु' पद की अनुवृत्ति आती है। तदनुसार—"सन् और लिट् निमित्तक अभ्यास से परे 'जि' के अङ्ग को क-वर्ग आदेश होता है"।

उदाहरण—√जि+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा)—जिजी अ (इ=ऐ—वृद्धि—'अचो ञ्णिति', ऐ=आय्, अभ्यास से परवर्ती—ज्=ग्—'सन्लिटोर्जेः')=जिगाय।

बन्धने । **(५७३) उपधायां च ८।२।७८ ।** धातोरुपधाभूतयोः रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात् । मूर्वति । पूर्व पर्व मर्व पूरणे । पूर्वति । पर्वति । मर्वति । चर्व अदने । चर्वति । कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः । शेषति । शिशेष । शेष्टा । **(५७४) शल इगुपधादनिटः क्सः ३।१।४५ ।** इगुपधो

---

(५७३) **उपधायां चेति** । अत्र 'सिपि धातोरि'त्यतः 'धातोरि'ति, 'र्वोरुपधाया दीर्घ इकः' इत्यतः र्वोरिक इति, दीर्घ इति, 'हलि चे'त्यतः हलीति चानुवर्तते । तदाह—**धातोरित्यादि** ।

(५७४) **शल इगुपधेति** । च्लेरित्यनुवर्तते । शल इति पञ्चमी । अत आह—**इगुपध इति** । **अशिक्षत्** । शिष्धातोः लुङि, तत्स्थाने तिप्यनुबन्धलोपे, 'इतश्चे'तीकारलोपे च्लौ, 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशेऽनुबन्धलोपे अङ्गस्याडागमे

---

(२) लिट् प्र० पु० द्वि० व०—जिग्यतुः । (३) अजन्त होने से 'थल्' में विकल्प से इट् होकर—जिगयिथ, जिगेथ ।

√जीव धातु का अर्थ—प्राण धारण करना है । लट्—जीवति ।

√पीव, मीव, तीव, णीव धातु—'स्थूलता' अर्थ में हैं । पीवति । लिट्—पिपीव ।

√मुर्वी धातु—बन्धन अर्थं में हैं ।

(५७३) पद—उपधायाम्, च । **अनुवृत्ति**—धातोः, र्वोरिकः, दीर्घः, हलि । **विधिसूत्र ।**

मूलार्थ—धातु के उपधाभूत हल्परक रेफ और वकार से परवर्ती इक् को दीर्घ आदेश होता है ।

विमर्श—यहाँ 'सिपि धातोः०' (८।२।७४) से 'धातोः' पद की अनुवृत्ति आती है । 'र्वोरुपधाया दीर्घ इकः' (८।२।७६) से र्वोः, इकः, दीर्घः एवं 'हलि च' से 'हलि' पद की अनुवृत्ति आती है । तदनुसार—'हल् के परवर्ती रहने पर उपधाभूत रेफ एवं वकार से परे इक् को दीर्घ होता है ।

उदाहरण—मुर्व्+लट् (=तिप्=ति, शप्-अ, उ=ऊ-'दीर्घ'—'उपधायां च')= मूर्वति ।

√पूर्व, पर्व और मर्व धातुओं का अर्थ—पूरण है । लट् प्र० पु० ए० व०—पूर्वति । पर्वति । मर्वति ।

√चर्व धातु—भक्षणार्थक है । चर्वति ।

√कष, खष, शिष, जष, झष, शष, वष, मष, रुष और रिष धातुएँ—हिंसार्थक हैं ।

√शिष्+लट् (=तिप्, शप्, गुण)=शेषति । लिट् प्र० पु० ए० व०—शिशेष । लुट्—प्र० पु० ए० व०—शेष्टा ।

(५७४) पद—शलः, इगुपधात्, अनिटः, क्सः । **अनुवृत्ति**—च्लेः । लुङि । **विधिसूत्र ।**

मूलार्थ—इगुपध शलन्त धातु से अनिट 'च्लि' के स्थान में 'क्स' आदेश होता है । अशिक्षत् ।

विमर्श—'धातोः' का अधिकार है । 'च्लि लुङि' (३।१।४३) से 'लुङि' और 'च्लेः सिच्' से 'च्लेः' पद की अनुवृत्ति आ रही है । अतः शलन्त इक् उपधावाली धातु से अनिट् 'च्लि' के स्थान में 'क्स' (स) आदेश होता है ।

उदाहरण—(१) √शिष्+लुङ् (=तिप्=ति, इकार का लोप, च्लि, च्लि=क्स=

यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः । अशिक्षत् । (५७५) **तीषसहलुभरुषरिषः ७।२।४९ ।** इच्छत्यादेः परस्य तादेरार्द्धधातुकस्येड् वा । रोषिता–रोष्टा । रेषिता–रेष्टा । भष भर्त्सने । इह भर्त्सनं–श्वरवः । पुष पुष्टौ । पोषिता । अनुदात्तेषु 'पुष्ये'ति श्यना निर्देशादयमुदात्तः । अङ्विधौ दैवादिकस्य ग्रहणान्नाङ् । अपोषीत् । श्रिषु श्लिषु प्रुषु प्लुषु दाहे । श्रेषति । श्लेषति । प्रोषति । प्लोषति ।

इति परस्मैपदप्रक्रिया ।

'अ शिष् स त्' इति जाते, 'षढोः कः सि' इति षकारस्य ककारे 'आदेशप्रत्यययोः' इति सकारस्य षत्वे उभयोः संयोगेन क्षत्वे 'अशिक्षत्' इति सिद्धम् ।

(५७५) **तीषसहेति** । तीति सप्तम्युपादानात्तदादिविधिः । 'आर्धधातुकस्ये'त्यतः 'आर्धधातुकस्येड्' इति, 'स्वरतिसूती'त्यतश्च वेत्यनुवर्तते । तदाह—**इच्छत्यादेः परस्येत्यादिना । रोषितेति ।** रुषधातोः लुटि, तिपि, तासि, तिपः स्थाने डादेशेऽनुबन्धलोपे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'तीषसहलुभरुषरिषः' इति विकल्पेन इडागमेऽनुबन्धलोपे 'पुगन्तलघूपधस्य चे'त्यनेन गुणे 'रोषिता' इति । इडभावे तु ष्टुत्वे कृते 'रोष्टा' इति रूपम् ।

'स')—शिष् स त (अट्, 'क्' का लोप, पूर्व 'ष्'—'क्'—'षढोः कः सि', 'स'='ष'—'आदेशप्रत्यययोः')—अ शिक् ष त् (क्+ष्=क्ष्)=अशिक्षत् ।

(५७५) पद—ति, इषसहलुभरुषरिषः । **अनुवृत्ति**—वा, आर्धधातुकस्य इट् । **विधिसूत्र ।**

मूलार्थ—इष्, सह्, लुभ्, रुष् और रिष् धातुओं से परवर्ती तादि आर्धधातुक को विकल्प से 'इट्' का आगम होता है ।

विमर्श—'अङ्गस्य' का अधिकार है । 'आर्धधातुकस्येड् वलादेः' (७।२।३५) से—'आर्धधातुकस्येड्' तथा 'स्वरतिसूति' (७।२।४४) से 'वा' पदों की अनुवृत्ति आती है । 'ति' सप्तम्यन्त होने से तदादिविधि होती है । तदनुसार—'इष्, सह्, लुभ्, रुष् और रिष् धातुओं से परवर्ती तकारादि आर्धधातुक को विकल्प से इट् का आगम होता है ।

उदाहरण—(१) √रुष्+लुट् (=तिप्, तास्, तिप्=डा=आ, 'टि' का लोप)—रुष् ता (विकल्प से इट्='इ' का आगम—'तीषसहलुभ०' 'उ'='ओ',—गुण—'पुगन्त०')=रोषिता । 'इट्' के अभाव पक्ष में—रुष् ता (ष्टुत्व, गुण)=रोष्टा ।

(२) √रिष् धातु से लुट् प्र० पु० ए० व०—रेषिता, रेष्टा ।

√भष धातु भर्त्सन अर्थ में है । कुत्ते के शब्द को भर्त्सन कहते हैं ।

√पुष धातु का 'पुष्टि' अर्थ है । लुट् में—पोषिता ।

अनुदात्त धातुओं के परिगणन (अनिट् कारिका) में 'पुष्य' में श्यन् निर्देश से दिवादिगण पठित अनिट् है और यह शप्-विकरण (भ्वादि) वाली पुष् धातु उदात्त (सेट्) है । अतः दिवादि गण में पुषादि सूत्र से होने वाला 'च्लि' को अङ् आदेश यहाँ नहीं होता ।

√पुष+लुङ् (=तिप्=ति, 'इ' का लोप, अट्, च्लि=सिच्=स्)—अ पुष् स् त (इट्, ई, 'स्' का लोप, दीर्घ, प्राप्त वृद्धि का 'नेटि' से निषेध, गुण)=अपोषीत् ।

√श्रिष्, श्लिष्, प्रुष् और प्लुष् धातुएँ—दाह अर्थ में हैं । लट्—श्रेषति । श्लेषति । प्रोषति ! प्लोषति ।

इति परस्मैपद-प्रक्रिया ।

अथात्मनेपदम्

एध वृद्धौ । (५७६) **टित आत्मनेपदानां टेरे ३।४।७९ ।** टितो लस्यात्मनेपदानां टेरेत्वम् । एधते । (५७७) **आतो ङितः ७।२।८१ ।** अतः परस्य ङितामात

---

(५७६) **टित आत्मनेपदानामिति ।** 'लस्ये'त्यधिकृतम् । तदाह मूले—**टितो लस्येति । एधते ।** 'एध् वृद्धौ' इत्यस्माद्धातोः 'वर्तमाने लट्' इति लटचनुबन्धलोपे 'तिप्तस्झी'त्यादिना लस्य स्थाने सर्वे आदेशाः प्राप्ताः । 'अनुदात्तङित आत्मनेपदम्' इति एध् धातोरनुदात्तत्वात् 'तङानामात्मनेपदम्' इति त आताम् झेत्यादीनामात्मनेपदसंज्ञत्वात् तेषां प्राप्तिर्जाता । तत्र प्रथमपुरुषगतैकत्वविवक्षायां 'त' प्रत्यये 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शप्यनुबन्धलोपे 'एध् अ त' इति जाते, तकारोत्तरवर्तिन अकारस्य टिसंज्ञायां 'टित आत्मनेपदानां टेरे' इति टिसंज्ञकस्याकारस्य एत्वे 'एधते' इति सिद्धम् ।

(५७७) **आतो ङित इति ।** 'अतो येयः' इत्यस्मात् 'अतः' इति, इय इति चानुवर्तते । यकारादकार उच्चारणार्थः । तदाह—**अतः परस्येति ।**

भ्वादि-प्रकरण में परस्मैपदी धातुओं के रूपों की साधनिका प्रदर्शित करने के पश्चात् आत्मनेपदी धातुओं की साधनिका (=सिद्धि-प्रकार) का आरम्भ √एध् (=बढ़ना) धातु से करते हैं ।

(५७६) पद—टितः, आत्मनेपदानाम्, टेः, ए । **विधिसूत्र ।**

मूलार्थ—'टित्' लकार सम्बन्धी आत्मनेपद प्रत्ययों की 'टि' को एत्व होता है । एधते ।

विमर्श—'लस्य' का अधिकार है । अतः "टित् लकारों के स्थान में जायमान आत्मनेपद प्रत्ययों की 'टि' को एकार आदेश होता है" ।

'एध्' धातु से कर्ता अर्थ में 'लट्' लकार होने पर इसके स्थान में आत्मनेपदी तङ् प्रत्यय होते हैं । 'एध' धातु का अकार इत्संज्ञक और अनुदात्त है । अतः 'अनुदात्तङित आत्मनेपदम्' सूत्र के अनुसार 'तिप्तस्झि०' इत्यादि सूत्र से क्रमशः त, आताम्, झ इत्यादि आदेश होते हैं ।

उदाहरण—(१) √एध्+लट् (=प्र० पु० ए० व०—त)—एध् त, (सार्वधातुक संज्ञा होकर शप्-'अ'—'कर्तरि शप्')—एध् अ त (अ—'टि'=ए—'टित आत्मनेपदानां टेरे')=एधते ।

(५७७) पद—आतः, ङितः । **अनुवृत्ति**—अतः, इयः । **विधिसूत्र ।**

मूलार्थ—अत् (=ह्रस्व अकार) से परवर्ती ङित् सम्बन्धी आकार को इय् आदेश होता है । एधेते । एधन्ते ।

विमर्श—यहाँ 'अतो येयः' (७।२।८०) से 'अतः' और 'इयः' पदों की अनुवृत्ति अपेक्षित है । अतः अकार से परवर्ती ङित् प्रत्ययों के आकार के स्थान में 'इय्' आदेश होता है ।

उदाहरण—(१) √एध्+लट् (ल्=प्र० पु० द्वि० व०—आताम्, शप्-'अ')—एध् अ आताम् ('आताम्' अपित् सार्वधातुक होने से ङिद्वत् है । अतः 'आ'='इय्'—'आतो ङितः')—एध इय् ताम् (अ+इ='ए'—गुण, 'य्' का लोप—'लोपो व्योर्वलि' 'टि' आम्=ए—'टित आत्मनेपदानाम्०')=एधेते । (२) √एध्+लट् (=प्र० पु० ब० व०—झ, शप्-अ, झ्=अन्त्—'झोऽन्तः')—एध अन्त ('टि'=अ=एत्व, अ+अ='अ'—पररूप)=एधन्ते ।

इय् स्यात्। एधेते। एधन्ते। (५७८) थासः से ३।४।८०। टितो लस्य थासः से स्यात्। एधसे। एधेथे। एधध्वे। एधे। एधावहे। एधामहे। (५७९) इजादेश्च गुरुमतोऽनृच्छः ३।१।३६। इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम् लिटि। (५८०) आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य १।३।६३। आम्प्रकृत्या तुल्यमनुप्रयुज्य-

---

(५७८) **थासः से।** लस्येत्यधिकृतम्। 'टित आत्मनेपदानामि'त्यतः 'टितः' इत्यनुवर्तते। तदाह—**टितो लस्येति।**

(५७९) **इजादेश्चेति।** 'धातोरेकाच' इत्यतो धातोरित्यनुवर्तते, 'कास्प्रत्ययादि'-त्यतः आमिति लिटीति चानुवर्तते। अत आह मूले—**इजादिरित्यादिना।**

(५८०) **आम्प्रत्ययवदिति।** तृतीयान्ताद्वतिः। 'आम्प्रत्ययवदि'त्यत्र अतद्गुण-

---

(५७८) पद—थासः, से। **अनुवृत्ति**—टितः। **विधिसूत्र।**

मूलार्थ—'टित्' लकार सम्बन्धी 'थास्' के स्थान में 'से' आदेश होता है। एधसे इत्यादि।

विमर्श—'लस्य' का अधिकार है। 'टित आत्मनेपदानां टेरे' (३।४।७९) से 'टितः' पद की अनुवृत्ति आने से—टित् लकारों के 'थास्' के स्थान में 'से' आदेश होता है।

उदाहरण—(१) √एध्+लट् (=म० पु० ए० व०—थास्, शप्-अ, थास्='से'—'थासः से')=एधसे। (२) एध्+लट् (=म० पु० द्वि० व०—आथाम्)—एध् आथाम् (शप्-अ, आ=इय्—'आतो ङितः', अ+इ='ए' गुण, (टि=) आम्=ए—'टित आत्मने०')=एधेथे। (३) √एध्+लट् (=म० पु०—ब० व०—ध्वम्, शप्=अ)—एध् अ ध्वम् ('टि' =अम्=ए)=एधध्वे। (४) √एध्+लट् (=उ० पु० ए० व०—इट्, शप्)—एध् अ इ (इ=ए)—एध ए (अ+ए=ए—पररूप—'अतो गुणे')=एधे। (५) √एध्+लट् (=उ० पु० द्वि० व०—वहि, शप्)—एध् अ वहि ('टि'—इ=ए, अ='आ'—दीर्घ—'अतो दीर्घो यञि')=एधावहे। (६) √एध्+लट् (=उ० पु० ब० व०—महि, शप्)—एध् अ महि (टि—इ=ए, दीर्घ)=एधामहे।

√एध् (=बढ़ना) लट् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०—	एधते	एधेते	एधन्ते
म० पु०—	एधसे	एधेथे	एधध्वे
उ० पु०—	एधे	एधावहे	एधामहे

(५७९) पद—इजादेः, च, गुरुमतः, अनृच्छः। **अनुवृत्ति**—धातोः, आम्, लिटि। **विधिसूत्र।**

मूलार्थ—ऋच्छ् धातु से भिन्न इजादि और गुरुमान् धातु से 'आम्' प्रत्यय होता है, लिट् के परे रहते।

विमर्श—प्रकृत सूत्र में 'धातोरेकाचः' (३।१।२२) से 'धातोः' तथा—'कास्प्रत्ययादाममन्त्रे लिटि' से 'आम्' और 'लिटि' पदों की अनुवृत्ति आती है। तदनुसार—'लिट् लकार के परवर्ती रहने पर इजादि तथा गुरुमान् (गुरु संज्ञा युक्त) धातु से (ऋच्छ् को छोड़कर) 'आम्' प्रत्यय होता है।

(५८०) पद—आम्प्रत्ययवत्, कृञः, अनुप्रयोगस्य। **अनुवृत्ति**—आत्मनेपदम्। **विधिसूत्र।**

मानात्कृञोऽप्यात्मनेपदं स्यात्। (५८१) लिटस्तझयोरेशिरेच् ३।४।८१। लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः। एकारोच्चारणं ज्ञापकं—'तङादेशानां टेरेत्वं ने'ति। तेन डारौरसां न। एधाञ्चक्रे। एधाञ्चक्राते। एधाञ्चक्रिरे। एधाञ्चकृषे। एधा-

---

संविज्ञानो बहुव्रीहिः, तेन आम्प्रत्ययविनिर्मुक्तः, आम्प्रत्ययस्य प्रकृतिभूतो धातुरेव गृह्यते। अनुप्रयुज्यत इत्यनुप्रयोगः। पञ्चम्यर्थे षष्ठी। तदाह—**आम्प्रकृत्येत्यादिना।**

(५८१) **लिटस्तझयोरिति।** स्पष्टम्। 'एश्' इत्यत्र शित्त्वात्सर्वादेशार्थं शित्करणम्। **एधाञ्चक्रे।** एध् धातोः 'परोक्षे लिट्' इति लिटि, 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परके कृञोऽनुप्रयोगे 'एध् आम् कृ लिट्' इति स्थिते, लिटः स्थाने प्रथमपुरुषगतैकत्वविवक्षायां तादेशे 'लिट् चे'त्यनेन आर्धधातुकसंज्ञायां 'लिटस्तझयोरेशिरेच्' इत्यनेन तकारस्य स्थाने एशादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्ये'त्यनेन द्वित्वे प्राप्ते, तं परत्वात् प्रबाध्य 'इको यणची'ति यणादेशे प्राप्ते, तस्य 'द्विर्वचनेऽची'ति निषेधे, पुनः प्रसङ्गविज्ञानात् धातो-

---

मूलार्थ—आम् प्रकृति के तुल्य 'कृञ्' धातु से भी आतमनेपद होता है।

विमर्श—यहाँ 'अनुदात्तङित आत्मनेपदम्' (१।३।१२) से 'आत्मनेपदम्' की अनुवृत्ति आ रही है। सूत्रस्थ 'आम्प्रत्ययवत्' में 'वत्' प्रत्यय 'इव' के अर्थ में है। यहाँ अतद्गुणसंविज्ञान बहुव्रीहि समास है। 'आम् प्रत्ययो यस्मात्' (=आम् प्रत्यय हुआ है जिससे) विग्रह है। कृञ् धातु ञित् होने से उभयपदी है। अतः कर्तृभिन्न परगामी क्रिया का फल होने पर परस्मैपद की प्राप्ति होती है। तब प्रकृत सूत्र द्वारा व्यवस्था की जाती है कि जिस धातु से आम् हुआ है, वह धातु यदि आतमनेपद है तो अनुप्रयुक्त √कृञ् से भी आतमनेपद होता है; अन्यथा नहीं। अतएव प्रकृत में आम् √एध् (आत्मनेपदी) से हुआ है, इसलिए अनुप्रयुक्त कृञ् से भी आत्मनेपद होता है। 'गोपायाञ्चकार' में आत्मनेपद नहीं हुआ। क्योंकि यहाँ आम् की प्रकृति 'गुप्' धातु परस्मैपदी है।

(५८१) पद्—लिटः, तझयोः, एशिरेच्। **विधिसूत्र।**

मूलार्थ—लिट् के स्थान में आदेश हुए 'त' ओर 'झ' के स्थान में क्रमशः 'एश्' और 'इरेच्' आदेश होता है। एधाञ्चके इत्यादि।

विमर्श—'एश्' में शकार इत्संज्ञक होने से सम्पूर्ण 'त' के स्थान में आदेश होता है। 'इरेच्' में चकार इत्संज्ञक है। अनेकाल् होने से सम्पूर्ण 'झ' के स्थान में होता है।

एकारोच्चारणमिति—यहाँ आशङ्का होती है कि सूत्र में 'एश्' के स्थान में 'इश्' का लाघवार्थ उच्चारण किया जाता, 'टित आत्मनेपदानाम्' से एत्व होकर रूप सिद्धि हो जाती, पुनः 'एश्' आदेश में एकार का उच्चारण क्यों किया ? वह एकारोच्चारण व्यर्थ होकर ज्ञापन करता है कि तङादेश की 'टि' को एकारादेश नहीं होता। अतः 'डा, रौ रस्' की टि को भी एकार आदेश नहीं हुआ।

उदाहरण—(१) एध्+लिट् (आम्—'इजादेश्च गुरुमतोऽनृच्छः' लिट् का लोप—'आमः') —एध् आम् (लिट्परक 'कृ' का अनुप्रयोग)—एध् आम् कृ लिट् ('आम्प्रत्ययवत्०' से आत्मनेपद होने पर लिट्=प्र० पु० ए० व०—'त')—एधाम् कृ त (आर्धधातुक संज्ञा, त=एश् =ए—'लिटस्तझयोरेशिरेच्')—एधाम् कृ ए ('लिटि धातोः०' से द्वित्व, अभ्यास संज्ञा, 'उरत्'

ञ्चक्राथे । (५८२) **इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८।३।७८ ।** इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः । एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । एधामास । अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न । अन्यथा हि—'कृञ्चानु-

---

द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायाम् 'उरत्' इत्यभ्यासऋवर्णस्य अत्वे 'उरण् रपरः' इति रपरत्वे 'एध् आम् कर् कृ ए' इति जाते, हलादिशेषे 'कुहोश्चुः' इति ककारस्य चकारे, लिटः कित्त्वात् 'क्ङिति चे'त्यनेन गुणनिषेधे 'इको यणची'ति यणि 'मोऽनुस्वारः' इति मकारस्यानुस्वारे 'वा पदान्तस्ये'ति विकल्पेन परसवर्णे 'एधाञ्चक्रे' इति ।

(५८२) इण इति । षीध्वं लुङ्लिट् एषां द्वन्द्वः । इण इत्यङ्गविशेषणत्वात् तदन्तविधिः । 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् । घकारस्य ढकारो मूर्धन्यः । अत आह—**इण्णन्तादिति । एधाञ्चकृढ्वे ।** एध्धातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि, 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परके कृञनुप्रयोगे, लिटः स्थाने मध्यमपुरुषबहुवचनविवक्षायां ध्वमि, 'लिटि धातोरनभ्यासस्ये'ति कृञो द्वित्वेऽभ्यासत्वे 'उरत्' इत्यत्वे रपरे हलादिशेषे 'एधाम् क कृ ध्वम्' इति जाते

से ऋ=अ, रपर, हलादिशेष, 'क्'='च्'—'कुहोश्चुः', 'ऋ'='र्'—'यण्')—एधाम् चक्रे (म =अनुस्वार ं='ञ्' परसवर्ण—'वा पदान्तस्य')=एधाञ्चक्रे ।

(२) √एध्+लिट् (आम्, लिट् का लोप)—एधाम् (लिट्परक कृ का अनुप्रयोग, लिट्=प्र० पु० द्वि० व०—आताम्, पूर्ववत् द्वित्वादि कार्य 'टि'=आम्=ए)=एधाञ्चक्राते । (३) प्र० पु० ब० व० 'झ' में—झ=इरेच् (=इरे) आदेश होने पर (शेष पूर्ववत् कार्य)= एधाञ्चक्रिरे । (४) म० पु० ए० व० में थास्='से' आदेश (थासः से') होने पर षत्व, वलादि आर्धधातुक होने से प्राप्त 'इट्' का 'कृसृभृवृस्तु०' से निषेध)=एधाञ्चकृषे । (५) म० पु० द्वि० व०—आथाम् (पूर्ववत् कार्य, टि आम् को एत्व)=एधाञ्चक्राथे ।

(५८२) पद—इणः, षीध्वंलुङ्लिटाम्, धः, अङ्गात् । **अनुवृत्ति**—अपदान्तस्य मूर्द्धन्यः । **विधिसूत्र ।**

मूलार्थ—इण्णन्त अङ्ग से परवर्ती 'षीध्वम्' और लुङ्, लिट् सम्बन्धी धकार को ढकार (मूर्द्धन्य) आदेश होता है । एधाञ्चकृढ्वे इत्यादि ।

विमर्श—'अपदान्तस्य मूर्धन्यः' (८।३५५) का अधिकार है । तदनुसार उक्त अर्थ निष्पन्न होता है ।

उदाहरण—(१) √एध्+लिट् (आम्, लिट् का लुक्)—एध् आम् (लिट्परक कृ का अनुप्रयोग)—एधाम् कृ लिट् (ल=म० पु० ब० व०—ध्वम्, 'कृ' धातु को द्वित्व, अभ्यास संज्ञा, ऋ='अ'—'उरत्', रपर, हलादिशेष, 'क्'='च्'—'कुहोश्चुः')—एधाम् च कृ ध्वम् ('ध्' ='ढ्'—'इणः षीध्वम्०', अम्=एत्व, अनुस्वार, परसवर्ण)=एधाञ्चकृढ्वे । (२) 'एध्' से लिट् उ० पु० ए० व०—इट् में 'टि' को एत्व (शेष कार्य पूर्ववत्)=एधाञ्चक्रे । (३) लिट् उ० पु० द्वि० व० 'वहि' में—पूर्ववत् कार्य एत्व होकर—एधाञ्चकृवहे । (४) लिट् उ० पु० ब० व० 'महि' में—एधाञ्चकृमहे ।

—भूधातु के अनुप्रयोग में एधाम्बभूव आदि और अस् के अनुप्रयोग में 'एधामास' आदि रूप बनते हैं ।

प्रयुज्यते' इति, 'कृभ्विति' वा ब्रूयात् । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे । (५८३) धि च ८।२।२५ । धादौ प्रत्यये परे सलोपः स्यात् । एधिताध्वे । (५८४) ह एति ७।४।५२ । तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे ।

'कुहोश्चुः' इति कस्य चत्वे 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इति धकारस्य ढकारे मकारस्यानुस्वारे वा परसवर्णे च कृते 'टित आत्मनेपदानां टेरे' इत्यमः टिसंज्ञकस्यैत्वे 'एधाञ्चकृढ्वे' इति रूपम् । **अनुप्रयोगसामर्थ्यादिति** । अन्यथा—असमेव वा भुवमेव वा अनुप्रयुञ्जीत ।

(५८३) 'धि चे'ति । 'सः स्यार्धधातुके' इत्यतः स इत्यनुवर्तते । 'तासस्त्योः' इत्यतो लोप इति । अङ्गाक्षिप्तप्रत्ययो धीत्यनेन विशेष्यते, तेन तदादिविधिस्तदाह—**धादाविति । एधिताध्वे ।** एध्धातोर्लुटचनुबन्धलोपे लः स्थाने मध्यमपुरुषबहुवचने ध्वमि, तासि, आर्धधातुकत्वात् इडागमे 'धि चे'ति सलोपे 'टित आत्मनेपदानां टेरे' इत्यनेन टिसंज्ञकस्यामः एत्वे 'एधिताध्वे' इति ।

(५८४) ह एति । ह इति प्रथमान्तम् । स इति, तासस्त्योरिति चानुवर्तते ।

√एध् लिट् लकार ('कृ' का अनुप्रयोग) के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	एधाञ्चक्रे	एधाञ्चक्राते	एधाञ्चक्रिरे
म० पु०—	एधाञ्चकृषे	एधाञ्चक्राथे	एधाञ्चकृढ्वे
उ० पु०—	एधाञ्चक्रे	एधाञ्चकृवहे	एधाञ्चकृमहे

अनुप्रयोगसामर्थ्यादिति । अनुप्रयुज्यमान √अस् के स्थान में अनुप्रयोग सामर्थ्य से भू आदेश (अस्तेर्भूः) नहीं होता । अन्यथा 'कृस्' कहने से ही कार्य निर्वाह हो जाता । अनुप्रयोगार्थ भू ग्रहण व्यर्थ होगा । अथवा 'कृभू' के अनुप्रयोग के लिए 'कृभू चानुप्रयुज्येते' ऐसा सूत्र किया जाता । पृथक् अस् ग्रहण व्यर्थ हो जाता ।

(१) एध्+लुट् (ल्=प्र० पु० ए० व०—'त')—एध् त (तास्—'स्यतासी लृलुटोः', त=डा='आ'—'लुटः प्रथमस्य०' इट्)—एधितास् आ ('टि' आस् का लोप)=एधिता । (२) लुट् प्र० पु० द्वि० व० (परस्मैपदी धातु के समान)—एधितारौ । (३) लुट्—प्र० पु० ब० व०—एधितारः । (४) म० पु० ए० व०—थास्=से, 'तासस्त्योर्लोपः' से 'स्' का लोप होकर—एधितासे । (५) म० पु० द्वि० व०—आथाम् में 'टि' आम् को एत्व होकर—एधितासाथे ।

(५८३) पद—धि, च । **अनुवृत्ति**—सः, लोपः । **विधिसूत्र ।**

मूलार्थ—धकारादि प्रत्यय के परवर्ती रहने पर सकार का लोप होता है ।

विमर्श—प्रकृत सूत्र में 'सः स्यार्धधातुके' (७।४।४९) से 'सः' तथा 'तासस्त्योर्लोपः' (७।४।५०) से 'लोपः' पदों की अनुवृत्ति आती है । तदनुसार—'धकारादि प्रत्यय के परे रहते सकार का लोप होता है' ।

उदाहरण—√एध्+लुट् (ल्=म० पु० ब० व०—ध्वम्, तास् , इट्)—एधितास् ध्वम् ('स्' का लोप—'धि च', 'अम्'='ए'—'टित आत्मनेपदानाम्०')=एधिताध्वे ।

(५८४) पद—ह, एति । **अनुवृत्ति**—सः, तासस्त्योः । **विधिसूत्र ।**

एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे । (५८५) आमेतः ३।४।९० । लोट एत आम् । एधताम् । एधेताम् । एधन्ताम् । (५८६) सवाभ्यां वामौ ३।४।

अत आह—**तासस्त्योरिति । एधिताहे ।** एध्धातोः लुटि, तत्स्थाने उत्तमपुरुषैकवचने इटि, तासि, इडागमे, इट इकारस्यैत्वे 'ह एति' इति सकारस्य हकारे कृते 'एधिताहे' इति रूपम् ।

(५८५) आमेत इति । 'लोटो लङ्वदि'त्यतः लोट इत्यनुवर्तते । तदाह—**लोट इति । एधताम् ।** एध्धातोर्लोटि, तत्स्थाने प्रथमपुरुषगतैकत्वविवक्षायां तादेशे,

---

मूलार्थ—एकार के परवर्ती रहने पर 'तास्' और 'अस्ति' के सकार को हकार आदेश होता है।

विमर्श—यहाँ 'सः स्यार्धधातुके' से 'सः' तथा 'तासस्त्योर्लोपः' (७।४।५०) से 'तासस्त्योः' की अनुवृत्ति आती है। अतः "एकार के परे रहते 'तास्' और 'अस्' के सकार को हकार आदेश होता है"।

उदाहरण—(१) एध्+लुट् (ल्=उ० पु० ए० व०—इट्, तास्, इट्)—एधितास् इ (इ=ए—'टित आत्मने०', 'स्'='ह्'—'ह एति')=एधिताहे । (२) लुट्—उ० पु० द्वि० व० —एधितास्वहे । (३) लुट् उ० पु० ब० व०—एधितास्महे ।

√एध्, लुट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	—एधिता	एधितारौ	एधितारः
म० पु०	—एधितासे	एधितासाथे	एधिताध्वे
उ० पु०	—एधिताहे	एधितास्वहे	एधितास्महे

लृट् लकार के रूपों की साधनिका बतलाई जा रही है—

(१) √एध्+लृट् (ल्=प्र० पु० ए० व० 'त' 'स्य'—'स्यतासी लृलुटोः' आर्धधातुक संज्ञा होकर इट्='इ' आगम)—एधि स्य त ('स्'='ष्'—'आदेशप्रत्यययोः' 'अ'='ए'—'टित आत्मने०')=एधिष्यते । इस प्रकार यहाँ विशेष कार्य 'टि' को एकार आदेश होता है। (२) एध्+लृट्—प्र० पु० द्वि० व०—आताम् (स्य, इट्, आम्=ए, 'आ'='इय्'—'आतो ङितः', 'य्' का लोप—'लोपो व्योर्वलि', अ+इ='ए'—गुण, षत्व)=एधिष्येते । (३) लृट् प्र० पु० ब० व०—एधिष्यन्ते । (४) लृट् म० पु० ए० व०—एधिष्यसे । (५) लृट् म० पु० द्वि० व०—एधिष्येथे । (६) लृट् म० पु० ब० व०—एधिष्यध्वे । (७) लृट् उ० पु० ए० व०—एधिष्ये । (८) लृट् उ० पु० ब० व०—वहि ('टि' को एत्व, स्य, इट्, दीर्घ—'अतो दीर्घो यञि' षत्व)= एधिष्यावहे । (९) लृट् उ० पु० ब० व०—एधिष्यामहे ।

√एध् धातु लृट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	—एधिष्यते	एधिष्येते	एधिष्यन्ते
म० पु०	—एधिष्यसे	एधिष्येथे	एधिष्यध्वे
उ० पु०	—एधिष्ये	एधिष्यावहे	एधिष्यामहे

(५८५) पद—आम्, एतः । **अनुवृत्ति**—लोटः । **विधिसूत्र ।**

मूलार्थ—लोट् लकार सम्बन्धी एकार को 'आम्' आदेश होता है। एधताम् इत्यादि ।

९१। सवाभ्यां परस्य लोडेतः क्रमाद्वाऽमौ स्तः। एधस्व। एधेथाम्। एधध्वम्। (५८७) एत ऐ ३।४।९३। लोडुत्तमस्य एत ऐ स्यात्। आमोऽपवादः। एधै। एधावहै। एधामहै। आटश्च। ऐधत। ऐधेताम्। ऐधन्त। ऐधेथाः। ऐधेथाम्। ऐधध्वम्।

सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे, शित्त्वात् सार्वधातुकत्वे 'टित आत्मनेपदानामि'ति तकाराकारस्यैत्वे 'आमेतः' इति एकारस्यामादेशे 'एधताम्' इति।

(५८६) **सवाभ्यामिति।** सश्च वश्चेति सवौ, ताभ्याम्, वश्च अम् च वामौ। 'लोटो लङ्वत्' इत्यतः लोट इति, 'आमेतः' इत्यतश्च एत इत्यनुवर्तते। अत आह—**सवाभ्यां परस्येति। एधस्व।** एध्धातोर्लोटि, तत्स्थाने मध्यमपुरुषैकवचने थासि, शपि, 'थासः से' इति थासः स्थाने 'से' इत्यादेशे 'सवाभ्यां वामौ' इत्यनेन सकारात्परस्यैकारस्य वादेशे 'एधस्वे'ति सिद्धम्।

(५८७) **एत ऐ।** 'लोटो लङ्वदि'त्यस्मात् लोट इति, 'आडुत्तमस्ये'त्यस्मादुत्तमस्य चेत्यनुवर्तते। तदाह—**लोडुत्तमस्येति। एधै।** एध्धातोर्लिटि, लः स्थाने उत्तम-

---

विमर्श—प्रकृत सूत्र में 'लोटो लङ्वत्' (३।४।८५) सूत्र से 'लोटः' पद की अनुवृत्ति आ रही है। अत एव—लोट् लकार के एकार के स्थान में 'आम्' आदेश होता है।

उदाहरण—(१) √एध्+लोट् ('ल्'=प्र० पु० ए० व०—'त' शप्-'अ')—एध् अ त ('अ'='ए'—'टित आत्मनेपदानां टेरे')—एधते ('ए'='आम्'—'आमेतः')=एधताम्। (२) √एध्+लोट् (प्र० पु० द्वि० व०—आताम्, लट् के समान कार्य होकर—एधेते—ए= आम्)=एधेताम्। (३) एध्+लोट् (=झ, शप्, झ्=अन्त, अ=एत्व, पररूप, ए=आम्) =एधन्ताम्।

(५८६) पद—सवाभ्याम्, वामौ। **अनुवृत्ति**—लोटः, एतः। **विधिसूत्र।**

मूलार्थ—सकार और वकार से परवर्ती लोट् लकार सम्बन्धी एकार को क्रमशः 'व' और 'अम्' आदेश होते हैं। 'एधस्व' इत्यादि।

विमर्श—यहाँ 'लोटो लङ्वत्' (३।४।८५) से 'लोटः' और 'आमेतः' (५८६) से 'एतः' पदों की अनुवृत्ति आती है। तदनुसार—"सकार और वकार से परे लोट् लकार के एकार को क्रम से 'व' और 'अम्' आदेश होते हैं"।

उदाहरण—(१) √एध्+लोट् (=म० पु० ए० व०—'थास्', शप्, 'थास्'='से'—'थासः से')—एधसे ('ए'='व'—'सवाभ्यां वामौ')=एधस्व। (२) √एध्+लोट् (=म० पु० द्वि० व०—'आथाम्' शप्, आ=इय्, गुण, 'य्' का लोप)=एधेथाम्। (३) √एध+लोट् (=म० पु० ब० व०—'ध्वम्' शप्, 'टि' अम्=एत्व)—एधध्वे ('ए'='अम्'—'सवाभ्याम्०') =एधध्वम्।

(५८७) पद—एतः, ऐ। **अनुवृत्ति**—लोटः, उत्तमस्य। **विधिसूत्र।**

मूलार्थ—लोट् लकार सम्बन्धी उत्तमपुरुष के एकार को ऐकार आदेश होता है। एधै इत्यादि।

विमर्श—'लोटो लङ्वत्' (३।४।८५) से 'लोटः' तथा 'आडुत्तमस्य पिच्च' (३।४।९२) से 'उत्तमस्य' पदों की अनुवृत्ति आती है। इस प्रकार लोट् लकार के उत्तमपुरुष के एकार के स्थान में 'ऐ' आदेश होता है।

उदाहरण—(१) √एध्+लोट् (=उ० पु० ए० व०—इट्='इ', शप्-'अ')—एध्

ऐधे। ऐधावहि। ऐधामहि। (५८८) **लिङः सीयुट्** ३।४।१०२। 'लिङः सलोपोऽनन्त्यस्ये'ति सलोपः। (५८९) **लोपो व्योर्वलि** ३।१।६६। एधेत। एधेयाताम्।

पुरुषैकवचने इटि, सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इतिं इकारस्यैत्वे एकारस्य 'एत ऐ' इति ऐत्वे 'आडुत्तमस्य पिच्चे'त्याडामेऽनुबन्धलोपे 'एध आ ऐ' इति जाते, 'आटश्चे'ति वृद्धौ 'एध ऐ' इति स्थिते 'वृद्धिरेचि' इंति वृद्धौ 'एधै' इति रूपम्।

(५८८) लिङः सीयुडिति। स्पष्टम्।

अ इ ('इ'='ए'—'टित आत्मने०', ए=ऐ—'एत ऐ', आट्='आ' आगम—'आडुत्तमस्य पिच्च')—एध आ ऐ (आ+ऐ='ऐ' वृद्धि—'आटश्च')—एध ऐ (अ+ऐ=ऐ—वृद्धि—'वृद्धिरेचि')=एधै। (२) √एध्+लोट् (=उ० पु० द्वि० व०—'वहि' शप्, आट्)—एध् अ आ वहि (अ+आ='आ'—सवर्णदीर्घ, टि इ=ए, ए='ऐ'—'एत ऐ')=एधावहै। (३) √एध्+लोट् (उ० पु० ब० व०—महि, शप्, आट्, दीर्घ, एत्व, ए=ऐ)=एधामहै।

√एध् धातु लोट् लकार के रूप

एक०	द्वि०	बहु०
प्र० पु०—एधताम्	एधेताम्	एधन्ताम्
म० पु०—एधस्व	एधेथाम्	एधध्वम्
उ० पु०—एधै	एधावहै	एधामहै

लङ् लकार के रूपों की प्रक्रिया बतलाई जा रही है—

(१) √एध्+लङ् (ल्=प्र० पु० ए० व०—'त', सार्वधातुक संज्ञा, शप्='अ', आट्='आ' का आगम—'आडजादीनाम्')—आ एध् अ त (आ+ए='ऐ'—वृद्धि—'आटश्च')=ऐधत। (लङ् लकार में अजादि होने से 'आडजादीनाम्' से अङ्ग को 'आट्' का आगम होता है। 'आटश्च' से वृद्धि एकादेश होकर रूप बनते हैं।) (२) √एध्+लङ् (प्र० पु० द्वि० व०—आताम्, शप्, आ=इय, गुण, 'य्' का लोप, आट्, वृद्धि)=ऐधेताम्। (३) √एध्+लङ् (=झ, शप्, 'झ्'='अन्त' पररूप, आट्, वृद्धि)=ऐधन्त। (४) लङ् म० पु० ए० व०—ऐधथाः। (५) लङ् म० पु० द्वि० व०—ऐधेथाम्। (६) लङ् म० पु० ब० व०—ऐधध्वम्। (७) लङ् उ० पु० ए० व०—ऐधे। (८) लङ् उ० पु० द्वि० व०—ऐधावहि। (९) लङ् उ० पु० ब० व०—ऐधामहि।

√एध् लङ् लकार के रूप

एक०	द्वि०	बहु०
प्र० पु०—ऐधत	ऐधेताम्	ऐधन्त
म० पु०—ऐधथाः	ऐधेथाम्	ऐधध्वम्
उ० पु०—ऐधे	ऐधावहि	ऐधामहि

(५८८) पद—लिङः, सीयुट्। **विधिसूत्र।**

मूलार्थ—लिङ् के स्थान में आदेश हुए आत्मनेपद प्रत्ययों को 'सीयुट्' का आगम होता है। 'सीयुट्' में 'उट्' इत्संज्ञक है। 'सीय्' अवशिष्ट रहता है।

सलोप इति। 'विधिलिङ्' में 'सीयुट्' के सकार का 'लिङः सलोपोऽनन्त्यस्य' से लोप हो जाता है।

(५९०) झस्य रन् ३।४।१०५ । लिङो झस्य रन् । एधेरन् । एधेथाः । एधेयाथाम् । एधेध्वम् । (५९१) इटोऽत् ३।४।१०६ । लिङादेशस्य इटोऽत्

---

(५९०) **झस्येति ।** 'लिङः सीयुडि'त्यतो लिङ इत्यनुवर्तते । तदाह—**लिङो झस्येति ।**

(५९१) **इटोऽदिति ।** इट् अत् इति च्छेदः । 'लिङः सीयुडि'त्यतः लिङः इत्यनुवर्तते । तदाह—**लिङादेशस्येति । एधेय ।** एध्धातोर्लिङि, तत्स्थाने उत्तमपुरुषैकवचने इटि, तस्य 'इटोऽत्' इत्यनेन अकारादेशे 'लिङः सीयुट्' इति सीयुडागमेऽनुबन्ध-

---

(५८९) पद—लोपः, व्योः, वलि । **विधिसूत्र ।**

मूलार्थ—'वल्' प्रत्याहारान्तर्गत वर्णों के परवर्ती रहने पर यकार और वकार का लोप होता है ।

उदाहरण—(१) √एध्+विधिलिङ् (ल्=प्र० पु० ए० व०—'त' शप्-अ)—एध् अ त (सीयुट्='सीय्' का आगम—'लिङः सीयुट्' 'स्' का लोप—'लिङः सलोपोऽनन्त्यस्य')—एध ई य् त ('य्' का लोप—'लोपो व्योर्वलि', अ+ई=ए गुण—'आद् गुणः')=एधेत । (२) √एध्+विधिलिङ् (=प्र० पु० द्वि० व० आताम्, शप्, सीयुट्=सीय्, 'स्' का लोप)—एध ईय् आताम् (अ+ई=ए—गुण)=एधेयाताम् ।

(५९०) पद—झस्य, रन् । **अनुवृत्ति**—लिङः । **विधिसूत्र ।**

मूलार्थ—लिङ् लकार सम्बन्धी 'झ' के स्थान में 'रन्' आदेश होता है ।

विमर्श—पूर्वसूत्र 'लिङः सीयुट्' (५८९) से 'लिङः' पद की अनुवृत्ति आ रही है । तदनुसार—लिङ् के 'झ' के स्थान में 'रन्' आदेश होता है ।

उदाहरण—(१) √एध्+विधिलिङ् (ल्=प्र० पु० ब० व०—झ, शप्, सीयुट्=सीय्, 'स्' का लोप)—एध ई य् झ ('झ'='रन्'—'झस्य रन्' 'य्' का लोप, अ+ई='ए'—गुण) =एधेरन् । (२) म० पु० ए० व०—एधेथाः । (३) म० पु० द्वि० व०—एधेयाथाम् । (४) म० पु० ब० व०—एधेध्वम् ।

(५९१) पद—इटः, अत् । **अनुवृत्ति**—लिङः । **विधिसूत्र ।**

मूलार्थ—लिङादेश 'इट्' के स्थान में 'अत्' आदेश होता है ।

विमर्श—प्रकृत सूत्र में भी 'लिङः सीयुट्' (५८९) से 'लिङः' पद की अनुवृत्ति आती है । इस प्रकार—"लिङ् के स्थान में आदेश हुए 'इट्' को 'अत्' (=अ) आदेश होता है" ।

उदाहरण—(१) एध्+विधिलिङ् (ल्=उ० पु० ए० व०—'इट्' शप्, सीयुट्=सीय्, 'स्' का लोप)—एध ईय् इ (अ+ई='ए'—गुण, इ=अत्='अ'—'इटोऽत्')=एधेय । (२) एध्+विधिलिङ् (ल्=उ० पु० द्वि० व०—'वहि' शप्, सीयुट् 'स्' का लोप)—एध ईय् वहि (अ+ई='ए' गुण, 'य्' का लोप—'लोपो व्योः०')=एधेवहि । (३) एध्+विधिलिङ् (ल्=उ० पु० ब० व०—महि, शप्, सीयुट्, 'स्' का लोप, अ+ई='ए'—गुण, 'य्' का लोप) =एधेमहि ।

√एध् धातु विधिलिङ् के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०	एधेत	एधेयाताम्	एधेरन्
म० पु०	एधेथाः	एधेयाथाम्	एधेध्वम्
उ० पु०	एधेय	एधेवहि	एधेमहि

स्यात् । एधेय । एधेवहि । एधेमहि । (५९२) सुट् तिथोः ३ । ४ । १०७ । लिङस्तयोः सुट् स्यात् । यलोपः । एधिषीष्ट । एधिषीयास्ताम् । एधिषीरन् । एधिषीष्ठाः । एधिषीयास्थाम् । एधिषीध्वम् । एधिषीय । एधिषीवहि । एधिषीमहि । ऐधिष्ट । ऐधिषाताम् । (५९३) आत्मनेपदेष्वनतः ७ । १ । ५ ।

लोपे, शपि, 'लिङः सलोपोऽनन्त्यस्ये'ति सकारस्य लोपे 'आद् गुणः' इति गुणे 'एधेय' इति सिद्धम् ।

(५९२) सुट् तिथोरिति । तिश्च थ् चेति द्वन्द्वात् षष्ठीद्विवचनम् । 'लिङः सीयुट्' इत्यतो लिङ इत्यनुवर्तते । तदाह—**लिङ् इत्यादिना** । **एधिषीष्ट** । एध् धातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिषि लिङि, अनुबन्धलोपे, लः स्थाने आत्मनेपदे प्रथमपुरुषैकवचने त प्रत्यये 'लिङाशिषि' इत्यार्धधातुकसंज्ञायां 'लिङः सीयुट्' इति सीयुडागमेऽनुबन्धलोपे 'सुट् तिथोः' इति सुडागमेऽनुबन्धलोपे 'लोपो व्योर्वलि' इति यलोपे 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे 'एधि सी स् त' इति जाते 'आदेशप्रत्यययोः' इत्यनेनोभयोः सकारयोः षत्वे ष्टुत्वेन तकारस्य टकारे 'एधिषीष्ट' इति । **ऐधिष्ट** ।

(५९२) पद—सुट्, तिथोः । **अनुवृत्ति**—लिङः । **विधिसूत्र** ।

मूलार्थ—लिङ् लकार सम्बन्धी तकार-थकार को सुट् (=स्) का आगम होता है । एधिषीष्ट इत्यादि ।

विमर्श—प्रकृत सूत्र में 'लिङः सीयुट्' से 'लिङः' पद की अनुवृत्ति आती है । अतः लिङ् के स्थान में जायमान तकार एवं थकार को 'सुट्' का आगम होता है ।

उदाहरण—(१) √एध्+आशीर्लिङ् (=ल्=प्र० पु० ए० व०—'त' आर्धधातुक संज्ञा सीयुट्='सीय्'—'लिङः सीयुट्')—एध् सीय् त (सुट्='स्' का आगम—'सुट् तिथोः', 'य्' का लोप—'लोपो व्योर्वलि', इट्='इ' का आगम, दोनों 'स्'='ष्'—'आदेशप्रत्यययोः', 'त्'='ट्'—'ष्टुत्व')=एधिषीष्ट । (२) एध्+आशीर्लिङ् (=ल्=प्र० पु० द्वि० व०—'आताम्' सीयुट्=सीय्, आर्धधातुक संज्ञा, इट्, सुट्='स्' का आगम)—एध् इ सीय् आ स् ताम् ('स्'='ष्'—'आदेशप्रत्यययोः')=एधिषीयास्ताम् । (३) प्र० पु० ब० व०—एधिषीरन् (झ=रन्) । (४) म० पु० ए० व०—एधिषीष्ठाः । (५) म० पु० द्वि० व०—एधिषीयास्थाम् । (६) म० पु० ब० व०—एधिषीध्वम् । (७) उ० पु० ब० व०—एधिषीय । (८) उ० पु० द्वि० व०—एधिषीवहि । (९) उ० पु० ब० व०—एधिषीमहि ।

√एध् धातु, आशीर्लिङ् के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	एधिषीष्ट	एधिषीयास्ताम्	एधिषीरन्
म० पु०—	एधिषीष्ठाः	एधिषीयास्थाम्	एधिषीध्वम्
उ० पु०—	एधिषीय	एधिषीवहि	एधिषीमहि

'लुङ्' लकार के रूपों की प्रक्रिया बतलाई जा रही है—(१) √एध्+लुङ् (ल्=प्र० पु० ए० व०–त, शप् का बाधकर 'च्लि'—'च्लि लुङि', च्लि=सिच्='स्'—'च्लेः सिच्')—एध् स् त (आर्धधातुक संज्ञा, इट्, स्=षत्व, 'त'='ट्'—ष्टुत्व, आट्='आ'—आगम—'आडजादीनाम्', 'आ'+'ए'='ऐ'—वृद्धि—'आटश्च')=ऐधिष्ट । (२) लुङ् प्र० पु० द्वि० व०—आताम्, च्लि=सिच्, इट्, आट्, वृद्धि, षत्व)=ऐधिषाताम् ।

अनकारात्परस्याऽऽत्मनेपदेषु झस्य अत् स्यात् । ऐधिषत । ऐधिष्ठाः । ऐधिषाथाम् । ऐधिढ्वम् । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि ।

एध् धातोः 'लुङ्' इति लुङि, लः स्थाने प्रथमपुरुषैकवचने त प्रत्यये 'आडजादीनाम्' इत्याडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लौ, 'च्लेः सिच्' इत्यनेन च्लेः स्थाने सिच्यनुबन्धलोपे 'आ एध् स् त' इति जाते 'आटश्चे'ति वृद्धौ 'आर्धधातुकस्येड् वलादेः' इति इडागमेऽनुबन्धलोपे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य मूर्धन्यादेशे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च कृते 'ऐधिष्ट' इति ।

(५९३) **आत्मनेपदेष्विति** । आत्मनेपदेष्विति षष्ठ्यर्थे सप्तमी । 'झोऽन्तः' इत्यतो झ इत्यनुवर्तते । 'अदभ्यस्तात्' इत्यतः अदित्यनुवर्तते । अत आह—**अनकारात्परस्येति** ।

(४६३) पद—आत्मनेपदेषु, अनतः । **अनुवृत्ति**—झः, अत् । **विधिसूत्र** ।

मूलार्थ—अनकार से परवर्ती आत्मनेपद सम्बन्धी 'झ' के स्थान में 'अत्' आदेश होता है ।

विमर्श—यहाँ 'झोऽन्तः' (७।१।३) सूत्र से 'झः' और 'अदभ्यस्तात्' (७।१।४) से 'अत्' की अनुवृत्ति आती है । 'आत्मनेपदेषु' में षष्ठी के अर्थ में सप्तमी विभक्ति है । अतः अनकारान्त अङ्ग से परवर्ती आत्मनेपद में वर्तमान 'झ' के स्थान में 'अत्' आदेश होता है ।

उदाहरण—(१) √एध्+लुङ् (=ल्=प्र० पु० ब० व०—'झ' च्लि, च्लि=सिच्='स्')—एध् स् त (आर्धधातुक संज्ञा, इट्, 'झ'='अत्'—'आत्मनेपदेष्वनतः')=एध् इ स् अत् (आट्='आ'—'आडजादीनाम्', 'आ'+'ए'='ऐ'—'आटश्च', षत्व)=ऐधिषत । (२) एध्+लुङ् (=म० पु० ए० व०—थास्, सिच्, इट्, आट्, वृद्धि, षत्व, ष्टुत्व, स्=र्=:)=ऐधिष्ठाः । (३) म० पु० द्वि० व०—ऐधिषाथाम् । (४) म० पु० ब० व०—ध्वम्, च्लि=सिच्, इट्, आट्, वृद्धि—ऐधि स् ध्वम् ('स्' का लोप—'धि च' 'ध्'='ढ्'—'इणः षीध्वम्०')=ऐधिढ्वम् । (५) उ० पु० ए० व०—'इट्' (च्लि=सिच्, इट्, आट्, वृद्धि, षत्व)=ऐधिषि । (६) उ० पु० द्वि० व०—ऐधिष्वहि । (७) उ० पु० ब० व०—ऐधिष्महि ।

√एध् धातु 'लुङ्' लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	ऐधिष्ट	ऐधिषाताम्	ऐधिषत
म० पु०—	ऐधिष्ठाः	ऐधिषाथाम्	ऐधिढ्वम्
उ० पु०—	ऐधिषि	ऐधिष्वहि	ऐधिष्महि

अब 'लृङ्' लकार के रूपों की रचना-प्रक्रिया का उल्लेख किया जा रहा है—(१) √एध्+लृङ् (ल्=प्र० पु० ए० व०—'त' स्य—'स्यतासी लृलुटोः' आर्धधातुक संज्ञा, इट्, षत्व)—एध् इ ष् य त (आट्, आ+ए=ऐ—वृद्धि—'आटश्च')=ऐधिष्यत । (यहाँ 'टित्' लकार न होने से 'टि' को एकार नहीं होता । (२) √एध्+लृङ् (=प्र० पु० द्वि० व०—आताम्, स्य, इट्, आट्, वृद्धि, षत्व, आ=इय्, गुण, 'य्' का लोप)=ऐधिष्येताम् । (३) प्र० पु० ब० व०—ऐधिष्यन्त । (४) म० पु० ए० व०—ऐधिष्यथाः । (५) म० पु० द्वि० व०—ऐधिष्येथाम् । (६) म० पु० ब० व०—ऐधिष्यध्वम् । (७) उ० पु० ए० व०—ऐधिष्ये । (८) उ० पु० द्वि० व०—ऐधिष्यावहि । (९) उ० पु० ब० व०—ऐधिष्यामहि ।

कमु कान्तौ। (५९४) **कमेर्णिङ्** ३।१।३०। स्वार्थे। कामयते। (५९५) **अयामन्ताल्वाय्येत्न्विष्णुषु** ६।४।५५। एषु णेरय् आदेशः। कामयाञ्चक्रे। 'आयादय' इति वा

ऐधिषत। एध्धातोः लुङि, तत्स्थाने प्रथमपुरुषबहुवचने 'झ' प्रत्यये 'आत्मनेपदेष्वनतः' इति झस्य 'अत्' आदेशे 'एध् अत् अ' इति जाते 'आडजादीनाम्' इत्याडागमेऽनुबन्धलोपे 'आटश्चे'ति वृद्धौ, च्लौ, तत्स्थाने 'च्लेः सिच्' इति सिच्यनुबन्धलोपे, आर्धधातुकसंज्ञायाम् इडागमे 'ऐध् इ स् अ त' इति जाते 'आदेशप्रत्यययोः' इति सकारस्य षत्वे ष्टुत्वे च कृते 'ऐधिषत' इति।

(५९४) **कमेर्णिङिति**। शेषपूरणेन सूत्रं व्याचष्टे—**स्वार्थ** इति। **कामयते**। उकारेत्संज्ञक-'कमु कान्तौ' इति धातोः 'कमेर्णिङ्' इति णिङ्प्रत्ययेऽनुबन्धलोपे 'अत उपधायाः' इति वृद्धौ 'कामि' इति जाते 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लटयनुबन्धलोपे 'लः कर्मणि च भावे चाकर्मकेभ्यः' इत्यनेन कर्त्रर्थे 'अनुदात्तङित आत्मनेपदम्' इत्यनेन आत्मनेपदे तप्रत्यये, सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे 'कामि अ त' इति जाते 'सार्वधातुकार्धधातुकयोः' इतीकारस्य गुणे 'एचोऽयवायावः' इत्यनेन अयादेशे 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'कामयते' इति सिद्धम्।

(५९५) **अयामन्तेति**। 'णेरनिटि' इत्यतो णेरित्यनुवर्तते। आम्, अन्त, आलु, आय्य, इत्नु, इष्णु इत्येषु णेरयादेशः स्यादित्यर्थः।

√एध् धातु 'लृङ्' लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	ऐधिष्यत	ऐधिष्येताम्	ऐधिष्यन्त
म० पु०—	ऐधिष्यथाः	ऐधिष्येथाम्	ऐधिष्यध्वम्
उ० पु०—	ऐधिष्ये	ऐधिष्यावहि	ऐधिष्यामहि

√'कमु' का अर्थ—'इच्छा करना' है।

(५९४) पद—कमेः, णिङ्। **विधिसूत्र**।

मूलार्थ—'कम्' धातु से स्वार्थ में 'णिङ्' प्रत्यय होता है।

उदाहरण—(१) √कम्+णिङ् (='इ'—'कमेर्णिङ्', अ='आ'—'वृद्धि'—'अत उपधायाः')—कामि (धातुसंज्ञा—'सनाद्यन्ता धातवः'—लट्=ल्=प्र० पु० ए० व० त, सार्वधातुक संज्ञा, शप्='अ')—कामि अ त (इ='ए' गुण—'सार्वधातु०' ए='अय्'—'एचोऽयवायावः' एत्व—'टित आत्मनेपदानां टेरे')=कामयते।

(५९५) पद—अय्, आम्, अन्ताल्वाय्येत्न्विष्णुषु। **अनुवृत्ति**—णेः, आर्धधातुके। **विधिसूत्र**।

मूलार्थ—आम्, अन्त, आलु, आय्य, इत्नु और इष्णु के परवर्ती रहने पर 'णि' के स्थान में 'अय्' आदेश होता है।

विमर्श—पूर्वसूत्र 'णेरनिटि' (६।४।५१) से 'णेः' पद की अनुवृत्ति आ रही है। 'आर्धधातुके' (६।४।४६) का अधिकार है। अतः आम् आदि के परे रहते 'णि' को 'अय्' आदेश होता है।

उदाहरण—(१) √कम्+णिङ् विकल्प से—'आयादयः' (='इ', अ='आ' वृद्धि) =कामि (धातु संज्ञा—लिट्, आम्—'कास्यनेकाच आम्वक्तव्यः' 'णेरनिटि' से प्राप्त 'णि' के

णिङ् । चकमे । चकमाते । चकमिरे । चकमिषे । चकमाथे । चकमिध्वे । चकमे । चकमिवहे । चकमिमहे । कामयिता । कामिता । कामयिष्यते । कमिष्यते । कामयताम् ।

कामयाञ्चके । कम् धातोः 'कमेर्णिङ्' इति णिङि प्राप्ते 'आयादयः' इति वा णिङि, अनुबन्धलोपे, 'अत उपधायाः' इति वृद्धौ 'कामि' इति जाते, धातुसंज्ञायां 'परोक्षे लिट्' इति लिटि 'कास्यनेकाच आम् वक्तव्यः' इत्यामि 'णेरनिटि' इति णिङो लोपे प्राप्ते, तम्प्रबाध्य 'अयामन्ताल्वाय्येत्न्विष्णुषु' इति णिङः इकारस्य अयादेशे 'कामय् आम् लिट्' इति जाते 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परके कृञोऽनुप्रयोगे लिटः लकारस्य स्थाने प्रथमपुरुषैकवचने तप्रत्यये, तस्य स्थाने 'लिटस्तझयोरेशिरेच्' इति एशि कृते शस्येत्संज्ञायां लोपे च 'लिटि धातोरनभ्यासस्ये'ति कृञो द्वित्वेऽभ्याससंज्ञायाम् 'उरत्' इति ऋवर्णस्याकारे 'उरण् रपरः' इति रपरे 'कामयाम् क र् कृ ए' इति स्थिते हलादिशेषे 'कुहोश्चुः' इति कस्य चत्वे 'इको यणचि' इति यणि, मकारस्यानुस्वारे वा परसवर्णे च कृते 'कामयाञ्चक्रे' इति रूपम् । **चकमे इति ।** 'आयादयः आर्धधातुके वा' इति णिङ्प्रत्ययाभावपक्षे

लोप का बाधकर इ=अय्-'अयामन्ताल्वाय्येत्न्विष्णुषु')—कामय् आम् लिट् (लिट् का लुक्—'आमः', लिट्परक √कृ का अनुप्रयोग)—कामयाम् कृ लिट् (ल्=प्र० पु० ए० व० 'त', त=एश्='ए'—'लिटस्तझयोरेशिरेच्', 'कृ' को द्वित्व—'लिटि धातोः०' अभ्यास संज्ञा, 'ऋ'='अ'—'उरत्' रपर)—कामयाम् कर् कृ ए ('र्' का लोप—'हलादिः शेषः' क्'='च्'—'कुहोश्चुः' ऋ=र्—'यण्'—'इको यणचि' म्=ं-अनुस्वार, परसवर्ण)=कामयाञ्चके । णिङ् प्रत्यय के अभाव पक्ष में—कम्+लिट् (=प्र० पु० ए० व०—त, त=एश्='ए' द्वित्व)—कम् कम् ए (अभ्यास संज्ञा, हलादिशेष, क्='च्'—'कुहोश्चुः')=चकमे । प्र० पु० द्वि० व०—चकमाते । इत्यादि रूप णिङ् के अभाव पक्ष में बनते हैं ।

√कमु (उकारेत्संज्ञक) धातु 'लिट्' लकार के रूप णिङ् पक्ष में—

	एक०	द्वि०	बहु०
प्र० पु०—	कामयाञ्चक्रे	कामयाञ्चक्राते	कामयाञ्चक्रिरे
म० पु०—	कामयाञ्चकृषे	कामयाञ्चक्राथे	कामयाञ्चकृढ्वे
उ० पु०—	कामयाञ्चक्रे	कामयाञ्चकृवहे	कामयाञ्चकृमहे

णिङ् के अभावपक्ष में—

	एक०	द्वि०	बहु०
प्र० पु०—	चकमे	चकमाते	चकमिरे
म० पु०—	चकमिषे	चकमाथे	चकमिध्वे
उ० पु०—	चकमे	चकमिवहे	चकमिमहे

अब लुट् लकार के रूपों की प्रक्रिया का निर्देश किया जा रहा है ।

(१) √कम्+णिङ् ('इ' विकल्प से, 'आयादयः०' उपधावृद्धि)—कामि (धातुसंज्ञा, लुट्=ल्=प्र० पु० ए० व०—'त' तास्—'स्यतासी लृलुटोः' आर्धधातुक संज्ञा, इट्,)—कामि इ तास् त, ('इ'='ए' गुण—'सार्वधातुकार्धधातुकयोः' ए=अय्, त=डा='आ'—'लुटः प्रथमस्य डारौरसः' 'टि' (आस्) का लोप—'डित्त्वसामर्थ्यादभस्यापि टेर्लोपः')=कामयिता । 'णिङ्' के न होने पर पक्ष में—कमिता ।

अकामयत। कामयेत। कामयिषीष्ट। कमिषीष्ट। (५९६) **णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३।१।४८।** ण्यन्तात्, श्र्यादिभ्यश्च च्लेश्चङ् कर्त्रर्थे लुङि। अ कामि अ त इति स्थिते—(५९७) **णेरनिटि ६।४।५१।** अनिडादावार्द्धधातुके परे णेर्लोपः। (५९८) **णौ**

'कम्+लिट्' इत्यत्र लः स्थाने प्रथमपुरुषैकवचने तप्रत्यये तस्य एशादेशेऽनुबन्धलोपे धातोर्द्वित्वे 'कम् कम् ए' इति जाते 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां हलादिशेषे 'कुहोश्चुः' इति कस्य चत्वे संयोगे च कृते **'चकमे'** इति।

(५९६) प्रत्ययग्रहणपरिभाषया णीति तदन्तग्रहणम्। 'च्लि लुङि' इत्यतो लुङीति, 'च्लेः सिच्' इत्यतः च्लेरिति चानुवर्तते। अत आह—**ण्यन्तादित्यादिना।**

(५९७) निरनुबन्धग्रहणे सामान्यग्रहणमिति न्यायात् णेरित्यनेन णिङ्णिचोर्ग्रहणम्।

---

(२) √कम्+णिङ्='इ' विकल्प से, वृद्धि—कामि+लृट् (ल्=प्र० पु० ए० व०—त, स्य—'स्यतासी०', आर्धधातुक संज्ञा, इट्, गुण, ए=अय्,)—कामयि स्य त (षत्व, एत्व)= कामयिष्यते। 'णिङ्' के अभावपक्ष में—कमिष्यते।

(३) √कम्+णिङ् (='इ' वृद्धि)—कामि+लोट् (=प्र० पु० ए० व० त, सार्वधातुक संज्ञा, शप्=अ)—कामि अ त ('इ'='ए'—गुण, अयादेश, अ=ए—'टित आत्मनेपदानाम्०' ए=आम्—'आमेतः')=कामयताम्।

(४) √कम्+णिङ्, वृद्धि—कामि+लङ् (ल्=प्र० पु० ए० व० त, शप्=अ, सार्वधातुक संज्ञा, गुण, अयादेश)—कामयत (अट्='अ' का आगम)=अकामयत।

(५) √कम्+णिङ्, वृद्धि—कामि+विधिलिङ् (ल्=प्र० पु० ए० व०—त, सार्वधातुक संज्ञा, शप्, 'इ'='ए'—गुण, अयादेश)—कामय त (सीयुट्='सीय'—'लिङः सीयुट्' 'स्' का लोप—'लिङः सलोपोऽनन्त्यस्य' अ+ई='ए' गुण, 'य्' का लोप—'लोपो व्योर्वलि')= कामयेत।

(६) √कम्+णिङ् (विकल्प से), वृद्धि—कामि+आशीर्लिङ् (ल्=प्र० पु० ए० व० त, आर्धधातुक संज्ञा, सीयुट्='सीय्')—कामि सीय् त (इट्—'आर्धधातुकस्येड् वलादेः' गुण, अय् आदेश, षत्व 'त' को सुट्=स् का आगम—'सुट् तिथोः', 'य्' का लोप—'लोपो व्योर्वलि' स्= षत्व, त='ट्'—ष्टुत्व)='कामयिषीष्ट'। 'णिङ्' के अभावपक्ष में—'कमिषीष्ट'।

(२९६) पद—णिश्रिद्रुस्रुभ्यः, कर्तरि, चङ्। **अनुवृत्ति**—च्लेः, लुङि। **विधिसूत्र।**

मूलार्थ—ण्यन्त धातु तथा श्रि, द्रु और स्रु धातुओं से परवर्ती 'च्लि' को 'चङ्' आदेश होता है, कर्त्रर्थक लुङ् लकार के परे रहते।

विमर्श—सूत्रस्थ 'णि' पद से 'प्रत्ययग्रहणे तदन्तग्रहणम्' परिभाषा के द्वारा तदन्त (ण्यन्त) का ग्रहण होता है। 'च्लि लुङि' (३।१।४३) से 'लुङि' और 'च्लेः सिच्' (३।१।४४) से 'च्लेः' पदों की अनुवृत्ति आती है। तदनुसार—"ण्यन्त और श्रि, द्रु तथा स्रु धातु से परवर्ती 'च्लि' के स्थान में 'चङ्' (=अ) आदेश होता है, कर्त्रर्थक (कर्तृवाच्य) लुङ् परे रहते"।

'अ कामि अ त' ऐसी स्थिति होने पर—

(२९७) पद—णेः, अनिटि। **अनुवृत्ति**—लोपः। **विधिसूत्र।**

मूलार्थ—अनिडादि आर्धधातुक के परे रहते 'णि' का लोप होता है।

विमर्श—'आर्धधातुके' (६।४।४६) का अधिकार है। 'अतो लोपः' (६।४।४८) से 'लोपः'

चङ्युपधाया ह्रस्वः ७।४।१ । चङ्परे णौ यदङ्गं, तस्योपधाया ह्रस्वः चङि । (५९९) **सन्वल्लघुनि चङ्परेऽनग्लोपे ७।४।९३ ।** चङ्परे णौ यदङ्गं, तस्य योऽभ्यासो लघुपरस्तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति । (६००) **सन्यतः ७।४।७९ ।** अभ्यासस्याऽत इत्सनि । (६०१) **दीर्घो लघोः ७।४।९४ ।** लघोरभ्यासस्य दीर्घः, सन्वद्भावविषये । **अचीकमत ।** णिङभावपक्षे—* **कमेश्च्लेश्चङ् वाच्यः** * णेरभावान्न दीर्घसन्वद्भावौ ।

---

(५९९) सन्वल्लघुनि इति । अनग्लोप इति च्छेदः । चङ्परो यस्मादिति बहुव्रीहिः । बहुव्रीहिगम्यो णिः, अङ्गस्येति चानुवर्तते । एवं चङ्परे णौ यदङ्गं तस्य योऽभ्यासे लघुपरस्तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति । णावग्लोपः—णिज्निमित्तकोऽक्प्रत्याहारघटितवर्णलोपः यदि न भूतः स्यादित्यर्थः ।

(६००) सन्यतः । 'अत्र लोपः' इत्यत अभ्यासस्येत्यनुवर्तते । 'भृञामिदि'त्यस्मात् इदिति । तदाह—**अभ्यासस्येति ।**

(६०१) दीर्घो लघोरिति । 'अत्र लोपोऽभ्यासस्ये'त्यतः 'अभ्यासस्ये'त्यनुवर्तते । 'सन्वल्लघुनी'ति सूत्रं सन्वच्छब्दवर्जमनुवर्तते । तदाह—**लघोरभ्यासस्येति । अचीकमत ।** कम्धातोः 'कमेर्णिङ्' इति नित्ये णिङ् प्राप्ते 'आयादय आर्धधातुके वा' इत्यनेन

की अनुवृत्ति आ रही है । अतः "अनिडादि (जिसके आदि में इट् न हो) आर्धधातुक के परवर्ती रहते 'णि' का लोप होता है" ।

(५९८) पद—णौ, चङि, उपधायाः, ह्रस्वः । **विधिसूत्र ।**

मूलार्थ—चङ्-परक 'णि' के परे रहते अङ्ग की उपधा को ह्रस्व होता है ।

विमर्श—'अङ्गस्य' का अधिकार है । 'चङि' तथा 'णौ' में सप्तमी विभक्ति होने से 'चङ्-परक जो णि, उसके परे रहते' अर्थ होता है । इस प्रकार—"चङ् है परे जिससे, ऐसे 'णि' के परे रहते जो अङ्ग, उसकी उपधा को ह्रस्व होता है" ।

(५९९) पद—सन्वत् , लघुनि, चङ्परे, अनग्लोपे । **अनुवृत्ति**—अभ्यासस्य । **विधिसूत्र ।**

मूलार्थ—चङ्-परक 'णि' परे रहते जो अंग, उसके अवयव लघुपरक अभ्यास को सन्वद्भाव होता है, यदि 'णि' परे रहते 'अक्' का लोप न हुआ हो ।

विमर्श—प्रकृत सूत्र में 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' पद की अनुवृत्ति आती है । 'अङ्गस्य' का अधिकार है । इस प्रकार—"चङ्-परक 'णि' परे रहते जो अङ्ग, उसका अवयव जो लघुपरक अभ्यास, उसको सन्वद्भाव (=सन् परे रहने के समान कार्य) होता है, यदि 'णि' को निमित्त मानकर अङ्ग के 'अक्' का लोप न हुआ हो तो" ।

(६००) पद—सनि, अतः । **अनुवृत्ति**—अभ्यासस्य, इत् । **विधिसूत्र ।**

मूलार्थ—'सन्' के परवर्ती रहने पर अभ्यास के अत् को इत्व होता है ।

विमर्श—यहाँ 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' तथा 'भृञामित्' (७।४।७६) से 'इत्' पदों की अनुवृत्ति आती है । तदनुसार—'सन् परे रहते अभ्यास के अकार को इकार होता है ।'

(६०१) पद—दीर्घः, लघोः । **अनुवृत्ति**—लघुनि, चङ्परेऽनग्लोपे, अभ्यासस्य । **विधिसूत्र ।**

मूलार्थ—अभ्यास के अवयव लघु को दीर्घ होता है, सन्वद्भाव के विषय में ।

विमर्श—प्रकृत सूत्र में—'अत्र लोपः०' (७।४।५८) से 'अभ्यासस्य' तथा 'सन्वत्' पद को

अचकमत । अकामयिष्यत । अकमिष्यत । भाम क्रोधे । भामते । बभामे । क्षमूष् सहने । क्षमते । चक्षमे । चक्षमिषे–चक्षंसे । चक्षमाथे । चक्षमिवहे । (६०२) ण्वोश्च

विकल्पेन णिङ्प्रत्ययेऽनुबन्धलोपे उपधावृद्धौ 'कामि' इत्यस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां 'लुङ्' इति लुङ्लकारेऽनुबन्धलोपे तत्स्थाने आत्मनेपदे प्रथमपुरुषैकवचने तप्रत्यये 'च्लि लुङि' इति च्लौ, च्लेः सिचि प्राप्ते 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेः चङादेशेऽनुबन्धलोपे अङ्गस्याडागमेऽनुबन्धलोपे 'अ कामि अ त' इति जाते, 'णेरनिटि' इत्यनेन णिलोपे, 'णौ चङ्युपधाया ह्रस्वः' इत्यनेन उपधाह्रस्वे, अ कम् अ त इति स्थिते 'चङि' इत्यनेन द्वित्वे पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन हलादिशेषे 'कुहोश्चुः' इत्यनेनाभ्यासककारस्य चकारे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन सन्वद्भावे 'सन्यतः' इत्यनेनाभ्यासस्य इत्वे 'दीर्घो लघोः' इत्यभ्यासेकारस्य दीर्घे संयोगे च कृते 'अचीकमत' इति । णिङभावपक्षे—अ कम् त इति स्थिते, च्लौ, च्लेः सिचि प्राप्ते 'कमेश्च्लेश्चङ् वाच्यः' इत्यनेन च्लेः चङादेशेऽनुबन्धलोपे 'चङि' इत्यनेन द्वित्वेऽभ्यासकार्ये हलादिशेषे 'कुहोश्चुः' इत्यभ्यासककारस्य चकारे 'अ च कम् अ त' इति जाते संयोगे च कृते 'अचकमत' इति सिद्धम् ।

छोड़कर 'सन्वल्लघुनि चङ्परेऽनग्लोपे' (५९९) सूत्र की अनुवृत्ति आती है। अतः—'चङ्-परक णि परे रहते जो अङ्ग, उसके लघु अभ्यास को दीर्घ होता है।'

वा०—"कम् से परे 'च्लि' को चङ् आदेश होता है।" 'णिङ्' विकल्प से होता है। अतः उसके अभाव पक्ष में च्लि को 'चङ्' आदेश एवं द्वित्वादि होते हैं। यहाँ 'णि' के अभाव से दीर्घ एवं सन्वद्भाव की प्राप्ति नहीं होती।

उदाहरण—(१) √कम्+णिङ् विकल्प से (=इ, उपधावृद्धि)—कामि (धातुसंज्ञा+ लुङ्=ल्=प्र० पु० ए० व०—'त' च्लि, च्लि=चङ्='अ'—'णिश्रिद्रुस्रुभ्यः०')—काम् इ अ त (णि='इ' का लोप—'णेरनिटि' उपधा को ह्रस्व—'णौ चङ्युपधाया ह्रस्वः' अङ्ग को अट् का आगम)—अ कम् अ त ('कम्' को द्वित्व—'चङि' 'पूर्वोऽभ्यासः' से अभ्यास संज्ञा, 'हलादिः शेषः' से 'म्' का लोप, अभ्यास के 'क्'='च्'—'कुहोश्चुः' 'सन्वल्लघुनि चङ्परेऽनग्लोपे' से सन्वद्भाव होकर 'सन्यतः' से अभ्यास के 'अ'='इ' 'इ'='ई'—दीर्घ—'दीर्घो लघोः')=अचीकमत। 'णिङ्' के अभाव पक्ष में—अचकमत (वा० से च्लि=चङ्)।

(२) √कम्+लृङ् प्र० पु० ए० व०—'णिङ्' पक्ष में—अकामयिष्यत। 'णिङ्' के अभावपक्ष में—अकमिष्यत।

√भाम धातु का अर्थ—'क्रोध करना' है। लट्—भामते। लिट्—बभामे। √क्षमूष् धातु का अर्थ—'सहन करना है।' (१) लट् प्र० पु० ए० व०—क्षमते। (२) ऊकारेत्संज्ञक √क्षमूष्+ लिट् (=प्र० पु० ए० व०—त, त=एश्=ए, धातु को द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'क्' ='च्' चत्व)=चक्षमे। (३) क्षम्+लिट् (ल्=म० पु० ए० व०—थास्, थास्=से—'थासः से' द्वित्व, अभ्यास संज्ञा, हलादिशेष, चर्त्व)—च क्षम् से (विकल्प से इट्—'स्वरतिसूति०' षत्व) =चक्षमिषे। इट् के अभावपक्ष में 'म्' को अनुस्वार होने पर—चक्षंसे। लिट् म० पु० द्वि० व०—चक्षमाथे। लिट्—उ० पु० द्वि० व०—चक्षमिवहे।

८।२।६५। मान्तस्य धातोर्मस्य नः स्यात् म्वोः परयोः। चक्षण्वहे। चक्षमिमहे। चक्षण्महे। गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। गाधते। बाधृ लोडने। लोडनं प्रतिघातः। बाधते। नाथृ नाधृ याच्ञोपतापैश्वर्याऽऽशीःषु। * आशिषि नाथ इति वाच्यम् *। अस्याऽऽशिष्येवात्मनेपदं स्यात्। नाथते। अन्यत्र नाथति। नाधते। दध धारणे। दधते। स्कुदि आप्रवणे। आप्रवणम् उत्प्लवनमुद्धरणं च। स्कुन्दते। चुस्कुन्दे। श्विदि

---

(६०२) **म्वोश्चेति**। 'मो नो धातोरि'त्यनुवर्तते। तदाह—**मान्तस्येति**। **चक्षण्वहे**। 'क्षमूष् सहने' इत्यस्माद्धातोरनुबन्धलोपे लिटि, तत्स्थाने उत्तमपुरुषद्विवचने वहिप्रत्यये 'लिटि धातोरनभ्यासस्ये'ति धातोः द्वित्वे अभ्याससंज्ञायाम्, हलादिशेषे 'कुहोश्चुः' इति चर्त्वे 'च क्षम् वहि' इति जाते 'स्वरतिसूतिसूयति०' इति विकल्पेन इडागमेऽनुबन्धलोपे टेरेत्वे 'चक्षमिवहे' इति। इडभावपक्षे 'म्वोश्च' इति मकारस्य नकारे 'रषाभ्यां नो णः समानपदे' इति नकारस्य णत्वे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे 'चक्षण्वहे' इति।

चुस्कुन्दे। स्कुदि धातोः नुमि लिटि, तत्स्थाने आत्मनेपदे त प्रत्यये, धातोर्द्वित्वेऽभ्याससंज्ञायां 'शर्पूर्वाः खयः' इति सलोपे 'अभ्यासे चर्च' इति चकारे 'लिटस्तझयोरेशिरेच' इति एशादेशे 'चुस्कुन्दे' इति।

---

(६०२) पद—म्वोः, च। **अनुवृत्ति**—मो नो धातोः। **विधिसूत्र**।

मूलार्थ—मकार और नकार के परवर्ती रहते मान्त धातु के मकार को नकार आदेश होता है। चक्षण्वहे। चक्षमिवहे। चक्षण्महे इत्यादि।

विमर्श—'मो नो धातोः' (८।२।६४) की अनुवृत्ति आ रही है। तदनुसार उक्त अर्थ निष्पन्न होता है।

उदाहरण—(१) √क्षम्+लिट् (ल्=उ० पु० द्विवचन—वहि)--क्षम् वहि (धातु को द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'क्'='च्'--चर्त्व—'कुहोश्चुः')—च क्षम् वहि, (विकल्प से इट्='इ' आगम—'स्वरतिसूति०', 'इ'='ए'—'टित आत्मनेपदानाम्०')=चक्षमिवहे। इट् के अभावपक्ष में ('म्'='न्'—'म्वोश्च' 'न्'='ण्'—'रषाभ्याम्' णत्व)=चक्षण्वहे। (२) लिट्—उ० पु० बहुवचन में पूर्ववत् चक्षमिमहे। इट् के अभावपक्ष में चक्षण्महे।

√गाधृ धातु का अर्थ—प्रतिष्ठा, लिप्सा (=लाभ प्राप्ति की इच्छा) और ग्रन्थजनक व्यापार है। (१) लट् प्र० पु० एकवचन—गाधते। √बाधृ का अर्थ—प्रतिघात करना है। बाधते।

√नाथृ, नाधृ धातुओं का अर्थ—याचना करना, कष्ट पहुँचाना, ऐश्वर्य प्राप्त करना एवं आशीर्वाद देना है।

वा०—नाथ धातु से आशीर्वाद अर्थ में ही आत्मनेपद होता है।

उदाहरण—(१) आशीर्वाद अर्थ में आत्मनेपद—नाथते। अन्य अर्थ में—परस्मैपद—नाथति। (२) नाधृ+लट्=नाधते।

√दध् धातु का अर्थ—धारण करना है। (१) दध्+लट् (=प्र० पु० ए० व०—त, शप्, टि=एत्व)=दधते।

√स्कुदि का अर्थ—आप्रवरण=उत्प्लवन एवं उद्धरण है। यहाँ इकार की इत्संज्ञा लोप होता है। (१) स्कुदि+लट् (=प्र० पु० ए० व०—त, इकार की इत्संज्ञा लोप, नुम्='न्' का

श्वैत्ये । श्विन्दते । शिश्विन्दे । वदि अभिवादनस्तुत्योः । वन्दते । ववन्दे । भदि कल्याणे सुखे च । भन्दते । बभन्दे । मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । मन्दते । ममन्दे । स्पदि किञ्चिच्चलने । स्पन्दते । स्पन्देते । पस्पन्दे । मुद हर्षे । मोदते । मुमुदे । उर्द माने क्रीडायां च । ऊर्दते । ऊर्दाञ्चक्रे । कुर्द खुर्द गुर्द गुद क्रीडायामेव । कूर्दते । खूर्दते । गूर्दते । गोदते । जुगुदे । षूद क्षरणे । सूदते । सुषूदे । ह्लाद अव्यक्ते शब्दे । ह्लादते । जह्लादे । ह्लादी सुखे च । चादव्यक्ते शब्दे । ह्लादते । स्वाद आस्वादने । स्वादते । पर्द कुत्सिते शब्दे । गुदरवे इत्यर्थः । पर्दते । पपर्दे । यती प्रयत्ने । यतते । येते । श्रथि शैथिल्ये । श्रन्थते । ग्रथि कौटिल्ये । ग्रन्थते । कत्थ श्लाघायाम् । कत्थते ।

मोदत इति । मुदधातोर्लटि तत्स्थानेऽऽत्मनेपदे तप्रत्यये शपि, शपः शित्त्वात्सार्वधातुकसंज्ञायां 'पुगन्तलघूपधस्य चे'ति लघूकारस्य गुणे टेरेत्वे कृते 'मोदते' इति रूपम् ।

आगम—'इदितो नुम् धातोः' शप्=अ, टि=एत्व)=स्कुन्दते । (२) स्कुदि+लिट् (नुम्, ल्=त, द्वित्व, अभ्यास संज्ञा, 'स्' का लोप—'शर्पूर्वाः खयः' 'क्'='च्'—'शर्पूर्वाः खयः' 'त'='एश्'—'लिटस्तझयोः')=चुस्कुन्दे ।

√श्विदि का अर्थ—श्वैत्य—श्वेतता होना है। इदित् होने से नुम्। श्विन्दते। लिट् में—शिश्विन्दे ।

√वदि का अर्थ—अभिवादन तथा स्तुति करना है। (१) वदि (इदित् होने से नुम्)+लट् (='त' शप्=अ, टि=एत्व)=वन्दते । (२) लिट् प्र० पु० ए० व०—ववन्दे ।

√भदि धातु का अर्थ—कल्याण एवं सुखजनक व्यापार है। (१) लट्—भन्दते । लिट्—बभन्दे ।

√मदि धातु—स्तुति, मोद, मद, स्वप्न, इच्छा एवं गति अर्थ में है। (१) लट्—प्र० पु० ए० व०—मन्दते । लिट्—प्र० पु० ए० व०—ममन्दे ।

√स्पदि का अर्थ—ईषत् (कुछ) चलना है। (१) लट्—प्र० पु० ए० व०—स्पन्दते । लट्—प्र० पु० द्वि० व०—स्पन्देते । लिट्—प्र० पु० ए० व०—पस्पन्दे ।

√मुद धातु—हर्ष (=प्रसन्न होना) अर्थ में है। (१) मुद+लट् (=प्र० पु० ए० व०—त, शप्, सार्वधातुक संज्ञा, 'उ'='ओ'—गुण='पुगन्तलघूपधस्य च')=मोदते । (२) मुद्+लिट् प्र० पु० ए० व०—मुमुदे ।

√उर्द धातु मान एवं क्रीडा अर्थ में है। (१) उर्द्+लट् (=प्र० पु० ए० व०—त, शप्, टि=एत्व, 'उ'='ऊ'—'दीर्घ'—'उपधायां च')=ऊर्दते । (२) उर्द—दीर्घ—'उपधायां च' +लिट् ('आम्'—'इजादेश्च०' लिट् का लुक्–'आमः')—ऊर्दाम् (लिट्परक 'कृ' का अनुप्रयोग, ल्=त, त=एश्, धातु को द्वित्व, अभ्यास संज्ञा, ऋ='अ', रपर, हलादिशेष, चर्त्व, यण्, अनुस्वार, परसवर्ण)=ऊर्दाञ्चक्रे ।

√कुर्द, खुर्द, गुर्द और गुद् धातु का अर्थ—क्रीडा करना है। **उदाहरण**—लट् लकार प्रथम पुरुष ए० व० क्रमशः—कूर्दते । खूर्दते । गूर्दते । गोदते । गुद्+लिट् प्र० पु० ए० व०—जुगुदे ।

√षूद धातु क्षरणार्थक है। **उदा०**—लट् प्र० पु० ए० व०—सूदते । लिट्—सुषूदे इत्यादि ।

√ह्लाद धातु का अर्थ—अस्पष्ट शब्द करना है। लट्—ह्लादते । लिट्—जह्लादे ।

√ह्लादी धातु—अस्पष्ट शब्दार्थक एवं सुखार्थक है। लट्—ह्लादते ।

√स्वाद धातु आस्वादन अर्थ में है। लट् स्वादते ।

चकत्थे। श्लोकृ सङ्घाते। सङ्घातो ग्रन्थः। स चेह ग्रथ्यमानस्य व्यापारो ग्रथितुर्वा। आद्येऽकर्मको, द्वितीये सकर्मकः। श्लोकते। शुश्लोके। शकि शङ्कायाम्। शङ्कते। शशङ्के। अकि लक्षणे। अङ्कते। आनङ्के। ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः। कङ्कते। वङ्कते। श्वङ्कते। त्रङ्कते। ढौकते। डुढौके। त्रौकते। तुत्रौके। * सुब्धातुष्ठिवुष्वष्कतीनां सत्वनिषेधः * ष्वष्कते। षष्वष्के। वस्कते। ववस्के। मस्कते। ममस्के। टेकते। टीकते। तेकते। तीकते। रङ्घते। लङ्घते। श्लाघृ कत्थने। श्लाघते। शश्लाघे। पचि व्यक्तीकरणे। पञ्चते। पपञ्चे। ऋज गतिस्थानार्जनोपार्जनेषु। अर्जते। नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते। तेन द्विहल्त्वान्नुट्। आनृजे। ऋजि भृजी भर्जने। ऋञ्जते। ऋञ्जाञ्चक्रे। आर्ञ्जीत। भर्जते। एजृ भ्रेजृ भ्राजृ दीप्तौ। एजते। एजा-

---

आनृजे। ऋजधातोः लिटि तस्थाने तप्रत्यये, द्वित्वेऽभ्याससंज्ञायाम् 'उरत्' इति ऋवर्णस्याकारादेशे रपरत्वे हलादिशेषे 'अ ऋ ज् त' इति जाते 'अत आदेः' इति पूर्वाकारस्य दीर्घे ऋजधातोरेकहल्त्वेऽपि 'नुड्विधौ ऋकारैकदेशो हल्त्वेन गृह्यते' इति

√पर्द धातु—कुत्सित शब्दार्थक है अर्थात् गुदस्थान से निःसृत शब्द में है। लट्—पर्दते। लिट्—पपर्दे।

√यती धातु का अर्थ—प्रयत्न करना है। लट्—यतते। लिट्—येते।

√श्रथि का अर्थ—शिथिलता करना है। इदित् होने से नुम्। लट्—श्रन्थते।

√ग्रथि का अर्थ—कुटिलता है। इदित् होने से नुम्। लट्—ग्रन्थते। √कत्थ का अर्थ—श्लाघा (=प्रशंसा) करना है। लट्—कत्थते। लिट्—चकत्थे। √श्लोक धातु—संघात अर्थ में है। संघात का अर्थ—ग्रन्थ निर्माण करना है।

यहाँ 'ग्रथ्यमान=ग्रथन क्रिया के कर्म का व्यापार अथवा ग्रन्थनिर्माणकर्ता का व्यापार' यह दो अर्थ प्रकृत धातु के सम्भव है। प्रथम अर्थ में यह अकर्मक है और द्वितीय अर्थ में फल=ग्रथन ग्रन्थ में रहने से और व्यापार निर्माणकर्ता में रहने से (फलव्यधिकरणव्यापारवाचक होने से) सकर्मक है। लट्—श्लोकते। लिट्—शुश्लोके।

√शकि धातु का अर्थ—आशङ्का करना है। इदित् होने से नुम्, अनुस्वार, परसवर्ण। लट्—शङ्कते। लिट्—शशङ्के।

√अकि धातु—चिह्नार्थक है। नुम्, अनुस्वार, परसवर्ण। लट्—अङ्कते। अङ्क+लिट् (=प्र० पु० ए० व०—त, धातु को द्वित्व, अभ्यास संज्ञा, हलादिशेष, अभ्यास के 'अ' को दीर्घ—'अत आदेः', नुट्—'तस्मान्नुड् द्विहलः', त=एश्)—आनङ्के।

√ककि, वकि, श्वकि, त्रकि, ढौकृ, त्रौकृ, ष्वष्क, वस्क, मस्क, टिकृ, टीकृ, तिकृ, तीकृ, रघि और लघि—ये १५ धातुएँ गमनार्थक हैं। इदित् धातुओं में नुम्, अनुस्वार, परसवर्ण। उदा०—लट् क्रमशः—कङ्कते। वङ्कते। श्वङ्कते। त्रङ्कते। ढौकते। लिट्—डुढौके। त्रौकते। लिट्—तुत्रौके।

वा०—सुब्धातु (=नामधातु), ष्ठिव् धातु तथा 'ष्वष्क' धातु सम्बन्धी षकार को सत्व नहीं होता।

—ष्वष्क् धातु में प्राप्त 'धात्वादेः षः सः' से सत्व का प्रकृत वार्तिक से निषेध हुआ। लट्—ष्वष्कते। लिट्—षष्वष्के। वस्कते। लिट्—ववस्के। मस्कते। लिट्—ममस्के। टेकते। टीकते। तेकते। तीकते। रङ्घते। लङ्घते।

ञ्चक्रे । भ्रेजते । बिभ्रेजे । भ्राजते । बभ्राजे । वेष्ट वेष्टने । वेष्टते । विवेष्टे । चेष्ट चेष्टायाम् । चेष्टते । चिचेष्टे । स्फुट विकसने । स्फोटते । पुस्फुटे । टुवेपृ कम्पने । वेपते । कपि चलने । कम्पते । भिक्ष भिक्षायामलाभे लाभे च । भिक्षते । बिभिक्षे । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । दीक्षते । दिदीक्षे । भाष व्यक्तायां वाचि । भाषते । बभाषे । वर्ष स्नेहने । वर्षते । ववर्षे । ईह चेष्टायाम् । ईहते । ईहाञ्चक्रे । गर्ह गल्ह कुत्सायाम् । गर्हते । गल्हते । काशृ दीप्तौ । काशते । ऊह वितर्के । ऊहते । ऊहाञ्चक्रे । कथम्—'अनुक्तमप्यूहति पण्डितो जनः' इति । अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम् । अनुदात्तेतश्चक्षिङो ङित्करणाज्ज्ञापकात् । तेन-'उदयति यदि भानुः',

---

वार्तिकवचनात् 'तस्मान्नुड् द्विहलः' इति दीर्घीभूतात्परस्य नुटि 'लिटस्तझयोरि'ति तकारस्य स्थाने एशादेशे 'आनृजे' इति ।

√श्लाघृ धातु का अर्थ—कत्थन अर्थात् अपने गुणों को प्रकट करना है। लट्—श्लाघते (=स्वगुणान् प्रकटीकरोति) । लिट्—शश्लाघे ।

√पचि धातु—व्यक्तीकरण (=स्पष्टार्थक) में है। इदित्वान्नुम् , अनुस्वार, परसवर्ण। लट्—पञ्चते । लिट्—पपञ्चे ।

√ऋज धातु गत्यर्थक तथा स्थान का अर्जन और उपार्जनार्थक है । लट्—अर्जते । ऋज धातु से लिट् में ऋकार का अवयव 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' से रेफ एक हल् एवं जकार एक हल् =दो हल् युक्त धातु होने से 'तस्मान्नुट्०' से नुट् हुआ । ऋज्+लिट् (=द्वित्व, ऋ=अ—'उरत्' रपर, हलादिशेष)—अ ऋज्+लिट् (अ='आ'—दीर्घ—'अत आदेः' नुट्='न्'—'तस्मान्नुड् द्विहलः' त=एश्=ए)=आनृजे ।

√ऋजि तथा भृजी धातु पाकार्थक हैं। लट्—ऋञ्जते। लिट् में (आम् एवं कृञ् का अनुप्रयोग आदि कार्य)=ऋञ्जाञ्चक्रे । लङ्—आर्ञ्जत । भृज्+लट्=भर्जते ।

√एजृ, भेजृ, भ्राजृ धातु दीप्त्यर्थक हैं। क्रमशः उदाहरण—लट्-एजते। लिट्—एजाञ्चक्रे। भ्रेजते । लिट्—बिभ्रेजे । भ्राजते । लिट्—बभ्राजे ।

√वेष्ट धातु का अर्थ वेष्टन=लपेटना है। वेष्टते। लिट्-विवेष्टे। √चेष्ट धातु चेष्टार्थक है। लट्-चेष्टते। लिट्—चिचेष्टे। √स्फुट का अर्थ विकसित=खिलना है। लट्—स्फोटते। लिट्—पुस्फुटे। √टुवेपृ का अर्थ—काँपना है। वेपते। √कपि धातु गत्यर्थक है। लट्—कम्पते। √भिक्ष धातु भिक्षा के लाभ या अलाभ अर्थ में है। भिक्षते। लिट्—बिभिक्षे। √दीक्ष का अर्थ—मुण्डन करना, इज्या =यज्ञ करना, उपनयन=यज्ञोपवीत धारण करना, नियम एवं व्रतादेश है। लट्—दीक्षते। लिट्—दिदीक्षे। √भाष धातु का अर्थ—स्पष्ट बोलना है। भाषते। लिट्—बभाषे। √वर्ष का अर्थ-बरसना है। लट्—वर्षते। लिट्—ववर्षे। √ईह धातु चेष्टा (चाहना) अर्थ में है। ईहते। लिट्—ईहाञ्चक्रे। √गर्ह और गल्ह धातु कुत्सा अर्थ में हैं। गर्हते। गल्हते। √काशृ धातु दीप्त्यर्थक है। लट्—काशते। √ऊह वितर्क अर्थ में है। ऊहते। लिट्—ऊहाञ्चक्रे।

कथमिति । 'अनुक्तमप्यूहति पण्डितो जनः' के 'ऊहति' पद में ऊह् धातु के अनुदात्त होने से आत्मनेपद होना चाहिए। परन्तु 'ऊहति' परस्मैपद का प्रयोग क्यों किया गया ? इस शङ्का के समाधान के लिए कहा गया है—'अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम्'। अनुदात्तेत्व प्रयुक्त आत्मनेपद अनित्य होता है। चक्षिङ् धातु में अनुदात्त होने से ही आत्मनेपद सिद्ध था, पुनः ङित् क्यों किया ? वह ङित्करण व्यर्थ होकर ज्ञापन करता है—'अनुदात्तेत्वलक्षणम्०'। उससे

'स्फायान्निर्मोकसन्धिरि'त्यादि सिद्धमित्याहुः । अय गतौ । अयते । (६०३) उपसर्गस्याऽयतौ ८।२।१९ । अयतावुपसर्गरेफस्य लत्वम् । प्लायते । पलायते । (६०४) दयायासश्च ३।१।३७ । एभ्य आम्लिटि । अयाञ्चक्रे । अयिता । अयिष्यते । अयताम् ।

---

(६०३) **पलायत इति** । परा उपसर्गात् अयधातोः लटि, आत्मनेपदे तप्रत्यये 'उपसर्गस्यायतौ' इत्यनेन रकारस्य लकारे पलाय् त इति जाते सार्वधातुकसंज्ञायां शप्यनुबन्धलोपे टेरेत्वे संयोगे च 'पलायते' इति ।

(६०४) **दयायासश्चेति** । दय अय अस् इत्येषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । 'कास्प्रत्ययादि'त्यतः 'आम् लिटी'त्यनुवर्तते । अत आह—**एभ्य आमित्यादि** । **अयाञ्चक्रे** । अयधातोः लिटि 'दयायासश्चे'ति आमि कृते—'अय आम् लिट्' इति जाते 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परके कृञोऽनुप्रयोगे, लिटो लस्य स्थाने तप्रत्यये, तत्स्थाने 'लिटस्तझयोरेशिरेच्' इत्येशि अनुबन्धलोपे, 'लिटि धातोरनभ्यासस्य' इति धातोर्द्वित्वे 'अयाम् कृ कृ ए' इति स्थिते 'पूर्वोऽभ्यासः' इत्यभ्यासत्वे 'उरत्' इति अभ्यासऋवर्णस्याकारे रपरे च कृते हलादिशेषे 'कुहोश्चुः' इति कस्य चत्वे 'इको यणचि' इति यणि, अनुस्वारे परसवर्णे च कृते 'अयाञ्चक्रे' इति ।

उत्पूर्वक अय धातु से परस्मैपद में 'उदयति' और 'स्फायी वृद्धौ' इस अनुदात्त इत्संज्ञक धातु से लट् के स्थान में 'शतृ' आदेश होने पर 'स्फायान्' रूप सिद्ध होते हैं ।

√अय धातु गत्यर्थक है । अयते ।

(६०३) पद—उपसर्गस्य, अयतौ । **अनुवृत्ति**—रो लः । **विधिसूत्र** ।

मूलार्थ—अय् धातुपरक उपसर्ग के रेफ को लकार होता है ।

विमर्श—यहाँ 'कृपो रो लः' (८।२।१८) सूत्र से 'रो लः' की अनुवृत्ति आती है । तदनुसार—अय् धातु के परे रहते उपसर्ग के रेफ को लकारादेश (=लत्व) होता है ।

उदाहरण—(१) प्र+अयते (लट्) (र्=ल्—'उपसर्गस्यायतौ')—प्ल अयते (अ+अ='आ' दीर्घ)=प्लायते ।

(२) परा+अयते (र्=ल्)—पला+अयते (दीर्घ)=पलायते ।

(६०४) पद—दयायासः, च । **अनुवृत्ति**—आम्, लिटि । **विधिसूत्र** ।

मूलार्थ—दय्, अय् और आस् धातुओं से 'आम्' होता है, लिट् के परे रहते । अयाञ्चक्रे इत्यादि ।

विमर्श—प्रकृत सूत्र में 'कास्प्रत्ययादाममन्त्रे लिटि' (३।१।३५) सूत्र से 'आम्' और 'लिटि' पदों की अनुवृत्ति आती है । तदनुसार—"लिट् लकार के परवर्ती रहते दय्, अय् तथा आस् धातु से 'आम्' होता है ।"

उदाहरण—(१) अय्+लिट् ('आम्'—'दयायासश्च')—अय् आम् लिट् ('आमः' से 'लिट्' का लुक्, लिट्परक √कृ का अनुप्रयोग—'कृञ्चानुप्रयुज्यते लिटि' ल्=प्र० पु० ए० व०—त, त=एश्=ए, धातु को द्वित्व)—अयाम् कृ कृ ए (अभ्यास संज्ञा, 'उरत्' से ऋ=अ, रपर, हलादिशेष, 'क्'='च्'—'कुहोश्चुः' 'ऋ'='र्'—यण, म्=ं अनुस्वार, परसवर्ण—'वा पदान्तस्य')=अयाञ्चक्रे । (२) लुट्—अयिता । (३) लृट्—अयिष्यते । (४) लोट्—अयताम् । (५) लङ्—आयत । (६) विधिलिङ्—अयेत । (७) आशीर्लिङ्—अयिषीष्ट ।

आयत । अयेत । अयिषीष्ट । (६०५) विभाषेटः ८।३।७९ । इणः परो य इट्, ततः परेषां षीध्वंलुङ्लिटां धस्य वा ढः । अयिषीढ्वम् । अयिषीध्वम् । आयिष्ट । आयिढ्वम् । आयिध्वम् । आयिष्यत । द्युत दीप्तौ । द्योतते । (६०६) द्युतिस्वाप्योः सम्प्रसारणम् ७।४।६७ । अभ्यासस्य । दिद्युते । द्योतिता । द्योतिष्यते । द्योतताम् ।

---

(६०५) **विभाषेट इति** । 'इणः षीध्वंलुङ्लिटां धः' इति, 'अपदान्तस्ये'त्यतो मूर्धन्य इति चानुवर्तते । तदाह—**इणः पर इत्यादिना** । **अयिषीढ्वम्** । अय्धातोः आशीर्लिङि, लस्य स्थाने मध्यमपुरुषबहुवचने ध्वमि, 'लिङः सीयुट्' इति सीयुडागमेऽनुबन्धलोपे, यकारलोपे, आर्धधातुकत्वात् सलोपाभावे, इडागमेऽनुबन्धलोपे 'विभाषेटः' इति विकल्पेन धस्य मूर्धन्यादेशे ढकारे षत्वे 'अयिषीढ्वम् इति । ढत्वाभावे तु—'अयिषीध्वमि'ति ।

(६०६) **द्युतिस्वाप्योरिति** । 'अत्र लोपोऽभ्यासस्ये'त्यतः 'अभ्यासस्ये'त्यनुवर्तते । तदाह—**अभ्यासस्येति**। **दिद्युते** । द्युत्धातोः 'परोक्षे लिट्' इति लिट्यनुबन्धलोपे, लः स्थाने प्रथमपुरुषगतैकवचने तादेशे 'लिट् चे'त्यार्धधातुकसंज्ञायां तस्य स्थाने एशि,

---

(६०५) पद—विभाषा, इटः । **अनुवृत्ति**—इणः षीध्वंलुङ्लिटां धः, अपदान्तस्य मूर्धन्यः । **विधिसूत्र** ।

मूलार्थ—इण् से परवर्ती जो इट्, उससे परे षीध्वम् और लुङ्, लिट् के 'ध्' को विकल्प से मूर्धन्य (ढ्) आदेश होता है । अयिषीढ्वम् । अयिषीध्वम् इत्यादि ।

विमर्श—यहाँ 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' (८।३।७८) से 'इणः षीध्वंलुङ्लिटां धः' की अनुवृत्ति आती है । 'अपदान्तस्य मूर्धन्यः' (८।३।५५) का अधिकार होने से उक्त सूत्रार्थ होता है ।

उदाहरण—(१) अय्+आशीर्लिङ् (ल्=म० पु० ब० व०—ध्वम् , सीयुट्=सीय्)—अय् सीय् ध्वम् ('य्' का लोप, इट् ; 'ध्'='ढ्'—विकल्प से—'विभाषेटः, षत्व)=अयिषीढ्वम् । मूर्धन्यादेश (ढत्व) के अभावपक्ष में—अयिषीध्वम् । (२) लुङ्—प्र० पु० ए० व०—आयिष्ट । (३) अय्+लुङ् म० पु० ब० व० में (विकल्प से 'ध्'='ढ्')—आयिढ्वम् , आयिध्वम् । (४) लङ्—आयिष्यत ।

√द्युत धातु का अर्थ दीप्ति (=चमकना) है । (१) द्युत्+लट् (=प्र० पु० ए० व०—त, शप्=अ, 'उ'='ओ'—गुण 'पुगन्तलघूपधस्य च' एत्व—'टित आत्मने०')=द्योतते ।

(६०६) पद—द्युतिस्वाप्योः, सम्प्रसारणम् । **अनुवृत्ति**—अभ्यासस्य । **विधिसूत्र** ।

मूलार्थ—द्युत् धातु और स्वापि (णिजन्त) के अभ्यास को सम्प्रसारण होता है । दिद्युते ।

विमर्श—यहाँ 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' की अनुवृत्ति आती है । अतः द्युत और ण्यन्त स्वप् (स्वापि) के अभ्यास को सम्प्रसारण होता है ।

उदाहरण—(१) द्युद्+लिट् (=प्र० पु० ए० व०—त, आर्धधातुक संज्ञा, त=एश्=ए, धातु को द्वित्व)—द्युत् द्युत् ए (अभ्यास संज्ञा, 'य्'='इ'—सम्प्रसारण—'द्युतिस्वाप्योः सम्प्रसारणम्' 'उ' का पूर्वरूप, हलादिशेष)=दिद्युते । (२) लुट्—द्योतिता । (३) लृट्—द्योतिष्यते । (४) लोट्—द्योतताम् । (५) लङ्—अद्योतत । (६) विधिलिङ्—द्योतेत । (७) आशीर्लिङ्—द्योतिषीष्ट ।

अद्योतत । द्योतेत । द्योतिषीष्ट । **(६०७) द्युद्भ्यो लुङि १।३।९१ ।** द्युतादिभ्यः परस्मैपदं वा स्याल्लुङि । 'पुषादी'त्यङ् । अद्युतत् । अद्योतिष्ट । अद्योतिष्यत । एवम्— श्विता वर्णे । ञिमिदा स्नेहने । ञिष्विदा स्नेहनमोचनयोः । मोहनयोरित्येके । ञिक्ष्विदा चेत्येके । रुच दीप्तावभिप्रीतौ च । घुट परिवर्तने । शुभ दीप्तौ । क्षुभ सञ्चलने । णभ तुभ हिंसायाम् । स्रंसु ध्वंसु भ्रंसु अवस्रंसने । ध्वंसु गतौ च । स्रम्भु विश्वासे । वृतु वर्तने । वर्तते । * ऋदुपधेभ्यो लिटः कित्वं गुणात्पूर्वविप्रतिषेधेन * ।

शस्येत्संज्ञायां लोपे च, धातोर्द्वित्वे 'द्युत् द्युत् ए' इति जाते 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'द्युतिस्वाप्योः सम्प्रसारणम्' इत्यभ्यासयकारस्य सम्प्रसारणे इकारे 'सम्प्रसारणाच्च' इत्युकारस्य पूर्वरूपे 'दित् द्युत् ए' इति जाते 'हलादिः शेषः' इति तलोपे 'दिद्युते' इति ।

(६०७) द्युद्भ्यो लुङीति । 'शेषात्कर्तरि' इत्यतः परस्मैपदमित्यनुवर्तते । **अद्युतत् ।** द्युत् धातोर्लुङि, लः स्थाने 'द्युद्भ्यो लुङि' इति परस्मैपदे तिप्यनुबन्धलोपे 'च्लि लुङि' इति च्लौ तस्य 'च्लेः सिच्' इति सिचि प्राप्ते, तं प्रबाध्य 'पुषादिद्युताद्य्लृदितः' इत्यङादेशेऽनुबन्धलोपे ङित्त्वाद् गुणाभावे अडागमे 'इतश्चे'ति इकारस्य लोपे 'अद्युतत्' इति रूपम् ।

---

(६०७) पद—द्युद्भ्यः, लुङि । **अनुवृत्ति**—परस्मैपदम् , वा । **विधिसूत्र ।**

मूलार्थ—द्युतादि से परवर्ती लुङ् को विकल्प से परस्मैपद होता है ।

विमर्श—प्रकृत सूत्र में 'शेषात्कर्तरि परस्मैपदम्' (१।३।७८). से 'परस्मैपदम्' तथा 'वा क्यषः' (१।३।७) से 'वा' पद की अनुवृत्ति आती है । तदनुसार—द्युतादि धातुओं से लुङ् को विकल्प से परस्मैपद होता है । 'द्युद्भ्यः' में बहुवचन निर्देश होने से द्युत से लेकर कृपू पर्यन्त धातुओं का ग्रहण होता है ।

उदाहरण—(१) द्युत्+लुङ् (=प्र० पु० ए० व० 'द्युद्भ्यो लुङि' से विकल्प से परस्मैपद होने पर तिप्=ति)—द्युत् ति (च्लि, च्लि को प्राप्त सिच् आदेश का बाधकर 'च्लि'='अङ्'— 'पुषादि०', अडागम, 'इ' का लोप—'इतश्च')=अद्युतत् । परस्मैपद के अभावपक्ष में आत्मनेपद—अद्योतिष्ट । (२) लृङ्—अद्योतिष्यत ।

√श्विता धातु का अर्थ—श्वेत रंग में रंगना है । श्वेतते इत्यादि । √ञिमिदा का अर्थ—'चिकना होना' है । मेदते इत्यादि । √ञिष्विदा (=स्विद्) का अर्थ—पसीना आना और छोड़ना है । कुछ विद्वान् इसका अर्थ 'मोहित होना' कहते हैं । लट्—स्वेदते । कुछ आचार्य 'ञिष्विदा' के स्थान पर 'ञिक्ष्विदा' पाठ बतलाते हैं ।

√रुच् का अर्थ—'चमकना और अच्छा लगना' है । रोचते । √घुट का अर्थ—'घोंटना' है । घोटते । √शुभ का अर्थ—'चमकना, शोभित होना' है । शोभते । √क्षुभ का अर्थ—'व्याकुल होना, विचलित होना' है । क्षोभते । √णभ, तुभ का अर्थ—'हिंसा करना' है । नभते । तोभते । √स्रंसु, ध्वंसु और भ्रंसु (उदित्) का अर्थ—'गिरना' है । स्रंसते । भ्रंसते । ध्वंसते इत्यादि । √ध्वंसु धातु का अर्थ—'जाना' भी है । √स्रम्भ का अर्थ—'विश्वास करना' है । स्रम्भते ।

√वृत् का अर्थ—'होना' है । (१) वृत्+लट् (=प्र० पु० ए० व०—त, शप्=अ, 'ऋ' ='अ'—गुण, रपर 'टि' को एत्व)=वर्तते ।

ववृते । वर्तिता (६०८) वृद्भ्यः स्यसनोः १।३।९२ । वृतादिभ्यः पञ्चभ्यो वा परस्मैपदं, स्ये सनि च । (६०९) न वृद्भ्यश्चतुर्भ्यः ७।२।५९ । वृतुवृधुशृधुस्यन्दूभ्यः सादेरार्धधातुकस्येण्न स्यात्तङानयोरभावे । वत्स्र्यति । वर्तिष्यते । वर्तताम् । अवर्त्तत । वर्तेत । वर्तिषीष्ट । अवृतत् । अवर्तिष्ट । अवत्स्र्यत् । अवर्तिष्यत । एवं—वृधु वृद्धौ ।

---

(६०८) **वृद्भ्य इति ।** अत्र 'शेषात्कर्तरी'त्यतः परस्मैपदम्, 'वा क्यषः' इत्यतो वेति चानुवर्तते । तदाह—**वृतादिभ्य इति ।**

(६०९) **न वृद्भ्य इति ।** 'सेऽसिची'त्यतः 'से' इति 'आर्धधाकतुस्येड् वलादेः' इत्यत 'आर्धधातुकस्येड्' इति चानुवर्तते । तदाह—**एभ्य इत्यादि । वत्स्र्यति । वृत्**

ऋदुपधेभ्यः०—ऋदुपध (ह्रस्व ऋकार है उपधा में जिनके, ऐसी) धातुओं से परवर्ती जो लिट् (लिट्स्थानिक आदेश), उसको गुणप्राप्ति से पूर्व ही (पूर्वविप्रतिषेध से) कित्त्व हो जाता है ।

उदाहरण—(२) वृत्+लिट् (=प्र० पु० ए० व०—त, त=एश्=ए)—वृत् ए (धातु को द्वित्व, अभ्यास संज्ञा, ऋ=अ—'उरत्' रपर, हलादिशेष)—व वृत् ए ('पुगन्त०' से गुण की प्राप्ति, 'ऋदुपधेभ्यो०' से लिट् के कित् होने से 'क्ङिति च' से गुण का निषेध)=ववृते । (३) वृत्+लुट् (=प्र० पु० ए० व०—त, तास्, इट्, गुण, रपर, त=डा=आ, टिलोप) =वर्तिता ।

(६०८) पद—वृद्भ्यः, स्यसनोः । **अनुवृत्ति**—परस्मैपदम्, वा । **विधिसूत्र ।**

मूलार्थ—वृत् आदि पाँच धातुओं[१] से विकल्प से परस्मैपद होता है, 'स्य' और 'सन्' के परवर्ती रहने पर ।

विमर्श—यहाँ शेषात्कर्तरि परस्मैपदम्' (१।३।७८) से 'परस्मैपदम्' तथा 'वा क्यषः' (१।३।९०) से 'वा' पद की अनुवृत्ति आती है । तदनुसार—'स्य' और 'सन्' के परवर्ती रहने पर वृत् आदि पाँच धातुओं से विकल्प से परस्मैपद होता है ।

(६०६) पद—न, वृद्भ्यः, चतुर्भ्यः । **अनुवृत्ति**—परस्मैपदेषु, से, आर्धधातुकस्येड् । **विधिसूत्र** (निषेध) ।

मूलार्थ—वृत् आदि चार धातुओं से परवर्ती सकारादि आर्धधातुक को 'इट्' नहीं होता, 'तङ्' और 'आन' (शानच्, कानच्) के अभाव में अर्थात् परस्मैपद में ।

विमर्श—प्रकृत सूत्र में 'गमेरिट् परस्मैपदेषु' (७।२।५८) से 'परस्मैपदेषु' 'सेऽसिचि०' (७।२।५७) से 'से' तथा 'आर्धधातु'० (७।२।३५) से 'आर्धधातुकस्येड्' की अनुवृत्ति आने पर पूर्वोक्त अर्थ सम्पन्न होता है ।

उदाहरण—(१) वृत्+लृट् (=प्र० पु० ए० व०—'वृद्भ्यः स्यसनोः' से विकल्प से परस्मैपद होने पर—तिप्='ति' स्य—'स्यतासी०)—वृत् स्य ति ('आर्धधातुकस्येड् वलादेः' से 'इट्' की प्राप्ति, उसका 'न वृद्भ्यश्चतुर्भ्यः' से निषेध, लघूपधगुण, रपर)=वत्स्र्यति । परस्मैपद के अभावपक्ष में आत्मनेपद—वर्तिष्यते । (२) लोट्—वर्तताम् । (३) लङ्—अवर्तत । (४) विधिलिङ्—वर्तेत । (५) आशीर्लिङ्—वर्तिषीष्ट । (६) लुङ्—अवृतत्, अवर्तिष्ट (यहाँ 'द्युद्भ्यो लुङि' से विकल्प से परस्मैपद होने से 'च्लि' को 'पुषादि०' से 'अङ्' होने पर 'अवृतत्') (७) लृङ्—अवत्स्र्यत्, अवर्तिष्यत । (विकल्प से परस्मैपद) । उपसर्ग के योग में √वृत से—

---

१. 'वृतु, वृधु, शृधु, स्यन्दू और कृपू' ये पाँच धातु वृतादि हैं ।

शृधु शब्दकुत्सायाम्। स्यन्दू प्रस्रवणे। स्यन्दते। सस्यन्दे। सस्यन्दिषे। सस्यन्त्से। सस्यन्दिध्वे। सस्यन्ध्वे। स्यन्दिता। स्यन्ता। 'वृद्भ्यः स्यसनोरि'ति परस्मैपदे कृते ऊदिल्लक्षणमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यान्न वृद्भ्य इति निषेधः। स्यन्त्स्यति। स्यन्दिष्यते। स्यन्त्स्यते। स्यन्देत। स्यन्दिषीष्ट। स्यन्त्सीष्ट। 'द्युद्भ्यो लुङी'ति परस्मैपदपक्षेऽङ्। नलोपः। अस्यदत्। अस्यन्दिष्ट। अस्यन्त। अस्यन्त्साताम्। अस्यन्त्सत। अस्यन्त्थाः। अस्यन्दध्वम्। अस्यन्त्सि। अस्यन्त्स्यत्। अस्यन्दिष्यत। अस्यन्त्स्यत। (६१०) **अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु** ८।३।७२। एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा। अनुष्यन्दते, अनुस्यन्दते वा जलम्।

धातोर्लृटि, 'वृद्भ्यः स्यसनोः' इति वा परस्मैपदे लः स्थाने प्रथमपुरुषगतैकवचने तिप्यनुबन्धलोपे, 'स्यतासी लृलुटोः' इति स्ये, आर्धधातुकत्वे 'आर्धधातुकस्येड् वलादेः' इतीडागमे प्राप्ते 'न वृद्भ्यश्चतुर्भ्यः' इति तन्निषेधे, लघूपधगुणे रपरे च कृते 'वर्त्स्यति' इति। परस्मैपदाभावे आत्मनेपदपक्षे 'वर्तिष्यते' इति रूपम्।

(६१०) अनुविपर्यभिनिभ्य इति। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्त-

---

लट्—प्रवर्तते (=प्रवृत्त होता है), अनुवर्तते (=पीछे चलता है), प्रत्यावर्तते=(लौटता है), परिवर्तते (=बदलता है) तथा निवर्तते (=विरत होता है, लौटता है) इत्यादि रूप बनते हैं।

√वृधु धातु का अर्थ—'बढ़ना' है। वर्धते। √शृधु का अर्थ—'कुत्सित शब्द निकलना' है। शर्धते।

√स्यन्दू धातु का अर्थ—'प्रस्रवण=चूना, रिसना' है। लट्—स्यन्दते। लिट्—सस्यन्दे। लिट्—म० पु० ए० व० में (थास्=से, धातु को द्वित्व, अभ्यास संज्ञा, हलादिशेष, विकल्प से इट्—'स्वरतिसूति०', षत्व)=सस्यन्दिषे। इट् के अभावपक्ष में—सस्यन्द् से ('द्'='त्'—'चर्त्व')=सस्यन्त्से। लिट् म० पु० ब० व० (ध्वम्, द्वित्वादि कार्य, विकल्प से इट्, एत्व)= सस्यन्दिध्वे। इडभाव पक्ष में—सस्यन्ध्वे। लुट्—प्र० पु० ए० व० (त, तास्, विकल्प से इट्, त=डा=आ, टिलोप)=स्यन्दिता। इट् न होने पर चर्त्व—स्यन्ता। लृट् लकार में 'वृद्भ्यः स्यसनोः' से वैकल्पिक परस्मैपद होने पर ऊदित्‌लक्षण 'स्वरतिसूति०' से अन्तरङ्ग वैकल्पिक इट् नहीं हुआ, किन्तु बहिरङ्ग 'न वृद्भ्यश्चतुर्भ्यः' ने वैकल्पिक इट् का बाध किया। इसमें प्रमाण सूत्रस्थ चतुर्ग्रहण ही है। अन्यथा वैकल्पिक इट् बोधन करने पर उसका वैयर्थ्य स्पष्ट ही है। अतः परस्मैपद पक्ष में केवल एक ही रूप—स्यन्त्स्यति। आत्मनेपद में वैकल्पिक इट्—स्यन्दिष्यते। इडभाव पक्ष में—स्यन्त्स्यते। विधिलिङ्—स्यन्देत। आशीर्लिङ्—वै० इट्—स्यन्दिषीष्ट, स्यन्त्सीष्ट। लुङ्—प्र० पु० ए० व०—'द्युद्भ्यो लुङि' से परस्मैपद पक्ष में (तिप्=ति, अडागम, च्लि=अङ्=अ, नलोप, इकारलोप)=अस्यदत्। आत्मनेपद पक्ष में—विकल्प से इट्—अस्यन्दिष्ट। इट् न होने पर—अस्यन्त। लृङ्—प्र० पु० ए० व०—परस्मैपद में इट् न होने पर—अस्यन्त्स्यत्। आत्मनेपद पक्ष में—अस्यन्दिष्यत। अस्यन्त्स्यत।

(६१०) पद—अनुविपर्यभिनिभ्यः, स्यन्दते अप्राणिषु। **अनुवृत्ति**—सः। **विधिसूत्र**।

मूलार्थ—अनु, वि, परि, अभि और नि उपसर्गों से परवर्ती अप्राणिकर्तृक 'स्यन्द्' धातु के सकार को विकल्प से षत्व होता है। अनुष्यन्दते अनुस्यन्दते वा जलम् इत्यादि।

विमर्श—प्रकृत सूत्र में 'सहेः साडः सः' (८।३।५६) से 'सः' की अनुवृत्ति आती है। 'अपदान्तस्य मूर्धन्यः' (८।३।५५) का अधिकार है। तदनुसार पूर्वोक्त सूत्रार्थ निष्पन्न होता है।

अप्राणिषु किम् ? अनुस्यन्दते हस्ती । कृपू सामर्थ्ये । (६११) कृपो रो लः ८।२।१८। कृपः उः रः लः इति च्छेदः । कृपेः रेफस्य लः । कृपेर्ऋकारस्यावयवो यो रः=रेफसदृशस्तस्य च लः=लकारसदृशः स्यात् । कल्पते । चक्लृपे । चक्लृपिषे । चक्लृप्से । इत्यादि 'स्यन्दि'वत् । (६१२) लुटि च क्लृपः १।३।९३ । लुटि स्यसनोश्च क्लृपेः परस्मैपदं

मनुवर्तते । 'अपदान्तस्य मूर्धन्यः' इत्यधिकाराल्लभ्यते । तदाह—**एभ्य इत्यादिना । अनुष्यन्दत इति ।** अनूपसर्गपूर्वकात् स्यन्द् धातोर्लटि, तत्स्थाने 'त' इत्यादेशे, शपि, टेरेत्वे, 'अनुविपर्यभिनिभ्यः०' इति विकल्पेन षत्वे 'अनुष्यन्दते' इति । षत्वाभावे तु—'अनुस्यन्दते' इति रूपम् ।

(६११) **कृपो रो ल इति ।** कृप इति लुप्तविभक्तिकं पदम् । ऋकारस्य षष्ठ्येकवचने 'उः' इति रूपम् । रः इति षष्ठ्यन्तम् । **कल्पत इति ।** 'कृपू सामर्थ्ये' इत्यस्माद्धातोः लटि तत्स्थाने 'त' इति प्रत्यये, शपि, 'पुगन्त०' इति गुणे, रपरत्वे 'क र् प् अ त' इति जाते 'कृपो रो लः' इति रस्य लत्वे टेरेत्वे कृते 'कल्पते' इति ।

(६१२) **लुटि चेति ।** अत्र चकारात् 'वृद्भ्यः स्यसनोः' इत्यतः स्यसनोरित्यनुकृष्यते । 'शेषात्कर्तरि' इत्यतः परस्मैपदमिति, 'वा क्यषः' इत्यतो वेति च । तदाह—**लुटि स्यसनोरित्यादिना ।**

उदाहरण—(१) अनु+स्यन्द्+लट् (=प्र० पु० ए० व०—त, शप्=अ, एत्व, 'स्'='ष्' विकल्प से—'अनुविपर्यभिनिभ्यः०')=अनुष्यन्दते । षत्वाभाव पक्ष में—अनुस्यन्दते वा जलम् । अर्थ—जल बहता है । यहाँ प्राणिभिन्न जल अचेतन कर्ता है । अतः षत्व हुआ । सूत्र में अप्राणिषु=चेतन न हो—कहा गया है, अतः 'अनुस्यन्दते हस्ती'=हाथी पसीज रहा है । यहाँ षत्व नहीं हुआ ।

√कृपू धातु का अर्थ—'सामर्थ्य=समर्थ, दक्ष होना' है ।

(६११) पद—कृपः, रः, लः । **विधिसूत्र ।**

मूलार्थ—कृप् धातु के रेफ को लकार आदेश होता है। तथा 'कृप्' के ऋकारावयव जो रेफ सदृश भाग, उसको लकार सदृश आदेश होता है । कल्पते इत्यादि ।

विमर्श—सूत्रार्थ स्पष्ट है । 'कृप उः' ऐसा पदच्छेद है । 'कृप' यह लुप्तषष्ठीक पद है ।

उदाहरण—(१) कृप्+लट् (=प्र० पु० ए० व०—त, शप्=अ, 'पुगन्त०' से गुण ऋ=अ, रपर)—क र् प् अ त ('र्'='ल्'—'कृपो रो लः' 'टि' को एत्व)=कल्पते । (२) कृप्+लिट् (=प्र० पु० ए० व०—त, त=एश्=ए, धातु को द्वित्व, अभ्यास संज्ञा, उरत्; रपर, हलादि शेष, 'क्'='च्'—कुहोश्चुः)—च कृ प् ए (ऋकारावयव रेफसदृश को लकार सदृश लकार—'कृपो रो लः')=चक्लृपे । (२) कृप्+लिट् (=म० पु० ए० व०—थास्=से, द्वित्व, अभ्यासादि कार्य, इट् पक्ष में—लत्व, षत्व)=चक्लृपिषे । इट् न होने पर—चक्लृप्से । अन्य रूप 'स्यन्द्' धातु के समान बनेंगे ।

(६१२) पद—लुटि, च, क्लृपः । **अनुवृत्ति**—स्यसनोः, वा, परस्मैपदम् । **विधिसूत्र ।**

मूलार्थ—लुट् 'स्य' और 'सन्' के परवर्ती रहने पर कृप् धातु से विकल्प से परस्मैपद होता है ।

विमर्श—यहाँ 'वृद्भ्यः स्यसनोः' (६०९) से 'स्यसनोः' 'वा क्यषः' (१।३।९०) से 'वा' तथा 'शेषात्कर्तरि परस्मैपदम्' (१।३।७८) से 'परस्मैपदम्' पदों की अनुवृत्ति आती है । तद-

वा । **(६१३) तासि च क्लृपः ७।२।६०** । क्लृपेः परस्य तासेः, सादेरार्द्धधातुकस्येण्न, तङानयोरभावे । कल्प्तासि । कल्पितासे । कल्प्तासे । कल्प्स्यति । कल्पिष्यते । कल्प्स्यते । कल्पिषीष्ट । **(६१४) लिङ्सिचावात्मनेपदेषु १।२।११** । इक्समीपाद्धलः परौ झलादी लिङ्, आत्मनेपदपरः सिच्चेत्येतौ कितौ स्तः । क्लृप्सीष्ट । अक्लृपत् । अकल्पिष्ट । अक्लृप्त । अकल्प्स्यत् । अकल्पिष्यत । अकल्प्स्यत । इति द्युतादयः ।

---

(६१३) **तासि चेति** । 'सेऽसिचि०' इत्यतः से इति 'आर्धधातुकस्य' इत्यतः आर्धधातुकस्येडिति चानुवर्तते । 'न वृद्भ्यः' इत्यतो नेति, 'गमेरिट्' इत्यतः परस्मैपदमिति चानुवर्तते । तदाह—**क्लृपेः परस्येति** । **कल्प्तासि** । कृप्धातोर्लुटि 'लुटि च क्लृपः' इति वैभाषिके परस्मैपदे सिपि, तासि, 'स्वरति' इति वैभाषिकेडागमे प्राप्ते 'तासि च क्लृपः' इति इडागमाभावे 'पुगन्तलघूपधस्य चे'ति गुणे रपरत्वे 'कृपो रो लः' इति लत्वे 'कल्प्तासि' । आत्मनेपदे तु—थासि, 'थासः से' इति 'से' आदेशे तासि, 'स्वरती'ति वेटि, कल्पितासे । इडभावपक्षे—'कल्प्तासे' इति रूपद्वयम् ।

(६१४) **लिङ्सिचाविति** । इक्समीपादिति, झलादीति, किदिति चानुवर्तते । **कल्पिषीष्ट, क्लृप्सीष्ट इति** । कृप्धातोः आशिषि लिङि लस्य स्थाने आत्मनेपदे तप्रत्यये

नुसार—"लृट् लकार में 'स्य' एवं 'सन्' प्रत्यय के विषय में क्लृप् से परे लकार के स्थान में परस्मैपदसंज्ञक प्रत्यय आदेश विकल्प से होते हैं" ।

(६१३) पद—तासि, च, क्लृपः । **अनुवृत्ति**—न, से, आर्धधातुकस्येट् । **विधिसूत्र (निषेध)** ।

मूलार्थ—क्लृप् से परवर्ती तास् और सादि आर्धधातुक को इट् नहीं होता, तङ् और आन (शानच्-कानच्) के अभाव में ।

विमर्श—इस सूत्र में—'न वृद्भ्यश्चतुर्भ्यः' (७।२।५९) से 'न', 'सेऽसिचि०' (७।२।५७) से 'से' और 'आर्धधातुकस्येड् वलादेः' (७।२।३५) से 'आर्धधातुकस्येट्' पदों की अनुवृत्ति आती है । अतः क्लृप् से परवर्ती तास् तथा सकारादि आर्धधातुक को इट् का आगम नहीं होता, परस्मैपद के परे रहते ।

उदाहरण—(१) √कृप्+लुट् (प्राप्त आत्मनेपद का बाधकर 'लुटि च क्लृपः' से विकल्प से परस्मैपद होने पर म० पु० ए० व०—सिप्='सि', तास्, 'स्वरति०' से विकल्प से इट् की प्राप्ति 'तासि च क्लृपः' से निषेध 'पुगन्त०' से 'ऋ'='अ'—गुण, रपर, 'र्'='ल्'—'कृपो रो लः')=कल्प्तासि । आत्मनेपद पक्ष में (थास्=से, तास्, विकल्प से इट्, गुण, रपर, लत्व)=कल्पितासे । इडभाव पक्ष में—कल्प्तासे ।

(२) लृट् में परस्मैपद होने पर प्र० पु० ए० व०—(तिप्=ति, स्य, विकल्प से इट् की प्राप्ति, 'तासि च क्लृपः' से निषेध, गुण, रपर, लत्व)=कल्प्स्यति । परस्मैपद के अभावपक्ष में—विकल्प से इट्—कल्पिष्यते-कल्प्स्यते ।

(६१४) पद—लिङ्सिचौ, आत्मनेपदेषु । **अनुवृत्ति**—हलन्तात्, इको झल्, कित् । **अतिदेश सूत्र** ।

मूलार्थ—इक् समीप हल् से परवर्ती जो झलादि लिङ् और आत्मनेपदपरक सिच्, ये दोनों कित् होते हैं । क्लृप्सीष्ट इत्यादि ।

अथात्मनेपदम्

दद दाने । ददते । दददे । दददाते । दददिरे । ददिता । ददिष्यते । ददताम् । अददत । ददेत । ददिषीष्ट । अददिष्ट । अददिष्यत । त्रपूष् लज्जायाम् । त्रपते ।

'लिङः सीयुट्' इति सीयुडागमेऽनुबन्धलोपे, 'सुट् तिथोः' इत्यनेन सुटि, अनुबन्धलोपे 'कृप् सीय् स् त' इति जाते आर्धधातुकसंज्ञायाम् 'पुगन्तलघूपधस्य चे'ति गुणे रपरे 'कृपो रो लः' इति रकारस्य लकारे 'स्वरतिसूति०' इत्यादिना विकल्पेन इडागमे 'आदेशप्रत्यययोः' इत्यनेनोभयोः सकारयोः षत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे 'लोपो व्योर्वलि' इति यकारलोपे संयोगे 'कल्पिषीष्ट' इति । इडभावपक्षे तु—'क्लृप् सीय् स् त' इति जाते यलोपे, 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वे 'क्ङिति चे'त्यनेन गुणनिषेधे 'क्लृप्सीष्ट' इति सिद्धम् ।

दद दाने । दानञ्च—स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोपादानम् । **दददे ।** दद्धातोर्लिटि, तत्स्थाने प्रथमपुरुषैकवचने तादेशे, 'त' इत्यस्य स्थाने 'लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशेऽनुबन्धलोपे, द्वित्वेऽभ्यासकार्ये च जाते, 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्येत्वेऽभ्यासलोपे च प्राप्तें 'न शशददवादिगुणानाम्' इति निषेधे 'दददे' इति रूपम् ।

विमर्श—प्रकृत सूत्र में 'इको झल्' (१।२।९) सूत्र, 'हलन्ताच्च' (१।२।१०) से हलन्तात् और 'असंयोगाल्लिट् कित्' (१।२।५) से 'कित्' की अनुवृत्ति आ रही है । तदनुसार—इक् के समीप जो हल्, उससे परवर्ती झलादि लिङ् और सिच् आत्मनेपद के विषय में किद्वत् होते हैं ।

उदाहरण—(१) √कृप्+आशीर्लिङ् (=प्र० पु० ए० व०—त, 'सीयुट्'='सीय्', सुट्= 'स्')—कृप् सीय् स् त (गुण, रपर, लत्व—'कृपो रो लः', विकल्प से 'इट्'—'स्वरतिसूति०', षत्व, ष्टुत्व, यकार का लोप—'लोपो व्योः०')=कल्पिषीष्ट । इट् के अभाव पक्ष में—कृप् सी स् त (लत्व, 'पुगन्तलघूपधस्य च' से गुण की प्राप्ति, 'लिङ्सिचावात्मनेपदेषु' से लिङ् के किद्वत् होने से 'क्ङिति च' से गुणनिषेध, षत्व, ष्टुत्व)=क्लृप्सीष्ट । (२) √कृप् 'द्युद्भ्यो लुङि' से परस्मैपद पक्ष में—तिप्=ति, इकारलोप, च्लि='अङ्'='अ'—'पुषादिद्युतादि०' अडागम, लत्व, ङित् होने से गुण का अभाव=अक्लृपत् । आत्मनेपद पक्ष में (च्लि=सिच् ='स्', विकल्प से इट्—'स्वरतिसूति०')—अ क्लृप् इ स त ('पुगन्त०' से गुण, षत्व, ष्टुत्व) =अकल्पिष्ट । इट् के अभावपक्ष में—अक्लृप् स् त ('स्' का लोप—'झलो झलि')=अक्लृप्त । (३) लृङ् में भी तीन रूप बनते हैं—अकल्प्स्यत् (परस्मैपद पक्ष में), अकल्पिष्यत, अकल्प्स्यत ।

द्युतादिगण समाप्त ।

√दद धातु का अर्थ—'देना' है । (१) लट्, प्र० पु० ए० व०—ददते ।

√दद् धातु लट् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०	ददते	ददेते	ददन्ते
म० पु०	ददसे	ददाथे	ददध्वे
उ० पु०	ददे	ददावहे	ददामहे

(६१५) तॄफलभजत्रपश्च ६।४।१२२। एषामत एत्वमभ्यासलोपश्च, किति लिटि, सेटि थलि च। त्रेपे। त्रपिता। त्रप्ता। त्रपिष्यते। त्रप्स्यते। त्रपताम्। अत्रपत। त्रपेत। त्रपिषीष्ट। त्रप्सीष्ट। अत्रपिष्ट। अत्रप्त। अत्रपिष्यत। अत्रप्स्यत। घट चेष्टायाम्। घटते। जघटे। व्यथ भयसञ्चलनयोः। व्यथते। **(६१६) व्यथो लिटि ७।४।६८।** व्यथेरभ्यासस्य सम्प्रसारणं स्याल्लिटि परे। हलादिः शेषापवादः। विव्यथे।

---

(६१५) **तॄफलभजत्रपश्चेति**। 'अत एकहल्मध्ये' इत्यत अत इति, लिटीति चानुवर्तते। 'ध्वसोरेद्धावभ्यासलोपश्चे'त्यतः एदिति, अभ्यासलोपश्चेति च, 'गमहन' इत्यतः कितीति, 'थलि च सेटि' इति सूत्रञ्चानुवर्तते। तदाह—**एषामत इत्यादि**। त्रेपे। त्रप्धातोर्लिटि तत्स्थाने प्रथमपुरुषगतैकत्वविवक्षायां तप्रत्यये, तस्य स्थाने 'लिटस्तझयोरेशिरेच्' इति एशि, अनुबन्धलोपे धातोर्द्वित्वेऽभ्यासत्वे 'तॄफलभजत्रपश्चे'त्यनेन त्रप अकारस्यैत्वे अभ्यासलोपे च कृते 'त्रेपे' इति।

(६१६) **व्यथो लिटीति**। अत्र अभ्यासस्येति सम्प्रसारणमिति चानुवर्तते। तदाह—

---

(२) दद्+लिट् (=त=एश्='ए', द्वित्व, अभ्यास संज्ञा, 'अत एकहल्मध्येऽनादेशादेर्लिटि' से एत्व और अभ्यासलोप की प्राप्ति, उसका 'न शसददवादिगुणानाम्' से निषेध, हलादिशेष) =ददde। (३) लिट् प्र० पु० द्वि० व०—दददाते। (४) लिट्—प्र० पु० ब० व०—दददिरे। (४) लुट्—ददिता। (५) लृट्—ददिष्यते। (६) लोट्—ददताम्। (७) लङ्—अददत। (८) विधिलिङ्—ददेत। (९) आशीर्लिङ्—ददिषीष्ट। (१०) लुङ्—अददिष्ट। (११) लृङ्—अददिष्यत।

√त्रपूष् (=त्रप्) धातु का अर्थ 'लज्जित होना' है।

(६१५) पद—तॄफलभजत्रपः, च। **अनुवृत्ति**—अतः, लिटि, एत्, अभ्यासलोपः, किति, थलि च सेटि। **विधिसूत्र**।

मूलार्थ—तॄ, फल, भज् और त्रप्—इन धातुओं के अत् को एत्व और अभ्यास का लोप होता है, कित् लिट् और सेट् थल् के परवर्ती रहने पर। त्रेपे इत्यादि।

विमर्श—सूत्रार्थ की पूर्णता के लिए—'अत एकहल्मध्येऽनादेशादेर्लिटि' (६।४।१२०) सूत्र से 'अतः' 'लिटि' 'ध्वसोरेद्धावभ्यासलोपश्च' (६।४।११९) से 'एत्' और 'अभ्यासलोपः' 'गमहन०' से 'किति' तथा 'थलि च सेटि' (६।४।१२१) सूत्र की अनुवृत्ति आती है। तदनुसार—तॄ (=तैरना), फल् (=फलना), भज् (=सेवा करना) और त्रपूँ (=लज्जित होना) धातुओं के ह्रस्व अकार को एत्व और अभ्यास का लोप होता है, कित् लिट् और सेट् थल् के परे रहते।

उदाहरण—(१) त्रप्+लिट् (=त=एश्='ए' द्वित्व, अभ्यास संज्ञा, 'अ'='ए', अभ्यास का लोप—'तॄफलभजत्रपश्च')=त्रेपे। (२) त्रप्+लुट् (=त=डा='आ', तास्)—त्रप् तास् आ (विकल्प से इट्—'स्वरतिसूतिसूयति०', टिलोप)=त्रपिता। इट् के अभावपक्ष में—त्रप्ता। (३) लृट्—त्रपिष्यते, त्रप्स्यते। (४) लोट्—त्रपताम्। (५) लङ्—अत्रपत। (६) विधिलिङ्—त्रपेत। (७) आशीर्लिङ्—त्रपिषीष्ट, त्रप्सीष्ट (विकल्प से इट्)। (८) लुङ्—अत्रपिष्ट, अत्रप्त। (९) लृङ्—अत्रपिष्यत, अत्रप्स्यत।

√घट् धातु का अर्थ—'चेष्टा करना' है। (१) लट्—घटते। (२) लिट्—जघटे।

√व्यथ धातु भय एवं सञ्चलन (=दुःखी होना) अर्थ में है। (१) लट्—व्यथते।

(६१६) पद—व्यथः, लिटि। **अनुवृत्ति**—अभ्यासस्य, सम्प्रसारणम्। **विधिसूत्र**।

प्रथ प्रख्याने । प्रथते । पप्रथे । प्रस विस्तारे । प्रसते । पप्रसे । म्रद मर्दने । म्रदते । स्खद स्खदने । स्खदनं—विद्रावणम् । स्खदते । क्रप कृपायाम्, गतौ च । क्रपते । ञित्वरा सम्भ्रमे । त्वरते । टुभ्राजृ, टुभ्राशृ, टुभ्लाशृ दीप्तौ । भ्राजते । (६१७) **फणां च सप्तानाम् ६।४।१२५।** फण्-राजृ-भ्राजृ-भ्राशृ-भ्लाशृ-स्यमु-स्वन् एषां वा एत्वाभ्यासलोपौ स्तः, किति लिटि, सेटि थलि च । भ्रेजे । बभ्राजे । 'वा भ्राशे'ति

व्यथेरभ्यासस्येति । **विव्यथ इति ।** व्यथ्धातोर्लिटि तत्स्थाने तप्रत्यये 'लिटि धातोरनभ्यासस्ये'ति द्वित्वेऽभ्यासत्वे 'हलादिः शेषः' इति सूत्रमपवादत्वात् बाधित्वा 'व्यथो लिटि' इत्यनेन सम्प्रसारणे व् इ थ् व्यथ् त इति जाते 'हलादिः शेषः' इति थकारलोपे 'लिटस्तझयोः' इति 'त' इत्यस्य स्थाने एशादेशेऽनुबन्धलोपे 'विव्यथे' इति ।

(६१७) **फणां चेति ।** फणामिति षष्ठीबहुवचनम् । एत्वाभ्यासलोपौ, किति लिटीति चानुवर्तते । **भ्रेज इति ।** 'टु भ्राजृ दीप्तौ' इत्यस्माद्धातोः अनुबन्धलोपे लिटि प्रथमपुरुषैकवचने तप्रत्यये तस्य 'लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशेऽनुबन्धलोपे

मूलार्थ—लिट् के परवर्ती रहते व्यथ् धातु को सम्प्रसारण होता है । 'हलादिः शेषः' का यह अपवाद है । विव्यथे इत्यादि ।

विमर्श—प्रकृत सूत्र में 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' तथा 'द्युतिस्वाप्योः सम्प्रसारणम्' (७।४।६७) से 'सम्प्रसारणम्' पद की अनुवृत्ति आती है । तदनुसार—'लिट् के परे रहते व्यथ् धातु के अभ्यास को सम्प्रसारण होता है' ।

उदाहरण—(१) व्यथ्+लिट् (=त, धातु को द्वित्व, अभ्यास संज्ञा, 'हलादिः शेषः' का बाधकर, 'य्'='इ'—सम्प्रसारण—'व्यथो लिटि', हलादिशेष, त=एश्='ए')=विव्यथे ।

√प्रथ का अर्थ 'बोधन करना' है । (१) लट्—प्रथते । (२) लिट्—पप्रथे ।

√प्रस् धातु का अर्थ—'विस्तार करना' है । (१) लट्—प्रसते । (२) लिट्—पप्रसे ।

√म्रद का अर्थ—'मर्दन करना' है । (१) लट्—म्रदते ।

√स्खद् का अर्थ—विद्रावण='बिगाड़ना' है । लट्—स्खदते ।

√क्रप् का अर्थ—'कृपा करना, जाना' है । लट्—क्रपते ।

√ञित्वरा का अर्थ—'घबरा कर शीघ्रता करना' है । लट्—त्वरते ।

√टुभ्राजृ, टुभ्राशृ, टुभ्लाशृ का अर्थ—दीप्ति='चमकना' है । 'टु' इत् का फल है 'ट्वितोऽथुच्' । (१) भ्राज्+लट्=भ्राजते ।

(६१७) पद—फणां, च, सप्तानाम् । **अनुवृत्ति**—वा, अतः, लिटि, एत्, अभ्यासलोपः, किति, थलि च सेटि । **विधिसूत्र ।**

मूलार्थ—फण् आदि सात धातुओं को एत्व और अभ्यास का लोप विकल्प से होता है, कित् लिट् और सेट् थल् परे रहते । भ्रेजे । बभ्राजे इत्यादि ।

विमर्श—सूत्रार्थ की पूर्ति हेतु—'वा जॄभ्रमुत्रसाम्' (६।४।१२४) से 'वा', 'अत एकहल्मध्ये' (६।४।१२०) से 'अतः', और 'लिटि', 'ध्वसोरेद्धावभ्यासलोपश्च' (६।४।११९) से 'एत्' और 'अभ्यासलोपः', 'गमहन' से 'किति' तथा 'थलि च सेटि' (६।४।१२१) सूत्र की अनुवृत्ति आती है । इस प्रकार—'फण् आदि सात धातुओं के अवर्ण के स्थान में भी विकल्प से एत्व और अभ्यास का लोप होता है, कित् लिट् तथा सेट् थल् के परवर्ती रहते ।

उदाहरण—(१) टुभ्राजृ (अनुबन्धलोप)—भ्राज्+लिट् (=त, द्वित्व, अभ्यास संज्ञा'

श्यन्वा । भ्राश्यते । भ्राशते । भ्रेशे । बभ्राशे । भ्लाश्यते । भ्लाशते । भ्लेशे । बभ्लाशे । रमु क्रीडायाम् । रमते । रेमे । रन्ता । जभी जृभि गात्रविनामे । (६१८) रधिजभोरचि ७।१।६१ । रधिजभोरचि नुम् । जम्भते । जजम्भे । जृम्भते । जजृम्भे । इत्यात्मनेपदिनः ।

अथोभयपदिनः

श्रिञ् सेवायाम् । श्रयति । श्रयते । शिश्राय । शिश्रिये । श्रयितासि । श्रयितासे । श्रयिष्यति । श्रयिष्यते । श्रयतु । श्रयताम । अश्रयत् । अश्रयत । श्रयेत् । श्रयेत ।

'भ्राज् ए' इति स्थिते धातोर्द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्यासत्वे हलादिशेषे भ्रा भ्राज् ए इति जाते 'ह्रस्वः' इत्यनेन ह्रस्वत्वे 'फणां च सप्तानाम्' इत्यनेन अभ्यासलोपे उपधा-एत्वे च 'भ्रेजे' इति सिद्धम् ।

(६१८) **रधिजभोरचीति** । 'इदितो नुम् धातोः' इत्यतः नुमित्यनुवर्तते । तेन 'रधिजभोर्धात्वोर्नुमागमः स्यात् अचि परतः' इत्यर्थो निष्पद्यते । **जम्भते** । जभ् धातोर्लटि तङि 'रधिजभोरचि' इति नुमि अनुस्वारे परसवर्णे, शपि, टेरेत्वे च कृते 'जम्भते' इति ।

शिश्राय इति । श्रिधातोः 'परोक्षे लिट्' इति लिटि, लः स्थाने परस्मैपदे प्रथम-

---

एत्व तथा अभ्यासलोप विकल्प से—'फणां च सप्तानाम्', त=एश्='ए')=भ्रेजे । एत्वाभ्यास-लोप के अभावपक्ष में (हलादिशेष, 'भ्'='ब्'—जश्त्व)=बभ्राजे ।

(२) भ्राश्+लट् (=त, 'वा भ्राश०' से विकल्प से श्यन्=य, एत्व)=भ्राश्यते । श्यन् के अभावपक्ष में शप्=अ, 'टि' को एत्व=भ्राशते । (३) भ्राश्+लिट् में (विकल्प से एत्वाभ्यास लोप होने पर)=भ्रेशे । बभ्राशे ।

√भ्लाश्+लट् (=त, विकल्प से श्यन्, एत्व)=भ्लाश्यते । पक्ष में शप्—भ्लाशते । लिट् में—भ्लेशे, बभ्लाशे ।

√रमु धातु का अर्थ—'रमण करना' है । (१) लट्—रमते । (२) लिट्—रेमे । (३) लुट्—रन्ता ।

√जभी, जृभि का अर्थ—'अँगड़ाई लेना या जम्हाई लेना' है ।

(६१८) पद—रधिजभोः, अचि । **अनुवृत्ति**—नुम् । **विधिसूत्र** ।

मूलार्थ—अजादि प्रत्यय के परवर्ती रहने पर रध् और जभ् धातु को 'नुम्' का आगम होता है । जम्भते ।

विमर्श—यहाँ—'इदितो नुम् धातोः' (७।१।५८) सूत्र से 'नुम्' की अनुवृत्ति आती है । तदनुसार—'रध् और जभ् धातु को नुम् होता है, अजादि प्रत्यय के परे रहते ।

उदाहरण—(१) जभ्+लट् (=त, नुम्='न्'—'रधिजभोरचि', अनुस्वार, परसवर्ण, शप्, 'टि' को एत्व)=जम्भते । (२) लिट्—जजम्भे । (३) जृभ्+लट्=जृम्भते । (४) जृभ्+लिट् प्र० पु० ए० व०—जजृम्भे ।

अब उभयपदी धातुओं की रूप-सिद्धि का विवेचन किया जा रहा है—

√श्रिञ् धातु का अर्थ—'सेवा करना' है । (१) लट् (परस्मैपद) प्र० पु० ए० व०—श्रयति । आत्मनेपद—श्रयते । (२) श्रि+लिट् (=परस्मैपद प्र० पु० ए० व०—तिप्=णल्=

श्रीयात् । श्रयिषीष्ट । चङ् । अशिश्रियत् । अशिश्रियत । अश्रयिष्यत् । अश्रयिष्यत । भृञ् भरणे । भरति । भरते । बभार । बभ्रतुः । बभ्रुः । बभर्थ । बभृव । बभृम । बभ्रे । बभृषे । भर्तासि । भर्तासे । भरिष्यति । भरिष्यते । भरतु । भरताम् । अभरत् ।

पुरुषगतैकत्वविवक्षायां तिपि, 'परस्मैपदानामि'त्यादिना तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्ये'ति धातोः द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां हलादिशेषे 'सार्वधातुकार्धधातुकयोः' इति गुणे 'एचोऽयवायावः' इत्यनेन अयादेशे 'शिश्रय् अ' इति जाते 'अत उपधायाः' इत्युपधाकारस्य वृद्धौ 'शिश्राय' इति । आत्मनेपदे तु—'शिश्रित' इति जाते 'त' इत्यस्य स्थाने एशादेशेऽनुबन्धलोपे 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङि 'शिश्रिये' इति । **अशिश्रियत् ।** 'श्रिञ् सेवायाम्' इत्यस्माद्धातोः लुङि प्रथमपुरुषैकवचने तिपि 'च्लि लुङि' इति च्लौ, 'च्लेः सिच्' इत्यनेन सिजादेशे प्राप्ते 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेः स्थाने चङादेशेऽनुबन्धलोपे द्वित्वेऽभ्यासत्वे हलादिशेषे 'शिश्रि अ ति' इति जाते 'इतश्चे'त्यनेन तिप इकारलोपे अडागमेऽनुबन्धलोपे 'अचि श्नु०' इत्यनेन इयङादेशेऽनुबन्धलोपे 'अशिश्रियत्' इति ।

'अ', धातु को द्वित्व, अभ्यास संज्ञा, हलादिशेष)—शि श्रि अ (गुण—'सार्वधातुकार्धधातुकयोः' 'ए'='अय्' आदेश)—शिश्रय् अ ('अ'='आ'—वृद्धि—'अत उपधायाः')=शिश्राय आत्मनेपद में—(त, त=एश्=ए, द्वित्व, अभ्यास संज्ञा, हलादिशेष)—शि श्रि ए (इ=इयङ्='इय्'='अचि श्नु०')=शिश्रिये ।

√श्रिञ् धातु लिट् लकार के रूप (परस्मैपद में)

	एक०	द्वि०	बहु०
प्र० पु०—	शिश्राय	शिश्रियतुः	शिश्रियुः
म० पु०—	शिश्रयिथ	शिश्रियथुः	शिश्रिय
उ० पु०—	शिश्राय	शिश्रियिव	शिश्रियिम

√श्रिञ् लिट् लकार (आत्मनेपद में)

	एक०	द्वि०	बहु०
प्र० पु०—	शिश्रिये	शिश्रियाते	शिश्रियिरे
म० पु०—	शिश्रियिषे	शिश्रियाथे	शिश्रियिध्वे
उ० पु०—	शिश्रिये	शिश्रियिवहे	शिश्रियिमहे

उदाहरण—√हन्+लोट् (=सिप्, शप्, लुक्, सि='हि' 'सेर्ह्यपिच्च' 'हन्'='ज'—'हन्तेर्जः')=**जहि** । यहाँ 'अतोः हेः' से 'हि' का लुक् प्राप्त है, परन्तु 'असिद्धवदत्राभात्' से 'ज' आदेश के असिद्धवत् होने से अदन्त के अभाव में 'हि' का लुक् नहीं होता । तातङ् पक्ष में—हतात् ।

√हन् धातु लोट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	हन्तु–हतात्	हताम्	घ्नन्तु
म० पु०	जहि–हतात्	हतम्	हत
उ० पु०	हनानि	हनाव	हनाम

हन् धातु लङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	अहन्	अहताम्	अघ्नन्
म० पु०	अहन्	अहतम्	अहत
उ० पु०	अहनम्	अहन्व	अहन्म

√हन्+विधिलिङ् (=तिप्=ति, शप्, लुक्, यासुट्='यास्', इकारलोप)—हन् यास् त् ('स्' का लोप—'लिङः सलोपोऽनन्त्यस्य')=हन्यात् ।

(६४८) पद—आर्धधातुके । **अधिकारसूत्र** ।

मूलार्थ—यह अधिकार सूत्र है ।

इत्यधिकृत्य । **(६४९) हनो वध लिङि २।४।४२ । (६५०) लुङि च २।४।४३ । वधादेशोऽदन्तः । 'आर्द्धधातुके' इति विषयसप्तमी, तेनार्द्धधातुकोपदेशेऽकारान्तत्वादतो लोपः । वध्यात् । वध्यास्ताम् । अवधीत् । अहनिष्यत् । यु मिश्रणामिश्रणयोः ।**

---

(६४९) **हनो वध इति** । हनो वधादेशः स्यादार्धधातुके लिङीत्यर्थः ।

(६५०) **लुङि चेति** । लुङि चापि हनो वधादेशः स्यादिति भावः । **अवधीत्** । हन्धातोर्लुङि 'लुङि चे'ति हनः स्थाने वधादेशे लः स्थाने तिपि, च्लौ, च्लेः स्थाने सिजादेशेऽनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यटि, 'इतश्चे'तीकारलोपे 'अ वध् स् त्' इति जाते 'आर्धधातुकस्येड् वलादेः' इति इटि 'अतो लोपः' इति अकारस्य लोपे 'अस्तिसिचोऽपृक्ते' इतीडागमेऽनुबन्धलोपे 'इट ईटि' इति सकारलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्य सिद्धत्वात्सवर्णदीर्घे 'अवधीत्' इति रूपम् ।

('वा यौ (२।४।५७) सूत्र तक 'आर्धधातुक के विषय में' का अधिकार जाता है ।)

(६४९) पद—हनः, वध, लिङि । **विधिसूत्र ।**

मूलार्थ—लिङ् के परवर्ती रहने पर हन् धातु को 'वध' आदेश होता है ।

विमर्श—'आर्धधातुके' का अधिकार है । अतः आर्धधातुक लिङ् के परे रहते √हन् को वध आदेश होता है ।

(६५०) पद—लुङि च । **अनुवृत्ति**—हनो वध । **विधिसूत्र ।**

मूलार्थ—'लुङ्' के परवर्ती रहने पर भी 'हन्' धातु को 'वध' आदेश होता है । वध्यात् इत्यादि ।

विमर्श—'आर्धधातुके' (६४९) का अधिकार है । चकार से पूर्वसूत्र (६५०) से 'हनो वध' की अनुवृत्ति आती है । तदनुसार—"आर्धधातुक लुङ् के विषय में भी 'हन्' धातु के स्थान में 'वध' आदेश होता है" । यह 'वध' आदेश अदन्त है ।

'आर्धधातुके' इति । अधिकार सूत्र 'आर्धधातुके' में विषयसप्तमी है । अर्थात् वैषयिक आधार के विषय में सप्तमी विभक्ति का प्रयोग हुआ है । आशय यह है कि यहाँ आर्धधातुक के परवर्ती रहने की आवश्यकता नहीं है, अपितु आर्धधातुक के विषय में यह आदेश होता है अर्थात् आर्धधातुकसंज्ञक प्रत्यय के आने से पूर्व ही यह आदेश हो जाता है । तत्पश्चात् वध से आर्धधातुक प्रत्यय आता है । इससे आर्धधातुक के उपदेशकाल में अदन्त होने से 'अतो लोपः' से अकार का लोप हो जाता है ।

उदाहरण—(१) √हन्+आशीर्लिङ् (=तिप्=ति, आर्धधातुक संज्ञा, 'हन्'='वध'—'हनो वध लिङि', यासुट्='यास्'—किदाशिषि)—वध यास् ति ('अ' का लोप 'अतो लोपः' इ का लोप—'इतश्च', 'स्' का लोप—'स्कोः')=वध्यात् । (२) 'आशीर्लिङ्—प्र० पु० द्वि०—वध्यास्ताम् । (३) √हन्+लुङ् ('हन्'='वध'—'लुङि च' ल=तिप्='ति' च्लि, च्लि=सिच्='स्', अट्, इकार लोप-'इतश्च')—अ वध स् त् (आर्धधातुक संज्ञा, इट्, 'अ' का लोप—'अतो लोपः' इट्—'अस्तिसिचोऽपृक्ते' 'स्' का लोप—'इट ईटि', इ+ई='ई'—सवर्णदीर्घ)=अवधीत् । (४) लृङ्—अहनिष्यत् ।

√यु धातु का अर्थ—'मिलाना, अलग करना' है ।

(६५१) उतो वृद्धिर्लुकि हलि ७।३।८९। लुग्विषये उतो वृद्धिः स्यात्पिति हलादौ सार्वधातुके, न त्वभ्यस्तस्य। यौति। युतः। युवन्ति। यौषि। युथः। युथ। यौमि। युवः। युमः। युयाव। युयुवतुः। युयुवुः। युयविथ–युयोथ। युयुवथुः। युयुव। युयाव–युयव। युयुविव। युयुविम। यविता। यविष्यति। यौतु–युतात्। अयौत्।

---

(६५१) उतो वृद्धि इति। 'लुकि' इत्यत्र विषयसप्तमी। 'नाभ्यस्तस्याचि

---

(६५१) पद—उतः, वृद्धिः, लुकि, हलि। **अनुवृत्ति**—नाभ्यस्तस्य पिति, सार्वधातुके। **विधिसूत्र।**

मूलार्थ—हलादि पित् सार्वधातुक प्रत्यय के परवर्ती रहने पर लुक् के विषय में धातु के उकार को वृद्धि होती है, परन्तु अभ्यस्तसंज्ञक उकार को वृद्धि नहीं होती। यौति, युतः इत्यादि।

विमर्श—प्रकृत सूत्र में अचि रहित 'नाभ्यस्तस्याचि पिति सार्वधातुके' (७।३।८७) सूत्र की अनुवृत्ति आती है। तदनुसार—'लुक् के विषय में उकार को वृद्धि होती है, हलादि पित् सार्वधातुक के परे रहते, परन्तु अभ्यस्तसंज्ञक को वृद्धि नहीं होती'।

उदाहरण—(१) √यु+लट् (=तिप्=ति, शप्, लुक्, 'उ'='औ'—वृद्धि—'उतो वृद्धिर्लुकि हलि')=यौति। (२) लट्—प्र० पु० द्वि० व०—युतः (यहाँ तस् में अपित् सार्वधातुक होने से वृद्धि नहीं हुई। (३) √यु+लट् (=प्र० पु० बहु०—झि, स्=‘अन्त्’ आदेश—'झोऽन्तः' शप्, लुक्, अपित् होने से वृद्धि का अभाव, उ=उवङ्=उव)—युव अन्ति (अ+अ='अ' पररूप)=युवन्ति।

√यु धातु लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	यौति	युतः	युवन्ति
म० पु०	यौषि	युथः	युथ
उ० पु०	यौमि	युवः	युमः

(१) यु+लिट् (=तिप्=णल्='अ' द्वित्व, अभ्यासकार्य)—यु यु अ ('उ'='औ'—वृद्धि—'अचो ञ्णिति' औ='आव्' आदेश)=युयाव।

√यु धातु लिट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	युयाव	युयुवतुः	युयुवुः
म० पु०	युयविथ	युयुवथुः	युयुथ
उ० पु०	युयाव–युयव	युयुविव	युयुविम

(२) लुट्—यविता। (३) लृट्—यविष्यति। लोट्—यौतु। युतात्। लङ् लकार में 'तिप्' और सिप् में हलादि पित् होने के कारण वृद्धि होगी। 'मिप्' में अम्' आदेश हो जाने पर हलादि प्रत्यय के न रहने के कारण वृद्धि नहीं होती।

√यु लङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	अयौत्	अयुताम्	अयुवन्
म० पु०	अयौः	अयुतम्	अयुत
उ० पु०	अयवम्	अयुव	अयुम

अयुताम् । अयुवन् । युयात् । इह वृद्धिर्न, भाष्ये 'पिच्च ङिन्न ङिच्च पिन्ने'ति व्याख्यानात् । विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधात् । युयाताम् । युयुः । यूयात् । यूयास्ताम् । यूयासुः । अयावीत् । अयाविष्यत् । या प्रापणे । याति । यातः । यान्ति । ययौ । याता । यास्यति । यातु । अयात् । अयाताम् । (६५२) **लङः शाकटायनस्यैव ३।४।१११** । आदन्ताल्लङो झेर्जुस् वा । अयुः । अयान् । यायात् । यायाताम् । यायुः । यायात् । यायास्ताम् । यायासुः । अयासीत् । अयासिष्टाम् । अयास्यत् । एवं–वा गति-

---

पिति सार्वधातुके' इति सूत्रमचिवर्जमनुवर्तते । तदाह—**लुग्विषय इत्यादि** । **यौति** । युधातोर्लटि, लः स्थाने तिपि, शपि, शपो लुकि, 'उतो वृद्धिर्लुकि हलि' इत्युकारस्य वृद्धौ 'यौति' इति ।

(६५२) लङः शाकटायनस्येति । झेर्जुस् इति, आत इति चानुवर्तते । तदाह—**आदन्तादिति** । **अयुः** । याधातोः लङि परस्मैपदे झिप्रत्यये अडागमेऽनुबन्धलोपे 'लङः शाकटायनस्यैव' इत्यनेन विकल्पेन झेर्जुसि अनुबन्धलोपे 'अ या उस्' इति जाते

विधिलिङ् में—युयात् । यहाँ 'यासुट् परस्मैपदेषूदात्तो ङिच्च' सूत्र से 'यासुट्' को ङित्त्व विधान भी होने के कारण वृद्धि नहीं होती । इस प्रकार विशेषरूप से ङित् के द्वारा सामान्य पित् का बाध हो जाता है । इसी आशय से भगवान् भाष्यकार ने कहा है—"ङिच पिन्न, पिच्चं ङिन्न" अर्थात् ङित् पित् नहीं होता और पित् ङित् नहीं होता । विधिलिङ् प्र० पु० द्वि० व०—युयाताम् । बहु०—युयुः । आशीर्लिङ् में—यूयात्, यूयास्ताम्, यूयासुः इत्यादि । (यहाँ 'अकृत्सार्वधातुकयोः' से दीर्घ होता है ।) (१) √यु+लुङ् (=तिप्=ति, च्लि=सिच्=‘स्’, अट्, इकारलोप, इट्, ईट्, 'स्' का लोप—'इट ईटि', इ+ई='ई'—सवर्णदीर्घ)—अ यु ई त् (उ='औ'—वृद्धि—'सिचि वृद्धिः परस्मैपदेषु' औ='आव्' आदेश)=अयावीत् । (२) लृङ्—अयाविष्यत् ।

√या धातु का अर्थ—'पहुँचना, जाना' है । (१) √या+लट् (=तिप्=ति, शप्, लुक्) =याति । (२) लट् द्विव०—यातः । (३) लट् बहु०—यान्ति । (४) √या+लिट् (=तिप् =णल्='औ'—'आत औ णलः' द्वित्व, अभ्यास संज्ञा, ह्रस्व)—य या औ (आ+औ='औ'—वृद्धि—'वृद्धिरेचि')=ययौ । (५) लुट्—याता । (६) लृट्—यास्यति । (७) लोट्—यातु । (८) लङ् प्र० पु० एकव०—अयात् । (९) लङ् प्र० पु० द्विव०—अयाताम् ।

(६५२) पद—लङः शाकटायनस्य, एव । **अनुवृत्ति**—झेर्जुस्, आतः । **विधिसूत्र** ।

मूलार्थ—आदन्त धातु से उत्तरवर्ती लङ् सम्बन्धी 'झि' के स्थान में 'जुस्' आदेश होता है । अयुः, अयान् इत्यादि ।

विमर्श—यहाँ 'झेर्जुस्' (३।४।१०८) तथा 'आतः' (३।४।११०) सूत्रों की अनुवृत्ति आ रही है । अतः—"आकारान्त धातुओं से परवर्ती लङ् के 'झि' के स्थान में आचार्य शाकटायन के मत में 'जुस्' आदेश होता है" ।

उदाहरण—(१) √या+लङ् (=झि, शप्, लुक, अट्)—अ या झ (झि=जुस्='उस्'—विकल्प से—'लङः शाकटायनस्यैव', आ+उ='उ'—पररूप—'उस्यपदान्तात्' स्=र्= :) =अयुः । जुस् के अभावपक्ष में—अ या झि (झ्='अन्त्'—'झोऽन्तः' इकार लोप, 'त्' का संयोगान्त लोप, सवर्णदीर्घ)=अयान् । (२) विधिलिङ्—यायात्, यायाताम्, यायुः इत्यादि । (३) आशीर्लिङ्—यायात्, यायास्ताम्, यायासुः । (४) √या+लुङ् (=तिप्=ति, च्लि=

गन्धनयोः । भा दीप्तौ । ष्णा शौचे । 'वाऽन्यस्य संयोगादेरि'त्येत्त्वम् । स्नेयात् । स्नायात् । श्रा पाके । द्रा कुत्सायां गतौ । प्सा भक्षणे । पा रक्षणे । रा दाने । ला आदाने । दाप् लवने । ख्या प्रकथने । अयं सार्वधातुक एव प्रयोक्तव्यः । ख्याति । विद ज्ञाने । (६५३) **विदो लटो वा ३।४।८३ ।** **वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे–**

'उस्यपदान्तात्' इत्यनेन पररूपे सस्य रुत्वे विसर्गे च कृते 'अयुः' इति । जुसभावपक्षे तु 'झोऽन्तः' इति झस्यान्तादेशे 'इतश्च' इत्यनेन इकारलोपे 'संयोगान्तस्य लोपः' इति तकारलोपे सवर्णदीर्घे संयोगे च कृते 'अयान्' इति ।

(६५३) **विदो लटो वेति** । अत्र 'परस्मैपदानां णलतुस' इत्यादिसूत्रमनुवर्तते । तदाह—**वेत्तेर्लट इत्यादि** । **वेद** । विद्धातोर्लटि, लः स्थाने तिपि, 'विदो लटो वा' इति तिपः स्थाने णलि, अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'पुगन्तलघूपधस्य चे'ति इकारस्य गुणे वेद इति । णलभावपक्षे तु—'विद् ति' इति स्थिते, चर्त्वेन दकारस्य तकारे गुणे 'वेत्ति' इति ।

सिच्='स्' अट्, इकारलोप)—अ या स् त् ('इट्' का आगम, सक्='स्'—'यमरमनमातां सक्च', ईट्—'अस्तिसिचोऽपृक्ते' 'स्' का लोप—'इट ईटि' सवर्णदीर्घ)=अयासीत् । (५) लुङ्—द्वि०—अयासिष्टाम् । (६) लृङ्—अयास्यत् ।

√वा का अर्थ—'चलना, वहना, सूचित करना' है । लट्—वाति । √भा धातु का अर्थ—'चमकना' है । लट्—भाति । √ष्णा (स्ना) का अर्थ—'स्नान करना' है । लट्—स्नाति । आशीर्लिङ् में संयोगादि होने से 'वाऽन्यस्य संयोगादेः' से विकल्प से एत्व होता है । स्नेयात् । स्नायात् । √श्रा का अर्थ—'पकाना' है । लट्—श्राति । √द्रा का अर्थ—'कुत्सित गति'—(बुरी चाल चलना) है । लट्—द्राति । √प्सा का अर्थ—'खाना' है । लट्—प्साति । √पा का अर्थ—'रक्षा करना' है । लट्—पाति । √रा का अर्थ—'देना' है । लट्—राति । √ला का अर्थ—'लेना' है । लट्—लाति । √दाप् का अर्थ—'काटना' है । लट्—दाति । √ख्या का अर्थ—कहना है । लट्—ख्याति । इस धातु का सार्वधातुक में ही प्रयोग करना चाहिए ।

√विद धातु का अर्थ—'जानना' है ।

(६५३) पद—विदः, लटः, वा । **अनुवृत्ति**—परस्मैपदानाम्………वमाः । **विधिसूत्र ।**

मूलार्थ—'विद्' धातु से परवर्ती लट् लकार सम्बन्धी परस्मैपद को णल् आदि आदेश विकल्प से होते हैं । वेद । विदतुः । विदुः इत्यादि ।

विमर्श—प्रकृत सूत्र में 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (३।४।८२) की अनुवृत्ति आती है । तदनुसार—'विद् धातु से परवर्ती लट् के परस्मैपद प्रत्ययों को णल् आदि आदेश विकल्प से होते हैं' ।

उदाहरण—(१) √विद्+लट् (=तिप्=ति, तिप्=णल्='अ' विकल्प से—'विदो लटो वा' सार्वधातुक संज्ञा शप्, शप् का लुक्—'अदिप्रभृतिभ्यः शपः' 'इ'='ए'—गुण 'पुगन्तलघूपधस्य च')=वेद । णल् के अभावपक्ष में—विद्+ति (शप् का लुक्, गुण, 'द्'='त' चर्त्व)=वेत्ति । (२) लट् प्र० पु० द्वि०—विदतुः (अतुस्) । पक्ष में—वेत्तः । (३) लट् प्र० पु० बहु०—विदुः । पक्ष में—विदन्ति ।

वेत्ति। वित्तः। विदन्ति। (६५४) **उषविदजागृभ्योऽन्यतरस्याम् ३।१।३८।** **एभ्यो लिटयाम् वा स्यात्। विदेरदन्तत्वप्रतिज्ञानादामि न गुणः। विदाञ्चकार। विवेद। वेदिता। वेदिष्यति। (६५५) विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ३।१।४१।**

---

(६५४) **उषविदजागृभ्य** इति। 'कास्प्रत्ययादाममन्त्रे लिटि' इत्यतः आम् लिटीत्यनुवर्तते। अत आह—**एभ्य इति। विदाञ्चकार।** विद्धातोर्लिटि 'उषविदजागृभ्योऽन्यतरस्याम्' इत्यामि 'आमः' इति लिटो लुकि, विदेरदन्तत्वप्रतिज्ञानात् उपधायाः लघूपधगुणाभावे, 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परककृञोऽनुप्रयोगे 'विदाम् कृ लिट्' इति जाते, लः स्थाने तिपि, तिपो णलादेशेऽनुबन्धलोपे, धातोर्द्वित्वेऽभ्यासत्वे 'उरत्' इति ऋवर्णस्याकारे रपरत्वे हलादिशेषे 'कुहोश्चुः' इत्यभ्यासस्य चुत्वेन चकारे 'विदाम् च कृ अ' इति जाते, 'सार्वधातुकार्धधातुकयोः' इति गुणे, रपरे च कृते 'अत उपधायाः' इति वृद्धौ मकारस्यानुस्वारे परसवर्णे कृते 'विदाञ्चकार' इति।

√विद् धातु के लट् लकार के रूप

(णलादि पक्ष में)

	एक०	द्वि०	बहु०
प्र० पु०—	वेद	विदतुः	विदुः
म० पु०—	वेत्थ	विदथुः	विद
उ० पु०—	वेद	विद्व	विद्म

(णलादि के अभाव पक्ष में)—

प्र० पु०—	वेत्ति	वित्तः	विदन्ति
म० पु०—	वेत्सि	वित्थः	वित्थ
उ० पु०—	वेद्मि	विद्वः	विद्मः

(६५४) पद—उषविदजागृभ्यः, अन्यतरस्याम्। **अनुवृत्ति**—आम्, लिटि। **विधिसूत्र।**

मूलार्थ—'लिट्' के परवर्ती रहने पर उष, विद और जागृ धातु से परे विकल्प से 'आम्' होता है। विदाञ्चकार।

विमर्श—यहाँ 'कास्प्रत्ययादाममन्त्रे लिटि' (३।१।३५) से 'आम्' तथा 'लिटि' की अनुवृत्ति आती है। तदनुसार—"लिट् परे रहते उष (=जलाना), विद् (=जानना), जागृ (=जागना) धातुओं से विकल्प से 'आम्' होता है"।

विदेरदन्तत्वप्रतिज्ञानात्० विद् धातु को अकारान्त स्वीकार किया गया है। अकार का 'अतो लोपः' से लोप हो जाता है। अकार लोप के स्थानिवद्भाव होने पर लघूपध न मिलने के कारण 'आम्' के परवर्ती रहते 'पुगन्तलघूपधस्य च' से गुण नहीं होता।

उदाहरण—(१) √विद्+लिट् ('आम्'—उषविदजागृभ्यः०' 'लिट्' का लुक्—'आमः' लिट्परक √कृ का अनुप्रयोग)—विदाम् कृ लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा ऋ='अ'—'उरत्' रपर, हलादिशेष 'क्'='च्'—कुहोश्चुः)—विदाम् च कृ अ (गुण, रपर, 'अत उपधायाः' से वृद्धि, अनुस्वार, परसवर्ण)—विदाञ्चकार। आम् के अभावपक्ष में—विवेद। (२) लुट्—वेदिता। (३) लृट्—वेदिष्यति।

वेत्तेर्लोटयाम्, गुणाभावो लोटो लुक्, लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते । पुरुषवचने न विवक्षिते । इति शब्दात् । (६५६) **तनादिकृञ्भ्य उः ३।१।७९ ।** तनादेः कृञश्च उप्रत्ययः स्यात् । शपोऽपवादः । विदाङ्करोतु । (६५७) **अत उत्सार्वधातुके ६।४।११० ।** उत्प्रत्ययान्तस्य कृञोऽत उत्स्यात् सार्वधातुके क्ङिति । विदाङ्कुरुतात् । विदाङ्कुरुताम् । विदाङ्कुर्वन्तु । 'उतश्चे'ति हेर्लुक् । आभीयत्वेन लुकोऽसिद्धत्वादुत्वम् ।

---

(६५५) **विदाङ्कुर्वन्त्विति ।** इतिशब्दोऽत्र प्रकारे । एवं जातीयकं वैकल्प्येन प्रत्येतव्यमित्यर्थः ।

(६५६) **तनादिकृञ्भ्य इति ।** 'सार्वधातुके यगि'त्यतः 'सार्वधातुके' इति, 'कर्तरि शप्' इत्यतः 'कर्तरी'त्यनुवर्तते । तदाह—**तनादेरिति । विदाङ्करोतु ।** विद्धातोर्लोटि, 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति वैकल्पिके आमि, 'आमः' इति लोटो लुकि, लोट्परके कृञि प्रयुक्ते, लः स्थाने तिपि, शपि प्राप्ते तं प्रबाध्य 'तनादिकृञ्भ्य उः' इत्युकारे कृते 'विदाम् कृ उ ति' इति जाते 'सार्वधातुकार्धधातुकयोः' इति उभयत्र गुणे 'एरुः' इति तिपः उकारस्य उत्वे मस्यानुस्वारे वा परसवर्णे कृते 'विदाङ्करोतु' इति ।

(६५७) **अत उत् इति । उप्रत्ययान्तस्येति ।** 'उतश्च प्रत्ययादि'त्यतः तदनुवृत्तेरिति भावः ।

---

(६५५) पद—विदाङ्कुर्वन्तु, इति, अन्यतरस्याम् । **विधिसूत्र ।**

मूलार्थ—लोट् के परवर्ती रहते विद् धातु से आम् तथा गुण का अभाव और लोट् का लुक् होता है । लोट्परक √कृ का अनुप्रयोग भी विकल्प से होता है ।

विमर्श—प्रकृत सूत्र द्वारा 'विदाङ्कुर्वन्तु' यह रूप लोट् के प्रथमपुरुष के बहुवचन में निपातन किया जाता है ।

'विदाङ्कुर्वन्तु' में पुरुष और वचन विवक्षित नहीं हैं । अर्थात् प्रथमपुरुष के बहुवचन में ही पूर्वोक्त कार्य नहीं होते, अपितु लोट् लकार के सभी पुरुषों और वचनं में उक्त चारों कार्य होते हैं ।

(६५६) पद—तनादिकृञ्भ्यः, उः । **अनुवृत्ति**—सार्वधातुके, कर्तरि । **विधिसूत्र ।**

मूलार्थ—तनादि और कृञ् धातु से परे 'उ' प्रत्यय होता है ।

विमर्श—यहाँ—'सार्वधातुके यक्' (३।१।६७) से 'सार्वधातुके' तथा 'कर्तरि शप्' (३।१।६८) से 'कर्तरि' पदों की अनुवृत्ति आती है । तदनुसार—"कर्तृवाची सार्वधातुक के परवर्ती रहते तनादि और कृञ् धातुओं से 'उ' प्रत्यय होता है" ।

उदाहरण—(१) √विद्+लोट् ('आम्' विकल्प से—'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' लोट् का लुक्—'आमः', लोट्परक कृ का अनुप्रयोग)—विदाम् कृ लोट् (=तिप्=ति, शप् का बाधकर 'उ'—'तनादिकृञ्भ्य उः' आर्धधातुक संज्ञा, 'ऋ'='अर्'—गुण 'उ'='ओ'—गुण—'सार्वधातु०' 'इ'='उ'—'एरुः' म्=अनुस्वार=परसवर्ण)='विदाङ्कुर्वन्तु' ।

(६५७) पद—अतः, उत्, सार्वधातुके । **अनुवृत्ति**—करोतेः, उतः प्रत्ययात्, क्ङिति । **विधिसूत्र ।**

मूलार्थ—सार्वधातुक कित् ङित् के परवर्ती रहते उप्रत्ययान्त कृञ् धातु के 'अ' को 'उ' आदेश होता है । विदाङ्कुरुतात् ।

विदाङ्कुरु । विदाङ्करवाणि । वेत्तु । अवेत् । अवित्ताम् । अविदुः । **(६५८) दश्च ८।२।७५ ।** धातोर्दस्य पदान्तस्य सिपि रुर्वा । अवेः । अवेत् । विद्यात् । विद्याताम् । विद्युः । विद्यात् । विद्यास्ताम् । विद्यासुः । अवेदीत् । अवेदिष्यत् । अस् भुवि । अस्ति । **(६५९) श्नसोरल्लोपः ६।४।१११ ।** श्नस्यास्तेश्चातो लोपः सार्वधातुके क्ङिति । स्तः । सन्ति । 'तासस्त्योरि'ति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः ।

---

(६५८) **दश्चेति** । 'सिपि धातोरुर्वा' इत्यनुवर्तते । पदस्येत्यधिकृतम् । तदाह—**धातोर्दस्येति** । **अवेः** । विद्धातोर्लङः सिपि, शपो लुकि अटि, इकारस्य 'इतश्च' इत्यनेन लोपे 'पुगन्तलघूपधस्य चे'ति गुणे 'अवेद् स्' इति जाते, 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सिपः सस्य लोपे 'दश्च' इति विदेर्दस्य वा रुत्वे रेफस्य विसर्गे कृते 'अवेः' इति ।

(६५९) **श्नसोरल्लोप इति** । 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके 'गमहन०' इत्यतः क्ङितीति चानुवर्तते । तदाह—**श्नस्यास्तेश्चात इति** । **स्त** इति । असधातो-

---

विमर्श—सूत्रार्थ की पूर्ति हेतु—'नित्यं करोतेः' (६।४।१०८) से 'करोतेः', 'उतश्च प्रत्ययादसंयोगपूर्वात्' (६।४।१०६) से 'उतः, प्रत्ययात्' तथा 'गमहन०' (६।४।९८) से 'क्ङिति' की अनुवृत्ति आती है। तदनुसार—"कित् ङित् सार्वधातुक के परे रहते √कृ के अकार के स्थान में उत्व होता है।"

उदाहरण—(१) विदाम् कृ लोट् (=तिप्=ति, 'इ'='उ'—'एरुः' तु=तातङ्=तात्, 'उ'—'तनादिकृञ्भ्य उः', गुण, रपर्, 'अ'='उ'—'अत उत्सार्वधातुके' अनुस्वार, परसवर्ण)= विदाङ्कुरुतात् । (२) लोट् प्र० पु० द्विव०—विदाङ्कुरुताम् । (३) बहु०—विदाङ्कुर्वन्तु । (४) लोट् म० पु० एकव० सिप् 'सि'='हि' 'हि' का 'उतश्च प्रत्ययात्' से लुक् । (आभीयत्वेन लुक् के असिद्ध होने से उत्व)—विदाङ्कुरु । (५) उ० पु० एक० में आट्, गुण, अवादेश, णत्व—विदाङ्करवाणि । पूर्वोक्त चार कार्यों के अभावपक्ष में—वेत्तु-वित्तात्, वित्ताम्, विदन्तु इत्यादि रूप बनेंगे । (६) लङ् में—अवेत्, अवित्ताम्, अविदुः (प्र० पु०) ।

(६५८) पद—दः, च । **अनुवृत्ति**—सिपि धातोरुर्वा । **विधिसूत्र** ।

मूलार्थ—'सिप्' के परवर्ती रहते धातु के पदान्त दकार को विकल्प से 'रु' होता है । अवेः, अवेत् ।

विमर्श—यहाँ 'सिपि धातोरुर्वा' (८।२।७४) सूत्र की अनुवृत्ति आ रही है । 'पदस्य' का अधिकार है । अतः—"सिप् परे रहते धातु के पदान्त दकार को विकल्प से 'रु' हो जाता है" ।

उदाहरण—(७) विद्+लङ् (=सिप्=सि, शप् का लुक्, अट्, इकार का लोप, उपधा गुण)—अवेद् स् ('स्' का लोप—'हल्ङ्याब्भ्यः०', द्=रु—'दश्च'=र्=:)=अवेः । रुत्व के अभावपक्ष में—अवेत् । विधिलिङ् (प्र० पु०)—विद्यात्, विद्याताम्, विद्युः । आशीर्लिङ् (प्र० पु०)—विद्यात्, विद्यास्ताम्, विद्यासुः । लुङ्—अवेदीत् । लृङ्—अवेदिष्यत् ।

√अस् का अर्थ—'होना' है । (१) √अस्+लट् (=तिप्=ति, शप्, लुक्)=अस्ति ।

(६५९) पद—श्नसोः, अल्लोपः । **अनुवृत्ति**—सार्वधातुके, क्ङिति । **विधिसूत्र** ।

मूलार्थ—श्न और अस्ति के अकार का लोप होता है सार्वधातुक कित् ङित् के परे रहते ।

विमर्श—प्रकृत सूत्र में 'अत उत्सार्वधातुके' (६५८) से सार्वधातुके तथा 'गमहन०' से

(६६०) अस्तेर्भूः २।४।५२ । अस्तेर्भूः आर्धधातुके । बभूव । भविता । भविष्यति । अस्तु-स्तात् । स्ताम् । सन्तु । **(६६१) घ्वसोरेद्धावभ्यासलोपश्च ६।४।११९ ।** घोरस्तेश्चैत्वं हौ, अभ्यासलोपश्च । आभीयत्वाद्धेर्धिः । एधि-स्तात् । स्तम् । स्त । असानि । असाव । असाम । आसीत् । आस्ताम् । आसन् । स्यात् । स्याताम् । स्युः ।

लंटि, लः स्थाने तसि, शपो लुकि 'श्नसोरल्लोपः' इत्यस्तेरकारस्य लोपे सस्य रुत्वे विसर्गे च कृते 'स्तः' इति ।

(६६०) अस्तेर्भूरिति । 'अस्धातोर्भूभावः स्यादार्धधातुके' इत्यर्थः ।

(६६१) घ्वसोरेदिति । घु अस् इत्यनयोर्द्वन्द्वः । एत् हौ इति च्छेदः । **एधि ।** अस्धातोर्लोटि, लः स्थाने मध्यमपुरुषैकवचने सिपि, 'सेर्ह्यपिच्च' इति सिपः स्थाने

'क्ङिति' की अनुवृत्ति आती है । अतः "क्ति ङित् सार्वधातुक के परवर्ती रहते श्नम् प्रत्यय तथा अस् धातु के अकार का लोप होता है" ।

उदाहरण—(२) √अस्+लट् (=तस्, शप्, लुक्, 'अ' का लोप—'श्नसोरल्लोपः' स् =र्=:) =स्तः । (३) प्र० पु० बहु०—सन्ति । (४) अस्+लट् (=सिप्=सि, शप्, लुक्, 'स्' का लोप—'तासस्त्योर्लोपः')=असि ।

√अस् धातु लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अस्ति	स्तः	सन्ति
म० पु०—	असि	स्थः	स्थ
उ० पु०—	अस्मि	स्वः	स्मः

(६६०) पद—अस्तेः, भूः । **अनुवृत्ति**—आर्धधातुके । **विधिसूत्र ।**

मूलार्थ—'आर्धधातुक' के परवर्ती रहते 'अस्' धातु को 'भू' आदेश होता है ।

विमर्श—'आर्धधातुके' का अधिकार है । अतः आर्धधातुक के विषय में अस् धातु को भू आदेश होता है ।

उदाहरण—(१) √अस्+लिट् (=तिप्=णल्='अ', आर्धधातुक संज्ञा 'लिट् च', अस् ='भू'—'अस्तेर्भूः' वुक्='व्' का आगम—'भुवो वुग् लुङ्लिटोः', द्वित्व, अभ्यास संज्ञा, ह्रस्व, 'उ'='अ'—भवतेरः, 'भ्'='ब्'—'अभ्यासे चर्च')=बभूव । (२) लुट्—भविता । (३) लृट्—भविष्यति । लोट् प्र० पु०—अस्तु-स्तात् । स्ताम् । सन्तु ।

(६६१) पद—घ्वसोः, एत्, हौ, अभ्यासलोपः, च । **अनुवृत्ति**—क्ङिति । **विधिसूत्र ।**

मूलार्थ—'हि' के परवर्ती रहने पर घुसंज्ञक धातु और अस् धातु को एत्व और अभ्यास का लोप होता है ।

विमर्श—यहाँ 'गमहन०' (६।४.९८) सूत्र से 'क्ङिति' की अनुवृत्ति आती है । तदनुसार—'हि' तथा कित्, ङित् प्रत्यय के परवर्ती रहते घुसंज्ञक धातु एवं अस् धातु को एकारादेश और अभ्यास का लोप होता है ।"

आभीयत्वादिति । प्रकृत सूत्र द्वारा विहित एत्व के आभीय कार्य होने से झल् परे होने के कारण 'हुझल्भ्यो हेर्धिः' से 'हि' के स्थान में 'धि' आदेश हो जाता है ।

भूयात् । अभूत् । अभविष्यत् । (६६२) **उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ८।३।८७ । उपसर्गेणः प्रादुषश्च परस्यास्तेः सस्य षो यकारेऽचि च परे । निःष्यात् । प्रादुःष्यात् । निःषन्ति । प्रादुःषन्ति । यच्परे किम् ? अभिस्तः । रु शब्दे । (६६३) तुरुस्तु-**

अपित् 'हि' इत्यादेशे 'घ्वसोरेद्धावभ्यासलोपश्च' इति सस्य एत्वे, एत्वस्याभीयत्वेनासिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इति हेर्धौ 'श्नसोरल्लोपः' इत्यल्लोपे 'एधि' इति रूपम् ।

(६६२) **उपसर्गप्रादुर्भ्यामिति** । 'इण्कोरि'त्यधिकृतम् । तत्र इण इत्युपसर्गेण सम्बध्यते । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते । 'मूर्धन्यः' इत्यधिकृतम् । तदाह—**उपसर्गेण इति** । यकारपरकत्वे उदाहरति—**निःष्यात्, प्रादुःष्यादिति** ।

उदाहरण—(१) √अस्+लोट् (ल्=सिप्='हि'—'सेर्ह्यपिच्च' 'स्'='ए'—'घ्वसोरेद्धावभ्यासलोपश्च' आभीयत्वेन एकार के असिद्ध होने से 'हि'='धि'—'हुझल्भ्यो हेर्धिः', 'अ' का लोप—'श्नसोरल्लोपः')=एधि । हि=विकल्प से तातङ्=ताद् (इस पक्ष में एत्व नहीं होता । क्योंकि 'तातङ्' आदेश होने पर 'हि' के न मिलने से एत्व की प्राप्ति ही नहीं होती । अकारलोप) =स्ताद् । उत्तमपुरुष में 'आट्' का आगम होता है, जो 'पित्' है । अतः वहाँ अकार का लोप भी नहीं होता । असानि इत्यादि ।

√अस् धातु लोट् लकार के रूप

	एक०	**द्वि०**	**बहु०**
प्र० पु०	अस्तु	स्ताम्	सन्तु
म० पु०	एधि-स्ताद्	स्तम्	स्त
उ० पु०	असानि	असाव	असाम

(२) अस्+लङ् (तिप्=ति, इकारलोप, आट्,)—आ अस् द् (शप् लुक्, ईट्—'अस्तिसिचोऽपृक्ते', आ+अ='आ'—वृद्धि—'आटश्च')=आसीद् । (३) लङ् प्र० पु० द्विव०—आस्ताम् । (४) लङ् प्र० पु० बहु०—आसन् । म० पु०—आसीः, आस्तम् , आस्त । उ० पु०—आसम् , आस्व, आस्म । विधिलिङ्—स्याद्, स्याताम्, स्युः इत्यादि । आशीर्लिङ् तथा शेष लकारो में आर्धधातुक होने से 'भू' आदेश हो जाता है । भूयात् । लङ्—अभूत् । लृङ्—अभविष्यत् ।

(६६२) पद—उपसर्गप्रादुर्भ्याम्, अस्ति, यच्परः । **अनुवृत्ति**—सः । **विधिसूत्र** ।

मूलार्थ—उपसर्ग सम्बन्धी 'इण्' से परे और 'प्रादुस्' से परे 'अस्ति' के सकार को मूर्धन्य (सकार) होता है, आगे यकार और अच् के परवर्ती रहते ।

विमर्श—'इण्कोः' का अधिकार है । 'अपदान्तस्य मूर्धन्यः' का भी अधिकार आ रहा है । 'सहेः साडः सः' (८।३।५६) से 'सः' पद की अनुवृत्ति आती है । इस प्रकार—"उपसर्ग सम्बन्धी इण् से उत्तर तथा 'प्रादुस्' से उत्तरवर्ती यकारपरक एवम् अच्परक अस् धातु के सकार को मूर्धन्य षकार आदेश होता है ।"

उदाहरण—(१) निस्+स्याद् (स्=र्= :)—निः स्याद् ('स्'='ष्'—'उपसर्गप्रादुर्भ्याम्')=निःष्याद् । (२) प्रादुः+स्याद् (षत्व)=प्रादुःष्याद् । (३) नि+सन्ति, प्रादुः+सन्ति (षत्व)=निःषन्ति, प्रादुःषन्ति । सूत्र में 'यच्परे' कहा गया है । अतः 'अभिस्तः' में षत्व नहीं हुआ ।

√रु का अर्थ—'शब्द करना' है ।

शम्यमः सार्वधातुके ७।३।९५। एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड् वा स्यात्। 'नाभ्यस्तस्ये'त्यतोऽनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणमपिदर्थम्। रवीति। रौति। रुवीतः। रुतः। हलादेः किम्? रुवन्ति। तिङः किम्? शाम्यति। सार्वधातुके किम्? आशिषि—रूयात्। विध्यादौ तु—रुयात्। रुवीयात्। अरावीत्। अरविष्यत्। 'तु' इति सौत्रो धातुः गतिवृद्धिहिंसासु। तवीति। तौति। तुवीतः। तुतः। तुवन्ति। तुताव। तोता। तोष्यति। णु स्तुतौ। नौति। नुनाव। नविता। टु क्षु शब्दे। क्षौति। चुक्षाव। क्षविता। क्ष्णु तेजने। क्ष्णौति। क्ष्णविता।

---

(६६३) **तुरुस्तुशम्यम इति।** तु रु स्तु शमि अम् इत्येतेषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। 'उतो वृद्धिः' इत्यतो हलीति, 'भूसुवोः' इत्यतस्तिङीति, 'ब्रुव ईडि'त्यतः ईडिति, 'यङो वा' इत्यस्माद् वेति चानुवर्तते। तदाह—**एभ्य इत्यादिना।** **रवीति, रौति।** रुधातोर्लटि, तिपि, शपि, शपो लुकि, 'तुरुस्तुशम्यमः सार्वधातुके'

---

(६६३) पद—तुरुस्तुशम्यमः, सार्वधातुके। **अनुवृत्ति**—तिङि वा, ईट्, हलि। **विधिसूत्र।**

मूलार्थ—तु, रु, स्तु, शमि और यम् धातुओं से परवर्ती हलादि तिङ् सार्वधातुक को विकल्प से ईट् का आगम होता है।

विमर्श—प्रकृत सूत्र में 'भूसुवोस्तिङि' (७।३।८८) से 'तिङि', 'उतो वृद्धिर्लुकि हलि' (७।३।८९) से 'हलि', 'ब्रुव ईट्' (७।३।९३) से 'ईट्' तथा 'यङो वा' (७।३।९४) से 'वा' पदों की अनुवृत्ति आती है। तदनुसार—"तु, रु, ष्टुञ्, शम् तथा अम धातुओं से परवर्ती हलादि तिङ् सार्वधातुक को विकल्प से 'ईट्' का आगम होता है।" यहाँ 'नाभ्यस्तस्य' से 'सार्वधातुके' की अनुवृत्ति कर अर्थवशात् षष्ठयन्त में विपरिणाम करके कार्य निर्वाह हो जाता। पुनः सूत्र में 'सार्वधातुके' का ग्रहण क्यों किया? इसका उत्तर है कि—अनुवृत्त सार्वधातुक पित् सम्बद्ध आता, तब अपित् तिङ् को ईट्, जो इष्ट है, वह नहीं होता। अतः यहाँ 'सार्वधातुके' का ग्रहण किया गया है।

उदाहरण—(१) √रु+लट् (=तिप्=ति, शप्, लुक्, ईट्='ई' आगम विकल्प से—'तुरुस्तुशम्यमः०' गुण, अवादेश)=रवीति। ईट् के अभावपक्ष में—रु ति ('उ'='औ'—वृद्धि—'उतो वृद्धिर्लुकि हलि')=रौति। (२) √रु+लट् (=तस्, शप्, लुक्, ईट्—विकल्प से; 'उ'='उवङ्'='उव'—'अचि श्नु०', स्=र्=:)=रुवीतः। इडभावपक्ष में—रुतः। सूत्र में 'हलादि' ग्रहण किया गया है, अतः—रु+लट् (=झि, झ्='अन्त्')—'रु अन्ति' (यहाँ हलादि न होने से ईट् नहीं हुआ। 'उवङ्' होकर, पररूप)=रुवन्ति। 'तिङ्' पद के ग्रहण होने से 'शाम्यति' में 'ईट्' नहीं हुआ। 'सार्वधातुके' का ग्रहण होने से आशीर्लिङ् में 'ईट्' नहीं हुआ—रूयात्। विधिलिङ्—रुयात्, रुवीयात् (विकल्प से इट्)। लुङ्—अरावीत्। लृङ्—अरविष्यत्।

√तु यह सौत्र धातु है। यह गति, वृद्धि एवं हिंसा अर्थ में है। (१) तु+लट् (=तिप्=ति, शप् लुक्, विकल्प से ईट्='ई'—'तुरुस्तुशम्यमः' गुण, अवादेश)=तवीति। इट् के अभावपक्ष में वृद्धि—'उतो वृद्धिः'=तौति। (२) प्र० पु० द्विव०—तुवीतः। तुतः। (३) बहु०—तुवन्ति। (४) लिट्—तुताव। (५) लुट्—तोता। (६) लृट्—तोष्यति। √णु धातु का अर्थ—'स्तुति करना' है। 'णो नः' से नकार आदेश, 'उतो वृद्धिः' से वृद्धि। (१) प्र० पु० एक०—नौति। (२) लिट्—नुनाव। (३) लुट्—नविता।

अक्ष्णावीत् । ष्णु प्रस्रवणे । स्नौति । सुष्णाव । स्नविता । षु प्रसवैश्वर्ययोः । प्रसवोऽभ्यनुज्ञानम् । सौति । सुतः । सुषाव । सोता । असौषीत् । कु शब्दे । कौति । चुकाव । कोता । इण् गतौ । एति । इतः । **(६६४) इणो यण्** ६।४।८१ । अजादौ प्रत्यये परे । इयङोऽपवादः । यन्ति । **(६६५) अभ्यासस्यासवर्णे** ६।४।७८ । अभ्यासस्य इ-उवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि परे । इयाय । **(६६६) दीर्घं**

इति वैकल्पिके ईडागमेऽनुबन्धलोपे गुणेऽवादेशे 'रवीति' इति । ईडभावे तु—'रु ति' इत्यत्र 'उतो वृद्धिर्लुकि हलि' इत्यनेन वृद्धौ 'रौति' इति ।

(६६४) **इणो यणिति** । 'अचि श्नु०' इत्यतोऽचीत्यनुवर्तते । तस्याङ्गाक्षिप्तप्रत्ययविशेषणत्वात्तदादिविधिस्तदाह—**अजादाविति** ।

(६६५) **अभ्यासस्येति** । 'अचि श्नु' इत्यतोऽचीति, य्वोरियङुवङाविति चानुवर्तते । अत आह—**अभ्यासस्येति** । **इयाय** । इण्धातोर्लिटि, लः स्थाने प्रथमपुरुषैकवचने तिपि तिपो णलादेशेऽनुबन्धलोपे धातोर्द्वित्वे 'इ इ अ' इति जाते वृद्धौ, आयादेशे 'अभ्यासस्यासवर्णे' इत्यभ्यास-इवर्णस्य स्थाने इयङादेशेऽनुबन्धलोपे दीर्घे 'इयाय' इति ।

√टु क्षु का अर्थ—'शब्द करना' है । (१) लट्—क्षौति । (२) लिट्—चुक्षाव । (३) लुट्—क्षविता । √क्ष्णु का अर्थ—'तेज करना' है । (१) लट्—क्ष्णौति । (२) लुट्—क्ष्णविता । (३) लुङ्—अक्ष्णावीत् । √ष्णु का 'प्रस्रवण' अर्थ है । (१) लट्—स्नौति । (२) लिट्—सुष्णाव । (३) लुट्—स्नविता । √षु धातु प्रसव और ऐश्वर्य अर्थ में है । प्रसव का अर्थ—'अभ्यनुज्ञान'=आज्ञा प्राप्त करना है । 'ष्'='स्'—'धात्वादेः' । (१) लट्—सौति । सुतः । (२) लिट्—सुषाव । (३) लुट्—सोता । (४) लुङ्—असौषीत् । √'कु' धातु का अर्थ 'शब्द करना' है । (१) लट्—कौति । (२) लिट्—चुकाव । (३) लुट्—कोता ।

√'इण्' का अर्थ—'जाना' है । (१) √इण् (इ)+लट् (=तिप्=ति, शप् लुक्, ङित्त्वाभाव होने से गुण)=एति । (२) इ+लट् (=तस्, शप् का लुक्, स्=र्= :)=इतः ।

(६६४) पद—इणः, यण् । **अनुवृत्ति**—अचि । **विधिसूत्र** ।

मूलार्थ—अजादिप्रत्यय के परवर्ती रहते इण् को यण् आदेश होता है । यन्ति ।

विमर्श—यहाँ 'अचि श्नु०' (६।४।७७) सूत्र से 'अचि' पद की अनुवृत्ति आ रही है । 'अङ्गस्य' का अधिकार है । 'अचि' अङ्ग से आक्षिप्त प्रत्यय का विशेषण होने से तदादिविधि होती है । अतः अजादि प्रत्यय के परे रहते 'इण्' धातु को 'यण्' होता है ।

उदाहरण—(३) √इ+लट् (=झि, 'झ्'='अन्त्' शप् लुक्, 'इ'='य्'—'इणो यण्') =यन्ति ।

(६६५) पद—अभ्यासस्य, असवर्णे । **अनुवृत्ति**—अचि, य्वोः, इयङुवङौ ।

मूलार्थ—असवर्ण अच् के परवर्ती रहते अभ्यास सम्बन्धी 'इवर्ण-उवर्ण' को 'इयङ्-उवङ्' आदेश होता है । इयाय ।

विमर्श—सूत्रार्थ की पूर्ति हेतु पूर्वसूत्र 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६।४।७७) से 'अचि, य्वोः और इयङुवङौ' पदों की अनुवृत्ति आती है । तदनुसार—"सवर्णभिन्न अच् के परे रहते अभ्यास के इवर्ण, उवर्ण को क्रमशः 'इयङ्' और 'उवङ्' आदेश होते हैं ।"

इणः किति ७।४।६९। इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि परे। ईयतुः। ईयुः। इययिथ। इयेथ। एता। एष्यति। एतु। ऐत्। ऐताम्। आयन्। इयात्। ईयात्। **(६६७) एतेर्लिङि ७।४।२४।** उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्धधातुके किति लिङि। निरियात्। **(६६८) अन्ताविवच्च ६।१।८५।** योऽय-

---

(६६६) दीर्घ इण इति। 'अत्र लोपोऽभ्यासस्ये'त्यतः 'अभ्यासस्ये'ति 'व्यथो लिटी'त्यतः 'लिटी'ति चानुवर्तते। अत आह—**'इणोऽभ्यासस्ये'ति। ईयतुः।** इण् धातोर्लिटि लः स्थाने तसि, तसोऽतुसादेशे द्वित्वेऽभ्यासत्वे 'इ इ अतुस्' इति जाते 'इणो यण्' इति यणि 'दीर्घ इणः किति' इति दीर्घे रुत्वे विसर्गे च कृते 'ईयतुः' इति। **इययिथ।** इण्धातोर्लिटि तत्स्थाने सिपि, सिपस्थलि द्वित्वे भारद्वाजनियमात् वैकल्पिके इटि, गुणेऽयादेशे 'अभ्यासस्यासवर्णे' इतीयङि 'इययिथ' इति। इडागमाभावपक्षे तु गुणे अभ्यासस्य इयङादेशे 'इयेथ' इति।

(६६७) एतेर्लिङि। अत्र 'उपसर्गाद्ध्रस्व ऊहतेः' इत्यस्मात् 'उपसर्गाद्ध्रस्वः' इति, 'केऽणः' इत्यस्मादण इति, 'अयङ् यि किति' इत्यस्मात् 'किती'ति चानुवर्तते। तदाह—**उपसर्गात्परस्येति। निरियात्।** निरुपसर्गपूर्वकादिण्धातोराशीर्लिङि, लः

उदाहरण—(१) √इ+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा)—इ इ अ ('इ' ='ऐ'—वृद्धि, 'आय्' आदेश)=इयाय।

(६६६) पद—दीर्घः, इणः, किति। **अनुवृत्ति**—अभ्यासस्य, लिटि। **विधिसूत्र।**

मूलार्थ—कित् लिट् के परवर्ती रहते 'इण्' धातु के अभ्यास को दीर्घ होता है। ईयतुः। ईयुः इत्यादि।

विमर्श—प्रकृत सूत्र में 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' तथा 'व्यथो लिटि' (७।४।६८) से 'लिटि' की अनुवृत्ति आती है। तदनुसार—"कित् लिट् के परे रहते 'इण्' धातु के अभ्यास को दीर्घ होता है।"

उदाहरण—(१) √इण्=इ+लिट् (=तस्=अतुस्, द्वित्व, अभ्यास संज्ञा)—इ इ अतुस् ('इ'='य्'—यण्—'इणो यण्', 'दीर्घ'—'इ'='ई'—'दीर्घ इणः किति')=ईयतुस् (स्=र्=ः)=ईयतुः। (२) लिट् प्र० पु० बहु०—ईयुः। (३) इ+लिट् (=सिप्=थल्='थ', द्वित्व, अभ्यास संज्ञा, भारद्वाज नियम से विकल्प से इट्, गुण, अय् आदेश, इ=इयङ्='इय'—'अभ्यासस्यासवर्णे')=इययिथ। इट् के अभाव पक्ष में—'इ इ थ' (—'इ'='ए'—गुण, इ=इयङ्='इय्')=इयेथ। (४) लुट्—एता। (५) लृट्—एष्यति। (६) लोट्—एतु। (७) इ+लङ् (=तिप्=ति, इकारलोप, शप्, लुक्, आट्='आ'—आडजादीनाम्, आ+इ='ऐ' वृद्धि—'आटश्च')=ऐत्। (८) लङ् प्र० पु० द्विव०—ऐताम्। (९) इ+लङ् (=झि, इकारलोप, झ्='अन्त्' आदेश, संयोगान्त लोप)—इ अन् ('इ'='य्'—'इणो यण्')—यन् (आभीय होने से यण् के असिद्ध होने पर अजादि मानकर 'आट्' आगम)=आयन्। (१०) विधिलिङ्—इयात्। (११) आशीर्लिङ्—ईयात् ('अकृत्सार्वधातुकयोः' से दीर्घ)।

(६६७) पद—एतेः, लिङि। **अनुवृत्ति**—उपसर्गाद्ध्रस्वः, अणः, किति। **विधिसूत्र।**

मूलार्थ—उपसर्ग से परवर्ती 'इण्' धातु के 'अण्' को ह्रस्व होता है, आर्धधातुक कित् लिङ् के परे रहते। निरियात्।

मेकादेशः सः पूर्वस्यान्तवत्परस्यादिवत्स्यात् । *उभयत आश्रयणे नान्तादिवत्* । अभीयात् । अणः किम् ? समेयात् । 'समीयादि'ति प्रयोगस्तु भौवादिकस्य । **(६६९) इणो गा लुङि २।४।४५ ।** इणो गादेशः स्याल्लुङि । 'गातिस्थे'ति सिचो लुक् । अगात् । अगाताम् । अगुः । ऐष्यत् । **इक् स्मरणे ।** अयमधिपूर्व एव, 'अधीगर्थदयेशां कर्मणी'ति लिङ्गात् । अन्यथा हीगर्थेत्येव ब्रूयात् । * इण्वदिक इति वक्तव्यम् * । अधियन्ति ।

स्थाने तिप्यनुबन्धलोपे यासुडागमेऽनुबन्धलोपे तस्यार्धधातुकत्वे कित्त्वे सलोपे 'अकृत्सार्वधातुकयोः' इति दीर्घे 'एतेर्लिङि' इति ह्रस्वे 'निरियादि'ति रूपम् ।

(६६८) **अन्तादिवच्च** । 'एकः पूर्वपरयोरि'ति सूत्रमनुवर्तते । 'अन्तादिवदि'त्यस्य यथासंख्यपरिभाषया क्रमेणान्वयः ।

(६६९) **इणो गा लुङि** । सूत्रार्थः स्पष्टः । **अगात्** । इण्धातोर्लुङि तिप्यनुबन्धलोपे 'इणो गा लुङि' इत्यनेन इणः स्थाने 'गा' इत्यादेशे, च्लौ, च्लेः सिच्यनु-

---

विमर्श—सूत्रार्थ की पूर्णता हेतु 'उपसर्गाद्ध्रस्व ऊहतेः' (७।४।२३) से 'उपसर्गात् ह्रस्वः', 'केऽणः' (७।४।१३) से 'अणः' तथा 'अयङ् यि क्ङिति' से 'किति' पदों की अनुवृत्ति आती है । अतः "उपसर्ग से उत्तर—'इण्' धातु के 'अण्' को कित् लिङ् के परवर्ती रहते 'ह्रस्व' होता है" ।

उदाहरण—(१) √निर् + इ + लिङ् (= तिप् = 'ति', इकारलोप, यासुट् = 'यास्' आर्धधातुक संज्ञा, कित्, 'स्' का लोप, 'इ' = 'ई'—दीर्घ—'अकृत्सार्वधातुकयोः' ह्रस्व—'एतेर्लिङि') = निरियात् ।

(६६८) पद—अन्तादिवत्, च । **अनुवृत्ति**—एकः पूर्वपरयोः । **अतिदेशसूत्र ।**

मूलार्थ—पूर्व-पर के स्थान में जो एकादेश होता है, वह पूर्व के अन्त के समान और पर के आदि के समान होता है ।

विमर्श—यह अतिदेश सूत्र है । अतः आरोप का विधान किया जा रहा है । 'एकः पूर्वपरयोः' का अधिकार है । अतः 'अन्तादिवत्' का अन्वय 'यथासंख्य' परिभाषा के सहकार से 'पूर्वपरयोः' के साथ किया जाता है । इस प्रकार सूत्र का आशय यह है कि—"पूर्व और पर के स्थान में होने वाला एकादेश क्रमशः पूर्ववर्ती वर्ण-समुदाय के अन्त के समान और परवर्ती वर्ण-समुदाय के आदि के समान समझा जाता है" ।

(प०) **उभयत इति** । उभयत आश्रयण में अन्तादिवद्भाव नहीं होता । अर्थात् पूर्ववद्भाव और अन्तवद्भाव दोनों एकसाथ नहीं होते । **अभीयात्** । अभि + ईयात् । यहाँ उक्त परिभाषा के अनुसार ह्रस्व नहीं होता । यदि प्रकृत सूत्र से पूर्वान्तवद्भाव से 'अभी' में उपसर्गत्व धर्म माना जाय तो आगे 'यात्' में इण् नहीं मिलता । यदि परादिवद्भाव से 'ईयात्' में इण्त्व लाया जाय तो पूर्व में 'अभ्' शेष रहता है, जो उपसर्ग नहीं है । यदि पूर्वान्तवद्भाव से एकादेश युक्त 'अभी' में उपसर्गत्व और 'भीयात्' में इण् धातुत्व का आश्रयण किया तो ह्रस्व हो सकता है । परन्तु दोनों विरुद्ध कार्य एक साथ नहीं होते । अतः यहाँ ह्रस्व नहीं होता ।

अणः किम् ? समेयात् । 'एतेर्लिङि' सूत्र में 'अणः' पद का ग्रहण होने से 'समेयात्' में सूत्र की प्रवृत्ति नहीं होती । सम् + आ + ईयात् (आ + ई = 'ए'—गुण) = समेयात् । 'समीयात्' प्रयोग भ्वादिगणीय धातु का है ।

(६६९) पद—इणः, गा, लुङि । **विधिसूत्र ।**

मूलार्थ—लुङ् के परवर्ती रहते 'इण्' के स्थान में 'गा' आदेश होता है ।

अध्यगात् । केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः । तन्मते यण्न । तथा च भट्टिः—'ससीतयो राघवयोरधीयन्नि'ति । वी गतिव्याप्तिप्रजननकान्त्यसनखादनेषु । प्रजनो गर्भग्रहणम् । असनं क्षेपणम् । वेति । वीतः । वियन्ति । वेषि । वेमि । वीहि । अवेत् । अवीताम् । अवियन् । अटि सत्यनेकाच्त्वाद्यणिति केचित् । अव्यन् । अत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते । एति । ईतः । इयन्ति । ईयात् । ऐषीत् । वच परिभाषणे । वक्ति । वक्तः । अयमन्तिपरो न प्रयुज्यते । बहुवचनपर इत्यन्ये । झिपर इत्यपरे ।

बन्धलोपे, तिप इकारलोपे 'अ गा स् त्' इति जाते 'गातिस्थे'ति सिचो लुकि 'अगात्' इति ।

(६७०) अस्यतिवक्तिख्यातिभ्योऽङ् । 'च्लेः सिच्' इत्यतः 'च्लेरि'त्यनुवर्तते । तदाह—एभ्यश्च्लेरिति ।

उदाहरण—(१) √इ+लुङ् (=तिप्=ति, अट्, इकारलोप, 'इ'='गा'—'इणो गा लुङि') अ गा त् (च्लि=सिच्, सिच् का लुक्—'गातिस्था०')=अगात् ।

इण् धातु लुङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०–	अगात्	अगाताम्	अगुः
म० पु०–	अगाः	अगातम्	अगात
उ० पु०–	अगाम्	अगाव	अगाम

(२) लृङ्—ऐष्यत् ।

√इक् धातु का अर्थ—'स्मरण करना' है । यह 'अधि' 'उपसर्गपूर्वक ही है । 'अधीगर्थ' सूत्रकरण से यह ज्ञापन होता है । अन्यथा 'इगर्थ' ऐसा ही सूत्र का निर्माण आचार्य पाणिनि करते ।

वा०—इण् धातु के समान इक् को भी कार्य हो—ऐसा कहना चाहिए ।

(१) अधि+इक् (इ)+लट् (=झि, झ्='अन्त' आदेश, यण्—'इणो यण्')=अधियन्ति । (२) लुङ्—अधि+अगात् (यण्)=अध्यगात् । कुछ आचार्यों का कथन है कि "आर्धधातुक के अधिकार में कथित कार्य का ही अतिदेश होता है । उनके मत में यहाँ 'इणो यण्' से यण् नहीं होता । अतएव भट्टिकाव्य में 'अधीयन्' प्रयोग ही मिलता है" ।

√वी धातु गति, व्याप्ति, प्रजन, कान्ति, अशन और खादन अर्थ में है । प्रजन का अर्थ—'गर्भ ग्रहण करना' है । 'असन' का अर्थ—'फेंकना है । (१) √वी+लट् (=तिप्=ति, शप् लुक्, गुण)=वेति । (२) प्र० पु० द्विव०—वीतः । (३) √वी+लट् (=झि, झ्=अन्त, शप्, लुक्, ई=इयङ्='इय')=वियन्ति । (४) म० पु० एकव०—वेषि । (५) उ० पु० एक०—वेमि । (६) लोट् म० पु० ए० व०—वीहि । (७) लङ्—अवेत्, अवीताम्, अवियन् । 'उपदेशकालिक एकाच् धातु के अडागम करने पर अनेकाच् होने से यण् होता है' ऐसा कुछ आचार्यों का मत है । वहाँ—अव्यन् । कुछ विद्वान् ईकार का प्रश्लेष होने से 'ई' धातु को स्वतन्त्र मानते हैं । ई धातु से लट् में एति, ईतः, इयन्ति । लिङ्—ईयात् । लुङ्—ऐषीत् ।

√वच धातु का अर्थ—'भाषण करना' है । (१) लट् प्र० पु० एक०-वक्ति । (२) प्र० पु० द्वि व०—वक्तः ('च्'='ग्'—'जश्त्व', 'ग्'='क्'—चर्त्व) । यह 'अन्ति' में शिष्टजनों द्वारा अप्रयुक्त है । कुछ आचार्यों का कथन है कि 'झि' में इसका प्रयोग नहीं होता । (१) वच्+लट्

वक्तु । वग्धि । वच्यात् । उच्यात् । (६७०) अस्यतिवक्तिख्यातिभ्योऽङ् ३।१।५२ । एभ्यश्च्लेरङ् स्यात् । (६७१) वच उम् ७।४।२० । वच उमागमः स्यात् अङि । अवोचत् । अवक्ष्यत् । मृजू शुद्धौ । (६७२) मृजेर्वृद्धिः ७।२।११४ । मृजेरिको वृद्धिः स्याद्धातुप्रत्यये । 'व्रश्चे'ति षः । मार्ष्टि । मृष्टः । * क्ङित्यजादौ वेष्यते * । मार्जन्ति । मृजन्ति । मार्क्षि । ममार्ज । ममृजतुः ।।ममार्जतुः । ममार्जिथ । ममार्ष्ट । मार्जिता ।

---

(६७१) **वच उमिति** । 'ऋदृशोऽङि' इत्यतः 'अङि' इत्यनुवर्तते । तदाह—**वच इति** । **अवोचत्** । वच् धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपे तिप इकारलोपेऽडागमेऽनुबन्धलोपे च्लौ, च्लेः सिचि प्राप्ते 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङि 'अवच् अ त्' इति जाते 'वच उम्' इत्युमि मित्त्वादन्त्यावयवे गुणे कृते 'अवोचत्' इति ।

(६७२) **मृजेर्वृद्धिः** । 'इको गुणवृद्धी' इति परिभाषया इक इति षष्ठ्यन्तमुपतिष्ठते । तदाह—**मृजेरिको वृद्धिरिति** । **मार्ष्टि** । मृज्धातोः तिपि, शपि, शपो लुकि,

---

(=सिप्=सि='हि' 'सेर्ह्यपिच्च', 'हि'='धि' 'हुझल्भ्यः०' जश्त्व, चर्त्व)=वग्धि । (४) विधिलिङ्—वच्यात् । (५) आशीर्लिङ्—उच्यात् ('वचिस्वपि' से सम्प्रसारण) ।

(६७०) पद—अस्यतिवक्तिख्यातिभ्यः, अङ् । **अनुवृत्ति**—च्लेः, लुङि । **विधिसूत्र** ।

मूलार्थ—असु, वच और ख्याञ् धातुओं से परवर्ती 'च्लि' को 'अङ्' आदेश होता है ।

विमर्श—सूत्र में स्थानीवाचक पद का अभाव है । अतः 'च्लेः सिच्' (३।१।४४) से 'च्लेः' की अनुवृत्ति आती है । 'च्लि लुङि' (३।१।४३) से 'लुङि' पद की अनुवृत्ति आ रही है । इस प्रकार—"असु, वच और ख्याञ् धातुओं से उत्तरवर्ती 'च्लि' के स्थान में 'अङ्' आदेश होता है, 'लुङ्' के परे रहते" ।

(६७१) पद—वचः, उम् । **अनुवृत्ति**—अङि । **विधिसूत्र** ।

मूलार्थ—'अङ्' के परवर्ती रहते 'वच' को 'उम्' का आगम होता है । अवोचत् ।

विमर्श—यहाँ 'ऋदृशोऽङि गुणः' (७।४।१६) से 'अङि' पद की अनुवृत्ति आ रही है । अतः 'अङ्' के परवर्ती रहते 'वच्' को 'उम्' (=उ) का आगम होता है ।

उदाहरण—(१) √वच्+लुङ् (=तिप्=ति, इकारलोप, अट् (='अ' आगम, च्लि)—अ वच् च्लि त् (च्लि='अङ्'='अ'—'अस्यतिवक्तिख्यातिभ्योऽङ्' उम्='उ' का आगम, गुण) =अवोचत् । (२) लृङ्—अवक्ष्यत् ।

√मृजू (ऊदित्) धातु का अर्थ—'शुद्ध करना, माँजना' है ।

(६७२) पद—मृजेः, वृद्धिः । **अनुवृत्ति**—इकः । **विधिसूत्र** ।

मूलार्थ—धात्वधिकार विहित प्रत्यय के परे रहते मृज् के 'इक्' को वृद्धि होती है ।

विमर्श—'इको गुणवृद्धी' परिभाषा के द्वारा 'इकः' षष्ठ्यन्त पद की उपस्थिति होती है । तदनुसार—'मृज्' के 'इक्' के स्थान में वृद्धि होती है ।

उदाहरण—(१) √मृज्+लट् (=तिप्=ति, शप्, लुक्, ऋ='आ' वृद्धि—'मृजेर्वृद्धिः' रपर 'ज्'='ष्'—'व्रश्चभ्रस्ज०')=मार्ष्टि । (२) लट् प्र० पु० द्विव०—मृष्टः ।

वा०—अजादि कित् ङित् प्रत्यय के परवर्ती रहते 'मृज्' के इक् को विकल्प से वृद्धि होती है ।

(३) मृज्+लट् (=झि, 'झ्'='अन्त्', ऋ='आ'—वृद्धि विकल्प से—'क्ङित्यजादौ वेष्यते', रपर)=मार्जन्ति । वृद्धि के अभावपक्ष में—मृजन्ति । (४) लट् म० पु० एक०—मार्क्षि ।

मार्ष्टा । मार्ष्टु । मृड्ढि । अमार्ट् । अमार्ड् । अमार्जम् । अमार्जीत् । 'षढोः कः सि' । अमार्क्षीत् । अमार्क्ष्यत् । अमार्जिष्यत् । रुदिर् अश्रुविमोचने । (६७३) **रुदादिभ्यः सार्वधातुके ७।२।७६** । रुव् स्वप् श्वस् अन् जक्ष् एभ्यो वलादेः सार्वधातुकस्येट् स्यात् । रोविति । रुदितः । हौ परत्वादिटि धित्वं न । रुदिहि । (६७४) **रुदश्च पञ्चभ्यः ७।३।९८** । रुवादेः परस्य हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात् । (६७५)

'मृजेर्वृद्धिः' इति ऋकारस्य वृद्धौ रपरत्वे 'व्रश्चभ्रस्ज०' इति षत्वे तकारस्य ष्टुत्वेन टकारे 'मार्ष्टि' इति ।

(६७३) **रुदादिभ्य इति** । 'ईड्वलादेरि'त्यनुवर्तते । अत आह—**एभ्यः वलादे-रिति** । **रोविति** । रुद्धातोर्लटि, तिपि, शपि, शब्लुकि 'रुदादिभ्यः सार्वधातुके' इति इडागमेऽनुबन्धलोपे 'पुगन्तलघूपधस्य चे'ति गुणे 'रोदिति' इति रूपम् ।

(६७४) **रुदश्चेति** । सूत्रेऽस्मिन् 'नाभ्यस्तस्य' इत्यतः पिति सार्वधातुके इति,

---

(५) लिट् प्र० पु० एकव०—ममार्ज । (६) प्र० पु० द्वि०—विकल्प से वृद्धि—ममार्जतुः । ममृजतुः । (७) म० पु० ए० व० में ऊदित् होने से विकल्प से इट्—ममार्जिथ । ममार्ष्ट (षत्व, ष्टुत्व) । (८) लुट्—मार्जिता, मार्ष्टा (विकल्प से इट्) । (९) लोट्—मार्ष्टु । (१०) मृज्+लोट् (=सिप्='सि', 'सि'='हि')—मृज् हि (शप्, लुक्, 'ज्'='ष्'—'व्रश्च०' 'हि'='धि'—'हुझल्भ्यः' 'ध्'='ढ्'—'ष्टुत्व' 'ष्'='ड्'—'जश्त्व')=मृड्ढि । (११) मृज्+लङ् (=तिप्=ति, शप् लुक्, 'इ'लोप, अट्)—अ मृज् त (ऋ='आ'—'मृजेर्वृद्धिः' रपर 'त्' का लोप—'संयोगान्तस्य लोपः' 'ज्'='ट्' विकल्प से-'वाऽवसाने')=अमार्ट् । टत्व के अभावपक्ष में जश्त्व—अमार्ड् । (१२) लङ् उ० पु० एकव०—अमार्जम् । (१३) मृज्+लुङ् (=तिप्=ति, 'इ' का लोप, अट्, च्लि=सिच्='स्', इट्, ईट्, ऋ='आ' वृद्धि—'मृजेर्वृद्धिः' रपर, 'स्' लोप—'इट ईटि', सवर्णदीर्घ)=अमार्जीत् । इट् के अभावपक्ष में—अमार्क्षीत् । (१४) लृङ् में—अमार्क्ष्यत् । अमार्जिष्यत् (इट् विकल्प) ।

√रुदिर् ('इर्' इत्संज्ञक) धातु का अर्थ—'रोना' है ।

(६७३) पद—रुदादिभ्यः, सार्वधातुके । **अनुवृत्ति**—ईट्, वलादेः । **विधिसूत्र** ।

मूलार्थ—रुदादि पाँच धातुओं से परवर्ती वलादि सार्वधातुक को इट् का आगम होता है । रोदिति इत्यादि ।

विमर्श—प्रकृत सूत्र में—'आर्धधातुकस्येड् वलादेः' से 'इट्, वलादेः' की अनुवृत्ति आ रही है । तदनुसार—"रुद्, स्वप्, श्वस्, अन और जक्ष् धातुओं से परवर्ती वल् आदि सार्वधातुक को 'इट्' का आगम होता है ।"

उदाहरण—(१) √रुद्+लट् (=तिप्=ति, शप्, शप् का लुक्, इट्='इ' का आगम—'रुदादिभ्यः सार्वधातुके' 'उ'='ओ'—गुण—'पुगन्त०')=रोदिति । (२) लट् प्र० पु० द्वि०—रुदितः । (३) लोट् म० पु० ए० व० में 'हुझल्भ्यः' के पर होने से बाधकर 'इट्' । अतः 'हि'='धि'—रुदिहि ।

(६७४) पद—रुदः, च, पञ्चभ्यः । **अनुवृत्ति**—अपृक्ते, हलि, सार्वधातुके । **विधिसूत्र** ।

मूलार्थ—रुदादि पाँच धातुओं से परवर्ती अपृक्त संज्ञक हलादि पित् सार्वधातुक को 'ईट्' का आगम होता है ।

अड् गार्ग्यगालवयोः ७।३।९९ । अरोदीत्-अरोदत् । अरुदिताम् । अरुदन् । अरोदीः । अरोदः । प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट्, 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषणात् । रुद्यात् । अरुदत्-अरोदीत् । अरोदिष्यत् । ञिष्वप्

'उतो वृद्धिः' इत्यतो 'हली'ति, 'गुणोऽपृक्ते' इत्यतः अपृक्ते इति, 'ब्रुव ईट्' इत्यतः ईडिति चानुवर्तते । 'रुदः' इत्यत्र पञ्चमी । रुदादिभ्य इत्यभिप्रायः । अत आह–**हलादेः पित इत्यादि** ।

(६७५) **अड् गार्ग्येति** । गार्ग्यगालवयोराचार्ययोः मते रुदादिभ्यः पञ्चभ्यः परस्य हलादेः पितः सार्वधातुकस्य अपृक्तस्य अडागमः स्यादिति सूत्रार्थः । **अरोदीत्** । रुद धातोर्लुङि तिपि, अनुबन्धलोपे, 'इतश्चे'तीकारलोपे, अटि, च्लौ, च्लेः सिचि 'रुदश्च पञ्चभ्यः' इतीडागमेऽनुबन्धलोपे 'अ रुद् ई.स् त्' इति जाते, इटि, सलोपे 'पुगन्त०' इति गुणे 'अरोदीत्' इति । 'अड् गार्ग्यगालवयोः' इत्यट्पक्षे तु —'अरोददि'ति । **रुद्यादिति** । रुद्धातोः लिङि तिपि 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया अन्तरङ्ग-

---

विमर्श—सूत्रार्थ की पूर्ति हेतु—'नाभ्यस्तस्य'० (७।३।८७) से पिति, सार्वधातुके, 'उतो वृद्धिः' (७।३।८९) से 'हलि' 'गुणोऽपृक्ते' (७।३।९१) से 'अपृक्ते' तथा 'ब्रुव ईट्' (७।३।९३) से 'ईट्' की अनुवृत्ति आती है। अतः "रुद् आदि पाँच धातुओं से उत्तरवर्ती हलादि सार्वधातुक को भी 'ईट्' का आगम होता है" ।

(६७५) पद—अट्, गार्ग्यगालवयोः । **अनुवृत्ति**—रुदः, पञ्चभ्यः, अपृक्ते, हलि, सार्वधातुके । **विधिसूत्र** ।

मूलार्थ—रुदादि पाँच धातुओं से परवर्ती अपृक्त संज्ञक हलादि पित् सार्वधातुक को गार्ग्य और गालव आचार्य के मत से 'अट्' का आगम होता है । अरोदीत् । अरोदत् इत्यादि ।

विमर्श—यहाँ पूर्वसूत्र 'रुदश्च पञ्चभ्यः' (६७४) तथा उसमें अनुवृत्त 'अपृक्ते', 'हलि' तथा 'सार्वधातुके' पदों की अनुवृत्ति आती है । इस प्रकार—"रुद् आदि पाँच धातुओं से उत्तरवर्ती हलादि अपृक्त सार्वधातुक को गार्ग्य तथा गालव आचार्य के मत में 'अट्' का आगम होता है" ।

उदाहरण—(१) √रुद्+लङ् (=तिप्=ति, इकारलोप, अट्, शप्, शप् का लुक्)—अ रुद् त् ('अट्'='अ'—'अड् गार्ग्यगालवयोः' गुण)=अरोदत् । अट् के अभाव पक्ष में—अ रुद् त् ('ईट्'—'रुदश्च पञ्चभ्यः', गुण—'पुगन्त०')=अरोदीत् । (२) लङ् प्र० पु० द्वि०—अरुदिताम् (इट्—'रुदादिभ्यः')। (३) लङ् प्र० पु० बहु०—अरुदन् । (४) रुद्+लङ् (=सिप्=सि, अट्, इकारलोप)—अ रुद् स् (शप्, लुक्, 'अट्'='अ' का आगम—'अड् गार्ग्यगालवयोः'—विकल्प से, गुण, स्=र्=ः)=अरुदः । अट् के अभावपक्ष में ('रुदश्च पञ्चभ्यः' से 'ईट्')=अरोदीः । (५) √रुद्+लिङ् (=तिप्=ति, इकारलोप, अन्तरङ्ग होने से 'ईट्' और 'अट्' का बाधकर यासुट्='यास्', 'स्' का लोप—'स्कोः संयोगाद्योरन्ते च')=रुद्यात् ।

यहाँ 'यासुट्' अन्तरङ्ग है । प्रकृति और प्रत्यय विशेष की अपेक्षा रखने वाला 'अट्' एवम् 'ईट्' बहिरङ्ग है । अतः अन्तरङ्ग होने से 'यासुट्' ही हुआ । क्योंकि अन्तरङ्ग कार्य की कर्तव्यता में बहिरङ्ग असिद्ध होता है ।

(६) √रुद्+लुङ् (=तिप्=ति, अट्, च्लि=अङ्='अ'—विकल्प से—'इरितो वा',

शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुष्वपिथ–सुष्वप्थ। (६७६) **सुविनिर्दुर्भ्यः सुपिसूतिसमाः** ८।३।८८। एभ्यः सुप्यादेः सस्य षः स्यात्। 'पूर्वं धातुरुपसर्गेण युज्यते'। किति लिटि—परत्वात्सम्प्रसारणे, षत्वे च कृते द्वित्वम्। पूर्वत्रासिद्धीयमद्विर्वचने। सुषुषुपतुः। सुषुषुपुः। अकिति तु–द्वित्वेऽभ्यासस्य सम्प्रसारणम्। षत्वस्यासिद्धत्वात् ततः पूर्वं 'हलादिः शेषः' नित्यत्वाच्च'। ततः सुपिरूपाभावान्न षः। सुसुष्वाप। सुस्वप्ता। अस्वपीत्–अस्वपत्। स्वप्यात्। सुप्यात्। सुप्यास्ताम्। सुषुप्यात्।

त्वादीटमटं च प्रबाध्य यासुडागमेऽनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते चे'ति सलोपे कृते 'रुद्यात्' इति रूपम्।

(६७६) **सुविनिर्दुर्भ्य इति**। 'सहेः साडः सः' इत्यस्मात् स इति षष्ठ्यन्तमनुवर्तते, 'मूर्धन्यः' इत्यधिकृतम्। सूत्रे सुपीत्यनेन कृतसम्प्रसारणस्य स्वप्धातोः, सूतीत्यनेन सूतिशब्दः कृदन्तो गृह्यते। समेत्यनेनापि समपदस्य ग्रहणम्। तदाह—**एभ्य इति**। **पूर्वत्रासिद्धीयमिति**। ननु 'सुषुषुपतुः' इत्यत्र परत्वात्सम्प्रसारणे षत्वे विहितेऽपि तस्य त्रैपादिकत्वेनाऽसिद्धत्वात्षकारोपलक्षितस्य द्वित्वं न स्यादित्याह—**पूर्वत्रासिद्धीयमद्विर्वचने**

इकारलोप, ङित्वात् गुणाभाव)=अरुदत्। 'अङ्' के अभावपक्ष में—अरुद् च्लि त् (च्लि=सिच्='स', ईट्—'रुदश्च', इट्, 'स्' लोप, सवर्णदीर्घ, गुण)=अरोदीत्। (७) लृङ्—अरोदिष्यत्।

ञिष्वप् (=स्वप्) धातु का अर्थ—'शयन'=(सोना) है। (१) √स्वप्+लट् (=तिप्=ति, शप् का लुक्, इट्='इ' आगम—'रुदादिभ्यः सार्वधातुके')=स्वपिति। (२) लट् प्र० पु० द्वि०—स्वपितः। (३) √स्वप्+लिट् (=तिप्=णल्='अ', द्वित्व, अभ्यास संज्ञा, प्राप्त हलादिशेष का बाधकर, अभ्यास के 'व्'='उ'—सम्प्रसारण—'लिट्यभ्यासस्य०' पूर्वरूप—'सम्प्रसारणाच्च')—सु स्वप् अ (उपधावृद्धि—'अत उपधायाः' षत्व—'आदेशप्रत्यययोः')=सुष्वाप। (४) लिट् प्र० पु० द्वि०—सुषुपतुः। (५) लिट् म० पु० एक०—सुष्वपिथ–सुष्वप्थ (भारद्वाज के मत से वैभाषिक—इट्)।

(६७६) पद—सुविनिर्दुर्भ्यः, सुपिसूतिसमाः। **अनुवृत्ति**—सः। **विधिसूत्र**।

मूलार्थ—सु, वि, निर्, दुर् उपसर्गों से परवर्ती सुपि, सूति और सम के सकार को षकार आदेश होता है।

विमर्श—यहाँ 'सहेः साडः सः' से 'सः' पद की अनुवृत्ति आती है। 'अपदान्तस्य मूर्धन्यः' का अधिकार है। तदनुसार—'सु, वि, निर् तथा दुर् उपसर्गों से उत्तरवर्ती सुपि (=स्वप्), सूति तथा सम के सकार को मूर्धन्य आदेश होता है'।

(१) प्रथमतः धातु उपसर्ग के साथ सम्बद्ध होता है। अतः धातु और उपसर्ग निमित्तक कार्य अन्तरङ्ग होता है। कित् लिट् में सम्प्रसारण एवं तदाश्रित कार्य के बलवान् होने से द्वित्व से पूर्व सम्प्रसारण कर 'सुप्' रूप निष्पन्न होने से षत्व करने के पश्चात् उसका द्वित्व प्रयुक्त 'तस्' में रूप—सुषुषुपतुः। (२) कित् भिन्न में पूर्व में द्वित्व होने पर अभ्यास संज्ञा के अनन्तर द्वित्व, षत्व 'हलादिः शेषः' की दृष्टि में असिद्ध है और नित्य भी। अतः षकार निवृत्ति के पश्चात् सुप् परत्वाभाव होने से षत्व नहीं हुआ—सुसुष्वाप। (३) लुट् में—सु+स्वप्ता=सुस्वप्ता। (४) लङ्—अस्वपत्, अस्वपीत् ('अट् गार्ग्यगालवयोः' से विकल्प से 'अट्' आगम होने से दो रूप

अस्वाप्सीत्-अस्वप्स्यत् । श्वस प्राणने । प्राणनं जीवनम् । श्वसिति । श्वसितः । शश्वास । श्वसिता । श्वसिष्यति । श्वसितु । अश्वसीत्-अश्वसत् । अश्वसिताम् । अश्वसन् । श्वस्यात् । श्वस्यास्ताम् । श्वस्युः । श्वस्यात् । श्वस्यास्ताम् । श्वस्यासुः । 'ह्म्यन्ते'ति न वृद्धिः । अश्वसिष्यत् । अन च । अनिति । आन । अनिता । अनिष्यति । आनीत्-आनत् । **(६७७) अनितेः ८।४।१९ ।** उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात् । प्राणिति । जक्ष भक्षहसनयोः । जक्षिति । जक्षितः । **(६७८) अदभ्यस्तात् ७।१।४ ।**

इति । अर्थाद् द्विर्वचने कर्तव्ये 'पूर्वत्रासिद्धमि'ति सूत्रं न प्रवर्तते । **श्वसिति** । 'श्वस प्राणने' इत्यस्माद्धातोर्लटि, तिपि, शपि, शब्लुकि 'रुदादिभ्यः सार्वधातुके' इतीडागमे 'श्वसिति' इति ।

(६७७) **अनितेरिति** । 'उपसर्गादसमासेऽपी'त्यतः 'उपसर्गादि'ति 'रषाभ्यां नो णः' इति सूत्रञ्चानुवर्तते । तदाह—**उपसर्गस्थादिति** । **प्राणिति** । प्रोपसर्गपूर्वक-अन्-धातोर्लटि, तिपि, शपि, शब्लुकि, सवर्णदीर्घे 'रुदादिभ्यः' इति तिपः इडागमेऽनुबन्धलोपे 'अनितेः' इत्यनेन णत्वे 'प्राणिति' इति ।

बनते हैं ।) (५) लिङ्—स्वप्यात् । सुप्यास्ताम् । (६) सु+सुप्यात्=सुषुप्यात् (षत्व—'सुविनिर्दुर्भ्यः') । (७) लुङ्—अस्वाप्सीत् । (८) लृङ्—अस्वप्स्यत् ।

√श्वस् धातु का अर्थ 'प्राणन' है । प्राणन का अर्थ—जीवन (=जीवित रहना) है । (१) √श्वस्+लट् (=तिप्=ति, शप्, शप् का लुक्, इट्='इ' का आगम—'रुदादिभ्यः सार्वधातुके')=श्वसिति । (२) लट्—प्र० पु० द्विव०—श्वसितः । (३) लिट्—शश्वास । (४) लुट्—श्वसिता । (५) लृट्—श्वसिष्यति । (६) लोट्—श्वसितु । (७) लङ्—अश्वसीत्, अश्वसत् (विकल्प से अट्, अडभाव पक्ष में—ईट्) । (८) लङ् प्र० पु० द्विव०—अश्वसिताम् । (९) लङ् प्र० पु० बहु०—अश्वसन् । (१०) लिङ्—श्वस्यात्, श्वस्यास्ताम्, श्वस्युः । (११) आशीर्लिङ्—श्वस्यात्, श्वस्यास्ताम्, श्वस्यासुः । (१२) लुङ्—'ह्म्यन्त०' से वृद्धि नहीं होती—अश्वसीत् । (१३) लृङ्—अश्वसिष्यत् ।

√अन धातु भी प्राणन (=जीवित रहना) अर्थ में है । (१) लट्—अनिति । (२) लिट्—आन । (३) लुट्—अनिता । (४) लृट्—अनिष्यति । (५) लङ्—आनीत्, आनत् (विकल्प से 'अट्', पक्ष में 'ईट्') ।

(६७७) पद—अनितेः । **अनुवृत्ति**—उपसर्गात्, रषाभ्यां नो णः । **विधिसूत्र** ।

मूलार्थ—उपसर्गस्थ निमित्त (र्, ष्) से परवर्ती 'अन्' धातु के नकार के स्थान में णकार आदेश होता है ।

विमर्श—प्रकृत सूत्र में 'उपसर्गादसमासेऽपि' (८।४।१४) से 'उपसर्गात्' तथा 'रषाभ्यां नो णः समानपदे' (८।४।१) से 'रषाभ्यां नो णः' की अनुवृत्ति आती है । तदनुसार—"उपसर्ग में स्थित निमित्त (र्, ष्) से उत्तरवर्ती 'अन' धातु के नकार को णकार आदेश होता है ।"

उदाहरण—(१) प्र+√अन्+लट् (=तिप्=ति, शप्, शप् का लुक्, सवर्णदीर्घ, इट्='इ' का आगम—'रुदादिभ्यः सार्वधातुके')—प्रानिति ('न्'='ण्'—णत्व—'अनितेः')= प्राणिति ।

√जक्ष धातु का अर्थ—'खाना, हँसना' है । (१) √जक्ष्+लट् (=तिप्=ति, शप् का लुक्, 'इट्'—'रुदादिभ्यः')=जक्षिति । (२) लट्—प्र० पु० द्विव०—जक्षितः ।

अभ्यस्तात्परस्य झस्य अत्स्यात् । अन्तापवादः । जक्षति । अजक्षीत्–अजक्षत् । अजक्षताम् । 'सिजभ्यस्ते'ति झेर्जुस् । अजक्षुः । जागृ निद्राक्षये । जागर्ति । जागृतः । जाग्रति । 'उषविदे'त्याम्वा । जागराञ्चकार । जजागार । (६७९) जाग्रोऽविचिण्णल्ङित्सु ७।३।८५ । जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेध-

---

(६७८) **अदभ्यस्तादिति** ।'झोऽन्तः' इत्यतः 'झः' इत्यनुवर्तते । अभ्यस्तसंज्ञकात् परस्य झस्यात्स्यादित्यर्थः । **जक्षति** । जक्ष्धातोर्लटि, तिपि, शपि, शपो लुकि, 'रुदादिभ्यः सार्वधातुके' इति इडागमेऽनुबन्धलोपे 'जक्षिति' इति । **जक्षतीति** । जक्ष्-धातोर्लटि, लः स्थाने झौ, 'जक्षित्यादयः षट्' इत्यभ्याससंज्ञायाम् 'अदभ्यस्तात्' इति झस्य स्थाने 'अत्' इत्यादेशे 'जक्षति' इति रूपम् ।

(६७९) **जाग्रोऽविचिण्णिति** । वि-चिण्-णंल्-ङित् एषां द्वन्द्वे नञ्समासः । 'मिदे-र्गुणः' इत्यतः गुण इत्यनुवर्तते । तदाह—**जागर्तेरिति** । **जजागरतुः** । जागृधातोर्लिटि

---

(६७८) पद—अत्, अभ्यस्तात् । **अनुवृत्ति**—झः, प्रत्ययस्य । **विधिसूत्र ।**

मूलार्थ—अभ्यस्त संज्ञक से उत्तरवर्ती 'झ' के स्थान में 'अत्' आदेश होता है । यह 'झोऽन्तः' का अपवाद है । जक्षति इत्यादि ।

विमर्श—सूत्र में स्थानीवाचक पद का अभाव है । अतः 'झोऽन्तः' (७।१।३) से 'झः' पद की अनुवृत्ति आती है । 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' (७।१।२) से स्वरितत्वात् एकदेश 'प्रत्ययस्य' की अनुवृत्ति आती है । तदनुसार—"अभ्यस्त संज्ञक से परवर्ती प्रत्यय के अवयव 'झ्' के स्थान में 'अत्' आदेश होता है ।"

उदाहरण—(१) √जक्ष्+लट् (=झि, शप् लुक्, 'जक्षित्यादयः षट्' से अभ्यस्त संज्ञा, 'झ्'='अत्'—'अदभ्यस्तात्')=जक्षति । (२) लङ् प्र० पु० एक०—अजक्षीत्, अजक्षत् ('अड् गार्ग्य०' से विकल्प से अट्, पक्ष में 'रुदश्च' से ईट्) । (३) लङ् प्र० पु० द्वि०—अजक्षताम् । (४) जक्ष्+लङ् (=झि, शप्, शप् का लुक्, अट्, अभ्यस्त संज्ञा, झि=जुस्='उस्', स्=र्=:)=अजक्षुः ।

‘वच्’ कित् प्रत्यय होने से वचिस्वपियजादीनां किति’ से द्वित्व से पूर्व सम्प्रसारण ‘व्’=‘उ’ पूर्वरूप, द्वित्व, अभ्यास संशा, हलादिशेष, सवर्णदीर्घ, स्=र्=:)=ऊचतुः । (३) लट् प्र० पु० बहुव०—ऊचुः । (४) ब्रू+लिट् (=सिप्=थल्=‘थ’ ‘ब्रू’=‘वच्’ द्वित्व, अभ्यास संशा, हलादिशेष, ‘व्’=‘उ’—सम्प्रसारण, पूर्वरूप, भारद्वाज नियम से विकल्प से इट्)=उवचिथ । इट् के अभाव पक्ष में—‘च्’=‘क्’—‘चोः कुः’=उवक्थ ।

ब्रू धातु, लिट् लकार के रूप (परस्मैपद)

एक०	द्वि०	बहु०
प्र० पु०—उवाच	ऊचतुः	ऊचुः
म० पु०—उवचिथ-उवक्थ	ऊचथुः	ऊच
उ० पु०—उवाच-उवच	ऊचिव	ऊचिम

(४) लोट्—वक्ता । (५) लृट्—वक्ष्यति । वक्ष्यते । (६) ब्रु+लोट् (=तिप्=ति, शप्, लुक्, ईट्=‘ई’—‘ब्रुव ईट्’ ‘उ’=‘ओ’—गुण—‘सार्वधातु०’, ओ=‘अव्’ आदेश, ‘इ’=‘उ’—‘एरुः’)=ब्रवीतु (‘तु’=विकल्प से तातङ्=तात्)=ब्रूतात् (तातङ्पक्ष में) ।

ब्रू धातु लोट् लकार के रूप (परस्मैपद)

एक०	द्वि०	बहु०
प्र० पु०—ब्रवीतु-ब्रूतात्	ब्रूताम्	ब्रुवन्तु
म० पु०—ब्रूहि-ब्रूतात्	ब्रूतम्	ब्रूत
उ० पु०—ब्रवाणि	ब्रवाव	ब्रवाम

(आत्मनेपद)

एक०	द्वि०	बहु०
प्र० पु०—ब्रूताम्	ब्रुवाताम्	ब्रुवताम्
म० पु०—ब्रूष्व	ब्रुवाथाम्	ब्रूध्वम्
उ० पु०—ब्रवै	ब्रवावहै	ब्रवामहै

(७) ब्रू+लङ् (=तिप्=ति, शप्, लुक्, अट्, ‘ईट्’=‘ई’—‘ब्रुव ईट्’ गुण, अवादेश, इकारलोप)=अब्रवीत् ।

√ब्रू धातु, लङ् लकार के रूप (परस्मैपद)

एक०	द्वि०	बहु०
प्र० पु०—अब्रवीत्	अब्रूताम्	अब्रुवन्
म० पु०—अब्रवीः	अब्रूतम्	अब्रूत
उ० पु०—अब्रवम्	अब्रूव	अब्रूम

ऊर्णोतिर्वृद्धिर्वा स्याद्धलादौ पिति सार्वधातुके । ऊर्णौति–ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । ऊर्णुवते । * ऊर्णोतेराम्नेति वाच्यम् * । **(७०६) नन्द्राः संयोगादयः ६।१।३** । अचः परा संयोगादयो न-द-रा द्विर्न भवन्ति । 'नु'शब्दस्य द्वित्वम् ।

(७०५) **ऊर्णोतेर्विभाषा** इति । 'उतो वृद्धिर्लुकि हलि' इत्यतो वृद्धिरिति हलीति च 'नाभ्यस्तस्य' इत्यतः 'पिति सार्वधातुके' इति चानुवर्तते । तदाह—**ऊर्णोतेर्वृद्धिरिति । ऊर्णौति ।** ऊर्णुञ्धातोर्लटस्तिपि, शपि, शपो लुकि, 'ऊर्णोतेर्विभाषा' इति वृद्धौ 'ऊर्णौति' इति ।

(७०६) **नन्द्रा इति ।** अच्चासौ आदिश्चेति कर्मधारयात्पञ्चमी न् द् र् एषां द्वन्द्वः । 'एकाचो द्वे' इत्यनुवर्तते 'अजादेर्द्वितीयस्ये'त्यतः अजादेरिति च । **ऊर्णुनाव ।**

(८) विधिलिङ्—ब्रूयात् । (९) आशीर्लिङ्—उच्यात् (वच् आदेश सम्प्रसारण) । आत्मनेपद—वक्षीष्ट । (१०) ब्रू+लुङ् (=तिप्=ति, च्लि, 'ब्रू'='वच्'—'ब्रुवो वचिः' च्लि=अङ्='अ'—'अस्यतिवक्तिख्यातिभ्योऽङ्')—वच् अ ति (इकारलोप, 'उम्'='उ'—'वच उम्')—व उ च् अ त् (अ+उ='ओ'—गुण, अट्)=अवोचत् । आत्मनेपद में—अवोचत । (११) लृङ् में—अवक्ष्यत् ।

ग० सू०—'चर्करीतम्' 'यङ्लुगन्त' को कहते हैं । उसको अदादि गण में समझना चाहिए¹ । अर्थात् शप् का लुक् आदि कार्य-जो अदादि गण में होते हैं, वह यङ्लुगन्त धातुओं को भी होते हैं ।

√ऊर्णुञ् धातु का अर्थ—'ढँकना' है ।

(७०५) पद—ऊर्णोतेः, विभाषा । **अनुवृत्ति**—वृद्धिः, हलि, पिति सार्वधातुके । **विधिसूत्र ।**

मूलार्थ—हलादि पित् सार्वधातुक के परवर्ती रहते 'ऊर्णु' धातु को विकल्प से वृद्धि होती है । ऊर्णौति । ऊर्णोति इत्यादि ।

विमर्श—यहाँ 'उतो वृद्धिर्लुकि हलि' (७।३।८९) से 'वृद्धि' और 'हलि' तथा 'नाभ्यस्तस्य०' (७।३।८७) से 'पिति' और 'सार्वधातुके' पदों की अनुवृत्ति आती है । तदनुसार—हलादि पित् सार्वधातुक के परे रहने पर ऊर्णु धातु को विकल्प से वृद्धि होती है । ('अलोऽन्त्यस्य' परिभाषा के द्वारा यह वृद्धि अन्त्य अल् उकार को होगी ।)

उदाहरण—(१) ऊर्णु+लट् (=तिप्=ति, शप्, लुक्, उ='औ' वृद्धि विकल्प से—'ऊर्णोतेर्विभाषा')=ऊर्णौति । वृद्धि के अभावपक्ष में—गुण—ऊर्णोति । (२) लट् प्र० पु० द्विव०—ऊर्णुतः । (३) प्र० पु० ब० व०—ऊर्णुवन्ति । आत्मनेपद में—ऊर्णुते । ऊर्णुवाते । ऊर्णुवते ।

वा०—लिट् के परे रहते ऊर्णु धातु को 'आम्' नहीं होता । (ऊर्णु धातु इजादि गुरुमान् होने से 'इजादेश्च गुरुमतोऽनृच्छः' से 'आम्' प्राप्त था, उसका प्रकृत वार्तिक से निषेध किया गया है ।)

(७०६) पद—नन्द्राः, संयोगादयः । **अनुवृत्ति**—अजादेर्द्वितीयस्य, एकाचः द्वे । **विधिसूत्र ।**

मूलार्थ—अच् से परवर्ती संयोगादि नकार, दकार और रेफ को द्वित्व नहीं होता ।

विमर्श—प्रकृत सूत्र में 'एकाचो द्वे प्रथमस्य' (६।१।१) से 'एकाचः द्वे' तथा 'अजादेर्द्वितीयस्य' से 'अजादि' की अनुवृत्ति आती है । तदनुसार—'अच् से परवर्ती संयोगादि नकार, दकार

---

१. **'चर्करीतमिति यङ्लुगन्तस्य संज्ञा' इति प्राचीनाः । यङ्लुगन्तप्रक्रियायां शब्लुगादिकमदादिगणकार्यं भवतीत्यर्थः ।**

णत्वस्यासिद्धत्वात्। 'पूर्वत्रासिद्धीयमद्विर्वचने' इति त्वनित्यम्, 'उभौ साभ्यासस्ये'ति लिङ्गात्। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः। (७०७) **विभाषोर्णोः १।२।३।** ऊर्णोतेः पर इडादिप्रत्ययो वा ङित् स्यात्। ऊर्णुनुविथ-ऊर्णुनविथ। ऊर्णुविता-उर्णविता। ऊर्णौतु-ऊर्णोतु। ऊर्णवानि। ऊर्णवै। (७०८) **गुणोऽपृक्ते ७।३।९१।** ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके। वृद्धयपवादः। और्णोत्। और्णोः।

ऊर्णुधातोर्लिटि तत्स्थाने तिपि समागते, तिपो णलादेशेऽनुबन्धलोपे 'इजादेश्चे'त्यादिना आमि प्राप्ते 'ऊर्णोतेराम्नेति वाच्यम्' इति वार्तिकेन तन्निषेधे 'अजादेर्द्वितीयस्य' इति सरेफस्य णोर्द्वित्वे प्राप्ते 'नन्द्राः संयोगादयः' इति रेफस्य द्वित्वाभावे 'णु' इत्यस्य द्वित्वे प्रथमनकारस्य 'रषाभ्यामि'ति णत्वे, प्राप्तं गुणं प्रबाध्य 'अचो ञ्णिति' इति वृद्धौ आवादेशे च कृते 'ऊर्णुनाव' इति।

(७०७) **विभाषोर्णोरिति।** 'गाङ्कुटादिभ्यः' इत्यतः ङिदिति, 'विज इट्' इत्यतः इडिति चानुवर्तते। तदाह—**इडादीति।**

(७०८) **गुणोऽपृक्त इति।** 'ऊर्णोतिर्विभाषा' इत्यत उर्णोतेरिति, 'नाभ्यस्तस्य' इत्यतः 'पिति सार्वधातुके' इति, 'उतो वृद्धिः' इत्यतः हलीति चानुवर्तते। तदाह—

और रेफ को द्वित्व नहीं होता'। 'ऊर्णु' में रेफ-'अच्' ऊकार से परवर्ती है और संयोगादि 'ण्' है। अतः प्रकृत सूत्र से प्राप्त द्वित्व का निषेध हो जाता है। अतः 'नु' शब्द को द्वित्व होता है। द्वित्व के प्रति णत्व के असिद्ध होने से 'नु' शब्द को ही द्वित्व होता है। यहाँ 'पूर्वत्रासिद्धम्' सूत्र का बाधक वचन 'पूर्वत्रासिद्धीयमद्विर्वचने' की प्रवृत्ति होनी चाहिए। द्वित्व कार्य करने में 'पूर्वत्रासिद्धम्' की प्रवृत्ति नहीं होती है। वह वचन अनित्य है। अतः यहाँ उसकी प्रवृत्ति नहीं होती। अनित्यता में प्रमाण 'उभौ साभ्यासस्य' सूत्र है।

उदाहरण—(१) ऊर्णु+लिट् (=तिप्=णल्='अ', 'इजादेश्च' से प्राप्त 'आम्' का 'ऊर्णोतेराम्नेति वाच्यम्' से निषेध, 'अजादेर्द्वितीयस्य' से रेफ सहित 'र्णो' के द्वित्व की प्राप्ति, 'नन्द्राः संयोगादयः' से रेफ के द्वित्व का निषेध, णत्व के असिद्ध होने से 'उ' का द्वित्व, प्रथम 'न्'='ण्' णत्व-'रषाभ्याम्', 'उ'='औ'—वृद्धि—'अचो ञ्णिति' 'औ'='आव्' आदेश)=ऊर्णुनाव। (२) लिट्, प्र० पु० द्विव०—ऊर्णुनुवतुः। (३) लिट् प्र० पु० ब० व०—ऊर्णुनुवुः।

(७०७) **पद**—विभाषोः, णोः। **अनुवृत्ति**—ङित्, इट्। **अतिदेशसूत्र।**

मूलार्थ—'ऊर्णु' धातु से परवर्ती इडादि प्रत्यय विकल्प से ङिद्वत् होता है।

विमर्श—प्रकृत सूत्र में 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (१।२।१) से 'ङित्' तथा 'विज इट्' (१।२।२) से 'इट्' की अनुवृत्ति आती है। तदनुसार—"'ऊर्णुञ्' धातु से परवर्ती इडादि प्रत्यय विकल्प से ङिद्वत् होता है।"

उदाहरण—(१) ऊर्णु+लिट् (=सिप्=थल्=थ, 'नु' को द्वित्व, प्रथम 'न्' को णत्व, इट्, विकल्प से ङिद्वद्भाव—'विभाषोर्णोः', ङित्व पक्ष में प्राप्त गुण का निषेध, उवङ्=उव्)= ऊर्णुनुविथ। ङित्व के अभाव पक्ष में—(गुण, अव् आदेश)=ऊर्णुनविथ। (२) लुट् में—ऊर्णुविता, उर्णविता। (३) लोट्—ऊर्णौतु, ऊर्णोतु (विकल्प से वृद्धि)। (४) लोट् उ० पु० एकव०—ऊर्णवानि। आत्मनेपद में—ऊर्णवै।

(७०८) **पद**—गुणः, अपृक्ते। **अनुवृत्ति**—ऊर्णोतेः, पिति, सार्वधातुके, हलि। **विधिसूत्र।**

और्णुतम् । ऊर्णुयात् । ऊर्णुयाताम् । ऊर्णुयुः । ऊर्णुयाः । इह वृद्धिर्न, 'ङिच्च पिन्ने'ति व्याख्यानात् । ऊर्णुयात् । ऊर्णुयास्ताम् । ऊर्णुयासुः । ऊर्णुविषीष्ट–ऊर्णविषीष्ट । और्णुवीत् । और्णुविष्टाम् । **(७०९) ऊर्णोतेर्विभाषा ७।२।६ ।** ऊर्णोतेरिडादौ परस्मैपदपरे सिचि वा वृद्धिः स्यात् । पक्षे गुणः । **और्णावीत् । और्णाविष्टाम् । और्णवीत् । और्णविष्टाम् ।**

इत्यदादिप्रकरणम् ।

ऊर्णोतेर्गुण· इत्यादिना । **और्णोत्** । ऊर्णुधातोर्लङि तिपि, शपो लुकि, आडागमेऽनुबन्धलोपे इकारलोपे 'उतो वृद्धिर्लुकि हली'ति प्राप्ते तं प्रबाध्य 'गुणोऽपृक्ते' इति गुणे 'आटश्चे'ति वृद्धौ 'और्णोत्' इति ।

(७०९) ऊर्णोतेर्विभाषा । 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रम्, 'नेटि' इत्यत इटीति चानुवर्तते । तदाह—**ऊर्णोतेरिडादाविति । और्णावीत् ।** ऊर्णुधातोर्लुङि लः स्थाने तिपि, अनुबन्धलोपे, आडागमे 'आटश्चे'ति वृद्धौ, च्लौ, च्लेः सिच्यनुबन्धलोपे, तिप इकारलोपे 'और्णु स् त्' इति जाते सकारस्य इडागमेऽनुबन्धलोपे ईटि च 'विभाषोर्णोः' इतीटो ङित्त्वाद् गुणाभावे उवङि 'इट ईटि' इति सलोपे दीर्घे च कृते 'और्णुवीत्' इति । ङित्त्वाभावपक्षे गुणं प्रबाध्य 'ऊर्णोतेर्विभाषा' इति विकल्पेन वृद्धौ, आवादेशे कृते 'और्णावीत्' इति ।

इति अदादिप्रकरणम् ।

मूलार्थ—अपृक्तसंज्ञक हलादि सार्वधातुक के परवर्ती रहते 'ऊर्णु' धातु को गुण होता है । और्णोत् ।

विमर्श—सूत्रार्थ की पूर्णता के लिए—'ऊर्णोतेर्विभाषा' (७।३।९०) से 'ऊर्णोतेः' 'नाभ्यस्तस्य' (७।३।८७) से 'पिति, सार्वधातुके' और 'उतो वृद्धिर्लुकि हलि' (७।३।८९) से 'हलि' पदों की अनुवृत्ति आती है । अतः 'अपृक्त हलादि पित् सार्वधातुक के परे रहते ऊर्णु धातु को गुण होता है' ।

उदाहरण—(१) ऊर्णु+लङ् (=तिप्=ति, शप्, लुक्, आट्, वृद्धि—'आटश्च', इकार-लोप, प्राप्त वृद्धि का बाधकर 'उ'='ओ'-गुण—'गुणोऽपृक्ते')=और्णोत् । (२) म० पु० एकव०—और्णोः । (३) म० पु० द्विव०—और्णुतम् । (४) विधिलिङ्—और्णुयात्, और्णुयाताम्, और्णुयुः । और्णुयाः । (५) आशीर्लिङ्—ऊर्णूयात्, ऊर्णूयास्ताम्, ऊर्णूयासुः इत्यादि । (यहाँ 'अकृत्सार्वधातुकयोः' से दीर्घ होता है ।) आत्मनेपद में—ऊर्णुविषीष्ट । ऊर्णविषीष्ट ।

(७०६) पद—ऊर्णोतेः, विभाषा । **अनुवृत्ति**—सिचि, वृद्धिः, परस्मैपदेषु, इटि । **विधिसूत्र ।**

मूलार्थ—इडादि परस्मैपदपरक सिच् के परवर्ती रहते ऊर्णु धातु को विकल्प से वृद्धि होती है । पक्ष में गुण । और्णावीत् इत्यादि ।

विमर्श—यहाँ 'सिचि वृद्धिः परस्मैपदेषु' (७।२।१) सूत्र तथा 'नेटि' (७।२।४) से 'इटि' पद की अनुवृत्ति आती है । तदनुसार—"इडादि परस्मैपद सिच् के परे रहते 'ऊर्णु' धातु को विकल्प से वृद्धि होती है" ।

अथ जुहोत्यादिप्रकरणम्

हु दानाऽऽदनयोः । (७१०) जुहोत्यादिभ्यः श्लुः २।४।७५ । जुहोत्यादिभ्यः परस्य शपः श्लुः स्यात् । (७११) श्लौ ६।१।१० । धातोर्द्वे स्तः श्लौ । जुहोति ।

अथ श्लुविकरणा धातवो निरूप्यन्ते—

(७१०) **जुहोत्यादिभ्य इति ।** 'अदिप्रभृतिभ्य' इत्यतः 'शपः' इत्यनुवर्तते । तदाह—**जुहोत्यादिभ्य इत्यादि ।**

(७११) **श्लौ इति ।** 'एकाचो द्वे प्रथमस्ये'त्यतः 'द्वे' इति, 'लिटि धातोः' इत्यतश्च 'धातोरि'त्यनुवर्तते । अत आह—**धातोर्द्वे स्त इति । जुहोति ।** हुधातोः लटि, परस्मैपदे प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे सार्वधातुकसंज्ञायां शपि 'जुहोत्यादिभ्यः

उदाहरण—(१) ऊर्णु+लुङ् (=तिप्=ति, आट्, वृद्धि, च्लि, च्लि=सिच्=‘स्’, इकारलोप)—और्णु स् त (ईट्=‘इ’, ईट्=‘ई’, ‘विभाषोर्णोः’ ‘इट्’ को विकल्प से ङिद्वद्भाव होने से गुण का अभाव, ‘उ’=‘उवङ्’=‘उव्’ ‘स्’ का लोप—‘इट ईटि’, दीर्घ)=और्णुवीत् । ङित्व के अभावपक्ष में—(‘ऊर्णोतेर्विभाषा’ से विकल्प से ‘उ’=‘औ’ वृद्धि, ‘औ’=‘आव्’ आदेश)=और्णावीत् । वृद्धि के अभाव पक्ष में गुण—और्णवीत् । (२) लुङ्—प्र० पु० द्विव०—और्णाविष्टाम्, और्णविष्टाम् । इत्यादि । लुङ् आत्मनेपद में—और्णुविष्ट, और्णविष्ट इत्यादि । लृङ् लकार में—और्णुविष्यत्, और्णविष्यत् । आत्मनेपद में—और्णुविष्यत, और्णविष्यत इत्यादि ।

अदादि-प्रकरण समाप्त ।

अदादि प्रकरण में 'शप्' के 'लुक्' विकरण वाली धातुओं के रूपों की साधनिका प्रदर्शित की गई। अब जुहोत्यादि प्रकरण में 'श्लु' विकरण वाली धातुओं की रूपसिद्धि की प्रक्रिया का विवेचन किया जा रहा है—

√हु धातु का अर्थ—'दान करना' तथा 'खाना' है ।

(७१०) पद—जुहोत्यादिभ्यः, श्लुः । **अनुवृत्ति**—शपः । **विधिसूत्र ।**

मूलार्थ—जुहोत्यादिगणपठित धातुओं से परे 'शप्' का 'श्लु' (लोप) होता है ।

विमर्श—प्रकृत सूत्र में 'अदिप्रभृतिभ्यः शपः' (२।४।७२) से 'शपः' की अनुवृत्ति आती है । तदनुसार—"जुहोत्यादिगण पठित धातुओं से परवर्ती 'शप्' को 'श्लु' होता है ।" यहाँ प्रत्यय के अदर्शन की श्लु संज्ञा है । अतः 'शप्' का 'श्लु' (=लोप) होता है ।

(७११) पद—श्लौ । **अनुवृत्ति**—धातोः, द्वे ।

मूलार्थ—श्लु होने पर धातु को द्वित्व होता है । जुहोति । जुहुतः ।

विमर्श—'एकाचो द्वे प्रथमस्य' से अधिकार प्राप्त 'द्वे' की अनुवृत्ति आती है । 'लिटि धातोरनभ्यासस्य' (६।१।८) से 'धातोः' पद की अनुवृत्ति आने पर श्लु के परे रहते धातु को द्वित्व होता है ।

उदाहरण—(१) √हु+लट् (=तिप्=ति, शप्, शप् का 'जुहोत्यादिभ्यः श्लुः' से श्लु, धातु को द्वित्व—'श्लौ')—हु हु ति (अभ्यास संज्ञा, 'ह्'='झ्'—'कुहोश्चुः', 'झ्'='ज्'—'अभ्यासे चर्च', 'उ'='ओ'—गुण—'सार्वधातुकार्धधातुकयोः')=जुहोति । (२) √हु+लट्

जुहुतः । 'हुश्नुवोरि'ति यण् । जुह्वति । (७१२) **भीह्रीभृहुवां श्लुवच्च ३।१।३९ ।** एभ्यो लिटयाम् वा स्यादामि श्लाविव कार्यं च । **जुहवाञ्चकार । जुहाव । होता । होष्यति । जुहोतु-जुहुतात् । जुहुताम् । जुह्वतु । हेर्धिः । जुहुधि ।** आटि परत्वाद्

श्लुः' इति शपः श्लौ 'श्लौ' इति धातोर्द्वित्वे 'हु हु ति' इति जाते 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'कुहोश्चुः' इत्यनेन हकारस्य झकारे 'अभ्यासे चर्च' इति चर्त्वेन जकारे 'सार्वधातुकार्धधातुकयोः' इति गुणे ओकारे कृते **'जुहोति'** इति ।

(७१२) **भीह्रीभृहुवामिति ।** 'कास्प्रत्ययादि'त्यत आम् लिटीत्यनुवर्तते । तदाह—**एभ्य इति । जुहवाञ्चकार ।** हुधातोर्लिटि 'भीह्रीभृहुवां श्लुवच्च' इति विकल्पेन आम्प्रत्यये श्लुवत्कार्ये च 'हु आम् लिटि' इति जाते 'श्लौ' इति 'द्वित्वेऽभ्यासत्वे 'कुहोश्चुः' इति चुत्वेन हकारस्य झकारे 'अभ्यासे चर्च' इति जकारे गुणेऽवादेशे 'आमः' इत्यनेन लिटो लुकि, 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परक-

---

(=तस्, शप्, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, 'ह्'='झ्',—कुत्व, 'झ्'='ज्'—'चर्त्व' स्=र्=:)=जुहुतः । (३) √हु+लट् (=झि, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, 'ह्'='झ्', 'झ्'='ज्')—जु हु झि ('उभेऽभ्यस्तम्' से अभ्यस्त संज्ञा, झ्=अत्—'अदभ्यस्तात्', उ=व्—यण्—'हुश्नुवोः सार्वधातुके')=जुह्वति ।

√हु धातु, लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	जुहोति	जुहुतः	जुह्वति
म० पु०	जुहोषि	जुहुथः	जुहुथ
उ० पु०	जुहोमि	जुहुवः	जुहुमः

(७१२) **पद**—भी-ह्री-भृ-हुवाम्, श्लुवत्, च । **अनुवृत्ति**—आम्, लिटि, अन्यतरस्याम् । **विधिसूत्र ।**

मूलार्थ—भी, ह्री, भृ तथा हु धातु से लिट् के परवर्ती रहने पर विकल्प से 'आम्' प्रत्यय होता है और 'आम्' के परे श्लु के समान द्वित्व आदि कार्य भी होते हैं । जुहवाञ्चकार । जुहाव ।

विमर्श—यहाँ 'कास्प्रत्ययादाममन्त्रे लिटि' (३।१।३५) से 'आम्, लिटि' तथा 'उषविदजागृभ्योऽन्यतरस्याम्' (३।१।३८) से 'अन्यतरस्याम्' की अनुवृत्ति आती है । इस प्रकार—"भी ह्री, भृ तथा हु धातु से लिट् के परे रहते विकल्प से 'आम्' प्रत्यय होता है तथा श्लुवत् कार्य (श्लु के होने पर द्वित्वादि कार्य) भी होते हैं ।"

उदाहरण—(१) √हु+लिट् (=विकल्प से आम्, श्लुवद्भाव—'भीह्रीभृहुवाम्', द्वित्व, अभ्यास संज्ञा, 'ह्'='झ्'—'कुहोश्चुः', 'झ्'='ज्'—'अभ्यासे चर्च', 'उ'='ओ'—गुण, 'ओ'='अव्'—आदेश, 'लिट्' का लुक्—'आमः', लिट्परक √कृ का अनुप्रयोग—'कृञ्चानुप्रयुज्यते०')—जुहाम् कृ+लिट् (=तिप्=णल्=अ, द्वित्व—'लिटि धातोः', अभ्यास संज्ञा 'ऋ'='अ'—'उरत्', रपर, हलादिशेष, 'क्'='च्'—'कुहोश्चुः', 'ऋ'='अ'—गुण, रपर, 'अ'='आ'—वृद्धि—'अत उपधायाः' म्=ं—अनुस्वार, विकल्प से परसवर्ण 'वा पदान्तस्य')=जुहवाञ्चकार । **'आम्' के अभावपक्ष में**—√हु+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, कुत्व, चर्त्व, उ='औ'—वृद्धि—'अचो ञ्णिति' औ='आव्' आदेश)=जुहाव ।

गुणः । जुहवानि । अजुहोत् । अजुहुताम् । परत्वाज्जुसि चेति गुणः । अजुहवुः । जुहुयात् । हूयात् । अहौषीत् । अहोष्यत् । ञिभी भये । बिभेति (७१३) भियोऽन्य-

कृञोऽनुप्रयोगे लिटस्तिपो णलि अनुबन्धलोपे द्वित्वे, 'उरत्' इत्यत्वे रपरे हलादिशेषे 'कुहोश्चुः' इत्यनेन ककारस्य चकारे गुणे, रपरे 'अत उपधायाः' इत्युपधावृद्धौ अनुस्वारे 'वा पदान्तस्ये'ति पाक्षिके परसवर्णे 'जुहवाञ्चकार' इति । आमोऽभावपक्षे लिटि तिपि, तिपः णलादेशेऽनुबन्धलोपे द्वित्वेऽभ्यासत्वे 'अचो ञ्णिति' इति वृद्धौ, आवादेशे 'जुहाव' इति रूपम् ।

√हु धातु लिट् लकार के रूप

आम् पक्ष में

	एक०	द्वि०	बहु०
प्र० पु०—	जुहवाञ्चकार	जुहवाञ्चक्रतुः	जुहवाञ्चक्रुः
म० पु०—	जुहवाञ्चकर्थ	जुहवाञ्चक्रथुः	जुहवाञ्चक्र
उ० पु०—	जुहवाञ्चकार जुहवाञ्चकर	जुहवाञ्चकृव	जुहवाञ्चकृम

'आम्' के अभाव पक्ष में—

	एक०	द्वि०	बहु०
प्र० पु०—	जुहाव	जुहुवतुः	जुहुवुः
म० पु०—	जुहोथ, जुहविथ	जुहुवथुः	जुहुव
उ० पु०—	जुहाव, जुहव	जुहुविव	जुहुविम

(२) √हु+लुट् प्र० पु० ए० व०—होता । (३) लृट्—होष्यति, इत्यादि । (४) √हु+लोट् (=तिप्=ति, शप्=श्लु, द्वित्व—'श्लौ', अभ्यास संज्ञा, 'ह्'='झ्'—'कुहोश्चुः', 'झ्'='ज्'—'अभ्यासे चर्च', गुण, 'इ'='उ'—'एरुः' तु=तातङ्='तात्'—विकल्प से)=जुहुतात् । तातङ् के अभावपक्ष में—जुहोतु । (५) √हु+लोट् (=तस्=ताम्, शप्, शप्=श्लु, द्वित्व—'श्लौ' अभ्यास संज्ञा, कुत्व, चर्त्व)=जुहुताम् । (६) √हु+लोट् (=झि, शप्=श्लु, द्वित्व, चर्त्व, अभ्यस्त संज्ञा, 'झ्'='अत्'—'अदभ्यस्तात्')—जुहु अति ('उ'='व्'—'यण्', 'इ'='उ'—'एरुः')=जुह्वतु । (७) √हु+लोट् (=सिप्=सि, शप्=श्लु, द्वित्व, कुत्व, चर्त्व, 'सि'='हि'—'सेह्यपिच्च', 'हि'='धि'—'हुझल्भ्यो हेर्धिः')=जुहुधि । (८) √हु+लोट् (=मिप्=मि, शप्=श्लु, द्वित्व, अभ्यासकार्य)—जुहु मि ('मि'='नि'—'मेर्निः' 'आट्'='आ'—'आडुत्तमस्य पिच्च')—जुहु आ नि (यहाँ यण् का बाधकर पर होने से गुण, 'ओ'='अव्' आदेश)=जुहवानि ।

√हु धातु लोट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	जुहोतु, जुहुतात्	जुहुताम्	जुह्वतु
म० पु०—	जुहुधि	जुहुतम्	जुहुत
उ० पु०—	जुहवानि	जुहवाव	जुहवाम

तरस्याम् ६।४।११५। भिय इद्वा स्याद्धलादौ सार्वधातुके क्ङिति। बिभितः-बिभीतः। 'एरनेकाच' इति यण्। बिभ्यति। बिभयाञ्चकार। बिभाय। भेता। भेष्यति। बिभेतु-बिभितात्-बिभीतात्। बिभिताम्-बिभीताम्। अबिभेत्।

---

(७१३) **भियोऽन्यतरस्याम्।** 'इद्दरिद्रस्य' इत्यतः इदिति, 'गमहन' इत्यस्मात् 'क्ङिति' इति 'ई हल्यघोः' इत्यतः हलीति, 'अत उत्सार्वधातुके' इत्यस्मात्सार्वधातुके इति चानुवर्तते। तदाह—**भिय इद्वेति। बिभितः।** 'ञिभी भये' इत्यस्माद्धातोः लटि, तत्स्थाने तसि, शपि, शपः श्लौ, धातोर्द्वित्वेऽभ्यासत्वे, ह्रस्वे भस्य बत्वे 'भियोऽन्यतरस्याम्' इति ईकारस्य इकारे सस्य रुत्वे विसर्गे च कृते 'बिभितः' इति। **बिभ्यति।**

---

(९) √हु+लङ् (=तिप्=ति, अट्='अ', शप्=श्लु, द्वित्व, कुत्व, चर्त्व, इकारलोप—'इतश्च' 'उ'='ओ'—गुण)=अजुहोत। (१०) हु+लङ् (प्र० पु० द्विवचन)=अजुहुताम्। (११) √हु+लङ् (=झि=जुस्='उस्'—'सिजभ्यस्त' शप्=श्लु, द्वित्व, अभ्यासकार्य, अट्='अ' आगम, यण् का बाधकर पर होने से 'उ'='ओ'—गुण—'जुसि च' 'ओ'='अव्' आदेश, स्=र्=:)=अजुहवुः।

√हु धातु लङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	अजुहोत	अजुहुताम्	अजुहवुः
म० पु०	अजुहोः	अजुहुतम्	अजुहुत
उ० पु०	अजुहवम्	अजुहुव	अजुहुम

(१२) विधिलिङ्—जुहुयात, जुहुयाताम्, जुहुयुः इत्यादि।

(१३) आशीर्लिङ्—'अकृत्सार्वधातुकयोः' से दीर्घ होकर—हूयात् इत्यादि।

(१४) √हु+लुङ् (=तिप्=ति, अट्, च्लि, च्लि=सिच्=स्, 'इ' का लोप, ईट्='ई', 'उ'='औ'—वृद्धि—'सिचि वृद्धिः' षत्व)=अहौषीत्।

हु धातु लुङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	अहौषीत्	अहौष्टाम्	अहौषुः
म० पु०	अहौषीः	अहौष्टम्	अहौष्ट
उ० पु०	अहौषम्	अहौष्व	अहौष्म

(१५) लृङ्—अहोष्यत इत्यादि।

√ (ञि) भी धातु का अर्थ—'डरना' है। (१) भी+लट् (=तिप्=ति, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व, भ्='ब्'—'अभ्यासे चर्च' 'ई'='ए'—गुण—'सार्वधातु०')=बिभेति।

(७१३) पद—भियः, अन्यतरस्याम्। **अनुवृत्ति**—इत, क्ङिति, हलि, सार्वधातुके। **विधिसूत्र।**

मूलार्थ—हलादि कित् ङित् सार्वधातुक के परवर्ती रहते भी धातु को विकल्प से इत्व होता है। बिभितः। बिभीतः। इत्यादि।

विमर्श—सूत्रार्थ की पूर्ति हेतु—'इद्दरिद्रस्य' (६।४।११४) से इत्, 'गमहन' (६।४।९८) से 'क्ङिति', 'ई हल्यघोः' (६।४।११३) से 'हलि' तथा 'अत उत्' (६।४।११०) से 'सार्वधातुके'

बिभियात्–बिभीयात् । भीयात् । अभैषीत् । अभेष्यत् । ह्री लज्जायाम् । जिह्रेति । जिह्रीतः । जिह्रियति । जिह्रयाञ्चकार । जिह्राय । ह्रेता । ह्रेष्यति । जिह्रेतु । जिह्रीयात् । अजिह्रेत् । जिह्रीयात् । ह्रीयात् । अह्रैषीत् । अह्रेष्यत् । पॄ पालन-

---

भीधातोर्लटि तत्स्थाने झिप्रत्यये श्लौ, धातोर्द्वित्वे, ह्रस्वत्वे भस्य बत्वे 'उभेऽभ्यस्तम्' इत्यभ्यस्तसंज्ञायाम्, 'अदभ्यस्तात्' इति झेरति, एरनेकाचोऽसंयोगपूर्वस्य' इति यणि 'बिभ्यति' इति ।

जिह्रेति । ह्रीधातोः लटि तिपि शपि 'जुहोत्यादिभ्यः श्लुः' इति शपः श्लौ 'श्लौ' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'ह्रस्वः' इति अभ्यासस्याचो ह्रस्वे 'कुहोश्चुः' इति हस्य झत्वे 'अभ्यासे चर्च' इति झस्य जकारे 'सार्वधातुकार्धधातुकयोः' इति गुणे 'जिह्रेति' इति । अह्रैषीत् । 'ह्री लज्जायाम्' इत्यस्माद्धातोः लुङि तिपि, च्लौ, च्लेः

पदों की अनुवृत्ति आती है। तदनुसार—"क्ति अथवा ङित् हलादि सार्वधातुक के परवर्ती रहते 'भी' धातु के ईकार को विकल्प से इकार आदेश होता है।"

उदाहरण—(१) √भी+लट् (=तस्, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व—'भ्'= 'ब्'—'अभ्यासे चर्च' 'ई'='इ' विकल्प से, स्=र्=ः)=बिभितः । इकार के अभावपक्ष में—बिभीतः । (२) भी+लट् (=झि, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व, चर्त्व, 'झ्'='अत्' -'अदभ्यस्तात्' 'ई'='य्'—'यण्'—'एरनेकाचः')=बिभ्यति ।

√भी धातु लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	बिभेति	बिभितः, बिभीतः	बिभ्यति
म० पु०—	बिभेषि	बिभिथः, बिभीथः	बिभिथ, बिभीथ
उ० पु०—	बिभेमि	बिभिवः, बिभीवः	बिभिमः, बिभीमः

(३) √भी+लिट् ('भीह्रीभृहुवाम्' से 'आम्' तथा श्लुवद्भाव, द्वित्व, अभ्यास संज्ञा, ह्रस्व, चर्त्व, लिट् का लुक्—'आमः')—बि भी आम् (गुण, अय् आदेश, लिट्परक √कृ का अनुप्रयोग—'कृञ्चानुप्रयुज्यते')—बिभयाम् कृ+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, उरत्, रपर, हलादिशेष, 'क्'='च्'—'कुहोश्चुः' गुण, रपर, वृद्धि—'अत उपधायाः' अनुस्वार, परसवर्ण)=बिभयाञ्चकार । 'आम्' के अभावपक्ष में—भी+लिट् (=तिप्=णल्=अ, धातु को द्वित्व, अभ्यास संज्ञा, ह्रस्व, चर्त्व, वृद्धि—'अचो ञ्णिति'—'ऐ'='आय्' आदेश)= बिभाय ।

√भी धातु लिट् लकार के रूप

आम् और श्लुवद्भाव पक्ष में—बिभयाञ्चकार इत्यादि ।

'आम्' के अभाव पक्ष में—(अनुप्रयोग के अभावपक्ष में)

	एक०	द्वि०	बहु०
प्र० पु०—	बिभाय	बिभ्यतुः	बिभ्युः
म० पु०—	बिभयिथ, बिभेथ	बिभ्यथुः	बिभ्य
उ० पु०—	बिभाय, बिभय	बिभ्यिव	बिभ्यिम

पूरणयोः । (७१४) अर्त्तिपिपर्त्योश्च ७।४।७७ । अभ्यासस्य इत्स्यात् श्लौ ।

सिचि, सिचो लोपे, तिप इकारलोपे 'अस्तिसिचोऽपृक्ते' इति ईटि, सस्य षत्वे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ, अडागमेऽनुबन्धलोपे 'अह्रैषीत्' इति रूपम् ।

(७१४) **अर्तिपिपर्त्योश्चेति** । 'अत्र लोपः' इत्यत अभ्यासस्येति, 'भृञामित्' इत्यत इदिति, 'निजां त्रयाणामि'त्यतः श्लाविति चानुवर्तते । तदाह—**अभ्यासस्येति** । **पिपर्ति** । पॄधातोर्लटस्तिपि, शपि, शपः श्लौ, 'श्लावि'ति द्वित्वे अभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे हलादिशेषे प पॄ ति इति जाते, 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्येकारान्तादेशे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे 'पिपर्ति' इति सिद्धम् ।

---

(४) लुट्—भेता । (५) लृट्—भेष्यति । लोट् लकार में हलादि प्रत्ययों में विकल्प से ह्रस्व होता है ।

√भी धातु लोट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	बिभेतु, बिभितात् बिभीतात्	बिभिताम्, बिभीताम्	बिभ्यतु
म० पु०—	बिभिहि, बिभितात् बिभीतात्	बिभितम्, बिभीतम्	बिभित, बिभीत
उ० पु०—	बिभयानि	बिभयाव	बिभयाम

(६) लङ्—अबिभेत् । (७) विधिलिङ्—बिभियात्, बिभीयात् । (८) आशीर्लिङ्—भीयात् । (९) लुङ्—अभैषीत् । (१०) लृङ्—अभेष्यत् ।

√ह्री धातु का अर्थ—'लजाना' है । (१) √ह्री+लट् (=तिप्=ति, शप्, शप्=श्लु, धातु को द्वित्व—श्लौ)—ह्री ह्री ति (अभ्यास संज्ञा, ई='इ'—'ह्रस्व', 'ह्'='झ्'—'कुहोश्चुः' 'झ्'='ज्' 'अभ्यासे चर्च' 'ई'='ए'—गुण—'सार्वधातुकार्धधातुकयोः')=जिह्रेति । (२) लट् प्र० पु० द्विव०—जिह्रीतः । (३) √ह्री+लट् (=झि, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व, कुत्व, चर्त्व)—जि ह्री झि ('झ्'='अत्', संयोगपूर्व होने से 'एरनेकाचः' से यण् नहीं होता । ई=इयङ्=इय्—'अचि श्नुधातुभ्रुवाम्०')=जिह्रियति ।

√ह्री धातु के रूपों की साधनिका प्रायः 'भी' धातु के समान है ।

(४) लिट्—जिह्रयाञ्चकार, जिह्राय इत्यादि । (५) लुट्—ह्रेता । (६) लृट्—ह्रेष्यति । (७) लोट्—जिह्रेतु । लङ्—अजिह्रेत् । विधिलिङ्—जिह्रीयात् । आशीर्लिङ्—ह्रीयात् । लुङ्—अह्रेष्यत् ।

√पॄ धातु का अर्थ—'पालन करना, पूर्ण करना' है ।

(७१४) पद—अर्तिपिपर्त्योः, च । **अनुवृत्ति**—अभ्यासस्य, इत्, श्लौ । **विधिसूत्र** ।

मूलार्थ—श्लु के विषय में—ऋ धातु और पॄ धातु के अभ्यास को इत्व होता है । पिपर्ति ।

विमर्श—यहाँ 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' 'भृञामित्' (७।४।७६) से इत् तथा 'निजां त्रयाणां गुणः श्लौ' (७।४।७५) से 'श्लौ' पदों की अनुवृत्ति आती है । तदनुसार—"ऋ तथा पॄ धातु के अभ्यास को भी श्लु होने पर इकार आदेश होता है ।"

पिपर्ति । (७१५) **उदोष्ठ्यपूर्वस्य ७।१।१०२।** अङ्गावयवौष्ठ्यपूर्वो य ऋत्तदन्तस्याङ्गस्य उत्स्यात् । (७१६) **हलि च ८।२।७७।** रेफवान्तस्य धातोरुपधाया इको दीर्घो हलि । पिपूर्त्तः । पिपुरति । पपार । (७१७) **शॄदॄप्रां ह्रस्वो वा ७।४।१२ ।**

---

(७१५) **उदोष्ठ्यपूर्वस्येति ।** 'ऋत इद्धातोः' इत्यत ऋत इत्यनुवर्तते, अङ्गस्येत्यधिकृतम्, तदत्रानुवर्तते । एकमोष्ठ्यस्य विशेषणम्, अपरं तु ऋता विशेष्यते । तदन्तविधिस्तदाह—**अङ्गावयवेत्यादिना ।**

(७१६) **हलि च ।** अत्र 'र्वोरुपधाया दीर्घ इकः' इत्यनुवर्तते । 'सिपि धातोरि'त्यतो धातोरिति च । तच्च र्वोरित्यनेन विशेष्यते । तेन तदन्तविधिस्तद्वाह—**रेफवान्तस्येति । पिपूर्तः ।** पॄधातोर्लटि, तसि, श्लौ, 'श्लावि'ति धातोर्द्वित्वेऽभ्यासकार्ये 'अर्तिपिपर्त्योश्च' इत्यभ्यासाकारस्य इकारान्तादेशे, रपरत्वे हलादिशेषे 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरत्वे 'हलि चे'ति दीर्घे, सस्य रुत्वे विसर्गे च कृते 'पिपूर्तः' इति ।

उदाहरण—(१) √पॄ+लट् (=तिप्=ति, शप्, शप्=श्लु, द्वित्व—'श्लौ' अभ्यास संज्ञा, ऋ='अ'—'उरत्' रपर, हलादिशेष)—प पॄ ति ('अ'='इ'—'अर्तिपिपर्त्योश्च' ऋ='अ' गुण—'सार्वधातु०' रपर) =पिपर्ति ।

(७१५) पद—उत् ओष्ठ्यपूर्वस्य । **अनुवृत्ति**—ऋतः, धातोः । **विधिसूत्र ।**

मूलार्थ—अङ्गावयव-ओष्ठ्यपूर्वक ऋदन्त अङ्ग को 'उत्' आदेश होता है ।

विमर्श—'ऋत इद्धातोः' (७।१।१००) से 'ऋतः' पद की अनुवृत्ति आती है । अधिकार प्राप्त 'अङ्गस्य' पद की आवृत्ति की जाती है । प्रथम 'अङ्गस्य' 'ओष्ठ्यस्य' का विशेषण है, दूसरा 'ऋतः' का । इस प्रकार—"अङ्ग का अवयव ओष्ठ्य (जिसका स्थान ओष्ठ हो) वर्ण पूर्व में जिस ऋकार के, तदन्त ऋकार को उकार अन्तादेश होता है ।"

(७१६) पद—हलि, च । **अनुवृत्ति**—र्वोरुपधाया दीर्घ इकः, धातोः । **विधिसूत्र ।**

मूलार्थ—रेफान्त और वान्त धातु की उपधा के इक् को दीर्घ होता है, हल् के परवर्ती रहते । पिपूर्तः । पिपुरति । पपार ।

विमर्श—सूत्रस्थ चकार से पूर्वसूत्र—'र्वोरुपधाया दीर्घ इकः' (८।२।७६) सूत्र की अनुवृत्ति आती है । 'सिपि धातोरुर्वा' (८।२।७४) से 'धातोः' पद की अनुवृत्ति आती है । इस प्रकार—"हल्' के परवर्ती होने पर रेफान्त और वकारान्त धातु की उपधा के 'इक्' को दीर्घ होता है ।"

उदाहरण—(१) √पॄ+लट् (=तस्, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, 'ऋ'='अ', रपर, हलादिशेष)—प पॄ तस् ('अ'='इ'—'अर्तिपिपर्त्योश्च', 'ॠ'='उ'—'उदोष्ठ्यपूर्वस्य' रपर, 'हलि च' से 'उ'='ऊ'—दीर्घ, स्=र्=:)=पिपूर्तः । (२) √पॄ+लट् (=झि, शप्, श्लु, द्वित्व, अभ्यासकार्य, इत्व. 'ॠ='उ'—'उदोष्ठ्यपूर्वस्य', रपर)—पिपुर् झि ('झ्'='अत्')=पिपुरति ।

√पॄ धातु, लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	पिपर्ति	पिपूर्तः	पिपुरति
म० पु०	पिपर्षि	पिपूर्थः	पिपूर्थ
उ० पु०	पिपर्मि	पिपूर्वः	पिपूर्मः

शृदृप्रां ह्रस्वो वा स्यात्किति लिटि। पप्रतुः। पप्रुः। **(७१८) ऋच्छत्यृताम्** ७।४।११। तौदादिक-ऋच्छेर्ऋधातोर्ॠतां च गुणो, लिटि। पपरतुः। पपरुः। **(७१९) वॄतो वा** ७।२।३८। वृङ्वृञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। परिता–परीता। परिष्यति–परीष्यति। पिपर्तु। पिपुरतु। पिपूर्हि। अपिपः।

---

(७१७) **शृदृप्रामिति**। शॄ दॄ पॄ इत्येषां द्वन्द्वः। 'दयतेर्दिगि लिटि' इत्यतः 'लिटि' इत्यनुवर्तते। तदाह—**शृदृप्रां ह्रस्वो वेत्यादि**।

(७१८) **ऋच्छत्यॄतामिति**। 'दयतेर्दिगि लिटि' इत्यतो 'लिटी'ति, 'ऋतश्चे'त्यतः गुण इत्यनुवर्तते। अत आह—**तौदादिकऋच्छेरित्यादि**। **पप्रतुः**। पॄधातोर्लिटि लिटः स्थाने तसि, तसः अतुसादेशे, धातोर्द्वित्वेऽभ्यासकार्ये 'पपॄ अतुस्' इति स्थिते 'शृदृप्रां ह्रस्वो वे'ति ऋकारस्य ह्रस्वे, यणि, सस्य रुत्वे विसर्गे च कृते 'पप्रतुः' इति। ह्रस्वाभावपक्षे—'ऋच्छत्यॄताम्' इति ॠकारस्य गुणेऽकारे रपरे, सस्य रुत्वे विसर्गे च कृते 'पपरतुरि'ति।

---

(४) पॄ+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, 'ऋ'='अ'—'उरत्' रपर, हलादिशेष, 'ॠ'='अ'—गुण—'ऋच्छत्यॄताम्' रपर)—प पर् अ (उपधादीर्घ—'अत उपधायाः')=पपार।

(७१७) पद—शॄ-दॄ-प्राम्, हस्वः, वा। **अनुवृत्ति**—किति, लिटि। **विधिसूत्र**।

मूलार्थ—कित् लिट् के परवर्ती रहते शॄ, दॄ और पॄ धातु को विकल्प से हस्व होता है। पप्रतुः पप्रुः।

विमर्श—'शॄ च दॄ च पॄ च=शृदृप्रः, तेषाम्'—इतरेतरद्वन्द्वसमास है। 'दयतेर्दिगि लिटि' (७।४।९) से 'लिटि' पद की अनुवृत्ति आ रही है। 'अङ्गस्य' का अधिकार है। तदनुसार—"शॄ, दॄ तथा पॄ धातु के अङ्ग को लिट् के परे रहते विकल्प से हस्व होता है।"

उदाहरण—(१) पॄ√+लिट् (=तस्=अतुस्, द्वित्व, अभ्यास संज्ञा, उरत, रपर, हलादिशेष)—पपॄ अतुस् (ॠ=र्—'यण्' स्=र्=:)=पप्रतुः। लिट् प्र० पु० बहु०—पप्रुः।

(७१८) पद—ऋच्छत्यॄताम्। **अनुवृत्ति**—गुणः, लिटि। **विधिसूत्र**।

मूलार्थ—'ऋच्छ' धातु, 'ऋ' धातु और दीर्घ ॠकारान्त धातु को गुण होता है, लिट् के परवर्ती रहते। पपरतुः। पपरुः।

विमर्श—प्रकृत सूत्र में—'दयतेर्दिगि लिटि' (७।४।९) से 'लिटि' तथा 'ऋतश्च संयोगादेर्गुणः' (७।४।१०) से 'गुणः' की अनुवृत्ति आती है। इस प्रकार—"तुदादिगण की 'ऋच्छ्' धातु, ऋ धातु और ॠदन्त धातु को लिट् के परे रहते गुण होता है।"

उदाहरण—(१) पूर्वसूत्र (७१७) से हस्व के अभावपक्ष में—पपॄ+अतुस् (ॠ='अ' गुण—'ऋच्छत्यॄताम्' रपर, स्=र्=:)=पपरतुः। (२) प्र० पु० बहु०—पपरुः।

(७१९) पद—वॄतः, वा। **अनुवृत्ति**—इटः, अलिटि दीर्घः। **विधिसूत्र**।

मूलार्थ—वृङ्, वृञ् और दीर्घ ॠदन्त धातु से परवर्ती 'इट्' को विकल्प से दीर्घ होता है, लिट् के परवर्ती रहने पर दीर्घ नहीं होता। परिता, परीता इत्यादि।

अपिपूर्ताम् । अपिपरुः । विपूर्यात् । पिपूर्युः । पूर्यात् । अपारीत् । **(७२०) सिचि च**

(७१९) वृतो वा इति । 'ग्रहोऽलिटि दीर्घः' इत्यस्मादलिटि दीर्घ इत्यनुवर्तते । वॄ च ऋत् च वॄत् तस्मादिति विग्रहः । अत आह—**वृङ्वृञ्भ्यामिति ।**

विमर्श—'वॄतः' पद में समाहार द्वन्द्व समास है । (वॄ च ऋत च वॄत, तस्मात) 'ग्रहोऽलिटि दीर्घः' (७।२।३७) से 'अलिटि दीर्घः' तथा 'आर्धधातुकस्येड् वलादेः' (७।२।३५) से 'इट्' की अनुवृत्ति आती है । तदनुसार—वॄ[1] तथा ऋकारान्त धातुओं से उत्तरवर्ती इट् को विकल्प से दीर्घ होता है, लिट् के परे रहते दीर्घ नहीं होता ।

उदाहरण—(१) पॄ+लुट् (=तिप्=डा=आ, तास्, इट्, गुण, रपर)--पर् इ तास् आ ('इ'='ई' विकल्प से दीर्घ—'वॄतो वा' टिलोप)=परीता । दीर्घ के अभावपक्ष में—परिता । (२) लृट् में विकल्प से दीर्घ—परीष्यति, परिष्यति । (३) लोट् में (लट् के समान पिपर्ति 'इ'='उ'—'एरुः')=पिपर्तु । (४) लोट् प्र० पु० बहुव०—**पिपुरतु ।**

√पॄ धातु, लोट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	पिपर्तु-पिपूर्तात	पिपूर्ताम्	पिपुरतु
म० पु०—	पिपूर्हि-पिपूर्तात	पिपूर्तम्	पिपूर्त
उ० पु०—	पिपराणि	पिपराव	पिपराम

(५) पॄ+लङ् (=तिप्=ति, शप्, द्वित्व--'श्लौ' अभ्यास संज्ञा, अत्व, रपर, हलादिशेष, अभ्यास को इत्व—'अर्तिपिपर्त्योश्च', इकारलोप—'इतश्च', गुण, रपर)--अपि पर् त ('त' का लोप—'हल्ङ्याब्भ्यः', र्=:)=अपिपः ।

√पॄ धातु, लङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अपिपः	अपिपूर्ताम्	अपिपरुः
म० पु०—	अपिपः	अपिपूर्तम्	अपिपूर्त
उ० पु०—	अपिपरम्	अपिपूर्व	अपिपूर्म

(६) विधिलिङ् में यासुट् के ङित् होने से गुण नहीं होता । ऋकार को 'उर्' 'हलि च' से दीर्घ होकर **प्र० पु० एक०**—पिपूर्यात । प्र० पु० बहु०—पिपूर्युः ।

पॄ धातु, विधिलिङ् के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	पिपूर्यात	पिपूर्याताम्	पिपूर्युः
म० पु०—	पिपूर्याः	पिपूर्यातम्	पिपूर्यात
उ० पु०—	पिपूर्याम्	पिपूर्याव	पिपूर्याम

(७) आशीर्लिङ्—पूर्यात इत्यादि ।

(८) पॄ+लुङ् (=तिप्=ति, च्लि, च्लि=सिच्=स्, इट्, इकारलोप, ईट्—'अस्तिसिचोऽपृक्ते', 'स्' का लोप—'इट ईटि', अट् का आगम, सवर्णदीर्घ, 'ॠ'='आ'—वृद्धि—'सिचि वृद्धिः परस्मैपदेषु', रपर)=अपारीत ।

---

[1] सूत्रस्थ 'वॄ' से वृङ् तथा वृञ् दोनों धातुओं का ग्रहण होता है ।

परस्मैपदेषु ७।२।४०। अत्र वृत इटो न दीर्घः। अपारिष्टाम्। अपरिष्यत्–अपरीष्यत्। ओहाक् त्यागे। जहाति। (७२१) **जहातेश्च ६।४।११६।** इत्स्याद्वा हलादौ क्ङिति सार्वधातुके। जहितः। (७२२) **ई हल्यघोः ६।४।११३।** श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि। जहीतः। जहति। जहौ। हाता। हास्यति। जहातु–

---

(७२०) **अत्रेति।** परस्मैपदपरके सिचि वृङ्वृञ्भ्याम् ऋदन्ताच्च परस्येटो दीर्घो न भवतीत्यर्थः।

(७२१) **जहातेश्चेति।** 'इद्दरिद्रस्य इत्यस्मादिदिति, 'भियोऽन्यतरस्यामि'त्यस्मादन्यतरस्यामिति, 'गमहन' इत्यस्मात् क्ङिति इति, 'अत उत्सार्वधातुके' इत्यतः हलीति चानुवर्तते। अत आह—**इत्स्याद्वेत्यादि।**

(७२२) **ई हल्यघोः।** ई इति लुप्तप्रथमान्तम्। 'श्नाभ्यस्तयोरातः' इति, 'गमहन' इत्यतः क्ङितीति, 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इति चानुवर्तते।

√पॄ धातु, लुङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अपारीत्	अपारिष्टाम्	अपारिषुः
म० पु०––	अपारीः	अपारिष्टम्	अपारिष्ट
उ० पु०––	अपारिषम्	अपारिष्व	अपारिष्म

(७२०) पद—सिचि, च, परस्मैपदेषु। **अनुवृत्ति**—न, वृतः, दीर्घः, इट्। **विधिसूत्र।**

मूलार्थ—परस्मैपदपरक 'सिच्' के परवर्ती रहते वृङ्, वृञ् और ऋदन्त धातु से पर इट् को दीर्घ नहीं होता।

विमर्श—यहाँ 'न लिङि' (७।२।३९) से 'न', 'वॄतो वा' (७१९) से 'वॄतः', 'ग्रहोऽलिटि' (७।२।३७) से 'दीर्घः' तथा 'आर्धधातुकस्येड्' (७।२।३५) से 'इट्' की अनुवृत्ति आती है। तदनुसार पूर्वोक्त सूत्रार्थ निष्पन्न होता है।

उदाहरण—(१) लुङ् प्र० पु० द्विव०—अपारिष्टाम् (दीर्घ का निषेध)।

√ओहाक् (हा) धातु का अर्थ—'त्यागना, छोड़ना' है।

(१) √हा + लट् (=तिप्=ति, शप्=श्लु, द्वित्व, अभ्यासकार्य)=जहाति।

(७२१) पद—जहातेः, च। **अनुवृत्ति**—इत्, अन्यतरस्याम्, क्ङिति, हलि। **विधिसूत्र।**

मूलार्थ—हलादि कित् ङित् के परवर्ती रहते 'हा' धातु को विकल्प से इत्व होता है। जहितः।

विमर्श—प्रकृत सूत्र में 'इद्दरिद्रस्य' (६।४।११४) से 'इत्', 'भियोऽन्यतरस्याम्' (६।४।११५) से 'अन्यतरस्याम्' 'ई हल्यघोः' (६।४।११३) से 'हलि' तथा 'गमहन' से 'क्ङिति' पदों की अनुवृत्ति आती है। तदनुसार—"हलादि कित्, ङित् के परे रहते 'ओहाक्' धातु को विकल्प से इकार अन्तादेश होता है।"

(७२२) पद—ई, हलि, अघोः। **अनुवृत्ति**—श्नाभ्यस्तयोरातः, क्ङिति, सार्वधातुके। **विधिसूत्र।**

मूलार्थ—हलादि कित् ङित् सार्वधातुक के परवर्ती रहते श्ना प्रत्यय और अभ्यस्तसंज्ञक आकार को ईत्व होता है। **जहीतः** इत्यादि।

जहितात्-जहीतात्। **(७२३) आ च हौ ६।४।११७। जहातेर्हौ परे आत्स्यात्। चादीदितौ।** जहाहि-जहिहि-जहीहि। अजहात्। अजहुः। **(७२४) लोपो यि**

तदाह—**श्नाभ्यस्तयोरित्यादिना।** जहितः। हा धातोर्लटि, तसि, शपि, शपः श्लौ 'श्लावि'ति धातोर्द्वित्वेऽभ्यासत्वे ह्रस्वे, हस्य झत्वे, झस्य जत्वे, 'सार्वधातुकमपित्' इति तसो ङिद्वद्भावे 'जहातेश्चे'त्यनेन आकारस्य विकल्पेन इकारादेशे, सस्य रुत्वे विसर्गे च कृते 'जहितः' इति। इत्वाऽभावपक्षे 'ई हल्यघोः' इत्याकारस्य ईकारे कृते 'जहीतः' इति रूपद्वयम्।

(७२३) आ च हाविति। 'जहातेश्चे'ति सूत्रमत्रानुवर्तते। तदाह—**जहातेरिति।** **जहाहि।** हाधातोर्लोटि, तत्स्थाने सिपि, 'सेर्ह्यपिच्च' इति सिपः स्थाने 'हि' इत्यादेशे, शपि, शपः श्लौ, 'श्लावि'ति द्वित्वेऽभ्याससंज्ञायाम्, 'ह्रस्वः' इति ह्रस्वे, चुत्वेन हस्य झत्वे, 'अभ्यासे चर्च' इति झस्य जत्वे 'आ च हौ' इत्यनेन आत्वे 'जहाहि' इति। चकारेण इकारे विहिते जहिहि। ईकारे विहिते तु—'जहीहि' इति।

विमर्श—'श्नाभ्यस्तयोरातः' (६।४।११२) सूत्र की 'गमहन०' (६।४।९८) से क्ङिति, 'अत उत्सार्वधातुके' (६।४।११०) से 'सार्वधातुके' की अनुवृत्ति आती है। तदनुसार—"हलादि कित् अथवा ङित् सार्वधातुकसंज्ञक प्रत्यय के परवर्ती रहते 'श्ना' के आकार के स्थान में ईकार आदेश होता है"।

उदाहरण—(१) √हा+लट् (=तस्, शप्, शप्=श्लु, धातु को द्वित्व—'श्लौ' ह्रस्व, 'ह्'='झ्', 'झ्'='ज्' तस् को ङिद्भाव—'सार्वधातुकमपित्', 'आ'='इ'—विकल्प से—'जहातेश्च' स्=र्=ः)=जहितः। इत्व के अभाव पक्ष में—'आ'='ई'—'ई हल्यघोः')= जहीतः। (२) √हा+लट् (=झि, शप्, श्लु, द्वित्व, अभ्यासकार्य)—ज हा झि ('झ्'='अत्' 'आ' का लोप 'श्नाभ्यस्तयोरातः')=जहति।

√ओहाक् (हा) धातु लट् लकार के रूप

एक०	द्वि०	बहु०
प्र० पु०—जहाति	जहितः, जहीतः	जहति
म० पु०—जहासि	जहीथः, जहिथः	जहीथ, जहिथ
उ० पु०—जहामि	जहिवः, जहीवः	जहिमः, जहीमः

(३) √हा+लिट् (तिप्=णल्, द्वित्व—'लिटि धातोरनभ्यासस्य', अभ्यास संज्ञा, ह्रस्व, 'ह्'='झ्'—'कुहोश्चुः', 'झ्'='ज्', णल्=औ—'आत औ णलः' आ+औ=औ—'वृद्धिरेचि')=जहौ। (४) लुट्—हाता। (५) लृट्—हास्यति। (६) लोट्—जहातु। जहितात्, जहीतात्।

(७२३) पद—आ, च, हौ। **अनुवृत्ति—**जहातेः। **विधिसूत्र।**

मूलार्थ—हा धातु को आत्व होता है तथा पक्ष में इत्व और ईत्व भी होता है। जहाहि, जहिहि, जहीहि इत्यादि।

विमर्श—पूर्वसूत्र (७२१) से 'जहातेः' पद की अनुवृत्ति आती है। तदनुसार—'हि' के परवर्ती रहते हा धातु के आकार को आकार आदेश होता है। चकारात् आकार को इकार और ईकार दोनों आदेश होते हैं।

६।४।११८। जहातेराल्लोपो यादौ सार्वधातुके। जह्यात्। 'एर्लिङि'। हेयात्। अहासीत्। अहास्यत्। ऋ गतौ। 'अर्तिपिपर्त्योश्चे'त्यभ्यासस्य इकारः। अभ्यासस्यासवर्णे'

---

(७२४) लोपो यि। 'यि' इति सप्तम्यन्तम्। सार्वधातुकविशेषणत्वात्तदादिविधिः। 'जहातेश्चे'त्यतो जहातेरिति, 'श्नाभ्यस्तयोरातः' इत्यंत आत इति, 'अत उत्सार्वधातुके' इत्यतः 'सार्वधातुके' इति चानुवर्तते। तदाह—जहातेरिति। अहासीत्। हाधातोर्लुङि तिपि, अडागमेऽनुबन्धलोपे च्लौ, च्लेः सिचि इचो लोपे, तिप इकारलोपे, 'अस्तिसिचोऽपृक्ते' इति ईटि, 'यमरमनमातां सक्च' इति सगागमेऽनुबन्धलोपे, सिच इटि, 'इट ईटि' इति सकारलोपे सवर्णदीर्घे 'अहासीत्' इति सिद्धम्।

उदाहरण—(१) √हा+लोट् (=सिप्=सि, 'सि'='हि'—'सेह्र्यपिच्च', शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व, 'ह्'='झ्'—'चुत्व', 'झ्'='ज्' 'आ'='आ'—'आ च हौ')= जहाहि। चकारात् इकार होने पर—जहिहि। ईकार पक्ष में—जहीहि।

√हा धातु लोट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	जहातु, जहितात्, जहीतात्	जहिताम्, जहीताम्	जहतु
म० पु०	जहाहि, जहिहि, जहीहि	जहितम्, जहीतम्	जहीत
उ० पु०	जहानि	जहाव	जहाम

√हा धातु लङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	अजहात्	अजहिताम्, अजहीताम्	अजहुः
म० पु०	अजहाः	अजहितम्, अजहीतम्	अजहीत
उ० पु०	अजहाम्	अजहिव, अजहीव	अजहिम, अजहीम

(७२४) पद—लोपः, यि। **अनुवृत्ति**—जहातेः, आतः, सार्वधातुके। **विधिसूत्र।**

मूलार्थ—यकारादि सार्वधातुक के परवर्ती रहते 'हा' धातु के आकार का लोप होता है। जह्यात् इत्यादि।

विमर्श—पूर्वसूत्र 'जहातेश्च' (७२१) से 'जहातेः', 'श्नाभ्यस्तयोरातः' (६।४।११२) से 'आतः' तथा 'अत उत्सार्वधातुके' (६।४।११०) से 'सार्वधातुके' पदों की अनुवृत्ति आती है। 'यि' पद सप्तम्यन्त है। सार्वधातुक का विशेषण होने से तदादि विधि होती है। अतः "यकारादि सार्वधातुक के परे रहते 'हा' धातु के आकार का लोप होता है।"

उदाहरण—(१) √हा+विधिलिङ् (=तिप्=ति, शप्=श्लु, द्वित्व, अभ्यासकार्य)—जहा ति (इकारलोप, यासुट्=यास्, 'स्' का लोप)—जहायात् ('आ' का लोप—'लोपो यि') =जह्यात्। (२) √हा+आशीर्लिङ् (=तिप्=ति, यासुट्=यास्, 'स्' का लोप, इकारलोप, 'आ'='ए' एत्व—'एर्लिङि')=हेयात्। (३) √हा+लुङ् (=तिप्=ति, च्लि, च्लि=सिच् ='स्' इकारलोप, ईट्='ई'—'अस्तिसिचोऽपृक्ते', धातु को सक्='स्' का आगम तथा इट्='इ' 'यमरमनमातां सक्च', 'स्' का लोप—'इट ईटि' इ+ई='ई'—सवर्णदीर्घ)=अहासीत्। (४) लृङ्—अहास्यत्।

√ऋ धातु का अर्थ 'गति=जाना' है।

इर्यति । इयृतः । इयृति । आर । आरतुः । आरुः । 'इडत्यर्ती'ति नित्यमिट् । आरिथ । अर्ता । अरिष्यति । इयर्तु । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । इयृयात् । 'गुणोऽर्त्ती'ति गुणः । अर्यात् । 'सर्तिशास्त्यर्त्तिभ्यश्चे'त्यङ् । आरत् । 'ऋद्धनोः स्ये' । आरिष्यत् । इति परस्मैपदिनः ।

अथात्मनेपदिनः । माङ् माने शब्दे च । (७२५) **भृञामित् ७।४।७६** । भृञ्, माङ्, ओहाङ् एषामभ्यासस्येत्स्याच्छ्लौ । 'ई हल्यघोः' । मिमीते । मिमाते । 'श्ना-

---

इर्यति । ऋधातोर्लटि तिपि, शपि, शपः श्लौ, 'श्लौ' इति द्वित्वे 'ऋ ऋ ति' इति जाते 'अर्तिपिपर्त्योश्चे'त्यनेन अभ्यासस्येकारादेशे रपरत्वे हलादिशेषे 'इ ऋ ति' इति स्थिते 'अभ्यासस्यासवर्णे' इति इयङि गुणे रपरे च इयर्ति इति ।

(७२५) **भृञामिदिति** । अत्र 'लोपोऽभ्यासस्ये'त्यतः अभ्यासस्येति, 'निजां त्रयाणां गुणः श्लौ' इत्यतः त्रयाणां श्लावित्यनुवर्तते । अत आह—**भृञ् माङित्या-**

---

(१) √ऋ+लट् (=तिप्=ति, शप्, शप्=श्लु, द्वित्व)—ऋ ऋ ति (अभ्यास के 'ऋ'='इ' रपर—'अर्तिपिपर्त्योश्च', इ=इयङ्=इय्—'अभ्यासस्यावर्णे')—इय् ऋ ति ('ऋ'= 'अ'—गुण, रपर)=**इयर्ति** । (२) लट् प्र० पु० द्विव०—इयृतः । (३) लट् प्र० पु० बहुव०—इयृति । (४) लिट् प्र० पु०—आर, आरतुः, आरुः । म० पु० एकव० में 'इडत्यर्ति' से नित्य इट् होने पर—आरिथ । (५) लुट्—अर्ता । (६) लृट्—अरिष्यति । (७) लोट् प्र० पु० एकव०—इयर्तु । (८) लोट् उ० पु० एकव०—इयराणि । (९) √ऋ+लङ् (=तिप्=ति, इकार-लोप-'इतश्च', शप्=श्लु, धातु को द्वित्व, अभ्यास संज्ञा, अभ्यास के 'ऋ'='इ'—'अर्तिपिपर्त्योश्च' रपर, हलादिशेष, इ=इयङ्=इय्)—इय् ऋ त् (आट्='आ' का आगम, आ+इ='ऐ' वृद्धि—'आटश्च', 'ऋ'='अ' गुण, रपर, 'त्' का लोप—'हल्ङ्याब्भ्यः' र्=:)=ऐयः । (१०) लङ् प्र० पु० द्विव०—ऐयृताम् । (११) प्र० पु० बहुव०—ऐयरुः । (१२) विधिलिङ्—ऐयृयात् । (१३) आशीर्लिङ् प्र० पु० एकव० में ('गुणोऽर्ति' से गुण, रपर)—अर्यात् । (१४) लुङ् में 'सर्तिशास्त्यर्त्तिभ्यश्च' से 'च्लि' के स्थान में 'अङ्' आदेश होता है—आरत् । (१५) लृङ् में 'ऋद्धनोः स्ये' से इट् होकर—आरिष्यत् । जुहोत्यादिगण की परस्मैपदी धातुओं की रूपसिद्धि का विवेचन करने के अनन्तर आत्मनेपदी धातुओं के रूपों की साधनिका का निर्देश करते हैं—

√माङ् (मा) धातु का अर्थ—'मापना और शब्द करना' है ।

(७२५) पद—भृञाम्, इत् । **अनुवृत्ति**—त्रयाणाम्, श्लौ, अभ्यासस्य । **विधिसूत्र** ।

मूलार्थ—भृञ्, माङ् और ओहाङ् धातु के अभ्यास को श्लु के विषय में इत्व होता है ।

विमर्श—प्रकृत सूत्र में 'निजां त्रयाणां गुणः श्लौ' (७।४।७५) से 'त्रयाणाम्, श्लौ' तथा 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' की अनुवृत्ति आती है। तदनुसार—"भृञ् (=पालन करना), माङ् (नापना) और ओहाङ् (=जाना) इन तीन धातुओं के अभ्यास को इकार आदेश होता है श्लु के विषय में ।"

उदाहरण—(१) √मा+लट् (=त, शप्, शप्=श्लु, द्वित्व—'श्लौ' अभ्यास संज्ञा, अभ्यास के 'आ'='इ' इत्व—'भृञामित्', 'आ'='ई'—'ई हल्यघोः' टि 'अ'=एत्व—टित आत्मनेपदानां टेरे')=मिमीते । (२) लट् प्र० पु० द्विव०='आताम्' में श्नाभ्यस्तयोरातः' से आकार का लोप होकर—मिमाते । (३) लट् प्र० पु० बहुव०—मिमते ।

भ्यस्ते'ति आतो लोपः। मिमते। ममे। माता। मास्यते। मिमीताम्। अमिमीत। मिमीत। मासीष्ट। अमास्त। अमास्यत। ओहाङ् गतौ। जिहीते। जिहाते। जिहते। जहे। हाता। हास्यते। जिहीताम्। अजिहीत। जिहीत। हासीष्ट। अहास्त। अहास्यत। इत्यात्मनेपदिनः।

अथोभयपदिनः। डुभृञ् धारणपोषणयोः। बिभर्ति। बिभृतः। बिभ्रति। बिभृते। बिभ्राते। बिभ्रते। बिभराञ्चकार। बभार। बभर्थ। बभृव। बभृम। बिभराञ्चक्रे।

दिना। मिमीते। माङ्धातोर्लटि तत्स्थाने आत्मनेपदे तप्रत्यये, शपि, शपः श्लौ, द्वित्वेऽभ्यासत्वे 'भृञामित्' इत्यभ्यासस्य इत्वे 'ई हल्यघोः' इत्याकारस्य ईत्वे, 'टित आत्मनेपदानां टेरे' इति टेरेत्वे च कृते 'मिमीते' इति।

बिभर्ति। भृञ्धातोर्लटि, तिपि, शपि, शपः श्लुत्वे 'श्लौ' इत्यनेन धातोर्द्वित्वेऽभ्याससंज्ञायाम्, 'भृञामित्' इति इत्वे, रपरत्वे, हलादिशेषे 'अभ्यासे चर्च' इति भस्य

√मा धातु, लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	मिमीते	मिमाते	मिमते
म० पु०—	मिमीषे	मिमाथे	मिमीध्वे
उ० पु०—	मिमे	मिमीवहे	मिमीमहे

(४) लिट्—ममे। (५) लुट्—माता। (६) लृट्—मास्यते। (७) लोट्—मिमीताम्। (८) लङ्—अमिमीत। (९) विधिलिङ्—मिमीत। (१०) आशीर्लिङ्=मासीष्ट। (११) √मा+लुङ् (=त, अट्='अ'—आगम, च्लि, च्लि=सिच्='स्')=अमास्त। (१२) लृङ्—अमास्यत।

√ओहाङ् (हा) धातु का अर्थ—'जाना' है।

(१) √हा+लट् (=त, शप्=श्लु, द्वित्व—श्लौ, अभ्यासकार्य)—जहा त (अभ्यास को इकार अन्तादेश—'भृञामित्', 'त' के अपित्सार्वधातुक होने से ङिद्वत् होने के कारण 'आ'='ई'—'ई हल्यघोः', टि=एत्व)=जिहीते।

√हा धातु लट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	जिहीते	जिहाते	जिहते
म० पु०—	जिहीषे	जिहाथे	जिहीध्वे
उ० पु०—	जिहे	जिहीवहे	जिहीमहे

(२) लिट्—जहे। (३) लुट्—हाता। (४) लृट्—हास्यते। (५) लोट्—जिहीताम्। (६) लङ्—अजिहीत। (७) हा+विधिलिङ् (=त, शप्=श्लु, द्वित्व—'श्लौ' अभ्यासकार्य)—जहा त (सीयुट्=सीय्, 'य्' का लोप—'लोपो व्योर्वलि', 'स्' का लोप—'लिङः सलोपोऽनन्त्यस्य' 'आ' का लोप—'श्नाभ्यस्तयोरातः')=जिहीत। (८) आशीर्लिङ्—हासीष्ट। (९) लुङ्—अहास्त। (१०) लृङ्—अहास्यत।

जुहोत्यादि गण की उभयपदी धातुओं की रूपसिद्धि प्रदर्शित की जा रही है—

√डुभृञ् (भृ) धातु का अर्थ—'धारण करना, पालन करना' है।

बभ्रे। भर्ता। भरिष्यति। भरिष्यते। बिभर्तु। बिभृहि। बिभराणि। बिभृताम्। बिभृध्वम्। अबिभः। अबिभृताम्। अबिभरुः। अबिभृत। बिभृयात्। बिभ्रीत।

वत्वे 'सार्वधातुकार्धधातुकयोः', इति गुणे अकारे रपरे च कृते 'बिभर्ति' इति। **बिभराञ्चकार** इति। भृञ्धातोर्लिटि 'भीह्रीभृहुवामि'त्यामि, श्लुवद्भावे, द्वित्वेऽभ्यासकार्ये 'भृञामित्' इतीत्वे धातोः गुणे रपरे च कृते 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परक-कृञोऽनुप्रयोगे लिटः स्थाने तिपि, तिपो णल्यनुबन्धलोपे, द्वित्वेऽभ्यासत्वे, अत्वे, रपरत्वे, हलादिशेषे, 'कुहोश्चुः' इति चुत्वेन ककारस्य चकारे 'सार्वधातुकार्धधातुकयोः' इति गुणे, रपरे उपधावृद्धौ, मकारस्य अनुस्वारे 'वा पदान्तस्ये'ति परसवर्णे बिभराञ्चकार इति। आमोऽभावपक्षे तु—

---

(१) भृ+लट् (=तिप्=ति, शप्, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ऋ=इ—'भृञामित्' रपर, हलादिशेष, 'भ्'='ब्'—'अभ्यासे चर्च', 'ऋ'='अ'—गुण—'सार्वधातु०' रपर)=बिभर्ति। (२) लट् प्र० पु० द्विव० में 'तस्' के अपित् होने के कारण 'ङित्' होने से गुण का निषेध हो जाता है—बिभृतः।

√भृ धातु, लट् लकार के रूप (परस्मैपद)

	एक०	द्वि०	बहु०
प्र० पु०—	विभर्ति	बिभृतः	बिभ्रति
म० पु०—	विभर्षि	बिभृथः	बिभृथ
उ० पु०—	बिभर्मि	बिभृवः	बिभृमः

आत्मनेपद के सभी प्रत्यय 'अपित्' होने से ङिद्वत् होने के कारण उनमें गुण का निषेध हो जाता है।

√भृ धातु, लट् लकार आत्मनेपद के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	बिभृते	बिभ्राते	बिभ्रते
म० पु०—	बिभृषे	बिभ्राथे	बिभृध्वे
उ० पु०—	बिभ्रे	बिभृवहे	बिभृमहे

(३) √भृ+लिट् ('आम्'—'भीह्रीभृहुवाम्' श्लुवद्भाव, द्वित्व, अभ्यास संज्ञा, इत्व—'भृञामित्' रपर, हलादिशेष, 'भ्'='ब्'—'अभ्यासे चर्च' गुण, रपर, लिट् का लुक्—'आमः')—बिभराम् (लिट्परक कृ का अनुप्रयोग; लिट्=तिप्=णल्=अ, द्वित्व, अत्व, रपर, हलादिशेष, गुण, रपर, उपधावृद्धि; म्=-अनुस्वार, परसवर्ण)=बिभराञ्चकार। 'आम्' के अभावपक्ष में=बभार। आत्मनेपद में—बिभराञ्चक्रे। 'आम्' के अभाव में—बभ्रे। (४) लुट्—भर्ता। (५) लृट् में 'ऋद्धनोः स्ये' से 'इट्' होता है। भरिष्यति, भरिष्यते। (६) लोट् प्र० पु० ए० व०—बिभर्तु। (७) लोट्—म० पु० एकव० बिभृहि। (८) लोट् उ० पु० एकव०—बिभराणि। आत्मनेपद में बिभृताम्, बिभ्राताम्, बिभ्रताम् इत्यादि। (९) लङ् लकार के प्रथम और मध्यम पुरुष के एकवचन में गुण होने से अपृक्तसंज्ञक 'त्' और 'स्' का 'हल्ङ्याब्भ्यः' से लोप होता है। 'र्' का विसर्ग भी होता है। बहुवचन 'झि' में अभ्यस्त होने से झि=जुस् और 'जुसि च' से गुण।

'रिङ्शये'ति रिङ् । भ्रियात् । (उश्च) भृषीष्ट । अभार्षीत् । 'ह्रस्वादङ्गात्' । अभृत । अभरिष्यत् । अभरिष्यत । डुदाञ् दाने । प्रणिददाति । दत्तः । ददति । दत्ते । ददाते । ददते । ददौ । ददे । दाता । दास्यति । दास्यते । ददातु । 'घ्वसोरेद्धावभ्यासलोपश्च' ।

धातोर्द्वित्वेऽभ्यासत्वे 'उरत्' इत्यत्वे, रपरे, हलादिशेषे 'अभ्यासे चर्च' इति भस्य बत्वे परत्वात्सार्वधातुकगुणे रपरे 'अत उपधायाः' इति वृद्धौ 'बभार' इति । **अबिभ इति ।** भृञ्धातोर्लङि, तत्स्थाने तिप्यनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमेऽनुबन्धलोपे 'इतश्चे'ति इकारलोपे, शपि, शपः श्लौ, 'श्लौ' इत्यनेन धातोर्द्वित्वे 'अ भृ भृ त्' इति जाते 'भृञामित्' इत्यभ्यासऋकारस्य इत्वे रपरत्वे हलादिशेषे 'अभ्यासे चर्च' इति जश्त्वेन भकारस्य बकारे 'सार्वधातुकार्धधातुकयोः' इत्यनेन ऋकारस्य गुणे अकारे, रपरे 'हल्ङ्याब्भ्यो दीर्घात्०' इत्यनेन तकारस्य लोपे रकारस्य विसर्गे च कृते 'अबिभः'

√भृ धातु, लङ् लकार (परस्मैपद) के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अबिभः	अबिभृताम्	अबिभरुः
म० पु०—	अबिभः	अबिभृतम्	अबिभृत
उ० पु०—	अबिभरम्	अबिभृव	अबिभृम

(आत्मनेपद)

	एक०	द्वि०	बहु०
प्र० पु०—	अबिभृत	अबिभ्राताम्	अबिभ्रत
म० पु०—	अबिभृथाः	अबिभ्राथाम्	अबिभृध्वम्
उ० पु०—	अबिभ्रि	अबिभृवहि	अबिभृमहि

(१०) विधिलिङ् (परस्मैपद) में—बिभृयात् । आत्मनेपद में—बिभ्रीत । (११) आशीर्लिङ् (परस्मैपद में) 'रिङ्शय०' से रिङ् होकर—भ्रियात् । आत्मनेपद में 'उश्च' से सीयुट् के कित् होने के कारण गुण का निषेध—भृषीष्ट । (१२) √भृ=लुङ् (=तिप्=ति, अट्, च्लि, च्लि=सिच्=स्, ईट्—'ई'—अस्तिसिचोऽपृक्ते', ऋ='आ'—वृद्धि—'सिचि वृद्धिः परस्मैपदेषु' रपर, इकारलोप, षत्व) =अभार्षीत् । आत्मनेपद में 'ह्रस्वादङ्गात्' से 'सिच्' का लोप हो जाता है—अभृत । (१३) लृङ् में—अभरिष्यत् । अभरिष्यत ।

√डुदाञ् (दा) धातु का अर्थ—'देना' है । (१) √दा+लट् (=तिप्=ति, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व)=ददाति । आत्मनेपद में—(त, 'टि'=एत्व; द्वित्व, अभ्यास-कार्य, ह्रस्व, 'आ' का लोप='श्नाभ्यस्तयोरातः', 'द्'='त्'—'खरि च') =दत्ते ।

√दा धातु लट् लकार (परस्मैपद) के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	ददाति	दत्तः	ददति
म० पु०—	ददासि	दत्थः	दत्थ
उ० पु०—	ददामि	दद्वः	दद्मः

(आत्मनेपद)

	एक०	द्वि०	बहु०
प्र० पु०—	दत्ते	ददाते	ददते
म० पु०—	दत्से	ददाथे	दद्ध्वे
उ० पु०—	ददे	दद्वहे	दद्महे

देहि। दत्ताम्। अददात्। अदत्ताम्। अददुः। अदत्त। दद्यात्। ददीत। 'एर्लिङि'। देयात्। दासीष्ट। 'गातिस्थे'ति सिचो लुक्। अदात्। अदाताम्। अदुः। **(७२६) स्थाघ्वोरिच्च १।२।१७।** अनयोरिदन्तादेशः स्यात्, सिच्च कित्स्यादात्मनेपदेषु।

इति रूपम्। **अदात् इति।** दाधातोर्लुङि, तत्स्थाने प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे, अडागमेऽनुबन्धलोपे, 'च्लि लुङि' इति च्लौ, 'च्लेः सिच्' इति च्लेः स्थाने सिच्यनुबन्धलोपे 'अदास् ति' इति जाते 'इतश्चे'तीकारलोपे 'दाधाघ्वदाप्' इत्यनेन घुसंज्ञायाम् 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लोपे 'अदात्' इति।

(७२६) **स्थाघ्वोरिच्चेति।** अत्र 'असंयोगाल्लिट् कित्' इत्यतः किदिति, 'हनः

---

(२) √दा+लिट् (=तिप्=णल्, द्वित्व, अभ्यास संज्ञा, ह्रस्व, 'णल्'='औ'—'आत औ णलः' आ+औ='औ'—'वृद्धि')=ददौ। आत्मनेपद पक्ष में—ददे। (३) लुट्—दाता। (४) लृट्—दास्यति, दास्यते। (५) लोट्—ददातु। (६) √दा+लोट् (=सिप्=सि=हि, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व, आ='ए'—एत्व तथा अभ्यास का लोप—'घ्वसोरेद्धावभ्यासलोपश्च'=देहि। आत्मनेपद में—दत्ताम्, ददाताम्, ददताम् इत्यादि।

√दा धातु, लोट् लकार (परस्मैपद) के रूप

एक०	द्वि०	बहु०
प्र० पु०—ददातु, दत्तात्	दत्ताम्	ददतु
म० पु०—देहि	दत्तम्	दत्त
उ० पु०—ददानि	ददाव	ददाम

(आत्मनेपद)

प्र० पु०—दत्ताम्	ददाताम्	ददताम्
म० पु०—दत्स्व	ददाथाम्	दद्ध्वम्
उ० पु०—ददै	ददावहै	ददामहै

(७) √दा+लङ् (=तिप्=ति, अट्, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व, इकारलोप—'इतश्च')=अददात्।

+दा धातु, लङ् लकार (परस्मैपद) के रूप

एक०	द्वि०	बहु०
प्र० पु०—अददात्	अदत्ताम्	अददुः
म० पु०—अददाः	अदत्तम्	अदत्त
उ० पु०—अददम्	अदद्व	अदद्म

(आत्मनेपद)

प्र० पु०—अदत्त	अददाताम्	अददत
म० पु०—अदत्थाः	अददाथाम्	अदद्ध्वम्
उ० पु०—अददि	अदद्वहि	अदद्महि

(८) विधिलिङ्—दद्यात्। आत्मनेपद—ददीत। (९) आशीर्लिङ्—देयात्। आत्मनेपद-दासीष्ट। (१०) √दा+लुङ् (=तिप्=ति, अट्, च्लि=सिच्='स्' 'दाधाघ्वदाप्' से घुसंज्ञा, 'गातिस्था०' से सिच् का लुक्, 'इ' का लोप—'इतश्च')=अदात्, अदाताम्, अदुः।

(७२६) पद—स्थाघ्वोः, इत् च। **अनुवृत्ति**—कित्, सिच्, आत्मनेपदेषु। **विधिसूत्र।**

अदित । अदास्यत् । अदास्यत । डुधाञ् धारणपोषणयोः । दधाति । (७२७) **दधस्तथोश्च ८।२।३८ ।** द्विरुक्तस्य झषन्तस्य धाञो बशो भष्, तथयोः स्ध्वोश्च परतः । धत्तः । दधति । दधासि । धत्थः । धत्ते । दधाते । धत्से । धद्ध्वे । 'घ्वसोरि'त्येत्वम् ।

सिच्' इत्यतः सिजिति चानुवर्तते । अत आह—**अनयोरित्यादिना** । **अदित इति** । दाधातोर्लुङि, लुङः स्थाने आत्मनेपदे तप्रत्यये, च्लौ, च्लेः स्थाने सिचि 'दाधाघ्वदाप्' इति घुसंज्ञकत्वात् 'स्थाघ्वोरिच्चे'ति इदन्तादेशे सिच कित्त्वे च 'ह्रस्वादङ्गात्' इति सिचः सलोपे 'अदित' इति ।

(७२७) **दधस्तथोश्चेति** । 'दधः' इति षष्ठ्यन्तम् । 'एकाचो बशो' इत्यतो 'बशो भष् झषन्तस्य स्ध्वोः' इत्यनुवर्तते । तदाह—**द्विरुक्तस्येत्यादिना** । **धत्तः** । धाधातोर्लटि, तत्स्थाने तसि, शपः श्लुत्वे 'श्लावि'ति द्वित्वेऽभ्यासत्वे, ह्रस्वे, 'अभ्यासे चर्चे' इति धकारस्य दकारे **'दधा तस्'** इति जाते 'दधस्तथोश्चे'ति दस्य धत्वे 'श्नाभ्यस्तयोरातः' इत्याकारलोपे 'खरि चे'ति धस्य तत्वे सस्य रुत्वे विसर्गे च कृते 'धत्तः' इति । **धेहि** । धाधातोर्लोटि, मध्यमपुरुषैकवचने सिपि, 'सेर्ह्यपिच्चे'ति सेर्हि आदेशे, शपि, शपः

मूलार्थ—आत्मनेपद के परवर्ती रहने पर 'स्था' धातु और घुसंज्ञक धातु को इदन्त आदेश होता है और धातु से उत्तरवर्ती सिच् कित् (किद्वत्) होता है । अदित इत्यादि ।

विमर्श—प्रकृत सूत्र में 'असंयोगाल्लिट्' (१।२।५) से 'कित्' तथा 'हनः सिच्' (१।२।१४) से 'सिच्' की अनुवृत्ति आती है । अतः 'स्था' और घुसंज्ञक धातुओं को इकार अन्तादेश होता है तथा सिच् कित् होता है, आत्मनेपदसंज्ञक प्रत्यय के परे रहते ।

उदाहरण—(१) √दा+लुङ् (=त, च्लि, च्लि=सिच्, घुसंज्ञा, 'आ'='इ' 'सिच्' को कित्—'स्थाघ्वोरिच्च', 'स्' का लोप—'ह्रस्वादङ्गात्')=अदित । (२) लृङ्—अदास्यत् । आत्मनेपद में—अदास्यत ।

√डुधाञ् (धा॰) धातु का अर्थ—'धारण करना, पोषण करना' है ।

(१) √धा+लट् (=तिप्=ति, शप्=श्लु, द्वित्व—'श्लौ' अभ्यास संज्ञा, ह्रस्व, 'ध्'= 'द्'—'अभ्यासे चर्च')=दधाति ।

(७२७) **पद**—दधः, तथोः, च । **अनुवृत्ति**—बशो, भष्, झषन्तस्य, स्ध्वोः । **विधिसूत्र** ।

मूलार्थ—द्विरुक्त झषन्त 'धा' धातु के बश् के स्थान में भष् होता है; त-थ और स्-ध्व के परवर्ती रहते । धत्त इत्यादि ।

विमर्श—यहाँ 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८।२।३७) से 'बशो भष्, झषन्तस्य स्ध्वोः' की अनुवृत्ति आती है । सूत्र में 'दधः' डुधाञ् धातु का द्विर्वचन निर्देश है । तदनुसार—"द्विरुक्त (जिसको द्वित्व किया गया हो) झषन्त धाञ् धातु के बश् को भष् होता है; तकार, थकार; सकार और ध्व के परवर्ती रहने पर ।"

उदाहरण—(१) √धा+लट् (=तस्, शप्=श्लु, द्वित्व, अभ्यास संज्ञा, ह्रस्व, 'ध्'= 'द्'—'अभ्यासे चर्च') दधा+तस् ('द्'='ध्'—'दधस्तथोश्च', 'आ' का लोप 'श्नाभ्यस्तयोरातः', 'ध्'='त्'—'खरि च', स्=र्=:)=धत्तः । (२) लट् प्र॰ पु॰ बहुव॰—दधति (आकारलोप) । यहाँ भष्भाव के अतिरिक्त अन्य रूपों की साधनिका 'दा' धातु के समान ही है ।

धेहि। अदधात् । अधत्ताम्। अदधुः। अदधाः। अधत्तम्। अधत्त। अदधाम्। अदध्व। अदध्म। अधत्त। अदधाताम्। अदधत। अधत्थाः। अदधाथाम्। अधद्ध्वम्। अदधि। अदध्वहि। अदध्महि। दध्यात्। दधीत। दधीयाताम्। धेयात्। धासीष्ट। अधात्। अधाताम्। अधित। अधिषाताम्। अधास्यत्। अधास्यत। णिजिर् शौचपोषणयोः। **(७२८) निजां त्रयाणां गुणः श्लौ ७।४।७५।** णिज्-विज्-विषामभ्यासस्य गुणः स्याच्छ्लौ। नेनेक्ति। नेनिक्तः। नेनिजति। नेनिक्ते। निनेज।

श्लौ, द्वित्वेऽभ्यासत्वे ह्रस्वे 'दाधाघ्वदाप्' इति घुसंज्ञायाम् 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यनेन अभ्यासलोपे अनभ्यासस्य एत्वे च कृते 'धेहि' इति सिद्धम्। अधादिति। दाधातोर्लुङि तिपि, अटि, तिप इकारलोपे, च्लौ, च्लेः सिचि 'गातिस्थे'ति सिचो लोपे 'अधादि'ति।

(७२८) **निजामिति।** 'अत्र लोपोऽभ्यासस्ये'त्यत 'अभ्यासस्ये'त्यनुवर्तते। निजामिति बहुवचनात् 'णिजिर्-विजिर्-विष्लृ' इति धातूनां ग्रहणम्। **नेनेक्ति इति।** णिजिर्धातोर्लटि, तिपि 'णो नः' इति णस्य नकारे 'इर इत्संज्ञा वाच्या' इति 'इर्' इत्यस्येत्संज्ञायां लोपे 'निज् + ति' इति जाते, शपि, शपः श्लौ, धातोर्द्वित्वेऽभ्यासकार्ये

√धा धातु लट् लकार (परस्मैपद) के रूप

	एक०	द्वि०	बहु०
प्र० पु०	दधाति	धत्तः	दधति
म० पु०	दधासि	धत्थः	धत्थ
उ० पु०	दधामि	दध्वः	दध्मः

(आत्मनेपद)

	एक०	द्वि०	बहु०
प्र० पु०	धत्ते	दधाते	दधते
म० पु०	धत्से	दधाथे	दद्ध्वे
उ० पु०	दधे	दध्वहे	दध्महे

(३) लोट् म० पु० एक०—देहि ('घ्वसोरेद्धावभ्यासलोपश्च' से एत्व तथा अभ्यास का लोप)। (४) लङ्—अदधात इत्यादि। आत्मनेपद में—अधत्त इत्यादि। (५) विधिलिङ्, परस्मैपद—दध्यात। आत्मनेपद—दधीत, दधीयाताम् इत्यादि। (६) आशीर्लिङ्, परस्मैपद—धेयात। आत्मनेपद—धासीष्ट। (७) लुङ्, परस्मैपद—अधात, अधाताम् इत्यादि। आत्मनेपद-अधित, अधिषाताम् इत्यादि। (८) लृङ्, परस्मैपद—अधास्यत। आत्मनेपद—अधास्यत।

√णिजिर् (निज्) धातु का अर्थ—'धोना तथा पोषण करना' है।

(७२८) पद—निजाम्, त्रयाणाम्, गुणः, श्लौ। **अनुवृत्ति**—अभ्यासस्य। **विधिसूत्र।**

मूलार्थ—श्लु के विषय में णिज्, विज् और विष् धातु के अभ्यास को गुण होता है।

विमर्श—'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' पद की अनुवृत्ति आती है। सूत्रोक्त 'त्रयाणाम्' पद से 'विजिर् पृथग्भावे' (=अलग होना), 'णिजिर् शौचपोषणयोः' (=शुद्ध करना व पोषण करना) तथा 'विष्लृ व्याप्तौ' (व्याप्त होना) धातुओं का ग्रहण होता है। तदनुसार—"णिजिर् आदि तीन धातुओं के अभ्यास को श्लु होने पर गुण होता है।"

निनिजे । नेक्ता२ । नेक्ष्यति । नेक्ष्यते । नेनेक्तु । नेनिग्धि । (७२९) **नाभ्यस्तस्याचि पिति सार्वधातुके ७।३।८७।** अभ्यस्तस्याचि पिति सार्वधातुके लघूपधगुणो न । नेनिजानि । नेनिक्ताम् । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । अनेनिजम् । अनेनिक्त । नेनिज्यात् । नेनिजीते । निज्यात् । निक्षीष्ट । अनिजत् । अनैक्षीत् । अनिक्त । अनेक्ष्यत् । अनेक्ष्यत । एवं विजिर् पृथग्भावे । विष्लृ व्याप्तौ । इति जुहोत्यादिः ।

इति जुहोत्यादिप्रकरणम् ।

'निजां त्रयाणां गुणः श्लौ' इत्यनेनाभ्यासस्य गुणे एकारे, 'चोः कुः' इति जस्य गत्वे, 'खरि चे'ति गस्य कत्वे 'पुगन्तलघूपधस्य चे'ति गुणे 'नेनेक्ति' इति ।

(७२९) **नाभ्यस्तस्याचीति ।** 'पुगन्त०' इत्यतो लघूपधस्येति, 'मिदेर्गुणः' इत्यतो गुण इति चानुवर्तते । अत आह—**अभ्यस्तस्याचि इत्यादिना । नेनिजानि ।** निज्धातोर्लोटि, उत्तमपुरुषैकवचने मिपि, अनुबन्धलोपे 'मेर्निः' इति मेर्न्यादेशे 'आडुत्तमस्य पिच्च' इति आटि, शपः श्लौ, द्वित्वेऽभ्यासकार्ये जकारलोपे 'निजां त्रयाणां गुणः श्लौ' इत्यभ्यासस्याचो गुणे, 'पुगन्तलघूपधस्य चे'ति गुणे प्राप्ते 'नाभ्यस्तस्याचि पिति

उदाहरण—(१) √णिजिर्+लट् ('इर्' की इत्संज्ञा, लोप—'इर इत्संज्ञा वाच्या' 'ण्'= 'न्'—'णो नः' ल्=तिप्=ति, शप्=श्लु, द्वित्व, अभ्यासकार्य)—निनिज् ति ('इ'='ए'—गुण—'निजां त्रयाणां गुणः श्लौ,' 'ज्'='ग्'—'चोः कुः' 'ग्'='क्'—'खरि च', गुण—'पुगन्त०')=नेनेक्ति । (२) लट् प्र० पु० द्वि० में—नेनिक्तः (यहाँ 'तस्' के 'ङित्' होने से गुण नहीं होता) । (३) लट्, प्र० पु० बहु० में—नेनिजति ('अदभ्यस्तात्' से 'झ्'='अत्') ।

√णिजिर् धातु, लट् लकार (परस्मैपद) के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	नेनेक्ति	नेनिक्तः	नेनिजति
म० पु०—	नेनेक्षि	नेनिक्थः	नेनिक्थ
उ० पु०—	नेनेज्मि	नेनिज्वः	नेनिज्मः

(आत्मनेपद)

	एक०	द्वि०	बहु०
प्र० पु०—	नेनिक्ते	नेनिजाते	नेनिजते
म० पु०—	नेनिक्षे	नेनिजाथे	नेनिग्ध्वे
उ० पु०—	नेनिज्ञे	नेनिज्वहे	नेनिज्महे

(४) लिट्, परस्मैपद—निनेज । आत्मनेपद—निनिजे । (५) लुट्—नेक्ता । (६) लृट्, परस्मैपद—नेक्ष्यति । **आत्मनेपद**—नेक्ष्यते । (७) लोट्, परस्मैपद प्र० पु० एक०—नेनेक्तु, नेनिक्तात् । (८) लोट्, म० पु० एक०—नेनिग्धि (झलन्त होने से 'हि'='धि'—'हुझल्भ्यो हेर्धिः') ।

(७२९) पद—न, अभ्यस्तस्य, अचि, पिति, सार्वधातुके । **अनुवृत्ति**—लघूपधस्य, गुणः । **विधिसूत्र।**

मूलार्थ—अजादि पित् सार्वधातुक के परवर्ती रहते अभ्यस्तसंज्ञक धातु को लघूपध गुण नहीं होता ।

अथ दिवादिप्रकरणम्

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । (७३०) **दिवादिभ्यः श्यन् ३।१।६९ ।** दिवादिभ्यः श्यन्प्रत्ययः स्यात्कर्तरि सार्वधातुके । शपो-

---

सार्वधातुके' इति तन्निषेधे 'नेनिजानि' इति । अनिजर्दिति । निज्धातोर्लुङि तिपि, च्लौ, 'इरितो वा' इति विभाषया च्लेरङि तिप इकारलोपे 'अनिजत्' इति । अङभाvपक्षे तु—च्लेः सिच्यनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इति ईटि, 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'चोः कुः' इति कुत्वेन गत्वे, 'खरि चे'ति गस्य कत्वे, सिचः सस्य षत्वे, क्ष् संयोगे क्षकारे, अटि च 'अनैक्षीदि'ति ।

इति जुहोत्यादिः ।

अथ श्यन्विकरणान् धातून् निरूपयितुमुपक्रमते—

(७३०) **दिवादिभ्य इति ।** 'कर्तरि शप्' इत्यतः कर्तरीति, 'सार्वधातुके यगि'-

---

विमर्श—यहाँ 'पुगन्तलघूपधस्य च' (७।३।८६) से 'लघूपधस्य' तथा 'मिदेर्गुणः' (७।३।८२) से 'गुणः' पद की अनुवृत्ति आती है । अतः "अजादि पित् सार्वधातुक के परे होने पर अभ्यस्तसंज्ञक धातु को लघूपध गुण नहीं होता ।"

उदाहरण—(१) √निज्+लोट् (=मिप्=मि=नि—'मेर्निः' 'आट्'='आ'—'आडुत्तमस्य पिच्च', शप्, शप्=श्लु, द्वित्व, अभ्यासकार्य='ज्' का लोप)—नि निज् आ नि ('इ'='ए'—गुण—'निजां त्रयाणाम्०', 'पुगन्तलवूपधस्य च' से प्राप्त गुण का 'नाभ्यस्तस्याचि०' से निषेध)=नेनिजानि ।

आत्मनेपद में—(१) नेनिक्ताम् । (२) लङ्, परस्मैपद प्र० पु०—अनेनेक्, अनेनिक्ताम्, अनेनिजुः । उ० पु० एक०—अनेनिजम् । आत्मनेपद—अनेनिक्त । (३) विधिलिङ्, परस्मैपद—नेनिज्यात् । आत्मनेपद—नेनिजीत । (४) आशीर्लिङ्, परस्मैपद—निज्यात् । आत्मनेपद—निक्षीष्ट । (५) √निज्+लुङ् (=तिप्=ति, च्लि, च्लि=अङ्='अ' विकल्प से—'इरितो वा' इकारलोप—'इतश्च')=अनिजत् । 'अङ्' के अभावपक्ष में (च्लि=सिच्='स्', ईट्, वृद्धि—'वदव्रजहलन्तस्याचः', 'ज्'='ग्'—'चोः कुः' 'ग्'='क्'—'खरि च' षत्व, क्+ष्=क्ष्, अट्)=अनैक्षीत् । आत्मनेपद में—√निज्+लुङ् (=त, अट्, च्लि, च्लि=सिच्='स्', 'स्' का लोप—'झलो झलि', 'ज्'='ग्'—'चोः कुः', 'ग्'='क्'—'खरि च')=अनिक्त । (६) लृङ्, परस्मैपद—अनेक्ष्यत् । आत्मनेपद—अनेक्ष्यत । इसी प्रकार विजिर् (=अलग होना) और विष्लृ (=व्याप्त होना) इत्यादि धातुओं के रूप भी जानने चाहिए ।

जुहोत्यादि प्रकरण समाप्त ।

'श्लु' विकरणवाली धातुओं की रूपसिद्धि प्रदर्शित करने के अनन्तर अब 'श्यन्' (य) विकरण वाली धातुओं के रूपों की साधनिका का विवेचन किया जा रहा है—

√दिवु (दिव्) धातु का अर्थ—"क्रीडा, जुआ खेलना, व्यवहार, चमकना, स्तुति करना, प्रसन्न होना, नशा करना, सोना, इच्छा करना और जाना है ।"

(७३०) पद—दिवादिभ्यः, श्यन् । **अनुवृत्ति**—कर्तरि, सार्वधातुके । **विधिसूत्र ।**

ऽपवादः। ‘हलि चे’ति दीर्घः। दीव्यति। दिदेव। देविता। देविष्यति। दीव्यतु। अदीव्यत्। दीव्येत्। दीव्यात्। अदेवीत्। अदेविष्यत्। एवं षिवु तन्तुसन्ताने।

त्यतः सार्वधातुके इति चानुवर्तते। इत्यभिप्रेत्य आह—**दिवादिभ्यः श्यन्नित्यादि। दीव्यति।** उकारेत्संज्ञक-दिवुधातोः लटि प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे, प्राप्तं शपं प्रबाध्य ‘दिवादिभ्यः श्यन्’ इति श्यन्प्रत्ययेऽनुबन्धलोपे ‘हलि चे’त्यनेन इकारस्य दीर्घे ‘दीव्यति’ इति सिद्धम्।

मूलार्थ—कर्त्रर्थक सार्वधातुक के परवर्ती रहते दिवादिगण पठित धातुओं से श्यन् प्रत्यय होता है।

विमर्श—प्रकृत सूत्र में ‘कर्तरि शप्’ (१।३।६८) से ‘कर्तरि’ तथा ‘सार्वधातुके यक्’ (१।३।६७) से ‘सार्वधातुके’ की अनुवृत्ति आती है। तदनुसार—“कर्त्रर्थक सार्वधातुक प्रत्यय के परे रहते दिवादिगण की धातुओं से श्यन् प्रत्यय होता है।”

उदाहरण—(१) √दिव्+लट् (=तिप्=ति, सार्वधातुक संज्ञा, प्राप्त ‘शप्’ का बाधकर श्यन्=‘य’—‘दिवादिभ्यः श्यन्’, ‘इ’=‘ई’—दीर्घ—‘हलि च’)=दीव्यति। इसी प्रकार—दीव्यतः, दीव्यन्ति इत्यादि रूप बनते हैं। (२) लिट् प्र० पु० एकव०—दिदेव।

√दिव् धातु लिट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	दिदेव	दिदिवतुः	दिदिवुः
म० पु०	दिदेविथ	दिदिवथुः	दिदिव
उ० पु०	दिदेव, दिदिव	दिदिविव	दिदिविम

सेट् धातु होने से वलादि आर्धधातुक को इट् का आगम होता है। (३) लुट्—देविता। (४) लृट्—देविष्यति। लोट्, लङ् और विधिलिङ् में श्यन् होने पर ‘हलि च’ से दीर्घ होता है। (५) लोट्—दीव्यतु। (६) लङ्—अदीव्यत्। (७) विधिलिङ्—दीव्येत्। (८) आशीर्लिङ्—दीव्यात्। (९) √दिव्+लुङ् (=तिप्=ति, अट्, इकारलोप, च्लि, च्लि=सिच्=‘स्’ इट्—‘आर्धधातुकस्येड् वलादेः’, ईट्=‘अस्तिसिचोऽपृक्ते’, ‘स्’ का लोप—‘इट ईटि’ लघूपध गुण)=अदेवीत्।

√दिव् धातु लुङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	अदेवीत्	अदेविष्टाम्	अदेविषुः
म० पु०	अदेवीः	अदेविष्टम्	अदेविष्ट
उ० पु०	अदेविषम्	अदेविष्व	अदेविष्म

(१०) लृङ्—अदेविष्यत्।

√षिवु (=सिव्) धातु का अर्थ—‘सिलाई करना, कपड़ा बुनना’ है। इसके रूप भी पूर्वोक्त ‘दिव्’ धातु के समान बनते हैं। लट्—सीव्यति। लिट्—सिषेव। लुट्—सेविता। लृट्—सेविष्यति। लोट्—सीव्यतु। लङ्—असीव्यत्। विधिलिङ्—सीव्येत्। आशीर्लिङ्—सीव्यात्। लुङ्—असेवीत्। लृङ्—असेविष्यत्।

(७३१) सिवादीनां वाऽड्व्यवायेऽपि ८।३।७१ । परिनिविभ्यः परेषामेषामड्व्यवायेऽपि वा सस्य षः । पर्यषीव्यत् । पर्यसीव्यत् । नृती गात्रविक्षेपे । नृत्यति । ननर्त । नर्तिता । **(७३२) सेऽसिचि कृतचृतच्छृदतृदनृतः ७।२।५७ ।** एभ्यः सिज्भिन्नस्य सादेरार्धधातुकस्येड् वा स्यात् । नर्तिष्यति–नर्त्स्यति । नृत्यात् । अनर्तीत् । अनर्तिष्यत्–अनर्त्स्यत् । त्रसी उद्वेगे । 'वा भ्राशे'ति श्यन् वा । त्रस्यति–त्रसति । तत्रास ।

(७३१) सिवादीनामिति । 'अपदान्तस्य मूर्द्धन्यः' इत्यधिकृतम् । 'परिनिविभ्यः' इत्यतः 'परिनिविभ्यः' इत्यनुवर्तते । तदाह—**सस्य ष इति । पर्यषीव्यदिति ।** 'परि+असीव्यत्' इत्यवस्थायां 'सिवादीनां वाऽड्व्यवायेऽपि' इति वैभाषिके सस्य षत्वे 'पर्यषीव्यत्' इति । षत्वाभावे—'पर्यसीव्यदि'ति ।

(७३२) सेऽसिचि इति । 'उदितो वा' इत्यतो वेति, 'आर्धधातुकस्येडि'ति चानुवर्तते । तदाह—**एभ्य इत्यादि । नर्तिष्यति इति ।** ईकारेत्संज्ञकनृतीधातोर्लृटि तत्स्थाने तिपि अनुबन्धलोपे 'स्यतासी लृलुटोः' इति स्यप्रत्यये 'नृत् स्य ति' इति जाते

(७३१) पद—सिवादीनाम्, वा, अट्, व्यवाये, अपि । **अनुवृत्ति**—परिनिविभ्यः । **विधिसूत्र ।**

मूलार्थ—परि, नि और वि से परवर्ती सिवादि धातुओं के सकार को अट् के व्यवधान में भी विकल्प से षत्व होता है । पर्यषीव्यत् इत्यादि ।

विमर्श—'अपदान्तस्य मूर्द्धन्यः' का अधिकार है । 'परिनिविभ्यः' (८।३।७१) से 'परिनिविभ्यः' की अनुवृत्ति आती है । तदनुसार—"परि, नि और वि' उपसर्गों से परे सिवादि (सिवु, सह, सुट्, स्तु और स्वञ्ज) के 'स्' के स्थान में विकल्प से 'अट्' के व्यवधान में भी षकार होता है ।"

उदाहरण—(१) परि+असीव्यत् ('स्'='ष्'—विकल्प से—'सिवादीनाम्०') = पर्यषीव्यत् । षत्व के अभावपक्ष में—पर्यसीव्यत् ।

√नृती (=नृत्) धातु का अर्थ 'नाचना' है । (१) लट्—नृत्यति । (२) नृत्+लिट् (=तिप्=णल्='अ', द्वित्व, अभ्यास संज्ञा, 'ऋ'='अ'—'उरत्' रपर, हलादिशेष)—न नृत् अ (गुण, रपर)=ननर्त । (३) लुट्—नर्तिता (वलादि आर्धधातुक को इट्) ।

(७३२) पद—से, असिचि, कृतचृतच्छृदतृदनृतः । **अनुवृत्ति**—वा, आर्धधातुकस्येड् । **विधिसूत्र ।**

मूलार्थ—कृत्, चृत्, छृद्, तृद् तथा नृत् धातुओं से परवर्ती सिच्-भिन्न सकारादि आर्धधातुक को विकल्प से 'इट्' का आगम होता है । नर्तिष्यति, नर्त्स्यति इत्यादि ।

विमर्श—'उदितो वा' (७।२।५६) से 'वा' तथा—'आर्धधातुकस्येड् वलादेः' (७।२।३५) से 'आर्धधातुकस्येड्' की अनुवृत्ति आती है । इस प्रकार—"कृती, चृती, उच्छृदिर्, उतृदिर् तथा नृती धातुओं से उत्तरवर्ती सिच्-भिन्न सकारादि आर्धधातुक को विकल्प से इट् का आगम होता है ।"

उदाहरण—(१) √नृत्+लृट् (=तिप्=ति, स्य)—नृत् स्य ति (आर्धधातुक संज्ञा, विकल्प से इट्='इ', लघूपध गुण, रपर, षत्व)=नर्तिष्यति । इट् के अभावपक्ष में—नर्त्स्यति । (२) आशीर्लिङ्—नृत्यात् । (३) √नृत्+लुङ् (=तिप्=ति, च्लि=सिच्='स्' इट्,

(७३३) वा जॄभ्रमुत्रसाम् ६।४।१२४ । एषां किति लिटि सेटि थलि च एत्वाभ्यासलोपौ वा स्तः । त्रेसतुः-तत्रसतुः । त्रेसिथ-तत्रसिथ । त्रसिता । शो तनूकरणे । **(७३४) ओतः श्यनि ७।३।७१ ।** ओतो लोपः स्यात् श्यनि । श्यति । श्यतः । श्यन्ति । 'आदेच उपदेशेऽशिति' । शशौ । शशतुः । शशुः । शाता । शास्यति । श्यतु । अश्यत् ।

आर्धधातुकसंज्ञायां 'सेऽसिचि कृतचृतच्छृदतृदनृतः' इत्यनेन विकल्पेन इडागमेऽनुबन्धलोपे 'पुगन्तलघूपधस्य चे'ति उपधागुणे रपरे, सस्य षत्वे 'नर्तिष्यति' इति । इडभावपक्षे—'नर्त्स्यति' इति सिद्धम् ।

(७३३) वा जॄभ्रमुत्रसामिति । अत्र 'अत एकहल्मध्ये' इत्यतो लिटि इति, 'थलि च सेटि' इति, 'घ्वसोरेद्धावि'त्यत एदिति 'गमहन' इत्यतः कितीति चानुवर्तते । अत आह—**एषां कितीति । त्रेसतुरिति ।** त्रस्धातोर्लिटि तसि, तसः स्थानेऽतुसादेशे 'लिटि धातोरनभ्यासस्य' इति धातोर्द्वित्वेऽभ्यासत्वे हलादिशेषे 'वा जॄभ्रमुत्रसामि'त्यनेन विभाषया एत्वेऽभ्यासलोपे च कृते सस्य रुत्वे विसर्गे 'त्रेसतुः' इति । पक्षे 'तत्रसतुः' इति ।

(७३४) ओतः श्यनीति । 'घोर्लोपो लेटि वा' इत्यस्माल्लोप इत्यनुवर्तते । तदाह—**ओतो लोप इति । श्यति ।** 'शो तनूकरणे' इत्यस्माद्धातोर्लटि तिपि 'दिवा-

---

'ति' के इकार का लोप—'इतश्च' ईट्—'अस्तिसिचोऽपृक्ते', 'स्' का लोप—'इट ईटि', अट्, गुण, रपर)=अनर्तीत् । (४) लृङ् में विकल्प से इट्—अनर्तिष्यत् ।.अनर्त्स्यत् ।

√त्रसी (त्रस्) धातु का अर्थ—'घबराना, डरना' है । (१) त्रस्+लट् (=तिप्=ति, प्राप्त शप् का बाधकर विकल्प से श्यन्=य—'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः')= त्रस्यति । श्यन् के अभावपक्ष में—शप्—त्रसति । लिट्—तत्रास ।

(७३३) पद—वा, जॄभ्रमुत्रसाम् । **अनुवृत्ति**—लिटि, थलि च सेटि, एत्, अभ्यासलोपश्च, किति । **विधिसूत्र ।**

मूलार्थ—कित् लिट् और सेट् थल् के परवर्ती रहते जॄ, भ्रम् और त्रस् धातु को विकल्प से एत्व और अभ्यास का लोप होता है । त्रेसतुः । तत्रसतुः ।

विमर्श—प्रकृत सूत्र में 'अत एकहल्मध्येऽनादेशादेर्लिटि' (६।४।१२०) से लिटि, 'थलि च सेटि' (६।४।१२१) सूत्र 'घ्वसोरेद्धा०' (६।४।११९) से 'एत्, अभ्यासलोपश्च' तथा 'गमहन' (६।४।९८) से 'किति' पदों की अनुवृत्ति आती है । तदनुसार—"कित् लिट् तथा सेट् थल् के परे रहते जॄ, भ्रमु और त्रस् के अकार के स्थान में एत्व और अभ्यास का लोप विकल्प से होता है ।"

उदाहरण—(१) त्रस्+लिट् (=तस्, द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'अ'='ए' तथा अभ्यास का लोप विकल्प से—'वा जॄभ्रमुत्रसाम्', स्—र्=:) त्रेसतुः । एत्व और अभ्यासलोप के अभावपक्ष में—तत्रसतुः । (२) लिट् म० पु० एकव० में विकल्प से एत्व, अभ्यासलोप, इट्—त्रेसिथ, तत्रसिथ । (३) लुट्—त्रसिता ।

√शो धातु का अर्थ—'पतला करना, कम करना' है ।

(७३४) पद—ओतः, श्यनि । **अनुवृत्ति**—लोपः । **विधिसूत्र ।**

मूलार्थ—'श्यन्' के परवर्ती रहते ओकार का लोप होता है । श्यति इत्यादि ।

श्येत् । शायात् । 'विभाषा घ्राधेडि'ति सिचो वा लुक् । अशात् । अशाताम् । लुगभावे-'यमरमे'ति इट्सकौ । अशासीत् । अशासिष्टाम् । अशास्यत् । छो छेदने । छ्यति । चच्छौ । चच्छतुः । षो अन्तकर्मणि । स्यति । ससौ । अभिष्यति । अभिससौ । साता । सास्यति । स्यतु । अभ्यष्यत् । सेयात् । दो अवखण्डने । द्यति । ददौ । प्रणिदाता । दास्यति । देयात् । अदात् । अदास्यत् । व्यध ताडने । 'ग्रहिज्ये'ति सम्प्रसा-

---

दिभ्यः श्यन्' इति श्यनि, अनुबन्धलोपे 'ओतः श्यनि' इति ओकारस्य लोपे 'श्यति' इति । 'अशादि'ति । शोधातोर्लुङि, तत्स्थाने तिप्यनुबन्धलोपे, अटि, 'आदेच उपदेशेऽशिति' इत्यनेन ओकारस्य आकारादेशे, च्लौ, च्लेः सिच्यनुबन्धलोपे, 'विभाषा घ्राघेट्शाच्छासः' इत्यनेन विकल्पेन सिचो लोपे 'इतश्च' इति इकारलोपे 'अशात्' इति । लोपाऽभावपक्षे—'अशा स् त्' इति जाते 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि, अनुबन्धलोपे 'अशासीत्' इति रूपम् ।

विमर्श—'यहाँ 'घोर्लोपो लेटि वा' (७।३।७०) से 'लोपः' पद की अनुवृत्ति आ रही है । अतः "श्यन् (य) के परे रहते 'ओ' का लोप होता है ।"

उदाहरण—(१) शो+लट् (=तिप्=ति, श्यन्='य', 'ओ' का लोप—'ओतः श्यनि') =श्यति । (२) लट् प्र० पु० द्विव—श्यतः । (३) लट् प्र० पु० बहु०—श्यन्ति । (४) शो+लिट् (=तिप्=णल्, 'ओ'='आ'—'आदेच उपदेशे०', द्वित्व, अभ्यास संज्ञा, ह्रस्व, 'णल्' ='औ'—'आत औ णलः' आ+औ='औ' वृद्धि—'वृद्धिरेचि')=शशौ ।

√शो धातु, लिट् लकार के रूप

एक०	द्वि०	बहु०
प्र० पु०—शशौ	शशतुः	शशुः
म० पु०—शशिथ, शशाथ	शशथुः	शश
उ० पु०—शशौ	शशिव	शशिम

(५) लुट्—शाता । (६) लृट्—शास्यति । (७) लोट्—श्यतु । (८) लङ्—अश्यत् । (९) विधिलिङ्—श्येत् । आशीर्लिङ्—शायात् । (१०) √शो+लुङ् (=तिप्=ति, अट्, च्लि=सिच्='स' इकारलोप—'इतश्च' आत्व)—अ शा स् त् (सिच्='स्' का विकल्प से लुक्—'विभाषा घ्राधेट्शाच्छासः')=अशात् । लुक् के अभावपक्ष में ('यमरम' से इट् और सक्='स्')—अ शा इ स् स् त् (ईट्, स् का लोप—'इट ईटि' दीर्घ)=अशासीत् । (११) लुङ् प्र० पु० द्वि०—अशाताम् । लुक् के अभावपक्ष में—अशासिष्टाम् । (१२) लृङ्—अशास्यत् ।

√छो धातु का अर्थ—'काटना' है । (१) √छो+लट् (=तिप्=ति, श्यन्, 'ओ' का लोप—'ओतः श्यनि') =छ्यति । (२) लिट्—चच्छौ । (३) लिट् प्र० पु० द्विवचन—चच्छतुः ।

√षो (=सो) धातु का अर्थ—'नाश करना' है । (१) √सो+लट् (=तिप्=ति, श्यन्, ओकार का लोप—'ओतः श्यनि')=स्यति । (२) लिट्—ससौ । (३) अभि+स्यति (षत्व)=अभिष्यति । (४) लुट्—साता । (५) लृट्—सास्यति (६) लोट्—स्यतु । (७) लङ्—'अस्यत्' अभि+अस्यत् (यण्, षत्व)=अभ्यष्यत् । (८) आशीर्लिङ्—सेयात् ।

रणम् । विध्यति । विव्याध । विविधतुः । विविधुः । विव्यद्ध । विव्यधिथ–व्यद्ध । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् । पुष पुष्टौ । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । 'पुषादी'त्यङ्–आपरस्मैपदात् । अपुषत् । अपोक्ष्यत् । शुष शोषणे । शुष्यति । शुशोष । शोष्टा । शोक्ष्यति । शुष्यतु । अशुष्यत् । अशुषत् । अशोक्ष्यत् ।

विव्याध इति । 'व्यध ताडने' इत्यस्माद्धातोर्लिटि, लिटः स्थाने तिपि, 'तिपो णल्यनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासत्वे, हलादिशेषे, 'व्य व्यध् अ' इति जाते 'लिटचभ्यासस्योभयेषाम्' इत्यभ्यासस्य सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'व्, इ् व्यध् अ' इति स्थिते 'अत उपधायाः' इति वृद्धौ 'विव्याध' इति । **'अपुषत्' इति ।** पुष्धातोर्लुङि, तत्स्थाने तिपि, अटि, तिप इकारलोपे, च्लौ, च्लेः स्थाने 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' इत्यनेन अङि अनुबन्धलोपे, ङित्त्वाद् गुणाभावे 'अपुषत्' इति ।

√दो धातु का अर्थ—'काटना' है। (१) लट्—द्यति । (२) लिट्—ददौ । (३) लुट्—प्रनि+दाता (णत्व)=प्रणिदाता । (४) लृट्—दास्यति । (५) लिङ्—देयात् ('एर्लिङि' से एत्व) । (६) लुङ् में 'सिच्' का 'गातिस्था' से लुक्—अदात् । (७) लृङ्—अदास्यत् ।

√व्यध् धातु का अर्थ—'बेधना' है । (१) √व्यध्+लट् (=तिप्=ति, श्यन्='य', श्यन् के अपित् होने से 'सार्वधातुकमपित्' से ङिद्वद्भाव, 'य्'='इ' सम्प्रसारण—'ग्रहिज्या०' 'अ'='इ' में सम्मिलित पूर्वरूप—'सम्प्रसारणाच्च')=विध्यति । (२) √व्यध्+लिट् (=तिप्=णल्='अ', द्वित्व, अभ्यास संज्ञा, हलादिशेष)—व्य व्यध् अ (अभ्यास के 'य्'='इ' सम्प्रसारण—'लिटयभ्यासस्योभयेषाम्' पूर्वरूप)—वि व्यध् अ (उपधावृद्धि—'अत उपधायाः')=विव्याध । (३) अतुस् आदि कित् प्रत्ययों में 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' परिभाषा के द्वारा द्वित्व से पूर्व सम्प्रसारण होने पर द्वित्व होकर—विविधतुः, विविधुः आदि रूप बनते हैं । (४) लिट् म० पु० एकवचन 'थल्' में भारद्वाज नियम से वैकल्पिक इट् होता है—विव्यधिथ । इट् के अभावपक्ष में 'थ्'='ध'—'झषस्तथोर्धोऽधः' 'ध्'='द्'—जश्त्व)=व्यद्ध । (५) लृट्—व्यत्स्यति (चर्त्व) । (६) विधिलिङ्—विध्येत् । (७) आशीर्लिङ्—विध्यात् । (८) √व्यध्+लुङ् (=तिप्=ति, अट्, इकारलोप, च्लि, च्लि=सिच्=स्, ईट्, 'अ'='आ' वृद्धि—'वदव्रजहलन्तस्याचः', 'ध्'='त्'—'खरि च')=अव्यात्सीत् ।

√पुष धातु का अर्थ—पुष्ट होना है । (१) √पुष्+लट् (=तिप्=ति, शप् का बाधकर श्यन्='य')=पुष्यति । (२) लिट्—पुपोष । (३) लिट्—म० पु० एकवचन—पुपोषिथ । (४) लुट्—पोष्टा । (५) लृट्—पोक्ष्यति । (६) √पुष्+लुङ् (=तिप्=ति, अट्, इकारलोप, च्लि=अङ्—'पुषादि०')=अपुषत् । (७) लृङ्—अपोक्ष्यत् ।

√शुष् धातु का अर्थ—'सूखना' है । (१) लट्—शुष्यति । (२) लिट्—शुशोष । (३) लुट्—शोष्टा ('पुगन्त०' से गुण) । (४) लृट्—शोक्ष्यति । (५) लोट्—शुष्यतु । (६) लङ्—अशुष्यत् । (७) लुङ्—अशुषत् । (८) लृङ्—अशोक्ष्यत् ।

√णश् (नश्) धातु का अर्थ—'नाश होना' है । (१) णश् ('ण्'='न्'—'णो नः')—नश्+लट् (=तिप्=ति, श्यन्='य')=नश्यति । (२) लिट्—ननाश । (३) (लिट् के प्र० पु० द्विवचन तथा बहुवचन में 'अत एकहल्मध्ये०' से एत्व, अभ्य का लोप)—नेशतुः, नेशुः ।

णश अदर्शने । नश्यति । ननाश । नेशतुः । नेशुः । **(७३५) रधादिभ्यश्च ७।२।४५ ।** रध्-नश्-तृप्-दृप्-द्रुह्-मुह्-ष्णुह्-ष्णिह्-एभ्यो वलाद्यार्धधातुकस्य वेट् स्यात् । नेशिथ । **(७३६) मस्जिनशोर्झलि ७।१।६० ।** मस्जिनशोर्नुम् स्याज्झलि । ननंष्ठ । नेशिव–नेश्व । नेशिम–नेश्म । नशिता–नंष्टा । नशिष्यति–नङ्क्ष्यति । नश्यतु । अनश्यत् । नश्येत् । नश्यात् । अनशत् । प्रणश्यति । **(७३७) नशेः षान्तस्य ८।४।३६ ।** षान्तस्य नशेर्णत्वं न स्यात् । प्रनंष्टा । अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम् । प्रनङ्क्ष्यति । रध हिंसा-

---

(७३५) **रधादिभ्यश्चेति** । 'आर्धधातुकस्येड् वलादेरि'त्यनुवर्तते । 'स्वरति-सूति०' इत्यतो वेति चानुवर्तते । अत आह—**रध्नशित्यादिना** ।

(७३६) **मस्जिनशोर्झलीति** । 'इदितो नुम्' इत्यतो नुमित्यनुवर्तते । तदाह—**मस्जिनशोर्नुमिति** । **नेशिथ, ननंष्ठ** । नश्धातोर्लिटि मध्यमपुरुषैकवचने सिपि, सिपः थलादेशेऽनुबन्धलोपे धातोर्द्वित्वेऽभ्यासत्वे हलादिशेषे 'रधादिभ्यश्चे'त्यनेन विभाषया इडागमेऽनुबन्धलोपे 'थलि च सेटि' इति एत्वेऽभ्यासलोपे च कृते 'नेशिथ' इति । इडभावपक्षे—'न नश् थ' इति स्थिते 'मस्जिनशोर्झलि' इति नुमि 'व्रश्चभ्रस्ज०' इत्यादिना षत्वे, ष्टुत्वे अनुस्वारे च कृते 'ननंष्ठ' इति ।

---

(७३५) पद—रधादिभ्यः, च । **अनुवृत्ति**—वलादेः, अर्धधातुकस्य, इट्, वा । **विधिसूत्र ।**

मूलार्थ—रध् आदि धातुओं से परवर्ती वलादि आर्धधातुक को विकल्प से इट्='इ' का आगम होता है ।

विमर्श—सूत्रार्थ की पूर्ति हेतु—'आर्धधातुकस्येड् वलादेः' (७।२।३५) सूत्र तथा 'स्वरति-सूति०' (७।२।४४) से 'वा' की अनुवृत्ति आती है । तदनुसार—"रध् आदि आठ धातुओं से परवर्ती वलादि आर्धधातुक प्रत्यय को विकल्प से 'इट्' का आगम होता है ।"

(७३६) पद—मस्जिनशोः, झलि । **अनुवृत्ति**—नुम् । **विधिसूत्र ।**

मूलार्थ—झलादि प्रत्यय के परवर्ती रहते 'मस्ज्' तथा 'नश्' धातु को 'नुम्' का आगम होता है ।

विमर्श—'इदितो नुम् धातोः' (७।१।५८) से 'नुम्' की अनुवृत्ति आती है । तदनुसार पूर्वोक्त अर्थ होता है ।

उदाहरण—(१) √नश्+लिट् (=सिप्=थल्='थ' द्वित्व, अभ्यास संज्ञा, हलादिशेष, विकल्प से इट्='इ'—'रधादिभ्यश्च')—न नश् इ थ (एत्व, अभ्यास का लोप—'थलि च सेटि') =नेशिथ । 'इट्' के अभावपक्ष में—'न नश् थ' (नुम्='न्'—'मस्जिनशोर्झलि', न्=ं—अनुस्वार—'नश्चापदान्तस्य झलि', 'श्'='ष्'—षत्व, 'थ्'='ठ्'—ष्टुत्व)=ननंष्ठ । (२) लिट् उ० पु० द्विवचन तथा बहुवचन में विकल्प से इट्—नेशिव, नेश्व । नेशिम, नेश्म । (३) लुट्—नशिता, नंष्टा (विकल्प से इट्) । (४) लृट् इट् पक्ष में—नशिष्यति । इट् के अभावपक्ष में—नश् स्य ति (श्=ष्—'व्रश्चभ्रस्ज०', स्=ष्—षत्व, ष्=क्—'षढोः कः सि', क्+ष्=क्ष्, नुम्=ं=परसवर्ण)=नङ्क्ष्यति । (५) लोट्—नश्यतु । (६) लङ्—अनश्यत् । (७) विधिलिङ्—नश्येत् । (८) आशीर्लिङ्—नश्यात् । (९) लुङ् में—च्लि=अङ्—अनशत् । (१०) प्र+नश्यति (णत्व)=प्रणश्यति ।

(७३७) पद—नशेः, षान्तस्य । **अनुवृत्ति**—णः, न । **विधिसूत्र ।**

संराद्धयोः । रध्यति । (७३८) रधिजभोरचि ७।१।६१ । रधिजभोरचि नुम् स्यात् । ररन्ध । ररन्धतुः । ररन्धिथ–ररद्ध । ररन्धथुः । ररन्धिव–ररन्ध्व । (७३९) नेट्यलिटि रधेः ७।१।६२ । लिड्वर्जे इटि रधेर्नुम् न स्यात् । रधिता–रद्धा । रधिष्यति–

(७३७) **'नशेः षान्तस्ये'**ति । 'रषाभ्यामि'त्यतो ण इति, 'न भाभूपू०' इत्यतः नेति चानुवर्तते । तदाह—**णत्वं न स्यादिति ।**

(७३८) **रधिजभोरचीति ।** 'इदितो नुम्' इत्यस्मान्नुमीत्यनुवर्तते । अत आह—**नुम् स्यादिति ।**

(७३९) **नेट्यलिटि रधेरिति ।** 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते । तदाह—**लिड्वर्जे इटीति ।**

मूलार्थ—षान्त 'नश्' धातु को णत्व का निषेध होता है ।

विमर्श—'रषाभ्यां नो णः' से 'णः' तथा 'न भाभूपू०' (८।४।३३) से 'न' पदों की अनुवृत्ति आती है । अतः 'षकारान्त नश् धातु को णत्व नहीं होता ।'

उदाहरण—(१) प्र+नंष्टा ('उपसर्गादसमासेऽपि' से प्राप्त णत्व का 'नशेः षान्तस्य' से निषेध)=प्रनंष्टा ।

यहाँ शंका होती है कि सूत्र में अन्तग्रहण क्यों किया ? 'षान्तस्य' के स्थान में 'षस्य' होने पर भी 'पदस्य' का विशेषण होने से तदन्तविधि होकर 'षान्तस्य पदस्य' अर्थ हो सकता था । इसका समाधान है कि अन्त ग्रहण भूतपूर्व षान्त लाभार्थ है । अतः सम्प्रति षकारान्त न होने पर भी (पूर्व में षकारान्त रहने पर भी) नकार के स्थान में णकार आदेश का अभाव हुआ । 'प्र+नङ्क्ष्यति' यहाँ 'ष्'='क्' हो जाने पर भी भूतपूर्व षान्त होने से णत्व का अभाव हुआ ।

√रध् धातु का अर्थ—'हिंसा करना, सिद्ध होना' है । (१) रध्+लट् (=तिप्=ति, श्यन्='य')=रध्यति ।

(७३८) **पद**—रधिजभोः, अचि । **अनुवृत्ति**—नुम् । **विधिसूत्र ।**

मूलार्थ—अजादि प्रत्यय के परवर्ती रहते रध् और जभ् धातु को नुम् का आगम होता है ।

विमर्श—यहाँ 'इदितो नुम् धातोः' (७।१।५८) से 'नुम्' पद की अनुवृत्ति आती है ।

उदाहरण—(१) √रध्+लिट् (=तिप्=णल्=अ, नुम्='न्'—'रधिजभोरचि' द्वित्व, अभ्यास संज्ञा, हलादिशेष)=ररन्ध । (२) रध्+लिट् (=तस्=अतुस् , नुम्, द्वित्व, अभ्यास संज्ञा, हलादिशेष, स्=र्=ः)=ररन्धतुः । (३) √रध्+लिट् (=सिप्=थल्=थ, विकल्प से इट्—'रधादिभ्यश्च', नुम्—'रधिजभोरचि' द्वित्व, अभ्यास संज्ञा, हलादिशेष)= ररन्धिथ । इट् के अभावपक्ष में—रध्+थ (द्वित्व, अभ्यास संज्ञा, हलादिशेष)—ररध् थ ('थ्'= 'ध्' 'ध्' 'द्')=ररद्ध । (४) लिट् म० पु० द्विव०—ररन्धथुः । (५) लिट् उ० पु० द्विवचन में 'रधादिभ्यश्च' से विकल्प से इट्—ररन्धिव । इडभावपक्ष में—एत्व, अभ्यास का लोप—रेध्व ।

(७३९) **पद**—न, इटि, अलिटि, रधेः । **अनुवृत्ति**—नुम् । **विधिसूत्र ।**

मूलार्थ—लिट्-भिन्न इट् के परवर्ती रहते रध् धातु को नुम् नहीं होता ।

विमर्श—प्रकृत सूत्र में 'इदितो नुम्०' (७।१।५८) से 'नुम्' की अनुवृत्ति आती है । तदनुसार—"लिट् सम्बन्धी इट् को छोड़कर अन्य इट् में रध् धातु को नुम् का आगम नहीं होता ।"

रत्स्यति । अङि नुम् । 'अनिदितामि'ति नलोपः । अरधत् । तृप प्रीणने । तृप्यति । ततर्प । ततृपतुः । ततृपुः । रधादित्वाद्वेट् । तत्रप्थ–ततर्पिथ–ततर्प्थ । तर्पिता–तर्प्ता–त्रप्ता । * स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः * । अतर्पीत्–अत्राप्सीत्–अतार्प्सीत्–अतृपत् । दृप हर्ष-मोहनयोः । मोहनं गर्वः । दृप्यति इत्यादि । 'रधादित्वादिमौ वेट्कावमर्थमनुदात्तता ।' द्रुह जिघांसायाम् । द्रुह्यति । दुद्रोह । दुद्रुहतुः । दुद्रुहुः ।

अतर्पीदिति । 'तृप प्रीणने' इत्यस्माद्धातोः लुङि, तत्स्थाने प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे, अडागमेऽनुबन्धलोपे 'अ तृप् ति' इति जाते च्लौ 'च्लेः सिच्' इति सिचि प्राप्ते 'स्पृशमृशकृषतृपां च्लेः सिज्वा वाच्यः' इति विकल्पेन सिचि, 'रधादिभ्यश्च' इति विकल्पेन इडागमेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि, 'पुगन्तलघूपधस्य च' इत्यनेन उपधागुणे रपरे, 'इट ईटि' इत्यनेन सिचो लोपे 'इतश्च' इत्यनेन तिप इकारलोपे संयोगे च 'अतर्पीत्' इति । सिजभावपक्षे 'अनुदात्तस्य चर्दुपधस्यान्यत-

---

उदाहरण—(१) √रध्+लुट् (=तिप्, तास्, तिप्=डा=आ)—रध् तास् आ (विकल्प से इट्—'रधादिभ्यश्च' 'रधिजभोरचि' से प्राप्त नुम् का 'नेट्यलिटि रधेः' से निषेध, टिलोप)=रधिता । इट् के अभावपक्ष में—रध् ता ('त्'='ध्'—'झषस्तथोर्धोऽधः' 'ध्'='द्')=रद्धा । (२) (लृट् में भी विकल्प से इट्, नुम् का निषेध)—रधिष्यति । इट् के अभावपक्ष में ('ध्'='त्')—रत्स्यति । (३) रध्+लुङ् (=तिप्=ति, अट्, इकारलोप 'च्लि'='अङ्'—'पुषादि०', नुम्—'रधिजभोरचि' 'न्' का लोप—'अनिदिताम्०')=अरधत् ।

√तृप् धातु का अर्थ—'तृप्त होना' है । (१) √तृप्+लट् (=तिप्=ति, श्यन्='य') =तृप्यति । (२) √तृप्+लिट् (=तिप्=णल्='अ', द्वित्व, अभ्यास संज्ञा 'ऋ'='अ'—'उरत्', रपर, हलादिशेष, गुण, रपर) =ततर्प । (३) लिट् प्र० पु० द्वि०—ततृपतुः । (४) लिट् प्र० पु० बहु०—ततृपुः । (५) √तृप्+लिट् (=सिप्=थल्='थ', द्वित्व, अभ्यासकार्य, हलादिशेष)—त तृप् थ (विकल्प से इट्—'रधादिभ्यश्च' गुण, रपर)=ततर्पिथ । इट् के अभावपक्ष में विकल्प से अम्='अ'—'अनुदात्तस्य', यण्)=तत्रप्थ । इट् तथा अम् के अभावपक्ष में—गुण, रपर—ततर्प्थ । (६) √तृप्+लुट् (=तिप्=ति, तास्, ति=डा='आ' विकल्प से इट्—'रधादिभ्यश्च')—तृप् इ तास् आ (गुण, रपर, 'टि' का लोप—'डित्वसामर्थ्याद-भस्यापि टेर्लोपः')=तर्पिता । इट् के अभावपक्ष में विकल्प से अम्='अ' यण्)=त्रप्ता । इट् तथा अम् के अभावपक्ष में—तर्प्ता । (७) √तृप्+लुङ् (=तिप्=ति, अट्, च्लि=सिच्='स्' विकल्प से—'स्पृशमृशकृषतृपां च्लेः सिज्वा वाच्यः', विकल्प से इट्—'रधादिभ्यश्च', ईट्, 'स्' का लोप—'इट ईटि' उपधागुण, रपर, इकारलोप)=अतर्पीत् । सिच् तथा इट् के अभावपक्ष में—विकल्प से अम्='अ'—'अनुदात्तस्य')—अ तृ अ प् स् ई त् (यण्, उपधावृद्धि—'वदव्रज०') =अत्राप्सीत् । अम् तथा इट् के अभावपक्ष में—अ तृप् स् ई त् (उपधावृद्धि, रपर)—अतार्प्सीत् । सिच् के अभाव में (च्लि=अङ्='अ'—'पुषादि०')—अ तृप् अ त्=अतृपत् ।

√दृप् धातु का अर्थ—'प्रसन्न होना, गर्व करना' है । (१) लट्—दृप्यति । **रधादित्वादिति** । दोनों धातुओं (तृप्, दृप्) का रधादिगण में पाठ होने से ये दोनों धातु वेट् (विकल्प से इट् वाली) हैं । केवल आगम मात्र होने के लिए इनका अनुदात्त धातुओं में पाठ किया गया है ।

√द्रुह धातु का अर्थ—जिघांसा='नाश करने की इच्छा करना' है । (१) लट्—द्रुह्यति ।

'वा द्रुहे'ति वा घः । पक्षे ढः । 'झषस्तथोर्धोऽधः' दुद्रोहिथ–दुद्रोग्ध–दुद्रोढ । दुद्रुहथुः । दुद्रुह । दुद्रोह । दुद्रुहिव । दुद्रुहिम । द्रोहिता–द्रोग्धा–द्रोढा । द्रोहिष्यति–ध्रोक्ष्यति । ढत्वघत्वयोस्तुल्यं रूपम् । अद्रुहत् । अद्रोहिष्यत्–अध्रोक्ष्यत् । मुह वैचित्ये । वैचित्यम् अविवेकः । मुह्यति । मुमोह । मुमुहतुः । मुमुहुः । मुमोहिथ–मुमोग्ध–मुमोढ । मोहिता–मोग्धा–मोढा । मोहिष्यति–मोक्ष्यति । मुह्यतु । अमुह्यत् । मुह्येत् । मुह्यात् । अमुहत् । अमोहिष्यत्–अमोक्ष्यत् । ष्णुह उद्गिरणे । स्नुह्यति । सुष्णोह । सुष्णुहतुः । सुष्णुहुः । सुष्णोहिथ–सुष्णोग्ध–सुष्णोढ । सुष्णुहथुः । सुष्णुह । सुष्णोह'। सुष्णुहिव–

रस्याम्' इत्यनेन विकल्पेन अमागमे अनुबन्धलोपे 'रधादिभ्यश्च' इति इडभावपक्षे च 'अ तृ अ प् स ई त्' इति जाते 'इको यणचि' इति यणि 'वदव्रजहलन्तस्याचः' इति उपधावृद्धौ संयोगे 'अत्राप्सीत्'। अमोऽभावपक्षे इडभावपक्षे च 'अतृप् स् ई त्' इति जाते, उपधावृद्धौ रपरत्वे संयोगे च कृते 'अतार्प्सीत्' इति । सिजभावपक्षे च 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति च्लेरङादेशे 'अतृपत्' इति चत्वारि रूपाणि भवन्तीति ।

---

(२) लिट् में--दुद्रोह, दुद्रुहतुः, दुद्रुहुः--इत्यादि । (३) √द्रुह्+लिट् (=सिप्=थल्=थ, द्वित्व, अभ्यास संज्ञा, हलादिशेष)—दुद्रु ह् थ (विकल्प से इट्='इ'—'रधादिभ्यश्च', गुण 'उ'='ओ'—'पुगन्त०')=दुद्रोहिथ । इट् के अभावपक्ष में—'ह्'='घ्' विकल्प से—'वा द्रुह-मुहष्णुहष्णिहाम्', 'थ्'='ध्'--'झषस्तथोर्धोऽधः', 'घ्'=ग्'--'झलां जश् झशि')=दुद्रोग्ध । घत्व के अभावपक्ष में—दुद्रुह् थ ('ह्'='ढ्'—'हो ढः', 'थ्'='ध्'—'झषस्तथो०', 'ध्'='ढ्'—ष्टुत्व, 'ढ्' का लोप—'ढो ढे लोपः', 'उ'='ओ' गुण—'पुगन्त०')=दुद्रोढ ।

√द्रुह् धातु लिट् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०	दुद्रोह	दुद्रुहतुः	दुद्रुहुः
म० पु०	दुद्रोहिथ, दुद्रोग्ध, दुद्रोढ	दुद्रुहथुः	दुद्रुह
उ० पु०	दुद्रोह	दुद्रुहिव	दुद्रुहिम

(४) लुट् में विकल्प से इट्--द्रोहिता । इट् के अभावपक्ष में—(पूर्ववत् विकल्प से 'ह्'='घ्', 'त्'='ध्', 'घ्'='ग्' गुण)—द्रोग्धा । इट् तथा घत्व के अभावपक्ष में—द्रोढा । (५) लृट्—द्रोहिष्यति, ध्रोक्ष्यति । ढत्व और घत्व दोनों पक्ष में समान रूप बनते हैं । (६) लुङ् में—च्लि=अङ्, गुणाभाव—अद्रुहत् । (७) लृङ् में इट् विकल्प—अद्रोहिष्यत्, अध्रोक्ष्यत् ।

√मुह् धातु—'अविवेक' अर्थ में है । (१) लिट्—मुह्यति । (२) लिट् प्र० पु०—मुमोह, मुमुहतुः, मुमुहुः । (३) लिट् म० पु० एकव०—पूर्ववत् विकल्प से इट्—मुमोहिथ । इट् के अभाव पक्ष में विकल्प से घत्व, पूर्ववत् कार्य—मुमोग्ध । घत्व के अभाव में ढत्व—मुमोढ । (४) लुट्—मोहिता, मोग्धा, मोढा ॥ (५) लृट्—मोहिष्यति, मोक्ष्यति । (६) लोट्—मुह्यतु । (७) लङ्—अमुह्यत् । (८) विधिलिङ्—मुह्येत् । (९) आशीर्लिङ्—मुह्यात् । (१०) लुङ् में अङ्—अमुहत् । (११) लृङ्—अमोहिष्यत्, अमोक्ष्यत् ।

√ष्णुह् धातु उद्गिरण (वमन) अर्थ में है । (१) √ष्णुह् (ष्=स्—'धात्वादेः षः सः', 'ण्'='न्'—'णो नः')—स्नुह्+लट् (=तिप्=ति, श्यन्='य')=स्नुह्यति । (२) √स्नुह्

सुष्णुह्व । सुष्णुहिम-सुष्णुह्म । स्नोहिता-स्नोग्धा-स्नोढा । स्नोहिष्यति-स्नोक्ष्यति । स्नुह्यतु । अस्नुहत् । अस्नोहिष्यत्-अस्नोक्ष्यत् । ष्णिह प्रीतौ । स्निह्यति । सिष्णेह । सिष्णिहतुः । सिष्णिहुः । सिष्णेहिथ-सिष्णेग्ध-सिष्णेढ । स्नेहिता-स्नेग्धा-स्नेढा । स्नेहिष्यति-स्नेक्ष्यति । स्निह्यतु । अस्निहत् । अस्नेहिष्यत्-अस्नेक्ष्यत् । वृत् । रधादयः समाप्ताः । तुष तुष्टौ । तुष्यति । तुतोष । तोष्टा । तोक्ष्यति । तुष्यतु । दुष वैकृत्ये । दुष्यति । दुदोष । दोष्टा । दोक्ष्यति । दुष्यतु । श्लिष आलिङ्गने । श्लिष्यति । **(७४०) श्लिष आलिङ्गने ३।१।४६ । श्लिषश्च्लेः क्सः स्यादालिङ्गने ।** 'अश्लिक्षत् कन्यां देवदत्तः' । आलिङ्गने किम् ? समश्लिषज्जतु काष्ठम् । प्रत्यासत्ताविह श्लिषिः ।

दुष वैकृत्ये । वैकृत्यं विकारः, दुष्यति विकृतो भवतीत्यर्थः ।

(७४०) श्लिष इति । च्लेरिति, 'शल इगुपधादि'त्यतः क्स इत्यनुवर्तते । तदाह—'**श्लिषश्च्लेरिति । अश्लिक्षदिति ।** श्लिष्धातोर्लुङि तत्स्थाने प्रथमपुरुषैकवचने

+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, हलादिशेष)—सुस्नुह् अ (गुण, षत्व, णत्व)=सुष्णोह । (३) लिट् प्र० पु० द्विवचन—सुष्णुहतुः । (४) लिट् प्र० पु० बहुव०—सुष्णुहुः । (५) लिट् म० पु० एकव०—सुष्णोहिथ, सुष्णोग्ध, सुष्णोढ । (६) म० पु० द्विव०—सुष्णुहथुः । (७) म० पु० बहुव०—सुष्णुह । (८) लिट् उत्तमपुरुष—सुष्णोह, सुष्णुहिव-सुष्णुह्व, सुष्णुहिम-सुष्णुह्म (इट् विकल्प) । (९) लुट्—स्नोहिता, स्नोग्धा, स्नोढा । (१०) लृट्—स्नोहिष्यति, स्नोक्ष्यति । (११) लोट्—स्नुह्यतु । (१२) लङ्—अस्नुहत् । (१३) लृङ्—अस्नोहिष्यत्, अस्नोक्ष्यत् ।

√ष्णिह् (स्निह्) धातु का अर्थ 'प्रीति करना' है । (१) लट्—स्निह्यति । (२) लिट् प्र० पु०—सिष्णेह, सिष्णिहतुः, सिष्णिहुः । (३) लिट् म० पु० एकवचन (पूर्ववत् इट् विकल्प, पक्ष में विकल्प से घत्व)—सिष्णेहिथ, सिष्णेग्ध, सिष्णेढ । (४) लुट्—स्नेहिता, स्नेग्धा, स्नेढा । (५) लृट्—स्नेहिष्यति, स्नेक्ष्यति । (६) लोट्—स्निह्यतु । (७) लङ्—अस्निहत् । (८) लृङ्—अस्नेहिष्यत्, अस्नेक्ष्यत् । **रधादिगण समाप्त हुआ ।**

√तुष् धातु का अर्थ—'सन्तुष्ट होना' है । (१) लट्—तुष्यति । (२) लिट्—तुतोष । (३) लुट्—तोष्टा । (४) √तुष्+लृट् (=तिप्=ति, स्य)—तुष् स्य ति ('ष्'='क्' 'स्'='ष्'—षत्व, क्+ष्='क्ष्' गुण)=तोक्ष्यति । (५) लोट्—तुष्यतु ।

√दुष् धातु का अर्थ—'विकार होना' है । (१) लट्—दुष्यति । (२) लिट्—दुदोष । (३) लुट्—दोष्टा । (४) लृट्—दोक्ष्यति । (५) लोट्—दुष्यतु ।

√श्लिष् धातु का अर्थ—'आलिङ्गन करना' है । (१) लट्—श्लिष्यति ।

(७४०) पद—श्लिषः, आलिङ्गने । **अनुवृत्ति**—च्लेः, क्सः । **विधिसूत्र ।**

मूलार्थ—आलिङ्गन अर्थ में श्लिष् धातु से उत्तरवर्ती 'च्लि' के स्थान में क्स (=स) आदेश होता है । 'अश्लिक्षत्' इत्यादि ।

विमर्श—प्रकृत सूत्र में 'च्लेः सिच्' (३।१।४४) से च्लेः' तथा 'शल इगुपधात्' (३।१।४५) से 'क्सः' की अनुवृत्ति आ रही है । तदनुसार—"श्लिष् धातु से परे 'च्लि' के स्थान में 'क्स' आदेश होता है, आलिङ्गन अर्थ में ।"

उदाहरण—(१) √श्लिष्+लुङ् (=तिप्=ति, इकारलोप—'इतश्च', च्लि, च्लि=क्स

क्रुध क्रोधे। क्रुध्यति। चुक्रोध। क्रोद्धा। क्रोत्स्यति। क्रुध्यतु। क्षुध बुभुक्षायाम्। क्षुध्यति। चुक्षोध। क्षोद्धा। क्षोत्स्यति। शुध शौचे। शुध्यति। शुशोध। शोद्धा। शोत्स्यति। षिधु संराद्धौ। सिध्यति। सिषेध। सेद्धा। सेत्स्यति। असिधत्। असेत्स्यत्। शमु उपशमे। (७४१) **शमामष्टानां दीर्घः श्यनि ७।३।७४।** शम्-तम्-दम्-श्रम्-भ्रम्-क्षम्-क्लम्-मदामचो दीर्घः श्यनि। प्रणिशाम्यति। शशाम। शेमतुः। शेमुः।

तिपि अनुबन्धलोपे 'इतश्चे'तीकारलोपे, अटि, च्लौ, 'श्लिष आलिङ्गने' इति क्सादेशेऽनुबन्धलोपे 'अश्लिष् स् त्' इति जाते 'षढोः कः सि' इति षस्य कत्वे 'आदेशप्रत्यययोः' इति सस्य षत्वे उभयोः संयोगेन क्षत्वे 'अश्लिक्षत्' इति रूपम्।

(७४१) **शमामष्टानामिति।** स्पष्टम्। **शाम्यति।** शम्धातोर्लटि, तत्स्थाने प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे 'दिवादिभ्यः श्यन्' इति श्यनि, अनुबन्धलोपे 'शमा-

---

'स'—'श्लिष आलिङ्गने' अट्='अ' का आगम)—अ श्लिष् स त ('ष्'='क्'—'षढोः कः 'सि'='स्'='ष्'—'आदेशप्रत्यययोः', क्+ष्+क्ष्)=अश्लिक्षत्कन्यां देवदत्तः (देवदत्त ने वात्सल्य से कन्या का आलिङ्गन किया।)

प्रत्युदाहरण—(१) सम् अश्लिषत् जतु काष्ठम् (=लाख ने काठ के साथ संयोग किया।) यहाँ संयोग सम्बन्धार्थक श्लिष् धातु का प्रयोग है। अतः प्रकृत सूत्र से 'क्स' नहीं हुआ। क्योंकि यहाँ अनालिङ्गन अर्थ है।

√'क्रुध्' धातु का अर्थ—'क्रोध करना' है। (१) √क्रुध्+लट् (=तिप्=ति, श्यन्='य')=क्रुध्यति। (२) √क्रुध+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'क्'='च्'—'कुहोश्चुः', गुण)=चुक्रोध। (३) लुट्—क्रोद्धा। (४) लृट्—क्रोत्स्यति। (५) लोट्—क्रुध्यतु।

क्षुध् धातु का अर्थ—'भूख लगना' है। (१) लट्—क्षुध्यति। (२) लिट्—चुक्षोध। (३) लुट्—क्षोद्धा। (४) लृट्—क्षोत्स्यति।

√शुध् धातु का अर्थ—'पवित्र होना' है। १) लट्—शुध्यति। (२) लिट्—शुशोध। (३) लुट्—शोद्धा। (४) लृट्—शोत्स्यति।

√षिधु धातु का अर्थ—'सिद्ध होना' है। (१) √षिध् ('ष्'='स्'—'धात्वादेः षः सः')—सिध्+लट् (=तिप्=ति, श्यन्='य')=सिध्यति। (२) लिट्—सिषेध। (३) लुट्—सेद्धा। (४) लृट्—सेत्स्यति। (५) √सिध्+लुङ् (=तिप्=ति, इकारलोप, च्लि, च्लि=अङ्='अ', अट्)=असिधत्। (६) लृङ्—असेत्स्यत्।

√शमु (उकारेत्संज्ञक) धातु—'शान्त होना' है।

(७४१) पद—शमाम्, अष्टानाम्, दीर्घः, श्यनि। **विधिसूत्र।**

मूलार्थ—शम् आदि आठ धातुओं के अङ्ग को दीर्घ होता है, श्यन् के परवर्ती रहते। 'प्रणिशाम्यति' इत्यादि।

उदाहरण—(१) √शम्+लट् (=तिप्=ति, श्यन्='य' 'अ'='आ'—दीर्घ—'शमामष्टानां दीर्घः श्यनि')=शाम्यति। प्रनि+शाम्यति (णत्व—'नेर्गद०')=प्रणिशाम्यति। (२) लिट् प्र० पु० एकव०—शशाम। (३) लिट् प्र० पु० द्विव०—शेमतुः (एत्व तथा अभ्यास का लोप)। (४) लिट् प्र० पु० बहुव०—शेमुः। (५) लिट् म० पु० एकव०—शेमिथ।

शेमिथ । शमिता । शमिष्यति । शाम्यतु । अशमत् । अशमिष्यत् । तमु काङ्क्षायाम् । ताम्यति । तताम । तमिता । तमिष्यति । ताम्यतु । अतमत् । अतमिष्यत् । दमु उपशमे । दाम्यति । ददाम । दमिता । दमिष्यति । दाम्यतु । अदमत् । अदमिष्यत् । श्रमु तपसि खेदे च । श्राम्यति । शश्राम । श्रमिता । श्रमिष्यति । श्राम्यतु । अश्रमत् । अश्रमिष्यत् । भ्रमु अनवस्थाने । 'वा भ्राशे'ति श्यन्वा । भ्राम्यति–भ्रमति । 'वा जॄभ्रमुत्रसाम्' । भ्रेमतुः–बभ्रमतुः । पुषादित्वादङ् । अभ्रमत् । शेषं भ्वादिवत् । क्षमू सहने । क्षाम्यति । चक्षाम । चक्षमतुः । चक्षमुः । चक्षमिथ–चक्षन्थ । चक्षमिव–चक्षण्व । चक्षमिम–चक्षण्म । क्षमिता–क्षन्ता । क्षमिष्यति–क्षंस्यति । क्षाम्यतु । अयं

मष्टानां दीर्घः श्यनि' इति दीर्घे 'शाम्यति' इति । क्षमू सहने । ऊदित्वात् थलि वमादौ च विकल्पेन इड् भवति । अत आह—चक्षमिथ इत्यादि । षित्वाऽषित्वयोः

---

(६) लुट्—शमिता । (७) लृट्—शमिष्यति । (८) लोट्—शाम्यतु । (९) लुङ्—अशमत (अङ्) । (१०) लृङ्—अशमिष्यत ।

√तमु धातु का अर्थ—'आकाङ्क्षा करना' है । (१) √तम्+लट् (=तिप्=ति, श्यन् 'य', दीर्घ)=ताम्यति । (२) लिट्—तमाम । (३) लुट्—तमिता । (४) लृट्—तमिष्यति । (५) लोट्—ताम्यतु । (६) लुङ्—अतमत । (७) लृङ्—अतमिष्यत ।

√दमु धातु का अर्थ—'शान्त करवाना' है । (१) लट्—दाम्यति (दीर्घ) । (२) लिट्—ददाम । (३) लुट्—दमिता । (४) लृट्—दमिष्यति । (५) लोट्—दाम्यतु । (६) लुङ्—अदमत । (७) लृङ्—अदमिष्यत ।

√श्रमु धातु—'तपस्या करना और खेद करना' अर्थ में है । (१) लट्—श्राम्यति (दीर्घ) । (२) लिट्—शश्राम । (३) लुट्—श्रमिता । (४) लृट्—श्रमिष्यति । (५) लोट्—श्राम्यतु । (६) लुङ्—अश्रमत (अङ्) । (७) अश्रमिष्यत ।

√भ्रमु धातु का अर्थ—'भ्रमण करना, घूमना' है । (१) √भ्रमु (उकार की इत्संज्ञा लोप) —भ्रम्+लट् (=तिप्=ति, श्यन्='य' विकल्प से—'वा भ्राश०' दीर्घ—'शमामष्टानाम्') =भ्राम्यति । 'श्यन्' के अभावपक्ष में शप्—भ्रमति । (२) √भ्रम्+लिट् (=तस्=अतुस्, द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'भ्'='ब्'—'अभ्यासे चर्च', एत्व अभ्यास का लोप विकल्प से—'वा जॄभ्रमुत्रसाम्' स्=र्=:)=भ्रेमतुः । एत्व अभ्यासलोप के अभावपक्ष में—बभ्रमतुः । (३) √भ्रम्+लुङ् (=तिप्=ति, इकारलोप, अट् च्लि=अङ्='अ')=अभ्रमत । शेष रूप भ्वादिगण की तरह बनते हैं ।

√क्षम् (ऊदित) का अर्थ—'सहन करना' है । (१) क्षम्+लट् (=तिप्=ति, श्यन्= 'य', दीर्घ) =क्षाम्यति । (२) √क्षम्+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'क्'='च्'—'कुहोश्चुः')—चक्षम् अ (वृद्धि)—चक्षाम । (३) लिट् प्र० पु० द्विवचन—चक्षमतुः । (४) लिट् प्र० पु० बहुवचन—चक्षमुः । (५) √क्षम्+लिट् (=सिप्= थल्=थ, द्वित्व, अभ्यास संज्ञा, हलादिशेष, चुत्व)—चक्षम् थ (विकल्प से इट्='इ'—'स्वरतिसूति०')=चक्षमिथ । इट् के अभावपक्ष में—अनुस्वार, परसवर्ण—चक्षन्थ । (६) √क्षम्+लिट् (=वस्=व, द्वित्व, अभ्यासकार्य)—चक्षम् व (विकल्प से इट्)=चक्षमिव । इट् के अभावपक्ष में (म्=ं अनुस्वार='ण्' परसवर्ण)=चक्षण्व । (७) लिट् उ० पु० बहुवचन—चक्षमिम, चक्षण्म । (८) लुट्—क्षमिता, क्षन्ता (विकल्प से इट्) । (९) लृट्—क्षमिष्यति,

न षित् । 'अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा' । क्लमु ग्लानौ । 'ष्ठिवुक्लमुचमामि'ति दीर्घः । क्लाम्यति । चक्लाम । क्लमिता । क्लमिष्यति । क्लाम्यतु । अक्लमत् । अक्लमिष्यत् । मदी हर्षे । माद्यति । ममाद । मदिता । अमदत् । असु क्षेपणे । अस्यति । आस । असिता । असिष्यति । (७४२) अस्यतेस्थुक् ७।४।१७ । अस्यतेस्थुक् स्यात् अङि । 'अस्यती'त्यङ् । आस्थत् । यसु प्रयत्ने । (७४३) यसो-

---

फलभेदं श्लोकार्द्धेन सङ्गृह्णाति—**अषित इति** । अषितः क्षाम्यतेः=श्यन्विकरणपठितस्य क्षम्धातोः क्तिनि क्षान्तिरिति रूपम् । अषित्वात् 'षिद्भिदादिभ्यः' इत्यनेनाङ् न भवतीत्यर्थः । क्षमूषस्तु भौवादिकात् षितः क्तिनं प्रबाध्य षित्वादङि 'क्षमा' इति रूपम् ।

(७४२) **अस्यतेस्थुगिति** । 'ऋदृशोऽङि' इत्यत 'अङि' इत्यनुवर्तते । अतः शेषं पूरयति—**अङि पर इति** ।

क्षंस्यति । (१०) लोट्—क्षाम्यतु । यह धातु षित नहीं है । भ्वादिगण पठित 'क्षमूष्' धातु षित है ।

अषित इत्यादि । अषित √क्षमू धातु का क्तिन् प्रत्यय से 'क्षान्तिः' रूप हुआ, 'अनुनासिकस्य०' से उपधादीर्घ । षकारेत्संज्ञक क्षमूष् का 'षिद्भिदादिभ्यः' से अङ् तथा स्त्रीत्वविवक्षा में 'टाप्' होकर 'क्षमा' रूप बनता है ।

√क्लमु धातु का अर्थ—'ग्लानि होना' है । (१) क्लम्+लट् (=तिप्=ति, श्यन्='य', 'ष्ठिवुक्लमुचमाम्०' से दीर्घ)=क्लाम्यति । (२) लिट्—चक्लाम । (३) लुट्—क्लमिता । (४) लृट्—क्लमिष्यति । (५) लोट्—क्लाम्यतु । (६) लुङ्—अक्लमत् (च्लि =अङ्) । (७) लृङ्—अक्लमिष्यत् ।

√मदी धातु का अर्थ 'प्रसन्न होना' है । (१) मद् (ईकारेत्संज्ञक) +लट् (=तिप्=ति, श्यन्='य', दीर्घ—'शमामष्टानाम्०') =माद्यति । (२) लिट्—ममाद । (३) लुट्—मदिता । (४) लङ्—अमदत् ।

√असु (उकारेत्संज्ञक) धातु का अर्थ—क्षेपण (=फेंकना) है । (१) √अस्+लट् (=तिप्=ति, श्यन्='य') =अस्यति । (२) अस्+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, हलादिशेष)—अ अस् अ (अभ्यास के 'अ'='आ'—दीर्घ—'अत आदेः', आ+अ='आ' सवर्णदीर्घ)—आस । (३) लुट्—असिता । (४) लृट्—असिष्यति ।

(७४२) पद—अस्यतेः, थुक् । **अनुवृत्ति**—अङि । **विधिसूत्र** ।

मूलार्थ—'अङ्' के परवर्ती रहते अस् धातु को थुक् का आगम होता है । आस्थत् ।

विमर्श—यहाँ 'ऋदृशोऽङि गुणः' (७।४।१६) से 'अङि' पद की अनुवृत्ति आती है । तदनुसार—"अङ् के परे रहते 'अस्' धातु को थुक् (=थ) का आगम होता है ।"

उदाहरण—(१) √अस्+लुङ् (=तिप्=ति, इकारलोप, आट्='आ'—'आडजादीनाम्', च्लि, च्लि=अङ्='अ')—आ अस् अ त् ('थुक्'='थ्' का आगम—'अस्यतेस्थुक्' आ+अ='आ' वृद्धि—'आटश्च')=आस्थत् ।

√यसु धातु का अर्थ—'प्रयत्न करना' है ।

(७४३) पद—यसः, अनुपसर्गात् । **अनुवृत्ति**—वा, श्यन् । **विधिसूत्र** ।

मूलार्थ—उपसर्ग रहित 'यस्' धातु से विकल्प से श्यन् प्रत्यय होता है ।

ऽनुपसर्गात् ३।१।७१। (७४४) संयसश्च ३।१।७२। यसोऽनुपसर्गात्, संयसश्च श्यन्वा। यस्यति-यसति। संयस्यति-संयसति। अनुपसर्गात्किम्? प्रयस्यति। जसु मोक्षणे। जस्यति। जजास। अजसत्। तसु उपक्षये। दसु च। तस्यति। ततास। अतसत्। दस्यति। ददास। अदसत्। वसु स्तम्भे। वस्यति। 'न शसददे'ति निषेधः। ववास। ववसतुः। 'वशादिरि'ति मते तु-वेसतुः। वेसुः। व्युष विभागे। व्युष्यति। वुव्योष। विस प्रेरणे। विस्यति। विवेस। अविसत्। कुस संश्लेषणे। कुस्यति। चुकोस। कोसिता। अकुसत्। वुस उत्सर्गे। वुस्यति। वुवोस। अवुसत्। मुस खण्डने।

(७४३, ७४४) 'यसोऽनुपसर्गात्' 'संयसश्च' इति। सूत्रद्वयमिदम्। 'दिवादिभ्यः श्यन्' इत्यतः 'श्यन्' इति, 'वा भ्राश०' इत्यतः 'वे'ति चानुवर्तते। अनुपसर्गाद्यशः श्यन्वा स्यादिति प्रथमसूत्रार्थः। सम्पूर्वात् यशेर्नित्यमेव श्यनः प्राप्तौ वा श्यन्

विमर्श—यहाँ 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (३।१।७०) से 'वा' तथा 'दिवादिभ्यः श्यन्' (३।१।६९) से 'श्यन्' पदों की अनुवृत्ति आती है। तदनुसार—"अनुपसर्गक 'यस्' धातु से विकल्प से श्यन् प्रत्यय होता है।"

(७४४) पद—संयसः, च। **अनुवृत्ति**—वा, श्यन्। **विधिसूत्र।**

मूलार्थ—'सम्' पूर्वक 'यस्' धातु से श्यन् प्रत्यय विकल्प से होता है।

विमर्श—पूर्ववत् 'वा' तथा 'श्यन्' की अनुवृत्ति आ रही है। अतः 'सम्' उपसर्गपूर्वक यस् धातु से विकल्प से श्यन् (=य) होता है।

उदाहरण—(१) √यस्+लट् (=तिप्=ति, विकल्प से श्यन्='य्'—'यसोऽनुपसर्गात्') =यस्यति। श्यन् के अभावपक्ष में शप्='अ'—यसति। (२) सम्+यस्+लट् (=तिप् ति, विकल्प से श्यन्='य'—'संयसश्च')=संयस्यति। श्यन् के अभावपक्ष में शप्—संयसति।

प्रत्युदाहरण—प्र+यस्+लट् (=ति, 'यसोऽनुपसर्गात्' सूत्र द्वारा उपसर्ग रहित यस् धातु से विकल्प से श्यन् किये जाने से यहाँ (७४३ से) श्यन् नहीं हुआ, अपितु दिवादित्वात् नित्य श्यन्=य)=प्रयस्यति।

√जसु धातु का अर्थ—मोक्षण (छुड़ाना) है। (१) लट्—जस्यति। (२) लिट्—जजास। (३) लुङ्—अजसत् (अङ्)। √तसु (उदित्) धातु 'उपक्षय'=(क्षीण होना) अर्थ में है। (१) लट्—तस्यति। (२) लिट्—ततास। (३) लुङ्—अतसत्। √दसु (उकारेत्संज्ञक) धातु भी 'उपक्षय' अर्थ में है। (१) लट्—दस्यति। (२) लिट्—ददास। (३) लुङ्—अदसत्।

√वसु (उदित्) धातु स्तम्भ (रोकना) अर्थ में है। (१) लट्—वस्यति। (२) लिट्—ववास, ववसतुः (प्राप्त एत्वाभ्यास लोप का निषेध—'न शसददवादिगुणानाम्')। कुछ आचार्य वशादि मानकर एत्व और अभ्यास का लोप-विधान करते हैं। उनके मत में 'वेसतुः' 'वेसुः' रूप बनते हैं।

√'व्युष' धातु का अर्थ—'विभाग करना' है। (१) लट्—व्युष्यति। (२) लिट्—वुव्योष। √विस् का अर्थ 'प्रेरणा देना' है। (१) लट्—विस्यति। (२) लिट्—विवेस। (३) लुङ्—अविसत्। √कुस् का अर्थ—संश्लेषण (चिपकना) है। (१) लट्—कुस्यति। (२) लिट्—चुकोस। (३) लुट्—कोसिता (इट्, गुण)। (४) लुङ्—अकुसत्। √वुस्

मुस्यति । मुमोस । मसी परिणामे । परिणामो विकारः । मस्यति । ममास । अमसत् । लुठ विलोडने । लुठ्यति । लुलोठ । उच समवाये । उच्यति । गुणः । 'अभ्यासस्यासवर्णे' । उवङ् । उवोच । ऊचतुः । ऊचुः । मा भवानुचत् । भृशु भ्रंशु अधःपतने । भृश्यति । बभर्श । अभृशत् । 'अनिदिताम्'ति नलोपः । भ्रश्यति । बभ्रंश । अभ्रशत् । वृश वरणे । वृश्यति । ववर्श । अवृशत् । कृश तनूकरणे । कृश्यति । चकर्श । ञितृषा पिपासायाम् । तृष्यति । ततर्ष । हृष तुष्टौ । श्यन्नङौ भौवादिकाद्विशेषः । हृष्यति । जहर्ष । अहृषत् । रुष रिष हिंसायाम् । रुष्यति । रुरोष । रिष्यति । रिरेष । 'तीषसहे'ति वेट् ।

भवतीति द्वितीयसूत्रस्यार्थः । **उवोच** । उच्धातोर्लिटि तिपि, तिपो णल्यनुबन्धलोपे द्वित्वेऽभ्यासत्वे हलादिशेषे 'अभ्यासस्यासवर्णे' इत्युवङि, गुणे 'उवोच' इति ।

अभ्रशदिति । भ्रंश्धातोर्लुङि तिपि, अनुबन्धलोपे, तिप इकारलोपे अडागमेऽनुबन्धलोपे 'अभ्रंश् त्' इति जाते, च्लौ, च्लेः स्थाने पुषादित्वादङि अनुबन्धलोपे, 'अनिदिताम्'ति नलोपे 'अभ्रशत्' इति रूपम् ।

धातु का अर्थ 'त्याग करना' है । (१) लट्—वुस्यति । (२) लिट्—वुवोस । (३) लुङ्—अवुसत् । **√मुस्** धातु का अर्थ—'खण्डन करना' है । (१) लट्—मुस्यति । (२) लिट्—मुमोस । **√मसी** धातु—'विकार' अर्थ में है । (१) लट्—मस्यति । (२) लिट्—ममास । (३) लुङ्—अमुसत् । **√लुठ** धातु का अर्थ विलोडन='मथना' है । (१) लट्—लुठ्यति । (२) लिट्—लुलोठ ।

√उच धातु 'समवाय' अर्थ में है । (१) लट्—उच्यति । (२) √उच्+लिट् (=तिप्=णल्='अ' द्वित्व, अभ्यास संज्ञा, हलादिशेष)—उ·उच् अ ('उ'='ओ'—गुण, उ=उवङ्='उव्'—'अभ्यासस्यासवर्णे')=उवोच । (३) √उच्+लिट् (=तस्=अतुस्, द्वित्व, अभ्यासकार्य)—उ उच् अतुस् (उ+उ='ऊ' दीर्घ, स्=र्=:) =ऊचतुः । (४) लिट् प्र० पु० बहु०—ऊचुः । (५) मा भवान् उचत् (लुङ्, अट् का निषेध) ।

√भृशु तथा भ्रंशु धातु का अर्थ—'नीचे गिरना' है । (१) भृश्+लट् (=ति, श्यन्=='य')=भृश्यति । (२) √भृश्+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा 'ऋ'='अ'—'उरत्', रपर, हलादिशेष, 'भ्'='ब्'—अभ्यासे चर्च)—ब भृ श् अ (गुण, रपर)=बभर्श । (३) लुङ्—अभृशत् । (१) **भ्रंश्**+लट् (=ति, श्यन्, 'न्' का लोप—'अनिदिताम्') =भ्रश्यति । (२) लिट्—बभ्रंश । (३) लुङ्—अभ्रशत् । **√कृश्** धातु का अर्थ 'तनूकरण=दुर्बल होना' है । (१) लट्—कृश्यति । (२) लिट्—चकर्श ।

√ञितृषा का अर्थ पिपासा='प्यास लगना' है । (१) √तृष्+लट् (=तिप्—ति, श्यन्—'य')=तृष्यति । (२) लिट्—ततर्ष ।

√हृष् धातु का अर्थ—'प्रसन्न होना' है । यह धातु भ्वादिगण में भी पठित है, किन्तु दिवादि में इसका पाठ होने से 'श्यन्' विकरण होता है; लुङ् में च्लि के स्थान में 'अङ्' होता है । यही विशेष है । (१) लट्—हृष्यति । (२) √हृष्+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, अत्व, रपर, हलादिशेष 'ह्'='झ्', 'झ्'='ज्' गुण, रपर)=जहर्ष । (३) लुङ्—अहृषत् ।

√रुष, रिष धातु 'हिंसा' अर्थ में है । (१) लट्—रुष्यति । (२) लिट्—रुरोष । इसी प्रकार—रिष्यति । रिरेष । (३) लुट् में 'तीषसह०' से विकल्प से 'इट्' होता है—रोषिता,

रोषिता-रोष्टा । रेषिता-रेष्टा । कुप क्रोधे । कुप्यति । चुकोप । गुप व्याकुलत्वे । गुप्यति । जुगोप । लुभ गार्ध्ये । गार्ध्यमाकाङ्क्षा । लुभ्यति । लुलोभ । लोभिता-लोब्धा । लोभिष्यति । लुभ्यतु । भ्वादेरवृत्कृतत्वाल्लोभतीत्यप्याहुः । क्षुभ सञ्चलने । क्षुभ्यति । चुक्षोभ । णभ तुभ हिंसायाम् । क्लिदू आर्द्रीभावे । क्लिद्यति । चिक्लेद । चिक्लेदिथ-चिक्लेत्थ । चिक्लिदिव-चिक्लिद्व । चिक्लिदिम-चिक्लिद्म । क्लेदिता-क्लेत्ता । क्लेदिष्यति-क्लेत्स्यति । ञिमिदा स्नेहने । (७४५) मिदेर्गुणः ७।३।८२ । मिदेरिको गुणः । स्यादित्संज्ञकशकारादौ प्रत्यये परे । मेद्यति । मिमेद । अमिदत् । ञिक्ष्विदा स्नेहन-मोचनयोः । क्ष्विद्यति । चिक्ष्वेद । ऋधु वृद्धौ । ऋध्यति । आनर्ध ।

भ्वादेरवृत्कृतत्वादिति । भ्वादिगणस्याऽवृत्करणात्=समाप्तेरभावात् (भ्वादेराकृतिगणत्वात्) शपि 'लोभती'त्यपि रूपम् ।

(७४५) **मिदेर्गुण इति ।** 'इको गुणवृद्धी' इत्यत इक इति षष्ठ्यन्तमुपतिष्ठते । तदाह—**मिदेरिक इति । मेद्यति ।** मिद्धातोर्लटि तिपि श्यनि, अनुबन्धलोपे 'मिदेर्गुणः' इति गुणे 'मेद्यति' इति ।

रोष्टा । रेषिता, रेष्टा । **√कुप्** धातु का अर्थ—'क्रोध करना' है । (१) लट्—कुप्यति । (२) लिट्—चुकोप । **√गुप्** धातु का अर्थ—'व्याकुल होना' है । (१) लट्—गुप्यति । (२) लिट्—जुगोप ।

√लुभ धातु 'आकाङ्क्षा' अर्थ में है । (१) लट्—लुभ्यति । (२) लिट्—लुलोभ । (३) लुट् में विकल्प से इट्—लोभिता । इट् के अभावपक्ष में—लोब्धा । (४) लृट्—लोभिष्यति । (५) लोट्—लुभ्यतु । भ्वादिगण की समाप्ति न होने से (आकृतिगण होने से) शप्='अ' विकरण, गुण—लोभति ।

√क्षुभ धातु का अर्थ 'सञ्चलन' (=क्षुभित होना) है । (१) लट्—क्षुभ्यति । (२) लिट्—चुक्षोभ । **√णभ, तुभ** धातु 'हिंसा' अर्थ में हैं ।

√क्लिद् धातु का अर्थ—'गीला होना' है । (१) लट्—क्लिद्यति । (२) लिट्—चिक्लेद । (३) √क्लिद्+लिट् (=सिप्=थल्=थ, द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'क्'='च्'—'कुहोश्चुः' विकल्प से इट्='इ'—'स्वरतिसूति', गुण)=चिक्लेदिथ । इट् के अभावपक्ष में—चिक्लेत्थ । (४) लिट् उ० पु० द्विव०—चिक्लिदिव, चिक्लिद्व (विकल्प से इट्) । (५) लिट् उ० पु० बहुव०—चिक्लिदिम, चिक्लिद्म । (६) लुट्—क्लेदिता, क्लेत्ता (विकल्प से इट्, गुण) । (७) लृट्—क्लेदिष्यति, क्लेत्स्यति ।

ञिमिदा (=मिद्) धातु 'स्नेहन' अर्थ में है ।

(७४५) पद—मिदेः, गुणः । **अनुवृत्ति**—शिति । **विधिसूत्र ।**

मूलार्थ—इत्संज्ञक शकारादि प्रत्यय के परवर्ती रहते मिद् धातु सम्बन्धी 'इक्' को गुण होता है ।

विमर्श—'ष्ठिवुक्लमुचमां शिति' (७।३।७५) से 'शिति' पद की अनुवृत्ति आती है । 'इको गुणवृद्धी' परिभाषा द्वारा षष्ठ्यन्त 'इकः' पद की उपस्थिति होती है । तदनुसार—'इत्संज्ञक शकारादि प्रत्यय के परे रहते मिद के इक् के स्थान में गुण होता है ।"

उदाहरण—(१) √मिद्+लट् (=तिप्=ति, श्यन्='य' 'इ'='ए'—गुण—'मिदे-

आर्द्धत् । गृधु अभिकाङ्क्षायाम् । गृध्यति । जगर्द्ध । अगृधत् । वृत् । पुषादयः समाप्ताः । इति परस्मैपदिनः ।

अथात्मनेपदिनः । षूङ् प्राणिप्रसवे । सूयते । सुषुवे । 'स्वरती'ति विकल्पं बाधित्वा 'श्र्युकः किती'ति निषेधे प्राप्ते । क्रादिनियमान्नित्यमिट् । सुषुविषे । सुषुविवहे । सुषुविमहे । सोता । सविता । सविष्यते । सोष्यते । दूङ् परितापे । दूयते । दुदुवे । दीङ् क्षये । दीयते । (७४६) **दीङो युडचि क्ङिति** ६।४।६३ । दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात् । * वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ * । दिदीये । (७४७)

सूयते । 'षूङ् प्राणिप्रसवे' इत्यस्माद्धातोः लटि तत्स्थाने आत्मनेपदे तप्रत्यये 'दिवादिभ्यः श्यन्' इति श्यनि, अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे 'धात्वादेः षः सः' इति षस्य सत्वे 'सूयते' इति सिद्धम् ।

(७४६) **दीङो युडचीति** । 'आर्धधातुके' इत्यधिकृतमचा विशेष्यते, तेन तदादिविधिः । 'अची'त्यत्र षष्ठ्यर्थे सप्तमी । अत आह—**दीङः परस्येत्यादिना** । **दिदीये** । दीङ्धातोर्लिटि तत्स्थाने प्रथमपुरुषैकवचने तप्रत्यये. 'लिटस्तझयोरेशिरेच्' इति 'त'

गुणः')=मेद्यति । (२) लिट्—मिमेद (३) लुङ्—अमिदत् (अङ्) । √**ञिक्ष्विदा** (क्ष्विद्) धातु 'स्नेहन एवं मोचनार्थक' है । (१) लट्—क्ष्विद्यति । (२) लिट्—चिक्ष्वेद ।

√**ऋधु** धातु का अर्थ—'बढ़ना' है । (१) लट्—ऋध्यति । (२) √ऋध्+लिट् (=तिप् =णल्=अ, द्वित्व, अभ्यासत्व, अत्व, रपर, हलादिशेष)—अ ऋ ध् अ (अ='आ' दीर्घ—'अत आदेः' नुम्—'इजादेश्च', गुण, रपर)=आनर्ध । (३) लुङ्—आर्धत् । '**गृधु**' धातु 'अभिकाङ्क्षा' अर्थ में है । (१) लट्—गृध्यति । (२) लिट्—जगर्ध । (३) लुङ्—अगृधत् (च्लि=अङ्) । **पुषादिगण समाप्त हुआ** । परस्मैपदी धातुओं के रूपों की सिद्धि-प्रक्रिया समाप्त हुई ।

√**षूङ्**=(सू) धातु का अर्थ 'पैदा होना' (=जन्म लेना) है । (१) √षू ('ष्'='स्'—'धात्वादेः षः सः')—सू+लट् (=आत्मनेपद 'त' श्यन्='य'—'दिवादिभ्यः श्यन्' 'अ'='ए'—'टित आत्मनेपदानां टेरे')=सूयते । (२) √सू+लिट् (=त=एश्=ए, द्वित्व, अभ्यास संज्ञा, ह्रस्व, उवङ्=उव् , षत्व)=सुषुवे । (३) √सू+लिट् (=थास्=से—'थासः से', द्वित्व, अभ्यास संज्ञा, ह्रस्व)—सुसू से ('स्वरतिसूति' से विकल्प से प्राप्त इट् का 'श्र्युकः किति' से निषेध प्राप्त होने पर क्रादिनियम से नित्य इट्='इ', उवङ् , षत्व)=सुषुविषे । (४) लिट् उ० पु० द्विवचन, बहुवचन में क्रादिनियम से नित्य इट्—सुषुविवहे । सुषुविमहे । (५) सू+लुट् (=त=डा=आ, तास्)—सू तास् आ (विकल्प से इट्—'स्वरतिसूति०' 'उ'='ओ' गुण, 'ओ'='अव्' आदेश, टिलोप)=सविता । इट् के अभावपक्ष में—सोता । (६) लृट्—सविष्यते, सोष्यते (विकल्प से इट्) ।

√**दूङ्** (=दू) धातु का अर्थ 'दुःखी होना' है । इस धातु के रूप भी 'षूङ्' के समान ही बनते हैं । केवल विकल्प से इट् नहीं होता । यह धातु सेट् भी है । (१) लट्—दूयते (२) लिट्—दुदुवे ।

√**दीङ्** धातु का अर्थ 'क्षय' (=नाश होना) है । (१) लट्—दीयते ।

(७४६) पद—दीङः, युट् , अचि, क्ङिति । **अनुवृत्ति**—आर्धधातुके ।

मूलार्थ—दीङ् धातु से परवर्ती अजादि कित् ङित् आर्धधातुक को युट् का आगम होता है ।

मीनातिमिनोतिदीङां ल्यपि च ६।१।५०। एषामात्त्वं ल्यपि, चाद् अशित्येज्निमित्ते। दाता। दास्यते। अदास्त। डीङ् विहायसा गतौ। डीयते। डिड्ये। पीङ् पाने। पीयते। पिप्ये। माङ् माने। मायते। ममे। माता। प्रीङ् प्रीतौ। अकर्मकः। प्रीयते।

इत्यस्य स्थाने एशादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्याससंज्ञायाम् 'ह्रस्वः' इत्यनेन ह्रस्वत्वे 'दि दी ए' इति जाते, युटि प्राप्ते, परत्वात् 'एरनेकाचः' इति यणि प्राप्ते 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति नित्यत्वात्—'दीङो युडचि क्ङिति' इत्यनेन युडागमेऽनुबन्धलोपे 'दिदीये' इति रूपम्।

(७४७) **मीनातिमिनोतीति।** 'आदेच उपदेशेऽशिती'त्यतः आदित्यनुवर्तते। तदाह—**एषामात्वं स्यादिति। अदास्त।** दीङ्धातोर्लुङि तत्स्थाने तादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'मीनातिमिनोतिदीङां ल्यपि चे'त्यनेन ईकारस्य आत्वे 'च्लि लुङि' इति च्लौ, 'च्लेः सिच्' इत्यनेन सिच्यनुबन्धलोपे 'अदास्त' इति। अत्र 'दाधाघ्वदाप्' इति घुसंज्ञायां 'स्थाघ्वोरिच्चे'त्याकारस्य इदादेशे प्राप्ते 'स्थाघ्वोरित्वे प्रतिषेधो वाच्यः' इतीत्वनिषेधो भवति।

विमर्श—'आर्धधातुके' का अधिकार है। अतः "दीङ् धातु से परे अजादि कित् और ङित् आर्धधातुक को युट्='य्' का आगम होता है।"

(वा०) **वुग्युटाविति।** उवङ् और यण् के विषय में वुक् और युट् सिद्ध होते हैं।

उदाहरण—(१) √दी+लिट् (=त, द्वित्व, अभ्यास संज्ञा, ह्रस्व, त=एश्='ए'—'लिटस्तझयोरेशिरेच्', 'दीङो युडचि क्ङिति' से युट् प्राप्त होने पर, परत्वात् 'एरनेकाचः०' से यण् की प्राप्ति 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' से युट् को सिद्ध विधान करने से 'यण्' का प्रतिषेध, युट्='य्')=दिदीये।

(७४७) पद—मीनातिमिनोतिदीङाम्, ल्यपि, च। **अनुवृत्ति**—आत्। **विधिसूत्र।**

मूलार्थ—मीञ् (हिंसा करना), नि (फेंकना) और दीङ् धातु को ल्यप् के परवर्ती रहने पर आत्व होता है। चकारात् एच्-निमित्तक अशित् प्रत्यय के विषय में भी आत्व होता है। दाता, दास्यते इत्यादि।

विमर्श—'आदेच उपदेशेऽशिति' (६।१।४४) से 'आत्' की अनुवृत्ति आती है। तदनुसार—"मीञ्, मिञ् और दीङ् धातु को 'ल्यप्' परवर्ती रहते आत्व होता है, चकारात् (सूत्र में 'च' पद होने से) शित्-भिन्न एच् निमित्त प्रत्यय के परवर्ती रहते भी आत्व होता है।" यहाँ तास्, स्य आदि प्रत्यय शित्-भिन्न हैं तथा गुण, वृद्धि के हेतु भी हैं। अतः इनके परवर्ती रहते भी उक्त धातुओं को आकार आदेश होता है।

उदाहरण—(१) √दी+लुट् (=त=डा='आ' तास्)—दी तास् आ ('ई'='आ'—'मीनातिमिनोति०' टिलोप)=दाता। (२) लृट्—दास्यते। (३) √दी+लुङ् (=त, च्लि, च्लि=सिच्='स्', आत्व—'मीनातिमिनोतिदीङां ल्यपि च', 'स्थाघ्वोरिच्च' से प्राप्त इत्व का 'स्थाघ्वोरित्वे दीङः प्रतिषेधः' से निषेध, अट्)=अदास्त।

√डीङ् (=डी) धातु का अर्थ—'उड़ना' है। (१) लट्—डीयते। (२) √डी+लिट् (=त=एश्=ए, द्वित्व, अभ्यास संज्ञा, ह्रस्व)—डि डी ए ('ई'='य्'—यण्—'एरनेकाचः') =डिड्ये। √पीङ् धातु का अर्थ—'पीना' है। (१) लट्—पीयते। (२) लिट्—पिप्ये

पिप्रिये । जनी प्रादुर्भावे । (७४८) ज्ञाजनोर्जा ७।३।७९ । अनयोर्जादेशः स्यात् शिति परे । जायते । 'गमहनजने'त्युपधायाः लोपः । 'स्तोः श्चुना श्चुः' । जज्ञे । जनिता । जनिष्यते । (७४९) दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ३।१।६१ । एभ्यश्च्लेश्चिण्वा स्यादेकवचने तशब्दे परे । (७५०) चिणो लुक् ६।४।१०४ । चिणः परस्य त-शब्दस्य लुक् स्यात् । 'अत उपधाया' इति वृद्धौ प्राप्तायाम् । (७५१)

(७४८) **ज्ञाजनोर्जा** । 'ष्ठिवुक्लमुचमामि'त्यतः शितीत्यनुवर्तते । तदाह—**अनयोरित्यादि** । **जायते** । जन्धातोर्लटि तादेशे टेरेत्वे 'दिवादिभ्यः श्यन्' इति श्यनि अनुबन्धलोपे 'ज्ञाजनोर्जा' इत्यनेन 'जन्' इत्यस्य स्थाने जादेशे 'जायते' इति ।

(७४९) **दीपजनेत्यादि** । 'च्लेः सिच्' इत्यस्मात् च्लेरिति, 'चिण् ते पदः' इत्यस्मात् 'चिण् ते' इति चानुवर्तते । तदाह—**एभ्यश्च्लेरिति** ।

(७५०) **चिणो लुगिति** । स्पष्टम् ।

(यण्) । √**माङ्** (मा) धातु का अर्थ—'मापना' है । (१) लट्—मायते । (२) लिट्—ममे । (३) लुट्—माता । √**प्रीङ्** (प्री) धातु का अर्थ 'प्रेम करना' है । (१) लट्—प्रीयते । लिट्—पिप्रिये (इयङ्) ।

√**जनी** (जन्) धातु का अर्थ—'उत्पन्न होना' है ।

(७४८) पद—ज्ञाजनोः, जा । **अनुवृत्ति**—शिति । **विधिसूत्र** ।

मूलार्थ—शित् प्रत्यय के परे रहते ज्ञा और जन् धातु को 'जा' आदेश होता है । जायते इत्यादि ।

विमर्श—'ष्ठिवुक्लमु०' (७।३।७५) से 'शिति' पद की अनुवृत्ति आ रही है । अतः "शकारेत्संज्ञक प्रत्यय के परवर्ती रहते ज्ञा और जनी धातु के स्थान में 'जा' आदेश हो जाता है ।"

उदाहरण—(१) √जन्+लट् (=त, श्यन्='य', 'जन्'='जा'—'ज्ञाजनोर्जा' 'टि' को एत्व)=जायते । (२) √जन्+लिट् (=त, द्वित्व, अभ्यासत्व, हलादिशेष)—ज जन् त (त=एश्='ए'—'लिटस्तझयोरेशिरेच्', उपधा 'अ' का लोप—'गमहन०')—ज जन् ए ('न्'='ञ्'—श्चुत्व—'स्तोः श्चुना श्चुः', ज्+ञ्=ज्ञ्)=जज्ञे । (३) लुट्—जनिता । (४) लृट्—जनिष्यते ।

(७४९) पद—दीपजनबुधपूरितायिप्यायिभ्यः, अन्यतरस्याम् । **अनुवृत्ति**—च्लेः, चिण् ते । **विधिसूत्र** ।

मूलार्थ—दीप आदि धातुओं से उत्तरवर्ती च्लि को चिण् आदेश होता है, एकवचन त शब्द के परे विकल्प से ।

विमर्श—प्रकृत सूत्र में 'च्लेः सिच्' (३।१।४४) से 'च्लेः' तथा 'चिण् ते पदः' (३।१।६०) से 'चिण् ते' पदों की अनुवृत्ति आती है । तदनुसार—"दीप् (=चमकना), जन् (=उत्पन्न होना), बुध् (=जांनना), पूरी (=भरना), ताय् (=फैलना), प्याय् (=फूलना), इन धातुओं से परवर्ती च्लि के स्थान में विकल्प से चिण् (='इ') आदेश होता है, एकवचन 'त' शब्द के परे रहते ।

(७५०) पद—चिणः, लुक् । **विधिसूत्र** ।

मूलार्थ—चिण् से परवर्ती 'त' शब्द का लुक् होता है । 'अत उपधायाः' से वृद्धि प्राप्त होने पर··· ।

जनिवध्योश्च ७।३।३५। जनिवध्योश्च न वृद्धिश्चिणि, ञ्णिति कृति च। अजनि। अजनिष्ट। अजनिष्यत। दीपी दीप्तौ। दीप्यते। दिदीपे। दीपिता। अदीपि। अदीपिष्ट। अदीपिष्यत। पद गतौ। पद्यते। पेदे। पत्ता। पद्येत। पत्सीष्ट। **(७५२) चिण्ते पदः ३।१।६०।** पदश्च्लेश्चिण् स्यात्तशब्दे परे। अपादि। अपत्साताम्।

---

(७५१) **जनिवध्योश्चेति।** 'अत उपधायाः' इत्यत उपधाया इति 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'नोदात्तोपदेश०' इत्यतो नेति, 'आतो युक्' इत्यतः चिण्कृतोरिति 'अचो ञ्णिति' इत्यतो ञ्णिति चानुवर्तते। अत आह—**जनिवध्योरिति। अजनि, अजनिष्ट।** 'जनी प्रादुर्भावे' इत्यस्माद्धातोर्लुङि तप्रत्यये अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इति विभाषया च्लेश्चिणि अनुबन्धलोपे 'अ जन् इ त' इति जाते 'अत उपधायाः' इत्यनेन उपधावृद्धौ प्राप्तायाम् 'जनिवध्योश्च' इत्यनेन तन्निषेधे 'चिणो लुक्' 'इत्यनेन् तप्रत्ययस्य लोपे 'अजनि' इति। चिणभावपक्षे च्लौ, च्लेः सिच्यनुबन्धलोपे 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे 'अजनिष्ट' इति।

(७५२) **चिण्ते पद इति।** 'च्लेस्सिच्' इत्यस्मात् च्लेरित्यनुवर्तते। तदाह—**पदश्च्लेरिति।** अपादि। पदधातोर्लुङि तादेशे च्लौ 'चिण्ते पदः' इति च्लेः चिणादेशेऽनुबन्धलोपे 'चिणो लुक्' इति तलोपे, अटि, 'अत उपधायाः' इति वृद्धौ 'अपादि' इति।

---

(७५१) पद—जनिवध्योः, च। **अनुवृत्ति**—न, चिण्कृतोः, ञ्णिति, वृद्धिः। **विधिसूत्र।**

मूलार्थ—चिण् और ञित्, णित्, कृत् के परवर्ती रहते जन् और वध् को वृद्धि नहीं होती। अजनि, अजनिष्ट इत्यादि।

विमर्श—सूत्रार्थ की पूर्णता हेतु 'नोदात्तोपदेशस्य' (७।३।३४) से 'न', 'आतो युक् चिण्कृतोः' (७।३।३३) से 'चिण्कृतोः', 'अचो ञ्णिति' (७।२।११५) से 'ञ्णिति' तथा 'मृजेर्वृद्धिः' (७।२।११४) से 'वृद्धिः' की अनुवृत्ति आती है। अतः "जन् और वध् धातुओं की उपधा को वृद्धि नहीं होती, चिण् तथा ञित्, णित्, कृत् प्रत्यय परे रहते।"

उदाहरण—(१) √जन्+लुङ् (=त, च्लि, च्लि=चिण्='इ' विकल्प से—'दीपजनबुध०', 'अत उपधायाः' से प्राप्त वृद्धि का 'जनिवध्योश्च' से निषेध, अट्='अ' का आगम, 'त' का लुक्—'चिण् ते पदः')=अजनि। चिण् के अभावपक्ष में (च्लि=सिच्='स्')—अ जन् स् त (इट्='इ'—'आर्धधातुकस्येड् वलादेः' षत्व, ष्टुत्व)=अजनिष्ट। (२) लृङ्—अजनिष्यत।

√दीपी (=दीप्) धातु का अर्थ—'चमकना' है। (१) लट्—दीप्यते। (२) लिट्—दिदीपे। (३) लुट्—दीपिता (इट्)। (४) लुङ् में विकल्प से च्लि=चिण्—अदीपि, अदीपिष्ट। (५) लृङ्—अदीपिष्यत।

√पद धातु का अर्थ 'जाना' है। (१) लट्—पद्यते। (२) लिट्—पेदे (एत्व, अभ्यास का लोप)। (३) लुट्—पत्ता। (४) विधिलिङ्—पद्येत। (५) आशीर्लिङ्—पत्सीष्ट।

(७५२) पद—चिण्, ते, पदः। **अनुवृत्ति**—च्लेः। **विधिसूत्र।**

मूलार्थ—'त' शब्द के परवर्ती रहते पद धातु से उत्तरवर्ती 'च्लि' के स्थान में 'चिण्' आदेश होता है। अपादि। अपत्सातान् इत्यादि।

अपत्सत । खिद दैन्ये । खिद्यते । चिखेद । खेत्ता । खेत्स्यते । विद सत्तायाम् । विद्यते । विविदे । वेत्ता । वित्सीष्ट । अवित्त । बुध अवगमने । बुध्यते । बुबुधे । बोद्धा । 'एकाचो बशो भष् झषन्तस्ये'ति भष्भावः । भोत्स्यते । भुत्सीष्ट । अबोधि । अबुद्ध । अभुत्साताम् । अभोत्स्यत । युध सम्प्रहारे । युध्यते । युयुधे । योद्धा । अयुध्यत ।

बोद्धा । 'बुध अवगमने' इत्यस्माद्धातोर्लुटि तत्स्थाने तादेशे, तासि, 'लुटः प्रथमस्य डारौरसः' इति 'त' इत्यस्य स्थाने डादेशेऽनुबन्धलोपे टेर्लोपे 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे 'झलां जश् झशि' इति जश्त्वेन दकारे 'पुगन्तलघूपधस्य चे'त्यनेन गुणे 'बोद्धा' इति । **अबोधि** । बुध्धातोर्लुङि आत्मनेपदे 'त' प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'दीपजनबुध०' इत्यादिना विकल्पेन च्लेः चिणादेशेऽनुबन्धलोपे लघूपधगुणे 'चिणो लुक्' इत्यनेन तप्रत्ययस्य लोपे संयोगे च कृते 'अबोधि' इति । चिणोऽभावपक्षे 'अ बुध् त' इति स्थिते, च्लौ 'च्लेः सिच्' इति सिच्यनुबन्धलोपे 'झलो झलि' इत्यनेन सिचः सकारलोपे 'झषस्तथोर्धोऽधः'

विमर्श—सूत्र में स्थानीवाचक पद का अभाव है। अतः 'च्लेः सिच्' से 'च्लेः' पद की अनुवृत्ति आती है। तदनुसार—"पद धातु से उत्तरवर्ती 'च्लि' के स्थान में 'चिण्' आदेश होता है, एकवचन 'त' शब्द के परे रहते।"

उदाहरण—(१) √पद्+लुङ् (=त, अट्, च्लि, च्लि=चिण्='इ'—'चिण्ते पदः') —अ पद् इ त ('त' का लोप—'चिणो लुक्', उपधावृद्धि)=अपादि। (२) √पद्+लुङ् (=आताम्, अट्, च्लि, च्लि=सिच्='स्', 'द्'='त्'—'चर्त्व')=अपत्साताम्। (३) √पद्+लुङ् ((=झ, अट्, च्लि, च्लि=सिच्='स', झ्=अत्—'आत्मनेपदेष्वनतः' 'द्'='त्')=अपत्सत।

√खिद धातु का अर्थ—'खिन्न होना' है। (१) लट्—खिद्यते। (२) लिट्—चिखेद। (३) लुट्—खेत्ता। (४) लृट्—खेत्स्यते।

√विद धातु का 'सत्ता' (होना) अर्थ है। (१) लट्—विद्यते। (२) लिट्—विविदे। (३) लुट्—वेत्ता। (४) √विद्+आशीर्लिङ् (=त, सीयुट्=सीय्, 'लिङ्सिचावात्मनेपदेषु' से सीयुट् के कित् हो जाने से प्राप्त गुण का निषेध, सुट्='स')—विद् सीय् स् त ('य्' का लोप—'लोपो व्योर्वलि', 'द्'='त्', षत्व, ष्टुत्व)=वित्सीष्ट। (५) लुङ्—अवित्त ('स्' का लोप)।

√बुध् धातु का अर्थ—'जानना' है। (१) लट्—बुध्यते। (२) लिट्—बुबुधे। (३) √बुध्+लुट् (=त, तास्, त=डा='आ'—'लुटः प्रथमस्य डारौरसः' 'टि'—आस् का लोप—'डित्त्वसामर्थ्यादभस्यापि टेर्लोपः', 'त्'='ध्'—झषस्तथोर्धोऽधः' प्रथम 'ध्'='द्'—जश्त्व—'झलां जश् झशि' उ='ओ'—गुण—'पुगन्त०')=बोद्धा। (४) √बुध्+लृट् (=त, स्य)—बुध् स्य त ('ब्'='भ्' भष्भाव—'एकाचो बशो भष्०' आर्धधातुक संज्ञा, इट्='इ', लघूपध गुण, चर्त्व—'खरि च')=भोत्स्यते। (५) आशीर्लिङ्—भुत्सीष्ट। (६) √बुध्+लुङ् (=त, अट्, च्लि, च्लि=विकल्प से चिण्=इ, 'त' का लोप—'चिणो लुक्' लघूपध गुण)=अबोधि। 'चिण्' के अभावपक्ष में—'च्लि=सिच्='स्'—'अबुध् स् त' ('स्' का लोप—'झलो झलि', 'त्'='ध्'—'झषस्तथोर्धोऽधः' 'ध्'='द्'—'झलां जश् झशि')=अबुद्ध।

युध्येत । युत्सीष्ट । अयुद्ध । अयुत्स्यत । कथं युध्यतीति । युधमिच्छतीति क्यच् । 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमि'ति वा । सृज विसर्गे । अकर्मकः । सृज्यते । ससृजे । 'सृजिदृशोर्झल्यमकिती'त्यमागमः । स्रष्टा । स्रक्ष्यते । स्रक्षीष्ट । 'लिङ्सिचावि'-ति कित्त्वम् । असृष्ट । असृक्षाताम् । मीङ् हिंसायाम् । हिंसाऽत्र प्राणवियोगः । मीयते । मिम्ये । मीयताम् । अमीयत । मीयेत । मेषीष्ट । अमेष्ट । अमेषाताम् ।

इत्यनेन तकारस्य धकारे 'झलां जश् झशि' इति जश्त्वेन धकारस्य दकारे 'अबुद्ध' इति ।

स्रक्ष्यते । सृजधातोर्लृटि तादेशे 'स्यतासी लृलुटोः' इति स्यप्रत्यये टेरेत्वे 'सृजिदृशोर्झल्यमकिति' इत्यमि अनुबन्धलोपे 'मिदचोऽन्त्यात्परः' इति मित्त्वेनाऽन्त्यादचः परोऽकारो जातः, 'सृ अ ज् स्य ते' इति स्थिते 'इको यणचि' इति यणि 'व्रश्चे'त्यादिना जकारस्य षकारे 'षढोः कः सि' इति कत्वे 'आदेशप्रत्यययोः' इति षत्वे क्-ष् संयोगे क्षे जाते, 'स्रक्ष्यते' इति ।

√बुध् धातु, लुङ् लकार के रूप

	एक०	द्वि०	बहु०
प्र० पु०—	अबोधि, अबुद्ध	अभुत्साताम्	अभुत्सत
म० पु०—	अबुद्धाः	अभुत्साथाम्	अभुद्ध्वम्
उ० पु०—	अबोधिषि	अभुत्स्वहि	अभुत्स्महि

(७) लृङ्—अभोत्स्यत ।

√युध धातु का अर्थ—'युद्ध करना' है। (१) लट्—युध्यते। (२) लिट्—युयुधे। (३) लुट्—योद्धा। (४) लङ्—अयुध्यत। (५) विधिलिङ्—युध्येत। (६) आशीर्लिङ्—युत्सीष्ट। (७) √युध्+लुङ् (=त, अट्, च्लि, च्लि=सिच्='स्' 'लिङ्सिचावात्मनेपदेषु' से कित् होने से प्राप्त गुण का निषेध, 'स्' का लोप—'झलो झलि')—अ युध् त ('त्'='ध्'—'झषस्तथोर्धोऽधः' प्रथम ध्'='द्' चर्त्व)=अयुद्ध। (८) लृङ्—अयुत्स्यत।

कथं युध्यतीति। यहाँ आशंका होती है कि जब यह धातु आत्मनेपदी है, तो—'युध्यति' यह परस्मैपद प्रयोग कैसे हुआ? इसके समाधान के लिए कहा गया है कि योधनं युध् में क्विप् प्रत्यय विधान कर कृदन्तत्वात् प्रातिपदिक संज्ञा, द्वितीया विभक्ति एकवचन में. युधम् युधम् से क्यच्-'सुप आत्मनः क्यच्'=युध्यति (=युद्ध करने की इच्छा करता है)। इस प्रकार नामधातु का 'युध्यति' प्रयोग है। अथवा—'अनुदात्त की इत्संज्ञा-निमित्तक आत्मनेपद अनित्य है' ऐसा √चक्षिङ् के ङित्करण से ज्ञापन किया गया है। अतः यहाँ भी आत्मनेपदसंज्ञक तङ् नहीं हुआ, अपितु परस्मैपद—**युध्यति**।

√सृज् धातु का अर्थ—'छोड़ना, त्यागना' है। (१) लट्—सृज्यते। (२) √सृज्+लिट् (=त, त=एश्='ए', द्वित्व, अभ्यास संज्ञा, ऋ='अ'—'उरत्' रपर, हलादिशेष)=ससृजे। (३) √सृज्+लुट् (=त=डा=आ, तास्)—सृज् तास् आ (अम्='अ' आगम—'सृजिदृशोर्झल्यमकिति' ऋ=र्—यण्, टिलोप 'ज्'='ष्'='व्रश्च०' 'त्'='ट्'—ष्टुत्व)=स्रष्टा। (४) √सृज्+लृट् (=त, स्य, अम्='आ' 'सृजि०')—स अ ज् स्य त ('ऋ'='र्'—यण्, ज्=ष्—व्रश्च०' 'ष्'='क्'—'षढोः कः सि', षत्व—'आदेशप्रत्यययोः', क्+ष्=क्ष्)—स्रक्ष्यत (टि=एत्व)=स्रक्ष्यते। (५) √सृज्+आशीर्लिङ् (=त, सीयुट्=सीय्, सुट्='स्'—

रीङ् स्रवणे। रीयते। लीङ् श्लेषणे। लीयते। (७५३) विभाषा लीयतेः ६।१।५१। 'लीयतेरि'ति यका निर्देशो, न तु श्यना। 'लीलीङोरात्त्वं वा स्यादेज्विषये, ल्यपि च। लेता। लाता। लेष्यते। लास्यते। एज्विषये किम्? लीयते। लिल्ये। व्रीङ् 'वृणोत्यर्थे। व्रीयते। विव्रिये। इत्यात्मनेपदिनः।

(७५३) **विभाषेति**। 'मीनातिमिनोती'त्यतः ल्यपीति, 'आदेच उपदेशे' इत्यतः 'आदि'ति, एच इति चानुवर्तते। तदाह—**लीलीङोरित्यादिना**। **लीयतेरिति**। 'सार्वधातुके यक्' इति विहितेन यका न तु श्यना निर्देशः, अन्यथा लीङित्येव ब्रूयात्। तेन लीलीङोरुभयोरप्यात्वमिति भावः। **लेता इति**। 'लीङ् श्लेषणे' इत्यस्माद्धातोर्लुटि तप्रत्यये, 'लुटः प्रथमस्य डारौरसः' इत्यनेन तप्रत्ययस्य डादेशेऽनुबन्धलोपे 'स्यतासी लृलुटोः' इत्यनेन तास्प्रत्ययेऽनुबन्धलोपे डित्त्वादभस्यापि टेर्लोपे 'विभाषा लीयते' इत्यनेन विकल्पेन ईकारस्यात्वे 'लाता' इति। आत्वाऽभावपक्षे आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे एकारे 'लेता' इति रूपम्।

'सुट् तिथोः')—सृज् सीय् स् त (ज='ष्'—'व्रश्च०', 'ष्'='क्'—'षढोः कः सि' 'य्' का लोप—'लोपो व्योर्वलि:०' 'स्'='ष्'—'आदेश०', क्+ष्='क्ष्', 'लिङ्सिचावात्मनेपदेषु' से कित् होने से गुणनिषेध—'क्ङिति च', ष्टुत्व)=सृक्षीष्ट। (६) √सृज्+लुङ् (=त, अट्, च्लि, च्लि=सिच्='स्' कित्त्वाद् गुण का निषेध, 'स्' का लोप—'झलो झलि', 'ज्'='ष्' 'व्रश्च०', ष्टुत्व)=असृष्ट।

√मीङ् धातु 'हिंसा' अर्थ में है। यहाँ हिंसा का अर्थ—'प्राणवियोग' है। (१) लट्—मीयते। (२) लिट्—मिम्ये (यण्)। (३) लोट्—मीयताम्। (४) लङ्—अमीयत। (५) विधिलिङ्—मीयेत। (६) आशीर्लिङ्—मेषीष्ट। (७) लुङ्—अमेष्ट। अमेषाताम् इत्यादि। **√रीङ्** धातु श्रवण (=सुनना) अर्थ में है। (१) लट्—रीयते।

√लीङ् धातु का अर्थ—श्लेषण (आलिङ्गन करना) है। (१) लट्—लीयते।

(७५३) पद—विभाषा, लीयतेः। **अनुवृत्ति**—ल्यपि, आदेचः। **विधिसूत्र**।

मूलार्थ—ली और और लीङ् धातु को विकल्प से आत्व होता है, एच् के विषय में तथा ल्यप् के परवर्ती रहते। लेता, लाता। लेष्यते। लास्यते इत्यादि।

विमर्श—प्रकृत सूत्र में 'आदेच उपदेशेऽशिति' (६।१।४४) से 'आदेचः' तथा 'मीनातिमिनोतिदीङां ल्यपि च'. (६।१।४९) से 'ल्यपि' की अनुवृत्ति आती है। तदनुसार—"ली तथा लीङ् धातु को ल्यप् परे रहते और एच् के विषय में विकल्प से आत्व होता है।" सूत्र में यक् प्रत्यय करके 'लीयते' यह निर्देश है। अतः 'लीङ् श्लेषणे' और क्र्यादिगण पठित 'ली श्लेषणे' दोनों धातुओं का आत्वविधान में ग्रहण किया जाता है।

उदाहरण—(१) √ली+लुट् (=त, तास्, त=डा=आ, टिलोप, 'ई'='आ'—विकल्प से—'विभाषा लीयतेः')=लाता। आत्व के अभावपक्ष में (गुण)—लेता। (२) लृट्—लास्यते, लेष्यते (षत्व)।

प्रत्युदाहरण—(१) सूत्र में 'एज्विषये' का ग्रहण किया गया है। अतः 'लीयते' में एज्विषयता के अभाव में आत्व नहीं हुआ।

(३) लिट्—लिल्ये (यण्)।

अथोभयपदिनः । मृष तितिक्षायाम् । मृष्यति । मृष्यते । ममर्ष । ममर्षिथ । ममृषे । ममृषिषे । मर्षितासि । मर्षितासे । मर्षिष्यति । मर्षिष्यते । मृष्यतु । णह् बन्धने नह्यति । नह्यते । ननाह । नेहिथ । 'नहो धः' इति धः । ननद्ध । नेहे । नद्धा । नत्स्यति । नत्स्यते । अनात्सीत् । अनद्ध । रञ्ज रागे । 'अनिदितामि'ति नलोपः । रज्यति । रज्यते । ररञ्ज । ररञ्जे । ररङ्क्थ । रङ्क्ता । शप आक्रोशे । शप्यति । शप्यते । शशाप । शेपतुः । शेपुः । शेपे । शेपाते । शक विभाषितो मर्षणे । विभाषित इति उभयपदीत्यर्थः । शक्यति, शक्यते हरिं द्रष्टुं भक्तः । शशाक । शेकिथ । शशक्थ । शेके । शक्ता । शक्ष्यति । शक्ष्यते । पुषादित्वादङ् । अशकत् । अशक्त । सेट्कोऽयमित्येके । तन्मते नाऽनिट्केषु ऌदित्पठितः । शकिता । शकिष्यति । शकिष्यते ।

इति दिवादिप्रकरणम् ।

नेहिथ, ननद्ध इति । 'णह् बन्धने' इत्यस्माद्धातोर्लिटि 'णो नः' इति णस्य नत्वे लिटः स्थाने सिपि, सिपस्थलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासत्वे हलादिशेषे 'न नह् थ' इति जाते 'ऋतो भारद्वाजस्ये'ति नियमाद् विकल्पेन

√व्रीङ् धातु का अर्थ—'वरण करना' है। (१) लट्—व्रीयते। (२) √व्री+लिट् (=त=एश्='ए', द्वित्व, अभ्यास संज्ञा, ह्रस्व)—वि व्री ए (ई=इयङ्=इय्)=विव्रिये।

आत्मनेपदी धातुओं का विवेचन समाप्त हुआ। अब उभयपदी धातुओं के रूपों की साधनिका का निर्देश किया जा रहा है—

√मृष धातु का अर्थ—'सहन करना' है। स्वरितेत् होने से यह धातु उभयपदी है। (१) √मृष्+लट् (=तिप्=ति, श्यन्='य')=मृष्यति। आत्मनेपद में—मृष्+लट् (=त, श्यन्='य', अ (टि)=एत्व) =मृष्यते। (२) √मृष्+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, 'ऋ'='अ'—'उरत्' रपर, हलादिशेष, गुण—'पुगन्त', रपर)=ममर्ष। आत्मनेपद में—ममृषे। (३) म० पु० एकवचन (परस्मैपद)—ममर्षिथ (इट्)। (४) √मृष् +लिट् (=थास्='से', द्वित्व, अभ्यास संज्ञा, उरत्, रपर, हलादिशेष)—ममृष् से (क्रादि-नियम से नित्य इट्, षत्व)—ममृषिषे। (५) लुट् म० पु० एकवचन—मर्षितासि। आत्मनेपद में—मर्षितासे। (६) लृट्—मर्षिष्यति, मर्षिष्यते। (७) लोट्—मृष्यतु।

√णह् ('णो नः' से 'ण्' 'न्')=नह् धातु का अर्थ—'बाँधना' है। (१) लट्—नह्यति। आत्मनेपद—नह्यते। (२) √नह्+लिट् (=तिप्=णल्='अ', द्वित्व, अभ्यासत्व, हलादि-शेष)—ननह् अ (वृद्धि—'अत उपधायाः')=ननाह। (३) √नह्+लिट् (=सिप्=थल् ='थ' द्वित्व, अभ्यासकार्य)—न नह् थ (भारद्वाज नियम से वैकल्पिक इट्='इ', एत्व और अभ्यास का लोप—'थलि च सेटि')=नेहिथ। इट् के अभावपक्ष में—न नह् थ ('ह्'='ध्'—'नहो धः', 'थ्'='ध्'—'झषस्तथोर्धोऽधः', पूर्व 'ध्'='द्' जश्त्व)=ननद्ध। (४) आत्मनेपद में—√नह्+लिट् (त=एश्=ए, द्वित्व, अभ्यासकार्य)—न नह् ए (एत्व, अभ्यासलोप)= नेहे। नेहाते। नेहिरे इत्यादि। (५) √नह्+लुट् (=तिप्=डा=आ, तास्, टिलोप)—नह् ता ('ह्'='ध्'—'नहो धः', 'त्'='ध्'—'झषस्तथोर्धोऽधः', प्रथम 'ध्'='द्'—'जश्त्व')= नद्धा। (६) लृट्—नत्स्यति। नत्स्यते ('ह्'='ध्' 'ध्'='त्'—'चर्त्व')। (७) √नह्+

अथ स्वादिप्रकरणम्

षुञ् अभिषवे । अभिषवः—स्नपनं, पीडनं, स्नानं सुरासन्धानं च । तत्र स्नानेऽकर्मकः । (७५४) स्वादिभ्यः श्नुः ३।१।७३ । स्वादिभ्यः श्नुः स्यात् कर्तरि सार्व-

इटि 'झलि च सेटि' इत्येत्वेऽभ्यासलोपे च कृते 'नेहिथ' इति । इडभावपक्षे 'न नह् थ' इति स्थिते 'नहो धः' इति हकारस्य धकारे 'झषस्तथोर्धोऽधः' इत्यनेन चकारस्य धकारे 'झलां जश् झशि' इत्यनेन पूर्वधकारस्य दकारे संयोगे च 'ननद्ध' इति ।

इति दिवादिप्रकरणम् ।

श्यन्विकरणान् धातून्निरूप्येदानीं श्नुविकरणा धातवो निरूप्यन्ते—**षुञ् अभिषव इति** । षोपदेशोऽयं धातुः । अनिट् । ञित्वादुभयपदी ।

लुङ् (तिप्=ति, अट्, इकारलोप, च्लि, च्लि=सिच्='स्', ईट्='ई'—'अस्तिसिचोऽपृक्ते')—अनह् स् ई त (वृद्धि—'वदव्रजहलन्तस्याचः', 'ह्'='ध्'—'नहो धः', 'ध्'='त्'—'खरि च')=अनात्सीत् । आत्मनेपद में—अनद्ध ('स्' का लोप) ।

√रञ्ज धातु 'राग' अर्थ में है । (१) √रञ्ज्+लट् (=तिप्='ति', श्यन्='य' 'न्' का लोप—'अनिदिताम्'०)=रज्यति । आत्मनेपद में—रज्यते । धातु में झल् वर्ण परवर्ती रहते अनुस्वार अथवा वर्ग का पञ्चम वर्ण रहे तो वह नकार से जन्य होता है[1] । अतः यहाँ नकार का अनुस्वार एवं परसवर्ण से ञकार हुआ है । 'अनिदिताम्' सूत्र की दृष्टि में अनुस्वार एवं परसवर्ण असिद्ध होने से नकार मानकर उसका लोप हुआ : (२) लिट्—ररञ्ज । आ० प०—ररञ्जे । (३) लिट् म० पु० एकव०—ररङ्क्थ । (४) लुट्—रङ्क्ता ।

√शप धातु का अर्थ 'आक्रोश' (=निन्दा करना, शाप देना) है । (१) लट्—शप्यति । आ० प०—शप्यते । (२) लिट् प० प०—शशाप, शेपतुः, शेपुः । आ० प्र०—शेपे, शेपाते, शेपिरे ।

√शक धातु का अर्थ 'सकना' 'समर्थ होना' है । यह धातु अमर्षण अर्थ में उभयपदी है । (१) लट्—शक्यति, शक्यते हरिं द्रष्टुं भक्तः=भक्त हरि को देखने में समर्थ है । (२) लिट् प० प०—शशाक । आ० पा०—शेके । (३) लिट् म० पु० एकवचन—शेकिथ (विकल्प से इट्, एत्वाभ्यासलोप) । इडभावपक्ष में—शशक्थ । (४) लुट्—शक्ता । (५) लृट्—शक्ष्यति । शक्ष्यते । (६) √शक्+लुङ् (=तिप्=ति, इकारलोप, अट्, च्लि, च्लि=अङ्—"पुषादि०") =अशकत् । आत्मनेपद में—अशक्त ('स्' का लोप) । कुछ आचार्य इस धातु को सेट् मानते हैं । उनके मत में—अनिट्-कारिका में 'शक्लृ' लृकारेत्संज्ञक ही पठित है । तदनुसार लुट्—शकिता । लृट्—शकिष्यति । शकिष्यते ।

दिवादि-प्रकरण समाप्त ।

दिवादि प्रकरण में 'श्यन्' विकरण वाली 'दिव्' आदि धातुओं के रूपों की साधनिका का विवेचन करने के अनन्तर प्रस्तुत प्रकरण में 'श्नु' विकरण वाली धातुओं के रूपों की प्रक्रिया प्रदर्शित की जा रही है—

---

१. 'नकारजावनुस्वारः पञ्चमो झलि धातुषु'—महाभाष्यम् ।

धातुके । शपोऽपवादः । सुनोति । सुनुतः । 'हुश्नुवोरि'ति यण् । सुन्वन्ति । सुनोषि । सुनुथः । सुनुथं । सुनोमि । 'लोपश्चास्ये'ति प्रत्ययोतो लोपः । सुन्वः–सुनुवः । सुन्मः–सुनुमः । सुनुते । सुन्वाते । सुन्वते । सुनुषे । सुन्वाथे । सुनुध्वे । सुन्वे । सुन्वहे–सुनुवहे । सुन्महे–सुनुमहे । सुषाव । सुषुवे । सोता । सोता । सोष्यति । सोष्यते । सुनोतु ।

(७५४) स्वादिभ्यः श्नुरिति । 'कर्तरि', 'सार्वधातुके' इति चानुवर्तते । तेन कर्त्रर्थे सार्वधातुके परे स्वादिभ्यः श्नुः स्यादित्यर्थः । **सुनोति** । षुञ्धातोर्लटि तिपि, 'स्वादिभ्यः श्नुः' इति श्नुविकरणे शस्येत्संज्ञायां लोपे 'धात्वादेः षः सः' इति षस्य सकारे 'सार्वधातुकार्धधातुकयोः' इत्यनेन उकारस्य गुणे ओकारे 'सुनोति' इति रूपं सिद्धम् ।

√षुञ् (=सु) धातु का अर्थ—'अभिषव' है । अभिषव=स्नान करना, निचोड़ना, स्नान करना और सुरासन्धान (सुरा उत्पन्न करना) । यह धातु उपदेशावस्था में षकारादि है, ञकारेत्संज्ञक है, अतः उभयपदी है । 'स्नान करना' अर्थ में यह धातु अकर्मक है । धातु के आदि मूर्धन्य षकार के स्थान में 'धात्वादेः षः सः' से सकार आदेश होता है ।

(७५४) पद—स्वादिभ्यः, श्नुः । **अनुवृत्ति**—कर्तरि, सार्वधातुके । **विधिसूत्र ।**

मूलार्थ—कर्त्रर्थक सार्वधातुक के परवर्ती रहते स्वादिगण पठित धातुओं से 'श्नु' (विकरण) होता है । यह 'शप्' का अपवाद है । सुनोति । सुनुतः इत्यादि ।

विमर्श—प्रकृत सूत्र में 'कर्तरि शप्' (३।१।६८) से 'कर्तरि' तथा 'सार्वधातुके यक्' (३।१।६७) से 'सार्वधातुके' की अनुवृत्ति आती है । तदनुसार—"कर्तृरूपार्थक सार्वधातुक प्रत्यय के परवर्ती रहते स्वादिगणपठित धातुओं से श्नु (=नु) विकरण प्रत्यय होता है ।" यह 'श्नु' प्रत्यय शप् का बाधक है ।

उदाहरण—(१) √षु+लट् ('ष्'='स्'—'धात्वादेः षः सः' ल्=तिप्=ति, श्नु='नु'—'स्वादिभ्यः श्नुः', 'उ'='ओ' गुण—'सार्वधातुकार्धधातुकयोः')=सुनोति । (२)=सु+लट् (=तस्, श्नु='नु'—'स्वादिभ्यः श्नुः')—सु नु तस् ('तस्' अपित् सार्वधातुक होने से ङिद्वत् है, अतः गुण का निषेध, स्=र्=ः) =सुनुतः । (३) √सु+लट् (=झि, 'झ्'='अन्त्'—'झोऽन्तः', श्नु='नु')—सु नु अन्ति ('उ'='व्' यण्—'हुश्नुवोः सार्वधातुके')=सुन्वन्ति । (४) लट् म० पु०—सुनोषि, सुनुथः, सुनुथ । (५) लट् उ० पु० एकव०—सुनोमि । (६) √सु+लट् (=वस्, श्नु='नु')—सु नु वस् ('उ' का विकल्प से लोप—'लोपश्चान्यतरस्यां म्वोः' स्=र्=ः)=सुन्वः । उकार के लोप के अभावपक्ष में—सुनुवः । (७) लट् उ० पु० बहुव०—सुन्मः, सुनुमः ।

षु (=सु) धातु, लट् लकार के रूप (परस्मैपद)

	एक०	द्वि०	बहु०
प्र० पु०—	सुनोति	सुनुतः	सुन्वन्ति
म० पु०—	सुनोषि	सुनुथः	सुनुथ
उ० पु०—	सुनोमि	सुन्वः, सुनुवः	सुन्मः, सुनुमः

आत्मनेपद में—(१) √सु+लट् (=त, श्नु=नु, 'टि' को एत्व—'टित आत्मनेपदानां टेरे')=सुनुते । (२) √सु+लट् (=आताम्, श्नु)—सु नु आताम् ('उ'='व्' यण्—'हुश्नुवोः', टि=एत्व)=सुन्वाते । (३) सु+लट् (=झ, श्नु='नु', 'झ्'='अत्'—'आत्मने-

'उतश्चे'ति हेर्लुक् । सुनु । सुनवानि । सुनवाव । सुनवाम । सुनुताम् । सुनवै । सुनवावहै । सुनवामहै । असुन्वि । सुनुयात् । सूयात् । सोषीष्ट । (७५५) **स्तुसुधूञ्भ्यः परस्मैपदेषु** ७।२।७२ । एभ्यः सिच इट् स्यात्परस्मैपदे । असावीत् । असोष्ट ।

(७५५) स्तुसुधूञ्भ्य इति । अत्र 'इडत्यर्ति इत्यस्मात् इडित्यनुवर्तते । 'अञ्जेः सिची'त्यस्मात् सिजित्यनुवृत्तं षष्ठ्या विपरिणम्यते । अत आह—एभ्यः

पदेष्वनतः', यण् टि=एकार)=सुन्वते । उ० पु० द्विव० तथा बहुव० में 'उ' का विकल्प से लोप होकर दो रूप बनते हैं—सुन्वहे, सुनुवहे । सुन्महे, सुनुमहे ।

√षु (=सु) धातु, लट् लकार के रूप (आत्मनेपद)

	एक०	द्वि०	बहु०
प्र० पु०—	सुनुते	सुन्वाते	सुन्वते
म० पु०—	सुनुषे	सुन्वाथे	सुनुध्वे
उ० पु०—	सुन्वे	सुन्वहे, सुनुवहे	सुन्महे, सुनुमहे

(१) सु+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, हलादिशेष)=सु सु अ (उ='औ' 'वृद्धि'—'अचो ञ्णिति', 'औ'='आव्' आदेश, षत्व)=सुषाव । आत्मनेपद पक्ष में—√सु+लट् (=त=एश्=ए, द्वित्व, अभ्यास संज्ञा)—सु सु ए (षत्व, उ=उवङ्='उव्')=सुषुवे । इत्यादि । (२) लट् प्र० एकव०—सोता (दोनों पदों में) । (३) लृट्—सोष्यति । आ० प०—सोष्यते । (४) लोट् प० प० में—सुनोतु, सुनुतात् । सुनुताम् । सुन्वन्तु । (५) सु+लोट् (=सिप्='हि'—'सेर्ह्यपिच्च', श्नु=नु)—सु नु हि ('हि' का लोप—'उतश्च प्रत्ययादसंयोगपूर्वात्')=सुनु । (६) सु+लोट् (मिप्=मि, श्नु='नु' 'मि'='नि'—'मेर्निः' आट्='आ'—आगम)—सु नु आ नि (उ='ओ'—'गुण', 'ओ'='अव्' आदेश)=सुनवानि । (७) लोट् उ० पु० द्विव०, बहुव०—सुनवाव, सुनवाम । आत्मनेपद में—सुनुताम् । (८) सु+लोट् (=इट्='इ', श्नु='नु', आट्='आ' का आगम, इ='ए'—'टित आत्मनेपदानाम्')=सुनु आ ए ('ए'='ऐ'—'एत ऐ', आ+ऐ='ऐ'—'वृद्धि', उ='ओ'=गुण, 'ओ'='अव्' आदेश)=सुनवै ।

√षु (=सु) धातु, लोट् लकार के रूप (परस्मैपद)

	एक०	द्वि०	बहु०
प्र० पु०—	सुनोतु, सुनुतात्	सुनुताम्	सुन्वन्तु
म० पु०—	सुनु	सुनुतम्	सुनुत
उ० पु०—	सुनवानि	सुनवाव	सुनवाम

(आत्मनेपद)

	एक०	द्वि०	बहु०
प्र० पु०—	सुनुताम्	सुन्वाताम्	सुन्वताम्
म० पु०—	सुनुष्व	सुन्वाथाम्	सुनुध्वम्
उ० पु०—	सुनवै	सुनवावहै	सुनवामहै

(९) लङ्—असुनोत्, असुनुताम्, असुन्वन् इत्यादि । (१०) विधिलिङ्—सुनुयात् । (११) आशीर्लिङ् में (यासुट् होने पर 'स्' का संयोगादि लोप 'अ' को दीर्घ—'अकृत्सार्वधातुकयोः')=सूयात् (१२) आत्मनेपद आशीर्लिङ् में—सोसीष्ट ।

(७५५) पद—स्तुसुधूञ्भ्यः, परस्मैपदेषु । **अनुवृत्ति**—इट्, सिचि । **विधिसूत्र** ।

अभिषुणोति । 'प्राक्सितादि'ति. षत्वम् । अभ्यषुणोत् । (७५६) **सुनोतेः स्यसनोः** ८।३।११७ । **स्ये सनि च परे सुञः सस्य षो न स्यात् ।** विसोष्यति । षिञ् बन्धने । विसिनोति । सिनुते । सिषाय । सिष्ये । चिञ् चयने । प्रणिचिनोति । चिनुते । (७५७)

सिच इत्यादिना । असावीत् । षुधातोः 'धात्वादेः षः सः' इत्यनेन षस्य सत्वे, लुङि लकारे, तत्स्थाने परस्मैपदे प्रथमपुरुषैकवचने तिप्यनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमेऽनुबन्धलोपे 'इतश्च' इतीकारलोपे, च्लौ, 'च्लेः सिच्' इति सिच्यनुबन्धलोपे 'अ सु स् त्' इति जाते 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इति सिच इटि अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इतीडागमे 'इट ईटि' इति सिचो लोपे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ, अवादेशे सवर्णदीर्घे संयोगे च कृते 'असावीत्' इति । आत्मनेपदे तु—'अ सु स् त' इति स्थिते, सिच आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे ओकारे 'आदेशप्रत्यययोः' इत्यनेन षत्वे 'ष्टुना ष्टुः' इति ष्टुत्वे 'असोष्ट' इति ।

(७५६) **सुनोतेः स्यसनोरिति ।** 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् । 'न रपर' इत्यस्मान्नेत्यनुवर्तते । तदाह—**स्ये सनीत्यादि । विसोष्यति ।** 'वि + सोष्यति' इत्यत्र

मूलार्थ—परस्मैपद के विषय में स्तु, सु, धू धातुओं से परवर्ती 'सिच्' को इट्='इ' होता है । असावीत् । असोष्ट इत्यादि ।

विमर्श—'इडत्यर्तिव्ययतीनाम्' (७।२।६६) से आगमवाचक पद 'इट्' तथा 'अञ्जेः सिचि' (७।२।७१) से 'सिचि' पद की अनुवृत्ति आती है । तदनुसार—'ष्टुञ्, षुञ् तथा धूञ् से परस्मैपद परे रहते सिच् को इट् (=इ) का आगम होता है' ।

उदाहरण—(१) √षु ('ष्'='स्'—'धात्वादेः')—सु+लट् (=तिप्=ति, अट्='अ', इकारलोप—'इतश्च' च्लि, च्लि=सिच्='स्', इट्='इ' आगम—'स्तुसुधूञ्भ्यः परस्मैपदेषु', ईट्='ई'—'अस्तिसिचोऽपृक्ते', 'स्' का लोप—'इट ईटि' 'उ'='औ' वृद्धि—'सिचि वृद्धिः' इ+ई='ई'—सवर्णदीर्घ)=असावीत् । आत्मनेपद में—असोष्ट (गुण, षत्व, ष्टुत्व) । (२) अभि+सुनोति ('स्'='ष्' षत्व—'उपसर्गात्सुनोति०', णत्व—'अट्कुप्वाङ्०')=अभिषुणोति । (३) अभि+असुनोत् (यण्, यहाँ अट् के व्यवधान में भी षत्व—'अड्भ्यासव्यवायेऽपि' णत्व)=अभ्यषुणोत् ।

(७५६) पद—सुनोतेः, स्यसनोः । **अनुवृत्ति**—न । **विधिसूत्र (निषेध) ।**

मूलार्थ—'स्य' और 'सन्' के परवर्ती रहते 'सुञ्' धातु सम्बन्धी सकार को षत्व नहीं होता । विसोष्यति ।

विमर्श—'अपदान्तस्य मूर्द्धन्यः' का अधिकार है । 'न रपर०' (८।३।११०) से 'न' पद की अनुवृत्ति आती है । अतः "स्य प्रत्यय या सन् प्रत्यय के परवर्ती रहते उपसर्ग से परे 'सुञ्' धातु के अवयव सकार के स्थान में षकार आदेश नहीं होता ।"

उदाहरण—(१) वि+सोष्यति (लृट्)—यहाँ 'उपसर्गात्सुनोति' से प्राप्त षत्व का 'सुनोतेः स्यसनोः' से निषेध ।

√'षिञ्' धातु का अर्थ 'बाँधना' है । (१) √षि+लट् ('ष्'='स्'—'धात्वादेः', ल्=तिप्=ति, श्नु='नु' गुण)=सिनोति । वि+सिनोति (प्राप्त षत्व का 'सुनोतेः स्यसनोः' से निषेध)=विसिनोति । आत्मनेपद में—सिनुते । (२) √षि+लिट् (सत्व, ल्=तिप्=णल्='अ' द्वित्व, वृद्धि, 'आय्' आदेश, षत्व)=सिषाय । आत्मनेपद—सिष्ये ।

विभाषा चेः ८।३।५८। अभ्यासाच्चेः कुत्वं वा स्यात्सनि लिटि च। **चिकाय**–चिचाय। चिक्ये–चिच्ये। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। स्तृणोति। स्तृणुते। तस्तार। तस्तरतुः। तस्तरुः। 'ऋतश्च संयोगादेरि'ति गुणः। तस्तरे। 'गुणोऽर्ती'ति

'उपसर्गात्सुनोति' इत्यनेन प्राप्तं षत्वं 'सुनोतेः स्यसनोः' इत्यनेन निषिध्यते। **चिनोति।** 'चिञ् चयने' इत्यस्माद्धातोर्लटि, तिपि, 'स्वादिभ्यः श्नुः' इति श्नौ, शलोपे 'सार्वधातुकमपित्' इति ङित्त्वे गुणाभावे, श्नोरुकारस्य 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'चिनोति' इति। आत्मनेपदे—'चिनुते' इति।

(७५७) **विभाषा चेरिति।** अत्र 'चजोः कुः घिण्ण्यतोः' इत्यतः कुग्रहणमनुवर्तते, 'अभ्यासाच्च' इत्यतः 'अभ्यासादि'ति 'सन्लिटोर्जेः' इत्यतः सन्लिटोरिति च। तदाह—**अभ्यासादिति। चिकाय, चिचाय।** चिधातोर्लिटि तत्स्थाने तिपि, तिपो णलादेशेऽनु-

---

√चिञ् (चि) धातु का अर्थ—'चुनना' है। (१) लट्—चिनोति। आ० प०—चिनुते।

√चिञ् धातु, लट् लकार के रूप (परस्मैपद)

	एक०	द्वि०	बहु०
प्र० पु०--	चिनोति	चिनुतः	चिन्वन्ति
म० पु०—	चिनोषि	चिनुथः	चिनुथ
उ० पु०—	चिनोमि	चिन्वः, चिनुवः,	चिन्मः, चिनुमः

(आत्मनेपद)

प्र० पु०--	चिनुते	चिन्वाते	चिन्वते
म० पु०--	चिनुषे	चिन्वाथे	चिनुध्वे
उ० पु०--	चिन्वे	चिन्वहे, चिनुवहे	चिन्महे, चिनुमहे

(७५७) पद—विभाषा चेः। **अनुवृत्ति**—कु, अभ्यासात्, सन्लिटोः।

मूलार्थ—अभ्यास से उत्तरवर्ती 'चि' धातु के अवयव चकार को विकल्प से कुत्व होता है, सन् और लिट् के परवर्ती रहते। चिकाय–चिचाय, चिक्ये इत्यादि।

विमर्श—प्रकृत सूत्र में—'चजोः कुः घिण्ण्यतोः' (७।३।५२) से 'कु', 'अभ्यासाच्च' (७।३।५५) से 'अभ्यासात्' और 'सन्लिटोर्जेः' (७।३।५७) से 'सन्लिटोः' की अनुवृत्ति आती है। तदनुसार—"अभ्यास से परवर्ती चि धातु के चकार को कुत्व (क-वर्ग) विकल्प से होता है, सन् तथा लिट् के परे रहते।"

उदाहरण—(१) √चि+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, 'च्'='क्' आदेश विकल्प से—'विभाषा चेः')—चि कि अ ('इ'='ऐ' 'वृद्धि'—'अचो ञ्णिति', ऐ='आय्' आदेश)=चिकाय। कुत्व के अभावपक्ष में—चिचाय। आत्मनेपद में भी विकल्प से कुत्व—चिक्ये, चिच्ये।

लुट्—चेता। **लृट्**—चेष्यति, चेष्यते। **लोट्**—चिनोतु, चिनुताम्। **लङ्**—अचिनोत्। अचिनुत। **विधिलिङ्**—चिनुयात्। आ० प०—चिन्वीत। आशीर्लिङ्—चीयात्। आ० प०—चेषीष्ट। (२) √चि+लुङ् (=तिप्=ति, अट्, इकारलोप, च्लि, च्लि=सिच्=स)—अचि स् त (ईट्='ई', वृद्धि—'सिचि वृद्धिः परस्मैपदेषु', षत्व)=अचैषीत्। आ० प० में—अचेष्ट (सिच्, गुण, षत्व, ष्टुत्व)।

गुणः । स्तर्यात् । **(७५८) ऋतश्च संयोगादेः ७।२।४३ ।** ऋदन्तात्संयोगादेर्लिङ्सिचोरिड् वा स्यात् तङि । स्तरिषीष्ट–स्तृषीष्ट । अस्तरिष्ट–अस्तृत । धुञ् कम्पने । धुनोति । धुनुते । दुधाव । दुधुवे । अधौषीत् । अधोष्यत् । धूञ् कम्पने । धूनोति ।

बन्धलोपे 'लिटि धातोरनभ्यासस्ये'त्यनेन द्वित्वेऽभ्यासत्वे 'विभाषा चेः' इत्यनेन विकल्पेन कुत्वे 'अचो ञ्णिति' इति वृद्धौ आयादेशे च कृते 'चिकाय' इति । कुत्वाऽभावपक्षे तु 'चिचाय' इति रूपम् ।

(७५८) **ऋतश्चेति** । 'लिङ्सिचोरात्मनेपदेषु' इत्यनुवर्तते, 'इट् सनि वे'त्यतः इड्वेति च । तदाह—**ऋदन्तादित्यादिना** । **स्तरिषीष्ट** । 'स्तृञ्धातोराशीर्लिङि त प्रत्यये 'लिङः सीयुट्' इत्यनेन सीयुटि अनुबन्धलोपे, 'सुट् तिथोः' इत्यनेन सुटचनुबन्धलोपे 'स्तृ सीय् स् त' इति जाते 'लोपो व्योर्वलि' इत्यनेन यकारलोपे 'ऋतश्च संयोगादेः' इति विकल्पेन इडागमेऽनुबन्धलोपे 'गुणोऽर्तिसंयोगाद्योः' इति गुणे रपरे, उभयोः सकारयोः

√स्तृञ् (स्तृ) धातु का अर्थ—आच्छादन (=ढँकना) है । (१) √स्तृ+लट् (=तिप् =ति, श्नु=नु, गुण, 'न्'='ण्'—णत्व—'ऋवर्णान्नस्य णत्वं वाच्यम्')=स्तृणोति । आ० पद में—स्तृणुते । (२) √स्तृ+लिट् (=तिप्=णल्=अ, द्वित्व, अभ्यास संज्ञा, 'ऋ'='अ'—'उरत्' रपर 'शर्पूर्वाः खयः' से खय् शेष, 'स्' का लोप—'हलादिः शेषः')—त स्तृ अ ('ऋ'= 'अ'—गुण—'ऋतश्च संयोगादेर्गुणः' रपर, वृद्धि—'अत उपधायाः')=तस्तार । तस्तरतुः । तस्तरुः । आत्मनेपद में—तस्तरे । तस्तराते । तस्तरिरे । (३) √स्तृ+आशीर्लिङ् (=तिप्= ति, यासुट्='यास्' 'स्' का लोप, इकारलोप)—स्तृ या त् ('ऋ'='अ'—गुण—'गुणोऽर्ति-संयोगाद्योः', रपर)=स्तर्यात् ।

(७५८) पद—ऋतः, च, संयोगादेः । **अनुवृत्ति**—लिङ्सिचोरात्मनेपदेषु, इट्, वा । **विधिसूत्र** ।

मूलार्थ—आत्मनेपद के विषय में संयोगादि ऋदन्त धातु से परवर्ती लिङ् और सिच् को विकल्प से 'इट्' का आगम होता है । स्तरिषीष्ट । स्तृषीष्ट । अस्तरिष्ट इत्यादि ।

विमर्श—यहाँ 'लिङ्सिचोरात्मनेपदेषु' (७।२।४२) सूत्र तथा 'इट् सनि वा' (७।२।४१) से 'इट्' और 'वा' पदों की अनुवृत्ति आती है । तदनुसार—"आत्मनेपद के विषय में संयोग है आदि में जिसके, ऐसे ऋकारान्त धातु से उत्तरवर्ती लिङ् सिच् को विकल्प से इट् (=इ) का आगम होता है ।"

उदाहरण—(१) √स्तृ+आशीर्लिङ् (=त, सीयुट्='सीय्', सुट्='स्'—'सुट् तिथोः' यकारलोप)—स्तृ सी स् त (विकल्प से इट्='इ'—ऋतश्च संयोगादेः' 'ऋ'='अ'—गुण— 'गुणोऽर्तिसंयोगाद्योः' रपर, दोनों सकार के स्थान में षत्व, ष्टुत्व)=स्तरिषीष्ट । 'इट्' के अभाव-पक्ष में—स्तृषीष्ट ('उश्च' से कित् होने से गुण का अभाव) । (२) √स्तृ+लुङ् (=तिप्= ति, अट्, इकारलोप, च्लि, च्लि=सिच्='स्', ईट्—'अस्तिसिचोऽपृक्ते', वृद्धि—'वदव्रज०' रपर, षत्व)=अस्तार्षीत् । आत्मनेपद में—√स्तृ त (च्लि, च्लि=सिच्='स्' अट्, गुण—'गुणोऽर्ति-संयोगाद्योः', विकल्प से इट्, षत्व, ष्टुत्व)=अस्तरिष्ट । इट् के अभावपक्ष में—अ स्तृ स् त ('स्' का लोप—'ह्रस्वादङ्गात्' कित् होने से गुण का अभाव)—अस्तृत ।

√धुञ् (धू) धातु का अर्थ—'कँपाना, हिलाना' है । (१) लट्—प० प०—धुनोति । आ० प०—धुनुते । (२) √धू+लिट् (=तिप्=णल्='अ' द्वित्व, अभ्यास संज्ञा, 'ध्'='द्'—

धूनुते । 'स्वरतिसूती'ति वेट् । दुधविथ-दुधोथ । किति लिटि तु । (७५९) श्र्युकः किति ७।२।११ । श्रिञ, एकाच उगन्ताच्च गित्कितोरिण्न स्यात् । इति प्राप्ते । क्रादिनियमान्नित्यमिट् । दुधुविव । दुधुविम । अधावीत् । अधविष्ट-अधोष्ट । कृञ् हिंसायाम् । कृणोति । कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत् ।

षत्वे 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वे संयोगे च 'स्तरिषीष्ट' इति । इडभावपक्षे—'स्तृषीष्ट' इति ।

(७५९) **श्र्युकः कितीति** । 'एकाच उपदेशे' इत्यतः एकाच इति, 'नेड् वशि कृति' इत्यतो नेडित्यनुवर्तते । तदाह—**श्रिञ इत्यादिना** । **अधावीत्** । धूञ्धातोर्लुङि तिप्यनुबन्धलोपे च्लौ, च्लेः स्थाने सिच्यनुबन्धलोपे 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इत्यनेन इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि, 'इट ईटि' इति सकारलोपे, 'इतश्चे'तीकारलोपे 'सिचि वृद्धिः परस्मैपदेषु' इति उकारस्य वृद्धौ आवादेशे सवर्णदीर्घे संयोगे च 'अधावीत्' इति सिद्धम् ।

'अभ्यासे चर्च')—दु धू अ ('ऊ'='औ' वृद्धि—'अचो ञ्णिति', 'औ'='आव्')=दुधाव । आ० पद में—दुधुवे (उवङ्) । (३) लुङ्—अधौषीत् । लृङ्—अधोष्यत् ।

√धूञ् धातु का भी 'कँपाना' अर्थ है । (१) लट्—धूनोति । आ० प०—धूनुते । (२) √धू+लिट् (=सिप्=थल्=थ, द्वित्व, अभ्यास संज्ञा, ह्रस्व, 'ध्'='द्'—'अभ्यासे चर्च')—दुधू थ (विकल्प से इट्='इ'—'स्वरतिसूति०', गुण, अव् आदेश)—दुधविथ । 'इट्' के अभाव-पक्ष में—दुधोथ ।

(७५९) पद—श्र्युकः, किति । **अनुवृत्ति**—एकाचः, न । **विधिसूत्र (निषेध)** ।

मूलार्थ—श्रिञ्, एकाच् और उगन्त धातुओं से परवर्ती गित् कित् प्रत्यय को इट् का आगम नहीं होता । निषेध की प्राप्ति होने पर क्रादिनियम से नित्य इट् । दुधुविव । दुधुविम । अधावीत् । अधविष्ट । अधोष्ट इत्यादि ।

विमर्श—यहाँ 'एकाच उपदेशे०' (७।२।१०) से 'एकाचः' तथा 'नेड् वशि कृति' (२।७।८) से 'न' पद की अनुवृत्ति आ रही है । अतः "श्रि और एकाच् उगन्त धातु से परवर्ती गित् कित् प्रत्यय को 'इट्' का आगम नहीं होता ।"

उदाहरण—(१) √धू+लिट् (वस्=व, द्वित्व, अभ्यास संज्ञा, ह्रस्व, जश्त्व)—दु धू व ('स्वरति०' से वैकल्पिक इट् की प्राप्ति, 'श्र्युकः किति' से निषेध प्राप्त होने पर, उसका बाधकर क्रादिनियम से नित्य इट्='इ' उवङ्='उव्')=दुधुविव । (२) लिट् उ० पु० बहु०—दुधुविम । (३) √धू+लुङ् (=तिप्=ति, अट्, इकारलोप, च्लि, च्लि=सिच्='स्')—अ धू स् त (इट्='इ'—'स्तुसुधूञ्भ्यः', ईट्='ई', 'स्' का लोप—'इट ईटि' वृद्धि—'सिचि वृद्धि०' आव् आदेश)=अधावीत् । आत्मनेपद में—अधविष्ट । अधोष्ट । (विकल्प से इट्—'स्वरतिसूति०') ।

√कृञ् (कृ) धातु का अर्थ—'हिंसा करना' है । (१) √कृ+लट् (=तिप्=ति, श्नु=नु, गुण, णत्व—'ऋवर्णान्नस्य णत्वं वाच्यम्')=कृणोति । आ० प०—कृणुते (२) लिट्—चकार । आ० प०—चक्रे । (३) लिट् म० पु० एकव०—चकर्थ । (४) आशीर्लिङ् (प० प०)-क्रियात् । आ० प०—कृषीष्ट । (५) लुङ् प० प०—अकार्षीत् । आ० पं०—अकृत ।

√वृञ् धातु का अर्थ—'वरण करना' है । (१) लट् (प० प०)—वृणोति । आ० प०—वृणुते ।

अकृत । वृञ् वरणे । वृणोति । वृणुते । (७६०) **बभूथाऽऽततन्थजगृम्भववर्थेति निगमे ७।२।६४।** एषां वेद इडभावो निपात्यते । तेन भाषायां थलीट् । ववरिथ-ववृथ । ववृव । ववृम । ववृवहे । 'वृतो वा' । वरीता-वरिता । (७६१) **लिङ्सिचोरात्मनेपदेषु ७।२।४२।** वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड् वा स्यात्तङि । (७६२) **न लिङि ७।२।३९।** वृतो लिङ इटो न दीर्घः । वरिषीष्ट-वृषीष्ट । अवारीत् । अवरिष्ट-

---

(७६०) **बभूथेति ।** निगमो वेदः । वेदे—बभूथ, आततन्थ, जगृम्भ, ववर्थ एते निपाताः स्युरित्यर्थः ।

(७६१) **लिङ्सिचोरिति ।** 'इट् सनि वे'त्यतः 'इड्वा' इति, 'वृतो वा' इत्यतः 'वृतः' इति चानुवर्तते । तदाह—**वृङ्वृञ्भ्यामित्यादि ।**

(७६२) **न लिङीति ।** 'वृतो वे'त्यतः वृत इत्यनुवर्तते । 'लिङी'त्यत्र षष्ठ्यर्थे सप्तमी । 'आर्धधातुकस्येट्' इत्यत 'इडि'त्यनुवर्तते, तच्च षष्ठ्या विपरिणम्यते । 'ग्रहो-

---

(७६०) पद—बभूथाततन्थजगृम्भववर्थ इति, निगमे । **अनुवृत्ति**—थलि, न, इट् । **विधिसूत्र (निषेध) ।**

मूलार्थ—बभूथ, आततन्थ, जगम्भ और ववर्थ—इन वेद के प्रयोगों में इट् का अभाव निपातित है । अतः लौकिक भाषा में थल् में इट् हांता है । ववरिथ इत्यादि ।

विमर्श—यहाँ 'आर्धधातुकस्येड्०' (७।२।३५) से 'इट्', 'न वृद्भ्यः' (७।२।५९) से 'न' तथा 'अचस्तास्वत्०' (७।२।६१) से 'थलि' की अनुवृत्ति आती है । तदनुसार—'वेद के विषय में बभूथ आदि शब्द थल् परे रहते निपातित किये जाते हैं ।' अर्थात् 'बभूथ' आदि में क्रादिनियम से प्राप्त इट् का अभाव हो जाता है । इससे यह ज्ञात होता है कि भाषा में √वृ को थल् में इट् नित्य होता है ।

उदाहरण—(१) √वृ+लिट् (=सिप्=थल्=थ, द्वित्व, अत्व, रपर, हलादिशेष, इट्, गुण, रपर)—व व र् इ थ (उक्त सूत्र द्वारा वेद-विषयक निपातन होने से यहाँ इट् का अभाव नहीं हुआ, अपितु क्रादिनियम से नित्य इट्)=ववरिथ । (२) लिट्—उ० पु० द्वि० व०, बहुव०—ववृव, ववृम । आ० प०—ववृवहे । (३) √वृ+लुट् (=तिप्=डा=आ, तास्)—वृ तास् आ (इट्='इ' गुण, रपर, टि का लोप)—वरिता ('वृतो वा' से विकल्प से दीर्घ)=वरीता । दीर्घ के अभावपक्ष में—वरिता ।

(७६१) पद—लिङ्सिचोः, आत्मनेपदेषु । **अनुवृत्ति**—वा, वृतः, इट् । **विधिसूत्र ।**

मूलार्थ—वृङ्, वृञ् तथा दीर्घ ऋकारान्त धातु से परवर्ती लिङ् और सिच् को विकल्प से इट् होता है, आत्मनेपद के विषय में ।

विमर्श—सूत्रार्थ की पूर्ति हेतु 'इट् सनि वा' (७।२।४१) से 'इट् वा' तथा 'वृतो वा' से 'वृतः' पद की अनुवृत्ति आती है । अतः "वृङ्, वृञ् तथा दीर्घ ऋकारान्त धातुओं से उत्तरवर्ती आत्मनेपद-परक लिङ् तथा सिच् को विकल्प से इट् का आगम होता है ।"

(७६२) पद—न, लिङि । **अनुवृत्ति**—वृतः, दीर्घः, इट् । **विधिसूत्र (निषेध) ।**

मूलार्थ—वृङ्, वृञ् और दीर्घ ऋकारान्त धातु से परवर्ती लिङ् सम्बन्धी इट् को दीर्घ नहीं होता । वरिषीष्ट, वृषीष्ट इत्यादि ।

विमर्श—प्रकृत सूत्र में 'वृतो वा' (७।२।३८) से 'वृतः' 'आर्धधातुकस्येड्०' (७।२।३५)

अवरीष्ट । अवृत । अवरिष्यत–अवरीष्यत । टुदु उपतापे । दुनोति । दुनुतः । दुन्वन्ति । दुदाव । दोता । हि गतौ वृद्धौ च । (७६३) **हिनुमीना ४।८।१५** । उपसर्गस्थान्निमित्तात्परस्यैतयोर्नस्य णः स्यात् । प्रहिणोति । (७६४) **हेरचङि ७।३।५६** । अभ्यासात् परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि । जिघाय । आप्लृ व्याप्तौ । आप्नोति ।

ऽलिटि दीर्घः' इत्यस्माद् दीर्घ इत्यनुवर्तते । तदाह—**वृत इति** । **वरिषीष्ट** । इट्पक्षे 'वृतो वे'ति प्राप्तो दीर्घो 'न लिङि' इत्यनेन निषिध्यते । वृषीष्टेति । इडभावपक्षे 'उश्चे'ति कित्त्वान्न गुणः ।

(७६३) **हिनुमीना** । 'रषाभ्यां नो णः' इत्यनुवर्तते, 'उपसर्गादसमासेऽपी'त्यत उपसर्गादिति च । अत आह—**उपसर्गस्थादिति** ।

(७६४) **हेरचङीति** । 'चजोः कुः' इत्यतः कुरित्यनुवर्तते; 'अभ्यासाच्चे'त्यत अभ्यासादिति, 'हो हन्तेरि'त्यत ह इति चानुवर्तते । तदाह—**अभ्यासात्परस्येति** ।

से 'इट्' तथा 'ग्रहोऽलिटि दीर्घः' (७।२।३७) से 'दीर्घः' पद की अनुवृत्ति आती है । तदनुसार—"वृङ्, वृञ् और दीर्घ ऋकारान्त धातुओं से परवर्ती लिङ् सम्बन्धी इट् को दीर्घ नहीं होता ।"

उदाहरण—(१) √वृ+आशीर्लिङ् (=त, सीयुट्='सीय्', सुट्='स्', 'य्' का लोप)—वृ सी स् त (विकल्प से इट्='इ'—'लिङ्सिचोरात्मनेपदेषु' गुण, रपर, दोनों 'स्' को षत्व, ष्टुत्व, 'वृतो वा' से प्राप्त दीर्घ का 'न लिङि' से निषेध)=वरिषीष्ट । इट् के अभावपक्ष में 'उश्च' से कित्त्व, गुण का अभाव—वृषीष्ट । (२) लुङ् प० प०—अवारीत् । आ० पद में—अ वृ त (च्लि=सिच्='स्' इट् विकल्प से—'लिङ्सिचो', गुण, रपर, षत्व, ष्टुत्व, विकल्प से दीर्घ—'वृतो वा')=अवरीष्ट । दीर्घ के अभावपक्ष में—अवरिष्ट । इडागम के अभावपक्ष में (कित्त्व, 'स्' का लोप, गुणाभाव)=अवृत । (३) लृङ् (आ० पद)—अवरिष्यत । अवरीष्यत (विकल्प से दीर्घ) ।

√ टुदु (=दु) धातु का अर्थ—'उपताप' (कष्ट देना) है । 'टु' की इत्संज्ञा, लोप—'आदिर्ञिटुडवः' । (१) √दु+लट् (=तिप्=ति, श्नु='नु' गुण)=दुनोति । दुनुतः । दुन्वन्ति । (२) लिट्—दुदाव । (३) लुट्—दोता ।

√हि धातु का अर्थ 'जाना, बढ़ना' है ।

(७६३) पद— हिनुमीना । **अनुवृत्ति**—रषाभ्यां नो णः, उपसर्गस्थात् । **विधिसूत्र** ।

मूलार्थ—उपसर्ग में स्थित निमित्त से परवर्ती 'हिनु' और 'मीना' सम्बन्धी नकार को णकार होता है । प्रहिणोति ।

विमर्श—'उपसर्गादसमासेऽपि०' (८।४।१४) से 'उपसर्गात्' तथा 'रषाभ्यां नो णः' (८।४।१) से 'रषाभ्यां नो णः' की अनुवृत्ति आती है । अतः "उपसर्ग में स्थित निमित्त (र्, ष्) से परवर्ती 'हिनु' तथा 'मीना' के नकार के स्थान में णकार आदेश होता है ।"

उदाहरण—(१) प्र+√हि+लट् (=तिप्='ति', श्नु='नु' गुण, 'न्'='ण्' 'हिनुमीना')=प्रहिणोति ।

(७६४) पद—हेः, अचङि । **अनुवृत्ति**—अभ्यासात्, हः, कुः । **विधिसूत्र** ।

मूलार्थ—अभ्यास से परवर्ती हिनोति (हि) धातु के हकार को कुत्व होता है, चङ् के परे कुत्व नहीं होता । जिघाय इत्यादि ।

आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्ता । आप्नुहि । लृदित्त्वादङ् । आपत् । शक्लृ शक्तौ । शक्नोति । शशाक । अशकत् । राध साध संसिद्धौ । राध्नोति । **(७६५) राधो हिंसायाम् ६।४।१२३ ।** राधो हिंसायाम् एत्वाभ्यासलोपौ स्तः, किति, लिटि, सेटि थलि च । अपरेधतुः । अपरेधुः । रेधिथ । राद्धा । साध्नोति । ससाध । साद्धा । असात्सीत् । असाद्धाम् । असात्स्यत् । ञिधृषा प्रागल्भ्ये । धृष्णोति । दधर्ष । धर्षिता ।

जिघाय । हिधातोर्लिटि तिपि, तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्ये'ति द्वित्वेऽभ्यासत्वे 'अभ्यासे चर्चे'ति चर्त्वे 'हेरचङि' इति हकारस्य कुत्वेन घकारे वृद्धौ आयादेशे 'जिघाय' इति ।

(७६५) राधो हिंसायामिति । 'घ्वसोरेद्धावभ्यासलोपश्चे'त्यत एदिति, अभ्यास-

---

विमर्श—सूत्रार्थ की पूर्णता के लिए 'अभ्यासाच्च' (७।३।५५) से 'अभ्यासात्', 'हो हन्तेर्ञ्णिन्नेषु' (७।३।५४) से 'हः' तथा 'चजोः कुः' (७।३।५२) से 'कुः' की अनुवृत्ति आ रही है। तदनुसार—"अभ्यास से उत्तरवर्ती 'हि' धातु के हकार को कवर्गादेश होता है; किन्तु चङ् परे हो तो कुत्व नहीं होता ।"

उदाहरण—(१) √हि+लिट् (=तिप्=णल्='अ', द्वित्व—'लिटि धातोरनभ्यासस्य' अभ्यास संज्ञा, हलादिशेष, चर्त्व—'अभ्यासे चर्च')—जि हि अ ('ह्'='घ्'—कुत्व—'हेरचङि' वृद्धि, आय् आदेश)=जिघाय ।

√आप्लृ (=आप्) धातु का अर्थ—'व्याप्त होना' है। (१) √आप्+लट् (=तिप्=ति, श्नु, गुण)=आप्नोति, आप्नुतः, आप्नुवन्ति इत्यादि। (२) लुट्—आप्ता । (३) लोट् म० पु० एकव०—आप्नुहि । (४) √आप्+लुङ् (=तिप्=ति, आट्, वृद्धि—'आटश्च', च्लि, च्लि=अङ्='अ' 'पुषादि०' इकारलोप)=आपत् ।

√शक्लृ (=शक्) धातु का अर्थ—'सकना' है। (१) √शक्+लट् (=तिप्=ति, श्नु =नु, गुण)=शक्नोति । (२) लिट्—शशाक । (३) लुङ्—अशकत् ।

√राध और साध का अर्थ—'सिद्ध होना' है।

(७६५) पद—राधः, हिंसायाम् । **अनुवृत्ति**—थलि, च, सेटि, अतः, लिटि, एत्, अभ्यासलोपश्च, किति । **विधिसूत्र ।**

मूलार्थ—हिंसार्थक राध् धातु को एत्व और अभ्यास का लोप होता है, कित् लिट् सेट् थल् के परवर्ती रहते । अपरेधतुः, अपरेधुः इत्यादि ।

विमर्श—प्रकृत सूत्र में 'थलि च सेटि' (६।४।१२१) सूत्र, 'अत एक०' (६।४।१२०) से 'अतः लिटि', 'घ्वसोरेद्धावभ्यासलोपश्च' (६।४।११९) से एत्, 'अभ्यासलोपश्च' तथा 'गमहन०' (६।४।९८) से 'किति' पदों की अनुवृत्ति आती है। तदनुसार—"कित् लिट् अथवा सेट् थल् के परवर्ती रहते हिंसार्थक राध् धातु को एत्व और अभ्यास का लोप होता है ।"

(वा०) श्रन्थि०—श्रन्थ, ग्रन्थ, दम्भ और स्वञ्ज धातु से परवर्ती लिट् विकल्प से कित् होता है।

(वा०) दम्भेश्च०—कित् लिट् और सेट् थल् के परवर्ती रहते दम्भ् धातु को एत्व और अभ्यास का लोप होता है।

उदाहरण—(१) अप+√राध्+लिट् (=तस्=अतुस्, द्वित्व, अभ्यास संज्ञा, ह्रस्व, हलादिशेष)—र राध् अतुस् ('आ'='ए' एत्व और अभ्यास का लोप—'राधो हिंसायाम्', स्

दम्भु दम्भने । 'अनिदितामि'ति नलोपः । दभ्नोति । ददम्भ । * श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा * । कित्त्वपक्षे नलोपः । तस्याऽऽभीयत्वादसिद्धत्वेनैत्वाभ्यासलोपयोरप्राप्तौ । * दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ * । देभतुः । ददम्भतुः । देभुः । ददम्भुः । दम्भिष्यति । दभ्यात् । तृप प्रीणने । (७६६) **क्षुभ्नादिषु च** ८।४।३९ । क्षुभ्नादिषु नस्य न णत्वम् । तृप्नोति । ततर्प । तर्पिता । अशू व्याप्तौ, सङ्घाते च । अश्नुते । (७६७) **अश्नोतेश्च** ६।४।७२ । दीर्घादभ्यासावर्णात्परस्य नुम् स्यात् । आनशे । अशिता । 'व्रश्चे'ति षः । अष्टा । अशिष्यते–अक्ष्यते । अश्नुताम् । आश्नुत । अश्नुवीत । अक्षीष्ट । अशिषीष्ट । आशिष्ट–आष्ट । आक्षाताम् । आशिष्यत–आक्ष्यत ।

इति स्वादिप्रकरणम् ।

लोप इति, 'गमहन०' इत्यतः कितीति, 'अत एकहल्मध्ये' इत्यतः लिटीति 'थलि च सेटी'ति सूत्रं चानुवर्तते । अत आह—**एत्वेत्यादिना** ।

(७६६) **क्षुभ्नादिषु चेति** । क्षुभ्नादिगणपठितानां धातूनां णत्वं न भवतीति सूत्रार्थः ।

(७६७) **अश्नोतेश्चेति** । 'अत्र लोपोऽभ्यासस्ये'त्यत 'अभ्यासस्ये'त्यनुवर्तते ।

=र्=:)=अपरेधतुः । (२) लिट् प्र० पु० बहुव०—अपरेधुः । (३) √राध्+लिट् (सिप्=थल्=थ, द्वित्व, अभ्यास संज्ञा, ह्रस्व, हलादिशेष, क्रादिनियम से नित्य इट्='इ', एत्व, अभ्यास का लोप—'राधो हिंसायाम्')=रेधिथ । (४) लुट्—राद्धा ।

(१) √साध्+लट् (=तिप्=ति, श्नु='नु' गुण)=साध्नोति । (२) लिट्—ससाध । (३) लुट्—साद्धा । (४) लुङ्—असात्सीत । (५) लृङ्—असात्स्यत ।

√ञिधृषा (=धृष्) धातु—'प्रागल्भ्य' अर्थ में है । (१) √धृष्+लट् (=तिप्=ति, श्नु=नु, गुण, णत्व)=धृष्णोति । (२) लिट्—दधर्ष । (३) लुट्—धर्षिता ।

√दम्भु (=दम्भ्) का अर्थ 'दम्भ करना' है । (१) √दम्भ्+लट् (=तिप्=ति, श्नु=नु, गुण, 'न्' का लोप—'अनिदिताम्०')=दभ्नोति । (२) लिट्—ददम्भ । (३) √दम्भ्+लिट् (=तस्=अतुस्, द्वित्व, अभ्यास संज्ञा, हलादिशेष)—द दम्भ् अतुस् (विकल्प से कित्त्व—'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा', 'म्' का लोप—'अनिदिताम्०' नलोप-विधायक सूत्र आभीय होने के कारण असिद्ध होने से एत्वाभ्यास लोप की प्राप्ति न होने पर 'दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ' वार्तिक से एत्व और अभ्यास का लोप, स्=र्=:)=देभतुः । कित्त्व के अभावपक्ष में—द दम्भ् अतुस् (स्=र्=:)=ददम्भतुः । (४) लिट् प्र० पु० बहुव०—देभुः, ददम्भुः । (५) लृट्—दम्भिष्यति । (६) आशीर्लिङ्—दभ्यात ।

√तृप का अर्थ—'तृप्त होना' है ।

(७६६) पद—क्षुभ्नादिषु च । **अनुवृत्ति**—न, रषाभ्यां नो णः । **विधिसूत्र** । (निषेध) ।

मूलार्थ—क्षुभ्नादि गण पठित शब्दों में नकार को णकार नहीं होता । तृप्नोति ।

विमर्श—'न भाभू०' (८।४।३३) से 'न' तथा 'रषाभ्यां नो णः समानपदे' (८।४।२) से 'रषाभ्यां नो णः' की अनुवृत्ति आती है । अतः "क्षुभ्नादिगण पठित शब्दों के नकार को भी णकार आदेश नहीं होता ।"

अथ तुदादिप्रकरणम्

तुद व्यथने। (७६८) तुदादिभ्यः शः ३।१।७७। शपोऽपवादः। तुदति। तुदतः। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। तोत्स्यति। तोत्स्यते। तुदतु।

तस्मान्नुट्' इति च। तच्छब्देनात्र 'अत आदेः' इति कृतदीर्घ अकारः परामृश्यते। अत आह—**दीर्घादित्यादि**। **आनशे**। अश्धातोर्लिटि तङि धातोर्द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'अत आदेः' इत्यभ्यासाकारस्य दीर्घे 'अश्नोतेश्च' इति नुटि 'लिटस्तझयोः' इत्यनेन 'त' इत्यस्य स्थाने एशादेशेऽनुबन्धलोपे 'आनशे' इति सिद्धम्।

इति स्वादिप्रकरणम्।

अथ शविकरणा धातवो निरूप्यन्ते—

(७६८) **तुदादिभ्यः श इति**। कर्त्रर्थे सार्वधातुके परे तुदादिभ्यः स्वार्थे शः

उदाहरण—(१) √तृप्+लट् (=तिप्=ति, श्नु=नु, गुण, प्राप्त णत्व का 'क्षुभ्नादिषु च' से निषेध)=तृप्नोति। (२) लिट्—ततर्प। (३) लुट्—तर्पिता।

√अशू (=अश्) धातु का अर्थ—'व्याप्त होना व संघात' है। (१) √अश्+लट् (=त, श्नु='नु' 'टि' को एत्व)=अश्नुते।

(७६७) पद—अश्नोतेः, च। **अनुवृत्ति**—तस्मान्नुट्, अभ्यासस्य। **विधिसूत्र।**

मूलार्थ—अश् धातु के अभ्यास सम्बन्धी दीर्घ आकार से परे नुट् का आगम होता है। आनशे। अशिता इत्यादि।

विमर्श—यहाँ 'तस्मान्नुड् द्विहलः' (७।४।७१) से 'तस्मात्' तथा 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' की अनुवृत्ति आती है। 'तत्' शब्द से 'अत आदेः' से विहित दीर्घ आकार का ग्रहण होता है। इस प्रकार—"अश् धातु के अवयव दीर्घ आकार से परे नुट् का आगम होता है।"

उदाहरण—(२) √अश्+लिट् (=त=एश्='ए', द्वित्व, अभ्यास संज्ञा, हलादिशेष, अभ्यास के 'अ'='आ' दीर्घ—'अत आदेः')—आ अश् ए (नुट्='न्'—'अश्नोतेश्च')= आनशे। (३) लुट्—अशिता (इट् विकल्प)। (४) इट् के अभावपक्ष में—√अश्+लुट् (=त=डा='आ', तास्, 'श्'='ष्'—'व्रश्च०' 'त्'='ट्'—ष्टुत्व, टिलोप)=अष्टा। (५) √अश्+लृट् (=त, स्य, विकल्प से इट्—'स्वरतिसूति०' षत्व, 'टि' को एत्व)=अशिष्यते। इट् के अभावपक्ष में—अश् स्य ते ('श्'='ष्'—'व्रश्च', 'ष्'='क्'—'षढोः०' षत्व, क्+ष्= क्ष्)=अक्ष्यते। (६) लोट्—अश्नुताम्। (७) लङ्—आश्नुत। (८) विधिलिङ्—अश्नुवीत। (९) आशीर्लिङ् में विकल्प से इट्—अशिषीष्ट, अक्षीष्ट। (१०) लुङ् में विकल्प से इट्—आशिष्ट। इट् के अभावपक्ष में 'झलो झलि' से 'स्' का लोप—आष्ट। (११) लुङ् प्र० पु० द्वि०—आक्षाताम्। (१२) लृङ् विकल्प से इट्—आशिष्यत, आक्ष्यत।

स्वादि-प्रकरण समाप्त।

प्रस्तुत प्रकरण में 'श' विकरण वाली धातुओं के रूपों की रचना-प्रक्रिया का निर्देशन किया जा रहा है।

तुदताम् । अतौत्सीत् । अतुत्त । णुद प्रेरणे । नुदति । नुदते । नुनोद । नुनुदे । नोत्ता । नोत्स्यति । नोत्स्यते । भ्रस्ज पाके । 'ग्रहिज्यावयी'ति सम्प्रसारणम् । सस्य श्चुत्वेन

स्यादिति सूत्रार्थः । तुदतीति । तुद्धातोर्लटि तिपि, सार्वधातुकसंज्ञायां लघूपधगुणं बाधित्वा नित्यत्वात् 'तुदादिभ्यः शः' इत्यनेन शे कृते अनुबन्धलोपे, तस्य अपित्वात् 'सार्वधातुकमपित्' इति ङित्त्वाद् गुणाभावे 'तुदति' इति । आत्मनेपदे—तुदते इति ।

√तुद धातु का अर्थ—'पीडा पहुँचाना' है । 'स्वरितेत्' होने से यह धातु उभयपदी है ।

(७६८) पद—तुदादिभ्यः, शः । **अनुवृत्ति**—कर्तरि, सार्वधातुके । **विधिसूत्र** ।

मूलार्थ—तुदादिगण पठित धातुओं से 'श' विकरण होता है । यह शप् का अपवाद है । तुदति । तुदते इत्यादि ।

विमर्श—प्रकृत सूत्र में 'कर्तरि शप्' (३।१।६८) से 'कर्तरि' तथा 'सार्वधातुके यक्' (३।१।६७) से 'सार्वधातुके' की अनुवृत्ति आती है । तदनुसार—"कर्त्रर्थक सार्वधातुक के परवर्ती रहते तुदादिगण की धातुओं से श (=अ) प्रत्यय होता है ।"

उदाहरण—(१) √तुद्+लट् (=तिप्=ति, शप् का बाधकर श='अ'—'तुदादिभ्यः शः', 'श' के अपित् होने से ङिद्वद्भाव—'सार्वधातुकमपित्' अतः गुण का निषेध)=तुदति । आत्मनेपद में 'टि' को एत्व—तुदते । (२) √तुद्+लिट् (=तिप्=णल्='अ' द्वित्व, अभ्यास संज्ञा, हलादिशेष, गुण)=तुतोद । आ० प० में—तुतुदे । (३) √तुद्+लिट् (=सिप्=थल्='थ', द्वित्व, अभ्यास संज्ञा, हलादिशेष)—तु तुद् थ (क्रादिनियम से नित्य इट्='इ', गुण)=तुतोदिथ । (४) √तुद्+लुट् (=तिप्=डा=आ, तास्, टिलोप, लघूपध गुण, 'द्'='त्' चर्त्व)=तोत्ता । (५) लृट् प० प०—तोत्स्यति । आ० प०—तोत्स्यते । (६) लोट्—तुदतु । आ० पद में—तुदताम् । (७) √तुद्+लुङ् (=तिप्=ति, अट्, इकारलोप—'इतश्च' च्लि, च्लि=सिच्='स्' ईट्='ई'—'अस्तिसिचोऽपृक्ते')—अ तुद् स् ई त् ('उ'='औ' वृद्धि—'वदव्रज०', 'द्'='त्'—चर्त्व—'खरि च')=अतौत्सीत् । आत्मनेपद में—अतुत्त ।

√तुद् धातु लुङ् लकार के रूप (परस्मैपद)

एक०	द्वि०	बहु०
प्र० पु०—अतौत्सीत्	अतौत्ताम्	अतौत्सुः
म० पु०—अतौत्सीः	अतौत्तम्	अतौत्त
उ० पु०—अतौत्सम्	अतौत्स्व	अतौत्स्म

(आत्मनेपद)

एक०	द्वि०	बहु०
प्र० पु०—अतुत्त	अतुत्साताम्	अतुत्सत
म० पु०—अतुत्थाः	अतुत्साथाम्	अतुद्ध्वम्
उ० पु०—अतुत्सि	अतुत्स्वहि	अतुत्स्महि

णुद् (=नुद) धातु का अर्थ—'प्रेरणा देना' है । (१) लट् प० प०—नुदति । आ० प०—नुदते । (२) लिट् प० प०—नुनोद । आ० प०—नुनुदे । (३) लुट्—नोत्ता । (४) लृट्—नोत्स्यति । आ० प०—नोत्स्यते ।

√भ्रस्ज् धातु का अर्थ—'भूनना' है । यह धातु भी अनिट् है । (१) √भ्रस्ज्+लट् (=तिप्=ति, श='अ'—'तुदादिभ्यः शः', 'र्'='ऋ'—सम्प्रसारण—'ग्रहिज्या०', पूर्वरूप,

शः। तस्य जश्त्वेन जः। भृज्जति। भृज्जते। (७६९) **भ्रस्जो रोपधयो रमन्यतरस्याम्** ६।४।४७। भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके। मित्वादन्त्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः। बभर्ज। बभर्जतुः। बभर्जुः। वर्भाजिथ-बभर्ष्ठ। रमभावपक्षे—बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जुः। बभ्रज्जिथ। 'स्कोरि'ति सलोपः। 'व्रश्चे'ति षः। बभ्रष्ठ। बभर्जे। बभर्जाते। बर्भाजिरे।

---

(७६९) **भ्रस्जो रोपधयोरिति।** 'भ्रस्जः' इत्यत्रावयवषष्ठी, 'रोपधयोरि'त्यत्र स्थानषष्ठी। रश्च उपधा च तयोरिति विग्रहः। रेफादकार उच्चारणार्थः। 'आर्धधातुके' इत्यधिकृतम्। तदाह—**'भ्रस्जे' इत्यादिना। बभर्ज।** भ्रस्ज्धातोर्लिटि, तत्स्थाने तिपि, तिपो णलादेशेऽनुबन्धलोपे धातोर्द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'अभ्यासे चर्चे' इति भकारस्य बकारे 'ब भ्रस्ज् अ' इति जाते, 'भ्रस्जो रोपधयो रमन्यतरस्याम्' इति रेफस्य उपधाभूतसकारस्य च स्थाने रमि प्राप्ते, 'मिदचोऽन्त्यात्परः'

'स्'='श्'—श्चुत्व, 'श्'='ज्'—'झलां जश् झशि')=भृज्जति। आत्मनेपद पक्ष में 'टि' को एत्व—भृज्जते।

(७६९) पद—भ्रस्जः, रोपधयोः, रम्, अन्यतरस्याम्। **विधिसूत्र।**

मूलार्थ—आर्धधातुक के परवर्ती रहते 'भ्रस्ज्' धातु के रेफ और उपधा के स्थान में विकल्प से 'रम्' का आगम होता है। बभर्ज इत्यादि।

विमर्श—'आर्धधातुके' (६।४।४६) का अधिकार है। अतः "आर्धधातुक के परे रहते 'भ्रस्ज्' धातु के रेफ तथा उपधा दोनों के स्थान में विकल्प से 'रम्' का आगम होता है।"

मित्वादिति। 'मित्' होने के कारण 'रम्' अन्त्य अच् से परे होता है।

स्थानषष्ठी—सूत्रस्थ 'रोपधयोः' में स्थानषष्ठी है। अतः 'रम्' होने पर रेफ और उपधा सकार की निवृत्ति हो जाती है। अन्यथा स्थानषष्ठी का उच्चारण व्यर्थ हो जाता।

उदाहरण—(१) √भ्रस्ज्+लिट् (=तिप्=णल्='अ' द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'भ्'='ब्'—'अभ्यासे चर्च')—ब भ्रस्ज् अ (रम्='र्' का विकल्प से आगम, रकारोत्तरवर्ती अकार से परे और रेफ तथा उपधा सकार की निवृत्ति)=बभर्ज। रम् के अभावपक्ष में—ब भ्रस्ज् अ ('स्'='श्'—श्चुत्व, 'श्'='ज्'—'झलां जश् झशि')=बभ्रज्ज। (२) लिट् प्र० पु० द्विवचन में विकल्प से 'रम्' होने पर—बभर्जतुः। रम् के अभावपक्ष में—बभ्रज्जतुः। (३) लिट् प्र० पु० बहुवचन में 'रम्' होने पर—बभर्जुः। रम् के अभावपक्ष में—बभ्रज्जुः। (४) √भ्रस्ज्+लिट् (=सिप्=थल्='थ', द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'भ्'='ब्'—चर्त्व)—ब भ्रस्ज् थ (रम्='र्' का आगम विकल्प से, 'र्' 'स्' की निवृत्ति, भारद्वाज-नियम से इट्='इ')=बर्भाजिथ। इट् के अभावपक्ष में—ब भ्रस्ज् थ ('ज्'='ष्'—'व्रश्च०', 'र्, स्'=रम्='र्'—'भ्रस्जो०')—ब भ र् ष् थ ('थ्'='ठ्'—ष्टुत्व)=बभर्ष्ठ। रम् के अभाव तथा इट् के अभाव पक्ष में—ब भ्रस्ज् थ (ज्='ष्'—'व्रश्च०', 'स्' का लोप—'स्कोः संयोगाद्योरन्ते च', 'थ्'='ठ्'—ष्टुत्व=बभ्रष्ठ। (५) आत्मनेपद में विकल्प से 'रम्' आगम होने पर—बभर्जे, बभर्जाते, बर्भाजिरे। रम् के अभावपक्ष में—बभ्रज्जे, बभ्रज्जाते, बभ्रज्जिरे। (६) √भ्रस्ज्+लुट् (=तिप्=डा=आ, तास्, टिलोप)—भ्रस्ज् ता (विकल्प से रम्='र्' का आगम, रेफ सकार की निवृत्ति, 'ज्'='ष्'—'व्रश्च०', 'त्'='ट्'—ष्टुत्व)=भर्ष्टा। रम् के अभावपक्ष में—

बभ्रज्जे । बभ्रज्जाते । बभ्रज्जिरे । भर्ष्टा–भ्रष्टा । भर्क्ष्यति–भ्रक्ष्यति । * क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन * । भृज्ज्यात् । भृज्ज्यास्ताम् । भृज्ज्यासुः । भर्क्षीष्ट–भ्रक्षीष्ट । अभार्क्षीत्–अभ्राक्षीत् । अभर्ष्ट–अभ्रष्ट । अभर्क्ष्यत्–अभ्रक्ष्यत् । अभर्क्ष्यत–अभ्रक्ष्यत । कृष विलेखने । कृषति । कृषते । चकर्ष । चकृषे । 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' । क्रष्टा–कर्ष्टा । कृक्षीष्ट । 'स्पृशमृशे'ति सिज्वा ।

इत्यकारात्परस्यैव रमागमेऽनुबन्धलोपे उपधायाः सस्य रेफस्य च निवृत्तौ 'बभर्ज' इति । रमोऽभावपक्षे तु—'भ्रस्ज् भ्रस्ज् अ' इति स्थिते हलादिशेषे 'अभ्यासे चर्च' इति भकारस्य बकारे, सस्य श्चुत्वेन शत्वे, 'झलां जश् झशि' इति शस्य जश्त्वेन जत्वे, बभ्रज्ज इति रूपम् । **अक्राक्षीत्** । कृषधातोर्लुङि तिपि अनुबन्धलोपे, तिप इकारलोपे अङ्गस्य अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इति नित्ये सिचि प्राप्ते, तं प्रबाध्य 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वक्तव्यः' इति वार्तिकेन विकल्पेन सिच्यनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्'

भ्रस्ज् ता ('स्' का लोप—'स्कोः०' 'ज्'='ष्' ष्टुत्व)=भ्रष्टा। (६) लृट्—(विकल्प से 'रम्')—भर्क्ष्यति, भ्रक्ष्यति।

वा०—कित्, ङित् आर्धधातुक के परवर्ती रहते रम् आगम का बाधकर पूर्वविप्रतिषेध से सम्प्रसारण ही होता है।

व्याख्याकार

डॉ० सुरेशचन्द्र शर्मा

व्याकरणाचार्य, एम० ए० पी-एच० डी०

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक
चौखम्बा सुरभारती प्रकाशन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129, वाराणसी 221001
दूरभाष : 2335263
ई-मेल : csp_naveen@yahoo.co.in

© सर्वाधिकार प्रकाशकाधीन
संस्करण 2008
मूल्य : 100.00

अन्य प्राप्तिस्थान
चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069, वाराणसी 221001

❖

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113, दिल्ली 110007

❖

चौखम्बा पब्लिशिंग हाउस
4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : 32996391; 23286537
ई-मेल : chaukhamba_neeraj@yahoo.com

THE
CHAUKHAMBA SURBHARATI GRANTHAMALA
185

MADHYASIDDHĀNTAKAUMUDĪ

OF

ŚRĪ VARADARĀJĀCĀRYA

(Part 3 : Ṇijanta to Kāraka)

Edited with

'Subodhini' Sanskrit & Hindi Commentaries

By

Dr. Suresh Chandra Sharma
Vyakaranacharya, M. A., Ph. D.

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

©All rights reserved.

No part of this publication may be reproduced or transmitted in any form or by any means, electronical or mechanical, including photocopying, recording or any information storage or retrieval system, without prior permission in writing from the publisher.

Publishers :
CHAUKHAMBA SURBHARATI PRAKASHAN
(Oriental Publishers & Distributors)
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
Varanasi 221001
Tel. : 2335263

Also can be had from :
CHOWKHAMBA VIDYABHAWAN
Chowk (Behind Bank of Baroda Building)
Post Box No. 1069
Varanasi 221001

❖

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U.A. Bungalow Road, Jawahar Nagar
Post Box No. 2113
Delhi 110007

❖

CHAUKHAMBA PUBLISHING HOUSE
4697/2, Ground Floor
Gali No. 21-A, Ansari Road
Daryaganj. New Delhi 110002
Tel. : 32996391: 23286537
e-mail : chaukhamba_neeraj@yahoo.com

निवेदनम्

विदितमेव तत्रभवतां श्रीमतां यत्संस्कृतवाङ्मयज्ञानाय व्याकरणमेव मुख्यं साधनम् । ऐन्द्रचान्द्रादिषु नैकेषु व्याकरणेषु सत्स्वपि सर्वत्राधुना पाणिनीयव्याकरणमेव प्रचलति । तच्च व्याकरणं लक्ष्यलक्षणात्मकम् । तत्र शब्दो हि लक्ष्यः, लक्षणन्तु सूत्रम् । अनयोः सम्यग्ज्ञानार्थं पाणिनीयाष्टाध्याय्या अध्ययनं परमावश्यकम् । अतः 'अष्टाध्यायी'ति ग्रन्थस्य गूढाभिप्रायं ज्ञातुं काशिकादिवृत्तिग्रन्थानां पठनपाठनयोः परम्परा पुरा प्रचलिता । परिवर्तनशीलेऽस्मिन्युगेऽध्ययनाध्यापनविधावपि परिवर्तनं स्वाभाविकमेव । अत एव सरलरीत्या व्याकरणशास्त्रज्ञानाय अष्टाध्यायीक्रमस्थकाठिन्यनिवारणाय च प्रक्रियाक्रमस्यारम्भो जातः । धर्मकीर्तिकृतरूपावतारादुद्गतेयं प्रक्रियापरम्परा रूपमालया प्रक्रियाकौमुद्या च पल्लविता, सिद्धान्तकौमुद्या च पुष्पिता तत्रैव पर्यवसिताऽपि । श्रीमद्भट्टोजिदीक्षितविदुषा विरचिता वैयाकरणसिद्धान्तकौमुदी प्रौढा पाण्डित्यपरिपूर्णा वर्तत इति जानन्त्येव विद्वांसः । अतः सुकुमारमतीनां बालानां प्रवेशोऽत्र दुष्कर इति विचार्य तच्छिष्येण पण्डितप्रवरेण वरदराजाचार्येण प्राथमिकाध्येतॄणां बालानामनायासेन बुद्धिप्रवेशलाभाय लघसिद्धान्तकौमुदी, लब्धकिञ्चित्प्रवेशानां माध्यमिकानाञ्च बालानां व्याकरणशास्त्रबोध-सम्पत्तये मध्यसिद्धान्तकौमुदी विरचिता ।

सेयं मध्यसिद्धान्तकौमुदी स्वल्पेन कालेन बहुबोधाधायिनीति विदन्त्येव विद्वांसः । ग्रन्थस्यास्य परमोपादेयतामभिलक्ष्य कैश्चिद्विश्वविद्यालयैः माध्यमिककक्षासु वा विनिर्धारितोऽयं ग्रन्थः । यद्यप्यद्यत्वे मध्यसिद्धान्तकौमुद्याः संस्कृतहिन्दीव्याख्योपेतानि नैकानि संस्करणानि प्रकाशितानि सन्ति । परं 'विद्यार्थिजनोपयोगि सरलटीकोपेतं किञ्चित्संस्करणं नैव समुपलभ्यते' इत्यभावमनुभवता चौखम्बासुरभारतीप्रकाशनाध्यक्षस्याग्रहवशंवदेन छात्रहितैषिणा मया 'सुबोधिनी'ति संस्कृत-हिन्दीव्याख्योपेतायाः मध्यसिद्धान्तकौमुद्याः भागद्वयं प्रकाशितम् । तस्य लोकप्रियतामवेक्ष्य सम्प्रति द्वितीयो भागः प्रकाश्यते । आशासे यदनेन संस्करणेनापि छात्राणां नूनमेवोपकारो भविष्यति ।

कार्येऽस्मिन् व्याकरण-साहित्य-वेदान्ताद्यनेकशास्त्रमर्मविदुषां मैनपुरीस्थसंस्कृत-महाविद्यालये व्याकरणविभागाध्यक्षाणां पूज्यगुरुवर्याणां श्रीमतां केशवदेवतिवारीमहाभागानां हार्दिकीमधमर्णतामावहामि, तेषां चरणयोः विनतभावेन प्रणामाञ्जलिं च समर्पयामि, यैरत्यन्तवात्सल्यभावेन पदे पदे काठिन्यं निरस्यास्माकं साहाय्यं कृतम् । अस्याः व्याख्यायाः लेखनादिकार्ये ममानुजेन डॉ. महेशचन्द्रेण यत्साहाय्यं कृतं तदर्थं तमपि शुभाशीर्वचनैः सभाजयामि । अत्र कियत्साफल्यमधिगतं मयेत्यत्र तु विद्वांसः प्रेक्षका एव प्रमाणम् । प्रमादेनात्र काश्चन त्रुटयः स्युस्ताः संशोध्य विद्वद्भिः संसूचनीयोऽप्ययं जन इति शम् ।

विदुषामाश्रवः

सुरेशचन्द्र शर्मा

भूमिका

संस्कृत भाषा भारत की ही नहीं, अपितु विश्व की प्राचीनतम भाषा है। सभ्यता के उष:काल में इस भाषा का उदय हुआ और सर्वप्रथम भारत को ही इस उदय के दर्शन का श्रेय प्राप्त हुआ। 'वेद संसार के प्राचीनतम ग्रन्थ हैं' यह सभी विद्वानों और ऐतिह्य विदों ने स्वीकार किया है।

किसी भी भाषा की सुरक्षा और उसका मौलिक ज्ञान उसके व्याकरण में निहित होता है। बिना व्याकरण के भाषा प्राय: विशृंखल और अपूर्ण रहती है। संस्कृत-वाङ्मय में व्याकरणशास्त्र का विशिष्ट स्थान है। 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्।' अर्थात् जिससे साधु शब्दों का ज्ञान होता है, उसे 'व्याकरण' की संज्ञा से अभिहित किया जाता है। महाभाष्यकार ने इसी को 'शब्दानुशासन'[१] भी कहा है। शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द: और ज्यौतिष—इन षडङ्गों में 'व्याकरण' वेद का मुख रूप से प्रधान अङ्ग माना जाता है; जैसा कि पाणिनीयशिक्षा में कहा गया है—

'छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्॥'[२]

भगवान् पतञ्जलि ने भी कहा है—'प्रधानं च षडङ्गेषु व्याकरणम्।'[३]

व्याकरण-वाङ्मय में ऐन्द्र व्याकरण सबसे प्राचीन है। शब्दोपदेश के लिए प्रकृति-प्रत्यय विभाग की कल्पना सर्वप्रथम सुरगुरु बृहस्पति के शिष्य इन्द्र ने की थी। देवराज इन्द्र से लेकर महर्षि पाणिनि पर्यन्त[४] अनेक आचार्यों ने व्याकरणशास्त्र का निर्माण किया था, परन्तु आज पाणिनीय व्याकरण ही सर्वाङ्ग परिपूर्ण उपलब्ध होता है। यद्यपि यह संस्कृत के प्राचीन आर्ष व्याकरणों में सबसे अन्तिम और संक्षिप्ततम है; तथापि लौकिक और वैदिक दोनों प्रकार के संस्कृत-वाङ्मय को आलोकित करने वाला एक महान् प्रकास्तम्भ है। विश्व की किसी भी भाषा का व्याकरण इतना सरल और परिष्कृत नहीं बन सका है। संसार के सभी विद्वानों ने इसकी वैज्ञानिकता की मुक्तकण्ठ से प्रशंसा की है। पाणिनीय व्याकरण का मूलग्रन्थ भगवान् पाणिनि की 'अष्टाध्यायी' है। इसमें

---

[१] 'अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनम्, शब्दानामनुशासनं शब्दानुशासनं सूत्रवार्तिकभाष्यव्याख्यानादिरूपं शास्त्रम्।'

[२] पाणिनीय-शिक्षा (४१-४२)।

[३] महाभाष्यम् (पस्पशाह्निकम्)।

[४] बोपदेव ने इन्द्र आदि आठ वैयाकरणों का उल्लेख किया है—

'इन्द्रश्चान्द्र: काशकृत्स्नापिशली शाकटायन:।
पाणिन्यमरजैनेन्द्रा: जयन्त्यष्टादिशाब्दिका:॥ (कविकल्पद्रुम:)

३९९५ सूत्र हैं ।[१] इस अष्टाध्यायी के माध्यम से उन्होंने संस्कृत भाषा के परिष्कृत रूप को स्थायित्व प्रदान किया । कालान्तर में महर्षि कात्यायन ने 'अष्टाध्यायी' की समीक्षा करते हुए उसके पूरक के रूप में वार्तिक ग्रन्थ की रचना की । सूत्र तथा वार्तिकों के पारस्परिक समन्वय को समझाने के लिए शेषावतार भगवान् पतञ्जलि ने विशद विवरणात्मक ग्रन्थ 'महाभाष्य' की रचना की । उन्होंने पूर्ववर्ती दोनों आचार्यों की रचनाओं में सत्यान्वेषण किया और सिद्धान्ततः निष्कर्ष प्रस्तुत किया, जिससे विद्वानों ने उनके सिद्धान्तों को विशेष मान्यता प्रदान की—'यथोत्तरं मुनीनां प्रामाण्यम् ।' इस प्रकार सूत्रकार 'पाणिनि', वार्तिककार 'कात्यायन' और भाष्यकार 'पतञ्जलि' ये तीनों आचार्य व्याकरण के 'त्रिमुनि' कहलाते हैं ।

पाणिनि

महर्षि पाणिनि के जन्मस्थान, जन्मकाल आदि के विषय में इतिहासकार एकमत नहीं हैं । 'त्रिकाण्डशेष' कोष में पाणिनि के छः नामों का उल्लेख मिलता है — पाणिन, आहिक, दाक्षीपुत्र, शालङ्कि, पाणिनि और शालातुरीय । इन नामों द्वारा इनके गोत्र, माता-पिता तथा देश का निर्णय किया जा सकता है । इनमें पाणिन और पाणिनि दोनों नाम गोत्र-व्यपदेशज हैं । कुछ विद्वानों का मत है कि 'आहिक' इनका मूल नाम है । इनकी माता का नाम दाक्षी था, अतः इनका एक नाम दाक्षीपुत्र भी है । महाभाष्यकार पतञ्जलि का कथन है—'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः ।' कुछ गवेषकों के अनुसार इनके पिता का नाम शलङ्क था, अतः इनको 'शालङ्कि' कहा गया । 'शालातुरीय' नाम इनके जन्मप्रदेश को स्पष्ट करता है । 'गणरत्नमहोदधि' नामक ग्रन्थ में 'शालातुरीय' की व्युत्पत्ति इस प्रकार की गई है—**'शलातुरो नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्रभवान् पाणिनिः ।'** इससे स्पष्ट होता है कि पाणिनि का जन्मस्थान 'शलातुर' नामक ग्राम ही है, जो वर्तमान में 'लाहौर' नाम से प्रसिद्ध है और पाकिस्तान का विशाल नगर है । इनकी प्रारम्भिक शिक्षा सम्भवतः तक्षशिला में हुई थी, पश्चात् अपने ज्ञान की अभिवृद्धि के लिए यह अन्यत्र चले गये । इनके गुरु का नाम उपवर्षाचार्य था, जो नालन्दा विश्वविद्यालय के सुप्रसिद्ध आचार्य कहे जाते थे । इन्होंने अपने अध्ययन काल में ही कठिन तपस्या करके आशुतोष भगवान् शङ्कर को प्रसन्न किया और उनके उपदेश से 'अष्टाध्यायी' नामक व्याकरणशास्त्र की रचना की । महर्षि पाणिनि की वन्दना में आचार्यों ने कहा भी है—

> 'येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
> कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

---

[१] 'चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता ।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह ॥
(स्वरसिद्धान्तचन्द्रिका, श्लो॰ १५)

महर्षि पाणिनि के काल के सम्बन्ध में इतिहासकारों के भिन्न-भिन्न मत हैं। अष्टाध्यायी के 'कुमारः श्रमणादिभिः' (२.१.७०) सूत्र में 'श्रमण' पद प्रयुक्त हुआ है। इससे आलोचक पाणिनि को बुद्धकालीन अथवा तत्पश्चात्कालीन सिद्ध करते हैं। इसी प्रकार कुछ विद्वान् 'इन्द्रवरुण०' (४.१.४९) सूत्र में 'यवन' पद को देखकर इन्हें 'सिकन्दर' के समकालीन स्वीकार करते हैं, परन्तु यह नितान्त भ्रमपूर्ण है। क्योंकि वैदिक ब्राह्मणग्रन्थों में भी श्रमण पद का उल्लेख मिलता है।[1] इसी प्रकार सिकन्दर के भारतागमन से भारतीय लोग यवनों से परिचित हुए। यह भी भ्रम ही है, क्योंकि महाभारत में यवन सैनिकों के द्वारा युद्ध करने का प्रसङ्ग है।

पं॰ युधिष्ठिर मीमांसक का मत है कि पाणिनि विक्रम से २८०० वर्ष पूर्व हुए हैं। किन्तु भाण्डारकर और गोल्डस्टुकर ने पाणिनि का समय ५०० ई॰ पू॰ से पहले निश्चित किया है। इसी प्रकार भारतीय और पाश्चात्य मतों पर सम्यग् विचार करने के उपरान्त डॉ॰ वासुदेवशरण अग्रवाल ने पाणिनि का समय ५०० ई॰ पू॰ निश्चित किया है।[2]

कात्यायन

पाणिनि की 'अष्टाध्यायी' पर आवश्यकतानुसार अनेक आचार्यों ने वार्तिकग्रन्थ रचे थे। उनमें महामुनि कात्यायन का स्थान प्रमुख है। पाणिनीय व्याकरण को सम्पूर्ण एवं समृद्ध बनाने के लिए कात्यायन का विशेष महत्त्व है। पाणिनि और कात्यायन समकालीन और सतीर्थ्य थे। इनका कात्यायन नाम गोत्रज है। आपका मूल नाम 'वररुचि' था। महाभाष्य के प्रथमाह्निक में 'यथा लौकिकवैदिकेषु' इस वार्तिक पर 'प्रियतद्धिता दाक्षिणात्याः, यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते।' पतञ्जलि के इस वचन से विदित होता है कि ये दाक्षिणात्य थे। ये केवल वार्तिककार ही नहीं अपितु महाकवि भी थे। इनके 'स्वर्गारोहण' नामक काव्य की प्रशंसा अनेक ग्रन्थों में मिलती है। यथा—

'यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।
काव्येन रुचिरेणैव ख्यातो वररुचिः कविः॥'

महाभाष्यकार पतञ्जलि

इस समय पाणिनीय व्याकरण पर पतञ्जलि-विरचित एक ही भाष्य-ग्रन्थ उपलब्ध होता है। यह विशालकाय होने से महाभाष्य के नाम से प्रसिद्ध है। भाष्य का तात्पर्य निम्नाङ्कित है —

---

[1] 'अत्र पिता अपिता भवति, माता अमाता, लोका अलोकाः, देवा अदेवाः, श्रमणोऽश्रमणः तापसोऽतापसः।' (शतपथब्राह्मण)

[2] द्रष्टव्य—श्रीवासुदेवशरण अग्रवाल : 'पाणिनिकालीन भारतवर्ष'। (पृ॰ ४७०-४८०)

'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥'

महामुनि पतञ्जलि एवं उनके महाभाष्य की सभी विद्वानों ने मुक्तकण्ठ से प्रशंसा की है । उनका महाभाष्य न केवल व्याकरणशास्त्र का ही प्रामाणिक ग्रन्थ है, अपितु अनेक विषयों का आकर ग्रन्थ है । इस ग्रन्थ की भाषा यद्यपि अत्यन्त सरल है, तथापि कहीं-कहीं भावगाम्भीर्य अत्यधिक है ।

भगवान् पतञ्जलि ने मनोवाक्कायदोषनिरसनार्थ 'योगसूत्र', 'महाभाष्य' और 'चरकसंहिता' इन तीन विश्वप्रसिद्ध ग्रन्थों की रचना की, जैसा कि किसी विद्वान् ने भगवान् पतञ्जलि की स्तुति करते हुए कहा है—

'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥'

महाभाष्यकार पतञ्जलि ने अपने परिचय के विषय में कुछ नहीं कहा है, किन्तु 'महाभाष्य' में कुछ स्थलों पर 'गोर्नदीयस्त्वाह' तथा 'गोणिकापुत्रः' का उल्लेख मिलता है । इससे ज्ञात होता है कि यह गोर्नद प्रदेश के निवासी थे । यह गोर्नद प्रदेश कहाँ है ? इस पर आधुनिक विद्वान् गोण्डा जनपद को ही गोर्नद मानते हैं । इनके महाभाष्य में 'पुष्यमित्रो जयते, इह पुष्यमित्रं याजयामः' इत्यादि प्रयोग मिलते हैं । इससे प्रतीत होता है कि ये राजा पुष्यमित्र के समकालिक थे । पुष्यमित्र का समय ईसा की द्वितीय शताब्दी निश्चित किया गया है । भारतीय पौराणिक गणना के आधार पर पं॰ युधिष्ठिर मीमांसक ने पतञ्जलि का समय विक्रम से १२०० वर्ष पूर्व निश्चित किया है ।

पाणिनीय व्याकरण के ये तीनों आचार्य 'त्रिमुनि' के नाम से प्रसिद्ध हैं । आशुतोष भगवान् शंकर के डमरू से पाणिनि के चतुर्दशसूत्र प्राप्त हुए और उन्हीं सूत्रों के आधार पर उन्होंने अष्टाध्यायी की रचना की । उसकी पूर्ति के लिए कात्यायन ने वार्तिकों की रचना की और भगवान् शेषावतार पतञ्जलि ने ज़िज्ञासु विद्यार्थियों और मनीषियों के हितार्थ 'महाभाष्य' का प्रवचन किया । ये तीनों व्याकरणशास्त्र के प्रवर्तक हैं ।

अष्टाध्यायी के टीकाकार

पाणिनीय व्याकरण के मूल ग्रन्थ 'अष्टाध्यायी' पर अनेक वृत्तिग्रन्थ लिखे गये । वृत्तिकारों में श्वोभूति, व्याडि, कुणि, माथुर, वररुचि आदि प्रमुख हैं । परन्तु इस समय उपलब्ध वृत्ति-ग्रन्थों में वामन और जयादित्य द्वारा विरचित 'काशिकावृत्ति' अत्यन्त सराहनीय है । इसका निर्माणकाल विद्वानों ने वि॰ सं॰ ६५०-७०० के मध्य स्वीकार किया है ।

इस प्रकार अध्येता को सर्वप्रथम सम्पूर्ण 'अष्टाध्यायी' कण्ठस्थ करके प्रयोग के लिए 'काशिका' का अध्ययन करना होता था । अनन्तर विशेष ज्ञानार्थ महाभाष्य पढ़कर ही विशिष्ट पाण्डित्य प्राप्त होता था ।

प्रक्रिया-क्रम

प्रौढ़ एवं विशेष परिश्रम न करने वाले विद्यार्थियों को उक्त प्रणाली में कष्ट और गौरव का अनुभव होने लगा था। अतः सरल रीति से व्याकरणशास्त्र के ज्ञान के लिए तथा अष्टाध्यायी-क्रमस्थ कठिनाई को दूर करने के लिए सर्वप्रथम बौद्धमताबलम्बी धर्मकीर्ति ने वि॰ सं॰ १३०० 'रूपावतार' नामक प्रक्रिया-ग्रन्थ की रचना की। पश्चात् विमल सरस्वती ने 'रूपमाला' और पं॰ रामचन्द्राचार्य ने 'प्रक्रियाकौमुदी' की रचना की। किन्तु इन प्रक्रिया-ग्रन्थों में अष्टाध्यायी के समस्त सूत्रों का सन्निवेश नहीं था। इस न्यूनता की पूर्ति के लिए म॰ म॰ श्रीभट्टोजि दीक्षित ने 'वैयाकरणसिद्धान्तकौमुदी' की रचना की। विद्वानों ने भट्टोजि दीक्षित का समय वि॰ सं॰ १५०० से १५७५ के मध्य स्वीकार किया है। उक्त ग्रन्थ अष्टाध्यायी के समस्त सूत्रों सहित उणादिसूत्र, फिट्सूत्र, लिङ्गानुशासन, गणपाठ और धातुपाठ से सर्वाङ्ग परिपूर्ण है। यह ग्रन्थ इतना उपयोगी सिद्ध हुआ कि सम्पूर्ण भारतवर्ष में पाणिनीय व्याकरण का अध्ययन इसी के माध्यम से होने लगा। 'सिद्धान्तकौमुदी' पर अनेक टीकाएँ लिखी गयीं, जिनमें दीक्षित जी की प्रौढमनोरमा, ज्ञानेन्द्र सरस्वती की तत्त्वबोधिनी, वासुदेव दीक्षित की बालमनोरमा तथा नागेश की लघुशब्देन्दुशेखर प्रसिद्ध है।

आचार्य वरदराज़

आचार्य वरदराज दाक्षिणात्य पण्डित थे। इनके पिता दुर्गातनय और गुरु भट्टोजिदीक्षित थे। अपने अध्ययन के पश्चात् इन्होंने पाणिनि-व्याकरण में प्रवेशार्थी सुकुमार मति वाले बालकों के लिए 'सिद्धान्तकौमुदी' का पथप्रदर्शक 'लघुसिद्धान्तकौमुदी' नामक ग्रन्थ की रचना की। वरदराज का यह लघु प्रयास प्रारम्भिकं छात्रों के लिए परमोपयोगी है।

मध्यसिद्धान्तकौमुदी

इस प्रकार 'लघुसिद्धान्तकौमुदी' द्वारा साधारण ज्ञान प्राप्त हो जाने पर विद्यार्थियों की ज्ञानवृद्धि के लिए वरदराज ने द्वितीय सोपान रूप 'मध्यसिद्धान्तकौमुदी' का प्रणयन किया। मध्यसिद्धान्तकौमुदी के अन्त में श्रीवरदराज ने कहा है—

'कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी।
तस्याः सङ्ख्या तु विज्ञेया खबाणकरवह्निभिः॥'

यह किंवदन्ती है कि आचार्य वरदराज की इस कृति को देखकर गुरुवर भट्टोजिदीक्षित को सन्देह हो गया था कि मध्यकौमुदी को पढ़ने के पश्चात् मेरी 'सिद्धान्तकौमुदी' को कौन पढ़ेगा ? क्योंकि सिद्धान्तकौमुदी का सार-सर्वस्व मध्यसिद्धान्तकौमुदी है।

इस ग्रन्थ में सिद्धान्तकौमुदी की अपेक्षा संक्षेप के अतिरिक्त प्रकरण-क्रम में भी भिन्नता है। वाक्य में सर्वप्रथम अर्थज्ञान के लिए पदच्छेद अपेक्षित होता है। अत: पूर्व में सन्धि-प्रकरण को रखा गया है। अनन्तर सुबन्त पदों के ज्ञान के लिए षड्लिङ्ग प्रकरण और अव्यय-प्रकरण का संघठन किया गया है। इसके बाद स्त्रीप्रत्यय की अपेक्षा तिङन्त पदों के ज्ञान के लिए तिङन्त-प्रकरण का विन्यास सर्वथा उचित है। क्योंकि स्त्रीप्रत्यय कृत्तद्धित-समास के बाद ही अपेक्षित है। अत: अन्त में 'स्त्री-प्रत्यय' का होना ही उचित है। इसी प्रकार कारक का भी समास से पूर्व होना युक्तिसङ्गत प्रतीत होता है, क्योंकि विभक्त्यर्थ-ज्ञान पर ही समास-प्रक्रिया आधारित है।

मध्यसिद्धान्तकौमुदी की एक अत्यन्त प्राचीन टीका 'मध्यमनोरमा' है; ऐसा कुछ विद्वानों ने स्वीकार किया है। परन्तु इसका मुद्रित संस्करण अद्यावधि अप्राप्य है।

आजकल मध्यसिद्धान्तकौमुदी के संस्कृत-हिन्दी टीकाओं सहित अनेक संस्करण उपलब्ध हैं। उनमें पं॰ रामचन्द्र झा द्वारा रचित 'इन्दुमती' हिन्दी टीका का प्रमुख स्थान रहा है।

प्रस्तुत संस्करण में 'सुबोधिनी' संस्कृत-हिन्दी व्याख्या का संक्षेप में वर्ण्यविषय इस प्रकार है—संस्कृत में जिज्ञासु छात्रों को सूत्रार्थ समझाना ही उद्देश्य रहा है। हिन्दी में प्रत्येक सूत्र का पदच्छेद, अनुवृत्ति तथा सूत्रभेद प्रदर्शित कर विद्यार्थियों को सूत्रार्थ समझने की ओर स्वत: उन्मुख होने की प्रणाली बतलायी गई है। अनन्तर ग्रन्थ की 'वृत्ति' के अनुसार सूत्रार्थ किया गया है। 'विमर्श' में अनुवृत्त सूत्रों का उल्लेख करते हुए सूत्रस्थ पदों के साथ उनका सम्बन्ध प्रदर्शित कर सूत्रार्थ स्पष्ट किया गया है। प्रक्रियानुसार क्रम से उदाहरणों की सिद्धि की गई है और प्रत्युदाहरणों के द्वारा सूत्रस्थ पदों की सार्थकता दिखलायी गई है। प्रसङ्गवश कठिन स्थलों का स्पष्टीकरण भी किया गया है। नवीन प्रकरणों के आरम्भ में पूर्वापर सङ्गति उपक्रम के रूप में की गई है। इसके अतिरिक्त अन्य ज्ञातव्य तथ्यों का भी प्रतिपादन किया गया है।

प्रस्तुत संस्करण की व्याख्या के विषय में गुण-दोषों का विवेचन सुधी पाठकजन ही करेंगे। मेरे प्रमाद एवं अज्ञानवश कुछ त्रुटियाँ हुई होंगी। अत: नीर-क्षीर-विवेकी विद्वानों से निवेदन है कि वे उन्हें सुधारकर सूचित करने का कष्ट करें। आशा एवं विश्वास है कि 'मध्यसिद्धान्तकौमुदी' के इस संस्करण से छात्रगण अवश्य ही लाभ उठायेंगे।

विदुषां वशंवद:
सुरेशचन्द्र शर्मा

प्रकरण-सूची

पृ०

१. णिजन्तप्रक्रिया १

२. सन्नन्तप्रकरणम् १५

३. यङन्तप्रकरणम् ३२

४. यङ्लुगन्तप्रकरणम् ४४

५. नामधातुप्रकरणम् ५२

६. कण्ड्वादिप्रकरणम् ६७

७. आत्मनेपदप्रकरणम् ६८

८. परस्मैपदप्रकरणम् ८९

९. भावकर्मप्रकरणम् ९७

१०. कर्मकर्तृप्रकरणम् १०७

११. लकारार्थप्रकरणम् ११३

पूर्वकृदन्तप्रकरणम् —

१२. कृत्यप्रकरणम् १२६

१३. कृत्प्रकरणम् १४८

१४. उणादिप्रकरणम् २३९

१५. उत्तरकृदन्तप्रकरणम् २७२

१६. कारकप्रकरणम् ३०१

- वार्तिक-सूची ३३८
- सूत्र-सूची ३४०

॥ श्रीः ॥

मध्यसिद्धान्तकौमुदी

'सुबोधिनी'-संस्कृत-हिन्दीव्याख्योपेता

अथ णिजन्तप्रक्रिया

(८११) स्वतन्त्रः कर्ता १।४।५४। क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्। **(८१२) तत्प्रयोजको हेतुश्च १।४।५५।** कर्तृप्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च

भ्वाद्यदादिदशगणान्निरूप्येदानीं ण्यन्तप्रकरणमारभते

(८११) **स्वतन्त्रः कर्तेति।** कारकाधिकारात्. क्रियाजनने स्वातन्त्र्यं = प्राधान्यमत्र विवक्षितम्।

(८१२) 'हेतुमति च'त्यनेन णिज्विधिं वक्ष्यन् हेतुसंज्ञामाह–**तत्प्रयोजको हेतुश्चेति।** तच्छब्देनात्र पूर्वसूत्रोपात्तः कर्ता परामृश्यते। तस्य कर्तुः, प्रयोजकः प्रेरकः। तदाह–**कर्तृप्रयोजक इत्यादि।**

भ्वादि से लेकर चुरादिपर्यन्त दश गणों में विभिन्न धातुओं के रूपों की दस लकारों में साधनिका प्रदर्शित करने के अनन्तर प्रस्तुत प्रकरण में प्रेरणार्थक णिच् प्रत्यय के द्वारा बने धातुरूपों की प्रक्रिया प्रदर्शित की जा रही है।

(८११) **पद**–स्वतन्त्रः, कर्ता। **संज्ञासूत्र।**

मूलार्थ– क्रिया में स्वतन्त्रता से विवक्षित अर्थ (कारक) की कर्तृसंज्ञा होती है।

विमर्श– क्रिया (धातुवाच्य व्यापार) का आश्रय तथा क्रिया में स्वतन्त्र रूप से जो विवक्षित हो, उसे कर्ता कहते हैं। आशय यह है कि कर्ता विवक्षाधीन है। 'यज्ञदत्तः पचति, अग्निः पचति, इन्धनं पचति' इत्यादि इसके उदाहरण हैं। इस प्रकार जिसे 'कर्ता' कहना चाहें वही कर्ता होता है।

(८१२) **पद**– तत्, प्रयोजकः, हेतुः, च। **अनुवृत्ति**– कर्ता। **संज्ञासूत्र।**

मूलार्थ– कर्ता का प्रयोजक (प्रेरणा करने वाला) की 'हेतु' संज्ञा और 'कर्ता' संज्ञा होती है।

विमर्श– प्रकृत सूत्र में 'स्वतन्त्रः कर्ता' (८११) से 'कर्ता' पद की अनुवृत्ति आती है। जब कर्ता को किसी कार्य में प्रेरित करने वाला कोई दूसरा होता है तब उस अन्य व्यक्ति को कर्ता तो कहा ही जाता है, इसके अलावा उसे 'हेतु' भी कहा जाता है। जैसे– 'देवदत्तः कटं करोति' (देवदत्त चटाई बनाता है, इस वाक्य में देवदत्त 'करना / बनाना' क्रिया का कर्ता है। 'तं यज्ञदत्तः प्रेरयति' = यज्ञदत्तो देवदत्तेन कटं कारयति। (यज्ञदत्त देवदत्त से चटाई बनवाता है।) इस वाक्य में देवदत्त कर्ता का प्रेरक यज्ञदत्त है। इसकी हेतु और कर्तृ संज्ञा भी होती है। प्रथम कर्ता को 'प्रयोज्य' कहा जाता है और प्रेरणा के कर्ता को 'प्रयोजक'।

स्यात्। **(८१३) हेतुमति च ३।१।२६ ।** प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातोर्णिच् स्यात्। भवन्तं प्रेरयति भावयति। **(८१४) ओः पुयण्ज्यपरे ७।४।८० ।** सनि परे यदङ्गं

---

(८१३) **हेतुमति चेति।** 'सत्यापपाश०' इत्यादितो णिजित्यनुवर्तते। हेतुः = प्रेरकः कर्ता आधारतया अस्यास्तीति हेतुमान् प्रयोजकनिष्ठः प्रेषणादिव्यापारः, तस्मिन् वाच्ये धातोर्णिच् स्यादित्यर्थः। भवन्तं प्रेरयति भावयति। देवदत्तो यज्वा भवति, याजकस्तं प्रेरयति इत्याद्यर्थे भूधातोः 'हेतुमति चे'ति णिचि अनुबन्धलोपे, वृद्धौ आवादेशे च 'भावि' इति णिजन्तम्। तस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लटि, तिपि, शपि, गुणेऽयादेशे च कृते 'भावयति' इति।

(८१४) **ओः पुयणिति।** 'ओः' इति षष्ठ्यन्तम्। 'पुयण्जि अपरे' इति च्छेदः। पुश्च यण् च ज् च इति समाहारद्वन्द्वात्सप्तमी। 'सन्यतः' इत्यतः सनीत्यनुवर्तते। 'अङ्गस्ये'त्यधिकृतम्। 'अत्र लोपोऽभ्यासस्ये'त्यतः 'अभ्यासस्ये'ति, 'भृञामिदि'त्यत इदित्यनुवर्तते। तदाह–**सनि परे यदङ्गमित्यादिना। अबीभवत्–** भूधातोः 'हेतुमति चे'ति णिचि अनुबन्धलोपे वृद्धौ प्राप्तायाम् 'णिच्यच आदेशो न स्याद् द्वित्वे कर्तव्ये' इति निषेधात् पूर्ववृद्ध्यभावे 'सनाद्यन्ता धातवः' इति धातुसंज्ञायाम्, लुङि, तत्स्थाने तिप्यनुबन्धलोपे, अटि, च्लौ, सिचि प्राप्ते 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेश्चङि अनुबन्धलोपे 'णेरनिटि' इत्यनेन णेर्लोपे 'अ भू अ ति' इति जाते, 'चङि' इत्यनेन धातोर्द्वित्वेऽभ्यासत्वे 'ह्रस्वः' इत्यनेन ह्रस्वे 'अभ्यासे चर्च' इत्यनेन अभ्यासस्य चर्त्वेन बकारे प्रत्ययलक्षणत्वाद् वृद्धावावादेशे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'ओः पुयण्ज्यपरे' इत्यनेन अभ्यासोकारस्य इत्वे 'अ बि भव् अ ति' इति जाते 'दीर्घो लघोः' इति दीर्घे 'इतश्चे'त्यनेन तिप इकारलोपे 'अबीभवत्' इति रूपम्।

---

(८१३) **पद–** हेतुमति, च। **अनुवृत्ति–** णिच्। **विधिसूत्र।**

मूलार्थ– प्रयोजक का व्यापार प्रेषण (प्रेरणा) आदि वाच्य रहने पर धातु से 'णिच्' प्रत्यय होता है।

विमर्श– यहाँ 'सत्यापपाश०' (३।१।२५) सूत्र से 'णिच्' पद की अनुवृत्ति आ रही है। स्वतन्त्र कर्ता के प्रयोजक (प्रेरक) को हेतु कहते हैं। उसका जो प्रेरणादि लक्षण-व्यापार हेतुमान् हुआ, उस हेतुमान् के अभिधेय होने से धातु से णिच् (= इ) प्रत्यय होता है। इस प्रकार प्रेरणा अर्थ में धातु से णिच् होता है। णिच् प्रत्यय से शुद्ध धातु के अर्थ में प्रेरणा का अंश आ जाता है। जैसे– यज्ञदत्त देवदत्त से चटाई बनवा रहा है (यज्ञदत्तः देवदत्तेन कटं कारयति)। यहाँ शुद्ध धातु का अर्थ– 'बनाना / करना' है। णिच् प्रत्यय के द्वारा प्रेरणा अर्थ के बढ़ जाने से 'बनवाना/कराना' अर्थ हो गया।

उदाहरण– (१) **भावयति–** 'भवन्तं प्रेरयति'(कश्चित्) इस विग्रह में ✓ भू + णिच् (= इ – 'हेतुमति च' 'ऊ' = 'औ' – वृद्धि–'अचो ञ्णिति', औ = 'आव्' आदेश)–भावि (धातुसंज्ञा– 'सनाद्यन्ता धातवः' लट्, ल् = तिप् = ति, शप् = 'अ', 'इ' = 'ए'–गुण, 'ए' = 'अय्' आदेश) = भावयति।

(८१४) **पद–** ओः, पुयण्जि, अपरे। **अनुवृत्ति–**सनि, इत्, अभ्यासस्य। विधिसूत्र।

मूलार्थ– अवर्णपरक कवर्ग, यण् और जकार के परवर्ती रहते सन्परक जो अंग, तदवयव अभ्यास के उकार को इत्व (इकार) होता है।

विमर्श– 'अङ्गस्य' का अधिकार है। 'सन्यतः' (७।४।७९) से सनि, 'भृञामित्' (७।४।७६) से इत् तथा 'अत्र लोपोऽभ्यासस्य' (७।४।५८) से 'अभ्यासस्य' की अनुवृत्ति आती है। तदनुसार

तदवयवाऽभ्यासोवर्णस्य इत्स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः। अबीभवत्। अपीपवत्। 'मूङ् बन्धने'। अमीमवत्। अयीयवत्। रु शब्दे। अरीरवत्। अलीलवत्। अजीजवत्। 'पुयण्जी'ति किम्? नुनावयिषति। अपरे किम्? बुभूषति। (८१५) स्रवति-शृणोति-द्रवति-प्रवति-प्लवति-च्यवतीनां वा ७।४।८१। एषामभ्यासोकारस्येत्वं वा

(८१५) **स्रवतिशृणोति** इति। पवर्गजकारयोरसम्भवात् पूर्वसूत्रादत्र 'अपरे' इत्यनुवर्तते। स्रवत्यादौ यणः सत्वेऽपि अव्यभिचारात्। **असिस्रवत्**–स्रुधातोर्णिचि अनुबन्धलोपे, धातुत्वाल्लुङि, तिपि तिप इकारलोपे अटि, च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति च्लेश्चङि 'चङि' इति द्वित्वेऽभ्यासत्वे प्रत्ययलोपमाश्रित्य वृद्धौ आवादेशे 'णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वे 'स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' इति पाक्षिकेऽभ्यासत्वे असिस्रवत्। इत्वाभावपक्षे– 'असुस्रवत्' इति।

चोरयति– स्वार्थणिजन्ताच्चुर्धातोः प्रेरणार्थके णिचि 'चुर् इ इ' इत्यत्र 'णेरनिटि' इति णेर्लोपे प्राप्ते, 'अचो ञ्णिति' इति परत्वाद् वृद्धौ प्राप्तायाम् 'ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः

''अवर्णपरक (जिनके आगे अवर्ण हो ऐसे) पवर्ग, यण् और जवर्ण के परे रहते सन्प्रत्ययपरक जो अङ्ग, उसके अवयव अभ्यास के उकार के स्थान में इकार होता है।''

उदाहरण (१) ✓ भू + णिच् (= 'इ'– 'हेतुमति च' 'णिच्यच आदेशो न द्वित्वे कर्तव्ये' इस परिभाषा के बल से पहले वृद्धि का निषेध, धातुसंज्ञा, लुङ् (= ल् = तिप् = ति, इकारलोप– 'इतश्च' अट् = 'अ', च्लि, च्लि = चङ् = 'अ', णि का लोप– 'णेरनिटि')–अ भू अ त् (द्वित्व, अभ्याससंज्ञा, ह्रस्व, 'भ्' = ब्' – 'अभ्यासे चर्च') – अ बु भू अ त् ('ऊ' = 'औ' वृद्धि, 'औ' = 'आव्' आदेश, 'आ' = 'अ'–उपधाह्रस्व–'णौ चङ्युपधाया ह्रस्वः')– अ बु भ व् इ त् (सन्वद्भाव–'सन्वल्लघुनि चङ्परेऽनग्लोपे', अभ्यास के 'उ' = 'इ'–'ओः पुयण्ज्यपरे', 'इ' = 'ई'–दीर्घ–'दीर्घो लघोः') = अबीभवत्। (२) ✓ पू + णिच् (= 'इ' + लुङ् = तिप् = ति, इकारलोप, अट्, च्लि, च्लि = चङ् = 'अ', धातु को द्वित्व–'चङि', ह्रस्व, णिच् का आश्रयण कर वृद्धि–'अचो ञ्णिति', 'औ' = 'आव्' आदेश, उपधाह्रस्व, 'उ' = 'इ'–'ओः पुयण्ज्यपरे', दीर्घ–'दीर्घो लघोः') = अपीपवत्। (३) ✓ मूङ् धातु का अर्थ–'बँधना' है। लुङ् लकार प्रेरणा अर्थ में–अमीमवत्। (४) ✓ यु + णिच्, लुङ् प्र० पु० ए० व०–अयीयवत्। (५) रु = शब्द करना धातु से णिच्, लुङ् प्र० पु० ए० व० – अरीरवत्। (६) ✓ लू + णिच्, लुङ् प्र० पु० ए० व०– अलीलवत्। (७) ✓ जु + णिच् , लुङ् प्र० पु० ए० व०– अजीजवत्।

प्रत्युदाहरण– (१) नुनावयिषति– सूत्र में 'पुयण्जि' पद ग्रहण किया गया है, प्रकृत प्रत्युदाहरण में अभ्यास का उकार पवर्ग यण् जकारपरक नहीं है। अतः 'ओः पुयण्जि' सूत्र से उकार को इकार नहीं होता। (२) बुभूषति– सूत्र में 'अपरे' पद का ग्रहण होने से अभ्यास उकार के पवर्गपरक होने पर भी पवर्ग के अकारपरक न होने से 'बुभूषति' में उकार के स्थान में इकार नहीं हुआ।

(८१५) **पद**– स्रवति-शृणोति-द्रवति-प्रवति-प्लवति-च्यवतीनां, वा। **अनुवृत्ति**–ओः, अपरे, सनि, इत्, अभ्यासस्य। **विधिसूत्र**।

मूलार्थ– सन् के परे तथा अवर्णपरक धात्वक्षर के परे रहते स्रवत्यादि धातुओं के अभ्यास सम्बन्धी उकार को इकार होता है।

विमर्श– यहाँ 'ओः पुयण्ज्यपरे' (८१४) से 'ओः' तथा 'अपरे' की अनुवृत्ति आती है। पूर्वसूत्रवत्

स्यात्सनि अवर्णपरे धात्वक्षरे परे। असिस्त्रवत्। असुस्त्रवत्। इत्यादि। अवर्णपरे किम्? शुश्रूषते। णिजन्ताण्णिच् परत्वाद् वृद्धौ प्राप्तायां 'ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेने'ति णिलोपः। चोरयति। 'णौ चङी'ति ह्रस्वः। 'दीर्घो लघोरि'ति दीर्घः। न चाग्लोपित्वाद् द्वयोरप्यसम्भवः, ण्याकृतिनिर्देशात्। अचूचुरत्। 'टु ओश्वि' गतिवृद्ध्योः। **(८१६) णौ च संश्चङोः ६।१।३१** । सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात्। 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात्सम्प्रसारणम्।

पूर्वविप्रतिषेधेने'ति वार्तिकेन वृद्धेः पूर्वं णिलोपविधानसामर्थ्यात् पूर्वणेर्लोपे धातुत्वे लटि तिपि शपि 'पुगन्त०' इति गुणे तथा 'सार्वधातुकार्धधातुकयोः' इति गुणेऽयादेशे च कृते 'चोरयति' इति।

(८१६) णौ चेति। 'विभाषा श्वेः' इति सूत्रमनुवर्तते 'ष्यङः सम्प्रसारणमि'ति च। अत आह–**'सन्परे'** इत्यादि। **अशूशवदिति।** श्विधातोर्णिचि अनुबन्धलोपे धातुत्वाल्लुङि तिपि, अटि, इकारलोपे 'अचो ञ्णिति' इति वृद्धौ प्राप्तायां 'सम्प्रसारणं तदाश्रयञ्च कार्यं बलवदि'ति

'सनि', 'इत्' और 'अभ्यासस्य' पदों की अनुवृत्ति आ रही है। अतः स्रु, श्रु, द्रु, प्रु, प्लु और च्यु धातुओं के अभ्यास के उकार के स्थान में विकल्प से इकार आदेश होता है; सन् के परे तथा अवर्णपरक धात्वक्षर के परे रहते।

उदाहरण– (१) ✓ स्रु + णिच् (= 'इ' + लुङ् = तिप् = ति, इकारलोप– 'इतश्च', अट्, च्लि, च्लि = चङ् = 'अ', स्रु को द्वित्व–'चङि', णि का लोप, प्रत्ययलोप का आश्रयण कर 'उ' = 'औ' वृद्धि, 'औ' = 'आव्', ह्रस्व–'णौ चङ्युपधाया ह्रस्वः')–अ सु स्र व् अ त् ('उ' = 'इ' विकल्प से–'स्रवतिशृणोति०') = असिस्रवत्। इत्व के अभाव पक्ष में– असुस्रवत्।

प्रत्युदाहरण–(१) शुश्रूषते– सूत्र में 'अवर्ण है परे जिससे ऐसे धात्वक्षर के परे रहते' का ग्रहण किया गया है। शुश्रूषते में वर्णपरक धात्वक्षर न होने से इत्व नहीं होता। (२) ✓ चुर् + णिच् (= 'इ' स्वार्थ में– 'सत्यापपाश०' धातुसंज्ञा, णिच् = 'इ' प्रेरणा अर्थ में–'हेतुमति च')–चुर् इ इ, ('णेरनिटि' से पूर्व णि के लोप की प्राप्ति, उसका बाध कर परत्वात् 'अचो ञ्णिति' से वृद्धि की प्राप्ति होने पर 'ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन' (इयङ्, यण्, गुण, वृद्धि, दीर्घ की अपेक्षा पूर्वविप्रतिषेध से णिलोप और अकार का लोप होता है।) नियम से पूर्व 'णि' (इ) का लोप)–चुर् इ (+ धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', 'उ' = 'आ'–गुण–'पुगन्त०' 'ओ' = 'अय्' आदेश) = चोरयति। (३) ✓ चुर् + स्वार्थिक णिच् (= 'इ' + प्रेरणार्थक णिच् = 'इ', वृद्धि का बाध कर पूर्वविप्रतिषेध से णिलोप, 'उ' = 'ओ' गुण–'पुगन्त०')–चोरि (धातुसंज्ञा, लुङ् = तिप् = ति, अट्, इकारलोप–'इतश्च' च्लि, च्लि = चङ् = 'अ'–'णिश्रिद्रु०')–अ चोर् इ अ त् ('ओ' = 'उ' ह्रस्व–'णौ चङ्युपधाया०', णि = 'इ' का लोप–'णेरनिटि' द्वित्व–'चङि' अभ्याससंज्ञा, हलादिशेष, सन्वद्भाव–'सन्वल्लघुनि०' 'उ' = 'ऊ' दीर्घ–'दीर्घो लघोः') = अचूचुरत्। यहाँ शंका यह है कि द्वितीय णि (इ) के परे प्रथम णि के लोप को लेकर अग्लोपी होने से 'नाग्लोपिशास्वृदिताम्' से ह्रस्व का निषेध होने पर 'णौ चङ्युपधाया ह्रस्वः' से ह्रस्व और 'सन्वल्लघुनि चङ्परेऽनग्लोपे' से सन्वद्भाव–दोनों की यहाँ प्रवृत्ति असम्भव है। अतः ग्रन्थकार कहते हैं– 'ण्याकृतिनिर्देशात्'। 'चङ्परे णौ' में चङ् परक णित्व जाति का ग्रहण किया जाता है अर्थात् णि के सदृश है आकृति जिसकी; उसके परे रहते ह्रस्व और सन्वद्भाव का विधान किया जाता है। तदनुसार प्रकृत में ह्रस्व और दीर्घ की प्रवृत्ति होती है।

(८१६) **पद–**णौ, च, संश्चङोः। **अनुवृत्ति–** विभाषा, श्वेः, सम्प्रसारणम्। **विधिसूत्र।**

पूर्वरूपम्। अशूशवत्। अलघुत्वान्न दीर्घः। अशिश्वयत्। **(८१७) स्तम्भुसिवुसहां चङि ८।३।११६ ।** उपसर्गनिमित्त एषां सस्य षो न स्याच्चङि। अवातस्तम्भत्। पर्यसीषिवत्।

वार्तिकबलात् 'णौ च संश्चङोः' इत्यनेन पूर्वं पाक्षिके सम्प्रसारणे 'सम्प्रसारणाच्चे'ति पूर्वरूपे 'णेरनिटि' इति णिलोपे च्लौ, च्लेः स्थाने चङि 'चङि' इति द्वित्वे 'अ शु शु अ त्' इति जाते, प्रत्ययलोपमाश्रित्य वृद्धौ आवादेशे 'णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वे 'सन्वल्लघुनि' इति सन्वद्भावे 'दीर्घो लघोः' इत्यभ्यासस्य दीर्घे संयोगे कृते 'अशूशवत्' इति। सम्प्रसारणाभावपक्षे अलघुत्वान्न दीर्घः-'अशिश्वयत्' इति।

(८१७) **स्तम्भुसिवुसहामिति।** 'उपसर्गनिमित्तस्य प्रतिषेधः' इति वार्तिकम्। 'सहेः साडः सः' इत्यस्मात् स इति षष्ठ्यन्तमनुवर्तते 'न रपर०' इत्यतः नेति च। 'मूर्धन्यः' इत्यधिकृतम्। तदाह-**उपसर्गनिमित्त इत्यादि।**

मूलार्थ– सन्परक और चङ्परक णि के परवर्ती रहने पर 'श्वि' धातु को विकल्प से सम्प्रसारण होता है। (सम्प्रसारण और सम्प्रसारणाश्रित कार्य बलवान् होता है।) अशूशवत् इत्यादि।

विमर्श– प्रकृत सूत्र में 'विभाषा श्वेः' (६।१।३०) सूत्र तथा 'ष्यङः सम्प्रसारणम्' (६।१।१३) से 'सम्प्रसारणम्' पद की अनुवृत्ति आती है। अतः सन् परे हो अथवा चङ् परे हो जिससे, ऐसे णिच् (णि) के परवर्ती रहते भी टुओश्वि धातु को विकल्प से सम्प्रसारण होता है।

(वा०) ''सम्प्रसारणम्०''– सम्प्रसारण और सम्प्रसारण के आश्रित कार्य बलवान् होता है।

उदाहरण– ✓ श्वि + णिच् (= इ, धातुसंज्ञा, लुङ् = ल् = तिप् = ति, इकारलोप, अट्, 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इस वार्तिक के बल से वृद्धि का बाध कर 'व्' = 'उ' सम्प्रसारण– 'णौ च संश्चङोः', पूर्वरूप–'सम्प्रसारणाच्च' 'च्लि' = 'चङ्', णि = 'इ' का लोप–'णेरनिटि', द्वित्व– 'चङि')–अ शु शु अ त् (प्रत्ययलोप का आश्रयण कर 'उ' = 'औ'–'वृद्धि' 'औ' = 'आव्', ह्रस्व, सन्वद्भाव, 'उ' = 'ऊ'–दीर्घ - 'दीर्घो लघोः') = अशूशवत्। सम्प्रसारण के अभावपक्ष में– अ श्वि श्वि अ त्, (हलादिशेष, 'इ' = 'ऐ' वृद्धि, आय् आदेश, ह्रस्व–'णौ चङि०') = अशिश्वयत्।

(८१७) **पद–** स्तम्भुसिवुसहाम्, चङि। **अनुवृत्ति–** सः, न। **विधिसूत्र** (निषेध)।

मूलार्थ– उपसर्गस्थ निमित्त से परवर्ती स्तम्भु आदि धातु के सकार के स्थान में षकार नहीं होता, चङ् के परे रहते। अवातस्तम्भत्। पर्यसीषिवत् इत्यादि।

विमर्श– 'इण्कोः' और 'अपदान्तस्य मूर्धन्यः' का अधिकार है। 'सहेः साडः सः' (८।३।५६) से 'सः' तथा 'न रपर०' (८।३।११०) से 'न' पद की अनुवृत्ति आती है। तदनुसार– ''चङ् के परे रहते उपसर्गस्थ निमित्त से परवर्ती स्तम्भु, षिवु तथा सह् धातु के सकार को मूर्धन्य (ष्) आदेश नहीं होता।''

उदाहरण– (१) अव + ✓ स्तम्भ् + णिच् (= 'इ' धातुसंज्ञा, लुङ् = ल् = तिप् = 'ति', 'इ' का लोप– 'इतश्च' च्लि, च्लि = चङ् = 'अ', णि = 'इ' का लोप–'णेरनिटि', धातु को द्वित्व–'चङि', अट् = 'अ' आगम, अभ्याससंज्ञा, हलादिशेष, अ + अ = 'आ'–दीर्घ) = अवातस्तम्भत्। यहाँ 'अवाच्चालम्बनाविदूर्ययोः' से प्राप्त षत्व का 'स्तम्भुसिवुसहां चङि' से निषेध। (२) परि + सिव् + णिच् (= 'इ', लुङ् = ल् = तिप् = ति, इकारलोप, च्लि, च्लि = चङ् = 'अ' द्वित्व, अभ्याससंज्ञा, हलादिशेष, अट्)–परि अ सि सिव् अ त् (सन्वद्भाव, दीर्घ–'दीर्घो लघोः', द्वितीय सकार को षत्व–

न्यसीषहत्। (८१८) **स्वापेश्चङि** ६।१।१८ । ण्यन्तस्य स्वापेश्चङि सम्प्रसारणं स्यात्। असूषुपत्। (८१९) **हनस्तोऽचिण्णलोः** ७।३।३२ । हन्तेस्तकारोऽन्तादेशः स्याच्चिण्णल्वर्जे ञिति णिति च परे। घातयति। (८२०) **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्याताम्**

(८१८) **स्वापेश्चङीति।** 'ष्यङः सम्प्रसारणमि'त्यतः सम्प्रसारणमित्यनुवर्तते। 'ण्यन्तस्य स्वापेः सम्प्रसारणं स्याच्चङि' इति सूत्रार्थः। **असूषुपदिति।** ण्यन्तात्स्वप्धातोर्लुङि तिपि 'इतश्चे'तीकारलोपे, च्लौ, च्लेश्चङि अनुबन्धलोपे 'स्वापेश्चङि' इति सम्प्रसारणे 'सम्प्रसारणाच्चे'ति पूर्वरूपे 'णेरनिटि' इति णेर्लोपे 'चङि' इति द्वित्वे हलादिशेषे, अङ्गस्याडागमेऽनुबन्धलोपे 'अ सु सु प् अ त्' इति जाते 'आदेशप्रत्यययोः' इति षत्वे, सन्वद्भावे 'दीर्घो लघोः' इति दीर्घे 'असूषुपदि'ति रूपम्।

(८१९) **हनस्तोऽचिणिति।** स्पष्टम्। **घातयति–** हन्धातोर्णिचि धातुसंज्ञायां लटि तिपि शपि 'हनस्तोऽचिण्णलोः' इति हनस्तकारान्तादेशे 'हो हन्तेरि'ति कुत्वेन हस्य घत्वे 'अत उपधायाः' इत्यनेन दीर्घे 'सार्वधातुकार्धधातुकयोः' इति गुणेऽयादेशे च कृते 'घातयति' इति।

(८२०) **अर्तिह्रीव्लीरी इत्यादि।** अर्त्यादीनां षण्णामादन्तानां च पुक् स्याण्णौ।

'आदेशप्रत्यययोः', 'इ'='य्'–यण्) = पर्यसीषिवत्। यहाँ 'परिनिविभ्यः०' से प्राप्त षत्व का 'स्तम्भुसिवुसहां चङि' से निषेध होता है। (३) नि + षह् + णिच् (= 'इ', लुङ् = तिप् = ति, इकारलोप, च्लि, च्लि = चङ् = 'अ', अट्, द्वित्व, अभ्याससंज्ञा, हलादिशेष)–नि अस सह् अत् (सन्वद्भाव, ईत्व–'सन्यतः', दीर्घ–'दीर्घो लघोः' द्वितीय 'स्' = 'ष्'–'आदेश०') = न्यसीषहत्। यहाँ प्रथम सकार का 'परिनिविभ्यः' से प्राप्त षत्व का प्रकृत सूत्र से निषेध होता है।

(८१८) **पद–** स्वापेः, चङि। **अनुवृत्ति–** सम्प्रसारणम्। **विधिसूत्र।**

मूलार्थ– चङ् परे रहते ण्यन्त स्वप् धातु को सम्प्रसारण होता है। असूषुपत्।

विमर्श– 'ष्यङः सम्प्रसारणम्' (६।१।१३) से 'सम्प्रसारणम्' पद की अनुवृत्ति आ रही है। अतः "चङ् के परवर्ती रहते ण्यन्त स्वप् (स्वापि) धातु को सम्प्रसारण होता है।"

उदाहरण– (१) ✓ स्वप् + णिच् (= 'इ' धातुसंज्ञा, लुङ् = तिप् = 'ति', इकारलोप– 'इतश्च', च्लि, च्लि = चङ् = 'अ', 'व्' = 'उ'– सम्प्रसारण–'स्वापेश्चङि', 'अ' = 'उ' पूर्वरूप– 'सम्प्रसारणाच्च' णि = 'इ' का लोप– 'णेरनिटि' धातु को द्वित्व– 'चङि', हलादिशेष, अट् का आगम)– अ सु सु प् अ त् (षत्व–'आदेश०', सन्वद्भाव 'उ' = 'ऊ'–दीर्घ–'दीर्घो लघोः') = असूषुपत्।

(८१९) **पद–** हनः, तः, अचिण्णलोः। **अनुवृत्ति–**ञ्णिति। **विधिसूत्र।**

मूलार्थ– चिण् तथा णल् वर्जित ञित्, णित् प्रत्यय के परवर्ती रहते हन् धातु को तकार अन्तादेश होता है। घातयति।

विमर्श– प्रकृत सूत्र में 'अचो ञ्णिति' (७।२।११५) से 'ञ्णिति' पद की अनुवृत्ति आ रही है। तदनुसार– "हन् धातु को तकार अन्तादेश होता है, चिण् और णल् से भिन्न ञित्, णित् प्रत्यय के परे रहते।"

उदाहरण– (१) ✓ हन् + णिच् (= 'इ', धातुसंज्ञा, लट् = ल् = तिप् = ति, शप् = 'अ')– हन् इ अ ति ('न्' = 'त्'–'हनस्तोऽचिण्णलोः', 'ह्' = 'घ्'–'हो हन्तेः०' 'अ' = 'आ'–वृद्धि–'अत उपधायाः')–घाति अ ति ('इ' = 'ए' गुण– 'सार्वधातु०', 'ए' = 'अय्') = घातयति।

(८२०) **पद–** अर्तिह्रीव्लीरीक्नूयीक्ष्माय्याताम्, पुक्, णौ। **विधिसूत्र।**

पुग्णौ ७।३।३६। एषां पुक् स्याण्णौ। स्थापयति। (८२१) तिष्ठतेरित् ७।४।५। तिष्ठतेरुपधाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। घ्रापयति। (८२२) जिघ्रतेर्वा

(८२१) **तिष्ठतेरित्।** 'णौ चङ्युपधायाः' इत्यनुवर्तते। अत आह–**तिष्ठतेरुपधाया इति। अतिष्ठिपत्**– स्थाधातोर्णिचि 'अर्ती'त्यादिना पुकि अनुबन्धलोपे, लुङि तिपि, तिप इकारलोपे, अटि, च्लौ, 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति चङि अनुबन्धलोपे 'चङि' इति द्वित्वेऽभ्यासत्वे 'शर्पूर्वाः खयः' इति सलोपेऽभ्यासह्रस्वे चर्त्वे, 'णौ चङ्युपधाया ह्रस्वः' इति उपधाह्रस्वे 'णेरनिटि' इति णिलोपे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे, इत्वे, 'तिष्ठतेरित्' इत्यनेन तिष्ठतेरुपधाया इत्वे षत्वे ष्टुत्वे च 'अतिष्ठिपत्' इति रूपम्।

(८२२) **जिघ्रतेर्वा।** घ्राधातोरुपधाया इद्वा स्याच्चङ्परे णावित्यर्थः।

मूलार्थ– 'णि' के परवर्ती रहने पर ऋ, ह्री, व्ली, री, क्नूयी, क्ष्मायी और आदन्त धातुओं को 'पुक्' का आगम होता है। स्थापयति।

विमर्श– सूत्रार्थ स्पष्ट है।

उदाहरण– (१) ✓ ष्ठा (स्था) + णिच् (= 'इ' प्रेरणा अर्थ में–'हेतुमति च' पुक् = 'प्'–'अर्तिह्रीव्लीरी०')–स्थापि (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', 'इ' = 'ए'–गुण–'सार्वधातु०' 'ए' = 'अय्' आदेश) = स्थापयति।

(८२१) **पद**– तिष्ठतेः, इत्। **अनुवृत्ति**– णौ चङ्युपधायाः। **विधिसूत्र।**

मूलार्थ– चङ्परक णि के परवर्ती रहते स्था धातु की उपधा को इत्व होता है। अतिष्ठिपत्।

विमर्श– यहाँ 'णौ चङ्युपधाया ह्रस्वः' (७।४।१) से 'णौ चङ्युपधायाः' की अनुवृत्ति आती है। तदनुसार "ष्ठा (स्था) धातु की उपधा को चङ् परक णि के परे रहते (इत्) इकारादेश होता है।"

उदाहरण– (१) ✓ ष्ठा ('ष्' ='स्'–'धात्वादेः षः सः', 'ठ्' = 'थ्'–ष्टुत्वाभाव–'निमित्तापाये नैमित्तिकस्याप्यपायः')–स्था + णिच् (= 'इ', पुक् = 'प्'–'अर्तिह्रीव्लीरी०')–स्थापि (धातुसंज्ञा, लुङ् = ल् = तिप् = ति, अट् = 'अ', इकारलोप, च्लि, प्राप्त सिच् का बाध कर च्लि = चङ् = 'अ'–'णिश्रिद्रु०')–अ स्थापि अ त् (धातु को द्वित्व–'चङि', अभ्याससंज्ञा, 'स्' का लोप–'शर्पूर्वाः खयः' ह्रस्व, 'थ्' = 'त्'–'अभ्यासे चर्च', सन्वद्भाव, 'अ' = 'इ'–'सन्यतः')–अ ति स्था पि अत् (उपधा ह्रस्व–'णौ चङ्युपधाया ह्रस्वः' 'अ' = 'इ'–'तिष्ठतेरित्', णि' का लोप–'णेरनिटि', 'स्' = 'ष्' षत्व, 'थ्' = 'ठ्'–ष्टुत्व) = अतिष्ठिपत्। (२) ✓ घ्रा + णिच् (= 'इ', पुक् = 'प्' आगम–'अर्तिह्री०')–घ्रापि (धातुसंज्ञा + लट् = ल् = तिप् = ति, शप् = 'अ' 'इ' = 'ए'–गुण, अय् आदेश) = घ्रापयति।

(८२२) **पद**– जिघ्रतेः, वा। **अनुवृत्ति**– इत्, णौ चङ्युपधायाः। **विधिसूत्र।**

मूलार्थ– चङ्परक णि के परवर्ती रहते घ्रा धातु की उपधा को विकल्प से इत्व होता है। अजिघ्रिपत्। अजिघ्रपत्।

विमर्श– सूत्रार्थ की पूर्ति के लिए 'णौ चङ्युपधाया ह्रस्वः' (७।४।१) से 'णौ चङ्युपधायाः' की तथा 'तिष्ठतेरित्' (८२१) से 'इत्' पद की अनुवृत्ति आती है। अतः "'घ्रा गन्धोपादाने' धातु की उपधा को चङ्परक णि के परे रहते विकल्प से इकारादेश होता है।"

उदाहरण– (१) ✓ घ्रा + णिच् (= 'इ', पुक् = 'प्'–'अर्तिह्रीव्लीरी०')–घ्रापि (धातुसंज्ञा, लुङ् = ल् = तिप् = 'ति', अट् = 'अ', इकारलोप–'इतश्च', च्लि, च्लि = चङ् = 'अ', धातु को द्वित्व–'चङि', अभ्याससंज्ञा, हलादिशेष, उपधाह्रस्व–'णौ चङि' अभ्यास के 'आ' = 'अ' ह्रस्व–'ह्रस्वः',

७।४।६ । जिघ्रतेरुपधाया इत्वं वा स्याच्चङ्परे णौ। अजिघ्रिपत्। अजिघ्रपत्। **(८२३) शाच्छासाह्वाव्यावेपां युक् ७।३।३७ ।** एषां युक् स्याण्णौ। शाययति। अशीशयत्। ह्वाययति। **(८२४) ह्वः सम्प्रसारणम् ६।१।३२ ।** सन्परे चङ्परे णौ ह्वः सम्प्रसारणं स्यात्। * काण्यादीनां वेति वक्तव्यम् * । काण्यादीनां चङ्परे णौ उपधाया ह्रस्वो वा स्यात्। ण्यन्ताः कणरणभणश्रणलुपहेठाः षड् भाष्ये उक्ताः। ह्वायिवाणिलोठिलोपयश्चत्वारोऽधिका न्यासे। चाणिलोढी अप्यन्यत्र। इत्थं काण्यादयो

---

(८२३) **शाच्छासेति।** पुकोऽपवादः। **शाययतीति।** 'शो तनूकरणे' इत्यस्माद्धातोः णिच्यनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यनेन आत्वे 'शाच्छासाह्वाव्यावेपां युक्' इत्यनेन युगागमेऽनुबन्धलोपे 'शायि' इत्यस्य धातुसंज्ञायां लटि, तिपि, शप्यनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणेऽयादेशे संयोगे च कृते 'शाययति' इति।

(८२४) **ह्वः सम्प्रसारणमिति।** ह्व इति षष्ठी। 'णौ च संश्चङोरि'त्यनुवर्तते।

'घ्' = 'ग्'–'अभ्यासे चर्च', 'ग्' = 'ज्'–'कुहोश्चुः', सन्वद्भाव, 'अ' = 'इ' इत्व–'सन्यतः')– अ जि घ्र पि अ त् ('अ' = 'इ' विकल्प से–'जिघ्रतेर्वा', णि = 'इ' का लोप) = अजिघ्रिपत्। इत्व के अभाव पक्ष में–अजिघ्रपत्।

(८२३) **पद–** शाच्छासाह्वाव्यावेपाम्, युक्। **अनुवृत्ति–**णौ। **विधिसूत्र।**

मूलार्थ– णि के परवर्ती रहते शो, छो, षो, ह्वेञ्, व्येञ्, वेञ् और पा धातु को युक् = ('य्') का आगम होता है। शाययति। अशीशयत् इत्यादि।

विमर्श– यहाँ पूर्वसूत्र (८२०) से 'णौ' पद की अनुवृत्ति आ रही है। तदनुसार–''णि के परे रहते शो, छो आदि धातु को युक् (= य्) का आगम होता है।''

उदाहरण– (१) ✓ शो + णिच् (= 'इ', 'ओ' = 'आ'–आत्व–'आदेच उपदेशेऽशिति', युक् = 'य्'–'शाच्छासाह्वाव्यावेपां युक्')–शायि (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', 'इ' = 'ए' गुण, 'ए' = 'अय्' आदेश) = शाययति। (२) ✓ शो + णिच् (= इ, आत्व, युक् = 'य्'–'शाच्छासा०')–शायि (धातुसंज्ञा, लुङ् = तिप् = ति, अट् = 'अ' च्लि, च्लि = चङ् = 'अ', द्वित्व–'चङि', अभ्याससंज्ञा, हलादिशेष, 'आ' = 'अ'–ह्रस्व, उपधा के आ = 'अ'–ह्रस्व–'णौ चङ्युपधायाः')– अ श शय् इ अ ति (सन्वद्भाव, 'अ' = 'इ' –'सन्यतः', णि का लोप–'णेरनिटि', 'इ' का लोप–'इतश्च', अभ्यास की 'इ' = 'ई'–दीर्घ–'दीर्घो लघोः') = अशीशयत्। (३) ✓ ह्वेञ् = ह्वे + णिच् (= 'इ', आत्व, युक् = 'य्'–'शाच्छासा०')–ह्वायि (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', 'इ' = 'ए'–गुण, अय् आदेश) = ह्वाययति।

(८२४) **पद–** ह्वः, सम्प्रसारणम्। **अनुवृत्ति–** णौ च संश्चङोः। **विधिसूत्र।**

मूलार्थ– सन्परक और चङ्परक णि के परे रहते ह्वेञ् धातु को सम्प्रसारण होता है।

विमर्श– प्रकृत सूत्र में 'णौ च संश्चङोः' (६/१/३१) सूत्र की अनुवृत्ति आती है। अतः सन्परक तथा चङ्परक णि के परे रहते ह्वेञ् धातु को सम्प्रसारण होता है।

(वा०) काणि आदि बारह धातुओं की उपधा को चङ्परक णि के परे रहते विकल्प से ह्रस्व होता है।

काणि आदि धातुओं का परिगणन इस प्रकार है– ण्यन्त, कण्, रण्, भण्, श्रण्, लुप् और हेठ्–

द्वादश। अजूहवत्। अजुहावत्। पाययति। (८२५) **लोपः पिबतेरीच्चाभ्यासस्य ७।४।४ ।** पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादेशश्च चङ्परे णौ। अपीप्यत्। * पातेर्णौ लुग्वक्तव्यः *। पुकोऽपवादः। पालयति। (८२६) **वो विधूनने जुक्**

---

(८२५) **लोपः पिबतेरिति।** 'णौ चङ्युपधाया ह्रस्वः' इत्यतः णौ चङीति अनुषज्यते। तदाह– **पिबतेरुपधाया इत्यादि। अपीप्यदिति।** पाधातोर्णिचि अनुबन्धलोपे 'शाच्छासाह्वाव्यावेपां युक्' इति युगागमेऽनुबन्धलोपे 'पायि' इत्यस्य धातुसंज्ञायां लुङि तिपि अनुबन्धलोपे 'इतश्चे'ति इकारलोपे च्लौ, 'णिश्रिद्रुस्रुभ्यः०' इति च्लेश्चङि अनुबन्धलोपे अङ्गस्याडागमे 'अ पायि अ त्' इति जाते, 'णेरनिटि' इति णेर्लोपे 'चङि' इत्यनेन द्वित्वेऽभ्यासत्वे हलादिशेषे 'लोपः पिबतेरीच्चाभ्यासस्ये'त्यनेनाभ्यासस्य इदादेशे धातोश्चोपधालोपे 'अपीप्य् अ त्' इति जाते, संयोगे कृते अपीप्यदिति।

(८२६) **वो विधूनन इति।** 'अर्तिह्री०' इत्यतो णावित्यनुवर्तते। **वाजयति**– 'वा

ये छः धातुएँ भाष्य में पढ़ी गई हैं। उक्त छः के अतिरिक्त ह्वायि, वाणि, लोटि और लोपि (ण्यन्त) चार धातुओं का पाठ न्यास में मिलता है। चाणि और लोठि दो धातुएँ अन्यत्र पठित हैं। इस प्रकार काण्यादि १२ धातुएँ हैं।

उदाहरण– (१) ✓ ह्वे + णिच् (= इ, आत्व, युक् = 'य्'–'शाच्छासा०')–ह्वायि (धातुसंज्ञा, लुङ् = तिप् = ति, इकारलोप, अट्, च्लि, च्लि = चङ् = 'अ')–अ ह्वा इ अ त् ('व्' = 'उ' सम्प्रसारण–'ह्वः सम्प्रसारणम्', पूर्वरूप–'सम्प्रसारणाच्च', 'हु' का द्वित्व–'चङि', अभ्याससंज्ञा, हलादिशेष, 'उ' = 'औ'–वृद्धि, 'औ' = 'आव्' आदेश, उपधा को विकल्प से ह्रस्व–'काण्यादीनां वेति वक्तव्यम्' 'उ' = 'ऊ'–दीर्घ) = अजूहवत्। ह्रस्व के अभावपक्ष में–अजुहावत्। (२) ✓ पा + णिच् (= इ, युक् = 'य्'–'शाच्छासा०')–पायि (धातुसंज्ञा, लट् = तिप् = ति, शप् = अ, 'इ' = 'ए'–गुण 'ए' = 'अय्' आदेश) = पाययति।

(८२५) **पद**– लोपः, पिबतेः, ईत्, च, अभ्यासस्य। **अनुवृत्ति**–णौ चङि **विधिसूत्र।**

मूलार्थ– चङ्परक णि के परवर्ती रहते पा धातु की उपधा का लोप होता है और अभ्यास को ईकारान्त आदेश होता है। अपीप्यत्।

विमर्श– यहाँ 'णौ चङ्युपधाया ह्रस्वः' (७।४।१) से 'णौ चङ्युपधायाः' की अनुवृत्ति आ रही है। तदनुसार– ''चङ्परक णि (इ) के परे रहते पा धातु की उपधा का लोप होता है और अभ्यास को 'ईत्' अन्तादेश होता है।''

उदाहरण– (१) ✓ पा + णिच् (= 'इ', युक् = 'य्'–'शाच्छासाह्वाव्यावेपां युक्')–पायि (धातुसंज्ञा, लुङ् = तिप् = ति, च्लि, च्लि = चङ् = 'अ'–'णिश्रिद्रु०', अट् = 'अ', णि = 'इ' का लोप–'णेरनिटि', धातु को द्वित्व–'चङि', अभ्याससंज्ञा, हलादिशेष)–अ पा पाय् अ ति (अभ्यास के आ = ईत् = 'ई', उपधा 'आ' का लोप–'लोपः पिबतेरीच्चाभ्यासस्य')–अ पी प् य् अ ति ('इ' का लोप–'इतश्च') = अपीप्यत्।

(वा०) 'पा धातु को लुक् का आगम होता है, णि के परे रहते'।

उदाहरण– (१) ✓ पा + णिच् (= 'इ', पुक् का बाध कर लुक् = 'ल्'–'पातेर्णौ लुग्वक्तव्यः')–पालि (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', 'इ' = 'ए'–गुण, अय् आदेश) = पालयति।

(८२६) **पद**– वः, विधूनने, जुक्। **अनुवृत्ति**– णौ। **विधिसूत्र।**

७।३।३८। वातेर्जुक् स्याण्णौ कम्पेऽर्थे। वाजयति। विधूनने किम्? केशान्वापयति। **(८२७) सदेरगतौ तः ७।३।४२।** शदेर्णौ तोऽन्तादेशः स्यान्न तु गतौ। शातयति। गतौ तु– गाः शादयति गोविन्दः। गमयतीत्यर्थः। **(८२८) रुहः पोऽन्यतरस्याम् ७।३।४३।** रुहः पकारोऽन्तादेशो वा स्याण्णौ। रोपयति। रोहयति। **(८२९) दोषो णौ**

गतिगन्धनयोरि'त्यस्माद्धातोर्णौ 'वो विधूनने जुक्' इति जुगागमेऽनुबन्धलोपे 'वाजि' इत्यस्य धातुत्वे लटि तिपि शपि गुणेऽयादेशे 'वाजयति' इति रूपम्। केशान्वापयतीति। अत्र न जुक् विधूननाभावात्। यतो हि नात्र विधूननं = कम्पनम् अर्थः, किन्तु सुगन्धीकरणं छेदनं वार्थः।

(८२७) **सदेरगताविति।** अत्र णावित्यनुवर्तते। तदाह–**शदेर्णाविति। शातयति–** 'शद्लृ विशरणगत्यवसादनेषु' इत्यस्माद्धातोः णिचि 'शदेरगतौ तः' इत्यनेन दस्य स्थाने तकारादेशे उपधादीर्घे 'शाति' इत्यस्य धातुसंज्ञायां लटि, तिपि, शपि अनुबन्धलोपे गुणेऽयादेशे 'शातयति' इति रूपम्।

(८२८) **रुह इति।** णावित्यनुवर्तते। **रोपयति–** रुह्धातोर्णिचि अनुबन्धलोपे 'रुहः

मूलार्थ– णि के परवर्ती रहते 'वा' धातु को विधूनन (कम्पन) अर्थ में जुक् (ज्) का आगम होता है। वाजयति इत्यादि।

विमर्श– 'अर्तिह्रीव्लीरी० (८२०) सूत्र से 'णौ' पद की अनुवृत्ति आती है। तदनुसार–''विधूनन (कम्पन) अर्थ में विद्यमान 'वा' धातु को णि के परे रहते जुक् (ज्) का आगम होता है।''

उदाहरण– ✓ वा + णिच् (= 'इ', जुक् = 'ज्'–'वो विधूनने जुक्')–वाजि (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ' 'इ' = 'ए'–गुण, अय् आदेश) = वाजयति।

प्रत्युदाहरण– सूत्र में विधूनन (कम्पन) पद का ग्रहण क्यों किया गया? उक्त पद का ग्रहण होने से कम्पन के अतिरिक्त अन्य अर्थ में जुक् का आगम नहीं होता। 'केशान्वापयति' (केशों को कटवाता है या सुगन्धित कराता है।) यहाँ कम्पन अर्थ न होने से जुक् नहीं हुआ।

(८२७) **पद–** सदेः, अगतौ, तः। **अनुवृत्ति–** णौ। **विधिसूत्र।**

मूलार्थ– णि के परवर्ती रहते गति से भिन्न अर्थ में शद्लृ (शद्) धातु को तकार अन्तादेश होता है। शातयति। गति अर्थ में– 'गाः शादयति गोविन्दः'।

विमर्श– प्रकृत सूत्र में 'अर्तिह्रीव्लीरी०' (८२०) सूत्र से 'णौ' पद की अनुवृत्ति आती है। तदनुसार–'णि' के परवर्ती रहने पर अगति (गति अर्थ से भिन्न) अर्थ में वर्तमान शद् धातु को तकार अन्तादेश होता है।

उदाहरण– ✓ शद् + णिच् (= 'इ', 'द्' = 'त्'–'शदेरगतौ तः', 'अ' = 'आ'–उपधादीर्घ– 'अत उपधायाः')–शाति, (धातुसंज्ञा, लट्, तिप् = ति, शप् = 'अ', 'इ' = 'ए'–गुण, 'ए' = 'अय्' आदेश) = शातयति। गति अर्थ में–शादयति।

(८२८) **पद–** रुहः, पः, अन्यतरस्याम्। **अनुवृत्ति–**णौ। **विधिसूत्र।**

मूलार्थ– 'णि' के परवर्ती रहने पर रुह् धातु को विकल्प से पकारान्त आदेश होता है। रोपयति, रोहयति।

विमर्श– पूर्ववत् 'णौ' पद की अनुवृत्ति आ रही है। अतः ''णि के परे रहते रुह् धातु के हकार के स्थान में विकल्प से पकार आदेश होता है।''

६।४।९०। दुष्यतेरुपधाया ऊत्स्याण्णौ। दूषयति। **(८३०) वा चित्तविरागे** ६।४।९१। दुष्यतेरुपधाया ऊत्स्याद्वा णौ चित्तविरागे। विरागोऽप्रीतता। दुष वैकृत्ये। चित्तं दूषयति, दोषयति वा कामः। **(८३१) उभौ साभ्यासस्य** ८।४।२१। साभ्यासस्यानितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति। प्राणिणत्। **(८३२) णौ**

पोऽन्यतरस्याम्' इत्यनेन हस्य पत्वे गुणे 'रोपि' इत्यस्य धातुत्वे लटि तिपि शपि गुणेऽयादेशे 'रोपयति' इति।

(८२९) **दोषो णाविति।** दुष्धातोरुपधाया ऊदादेशः स्याण्णौ परत इति सूत्रार्थः।

(८३०) **वा चित्तविराग इति।** 'दोषो णावि'ति सूत्रमनुवर्तते। तदाह-**दुष्यतेरुपधाया इत्यादि।**

(८३१) **उभौ साभ्यासस्येति।** 'रषाभ्यां नो णः' इत्यधिकृतम्। अनितेरित्यनुवर्तते, 'उसर्गादसमासेऽपी'त्यतः उपसर्गादित्यनुवर्तते। तदाह-**साभ्यासस्येति।**

उदाहरण– ✓ रुह् + णिच् (= इ, 'ह्' = 'प्'-विकल्प से-'रुहः पोऽन्यतरस्याम्' 'उ' = 'ओ'-गुण-'पुगन्त०' + लट् = तिप् = 'ति', शप् = 'अ', 'इ' = 'ए'-गुण, 'ए' = 'अय्' आदेश) = रोपयति। पकारान्त आदेश के अभाव पक्ष में-रोहयति।

(८२९) **पद**– दोषः, णौ। **अनुवृत्ति**– ऊत्, उपधायाः। **विधिसूत्र।**

मूलार्थ– णि के परे रहते 'दुष्' धातु की उपधा को 'ऊत्' आदेश होता है। दूषयति।

विमर्श– यहाँ 'ऊदुपधाया गोहः' (६।४।८९) से 'ऊत्' और 'उपधायाः' पदों की अनुवृत्ति आती है। तदनुसार– "णि के परवर्ती रहने पर दुष् धातु की उपधा को ऊत् (ऊ) आदेश होता है।"

उदाहरण– ✓ दुष् + णिच् = 'इ', 'उ' = 'ऊ'-'दोषो णौ' + लट् = तिप् = 'ति', शप् = 'अ', 'इ' = 'ए'-गुण, 'ए' = 'अय्'-आदेश) = दूषयति।

(८३०) **पद**– वा, चित्तविरागे। **अनुवृत्ति**– दोषो णौ, ऊत्, उपधायाः। **विधिसूत्र।**

मूलार्थ– णि के परे रहते चित्तविराग अर्थ में दुष् धातु की उपधा को विकल्प से ऊत्व होता है। विराग का अर्थ अप्रीति (विकार) है। 'चित्तं दूषयति दोषयति वा कामः' (काम चित्त को दूषित कराता है = विकार उत्पन्न कराता है)।

विमर्श– सूत्रार्थ की पूर्ति हेतु 'ऊदुपधाया गोहः' (६।४।८९) से 'ऊदुपधायाः' तथा 'दोषो णौ' (८२९) की अनुवृत्ति आती है। अतः "चित्त के विराग (अप्रीति, विकार) अर्थ में दुष् की उपधा को णि के परे रहते विकल्प से ऊकार आदेश होता है।"

उदाहरण– ✓ दुष् + णिच् (= 'इ', 'उ' = 'ऊ' विकल्प से चित्तविराग अर्थ में-'वा चित्तविरागे' + लट् = तिप् = ति, शप् = 'अ', 'इ' = 'ए'-गुण, अय् आदेश) = दूषयति। 'ऊत्' के अभाव पक्ष में-दोषयति।

(८३१) **पद**– उभौ साभ्यासस्य। **अनुवृत्ति**– अनितेः, उपसर्गात् रषाभ्यां नो णः। **विधिसूत्र।**

मूलार्थ– उपसर्ग में स्थित निमित्त से परे अन् धातु के अभ्यास सहित दोनों नकारों को णत्व होता है। प्राणिणत्।

विमर्श– 'रषाभ्यां नो णः समानपदे' (८।४।१) से 'रषाभ्यां नो णः', 'उपसर्गादसमासेऽपि' (८।४।१४) से 'उपसर्गात्' तथा 'अनितेरन्तः' (८।४।१९) से 'अनितेः' की अनुवृत्ति आती है। तदनुसार–

गमिरबोधने २।४।४६ । इणो गमिः स्याण्णावबोधने। गमयति। बोधने तु– प्रत्याययति। **घट चेष्टायाम्।** (ग०) घटादयो मितः जनीजृष्क्नसुरञ्जोऽमन्ताश्च। एते मितः। (ग०) ज्वलह्वलह्मलनमामनुपसर्गाद्वा। अनुपसर्गादेषां मित्वं वा। ग्लास्नावनुवमां च। अनुपसर्गादेषां मित्वं वा। न कम्यमिचमाम्। अमन्तत्वात्प्राप्तं मित्वमेषां न। यमोऽपरिवेषणे। यच्छतेर्भोजनतोऽन्यत्र मित्वं न। स्खदिखपरिभ्यां च। स्खदिखपरिभ्यां परीभूतो मित् न। **(८३३) मितांह्रस्वः ६।४।९२** । घटादीनां ज्ञपादीनां च णावुपधाया ह्रस्वः। घटयति।

---

(८३२) **णौ गमिरिति।** अत्र 'इणो गा लुङि' इत्यतः इण इत्यनुवर्तते। अत आह–**इणो गमिरिति। गमयति–** इण् धातोर्णिचि अनुबन्धलोपे 'णौ गमिरबोधने' इति इणः गम्यादेशे, धातुसंज्ञायां लटि तिपि शप्यनुबन्धलोपे गुणेऽयादेशे संयोगे 'गमयति' इति।

घटादय इति। घटादिगणपठिता धातवो मित्संज्ञका भवन्ति। एतदाद्यानि सप्तगणसूत्राणि मूले पठितानि।

(८३३) **मितां ह्रस्व इति।** णावित्यनुवर्तते। तदाह–**ज्ञपादीनामिति। अजिज्ञपदिति।**

''उपसर्ग में स्थित निमित्त र् और ष् से परवर्ती अभ्यास सहित अन् धातु के दोनों नकारों को णकार आदेश होता है।''

उदाहरण– प्र + ✓ अन् + णिच् (= 'इ' + लुङ् = तिप् = ति, च्लि, च्लि = चङ् = 'अ')– प्र अन् इ अ ति ('नि' को द्वित्व, अभ्याससंज्ञा, 'णि' का लोप–'णेरनिटि', आट् = 'आ', आ + अ = 'आ'–वृद्धि, अ + आ = 'आ' दीर्घ, दोनों 'न्' = 'ण्'–'उभौ साभ्यासस्य', 'इ' का लोप– 'इतश्च') = प्राणिणत्।

(८३२) **पद–** णौ, गमिः, अबोधने। **अनुवृत्ति–** इणः। **विधिसूत्र।**

मूलार्थ– अवबोधन से भिन्न अर्थ में 'णि' के परवर्ती रहते 'इण्' धातु को 'गम्' आदेश होता है। गमयति। बोधन अर्थ में– प्रत्याययति। घट धातु चेष्टा अर्थ में है।

(ग०) **घटादय इति–** भ्वाद्यन्तर्गत घटादिगणपठित धातुएँ मित्संज्ञक हैं।

जनीजृष्०– जनी, जृष्, क्नसु, रञ्ज् धातुएँ और अमन्त धातुएँ मित्संज्ञक होती हैं।

(ग०) **ज्वलह्वल०–** उपसर्ग रहित ज्वल्, ह्वल्, ह्मल् धातुएँ विकल्प से मित्संज्ञक होती हैं।

ग्लास्ना०– अनुपसर्गक (उपसर्ग रहित) ग्ला, स्ना आदि धातुएँ विकल्प से मित हैं।

न कम्य०– अमन्त होने पर भी कम्, चम् धातुएँ मित् नहीं हैं।

यमो०– अपरिवेषण (परिवेषण से भिन्न) अर्थ में यम् धातु मित् नहीं है।

स्खदि०– अव और परि उपसर्ग से परे स्खद् धातु मित् नहीं है।

विमर्श– यहाँ 'इणो गा लुङि' (२।४।४५) से 'इणः' पद की अनुवृत्ति आती है। अतः ''णि के परवर्ती रहते इण् धातु को अवबोधन से भिन्न अर्थ में 'गम्' आदेश होता है।''

उदाहरण– ✓ इण् + णिच् (= 'इ' (प्रेरणा अर्थ में), 'इण्' = 'गम्'–'णौ गमिरबोधने', धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', 'इ' = 'ए'–गुण, 'ए' = 'अय्' आदेश) = गमयति। (२) बोधन अर्थ में–प्रति ✓ इण् + णिच् (= इ, 'इणो यण्' से परत्वात् यण् का बाध कर 'इ' = 'ऐ'– वृद्धि, ऐ = आय्)–प्रति आय् इ + लट् (= तिप् = 'ति', शप् = 'अ' 'इ' = 'ए'–गुण, 'ए' = 'अय्'– आदेश, इ = य्–'यण्') = प्रत्याययति।

(८३३) **पद–**मिताम्, ह्रस्वः। **अनुवृत्ति–**णौ उपधायाः। विधिसूत्र।

अजीघटत्। ज्ञप ज्ञाने ज्ञापने च। ज्ञपयति। अजिज्ञपत्। (८३४) **रभेरशब्लिटोः** ७।१।६३ । रभेर्नुमचि, न तु शब्लिटोः। (८३५) **लभेश्च** ७।१।६४ । लभेर्नुम् स्यादचि, न तु शब्लिटोः। अररम्भत्। अललम्भत्। ईर्ष्ययति। * ईर्ष्यतेस्तृतीयस्येति

ज्ञप्धातोर्णिचि उपधावृद्धौ 'मितां ह्रस्वः' इति ह्रस्वे धातुसंज्ञायां लुङि तिपि, तिप इकारलोपेऽटि च्लौ, च्लेश्चङि 'णेरनिटि' इत्यनेन णिलोपे 'चङि' इति द्वित्वेऽभ्यासकार्ये, सन्वद्भावे 'सन्यतः' इत्यभ्यासाकारस्येत्वे लघुत्वाभावाद्दीर्घाभावे 'अजिज्ञपत्' इति।

(८३४) **रभेरशब्लिटोरिति।** 'इदितो नुम्धातोः' इत्यतो नुमित्यनुवर्तते, 'रधिजभोरची'त्यतः अचि इत्यनुवर्तते। अत आह- **रभेर्नुमचीति।**

(८३५) **लभेश्चेति।** नुम्, अचि चेत्यनुवर्तेते। पूर्वसूत्रादशब्लिटोरित्यनुवर्तते। तदाह-

---

मूलार्थ– णि के परवर्ती रहते ज्ञपादि और घटादि मित्संज्ञक धातुओं की उपधा को ह्रस्व होता है। घटयति। अजीघटत् इत्यादि।

विमर्श– प्रकृत सूत्र में 'ऊदुपधाया गोहः' (६।४।८९) से 'उपधायाः' तथा 'दोषो णौ' (८२९) से 'णौ' पद की अनुवृत्ति आती है। तदनुसार–''ज्ञपादि और घटादि मित्संज्ञक धातुओं की उपधा को ह्रस्व होता है, णि के परे रहते।''

उदाहरण– (१) ✓ घट् + णिच् (= 'इ', उपधावृद्धि, 'आ' = 'अ'–ह्रस्व–'मितां ह्रस्वः')–ज्ञपि (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', 'इ' = 'ए'–गुण, 'ए' = 'अय्') = घटयति। (२) ✓ घट् + णिच् (= 'इ', 'अ' = 'आ'–उपधावृद्धि–'अत उपधायाः', मित्व–'घटादयो मितः', 'आ' = 'अ'–ह्रस्व–'मितां ह्रस्वः')–घटि (धातुसंज्ञा, लुङ् = प्र० पु० ए० व०–तिप् = ति, अट् = 'अ' आगम, च्लि, च्लि = चङ् = 'अ')–अ घटि अ ति (णि = 'इ' का लोप–'णेरनिटि', द्वित्व–'चङि', अभ्याससंज्ञा, हलादिशेष, 'घ्' = 'झ्'–'कुहोश्चुः', 'झ्'–'ज्'–'अभ्यासे चर्च')–अ ज घट् अ ति (सन्वद्भाव, 'अ' = 'इ' इत्व–'सन्यतः', 'इ' = 'ई'–दीर्घ–'दीर्घो लघोः', इकारलोप–'इतश्च') = अजीघटत्। (३) ✓ ज्ञप् + णिच् (= 'इ', उपधावृद्धि, मित्व–'ज्ञप मिच्च', 'आ' = 'अ'–ह्रस्व–'मितां ह्रस्वः', धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ' 'इ' = 'ए'–गुण, 'ए' = 'अय्' आदेश) = ज्ञपयति। (४) ✓ ज्ञप् + णिच् (= इ, उपधावृद्धि, मित्वात् 'आ' = 'अ'–ह्रस्व–'मितां ह्रस्वः')–ज्ञपि (धातुसंज्ञा, + लुङ् = तिप् = ति, अट् = 'अ', च्लि, च्लि = चङ् = 'अ', णि = 'इ' का, लोप–'णेरनिटि' द्वित्व–'चङि', अभ्याससंज्ञा, हलादिशेष)–अ ज ज्ञप् अ ति (सन्वद्भाव, 'अ' = 'इ'–'सन्यतः', 'ति' की 'इ' का लोप–'इतश्च') = 'अजिज्ञपत्'।

(८३४) **पद**–रभेः, अशब्लिटोः। **अनुवृत्ति**–अचि, नुम्। **विधिसूत्र।**

मूलार्थ– शप् और लिट् सम्बन्धी से भिन्न अजादि प्रत्यय के परवर्ती रहते रभ् धातु को नुम् का आगम होता है।

विमर्श– सूत्रार्थ की स्पष्टता के लिए 'इदितो नुम् धातोः' (७/१/५८) से 'नुम्' तथा 'रधिजभोरचि' (७/१/६१) से 'अचि' पदों की अनुवृत्ति आती है। तदनुसार–''शप् और लिट् वर्जित अजादि प्रत्यय के परे रहते रभ् को नुम् (= न्) का आगम होता है।''

(८३५) **पद**– लभेः, च। **अनुवृत्ति**– अशब्लिटोः, अचि, नुम्। **विधिसूत्र।**

मूलार्थ– शप् और लिट् से भिन्न अजादि प्रत्यय के परे रहते लभ् धातु को भी नुम् का आगम होता है। अररम्भत्। अललम्भत्। ईर्ष्ययति इत्यादि।

वक्तव्यम्*। तृतीयव्यञ्जनस्य तृतीयैकाच इति वार्थः। आद्ये षकारस्य द्वित्वं वारयितुमिदम्। द्वितीये त्वजादेर्द्वितीयस्येत्यस्याऽपवादतया सन्नन्ते प्रवर्तते। ऐर्ष्यियत्। द्वितीयव्याख्यायां णिजन्ताच्चङि षकार एवाभ्यासे श्रूयते, हलादिःशेषात्। द्वित्वं तु द्वितीयस्यैव तृतीयभावेन प्रकृतवार्तिकाऽप्रवृत्तेः। ऐर्षिष्यत्।

इति ण्यन्तप्रकरणम् ।

* * *

लभेर्नुमिति। ऐर्ष्यियदिति– ईर्ष्यधातोर्णिचि अनुबन्धलोपे धातुत्वाल्लुङि तिपि 'इतश्चे'ति तिप इकारलोपे 'आडजादीनामि'त्यनेन आडागमेऽनुबन्धलोपे, च्लौ, च्लेश्चङि अनुबन्धलोपे 'आ ईर्ष्य् इ अ त' इति जाते षकारविशिष्टस्य द्वितीयस्यैकाचो द्वित्वे प्राप्ते 'ईर्ष्यतेस्तृतीयस्येति वाच्यम्' इति वार्तिकेन यकारविशिष्टेकारस्य द्वित्वे 'णेरनिटि' इति णेर्लोपे 'आ ईर्ष्यि य् अ त्' इति जाते 'आटश्चे'ति वृद्धौ संयोगे 'ऐर्ष्यियत्' इति। यदा षकारविशिष्टस्य द्वित्वमिति पक्षः स्वीक्रियते, तदा–'आ ईर्ष्यि ष्यि अ त्' इति जाते हलादिशेषे यकारलोपे णेर्लोपे 'आटश्चे'ति वृद्धौ 'ऐर्षिष्यत्' इति रूपम्।

* * *

विमर्श– पूर्वसूत्र (८३४) से 'अशब्लिटोः' तथा पूर्ववत् 'अचि' और 'नुम्' पदों की अनुवृत्ति आ रही है। अतः "शप् तथा लिट् से भिन्न अजादि प्रत्ययों के परवर्ती रहते लभ् धातु को भी नुम् (='न्') का आगम होता है।"

उदाहरण– (१) ✓ रभ् + णिच् (= 'इ', नुम् = 'न्' आगम–'रभेरशब्लिटोः')–र न् भ् इ (न् = अनुस्वार–'नश्चापदान्तस्य झलि', = 'म्'– परसवर्ण–'अनुस्वारस्य ययि परसवर्णः')–रम्भि (धातुसंज्ञा, लुङ् = तिप् = ति, अट्, च्लि, च्लि = चङ् = 'अ', णि = 'इ' का लोप–'णेरनिटि', द्वित्व–'चङि', अभ्याससंज्ञा, हलादिशेष)– अ र रम्भ् अ ति ('इ' का लोप–'इतश्च') = अररम्भत्। (२) ✓ लभ् + णिच् (= 'इ', नुम् = 'न्'–'लभेश्च', अनुस्वार, परसवर्ण)–लम्भि (लुङ् = तिप् = ति, अट्, च्लि, च्लि = चङ् = 'अ', णि' = 'इ' का लोप, द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'इ' का लोप–'इतश्च') = अललम्भत्। (३) ✓ ईर्ष्य + णिच् (= 'इ'–ईर्ष्यि (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', 'इ' = 'ए'–गुण, 'ए' = 'अय्') = ईर्ष्ययति।

(वा०) 'ईर्ष्ययति' के तृतीय व्यञ्जन या तृतीय एकाच् को द्वित्व होता है। षकारविशिष्ट के द्वित्व का निषेध करने के लिए यह वार्तिक है। द्वितीय अर्थ से इस वार्तिक की यहाँ प्रवृत्ति नहीं होती। क्योंकि यहाँ तृतीय एकाच् का अभाव है, किन्तु 'अजादेर्द्वितीयस्य' का अपवाद होने से यह वार्तिक सन्नन्त में प्रवृत्त होता है।

उदाहरण– (१) ✓ ईर्ष्य + णिच् (= 'इ')–ईर्ष्यि (धातुसंज्ञा + लुङ् = तिप् = ति, आट् = 'आ'–'आडजादीनाम्', च्लि, च्लि = चङ् = 'अ')–आ ईर्ष्य इ अ ति (षकारविशिष्ट द्वितीय एकाच् के द्वित्व की प्राप्ति होने पर–'यि' का द्वित्व–'ईर्ष्यतेस्तृतीयस्येति वाच्यम्', णि = 'इ' का लोप, आ + इ = ऐ–वृद्धि–'आटश्च' इकारलोप) = ऐर्ष्यियत्। जब तृतीय का अभाव होने से प्रकृत वार्तिक की प्रवृत्ति नहीं होती तो षकारविशिष्ट का ही द्वित्व होता है। इस पक्ष में–आ ईर्ष्यि ष्यि अ त् ('य्' का लोप–'हलादिः शेषः', णि = 'इ' का लोप, आ + ई = 'ऐ'–वृद्धि–'आटश्च') = 'ऐर्षिष्यत्'।

ण्यन्त-प्रकरण समाप्त।

* * *

अथ सन्नन्तप्रकरणम्

(८३६) धातोः कर्मणः समानकर्तृकादिच्छायां वा ३।१।७ । इषिकर्मणो धातोरिषिणैककर्तृकात्सन्वेच्छायाम्। धातोर्विधेरिह सन आर्द्धधातुकत्वम्। पठ व्यक्तायां वाचि। इट्। (८३७) सन्यडोः ६।१।९ । सन्नन्तस्य यडन्तस्य च प्रथमस्यैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य। 'सन्यतः'। पठितुमिच्छति पिपठिषति। कर्मणः किम्? गमनेनेच्छति इति करणान्मा भूत्। समानकर्तृकात् किम्? 'शिष्याः पठन्त्वि'तीच्छति गुरुः। 'वा'ग्रहणात्पक्षे वाक्यमपि—

हेतुमण्णिचो निरूपणानन्तरं सन्प्रक्रिया निरूप्यन्ते—

(८३६) **धातोः कर्मण इति।** अत्र 'गुप्तिज्किद्भ्यः' इत्यतः सन्नित्यनुवर्तते। इच्छायाः श्रुतत्वात्तां प्रत्येव कर्मत्वं विवक्षितम्। समानकर्तृत्वमपि इच्छानिरूपितमेव विवक्षितम्। तथा च इषिणैककर्तृत्वादिषिकर्मीभूतव्यापारवाचकाद् धातोरिच्छायां सन् वा स्यादित्यर्थः। तदाह— **इषिकर्मण इति। पिपठिषति।** पठ्धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति विकल्पेन सनि अनुबन्धलोपे आर्धधातुकसंज्ञायाम्, 'आर्धधातुकस्येड् वलादेः' इतीडागमेऽनुबन्धलोपे 'सन्यडोरि'ति द्वित्वेऽभ्यासत्वे हलादिशेषे 'प पठ् इ स' इति जाते 'सन्यतः' इत्यभ्यासस्येत्वे 'आदेशप्रत्यययोः' इति सकारस्य षत्वे 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटस्तिपि शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे '**पिपठिषति**' इति रूपम्।

(८३७) **सन्यडोरिति।** 'एकाचो द्वे प्रथमस्य' 'अजादेर्द्वितीयस्य' इत्यधिक्रियेते, अत आह—**सन्नन्तस्येति।**

शैषिकादिति। शेषाधिकारे विहितः शैषिकः। भवार्थे अध्यात्मादित्वात् ठञ्।

णिच्प्रत्ययान्त धातुओं की साधनिका निरूपित करने के बाद इच्छार्थक सन्प्रत्ययान्त धातुओं के रूपों की प्रक्रिया का निर्देश किया जा रहा है—

(८३६) **पद–** धातोः, कर्मणः, समानकर्तृकात्, इच्छायाम्, वा। **अनुवृत्ति–** सन्। **विधिसूत्र।**

मूलार्थ– इच्छा क्रिया के कर्मीभूत और इच्छा के साथ एक कर्ता वाले धातु से इच्छा अर्थ में विकल्प से सन् प्रत्यय होता है।

विमर्श– प्रकृत सूत्र में 'गुप्तिज्किद्भ्यः सन्' (३।१।५) से 'सन्' पद की अनुवृत्ति आती है। तदनुसार– ''इच्छा क्रिया के कर्म का अवयव जो धातु इच्छा क्रिया का समानकर्तृक (अर्थात् इच्छा का जो कर्ता हो वही उस धातुवाच्य क्रिया का हो) धातु से इच्छा अर्थ में विकल्प से सन् (= स) प्रत्यय होता है।''

✓ पठ् धातु का अर्थ– 'पढ़ना, स्पष्ट उच्चारण करना' है।

(८३७) **पद–** सन्यडोः। **अनुवृत्ति–** एकाचो द्वे प्रथमस्य, अजादेर्द्वितीयस्य। **विधिसूत्र।**

मूलार्थ– सन्नन्त और यडन्त धातुओं के प्रथम एकाच् अवयव को द्वित्व होता है तथा अजादि धातुओं के द्वितीय एकाच् अवयव को द्वित्व होता है। पठितुमिच्छति (पढ़ना चाहता है) पिपठिषति इत्यादि।

शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ।
सरूपः प्रत्ययो नेष्टः, सन्नन्तान्न सनिष्यते ॥

तेन पिपठिषितुमिच्छतीति वाक्यमेव।'लुङ्सनोर्घस्लृ'।(८३८) **सः स्यार्द्धधातुके**

शैषिकात् = शेषाधिकारभवप्रत्ययान्तात्, शैषिकः सरूपः = समानरूपः प्रत्ययो न भवति। यथा–शालायां भवः 'शालीयः' इत्यत्र 'वृद्धाच्छः' इति शैषिकश्छः। ततश्च शालीये भव इत्यर्थे शालीयशब्दात्पुनः शैषिकश्छो न भवति, तेन शालीये भव इति वाक्यमेव। विरूपस्तु भवत्येव। अहिच्छत्रे भवः 'आहिच्छत्रः' इत्यत्र भवार्थेऽण्। तदन्तादाहिच्छत्रे भव इति वाक्यार्थे वृद्धाच्छो भवति, आहिच्छत्रीयः। एवम् मतुबर्थीयात् सरूपो मतुबर्थकः प्रत्ययो न भवति। यथा–धनमस्यास्तीति 'धनवान्' इत्यत्र मतुप्। ततश्च धनवानस्यास्तीति मतुबन्तात्सरूपो मतुब् न। विरूपस्तु स्यादेव। यथा—दण्डोऽस्यास्तीति 'दण्डी'त्यत्र इनिप्रत्ययः। ततश्च दण्डिनः सन्त्यस्यां शालायामित्यर्थे 'दण्डिमती' इत्यत्र इन्नन्तान्मतुब् भवत्येव। एवं सन्नन्तात्सरूपः सन्नेष्यते। अतः पिपठिषितुमिच्छतीति वाक्यमेव। स्वार्थसन्नन्तादिच्छासन् तु विरूपत्वात्स्यादेव। यथा—जुगुप्सिषते, मीमांसिषते इति।

विमर्श– 'एकाचो द्वे प्रथमस्य' (६।१।१) तथा 'अजादेर्द्वितीयस्य' (६।१।२) का अधिकार है। तदनुसार "सन्नन्त और यङन्त धातु के प्रथम एकाच् को और अजादि धातु के द्वितीय एकाच् को द्वित्व होता है।"

पठितुमिति– 'पठितुमिच्छति' यह सन्नन्त प्रयोग का विग्रह = अर्थ है। जिस धातु से सन् प्रत्यय किया जाता है उसके तुमुन् प्रत्ययान्त रूप के साथ 'इच्छति' क्रिया जोड़ कर सन्प्रत्ययान्त रूप का अर्थ प्रकट किया जाता है।

उदाहरण– (१) ✓ पठ् + सन् (= स – 'धातोः कर्मणः ०') – पठ् स (आर्धधातुकसंज्ञा, इट् = 'इ' – 'आर्धधातुकस्येड्वलादेः', धातु को द्वित्व–'सन्यङोः')– पठ् पठ् इ स (अभ्याससंज्ञा, हलादिशेष–'ठ्' का लोप, 'अ' = 'इ'–'सन्यतः' 'स्'='ष्' षत्व–'आदेशप्रत्यययोः', धातुसंज्ञा–'सनाद्यन्ता धातवः', लट् = ल् = तिप् = ति, शप् = 'अ')–पिपठिष अ ति (अ + अ = 'अ'–पररूप–'अतो गुणे') = पिपठिषति। सन् प्रत्यय की आर्धधातुक संज्ञा होती है। सन्नन्त धातु के लिट् आदि लकारों में इस प्रकार के रूप बनते हैं—

लिट्– पिपठिषाञ्चकार, पिपठिषाम्बभूव, पिपठिषामास। लुट्–पिपठिषिता। लृट्–पिपठिषिष्यति। लोट्–पिपठिषतु। लङ्–अपिपठिषत्। वि० लिङ्–पिपठिषेत्। आ० लिङ्–पिपठिष्यात्। लुङ्–अपिपठिषीत्। लृङ्–अपिपठिषिष्यत्।

कर्मण इति। सूत्र में "इच्छा का कर्म जब धातु हो तब उससे सन् प्रत्यय होता है" कहा गया है। अतः 'गमनेनेच्छति' (जाने के द्वारा चाहता है।) यहाँ गमन क्रिया का कर्म नहीं अपितु करण है। अतः सन् प्रत्यय नहीं होता।

समानकर्तृकादिति– सूत्र में 'समानकर्तृकात्' ग्रहण से इच्छा का कर्ता और सन्प्रत्यय के प्रकृतिभूत धातु का कर्ता समान (एक) होना चाहिए, अतः "शिष्याः पठन्तु इतीच्छति गुरुः" इस वाक्य में ✓ पठ् से सन् नहीं होगा। क्योंकि यहाँ पठ् क्रिया इच्छा का कर्म तो है, परन्तु इच्छा का कर्ता गुरु है और पठन का कर्ता–शिष्य। अतः समानकर्तृक (एक कर्ता) न होने से यहाँ 'सन्' नहीं होता।

७।४।४९। सस्य तः स्यात्सादावार्द्धधातुके। अत्तुमिच्छति जिघत्सति। 'ईर्ष्यतेस्तृतीयस्ये'ति यिसनोर्द्वित्वम्। ईर्ष्यियिषति। 'एकाच' इति नेट्। (८३९) अज्झनगमां सनि

---

(८३८) **सः स्यार्धधातुक इति**। 'अच उपसर्गात्तः' इत्यस्मात्त इत्यनुवर्तते। तदाह– **'सस्ये'त्यादिना। जिघत्सति**– अत्तुमिच्छतीत्यर्थे अद्धातोः 'धातोः कर्मणः' इति सन्प्रत्यये 'लुङ्सनोर्घस्लृ' इत्यदो घस्लादेशेऽनुबन्धलोपे आर्धधातुकत्वे 'आर्धधातुकस्येड्वलादेः' इतीडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति तन्निषेधे 'सन्यङोरि'ति द्वित्वेऽभ्यासत्वे, अभ्यासकार्ये 'जघस' इति जाते 'सः स्यार्द्धधातुके' इत्यनेन अभ्याससकारस्य तकारे 'सनाद्यन्ताः' इति धातुसंज्ञायां लटि तिपि शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे कृते 'जिघत्सति' इति रूपम्।

(८३९) **अज्झनगमामिति**। अच्, हन्, गम् इत्येषां द्वन्द्वः। 'अङ्गस्ये'त्यधिकृतम्

वा ग्रहणादिति। सूत्र में वा ग्रहण से सन् प्रत्यय विकल्प से होता है। अतः पक्ष में वाक्य का भी प्रयोग होगा–'पठितुमिच्छति'।

शैषिकादिति– ''शैषिक प्रत्ययान्त से पुनः समानरूप शैषिक प्रत्यय नहीं होता और मत्वर्थिक मतुप् आदि प्रत्ययान्त से भी सरूप मत्वर्थीय प्रत्यय नहीं होता तथा सन्नन्त से पुनः सरूप सन् प्रत्यय नहीं होता।''

सन्नन्त से पुनः समानरूप सन्प्रत्यय न होने से 'पिपठिषितुमिच्छति' वाक्य ही रहता है, सन् प्रत्यय नहीं होता।

(८३८) **पद**– सः, सि, आर्धधातुके। **अनुवृत्ति**– तः। **विधिसूत्र**।

मूलार्थ– सकारादि आर्धधातुके के परे रहते सकार के स्थान में तकार आदेश होता है। जिघत्सति इत्यादि।

विमर्श– प्रकृत सूत्र में 'अच उपसर्गात्तः' (७।४।४७) से आदेशवाचक पद 'तः' की अनुवृत्ति आ रही है। अतः ''सकारादि आर्धधातुक के परवर्ती रहते सकार को तकार आदेश होता है।''

उदाहरण– (१) अत्तुमिच्छति (खाना चाहता है) ✓ अद् + सन् (= 'स'—'धातोः कर्मणः०', अद् = घस्लृ = 'घस्'–'लुङ्सनोर्घस्लृ', आर्धधातुक संज्ञा, 'आर्धधातुकस्येड्०' से प्राप्त इट् का 'एकाच उपदेशेऽनुदात्तात्' से निषेध, धातु को द्वित्व–'सन्यङोः', अभ्याससंज्ञा, हलादिशेष, इत्व)–जघस् स (अभ्यास के 'स'='त्'–'सः स्यार्द्धधातुके')–जिघत्स (धातुसंज्ञा, लट् = ल् = तिप् = 'ति', शप् = 'अ', अ + अ = 'अ' पररूप–'अतो गुणे') = जिघत्सति।

ईर्ष्यतेरिति। 'ईर्ष्यतेस्तृतीयस्य' वार्तिक के अनुसार 'तृतीय व्यञ्जन को द्वित्व होता है, पक्ष में–'य्' को द्वित्व होकर–ईर्ष्यियिषति। 'तृतीय एकाच् को द्वित्व होता है।' इस पक्ष में स को द्वित्व होकर–'ईर्ष्यिषिषति'।

(८३९) **पद**– अज्झनगमां सनि। **अनुवृत्ति**– दीर्घः। **विधिसूत्र**।

मूलार्थ– अजन्त धातु, हन् और अजादेश गम् धातु को दीर्घ होता है, झलादि सन् के परे रहते।

विमर्श–'अङ्गस्य' का अधिकार है। यहाँ अजादि धातु (इण्, इक्, इङ्) धातु के स्थान में आदेश गम् का ग्रहण होता है। 'ढ्रलोपे पूर्वस्य' से 'दीर्घः' पद की अनुवृत्ति आती है। इस प्रकार ''अजन्त तथा हन् धातु और अजादि धातु के स्थान में आदेश 'गम्' को झलादि सन् के परे रहते दीर्घ होता है।

६।४।१६ । अजन्तानां हन्तेरजादेशगमेश्च दीर्घो, झलादौ सनि। (८४०) इको झल् १।२।९ । इगन्ताज्झलादिः सन् कित्स्यात्। कर्तुमिच्छति चिकीर्षति। जिघांसति। (८४१) सनि च २।४।४७ । इणो गमिः स्यात्सनि, न तु बोधने। जिगमिषति। बोधने तु

अचस्तद्विशेषणत्वात्तदन्तविधिः। गम्धातुरिह अजादेश एव विवक्षित इति प्रकृतसूत्रस्य भाष्ये स्पष्टम्। 'ढ्रलोपे पूर्वस्य' इत्यस्माद्दीर्घ इत्यनुवर्तते। तदाह—**अजन्तानामिति**।

(८४०) **इको झल्**। अत्र 'रुदविदमुष०' इत्यतः 'सं:' इति, 'असंयोगाल्लिट् कित्' इत्यतः कित् इति चानुवर्तेते। सना आक्षिप्तधातुविशेषणत्वात्तदन्तविधिस्तदाह–**इगन्तादित्यादिना**। **चिकीर्षति**– कर्तुमिच्छतीत्यर्थे कृधातोः 'धातोः कर्मणः' इत्यादिना सनि आर्धधातुकसंज्ञायाम्, इडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इतीण्निषेधे 'अज्झनगमां सनि' इति दीर्घे, गुणे प्राप्ते 'इको झल्' इति कित्त्वाद्गुणाभावे 'ॠत इद्धातोः' इति इत्वे रपरे 'किर् स' इति जाते, द्वित्वेऽभ्यासकार्ये 'हलि चे'ति दीर्घे षत्वे च कृते 'चिकीर्ष' इत्यस्य धातुसंज्ञायां, लटि तिपि शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे च कृते 'चिकीर्षति' इति।

(८४१) **सनि चेति**। 'णौ गमिरबोधने' इति सूत्रमत्रानुवर्तते, 'इणो गा लुङि' इत्यत इण इति च। तदाह–**इणो गमि इत्यादि**।

---

(८४०) **पद**–इकः, झल्। **अनुवृत्ति**–संः, कित्। **अतिदेशसूत्र**।

मूलार्थ– इगन्त धातु से परवर्ती झलादि सन् कित् होता है।

विमर्श– सूत्रार्थ की पूर्ति हेतु 'रुदविदमुषग्रहिस्वपिप्रच्छः संश्च' (१।२।८) से 'संः' तथा 'असंयोगाल्लिट् कित्' (१।२।५) से 'कित्' पद की अनुवृत्ति आती है। तदनुसार ''इक् अन्त वाले धातु से परवर्ती झलादि सन् किद्वत् होता है।''

उदाहरण– (१) ✓ कृ + सन् (= 'स'–'धातोः कर्मणः०' आर्धधातुक संज्ञा, प्राप्त इट् का 'एकाच उपदेशे०' से निषेध, 'ऋ'='ॠ' दीर्घ–'अज्झनगमाम्०', 'इको झल्' से किद्वद्भाव होने से गुण का अभाव, 'ॠ'='इ'–'ॠत इद्धातोः', रपर)–किर् स (द्वित्व, अभ्यास संज्ञा, हलादिशेष, 'क्' = 'च्'–'कुहोश्चुः', 'इ'='ई'–दीर्घ–'हलि च', षत्व)–चिकीर्ष (धातुसंज्ञा, लट्=ल्=तिप्='ति', शप् = 'अ', अ + अ = 'अ'–पररूप) = चिकीर्षति। (२) 'हन्तुमिच्छति' विग्रह में ✓ हन् + सन् (= स, उपधादीर्घ–'अज्झनगमाम्०', धातु को द्वित्व–'सन्यडोः', अभ्याससंज्ञा, हलादिशेष, 'ह्'='झ्'–'कुहोश्चुः', 'झ्'='ज्'–'अभ्यासे चर्च', 'ह्' = 'घ्'–'अभ्यासाच्च', न् = ं अनुस्वार–'नश्चा०')–जिघांस (धातुसंज्ञा, लट्=ल्=तिप्=ति, शप्='अ', अ + अ = 'अ'–पररूप) = जिघांसति।

(८४१) **पद**– सनि, च। **अनुवृत्ति**– इणः, गमिः, अबोधने। **विधिसूत्र**।

मूलार्थ– सन् के परे रहते इण् को 'गम्' आदेश होता है, किन्तु बोधन अर्थ में नहीं होता। जिगमिषति।

विमर्श– सूत्रार्थ की स्पष्टता हेतु इस सूत्र में 'इणो गा लुङि' (२।४।४५) से 'इणः' तथा 'णौ गमिरबोधने' (२।४।४६) से 'गमिरबोधने' की अनुवृत्ति आ रही है। तदनुसार–''सन् प्रत्यय के परवर्ती रहते भी अबोधनार्थक इण् धातु को 'गम्' आदेश होता है।''

उदाहरण– (१) ✓ इण् (इ) + सन् (= स, इ = गम्–'सनि च', धातु को द्वित्व–'सन्यडोः', अभ्यास संज्ञा, हलादिशेष, अभ्यास के 'ग्' = 'ज्', 'अ' = 'इ'–'सन्यतः', इट् = 'इ' —

प्रतीषिषति। **(८४२) इडश्च २।४।४८ ।** इणो गमिः स्यात्सनि। अधिजिगांसते। **(८४३) रुदविदमुषग्रहिस्वपिप्रच्छः संश्च १।२।८ ।** एभ्यः संश्च, क्त्वा च कितौ स्तः। रुरुदिषति। विविदिषति। मुमुषिषति। **(८४४) सनि ग्रहगुहोश्च ७।२।१२ ।**

---

(८४२) **इडश्चेति**। 'णौ गमिः' इत्यतः 'गमिः' इति, 'सनि चे'त्यतः सनि इति चानुवर्तते। अत आह–**इडो गमिरिति। अधिजिगांसते**– अधिपूर्वकादिङ्धातोः 'धातोः कर्मणः' इति सनि 'इडश्चे'ति गमादेशे 'सन्यडोरि'ति द्वित्वे पूर्वस्याभ्यासत्वे हलादिशेषे 'अभ्यासे चर्च' इति चर्त्वेन गकारस्य जत्वे 'सन्यतः' इति इत्वे 'अधिजिगम् स' इति जाते 'नश्चापदान्तस्य झलि' इत्यनुस्वारे 'अज्झन०' इति दीर्घे 'अधिजिगांस' इति धातुत्वाल्लटि 'पूर्ववत्सनः' इत्यात्मनेपदत्वेन तङि 'टित आत्मनेपदानां टेरे' इति टेरेत्वे, शपि पररूपे 'अधिजिगांसते' इति रूपम्।

(८४३) **रुदविदेति**। 'असंयोगाल्लिट् कित्' इत्यतः किदित्यनुवर्तते। अत आह– **एभ्य इत्यादिना**।

'आर्धधातुकस्येड्वलादेः', षत्व)–जिगमिष (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', अ + अ = 'अ') = जिगमिषति।

बोधने तु– 'सनि च' सूत्र द्वारा बोधन अर्थ से भिन्न अर्थ में ही इण् को गम् आदेश होता है। अतः बोधन अर्थ में इण् को गम् नहीं होता। उदा०–प्रतीषिषति।

(८४२) **पद**– इङः, च। **अनुवृत्ति**– गमिः, सनि। **विधिसूत्र।**

मूलार्थ– 'सन्' के परवर्ती रहते 'इङ्' धातु को भी 'गम्' आदेश होता है। अधिजिगांसते।

विमर्श– सूत्र में आदेशवाचक व निमित्तवाचक पदों का अभाव है। अतः 'णौ गमिरबोधने' (२।४।४६) से 'गमिः' तथा 'सनि च' (२।४।४७) से 'सनि' की अनुवृत्ति आती है। इस प्रकार ''सन् प्रत्यय के परे रहते 'इङ्' धातु के स्थान में भी 'गम्' आदेश हो जाता है।''

उदाहरण– (१) अधि + ✓ इङ्(इ) + सन् (= स, 'इ' = 'गम्'–'इडश्च', द्वित्व–'सन्यडोः', अभ्याससंज्ञा, हलादिशेष, 'ग्' = 'ज्', 'अ' = 'इ' इत्व–'सन्यतः')–अधिजिगम् स (म् = अनुस्वार–'नश्चा०', 'अ' = 'आ' दीर्घ–'अज्झनगमां०')–अधिजिगांस (धातुसंज्ञा–लट्, आत्मनेपदत्व–'पूर्ववत्सनः' ल् = त, 'अ' = 'ए'–एत्व–'टित आत्मनेपदानां टेरे', शप् = 'अ' पररूप) = अधिजिगांसते।

(८४३) **पद**– रुदविदमुषग्रहिस्वपिप्रच्छः, संः, च। **अनुवृत्ति**– क्त्वा, कित्। **अतिदेशसूत्र।**

मूलार्थ– रुद् आदि धातुओं से परवर्ती सन् और क्त्वा कित् होते हैं। रुरुदिषति इत्यादि।

विमर्श– प्रकृत सूत्र में 'असंयोगाल्लिट् कित्' (१।२।५) से 'कित्' तथा 'मृडमृदगुधकुष०' (१।२।७) से 'क्त्वा' की अनुवृत्ति आ रही है। तदनुसार– ''रुद्, विद्, मुष्, ग्रह्, स्वप् तथा प्रच्छ् धातुओं से परवर्ती सन् और क्त्वा प्रत्यय किद्वत् होते हैं।''

उदाहरण– (१) ✓ रुद् + सन् (= स, इट् = 'इ', द्वित्व–'सन्यडोः', अभ्याससंज्ञा, हलादिशेष, षत्व)–रुरुदिष (धातुसंज्ञा, लट्=ल्=तिप्=ति, शप्='अ', पररूप) = रुरुदिषति। (२) इसी प्रकार 'वेदितुमिच्छति'– विविदिषति।

(३) मोषितुमिच्छति– मुमुषिषति। यहाँ प्राप्त लघूपध गुण का 'रुदविदमुष०' से सन् के किद्वद् होने से 'क्ङिति च' से निषेध हो जाता है।

ग्रहेर्गुहिरुगन्ताच्च सन इण्न स्यात्। 'ग्रहिज्ये'ति सम्प्रसारणम्। सनः षत्वस्यासिद्धत्वाद्भष्भावः। जिघृक्षति। **(८४५) हलन्ताच्च १।२।१० ।** इक्समीपाद्धलः परो झलादिः सन्कित्।

---

(८४४) **सनिग्रहगुहोश्चेति।** 'श्र्युकः किति' इत्यस्मात् 'उकः' इत्यनुवर्तते। 'नेड् वशि कृति' इत्यतः नेडिति चानुवर्तते। तदाह–**ग्रहेरित्यादिना। जिघृक्षति**–ग्रह् धातोः सनि 'रुदविदमुष०' इत्यादिना सनः कित्त्वे 'ग्रहिज्या' इति सम्प्रसारणेन रेफस्य ऋत्वे 'ग्रह् स' इति जाते 'हो ढः' इत्यनेन हकारस्य ढकारे 'एकाचो बशो भष्०' इति भष्भावेन गकारस्य घकारे 'षढोः कः सि' इत्यनेन ढस्य ककारे, सस्य षत्वे 'सन्यङोः' इति द्वित्वे, अभ्याससंज्ञायां हलादिशेषे 'उरत्' इति चर्त्वेन गकारे 'कुहोश्चुः' इति चुत्वेन जकारे 'सन्यतः' इत्यनेनेत्वे 'जिघृक् ष' इति संयोगे जिघृक्ष इति जाते 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां, लटि तिपि शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे संयोगे कृते 'जिघृक्षति' इति सिद्धम्।

(८४५) **हलन्ताच्चेति।** हलिति लुप्तपञ्चमीकं पदम्। अन्तपदं समीपार्थकम्। 'इको झल्' इति सूत्रमत्रानुवर्तते, 'रुदविद०' इत्यतः सनिति, 'असंयोगाल्लिट् कित्' इत्यतः किदिति च। अत आह– **इक्समीपादित्यादि। जुघुक्षति**– गूहितुमिच्छतीति विग्रहे गुहूधातोः सनि अनुबन्धलोपे

---

(८४४) **पद**– सनि, ग्रहगुहोः, च। **अनुवृत्ति**– उकः, नेट्। **विधिसूत्र** (निषेध)।

मूलार्थ– ग्रह्, गुह् और उगन्त धातुओं से परवर्ती 'सन्' को 'इट्' नहीं होता। जिघृक्षति।

विमर्श– यहाँ पूर्वसूत्र 'श्र्युकः किति' (७।२।११) से 'उकः' तथा 'नेड् वशि कृति' (७।२।८) से 'नेट्' पदों की अनुवृत्ति आती है। अतः ''ग्रह्, गुह् तथा उगन्त धातुओं के सन् के परवर्ती रहते इट् (इ) आगम नहीं होता।''

उदाहरण (१) 'ग्रहीतुमिच्छति' विग्रह में ✓ ग्रह् + सन् (= 'स', सन् को किद्वद्भाव–'रुदविदमुष०', 'र्' = 'ऋ'–सम्प्रसारण–'ग्रहिज्या०', 'ह्' = 'ढ्'–'हो ढः', 'ग्'='घ्'–भष्भाव–'एकाचो बशो भष्०', 'ढ्' = 'क्'–'षढोः कः सि', षत्व–'आदेशप्रत्यययोः')–घृक् ष (द्वित्व–'सन्यङोः', अभ्याससंज्ञा, हलादिशेष, अभ्यास ऋ='अ'–'उरत्', रपर, हलादिशेष, 'घ्'='ग्'–चर्त्व, 'ग्'='ज्'–'कुहोश्चुः', 'अ'='इ' इत्व–'सन्यतः', क्+ष=क्ष)–जिघृक्ष (धातुसंज्ञा, लट्=ल्=तिप् = ति, शप् = 'अ', अ + अ = 'अ'–पररूप)= जिघृक्षति।

(८४५) **पद**– हलन्तात्, च। **अनुवृत्ति**– इको झल्, सन्, कित्। **अतिदेशसूत्र।**

मूलार्थ– इक्-समीप हल् से परवर्ती झलादि सन् कित् होता है। जुघुक्षति इत्यादि।

विमर्श– प्रकृत सूत्र में 'इको झल्' (१।२।९) सूत्र, 'रुदविदमुष' (१।२।८) से 'सन्' तथा 'असंयोगाल्लिट् कित्' (१।२।५) से 'कित्' की अनुवृत्ति आती है। सूत्र में प्रयुक्त अन्त शब्द समीपार्थक है, अवयवार्थक नहीं। अतः ''इक् के समीप जो हल्, उससे परवर्ती झलादि सन् कित्वत् होता है।

उदाहरण– (१) 'गूहितुमिच्छति' विग्रह में ऊदित ✓ गुहू + सन् (= 'स', प्राप्त गुण का 'हलन्ताच्च' से किद्वद्भाव होने से 'क्ङिति च' से निषेध, 'स्वरति०' से विकल्प से इट् प्राप्त, उसका 'सनि ग्रहगुहोश्च' से निषेध)–गुह् स ('ह्' = 'ढ्'–'हो ढः', 'ढ्' = 'क्'–'षढोः कः सि', 'स्' = 'ष्'–षत्व, 'ग्' = 'घ्'–भष्भाव–'एकाचो०', द्वित्व, अभ्याससंज्ञा, हलादिशेष)–घु घुक् ष ('घ्' = 'झ्'–'कुहोश्चुः', 'झ्' = 'ज्'–'अभ्यासे चर्च', धातुसंज्ञा, लट् = ल् = तिप् = 'ति', शप् = 'अ')–जुघुक्ष अ ति (अ + अ = 'अ'–पररूप–'अतो गुणे') = जुघुक्षति। (२) ✓ स्वप् + सन् (= स,

गुहू संवरणे। जुघुक्षति। सुषुप्सति। (८४६) **किरश्च पञ्चभ्यः ७।२।७५** । कृ गृ दृ धृङ् प्रच्छ एतेभ्यः सन इट्। पिपृच्छिषति। चिकरिषति। जिगरिषति। जिगलिषति। अत्रेटो दीर्घो नेष्टः। (८४७) **पूर्ववत्सनः १।३।६२** । सनः पूर्वो यो धातुस्तेन तुल्यं

'हलन्ताच्चे'त्यनेन सनः कित्त्वेन गुणाऽभावे ऊदित्वात् 'स्वरतिसूतिसूयति०' इत्यादिना विकल्पेन इटि प्राप्ते 'सनि ग्रहगुहोश्चे'ति निषेधे 'हो ढः' इति हस्य ढत्वे 'षढोः कः सि' इति ढस्य ककारे षत्वे 'एकाचो०' इत्यनेन भष्भावेन गस्य घत्वे 'सन्यङोः' इति द्वित्वेऽभ्यासत्वे, हलादिशेषे 'कुहोश्चुः' इति घकारस्य झकारे 'अभ्यासे चर्च' इति चर्त्वेन जकारे 'जुघुक् ष' इत्यस्य धातुसंज्ञायां, लटि तिपि शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे 'जुघुक्षति' इति।

(८४६) **किरश्चेति।** किर इति पञ्चमी। 'स्मिपूङ्रञ्ज्वशां सनि' इत्यतः सनि इति 'इडत्त्यर्ति' इत्यतश्च इडित्यनुवर्तते। तदाह– **कृ गृ इत्यादिना। पिपृच्छिषतीति।** प्रच्छ्धातोः सनि 'रुदविदमुषग्रहिस्वपिप्रच्छः संश्चे'ति सनः कित्त्वात् 'ग्रहिज्या०' इति सम्प्रसारणे पूर्वरूपे 'सन्यङोः' इत्यनेन द्वित्वेऽभ्यासत्वे अभ्यासे 'उरत्' इत्यत्वे रपरे हलादिशेषे 'सन्यतः' इतीत्वे, लटि तिपि शपि पररूपे 'किरश्च पञ्चभ्यः' इति सन इडागमेऽनुबन्धलोपे षत्वे 'पिपृच्छिषती'ति रूपम्।

(८४७) **पूर्ववत्सन इति।** 'अनुदात्तङित्त' इत्यत आत्मनेपदमित्यनुवर्तते। पूर्वपदेनात्र धातुर्गृह्यते। अत आह–**सन इति।**

'रुदविद०' से कित्त्व होने पर 'व्' = 'उ' सम्प्रसारण–'वचिस्वपि०', पूर्वरूप, द्वित्व, अभ्याससंज्ञा, हलादिशेष, षत्व)–सुषुप्स (धातुसंज्ञा, लट् = ल् = तिप् = 'ति', शप् = 'अ', पररूप) = **सुषुप्सति।**

(८४६) **पद–** किरः, च, पञ्चभ्यः। **अनुवृत्ति–** सनि, इट्। **विधिसूत्र।**

मूलार्थ– कृ आदि पाँच धातुओं से परवर्ती सन् को इट् होता है। पिपृच्छिषति इत्यादि।

विमर्श– सूत्रार्थ की पूर्ति हेतु 'स्मिपूङ्रञ्ज्वशां सनि' (७।२।७४) से सनि तथा 'इडत्त्यर्तिव्ययतीनाम्' (७।२।६६) से 'इट्' पद की अनुवृत्ति आती है। तदनुसार– ''कृ, गृ, दृङ्, धृङ् और प्रच्छ् से परवर्ती सन् को इट् होता है।''

उदाहरण– (१) ✓ प्रच्छ् + सन् (= स, 'रुदविद०' से सन् के कित्वत् होने से 'र्' = 'ऋ' सम्प्रसारण–'ग्रहिज्या०', पूर्वरूप, द्वित्व–'सन्यङोः', अभ्याससंज्ञा, 'ऋ'='अ'–'उरत्', रपर, हलादिशेष, 'अ' = 'इ'–इत्व–'सन्यतः', इट्='इ'–'किरश्च पञ्चभ्यः', धातुसंज्ञा, लट् = ल् = तिप् = 'ति', शप् 'अ', पररूप, षत्व) = पिपृच्छिषति। (२) ✓ कृ + सन् (= स, द्वित्व, अभ्याससंज्ञा, अत्व, रपर, हलादिशेष, 'क्' = 'च्')–चकृ स (इट् = 'इ' –'किरश्च पञ्चभ्यः', 'ॠ ' = 'अ'–गुण–'सार्वधातु०', रपर, इत्व, षत्व)–चिकरिष (धातुसंज्ञा, लट् = ल् = तिप् = ति, शप् = 'अ', पररूप)= चिकरिषति। (३) ✓ 'गृ' से–जिगरिषति। यहाँ 'अचि विभाषा' से विकल्प से 'र्' = 'ल्' लत्व = जिगलिषति। यहाँ 'वृतो वा' से प्राप्त वैकल्पिक दीर्घ नहीं होता।

(८४७) **पद–** पूर्ववत्, सनः। **अनुवृत्ति–** आत्मनेपदम्। **विधिसूत्र।**

मूलार्थ– सन् की प्रकृतिभूत धातु के तुल्य ही सन्नन्त से आत्मनेपद होता है। दिदरिषते इत्यादि।

विमर्श– 'अनुदात्तङित्त आत्मनेपदम्' (१।३।१२) से 'आत्मनेपदम्' की अनुवृत्ति आ रही है। अतः ''सन् प्रत्यय के आने से पूर्व जो धातु आत्मनेपदी रही हो, तो सन्नन्त से भी आत्मनेपद होता है।''

सन्नन्तादप्यात्मनेपदं स्यात्। दिदरिषते। दिधरिषते। बुभूषति। (८४८) **सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ७।२।४९** । इवन्तेभ्य ऋधादिभ्यश्च सन इड् वा। इडभावे– 'हलन्ताच्चे'ति कित्त्वम्। (८४९) **च्छ्वोः शूडनुनासिके च ६।४।१९** । सतुक्कस्य छस्य वस्य च क्रमात् श् ऊठ् एतावादेशौ स्तोऽनुनासिके, क्वौ, झलादौ क्ङिति च। यण्। द्वित्वम्। दुधूषति। दिदेविषति। (८५०) **स्तौतिण्योरेव**

---

(८४८) **सनीवन्तर्ध०**। इवन्त, ऋध, भ्रस्ज, दम्भु, श्रि, स्वृ, यु, ऊर्णु, भर, ज्ञपि, सन् एषां द्वन्द्वः। 'स्वरति' इत्यतः वेति, 'इण्निष्ठायाम्' इत्यत इडिति चानुवर्तते। तदाह– **इवन्तेभ्य** इत्यादि।

(८४९) **च्छ्वोः शूडेति**। चकारेण तुगागमोऽनुमीयत अत आह–**सतुक्कस्येति**। **दिदेविषति**– दिव्धातोः सनि 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' इत्यनेन विकल्पेन इटि 'सन्यङोः' इति द्वित्वेऽभ्यासत्वे, हलादिशेषे 'सन्यतः' इतीत्वे 'पुगन्त०' इति गुणे, षत्वे लटि तिपि शपि अनुबन्धलोपे पररूपे 'दिदेविषति' इति। इडभावपक्षे तु 'च्छ्वोः शूडनुनासिके च' इति वस्य ऊठि यणि 'द्यू स' इति जाते द्वित्वेऽभ्यासादिकार्ये 'दु द्यू स' इत्यवस्थायां षत्वे धातुसंज्ञायां लटि तिपि शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे 'दुद्यूषति' इति सिद्धम्।

उदाहरण– (१) ✓ दृङ् (ङित्) + सन् (= 'स', इट् = 'इ'–'किरश्च०', द्वित्व, अभ्याससंज्ञा, अत्व, रपर, हलादिशेष, 'अ' = 'इ' इत्व–'सन्यतः', गुण, रपर, षत्व)–दिदरिष (लट् 'पूर्ववत्सनः' से आत्मनेपद, ल् = त, शप् = 'अ', 'अ' = 'ए'–एत्व–टित आत्मनेपदानाम्०', पररूप) = दिदरिषते। (२) ✓ धृङ्–दिधरिषते। (३) ✓ भू + सन् = बुभूषति।

(८४८) **पद**– सनि, इवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। **अनुवृत्ति**–वा, इट्। **विधिसूत्र।**

मूलार्थ– इवन्त और ऋधु आदि धातुओं से परवर्ती 'सन्' को विकल्प से 'इट्' होता है।

विमर्श– यहाँ 'स्वरतिसूति०' (७।२।४४) से 'वा' तथा 'इण्निष्ठायाम्' (७।२।४७) से 'इट्' की अनुवृत्ति आती है। तदनुसार–"इवन्त धातुओं से तथा ऋधु वृद्धौ, भ्रस्ज पाके, दम्भु दम्भे, श्रिञ् सेवायाम्, स्वृ शब्दोपतापयोः, यु मिश्रणे, ऊर्णुञ् आच्छादने, भृञ् भरणे, ज्ञपि, सन् (षणु दाने तथा षण सम्भक्तौ) धातुओं से परवर्ती 'सन्' को विकल्प से इट् का आगम होता है।"

(८४९) **पद**– च्छ्वोः, शूठ्, अनुनासिके, च। **अनुवृत्ति**– क्विझलोः, क्ङिति। **विधिसूत्र।**

मूलार्थ– तुक् सहित छकार और वकार को क्रमशः 'श्' और 'ऊठ्' आदेश होते हैं, यदि अनुनासिक अथवा क्विप् या झलादि कित् ङित् परे हो तो। दुधूषति इत्यादि।

विमर्श– प्रकृत सूत्र में 'अनुनासिकस्य०'(६।४।१५) से 'क्विझलोः' तथा 'क्ङिति' पदों की अनुवृत्ति आती है। तदनुसार– "तुक् (त्) सहित छकार को और वकार को क्रम से 'श्' और 'ऊठ्' आदेश अनुनासिक वा क्विप् अथवा झलादि कित् ङित् के परवर्ती रहते होते हैं।"

उदाहरण– (१) ✓ दिव् + सन् (= स, विकल्प से इट् = 'इ'–'सनीवन्तर्द्ध०', 'इ' = 'ए'–गुण–'पुगन्त०')–देव् इ स (द्वित्व–'सन्यङोः', अभ्याससंज्ञा, हलादिशेष, ह्रस्व, षत्व)–दिदेविष (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', पररूप) = दिदेविषति। इट् के अभावपक्ष में–दिव् स (व् = ऊ–'च्छ्वोः शूडनुनासिके च', 'इ' = 'य्'–यण्)–द्यू स (द्वित्व, अभ्याससंज्ञा, हलादिशेष, ह्रस्व, षत्व)–दु द्यू ष (लट् = तिप् = 'ति', शप् = 'अ', अ + अ = 'अ'–पररूप) = दुद्यूषति।

षण्यभ्यासात् ८।३।६१ । अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः, षभूते सनि, नान्यस्य। तुष्टूसति। 'द्युतिस्वाप्योः सम्प्रसारणम्' इत्युत्वम्। सुष्वापयिषति। सिसाधयिषति। स्तौतिण्योः किम्? सुस्यूषति। सिसेविषति। **(८५१) आप्ज्ञप्यृधामीत् ७।४।५५** । एषामच ईत्स्यात्सादौ सनि। **(८५२) अत्र लोपोऽभ्यासस्य ७।४।५८** । 'सनि मीमे'-

---

(८५०) **स्तौतिण्योरेवेति।** 'अपदान्तस्य मूर्द्धन्यः' इत्यधिकृतम् 'इण्कोः' इति च।

(८५१) **आप्ज्ञप्यृधामिति।** 'सनि मीमाघुरभ' इत्यतः सनीति अच इति चानुवर्तते। 'सः स्यार्द्धधातुके' इत्यतः सीत्यनुवृत्तं पदं सनो विशेषणम्, तेन तदादिविधिस्तदाह-**एषामच इत्यादिना।**

(८५२) **अत्र लोप इति।** अत्रेत्यनेन पूर्वसूत्रचतुष्टयविहितकार्यं परामृश्यते। अयमर्थः-

---

(८५०) **पद–** स्तौतिण्योः, एव, षणि, अभ्यासात्। **अनुवृत्ति–**सः। **विधिसूत्र।**

मूलार्थ– षभूत 'सन्' के परवर्ती रहते अभ्यास सम्बन्धी इण् से परे स्तु धातु और ण्यन्त धातु के ही सकार को षत्व होता है, अन्य धातु के सकार को षत्व नहीं होता। तुष्टूसति इत्यादि।

विमर्श– 'इण्कोः' (८।३।५७) तथा 'अपदान्तस्य मूर्द्धन्यः' (८।३।५५) का अधिकार है। 'सहेः साडः सः' (८।३।५६) सूत्र से 'सः' पद की अनुवृत्ति आ रही है। अतः ''अभ्यास के इण् से उत्तरवर्ती स्तु (ष्टुञ्) तथा ण्यन्त धातुओं के आदेश सकार को ही षत्वभूत सन् के परवर्ती रहते मूर्द्धन्य आदेश होता है।''

उदाहरण– (१) ✓ स्तु + सन् (= 'स', 'स्' = 'ष्' षत्व–'स्तौतिण्योः०', 'त्' = 'ट्'–ष्टुत्व, द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'उ' = 'ऊ'–दीर्घ–'अज्झन०', षत्व)–तुष्टूष (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', पररूप) = तुष्टूषति। (२) ण्यन्त ✓ स्वप्–स्वाप् इ + सन् (= स, द्वित्व, अभ्याससंज्ञा, ह्रस्व, 'व्' = 'उ'–सम्प्रसारण–'द्युतिस्वाप्योः सम्प्रसारणम्', इट् = 'इ', 'इ' = 'ए'–गुण, ए = 'अय्', 'स्' = 'ष्'–षत्व–'स्तौतिण्योः०')–सुष्वापयिष (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', पररूप) = सुष्वापयिषति। (३) ण्यन्त ✓ साध् इ + सन् (= स, द्वित्व–'सन्यङोः', अभ्याससंज्ञा, ह्रस्व, हलादिशेष, 'अ' = 'इ' इत्व–'सन्यतः', इट् = इ, 'इ' = 'ए'–गुण, 'ए' = 'अय्' आदेश, षत्व– 'स्तौतिण्योरेव०')–सिसाधयिष (लट् = तिप् = 'ति', शप् = 'अ', पररूप) = सिसाधयिषति।

प्रत्युदाहरण– प्रकृत सूत्र में स्तु और ण्यन्त धातु का ग्रहण किया गया है, अतः 'सुस्यूषति' और 'सिसेविषति' सन्नन्त प्रयोगों में षत्व नहीं होता।

(८५१) **पद–** आप्ज्ञप्यृधाम्, ईत्। **अनुवृत्ति–** अचः, सनि, सः। **विधिसूत्र।**

मूलार्थ– सकारादि सन् के परवर्ती रहते आप्, ज्ञप् और ऋध धातुओं के अच् को ईत्व होता है।

विमर्श– सूत्रार्थ की स्पष्टता के लिए 'सनि मीमाघुर०' (७।४।५४) से 'सनि' और 'अचः' तथा 'सः स्यार्धधातुके' (७।४।४९) से 'सः' पद की अनुवृत्ति आती है। तदनुसार– ''सकारादि सन् प्रत्यय के परे रहते आप्, ज्ञप् तथा ऋध् धातुओं के अच् के स्थान में (ईत्) ईकार आदेश होता है।''

(८५२) **पद–** अत्र, लोपः, अभ्यासस्य। **विधिसूत्र।**

मूलार्थ– 'सनि मीमा०' सूत्र से लेकर जो चार (इस, ईत्व, इत्, गुण) कार्य कहे गये हैं, वहाँ (उन कार्यों के होने पर) अभ्यास का लोप होता है। आप्तुमिच्छति–ईप्सति इत्यादि।

त्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्तुमिच्छति ईप्सति। अर्द्धितुमिच्छति ईर्त्सति। अर्दिधिषति। बिभ्रज्जिषति। बिभर्जिषति। बिभ्रक्षति। बिभर्क्षति। **(८५३) दम्भ इच्च ७।४।५६** । दम्भेरच इत्स्यात्, ईच्च सादौ सनि। 'हलन्तादि'त्यत्र हल्ग्रहणं जातिपरम्।

'सनि मीमे'ति सूत्रम्, 'आप्ज्ञप्यृधामीत्' इति सूत्रम्, 'दम्भ इच्च' इति सूत्रम्, 'मुचोऽकर्मकस्य' इति सूत्रञ्च यत्र प्रवर्तते तत्राऽभ्यासस्य लोपो भवति। **ईप्सति**– 'आप्तुमिच्छति' इति विग्रहे आप्लृधातोः सनि अनुबन्धलोपे 'सन्यडोः' इति द्वित्वात्पूर्वं 'आप्ज्ञप्यृधामीत्' इतीत्वे, द्वित्वेऽभ्यासादिकार्ये 'ई ईप् स' इति जाते 'अत्र लोपोऽभ्यासस्ये'ति अभ्यासलोपे 'ईप्स' इत्यस्य धातुसंज्ञायां, लटि तिपि शपि अनुबन्धलोपे पररूपे संयोगे 'ईप्सति' इति।

(८५३) **दम्भ इच्च इति।** 'सनि सीमा' इत्यतः सनि अच इति चानुवर्तते। चकारात् 'आप्ज्ञप्यृधामि'त्यत ईदिति समुच्चीयते। 'सः सी'त्यतः सीत्यनुवृत्तं सनो विशेषणम्। तेन

विमर्श– सूत्रोक्त 'अत्र' पद 'सनिमीमा०' (७।४।५४ से लेकर 'मुचोऽकर्मकस्य (७।४।५७) तक सूत्रों द्वारा विहित चार कार्यों (इस, ईत्, इत् और गुण) का बोधक है। इस प्रकार ''यहाँ सन् के परवर्ती रहते जो कार्य कहा है अर्थात् पूर्वोक्त चार सूत्रों द्वारा इस्, ईत् आदि का विधान किया गया है, उनके अभ्यास का लोप होता है।''

उदाहरण– (१) ✓ आप् + सन् (= स, 'सन्यडोः' से प्राप्त द्वित्व से पूर्व–'आ' = 'ई' ईत्व– 'आप्ज्ञप्यृधामीत्', द्वित्व, अभ्याससंज्ञा, हलादिशेष)– ई ईप् स ('ई', अभ्यास का लोप–'अत्र लोपोऽभ्यासस्य')–ईप्स (धातुसंज्ञा, लट् = ल् = तिप् = ति, शप् = 'अ', अ + अ = 'अ'–पररूप) = ईप्सति।

(२) ✓ ऋध् + सन् (= स, इट् = 'इ'–विकल्प से–'सनीवन्तर्ध०', आर्धधातुकसंज्ञा, 'ऋ' = 'अ'–गुण–'पुगन्त०', रपर)–अर्धिस (धि का द्वित्व–'सन्यडोः', अभ्याससंज्ञा, 'ध्' = 'द्'–चर्त्व– 'अभ्यासे चर्च')–अर् दि धि स (षत्व)–अर्दिधिष (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', पररूप) = अर्दिधिषति। **इट् के अभाव पक्ष में**– ऋध् स ('ऋ' = 'ई'–'आप्ज्ञप्यृधामीत्', रपर, 'ध्' = 'त्'– 'खरि च')– ईर्त्स ('नन्द्राः संयोगादयः' से रेफ का द्वित्व–निषेध होने से 'त्स' का द्वित्व, अभ्याससंज्ञा, अभ्यास का लोप–'अत्र लोपः०')–ईर्त्स (धातुसंज्ञा, लट्=तिप्='ति', शप् = 'अ', अ + अ = 'अ' –पररूप–'अतो गुणे') = ईर्त्सति।

(३) ✓ भ्रस्ज् + सन् (= 'स', विकल्प से इट् = 'इ'–'सनीव०', द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'भ्' = 'ब्'–'अभ्यासे चर्च', 'अ' = 'इ'–'सन्यतः', 'स्' = 'श्'–श्चुत्व, श् = 'ज्'– जश्त्व, षत्व)– बिभ्रज्ज् इ ष (धातुसंज्ञा, लट् = ल् = तिप् = 'ति', शप् = 'अ', पररूप) = बिभ्रज्जिषति। 'भ्रस्जो रोपधयोः०' से पाक्षिक रम् = 'र्' आगम होने पर– बिभर्जिषति। इट् तथा रमागम के अभाव पक्ष में–बिभ्रक्षति। रम् आगम पक्ष तथा इडभावपक्ष में– **बिभर्क्षति**।

(८५३) **पद**– दम्भः, इत्, च। **अनुवृत्ति**– ईत्, अचः, सनि, सः। **विधिसूत्र**।

मूलार्थ– सकारादि सन् के परवर्ती रहते 'दम्भ्' धातु के 'अच्' को इत्व होता है, पक्ष में ईत् भी होता है। ''हलन्ताच्च'' सूत्र में हल् ग्रहण जातिपरक है, अतः यहाँ भी सन् किद्वत् हो जाता है। फलतः 'न्' का लोप– धिप्सति, धीप्सति इत्यादि।

विमर्श– पूर्वसूत्र (८५१) से 'ईत्', 'सनि मीमा०' (७।४।५४) से 'अचः' तथा 'सनि' और

तेन सनः कित्त्वान्नलोपः। धिप्सति। धीप्सति। दिदम्भिषति। शिश्रीषति। शिश्रयिषति। 'उदोष्ठ्ये'त्युत्वम्। सुस्वूर्षति। सिस्वरिषति। युयूषति। यियविषति। 'विभाषोर्णोः' इति ङित्।

तदादिविधिस्तदाह- **दम्भेरच इति**। **धिप्सति-** दम्भधातोः सनि 'सनीवन्तर्ध०' इत्यादिना विकल्पेन इटि 'सन्यडोः' इत्यनेन द्वित्वेऽभ्यासादिकार्ये 'सन्यतः' इत्यभ्यासाकारस्य इत्वे, षत्वे 'दिदम्भिष' इति जाते, धातुसंज्ञायां लटि तिपि शपि अनुबन्धलोपे पररूपे 'दिदम्भिषति' इति।

'सः स्या०' (७।४।४९) से 'सः' की अनुवृत्ति आती है।

तदनुसार- ''सकारादि सन् प्रत्यय के परे रहते 'दम्भ्' के अच् के स्थान में 'इत्' (इकार आदेश) होता है। चकार से 'ईत्' (ईकार) आदेश भी होता है।''

उदाहरण- (१) ✓ दम्भ् + सन् (= स, विकल्प से इट् = 'इ'–'सनीवन्तर्ध०', द्वित्व–सन्यडोः', अभ्याससंज्ञा, हलादिशेष, अभ्यास 'अ' = 'इ'–इत्व–'सन्यतः', षत्व)–दिदम्भिष (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', पररूप) = दिदम्भिषति। **इट् के अभाव पक्ष में–** दम्भ् स ('अ' = 'इ' इत्–'दम्भ इच्च', 'हलन्ताच्च' से कित्त्व होने पर 'न्' का लोप, 'द्' = 'ध्'–'एकाचो बशो भष्०', 'भ्' = 'प्'–'खरि च')–धिप् स (द्वित्व, अभ्यासकार्य)–धि धिप् स ('धि' अभ्यास का लोप–'अत्र लोपोऽभ्यासस्य')–धिप्स (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', पररूप) = धिप्सति। ईत्व पक्ष में–धीप्सति।

(२) ✓ श्रिञ् (श्रि) + सन् (= स, विकल्प से इट् = 'इ'–'सनीव०', 'इ')– श्रि इ स (द्वित्व, अभ्याससंज्ञा, हलादिशेष)– शि श्रि इ स ('इ' = 'ए'–गुण, ए = अय् आदेश, षत्व)– शिश्रयिष (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', पररूप) = शिश्रयिषति। इट् के अभाव पक्ष में– श्रि स (द्वित्व, अभ्याससंज्ञा, हलादिशेष)– शिश्रि स ('इ' = 'ई'–दीर्घ–'अज्झन०', षत्व, लट् = तिप् = 'ति', शप् = 'अ', अ + अ = 'अ'–पररूप) = शिश्रीषति।

(३) ✓ स्वृ + सन् (= 'स', विकल्प से इट्, द्वित्व, अभ्याससंज्ञा, 'ऋ' = 'अ'–'उरत्' रपर, हलादिशेष, 'अ' = 'इ'–'सन्यतः')– सि स्वृ इ स ('ऋ' = 'अ' गुण, रपर, षत्व, धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ' पररूप) = सिस्वरिषति। इट् के न होने पर पक्ष में स्वृ स, द्वित्व, अभ्याससंज्ञा, 'ऋ' = 'उ'–'उदोष्ठ्यपूर्वस्य', रपर, 'उ' = 'ऊ' दीर्घ– 'उपधायां च', लट् = तिप् = 'ति', शप् = 'अ', पररूप) = सुस्वूर्षति।

(४) ✓ यु + सन् (= 'स', विकल्प से इट् = 'इ'–'सनीव०', 'यु' का द्वित्व–'सन्यडोः', अभ्याससंज्ञा)– यु यु इ स ('उ' = 'ओ'–गुण, 'ओ' = 'अव्'–आदेश, अभ्यास के 'उ' = 'इ'–'ओः पुयण्ज्यपरे', षत्व)– यियविष (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ', पररूप) = यियविषति। **इट् के न होने पर पक्ष में–** यु स ('उ' = 'ऊ'–दीर्घ–'अज्झन०', द्वित्व, अभ्याससंज्ञा, ह्रस्व, षत्व)– यु यूष (लट् = तिप् = 'ति', शप् = 'अ', पररूप) = युयूषति।

(५) ✓ ऊर्णुञ् (ऊर्णु) + सन् (= '**स**', विकल्प से इट् = 'इ'–'सनीव०', ङित्व–'विभाषोर्णोः', 'नु' का द्वित्व, अभ्याससंज्ञा, उ = उवङ् = 'उव्', षत्व)– उर्णुनुविष (लट् = तिप् = 'ति', शप् = 'अ' पररूप)–ऊर्णुनुविषति। **डिद्वद्भाव के अभाव पक्ष में–** गुण, अव् आदेश– उर्णुनविषति। **इट् के अभाव पक्ष में–** 'अज्झन०' से दीर्घ, 'इको झल्' से सन् के कित्वत् होने से गुण का निषेध–ऊर्णुनूषति।

(६) ✓ भृञ् (भृ) + सन् (= 'स', विकल्प से इट् = 'इ', द्वित्व, अभ्याससंज्ञा, 'ऋ' =

ऊर्णुनूषति। ऊर्णुनुविषति। ऊर्णुनविषति। बुभूर्षति। बिभरिषति। ज्ञीप्सति। जिज्ञपयिषति। सिषासति। सिसनिषति। * आशङ्कायां सन्वक्तव्यः *। श्वा मुमूर्षति। * तनिपतिदरिद्रातिभ्यः सनो वेड् वाच्यः *। (८५४) तनोतेर्विभाषा ६।४।१७। तनोतेरुपधाया दीर्घो

इडभावपक्षे– 'दम्भ स' इति स्थिते 'दम्भ इच्च' इत्यनेन इत्वे 'हलन्ताच्च' इति सनः कित्त्वे 'अनुनासिकस्ये'त्यादिना मलोपे 'एकाचो बशो भष्' इति भष्भावेन दस्य धत्वे 'खरि चे'ति चर्त्वेन भस्य पत्वे द्वित्वेऽभ्यासादिकार्ये 'अत्र लोपः' इत्यभ्यासलोपे संयोगे 'धिप्स' इत्यस्य धातुसंज्ञायां, लटि तिपि शपि अनुबन्धलोपे पररूपे 'धिप्सति' इति। 'दम्भ इच्च' इति ईत्वपक्षे 'धीप्सति' इति।

आशङ्कायामिति। आशङ्काविषयक्रियावृत्तेर्धातोः स्वार्थे सन्नित्यर्थः।

(८५४) **'तनोतेर्विभाषे'ति।** 'नोपधायाः' इत्यतः 'उपधायाः' इति, 'ढ्रलोपे पूर्वस्ये'-त्यतः 'दीर्घः' इति चानुवर्तते। 'अनुनासिकस्ये' त्यतः झलीति 'अज्झन०' इत्यतश्च सनीत्यनुवर्तेते। तदाह–**तनोतेरुपधाया इति। तितांसतीति।** तनितुमिच्छतीति विग्रहे 'तनु विस्तारे' इत्यस्माद्धातोः

'अ'–'उरत्', रपर, हलादिशेष, 'भ्' = 'ब्'–'अभ्यासे चर्च', 'अ' = 'इ'– 'सन्यतः')– बि भृ इ स ('ऋ' = 'अ'–गुण, रपर, षत्व)–बिभरिष (धातुसंज्ञा, लट् = ल् = तिप् = 'ति', शप् = 'अ', पररूप) = बिभरिषति। **इट् के अभाव पक्ष में**– भृ स ('ऋ' = 'ॠ'–दीर्घ–'अज्झन०', 'ऋ' = 'उ'–'उदोष्ठ्यपूर्वस्य', रपर, द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'उ' = 'ऊ'–दीर्घ, षत्व)– बुभूर्ष (लट् = ल् = तिप् = ति, शप् = 'अ', अ + अ = 'अ' पररूप) = बुभूर्षति।

(७) ✓ ज्ञपि + सन् (= स, विकल्प से इट् = 'इ', द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'अ' = 'इ' इत्व- 'सन्यतः', 'इ' = 'ए'–गुण, 'ए' = 'अय्' आदेश, षत्व)– जिज्ञपयिष (धातुसंज्ञा, लट् = तिप् = 'ति', शप् = 'अ' पररूप) = जिज्ञपयिषति। इट् के न होने पर पक्ष में– ज्ञप् स (अ = 'ई' ईत्–'आप्ज्ञप्यृधामीत्', द्वित्व, अभ्याससंज्ञा, अभ्यास का लोप–'अत्र लोपः')– ज्ञीप्स (लट् = तिप् = 'ति', शप् = 'अ' पररूप) = ज्ञीप्सति।

(८) ✓ सन् + सन् (= स, विकल्प से इट् = 'इ'–'सनीव', द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'अ' = 'इ'–'सन्यतः', षत्व)– सिसनिष (लट् = तिप् = ति, शप् = 'अ' पररूप) = सिसनिषति। इट् के अभावपक्ष में (आत्व–'जनसन०', द्वित्व, अभ्याससंज्ञा, ह्रस्व, 'अ' = इत्व–'इ' षत्व) सिषास (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ' पररूप) = सिषासति।

(वा०)– आशङ्का अर्थ में भी धातु से सन् प्रत्यय होता है, ऐसा कहना चाहिए।

उदाहरण– श्वा मुमूर्षति। ✓ मृङ् (मृ) + सन् (= 'स'– 'आशङ्कायां सन्वक्तव्यः', 'ऋ' = ऊठ् = 'ऊ', रपर, द्वित्व, अभ्यासंज्ञा, हलादिशेष, ह्रस्व, षत्व)– मुमूर्ष (धातुसंज्ञा, लट् = ल् = तिप् = 'ति', शप् = 'अ', पररूप) = मुमूर्षति।

(वा०)– तन्, पत् और दरिद्रा धातु से परवर्ती सन् को विकल्प से इट् = 'इ' होता है।

(८५४) पद– तनोतेः, विभाषा। **अनुवृत्ति–** सनि, झलि, उपधायाः, दीर्घः। **विधिसूत्र।**

मूलार्थ– झलादि सन् के परवर्ती रहते तन् धातु की उपधा को विकल्प से दीर्घ होता है। तितांसति। तितंसति। तितनिषति। कूलं पिपतिषति।

विमर्श– सूत्रार्थ की पूर्ति हेतु 'अज्झनगमां सनि' (६।४।१६) से 'सनि', 'अनुनासिकस्य०'

वा स्याज्झलादौ सनि। तितांसति। तितंसति। तितनिषति। कूलं पिपतिषति। (८५५) **सनि मीमाघुरभलभशकपतपदामच इस् ७।४।५४** । एषामच इस् स्यात् सादौ सनि। अभ्यासलोपः। सलोपः। पित्सति। दिदरिद्रिषति। दिदरिद्रासति। (८५६) **मुचोऽकर्मकस्य**

'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन सनि अनुबन्धलोपे 'तनिपतिदरिद्रातिभ्यः सनो वा इड् वाच्यः' इति वैकल्पिके इटि 'सन्यङोः' इति द्वित्वेऽभ्यासत्वे, हलादिशेषे 'त तन् इ स्' इति जाते 'सन्यतः' इत्यनेन अभ्यासाकारस्येत्वे, षत्वे 'तितनिष्' इत्यस्य धातुसंज्ञायां, लटि तिपि शप्यनुबन्धलोपे पररूपे 'तितनिषति' इति रूपम्। **इडभावपक्षे**–'तनोतेर्विभाषा' इत्युपधादीर्घे, द्वित्वेऽभ्यासत्वे 'सन्यतः' इत्यनेन इत्वे 'तितान् स' इति जाते, नस्यानुस्वारे लटि तत्स्थाने प्रथमपुरुषैकवचने तिपि शपि पररूपे 'तितांसति' इति। **दीर्घाभावे इडभावे च** 'तितंसती'ति तृतीयं रूपम्।

(८५५) **सनि मीमेति।** अत्र 'सः स्यार्द्धधातुके' इत्यतः 'सि' इत्यनुवर्तते। अत आह– **एषामच इत्यादिना। पित्सतीति।** पत् धातोः सनि 'तनिपतिदरिद्रातिभ्यः॰' इति वेटि द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'सन्यतः' इतीत्वे षत्वे लटि तिपि शपि पररूपे च कृते 'पिपतिषति' इति। इडभावपक्षे तु– 'सनि मीमे'त्यनेन अचः स्थाने इसादेशे द्वित्वे 'अत्र लोपोऽभ्यासस्ये'ति अभ्यासलोपे 'स्कोरि'ति सलोपे 'पित्स' इति जाते लटि तिपि शपि पररूपे 'पित्सति' इति रूपम्।

(६।४।१५) से 'झलि', 'नोपधायाः' (६।४।६) सूत्र से 'उपधायाः' तथा 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६।३।११०) से 'दीर्घः' पद की अनुवृत्ति आती है। 'अङ्गस्य' का अधिकार है। तदनुसार–''झलादि सन् के परवर्ती रहते तन् धातु के अङ्ग की उपधा को विकल्प से दीर्घ होता है।''

उदाहरण– (१) ✓ तन् + सन् (= 'स', इट् = 'इ' विकल्प से–'तनिपतिदरिद्रातिभ्यः॰')– तन् इ स (द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'अ' = 'इ'–इत्व–'सन्यतः', षत्व)– तितनिष् (धातुसंज्ञा, लट् = तिप् = ति, शप् = 'अ', अ + अ = 'अ'–पररूप) = तितनिषति। इट् के अभाव पक्ष में (उपधादीर्घ विकल्प से, न् = ं अनुस्वार, लट् = तिप् = ति, शप् = 'अ', पररूप) = तितांसति। दीर्घ और इट् के अभाव पक्ष में–'तितंसति'।

(८५५) **पद**– सनि, मीमाघुरभलभशकपतपदाम्, अचः, इस्। **अनुवृत्ति**–सि। **विधिसूत्र।**

मूलार्थ– सकारादि 'सन्' के परवर्ती रहते मी आदि धातुओं के अच् के स्थान में 'इस्' (=इ) आदेश होता है। पित्सति। दिदरिद्रिषति। दिदरिद्रासति।

विमर्श– प्रकृत सूत्र में 'सः स्यार्द्धधातुके' (७।४।४९) सूत्र से 'सि' पद की अनुवृत्ति आती है। अतः ''सकारादि सन् प्रत्यय के परे रहते मी, मा तथा घुसंज्ञक एवं रभ, लभ, शक्, पत् और पद के 'अच्' के स्थान में 'इस्' (='इ') आदेश होता है।

उदाहरण– (१) ✓ पत् + सन् (= **स**, विकल्प से इट् = 'इ'–'तनिपति॰', द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'अ' = 'इ'–'सन्यतः', षत्व)–पिपतिष (लट् = तिप् = ति, शप् = 'अ', पररूप) = पिपतिषति। **इट् के अभाव पक्ष में**– पत् स ('अ' = 'इ'–'सनि मीमा॰', द्वित्व, अभ्याससंज्ञा, अभ्यास का लोप–'अत्र लोपः॰', 'स्' का लोप–'स्कोः॰')–पित्स (लट् = तिप् = ति, शप् = 'अ', अ + अ = 'अ') = पित्सति। (२) ✓ दरिद्रा + सन् (=स, विकल्प से इट् = 'इ'–'तनिपति॰', 'आ'

गुणो वा ७।४।५७ । मुचोऽकर्मकस्य गुणो वा स्यात्सादौ सनि। अभ्यासलोपः। मोक्षते मुमुक्षते वा वत्सः स्वयमेव। अकर्मस्य किम्? मुमुक्षति वत्सं कृष्णः।(८५७) **इट् सनि वा ७।२।४१ ।** वृङ्वृञ्भ्यामृदन्ताच्च सन इड् वा। विवरिषते। विवरीषते। वुवूर्षते।

---

(८५६) **मुचोऽकर्मकस्ये'ति।** 'सः स्यार्द्धधातुके' इत्यतः सि इति 'सनि मीमे'त्यतः सनीति चानुवर्तते। तदाह–**मुचोऽकर्मकस्येति। मोक्षत इति।** मुच्लृधातोः सनि 'मुचोऽकर्मकस्य गुणो वा' इति विकल्पेन गुणे द्वित्वे 'अत्र लोपोऽभ्यासस्ये'ति अभ्यासलोपे 'चोः कुः' इति कुत्वेन चकारस्य ककारे, सस्य षत्वे संयोगेन क्षत्वे लटि 'पूर्ववत्सनः' इत्यात्मनेपदे तङि टेरेत्वे, शपि पररूपे च कृते 'मोक्षते' इति रूपम्। गुणाभावपक्षे तु अभ्यासलोपाभावे 'मुमुक्षते' इति। सूत्रेऽकर्मकस्येत्युक्ते कर्मणः कर्तृत्वविवक्षायामयं विकल्पोऽन्यत्र तु 'मुमुक्षति वत्सं कृष्णः'।

(८५७) **इट् सनीति।** 'वृतो वे'त्यतः 'वृतः' इत्यनुवर्तते। तदाह– **वृङ्वृञ्भ्यामिति। विवरिषते**– वृङ्धातोः सनि 'इट् सनि वे'ति वैभाषिके इटि गुणे रपरत्वे द्वित्वेऽभ्यासत्वे हलादिशेषे 'सन्यतः' इतीत्वे षत्वे तङि टेरेत्वे शपि पररूपे 'विवरिषते' इति। 'वृतो वा' इति दीर्घपक्षे– 'विवरीषते' इति रूपम्। इडागमाभावपक्षे– 'उदोष्ठ्यपूर्वस्ये'ति उत्वे 'हलि चे'ति दीर्घे द्वित्वेऽभ्यासत्वे ह्रस्वे हलादिशेषे षत्वे लटि तङि शपि टेरेत्वे पररूपत्वे 'वुवूर्षते' इति। परस्मैपदे तु विवरिषति, विवरीषति, वुवूर्षति इति।

का लोप–'आतो लोप इटि च', द्वित्व, 'अ' = 'इ'–'सन्यतः', षत्व)–दिदरिद्रिष (लट् = तिप् = ति, शप् = 'अ' पररूप) = दिदरिद्रिषति। **इडागम के अभाव पक्ष में**– दिदरिद्रासति।

(८५६) **पद**– मुचः, अकर्मकस्य, गुणः, वा। **अनुवृत्ति**– सनि, सः। **विधिसूत्र।**

मूलार्थ– सकारादि सन् के परवर्ती रहते अकर्मक मुच् धातु को विकल्प से गुण होता है। मोक्षते, मुमुक्षते वा वत्सः स्वयमेव।

विमर्श– पूर्वसूत्र (८५५) से 'सनि' तथा 'सः स्यार्द्धधातुके' (७।४।४९) से 'सि' की अनुवृत्ति आती है। तदनुसार– ''सकारादि सन् प्रत्यय के परे रहते अकर्मक मुच्लृ धातु को विकल्प से गुण होता है।''

उदाहरण– (१) ✓ मुच् + सन् (=स, 'उ' = 'ओ'–गुण विकल्प से–'मुचोऽकर्मकस्य०', द्वित्व, अभ्याससंज्ञा, अभ्यास का लोप–'अत्र लोपः०', 'च्' = 'क्'– 'चोः कुः', षत्व, क् + ष् = क्ष्)– मोक्ष (लट् = आत्मनेपद त, शप् = 'अ', एत्व) = मोक्षते। गुण के अभावपक्ष में अभ्यासलोप भी नहीं होता– मुमुक्षते।

प्रत्युदाहरण– सूत्र में 'अकर्मकस्य' पद का ग्रहण होने से अकर्मक ✓ मुच् को ही गुण होता है। 'मुमुक्षति वत्सं कृष्णः' वाक्यघटक सकर्मक 'मुमुक्षति' में गुण नहीं होता।

(८५७) **पद**– इट्, सनि, वा। **अनुवृत्ति**– वृतः। **विधिसूत्र।**

मूलार्थ– वृङ्, वृञ् और ऋदन्त धातुओं से परवर्ती सन् को विकल्प से इट् होता है। विवरिषते। विवरीषते। वुवूर्षते इत्यादि।

विमर्श– 'वृतो वा' (७।२।३८) से 'वृतः' पद की अनुवृत्ति आ रही है। तदनुसार ''वृ तथा ऋकारान्त धातु से परे सन् को विकल्प से इट् (इ) का आगम होता है।''

उदाहरण– (१) ✓ वृञ् + सन् (= 'स', विकल्प से इट् = 'इ', 'ऋ' = 'अ'–'गुण',

विवरिषति। तितरिषति। तितरीषति। तितीर्षति। (८५८) स्मिपूङ्रञ्ज्वशां सनि ७।२।७४ । स्मिङ्-पूङ्-ऋ-अञ्जु-अश्-एभ्यः सन इट्। सिस्मयिषते। पिपविषते। अरिरिषति। अञ्जिजिषति। अशिशिषति। गुप गोपने। तिज निशाने। कित निवासे रोगापनयने च। मान पूजायाम्। बध बन्धने। दान खण्डने। शान तेजने। (८५९) गुप्तिज्किद्भ्यः सन् ३।१।५ । (८६०) मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य

---

(८५८) **स्मिपूङिति।** 'इडत्यर्तिव्ययतीनामि'त्यतः इडित्यनुवर्तते। अत आह–'**स्मिपूङि**'-त्यादिना। **सिस्मयिषते–** स्मिङ्धातोः सनि 'स्मिपूङ्रञ्ज्वशां सनि' इति इटि, गुणेऽयादेशे द्वित्वेऽभ्यासकार्ये 'सन्यतः' इतीत्वे षत्वे लटि तङि टेरेत्वे शपि पररूपे 'सिस्मयिषते' इति।

(८५९) **गुप्तिज्किद्भ्यः सन्।** स्पष्टम्।

(८६०) **मान्बधेति।** 'गुप्तिज्०' इत्यतः सनिति अनुकृष्यते। मान्बधदान्शान्भ्यो धातुभ्यः

रपर, हलादिशेष, 'अ' = 'इ'–'सन्यतः' षत्व, विकल्प से दीर्घ)–विवरिष + लट् (= आत्मनेपद 'त', शप् = 'अ', टि' को एत्व, पररूप) = विवरिषते। 'वृतो वा' से दीर्घ के अभाव पक्ष में– विवरिषते। परस्मैपद पक्ष में– विवरीषति। विवरिषति। इडागम के अभाव पक्ष में– वृ स ('ऋ' = 'उ'–'उदोष्ठ्यपूर्वस्य' रपर, 'उ' = 'ऊ'–दीर्घ–'हलि च' द्वित्व, अभ्याससंज्ञा, ह्रस्व, हलादिशेष, षत्व)–वुवूर्ष + लट् (= 'त', शप् = 'अ', टि को एत्व, पररूप) = वुवूर्षते। परस्मैपद पक्ष में– वुवूर्षति।

(२) ✓ तॄ + सन् (= स, विकल्प से 'इट्'–'इट्'–'इट् सनि वा', गुण, रपर, द्वित्व, हलादिशेष, इत्व, विकल्प से दीर्घ–'इ' = 'ई'–'वृतो वा')– तितरीष (लट् = तिप् = 'ति', 'शप्' = 'अ', पररूप) = तितरीषति। दीर्घ के अभावपक्ष में–तितरिषति। इडागम के अभाव पक्ष में– तॄ + स ('ॠ' = 'इ'–'ॠत इद्धातोः', रपर, द्वित्व, अभ्याससंज्ञा, हल् का लोप, दीर्घ)–तितीर्ष (लट् = तिप् = 'ति', शप् = 'अ', पररूप) = तितीर्षति।

(८५८) **पद–** स्मिपूङ्रञ्ज्वशाम्, सनि। **अनुवृत्ति–** इट्। **विधिसूत्र।**

मूलार्थ– स्मिङ् आदि धातुओं से परवर्ती 'सन्' को इट् (= इ) का आगम होता है। सिस्मयिषते इत्यादि।

विमर्श– यहाँ 'इडत्त्यर्तिव्ययतीनाम्' (७।२।६६) से 'इट्' की अनुवृत्ति आती है। अतः ''स्मिङ्, पूङ्, ऋ, अञ्जू और अशू धातुओं के सन् को इट् (इ) का आगम होता है।''

उदाहरण– (१) ✓ स्मिङ् + सन् (= स, इट्–'स्मिपूङ्०', 'इ' = 'ए'–गुण, 'ए' = 'अय्', द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'अ' = 'इ' इत्व, षत्व)– सिस्मयिष (लट् = आत्मनेपद–'पूर्ववत्सनः'–'त', शप् = 'अ' एत्व, पररूप) = सिस्मयिषते। (२) ✓ पू + सन् (= स, इट्–'स्मिपूङ्०' गुण, अव् आदेश, द्वित्व, हलादिशेष, इत्व)–पिपविष (लट् = 'त', शप् = अ, एत्व, पररूप पिपविषते। (३) ✓ ऋ + सन् (= स, इट् = 'इ'–'स्मिपूङ्' ऋ = 'अ'–गुण, रपर, 'रि' को द्वित्व, षत्व)–अरिरिष (लट् = तिप् = ति, शप् = 'अ' पररूप) = अरिरिषति। (४) ✓ अञ्ज् + सन् (पूर्ववत् प्रक्रिया) = अञ्जिजिषति। (५) ✓ अश् + सन् = अशिशिषति।

(८५९) **पद–** गुप्तिज्किद्भ्यः, सन्। **विधिसूत्र।**

मूलार्थ– गुप्, तिज् और कित् धातुओं से सन् प्रत्यय होता है।

(८६०) **पद–** मान्बधदान्शान्भ्यः, दीर्घः, च, अभ्यासस्य। **अनुवृत्ति–सन्। विधिसूत्र।**

३।१।६ । सूत्रद्वयोक्तेभ्यः सन् स्यात् मानादीनामभ्यासस्येकारस्य दीर्घश्च। गुपेर्निन्दायाम्। तिजेः क्षमायाम्। कितेर्व्याधिप्रतीकारे, निग्रहे, अपनयने, नाशने संशये च। मानेर्जिज्ञासायाम्। बधेश्चित्तविकारे। दानेरार्जवे। शानेर्निशाने। गुपिप्रभृतयः किद्भिन्ना निन्दाद्यर्थका एवानुदात्तेतो, दानशानौ तु स्वरितेतौ। एष्वर्थेषु एते नित्यसन्नन्ताः। अर्थान्तरे त्वननुबन्धकाश्चुरादयः। अनुबन्धस्य केवलेऽचरितार्थत्वात् सन्नन्तात् पदव्यवस्था।

सन् स्यात्सनि चाभ्यासस्य दीर्घः स्यादित्यर्थः। **अनुबन्धस्येति।** केवले ह्यचरितार्थं लिङ्गं समुदायोपकारकं भवतीति न्यायात् सन्नन्तेभ्यः तत्तदनुबन्धानुसारं पदव्यवस्था आत्मनेपदं परस्मैपदं वेति। **जुगुप्सते–** गुप्धातोर्निन्दायां 'गुप्तिज्किद्भ्यः सन्' इत्यनेन सनि 'हलन्ताच्च' इति कित्त्वाद्गुणाभावे द्वित्वेऽभ्यासकार्ये च 'गुगुप् स' इति जाते 'कुहोश्चुः' इति गस्य जत्वे धातुसंज्ञायां 'पूर्ववत्सनः' इत्यात्मनेपदे लटि तप्रत्यये शपि टेरेत्वे पररूपे च कृते 'जुगुप्सते'

मूलार्थ– मान्, बध, दान् और शान् धातुओं से सन् प्रत्यय होता है और अभ्यास के इकार को दीर्घ होता है।

विमर्श– पूर्वसूत्र (८५९) से 'सन्' पद की अनुवृत्ति आती है। तदनुसार–''मान्, बध, दान् और शान् धातुओं से सन् (= स) प्रत्यय होता है तथा अभ्यास के इकार को दीर्घ आदेश हो जाता है।''

सूत्र (८५९) में पठित ✓ गुप् धातु से निन्दा अर्थ में, ✓ तिज् से क्षमा अर्थ में, ✓ कित् से रोग के दूरीकरण अर्थ में तथा निग्रह (पकड़ना), हटाना, नष्ट करना और संशय अर्थ में सन् प्रत्यय होता है। इसी प्रकार प्रकृत सूत्र में पठित धातु ✓ मान् से जिज्ञासा अर्थ में, ✓ बध से चित्तविकार अर्थ में, ✓ दान् से आर्जव (सरलता) अर्थ में तथा ✓ शान् से तेज करना अर्थ में सन् होता है। ✓ गुप् इत्यादि कित् से भिन्न निन्दाद्यर्थक ही अनुदात्तेत् हैं। दान् और शान् स्वरितेत् हैं। उक्त अर्थों में ही ✓ गुप् आदि धातुओं से सन् प्रत्यय होता है, इच्छा अर्थ में नहीं। तत्तदर्थ-विशेष में अनुबन्ध रहित धातुएँ चुरादिगण-पठित हैं। सन्नन्त से तत्तद् अनुबन्ध के अनुसार ही आत्मनेपद या परस्मैपद की व्यवस्था की जाती है। यह सन् धातु से विहित नहीं है। अतः आर्द्धधातुक संज्ञा न होने से इट् और गुण नहीं होता।

उदाहरण– (१) ✓ गुप् + सन् (= 'स' निन्दा अर्थ में– 'गुप्तिज्किद्भ्यः सन्', द्वित्व, अभ्याससंज्ञा, हलादिशेष, 'ग्' = 'ज्'–चर्त्व, 'हलन्ताच्च' से कित् होने के कारण प्राप्त गुण का 'क्ङिति च' से निषेध)–जुगुप्स + लट् (= आत्मनेपद 'त' शप् = 'अ', 'टि' को एत्व, पररूप) = जुगुप्सते। (२) ✓ तिज् + सन् (= स, द्वित्व, अभ्याससंज्ञा, हलादिशेष, कित्त्व होने से गुणाभाव, 'ज्' = 'क्' कुत्व–'चोः कुः', षत्व, क् + ष् = क्ष्)– तितिक्ष + लट् (= त, शप् = अ, पररूप, एत्व) = तितिक्षते। (३) ✓ कित् + सन् (=स, द्वित्व, अभ्यासकार्य, कुत्व, कित्त्व होने से गुणाभाव)– चिकित्स (लट् = तिप् = 'ति', शप् = 'अ', पररूप) = चिकित्सति। (४) ✓ मान् + सन् (= 'स'– जिज्ञासा अर्थ में– 'मान्बध०' द्वित्व, अभ्याससंज्ञा, हलादिशेष, ह्रस्व, 'अ' = 'इ'–'सन्यतः', दीर्घ–'मान्बधदान्०', अनुस्वार)– मीमांस (+ लट् = 'त', शप् = 'अ', पररूप, एत्व) = मीमांसते। (५) ✓ बध् + सन् (= 'स'–चित्तविकार अर्थ में, द्वित्व, अभ्याससंज्ञा, हलादिशेष, इत्व–'सन्यतः', दीर्घ–'मान्बध०', 'ब्' = 'भ्'–भष्भाव–'एकाचो०', 'ध्' = 'त्'–चर्त्व–'खरि च')–बीभत्स (लट् = 'त', शप् = 'अ',

'धातोरि'त्यविहितत्वात्सनोऽत्र नार्द्धधातुकत्वम्। तेनेड्गुणौ न। जुगुप्सते। तितिक्षते। चिकित्सति। मीमांसते। बीभत्सते। दीदांसति। दीदांसते। शीशांसति। शीशांसते। णिचि तु गोपायति। गोपायते इत्यादि।

इति सन्नन्तप्रकरणम् ।

◆

इति रूपम्। **मीमांसते**– मान्धातोर्जिज्ञासायां 'मान्बधदान्शान्भ्यः' इति सनि, द्वित्वेऽभ्यासत्वे ह्रस्वे हलादिशेषे 'सन्यतः' इतीत्वे 'मान्बधे'ति दीर्घे, लटि तङि शपि टेरेत्वे पररूपे 'मीमांसते' इति। एवं बीभत्सते इत्यादि।

इति सन्नन्तप्रकरणम् ।

◆

पररूप, एत्व) = बीभत्सते। (६) ✓ दान् धातु से लट् में– दीदांसते, दीदांसति। (७) ✓ शान् से— लट् आ० प०–शीशांसते। प० प०–शीशांसति। (८) ✓ गुप् धातु से णिच् प्रत्यय होने पर लट् लकार में– गोपायते। गोपायति।

सन्नन्त-प्रकरण समाप्त ।

◆

अथ यङन्तप्रकरणम्

(८६१) धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३।१।२२। पौनःपुन्ये भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ्। **(८६२) गुणो यङ्लुकोः ७।४।८२।** अभ्यासस्य 'सनाद्यन्ता' इति धातुत्वाल्लडादयः। ङिदन्तत्वादात्मनेपदम्। पुनः पुनरतिशयेन वा भवति बोभूयते। बोभूयाञ्चक्रे। अबोभूयिष्ट। धातोः किम्? आर्द्धधातुकत्वं

सन्प्रक्रियां निरूप्येदानीं यङन्तप्रकरणमारभते–

(८६१) **धातोरेकाच इति। द्योत्य इति।** क्रियासमभिव्याहारे भृशार्थे द्योत्ये इति मूलार्थकथनम्। अन्यथा वाच्यत्वे प्रत्ययवाच्यस्य प्रधानतया सन्नन्ते इच्छया इव तस्य विशेष्यत्वं स्यादिति भावः।

(८६२) **गुणो यङ्लुकोरिति।** 'अत्र लोपोऽभ्यासस्य' इत्यस्मादभ्यासस्येत्यनुवर्तते। तदाह–**अभ्यासस्येति। बोभूयते**— पुनः पुनरतिशयेन वा भवतीत्यस्मिन्विग्रहे भूधातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यनेन यङ्प्रत्ययेऽनुबन्धलोपे 'सन्यङोः' इति द्वित्वेऽभ्यासकार्ये, बु भू य इति जाते 'गुणो यङ्लुकोः' इत्यनेनाभ्यासस्य गुणे 'बोभूय' इत्यस्य

सन्नन्त-प्रकरण के अनन्तर यङन्त धातुरूपों की साधनिका बतायी जा रही है–

(८६१) **पद**– धातोः, एकाचः, हलादेः, क्रियासमभिहारे, यङ्। **विधिसूत्र।**

मूलार्थ—अव्यय से भव आदि अर्थों में त्यप् प्रत्यय होता है। **वा०**—केवल अमा, इह, क्व तथा तसिल् एवं त्रल् प्रत्ययान्त से ही त्यप् प्रत्यय होता है। अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः। **वा०**—नि अव्यय से ध्रुव अर्थ में त्यप् प्रत्यय होता है। नित्यः। **वा०**—'निस्' अव्यय से गत अर्थ में त्यप् प्रत्यय होता है।

विमर्श—''अव्ययों से जात, भव आदि अर्थों में त्यप् प्रत्यय होता है।'' वार्तिककार परिगणन द्वारा त्यप् प्रत्यय हेतु अव्ययों को सीमित कर रहे हैं। यथा —

१. **वा०**—''अमा, इह, क्व, तसिल् तथा त्रल् प्रत्ययान्त अव्ययों से ही त्यप् प्रत्यय होता है।'' **उदाहरण**—अमा + त्यप् (= त्य, विभक्तिकार्य) = अमात्यः (साथ रहने वाला — मन्त्री)। इह भवः (इह + त्यप् = त्य, विभक्तिकार्य) = इहत्यः (यहाँ रहने वाला)। क्व भवः (क्व + त्यप् = 'त्य') = क्वत्यः (कहाँ रहने वाला)। तत आगतः (ततस् + त्यप्) = ततस्त्यः (वहाँ से आया हुआ)। तत्र भवः (तत्र + त्यप्) = तत्रत्यः (वहाँ रहने वाला)।

२. **वा०**—'''नि' अव्यय से ध्रुव (स्थिर) अर्थ में त्यप् प्रत्यय होता है।'' **उदाहरण**—नितरां भवः (नि + त्यप् = त्य, विभक्तिकार्य) = नित्यः (शाश्वत)।

३. **वा०**—गत अर्थ में 'निस्' उपसर्ग से त्यप् प्रत्यय होता है।

(१८३६) **पद**—ह्स्वात्, तादौ, तद्धिते। **अनुवृत्ति**—सः, इण्कोः, नुम्विसर्जनीयशर्व्यवायेऽपि, मूर्द्धन्यः, संहितायाम्। **विधिसूत्र**।

मूलार्थ—ह्रस्व इण् से परवर्ती स् को ष् होता है, तकारादि तद्धित के उत्तरवर्ती रहने पर। निष्ट्यः। **वा०**—अरण्य शब्द से ण प्रत्यय होता है। आरण्याः सुमनसः। **वा०**—दूर शब्द से त्य प्रत्यय होता है। दूरेत्यः। **वा०**—उत्तर शब्द से आहञ् प्रत्यय होता है। औत्तराहः।

विमर्श—प्रसङ्गवश षत्वप्रकरण का सूत्र उद्धृत किया जा रहा है। सूत्र में स्थानी एवं आदेश-वाचक शब्दों का अभाव है। अतः 'इण्कोः' (८।३।५७) सूत्र, 'सहेः साडः सः' (८।३।५६) से 'सः', 'नुम्विसर्जनीयशर्व्यवायेऽपि' (८।३।५८) तथा 'अपदान्तस्य मूर्धन्यः' (८।३।५५) से 'मूर्धन्यः' की अनुवृत्ति आ रही है। 'संहितायाम्' का आधिकारिक प्रभाव विद्यमान है।'' अतः ''ह्रस्व इण् (इ, उ) से उत्तरवर्ती 'स्' के स्थान में तकारादि तद्धित प्रत्यय के परे रहते मूर्धन्य आदेश 'ष्' होता है।''

उदाहरण—निर्गतः वर्णाश्रमेभ्यः (निस् + त्यप् = 'त्य' — वा० 'निसो गते', 'स्' = 'ष्' — षत्व — प्रकृत सूत्र से, 'त्' = 'ट्' — ष्टुत्व, विभक्तिकार्य) = निष्ट्यः (वर्णाश्रम से पृथक्)।

आरण्याः सुमनसः । * दूरादेत्यः *। दूरेत्यः । * उत्तरादाहञ् *। औत्तराहः । (१८३७) **ऐषमोह्यःश्वसोऽन्यतरस्याम्** ४।२।१०५ । एभ्यस्त्यब्वा । पक्षे वक्ष्यमाणौ ट्युट्युलौ । ऐषमस्त्यम्, ऐषमस्तनम् । ह्यस्त्यम्, ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् । पक्षे शौवस्तिकं वक्ष्यते । (१८३८) **वृद्धाच्छः** ४।२।११४ । शालीयः । (१८३९)

(१८३७) **ऐषमोह्य इति** । **एभ्य इति** । ऐषमस्, ह्यस्, श्वस् एतेभ्य इत्यर्थः । **ऐषमस्त्यम्** — 'ऐषमस्' इत्यव्ययं वर्तमाने संवत्सरे वर्तते, तत्र भवं जातं वा **ऐषमस्त्यमिति** ।

(१८३८) **वृद्धाच्छः** । वृद्धसंज्ञकात् छप्रत्ययः स्यादित्यर्थः ।

---

१. **वा०**—'अरण्य' शब्द से शैषिक ण प्रत्यय होता है । **उदाहरण**—अरण्ये भवाः (अरण्य + ण = 'अ', आदिवृद्धि, 'अ' का लोप) — आरण्य (+ टाप् = 'आ', दीर्घ, प्रथमा बहुवचन) = आरण्याः सुमनसः (जंगली फूल) ।

२. **वा०**—दूरात् अव्यय से शैषिक 'एत्य' प्रत्यय होता है । **उदाहरण**—दूरात् आगतः भवः वा (दूरात् + एत्य, टि = 'आत्' का लोप — 'अव्ययानां भमात्रे०', विभक्तिकार्य) = दूरेत्यः (दूर जाने वाला - पथिक) ।

३. **वा०**—उत्तर शब्द से भव आदि अर्थों में आहञ् प्रत्यय होता है । **उदाहरण**—उत्तरस्मात् आगतः (उत्तर + आहञ् = आह, आदिवृद्धि, अन्त्य 'अ' का लोप, विभक्तिकार्य) = औत्तराहः (उत्तर में होने वाला या उत्तर से आया हुआ) ।

(१८३७) **पद**—ऐषमो-ह्यः-श्वसः, अन्यतरस्याम् । **अनुवृत्ति**—त्यप्, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—ऐषमस्, श्वस् और ह्यस् से जात आदि अर्थ में विकल्प से त्यप् प्रत्यय होता है । पक्ष में आगे कहे जाने वाले ट्यु और ट्युल् भी होते हैं । ऐषमस्त्यम्, ऐषमस्तनम् । ह्यस्त्यम्, ह्यस्तनम् । श्वस्त्यम्, श्वस्तनम् । पक्ष में 'शौवस्तिकम्' भी बतलाया जायेगा ।

विमर्श—पूर्वसूत्र (१८३६) से 'त्यप्' की अनुवृत्ति आती है । शेष आधिकारिक अनुवृत्तियाँ यथापूर्व विद्यमान हैं । तदनुसार — "ऐषमस्, ह्यस् तथा श्वस् प्रातिपदिकों से वैकल्पिक त्यप् (= त्य) प्रत्यय होता है ।" त्यप् के अभाव पक्ष में 'सायं-चिरं-प्राह्णे-प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च' (४।३।२३) सूत्र से ट्यु तथा ट्युल् प्रत्यय और तुट् (= त्) का आगम होंगे । तुट् आगम टित् होने से ट्यु (= अन) का आदि अवयव होता है ।

उदाहरण—'ऐषमस्' इत्यव्ययं संवत्सरेऽर्थे वर्तते तत्र भवं जातं वा (ऐषमस् + त्यप् = 'त्य' विकल्प से - 'ऐषमोह्यः०', विभक्तिकार्य) = ऐषमस्त्यम् । 'त्यप्' के अभाव पक्ष में - ऐषमस् + ट्यु या ट्युल् (= 'यु', तुट् = 'त्' का आगम - 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च', 'यु' = 'अन' - आदेश, विभक्तिकार्य) = ऐषमस्तनम् (इस वर्ष होने वाला) । ह्यस् + त्यप् (= 'त्य' —विकल्प से, विभक्तिकार्य) = ह्यस्त्यम् । पक्ष में — ह्यस् + ट्यु (= 'यु', तुट् = 'त्' का आगम, विभक्तिकार्य) = ह्यस्तनम् (विगत दिन होने वाला) । श्वस् = 'त्यप्' (— विकल्प से, विभक्तिकार्य) = श्वस्त्यम् । पक्ष में (पूर्ववत् 'ट्यु' अथवा ट्युल्, तुट् का आगम) = श्वस्तनम् (आने वाले कल होने वाला) । इसके अतिरिक्त श्वस् अव्यय का तीसरा रूप 'शौवस्तिकम्' भी बनता है । **प्रक्रिया** - श्वस् + ठञ् (= 'ठ', तुट् = 'त्' का आगम - 'श्वसस्तुट् च', 'ठ' = 'इक') — श्वस् त् इकम् (वृद्धिनिषेध तथा ऐच् = 'ऐ' का आगम - द्वारादीनां च'; विभक्तिकार्य) = 'शौवस्तिकम्' ।

(१८३८) **पद**—वृद्धात्, छः । **अनुवृत्ति**—शेषे, तद्धिताः । **विधिसूत्र** ।

त्यदादीनि च १।१।७४। वृद्धसंज्ञानि स्युः। तदीयः। * वा नामधेयस्य वृद्धसंज्ञा *। देवदत्तीयः, दैवदत्तः। (१८४०) **भवतष्ठक्छसौ ४।२।११५।** वृद्धाद् भवत एतौ स्तः। भावत्कः। (१८४१) **सिति च १।४।१६।** तद्धिते पूर्वं पदं स्यात्। जश्त्वम्। भवदीयः। वृद्धादित्यनुवृत्तेः शत्रन्तादणेव। भावतः। (१८४२) काश्या-

(१८३९) **त्यदादीनि च।** शेषपूरणेन व्याचष्टे — **वृद्धसंज्ञानीति।**

(१८४०) **भवत इति।** स्पष्टम्। **भावत्क इति।** भवच्छब्दात् 'भवतष्ठक्छसौ' इत्यनेन ठक्प्रत्यये ठस्य 'इसुसुक्तान्तात्कः' इति कादेशे कित्त्वादादिवृद्धौ विभक्तिकार्ये 'भावत्कः' इति।

(१८४१) **सिति च।** सकारः इत् यस्य सः सित्। तस्मिन्परे पूर्वं पदं स्यादित्यर्थः। **भवदीयः** — पूर्वसूत्रेण छस् प्रत्यये 'सिति चे'ति पदत्वात् जश्त्वम् — तकारस्य दकारः, छस्य ईयादेशः 'भवदीयः' इति।

मूलार्थ—वृद्धसंज्ञक से छ प्रत्यय होता है। शालीयः।

विमर्श—अग्रिम सूत्र (१८३९) द्वारा प्रतिपादित वृद्धसंज्ञा के फल को अभिलक्षित कर प्रकृत सूत्र प्रस्तुत किया है। तदनुसार "वृद्धसंज्ञक प्रातिपदिक से शैषिक 'छ' प्रत्यय होता है।"

उदाहरण—शालायां भवः (शाला + छ — 'वृद्धाच्छः', 'आ' का लोप, छ = ईय, विभक्तिकार्य) = शालीयः (शाला में होने वाला)।

(१८३९) **पद**—त्यदादीनि, च। **अनुवृत्ति**—वृद्धम्। **संज्ञासूत्र।**

मूलार्थ—त्यद् आदि की वृद्ध संज्ञा होती है। तदीयः। **वा०**—नामधेय की विकल्प से वृद्ध संज्ञा होती है। देवदत्तीयः, दैवदत्तः।

विमर्श—प्रकृत सूत्र में 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' (१।१।७३) से 'वृद्धम्' पद की अनुवृत्ति आती है। तदनुसार "त्यदादिगणपठित शब्दों की वृद्धसंज्ञा होती है।"

उदाहरण—तस्य अयम् (तद् + 'त्यदादीनि च' से वृद्धसंज्ञा होने पर 'छ' प्रत्यय — 'वृद्धाच्छः', छ = ईय, विभक्तिकार्य) = तदीयः (उसका)।

१. **वा०**—नामधेय अर्थात् व्यक्ति के नाम की विकल्प से वृद्ध संज्ञा होती है। **उदाहरण**—देवदत्त + 'विकल्प' से वृद्धसंज्ञा होने पर 'छ' प्रत्यय (छ = ईय, 'अ' का लोप, विभक्तिकार्य) = देवदत्तीयः। वृद्धसंज्ञा न होने पर 'छ' प्रत्यय भी नहीं होता। अतः पक्ष में - अण्, वृद्धि) = दैवदत्तः (देवदत्त सम्बन्धी)।

(१८४०) **पद**—भवतः, ठक्छसौ। **अनुवृत्ति**—वृद्धात्, शेषे, तद्धिताः। **विधिसूत्र।**

मूलार्थ—वृद्धसंज्ञक 'भवत्' शब्द से ठक् और छस् प्रत्यय होते हैं। भावत्कः।

विमर्श—पूर्वसूत्र (१८३८) से 'वृद्धात्' पद की अनुवृत्ति प्रमुखतया अपेक्षित है। तदनुसार "वृद्धसंज्ञक 'भवत्' शब्द से शैषिक ठक् (= ठ) और छस् (= छ) प्रत्यय होते हैं।"

उदाहरण—भवतः अयम् (भवत् + 'ठक्' — प्रकृत सूत्र से, ठ = इक का बाधकर — ठक् = 'क' — 'इसुसुक्तान्तात्कः', आदिवृद्धि तथा विभक्तिकार्य) = भावत्कः (आपका)।

(१८४१) **पद**—सिति, च। **अनुवृत्ति**—पदम्। **संज्ञासूत्र।**

मूलार्थ—सित् प्रत्यय के परे पूर्व की पदसंज्ञा होती है। भवदीयः। 'वृद्धात्' की अनुवृत्ति होने से शतृप्रत्ययान्त से अण् होता है। भावतः।

विमर्श—'सुप्तिङन्तं पदम्' (१।४।१४) से 'पदम्' की अनुवृत्ति आ रही है। अतः "'स्' इत्संज्ञक प्रत्ययों के परवर्ती रहने पर पूर्व की पदसंज्ञा होती है।"

दिभ्यष्ठञ्ञिठौ ४।२।११६ । इकार उच्चारणार्थः । काशिकी, काशिका । वैदिकी, वैदिका । * आपदादिपूर्वपदात्कालान्तात् * । आपदादिराकृतिगणः । आपत्कालिकी, आपत्कालिका । **(१८४३) धन्वयोपधाद् वुञ् ४।२।१२१** । धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद् वुञ् स्यात् । ऐरावतं धन्व ऐरावतकः । साङ्काश्य-

---

(१८४२) **काश्यादिभ्य इति** । ठञ् ञिठ् च प्रत्ययः स्यादित्यर्थः । **काशिकी, काशिका** — काश्यां भवा जाता वेत्यर्थे काशीशब्दात् ठञ्प्रत्यये ठस्य इकादेशे ईकारलोपे ठञन्तात् ङीपि अकारलोपे विभक्तिकार्ये काशिकी इति । ञिठ्प्रत्यये ठस्येकादेशे ईकारलोपे टापि दीर्घे च 'काशिका' इति ।

(१८४३) **धन्वयोपधाद् वुञ्** ।**ऐरावतमिति** ।ऐरावताख्यं धन्वेत्यर्थः ।धन्वा मरुप्रदेशः । वुञ्, अकादेशः, ऐरावतकः इति ।

उदाहरण—भवत् + छस् (= 'छ' — पूर्वसूत्र (१८४०) से, छ = ईय, छस् प्रत्यय के सकारेत्संज्ञक होने के कारण 'सिति च' से भसंज्ञा का बाधकर पद संज्ञा, 'त्' = 'द्' — जश्त्व — 'झलां जशोऽन्ते', विभक्तिकार्य) = भवदीयः (आपका) । त्यदादिगण में ✓भा + डवतु प्रत्ययान्त 'भवत्' शब्द का पाठ होने से उसी की वृद्धसंज्ञा होती है । ✓भू + शतृप्रत्ययान्त 'भवत्' की वृद्धसंज्ञा न होने से औत्सर्गिक अण् (भवत् + अण्, आदिवृद्धि) = 'भावतः' रूप बनता है ।

(१८४२) **पद**—काश्यादिभ्यः, ठञ्ञिठौ । **अनुवृत्ति**—वृद्धात्, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—काश्यादिगणपठित शब्दों से ठञ् और ञिठ् प्रत्यय होते हैं । काशिकी, काशिका । वैदिकी, वैदिका ।

विमर्श—''काशी आदि वृद्धसंज्ञक शब्दों से शैषिक 'ठञ्' और 'ञिठ्' प्रत्यय होते हैं ।'' इन दोनों प्रत्ययों में 'ठ' ही शेष रहता है । स्त्रीत्वविवक्षा में 'ठञ्' होने पर ङीप् तथा 'ञिठ्' होने पर टाप् होगा ।

उदाहरण—काश्यां भवा, काश्याः इयमिति वा (काशी + ठञ् = ठ, ठ = इक, 'ई' का लोप, ङीप् = 'ई', विभक्तिकार्य) = काशिकी । ञिठ् होने पर — काशी + ठ (ठ = इक, ईकारलोप, टाप् = आ, दीर्घ, विभक्तिकार्य) = काशिका (काशी में होने वाली) । वेदौ भवा (वेदि + ठञ् = ठ = इक, इकारलोप, ङीप्, विभक्तिकार्य) = वैदिकी । ञिठ् होने पर (टाप्) = वैदिका (वेदि में होने वाली) ।

१. **वा०**—आपदादि पूर्वपद कालान्त शब्दों से ठञ् और ञिठ् प्रत्यय होते हैं । **उदाहरण**—आपत्काल + ठञ् (= ठ, प्रक्रिया उक्तवत् ङीप्) = आपत्कालिकी । ञिठ् होने पर टाप् = आपत्कालिका (आपत्काल में होना) ।

(१८४३) **पद**—धन्वयोपधात्, वुञ् । **अनुवृत्ति**—वृद्धात्, देशे, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—धन्वविशेषवाची और यकारोपधक देशवाची वृद्धसंज्ञक शब्द से वुञ् प्रत्यय होता है । ऐरावतकः । 'सांकाश्य' तथा 'काम्पिल्य' शब्द 'वुञ्छण्०' सूत्र से ण्यप्रत्ययान्त हैं । उनसे वुञ् होने से 'सांकाश्यकः' तथा 'काम्पिल्यकः' रूप बनते हैं ।

विमर्श—प्रकृत सूत्र में 'वृद्धात्प्राचाम्' (४।२।१२०) से 'वृद्धात्' तथा 'ओर्देशे' (४।२।११९) से 'देशे' पद की अनुवृत्ति आ रही है । अन्य आधिकारिक पदों की अनुवृत्ति यथापूर्व विद्यमान है । तदनुसार — ''धन्ववाची और यकारोपधक देशवाचक वृद्धसंज्ञक शब्दों से शैषिक वुञ् प्रत्यय होता है ।'' यहाँ मरुदेशवाची धन्व शब्द का ग्रहण होता है ।

काम्पिल्यशब्दौ वुञ्छणादिसूत्रेण ण्यान्तौ। साङ्काश्यकः। काम्पिल्यकः। **(१८४४) नगरात्कुत्सनप्रावीण्ययोः ४।२।१२८।** कुत्सने प्रावीण्ये च नगरशब्दाद् वुञ् स्यात्। नागरकश्चौरः शिल्पी वा। 'कुत्सन' इति किम्? नागराः ब्राह्मणाः। **(१८४५) अरण्यान्मनुष्ये ४।२।१२९।** वुञ् स्यात्। औपसंख्यानि कणस्यापवादः। * पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम् *। आरण्यकः पन्थाः, अध्यायः, न्यायः, विहारः, मनुष्यः हस्ती वा। **(१८४६) गर्तोत्तरपदाच्छः ४।२।१३७।** देश इत्येव।

(१८४४) **नगरात्कुत्सन इति।** नागरा इति। कन्थादिषु महिष्मतीसाहचर्येण संज्ञाभूतस्यैव नगरशब्दस्य ग्रहणम्।

(१८४५) **अरण्यान्मनुष्ये।** आरण्यक इति। अरण्ये भव इति विग्रहे अरण्यशब्दात् 'अरण्यान्मनुष्ये' इति वुञ्प्रत्यये अकादेशे आदिवृद्धौ विभक्तिकार्ये 'आरण्यकः' इति।

(१८४६) **गर्तोत्तरपदाच्छः।** देशे इति। शेषपूरणम्, देशवाचिन इति यावत्।

उदाहरण—ऐरावताख्ये मरुप्रदेशे भवः (ऐरावत + वुञ् = 'वु', वु = अक आदेश, 'अ' का लोप, विभक्तिकार्य) = ऐरावतकः (ऐरावत नामक मरु प्रदेश में होने वाला)। **यकारोपध का उदाहरण**—सांकाश्ये जातः (सांकाश्य + वुञ् = 'वु' = अक, 'अ' का लोप, विभक्तिकार्य) = सांकाश्यकः। ('सांकाश्य' में हुआ)। काम्पिल्ये भवः (काम्पिल्य + वुञ्, वु = अक, 'अ' का लोप आदि) = काम्पिल्यकः (काम्पिल्य में हुआ)।

(१८४४) **पद**—नगरात्कुत्सनप्रावीण्ययोः। **अनुवृत्ति**—वुञ्, शेषे, तद्धिताः। **विधिसूत्र।**

मूलार्थ—कुत्सन और प्रावीण्य अर्थ गम्य रहते नगर शब्द से वुञ् प्रत्यय होता है। **नागरकः** चौरः शिल्पी वा। 'कुत्सनः' क्यों कहा? 'नागराः ब्राह्मणाः'।

विमर्श—पूर्वसूत्र (१८४३) से 'वुञ्' की अनुवृत्ति आ रही है। शेष पदों की अनुवृत्ति पूर्ववत् विद्यमान है। अतः "नगर शब्द से 'निन्दा' और 'निपुणता' अर्थ अभिधेय होने पर शैषिक वुञ् प्रत्यय होता है।"

उदाहरण—नगरे भवः जातः वा (नगर + वुञ् = वु, वु = अक आदेश, आदिवृद्धि, 'अ' का लोप) = नागरकः (नगर में रहने वाला चोर या शिल्पी)।

प्रत्युदाहरण—सूत्र में 'कुत्सन' पद का निवेश होने से 'नागराः ब्राह्मणाः' (नगर में रहने वाले ब्राह्मण) में औत्सर्गिक अण् हुआ। क्योंकि यहाँ निन्दा अर्थ नहीं है।

(१८४५) **पद**—अरण्यात्, मनुष्ये। **अनुवृत्ति**—वुञ्, शेषे, तद्धिताः। **विधिसूत्र।**

मूलार्थ—मनुष्य वाच्य रहते 'अरण्य' शब्द से 'वुञ्' होता है। प्राप्त 'ण' का यह अपवाद है। **वा०**—पथिन्, अध्याय, न्याय, विहार, मनुष्य तथा हस्ती के अभिधेय होने पर यह वुञ् कहा जाय। आरण्यकः पन्थाः, अध्यायः, न्यायः, विहारः, मनुष्यः हस्ती वा।

विमर्श—यहाँ भी पूर्वसूत्र (१८४३) से 'वुञ्' की अनुवृत्ति प्रमुखतया अपेक्षित है। तदनुसार "अरण्य शब्द से मनुष्य अभिधेय होने पर शैषिक वुञ् प्रत्यय होता है।" वार्तिककार के अनुसार — "पथिन्, अध्याय, न्याय, विहार तथा हस्ती के अभिधेय होने पर भी वुञ् होता है।"

उदाहरण—अरण्ये भवः मनुष्यः, पन्थाः, अध्यायः, न्यायो वा (अरण्य + वुञ् = वु, वु = अक, आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = आरण्यकः (जंगली — मनुष्य, मार्ग, ग्रन्थ का अध्याय, न्याय, विहार अथवा हाथी)।

(१८४६) **पद**—गर्तोत्तरपदात्, छः। **अनुवृत्ति**—देशे, शेषे, तद्धिताः। **विधिसूत्र।**

वृकगर्तीयम्। **(१८४७) गहादिभ्यश्च ४।२।१३८।** गहीयः। **(१८४८) युष्मदस्मदोरन्यतरस्यां खञ् च ४।३।१।** चाच्छः। पक्षेऽण्। युवयोर्युष्माकं वाऽयं युष्मदीयः। अस्मदीयः। **(१८४९) तस्मिन्नणि च युष्माकास्माकौ ४।३।२।** युष्मदस्मादोरेतावादेशौ स्तः खञि अणि च। यौष्माकीणः, आस्माकीनः। यौष्माकः,

---

(१८४७) **गहादिभ्यश्च**। छः स्यादित्यर्थः।

(१८४८) **युष्मदस्मदोरन्यतरस्यामिति**। युष्मच्छब्दादस्मच्छब्दाच्च जाताद्यर्थेषु खञ् स्यादित्यर्थः।

(१८४९) **तस्मिन्नणि चेति**। खञ्प्रत्ययेऽण्प्रत्यये च विशेषमाह — **तस्मिन्नित्यादि**। तच्छब्देनात्र पूर्वसूत्रनिर्दिष्टः खञ् परामृश्यते। अत आह — **खञि अणि चेति**। **यौष्माकीणः** — युवयोः युष्माकं वाऽयमिति विग्रहे युष्मद्शब्दात् 'युष्मदस्मदोरन्यतरस्यां खञ् चे'त्यनेन खञ्-

---

मूलार्थ—गर्तोत्तरपद से देश अर्थ गम्य रहते छ प्रत्यय होता है।

विमर्श—पूर्ववत् उल्लिखित पदों की अनुवृत्तियाँ अनुसरण कर रही हैं। अतः "गर्त शब्द उत्तरपदपरक देशवाची शब्दों से शैषिक छ प्रत्यय होता है।"

उदाहरण—वृकगर्ते जातः (वृकगर्त + छ, छ = ईय, अकारलोप) = वृकगर्तीयम् (वृकगर्त देश में होने वाला)।

(१८४७) **पद**—गहादिभ्यः, च। **अनुवृत्ति**—छः, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—गहादिगणपठित शब्दों से छ प्रत्यय होता है। गहीयः।

विमर्श—पूर्वसूत्र (१८४६) से 'छः' की अनुवृत्ति आ रही है। शेष आधिकारिक पदों की अनुवृत्ति पूर्ववत् विद्यमान है। अतः "गहादिगणपठित शब्दों से शैषिक 'छ' प्रत्यय होता है।"

उदाहरण—गहे जातः (गह + छ, छ = ईय, 'अ' का लोप, विभक्तिकार्य) = गहीयः (गुफा में रहने वाला)।

(१८४८) **पद**—युष्मदस्मदोः, अन्यतरस्यां, खञ् च। **अनुवृत्ति**—छः, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—युष्मद् और अस्मद् शब्दों से शेष अर्थों में 'खञ्' प्रत्यय होता है और 'छ' प्रत्यय भी होता है। पक्ष में - अण्। युष्मदीयः। अस्मदीयः।

विमर्श—सूत्रस्थ 'च' से पूर्वसूत्र (१८४६) से अनुवर्तमान 'छ' प्रत्यय का लाभ होता है; किन्तु प्रमुख प्रत्यय 'खञ्' और 'छ' दोनों विकल्प से होते हैं। अतः पक्ष में 'प्राग्दीव्यतोऽण्' से 'अण्' भी होता है। तदनुसार — "युष्मद् और अस्मद् शब्दों से 'खञ्' और 'छ' विकल्प से होते हैं; पक्ष में 'अण्' भी होता है"।

उदाहरण—युवयोः युष्माकं वा (युष्मद् + छ — विकल्प से, छ = ईय, विभक्तिकार्य) = युष्मदीयः (तुम दो का अथवा तुम सबका)। आवयोः अस्माकं वा (अस्मद् + 'छ' विकल्प से, छ = ईय) = अस्मदीयः (हम दो या हम सब का)। यहाँ सुप् का लोप होने से 'युव' और 'आव' आदेश नहीं होते। खञ् और अण् प्रत्यय के उदाहरण आगे दिये जा रहे हैं —

(१८४९) **पद**—तस्मिन्, अणि च, युष्माकास्माकौ। **अनुवृत्ति**—युष्मदस्मदोः। **विधिसूत्र**।

मूलार्थ—'खञ्' और 'अण्' के परे रहते युष्मद् और अस्मद् शब्द को क्रमशः युष्माक और अस्माक आदेश होते हैं। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः।

आस्माकः । **(१८५०) तवकममकावेकवचने ४।३।३** । एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च । तावकीनः, तावकः । मामकीनः, मामकः । छे तु – **(१८५१) प्रत्ययोत्तरपदयोश्च ७।२।९८** । मपर्यन्तयोरेकार्थवाचिनोस्त्वमौ

प्रत्यये खस्य ईनादेशे भत्वे 'तस्मिन्नणि च युष्माकास्माकौ' इत्यनेन 'युष्माक' आदेशे 'यस्येति चे'त्यकारलोपे आद्यचो वृद्धौ नस्य णत्वे प्रातिपदिकत्वे सौ सस्य रुत्वे विसर्गे च कृते 'यौष्माकीणः' इति ।

(१८५०) **तवकममकाविति** । 'एकवचने' इति युष्मदस्मदोः प्रकृत्योर्विशेषणम्, एकवचने = एकस्योक्तौ व्याप्रियमाणयोर्युष्मदस्मदोरित्यर्थः । अत आह – **एकार्थवाचिनोरिति** । **तावकीनः** — तवायमिति विग्रहे युष्मद्शब्दात् 'युष्मदस्मदोरन्यतरस्यां खञ् च' इति विकल्पेन खञ्प्रत्यये खस्य ईनादेशे 'तवकममकावेकवचने' इत्यनेन तवकादेशे 'तवक ईन' इति जाते भत्वे अकारलोपे आद्यचो वृद्धौ संयोगे विभक्तिकार्ये 'तावकीनः' इति । पक्षे अणि प्रत्यये 'तावकः' इति ।

विमर्श—पूर्वसूत्र (१८४८) से 'युष्मदस्मदोः' की अनुवृत्ति आ रही है । सूत्रस्थ पद 'तस्मिन्' का अभिप्राय पूर्वसूत्र से विहित खञ् से है । अनेकाल् होने से आदेश सम्पूर्ण स्थानी के स्थान पर होंगे । यथासंख्य परिभाषा के अनुसार ये आदेश यथाक्रम से होते हैं । इस प्रकार "खञ् और अण् प्रत्यय के परवर्ती रहने पर 'युष्मद्' के स्थान पर युष्माक और अस्मद् के स्थान पर 'अस्माक' आदेश होते हैं ।"

उदाहरण—युष्मद् + खञ् (= ख, ख = ईन, 'युष्मद्' = 'युष्माक' — प्रकृत सूत्र से, आदिवृद्धि, 'अ' का लोप, न् = ण् – 'णत्व', विभक्तिकार्य) = यौष्माकीणः । अस्मद् + 'खञ्' (= 'ख' — 'युष्मदस्मदोः०', ख = 'ईन', 'अस्मद्' = 'अस्माक' आदेश, आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = आस्माकीनः । अण् प्रत्यय होने पर — युष्मद् + अण् (= 'अ', युष्माक आदेश, 'अ' का लोप, आदिवृद्धि, विभक्तिकार्य) = यौष्माकः । इसी प्रकार अस्मद् + अण् = आस्माकः ।

(१८५०) **पद**—तवक-ममकौ, एकवचने । **अनुवृत्ति**—तस्मिन्नणि, युष्मदस्मदोः । **विधिसूत्र** ।

मूलार्थ—एकार्थवाची युष्मद् और अस्मद् को खञ् और अण् परे रहते क्रमशः 'तवक' और 'ममक' आदेश होते हैं । तावकीनः, तावकः । मामकीनः, मामकः ।

विमर्श—पूर्वसूत्र (१८४८) से 'युष्मदस्मदोः' की तथा १८४९ से 'तस्मिन्नणि' की अनुवृत्ति आती है । तदनुसार "खञ् तथा अण् प्रत्ययों के परवर्ती रहने पर एकवचन में 'युष्मद्' और 'अस्मद्' शब्दों के स्थान में क्रमशः 'तवक' और 'ममक' आदेश होते हैं ।"

उदाहरण—युष्मद् + खञ् (= 'ख' — 'युष्मदस्मदोरन्यतरस्यां खञ् च', ख = 'ईन' आदेश, युष्मद् = 'तवक' आदेश — 'तवकममकावेकवचने', आदिवृद्धि, अन्त्य 'अ' का लोप, विभक्तिकार्य) = तावकीनः । **पक्ष में अण्**—युष्मद् + अण् (= 'अ', 'तवक' आदेश, 'अ' का लोप, आदिवृद्धि) = तावकः (तेरा) । मम अयम् (अस्मद् + खञ्, ख = ईन, अस्मद् = 'ममक' आदेश, आदिवृद्धि, अकारलोप, विभक्तिकार्य) = मामकीनः । पक्ष में — अस्मद् + अण् (अस्मद् = ममक, आदिवृद्धि, अन्त्यलोप) = मामकः (मेरा) ।

(१८५१) **पद**—प्रत्ययोत्तरपदयोः च । **अनुवृत्ति**—त्वमावेकवचने, मपर्यन्तस्य, युष्मदस्मदोः, विभक्तौ, अङ्गस्य । **विधिसूत्र** ।

स्तः प्रत्यये उत्तरपदे च। त्वदीयः। मदीयः। त्वत्पुत्रः। (१८५२) मध्यान्मः ४।३।८। मध्यमः। (१८५३) अ साम्प्रतिके ४।३।९। मध्यशब्दादप्रत्ययः साम्प्रतिकेऽर्थे। उत्कर्षापकर्षहीनः 'मध्यः' वैयाकरणः। मध्यं दारु नातिह्रस्वं

(१८५१) **प्रत्ययोत्तरपदयोश्च**।'त्वमावेकवचने'इत्यनुवर्तते,'युष्मदस्मदोरनादेशे'इत्यतो 'युष्मदस्मदोरि'त्यनुर्वतते। 'मपर्यन्तस्ये'त्यधिकृतम्। अत आह – **मपर्यन्तयोरिति**।

(१८५२) **मध्यान्मः**। स्पष्टम्।

(१८५३) **अ साम्प्रतिके**।'अ' इति लुप्तप्रथमाकं पदम्। मध्यादित्यनुवर्तते। सम्प्रतीत्यव्ययम् उत्कर्षापकर्षहीनत्वात्मकसाम्येऽर्थे वर्तते। स्वार्थे ठञि साम्प्रतिकमिति, तस्मिन् साम्प्रतिके = साम्ये गम्यमाने मध्यशब्दात् 'अ'प्रत्ययः स्यादित्यर्थः।

मूलार्थ—प्रत्यय अथवा उत्तरपद के परे रहते एकार्थवाची युष्मद् और अस्मद् के मपर्यन्त भाग को क्रमशः 'त्व' और 'म' आदेश होते हैं। त्वदीयः। मदीयः। त्वत्पुत्रः।

विमर्श—सप्तमाध्यायपठित इस प्रासङ्गिक सूत्र में 'युष्मदस्मदोरनादेशे' (७।२।८६) से 'युष्मदस्मदोः' की अनुवृत्ति आ रही है। 'त्वमावेकचने' (७।२।९४) से आदेशवाची पदों का लाभ होता है। 'मपर्यन्तस्य' (७।२।९१), 'विभक्तौ' (७।२।८४) तथा 'अङ्गस्य' की आधिकारिक अनुवृत्ति विद्यमान है। तदनुसार "प्रत्यय तथा उत्तरपद के परवर्ती रहते भी एकवचन में वर्तमान 'युष्मद्' और 'अस्मद्' अङ्ग के मपर्यन्त भाग को क्रमशः 'त्व' और 'म' आदेश होते हैं।"

उदाहरण—तव अयम् (युष्मद् + छ, छ = ईय, युष्म = 'त्व' आदेश — 'प्रत्ययोत्तरपदयोश्च') — त्व + अद् + ईय (अ + अ = 'अ' पररूप — 'अतो गुणे', विभक्तिकार्य) = त्वदीयः (तेरा)। मम अयम् (अस्मद् + छ, छ = ईय, अस्म = 'म', पररूप आदि) = मदीयः (मेरा)। परवर्ती विभक्ति के न होने से 'शेषे लोपः' से 'द्' का लोप नहीं होता। तव पुत्रः (युष्मद् + पुत्रः, ष० त० समास, युष्म = 'त्व' आदेश, द् = त् — चर्त्व) = त्वत्पुत्रः (तेरा पुत्र)।

(१८५२) **पद**—मध्यात्, मः। **अनुवृत्ति**—शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—मध्य शब्द से म प्रत्यय होता है। मध्यमः।

विमर्श—"मध्य शब्द से शैषिक म प्रत्यय होता है"।

उदाहरण—मध्ये भवः (मध्य + म, विभक्तिकार्य) = मध्यमः (बीच का)।

(१८५३) **पद**—अ, साम्प्रतिके। **अनुवृत्ति**—मध्यात्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—साम्प्रतिक = साम्य अर्थ में मध्य शब्द से 'अ' प्रत्यय होता है। मध्यः वैयाकरणः। मध्यं दारु।

विमर्श—पूर्वसूत्र (१८५२) से 'मध्यात्' पद की अनुवृत्ति आ रही है। विधेयवाची 'अ' पद लुप्त प्रथमाविभक्त्यन्त है। तदनुसार "मध्य शब्द से साम्प्रतिक (उचित) अर्थ गम्यमान होने पर शैषिक 'अ' प्रत्यय होता है।"

उदाहरण—मध्ये भवः (मध्य + 'अ', 'अ' का लोप, विभक्तिकार्य) = मध्यः वैयाकरणः (मध्यम कोटि का वैयाकरण)। मध्ये भवम् (मध्य + अ, नपुंसकलिङ्ग एकवचन में विभक्तिकार्य) = मध्यं दारु (मझोली लकड़ी)।

विशेष—अव्यय - सम्प्रति + ठञ् (— स्वार्थ में, ठ = इक, इकारलोप, आदिवृद्धि) = साम्प्रतिकः (उत्कर्ष और अपकर्ष से रहित उचित साम्य)।

नातिदीर्घमित्यर्थः। (१८५४) **द्वीपादनुसमुद्रं यञ्** ४।३।१०। समुद्रसमीपे यो द्वीपस्तद्विषयाद् द्वीपशब्दाद्यञ् स्यात्। द्वैप्यम्, द्वैप्या। (१८५५) **कालाट्ठञ्** ४।३।११। मासिकम्। सांवत्सरिकम्। * अव्ययानां भमात्रे टिलोपः *। सायंप्रतिकः। पौनःपुनिकः। कथं तर्हि 'शार्वरस्य तमसो निषिद्धये' इति कालिदासः; 'अनुदितौषसरागा' इति भारविः; 'समानकालीनं प्राक्कालीनमि'ति च। 'अपभ्रंशा एवैते' इति

(१८५४) **द्वीपादनु**। अनुसमुद्रमिति सामीप्येऽव्ययीभावः। विद्यमानादित्यध्याहार्यम्। अत आह - **समुद्रसमीप इति**।

(१८५५) **कालाट्ठञ्**। 'न केवलं कालशब्दस्यैव ग्रहणम् किन्तु कालशब्दस्य कालविशेषवाचकानां च ग्रहणम्' इति भाष्ये स्पष्टम्। कालवाचिभ्यष्ठञ् स्यादित्यर्थः।

(१८५४) **पद**—द्वीपात्, अनुसमुद्रम्, यञ्। **अनुवृत्ति**—शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—समुद्र की समीपस्थ द्वीप विषयक द्वीप शब्द से यञ् प्रत्यय होता है। द्वैप्यम्, द्वैप्या।

विमर्श—'अनुसमुद्रम्' में समीपार्थक अव्ययीभाव समास है। उल्लिखित आधिकारिक अनुवृत्तियों का प्रभाव विद्यमान है। अतः "समुद्र के समीपस्थ विषयीभूत द्वीप शब्द से यञ् प्रत्यय होता है।"

उदाहरण—द्वीपे भवम् (द्वीप + यञ् = य, आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = द्वैप्यं मधु (द्वीप में होने वाला मधु)। स्त्रीलिङ्ग में — द्वीप + यञ् (आदिवृद्धि, 'अ' का लोप, टाप् = 'आ', दीर्घ, विभक्तिकार्य) = द्वैप्या (द्वीप में रहने वाली महिला)।

(१८५५) **पद**—कालात्, ठञ्। **अनुवृत्ति**—शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—कालवाची शब्दों से ठञ् प्रत्यय होता है। मासिकम्। सांवत्सरिकम्।

वा०—"भसंज्ञक अव्यय की 'टि' का लोप होता है।" सायंप्रतिकः। पौनःपुनिकः। 'शार्वरस्य तमसो निषिद्धये' यह कालिदासप्रयोग तथा 'अनुदितौषसरागाः' इस भारविप्रयोग की समीचीनता कैसे मानी जाय? एवं 'समानकालीनम्' तथा 'प्राक्कालीनम्' इत्यादि प्रयोग कैसे ठीक समझे जायें? प्रामाणिकों ने इन्हें **अपभ्रंश** माना है। 'तत्र जातः' सूत्रपर्यन्त 'काल' का अधिकार है।

विमर्श—प्रकृत सूत्रस्थ 'काल' शब्द समय का बोध कराने वाले शब्दों का ग्राहक है, स्वरूपपरक नहीं है।[1] तदनुसार — "कालवाचक शब्दों से जात आदि अर्थों में शैषिक 'ठञ्' प्रत्यय होता है।"

उदाहरण—मासे भवम् (मास + ठञ्, ठ = इक, 'अ' का लोप, विभक्तिकार्य) = मासिकम् (महीने में होने वाला)। संवत्सरे भवम् (संवत्सर + ठञ् = ठ, ठ = इक, आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = सांवत्सरिकम् (वर्ष में होने वाला)।

१. **वा०**—भसंज्ञक अव्ययों की 'टि' का लोप होता है। **उदाहरण**—सायम्प्रातर्भवः (सायम्प्रातर् + ठञ् = ठ, ठ = इक, टि = 'अर्' का लोप — 'अव्ययानां भमात्रे टिलोपः', विभक्तिकार्य) = सायम्प्रतिकः (प्रातः और सायं होने वाला)। पुनर्पुनर्भवः (पुनः पुनर् + ठञ्, ठ = इक, आदिवृद्धि, 'टि' का लोप, विभक्तिकार्य) = पौनःपुनिकः (बार-बार होने वाला)।

कालवाची शब्दों से अण् आदि प्रत्ययों का बाधकर ठञ्-विधायक प्रकृत सूत्र के होते हुए कालिदास महाकवि द्वारा प्रयुक्त अण् प्रत्ययान्त 'शार्वरस्य' एवं भारवि द्वारा प्रयुक्त 'औषसः' तथा

---

[1] "कालग्रहणे यथाकथञ्चिदपि कालबोधकानां ग्रहणम्।" (शब्देन्दुशेखरे नागेशः — ४।३।११)

प्रामाणिकाः। 'तत्र जात' इति यावत्कालिकाधिकारः। **(१८५६) श्राद्धे शरदः ४।३।१२।** ठञ् स्यात्। ऋत्वणोऽपवादः। 'शरदि भवं' शारदिकं श्राद्धम्। **(१८५७) विभाषा रोगातपयोः ४।३।१३** ।शारदिकः शारदो वा रोगः आतपो वा। **(१८५८) निशाप्रदोषाभ्यां च ४।३।१४** । ठञ् वा। नैशिकम्, नैशम्। प्रादोषि-

---

(१८५६) **श्राद्धे शरदः** । शरद्शब्दात् श्राद्धेऽर्थे ठञ् स्यादित्यर्थः।

(१८५७) **विभाषेति** ।ठञिति शरद इति चानुवर्तते।रोगे आतपे च वाच्ये शरद्शब्दात् वा ठञ् स्यादित्यर्थः।

(१८५८) **निशाप्रदोषाभ्यां च** । 'कालाट्ठञि'ति नित्ये प्राप्ते विभाषार्थमिदं सूत्रम्। पक्षेऽण्।

ख प्रत्ययान्त 'समानकालीनम्', 'प्राक्कालीनम्' आदि प्रयोगों की साधुता कैसे समझी जायें ? प्रामाणिक वैयाकरणों ने इन प्रयोगों को अपभ्रंश ही माना है।

(१८५६) **पद**—श्राद्धे, शरदः। **अनुवृत्ति**—कालाट्ठञ्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—श्राद्ध अर्थ वाच्य रहते शरद् शब्द से ठञ् प्रत्यय होता है। यह ऋत्वण् का अपवाद है। शारदिकं श्राद्धम्।

विमर्श—पूर्वसूत्र 'कालाट्ठञ्' (१८५५) की अनुवृत्ति प्रमुखतया अपेक्षित है। अतः "कालार्थक शब्दों के प्रसङ्ग में श्राद्ध अभिधेय होने पर शरद् शब्द से शैषिक ठञ् प्रत्यय होता है।" शरद् शब्द के ऋतुवाचक होने से 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' (४।३।१६) सूत्र से अण् प्राप्त है, उसका यह अपवाद है।

उदाहरण—शरदि भवम् (शरद् + ठक् = ठ, ठ = इक, आदिवृद्धि, विभक्तिकार्य) = शारदिकं श्राद्धम् (शरद् ऋतु में होने वाला श्राद्ध)।

(१८५७) **पद**—विभाषा, रोगातपयोः। **अनुवृत्ति**—शरदः, कालाट्ठञ्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—रोग और आतप वाच्य रहते शरद् शब्द से वैकल्पिक ठञ् प्रत्यय होता है। शारदिकः शारदो वा रोग आतपो वा।

विमर्श—पूर्वसूत्र (१८५६) से 'शरदः' तथा 'कालाट्ठञ्' (१८५५) की अनुवृत्ति आ रही है। तदनुसार "रोग और आतप अभिधेय होने पर कालवाचक शरद् शब्द से शैषिक ठञ् प्रत्यय विकल्प से होता है।" पक्ष में अण्।

उदाहरण - शरद् + ठञ् (= 'ठ' विकल्प से, ठ = इक, आदिवृद्धि, विभक्तिकार्य) = शारदिकः। पक्ष में — शरद् + अण् (= 'अ' – 'सन्धिवेला०', आदिवृद्धि) = शारदः रोगः आतपो वा (शरद् ऋतु में होने वाला रोग या धूप)।

(१८५८) **पद**—निशाप्रदोषाभ्याम्, च। **अनुवृत्ति**—विभाषा, कालाट्ठञ्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—निशा और प्रदोष शब्द से भी वैकल्पिक ठञ् प्रत्यय होता है। नैशिकम्, नैशम्। प्रादोषिकम्, प्रादोषम्।

विमर्श—पूर्वसूत्र (१८५७) से 'विभाषा' की अनुवृत्ति अपेक्षित है। अन्य उल्लिखित पदों की अनुवृत्ति का प्रभाव विद्यमान है। तदनुसार "कालविशेषवाचक निशा तथा प्रदोष शब्दों से भी विकल्प से ठञ् प्रत्यय होता है।" पक्ष में — अण्।

कम्, प्रादोषम्। **(१८५९) श्वसस्तुट् च ४।३।१५।** श्वसष्ठञ् वा तुट् च। **(१८६०) द्वारादीनां च ७।३।४।** एषां न वृद्धिरैजागमश्च। शौवस्तिकम्। **(१८६१) सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ४।३।१६।** सन्धिवेलायां भवं सान्धिवेलम्। ग्रैष्मम्। तैषम्। सन्धिवेला। सन्ध्या। अमावस्या। त्रयोदशी। चतुर्दशी।

(१८५९) **श्वसस्तुट् चेति**। स्पष्टम्।

(१८६०) **द्वारादीनां च**। 'न य्वाभ्यामि'ति सूत्रं पदान्ताभ्यामिति वर्जमनुवर्तते, 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति च। तदाह — **एषामिति**। **शौवस्तिकमिति**। श्वस् इत्यव्ययात् जाताद्यर्थे 'श्वसस्तुट् चे'त्यनेन ठञि इकादेशे तुडागमे 'द्वारादीनां चे'ति वकारात्पूर्वमैजागमेन औकारे वृद्ध्यभावे च विभक्तिकार्ये 'शौवस्तिकमि'ति।

(१८६१) **सन्धिवेला**। ठञोऽपवादः। **ग्रैष्मम्** — ग्रीष्मे भवमित्यर्थेऽण् आदिवृद्धिः अकारलोपश्च।

उदाहरण—निशायां भवम् (निशा + ठञ् = 'ठ' विकल्प से, ठ = इक, इ = 'ऐ' — आदिवृद्धि, 'आ' का लोप, विभक्तिकार्य) = नैशिकम्। पक्ष में — निशा + अण् (= 'अ', आदिवृद्धि, 'आ' का लोप, विभक्तिकार्य) = नैशम् (रात्रि में होने वाला)। प्रदोषे भवम् (प्रदोष + 'ठञ्' विकल्प से, ठ = इक, आदिवृद्धि, 'आ' का लोप तथा विभक्तिकार्य) = प्रादोषिकम्। पक्ष में (अण् आदि पूर्ववत्) = प्रादोषम् (प्रदोषकाल में होने वाला)।

(१८५९) **पद**—श्वसः, तुट्, च। **अनुवृत्ति**—विभाषा, कालाट्ठञ्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—श्वस् शब्द से विकल्प से ठञ् होता है और तुट् का आगम भी होता है।

विमर्श—पूर्ववत् उल्लिखित पदों की अनुवृत्ति आ रही है। तदनुसार ''कालविशेषवाची श्वस् शब्द से वैकल्पिक ठञ् प्रत्यय तथा तुट् (= त्) का आगम होता है।''

(१८६०) **पद**—द्वारादीनाम्, च। **अनुवृत्ति**—न य्वाभ्यां पूर्वौ तु ताभ्यामैच्, किति, तद्धितेष्वचामादेः, अचो ञ्णिति, वृद्धिः, अङ्गस्य। **विधिसूत्र**।

मूलार्थ—द्वार आदि शब्दों को वृद्धि नहीं होती किन्तु यकार-वकार से पूर्व क्रमशः 'ऐच्' (ऐ, औ) का आगम होता है। शौवस्तिकम्।

विमर्श—यह सप्तमाध्यायपठित प्रासंगिक सूत्र है। कित्, ञित् तथा णित् तद्धित प्रत्ययों के सन्दर्भ में आदिवृद्धि के निषेध-प्रकरण में यह सूत्र पढ़ा गया है। 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' (७।३।३) सूत्र की अनुवृत्ति 'पदान्ताभ्याम्' पद को छोड़कर आ रही है। 'मृजेर्वृद्धिः' (७।२।११४) से 'वृद्धिः' पद की अनुवृत्ति अपेक्षित है। शेष पदों की अनुवृत्ति का प्रभाव भी विद्यमान है। तदनुसार ''द्वार आदि गणपठित शब्दों के यकार-वकार से उत्तर ञित्, णित् तथा कित् तद्धित प्रत्ययों के परवर्ती होने पर आदि अच् को वृद्धि नहीं होती; किन्तु यकार-वकार से पूर्व ऐच् (= 'ऐ' और 'औ') का आगम होता है।''

उदाहरण—श्वस् भवम् (श्वस् + ठञ् = 'ठ' तथा तुट् = 'त्' का आगम — 'श्वसस्तुट् च') — श्वस् त् ठ ('ठ' = 'इक' आदेश, आदिवृद्धि का निषेध तथा 'ऐच्' = 'व्' से पूर्व 'औ' का आगम — 'द्वारादीनां च', विभक्तिकार्य) = शौवस्तिकम् (कल होने वाला)।

(१८६१) **पद**—सन्धिवेलाद्यृतुनक्षत्रेभ्यः, अण्। **अनुवृत्ति**—कालात्, शेषे, तद्धिताः। **विधिसूत्र**।

पौर्णमासी। प्रतिपत्। **(१८६२) प्रावृष एण्यः ४।३।१७।** प्रावृषेण्यः। **(१८६३) वर्षाभ्यष्ठक् ४।३।१८।** वर्षासु साधु वार्षिकं वासः। **(१८६४) सर्वत्राण् च तलोपश्च ४।३।२२।** हेमन्तादण् तलोपश्च वेदलोकयोः। चकारात्पक्षे

(१८६२) **प्रावृष एण्यः**। ऋत्वणोऽपवादोऽयम्। **प्रावृषेण्यः** — प्रवर्षतीति प्रावृट् = वर्षर्तुः तत्र भवः इत्यर्थे एण्यप्रत्ययः।

(१८६३) **वर्षाभ्यष्ठक्**। वर्षाशब्दो नित्यं बहुवचनान्तः। वर्षाशब्दाज्जाताद्यर्थे ठगित्यर्थः।

(१८६४) **सर्वत्राणिति**। छन्दसीत्यनुवृत्तिनिवृत्त्यर्थं सर्वत्रपदग्रहणम्। 'हेमन्ताच्च' इत्यतः 'हेमन्तादि'त्यनुवर्तते। तदाह — **हेमन्तादित्यादिना**।

मूलार्थ—सन्धिवेला आदि और ऋतुवाचक तथा नक्षत्रवाचक शब्दों से अण् प्रत्यय होता है। सान्धिवेलम्। ग्रैष्मम्। तैषम्। सन्धिवेला, सन्ध्या, अमावस्या, त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपद्।

विमर्श—कालवाची शब्दों का विषय है। अतः पूर्वोक्त पदों की अनुवृत्ति आ रही है। तदनुसार — "कालविशेषवाची सन्धिवेला आदि गणपठित शब्दों तथा ऋतुवाचक एवं नक्षत्रवाचक शब्दों से अण् प्रत्यय होता है।" यह सूत्र 'कालाट्ठञ्' का अपवाद है।

उदाहरण—सन्धिवेलायां भवम् (सन्धिवेला + अण् = 'अ' — 'सन्धिवेलाद्यृतु०', आदिवृद्धि तथा 'आ' का लोप, विभक्तिकार्य) = सान्धिवेलम् (सन्ध्या में होने वाला)। ग्रीष्मे भवम् (ग्रीष्म + अण् = 'अ', आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = ग्रैष्मम् (गर्मी का)। तिष्ये भवम् (तिष्य + अण्, आदिवृद्धि, 'अ' का लोप तथा 'य्' का लोप — 'तिष्यपुष्ययोः नक्षत्राणि०') = तैषम् (तिष्य में उत्पन्न)। सन्धिवेलादि गण में ८ शब्द पढ़े गये हैं - सन्धिवेला, सन्ध्या, अमावस्या, त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपद्।

(१७६२) **पद**—प्रावृषः, एण्यः। **अनुवृत्ति**—कालात्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—प्रावृष् शब्द से 'एण्य' प्रत्यय होता है। प्रावृषेण्यः।

विमर्श—पूर्ववत् उल्लिखित अनुवृत्तियों का प्रभाव विद्यमान है। अतः "कालवाची प्रावृष् शब्द से शैषिक 'एण्य' प्रत्यय होता है।" यह पूर्वसूत्र से प्राप्त अण् का अपवाद है।

उदाहरण—प्रावृषि भवः (प्रावृष् + 'एण्य', विभक्तिकार्य) = प्रावृषेण्यः (वर्षा में होने वाला)।

(१८६३) **पद**—वर्षाभ्यः, ठक्। **अनुवृत्ति**—कालात्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—वर्षा शब्द से शैषिक 'ठक्' प्रत्यय होता है। वार्षिकं वासः।

विमर्श—पूर्ववत् अनुवृत्तियाँ आ रही हैं। अतः "वर्षा प्रातिपदिक से शैषिक अर्थ में ठक् (= क) प्रत्यय होता है।"

उदाहरण—वर्षासु साधु (वर्षा + ठक् = ठ, ठ = 'इक' आदेश, आदिवृद्धि, 'आ' का लोप) = वार्षिकं वासः (वर्षा में उपयोगी वस्त्र)।

(१८६४) **पद**—सर्वत्र, अण्, च, तलोपश्च। **अनुवृत्ति**—हेमन्तात्, कालात्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—लोक एवं वेद में (सर्वत्र) हेमन्त शब्द से अण् और ठञ् प्रत्यय और 'त्' का लोप होता है। सूत्र में चकारग्रहण से पक्ष में केवल 'अण्' भी होता है। हैमनम्, हैमन्तम्।

विमर्श—'हेमन्ताच्च' (४।३।२१) सूत्र से 'हेमन्तात्' पद की अनुवृत्ति अपेक्षित है। 'सर्वत्र' पद लोक एवं वेद दोनों का सूचक है। शेष आधिकारिक पदों की अनुवृत्ति यथापूर्व विद्यमान है।

ऋत्वण्। हेमन्ते भवं हैमन्तं वसनम्। **(१८६५) सायंचिंरप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ४।३।२३** । सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तः तयोस्तुट् च। सायं भवं सायन्तनम्। चिरन्तनम्। प्राह्णेप्रगयोरेदन्तत्वं निपात्यते। प्राह्णेतनम्। प्रगेतनम्। दोषातनम्। दिवातनम्। * चिरपरुत्परारिभ्यस्त्नो वक्तव्यः *। चिरत्नम्। परुत्नम्। परारित्नम्। * अग्रादिपश्चाड्डिमच् *। अग्रिमम्। . आदिमम्।

(१८६५) **सायंचिरम्**। **चतुर्भ्य इति**। सायं, चिरं, प्राह्णे, प्रगे इत्येभ्य इत्यर्थः। **सायन्तनम्** — सायंशब्दात् ट्युप्रत्यये ट्युल्प्रत्यये वा 'यु' इत्यस्य अनादेशे तुडागमे च अनुस्वारे परसवर्णे च कृते विभक्तिकार्ये 'सायन्तनम्' इति।

तदनुसार "हेमन्त शब्द से वैदिक तथा लौकिक प्रयोगों में अण् प्रत्यय होता है और 'त्' का लोप होता है। पक्ष में केवल अण् होता है।"

उदाहरण—हेमन्ते भवम् (हेमन्त + अण् = 'अ', 'त्' का लोप — 'सर्वत्राण०', 'अ' का लोप, आदिवृद्धि, विभक्तिकार्य) = हैमनम्। 'च' ग्रहण से (पक्ष में केवल अण्) = हैमन्तम् (हेमन्त ऋतु में होने वाला)।

(१८६५) **पद**—सायंचिरं.........अव्ययेभ्यः, ट्युट्युलौ, तुट्, च। **अनुवृत्ति**—कालात्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—सायम्, चिरम्, प्राह्णे, प्रगे और कालवाची अव्ययों से 'ट्यु' और 'ट्युल्' प्रत्यय होते हैं और 'तुट्' का आगम भी होता है। सायंतनम्। चिरंतनम्। प्राह्ण और प्रग को एदन्त निपातन होता है। प्राह्णेतनम्। प्रगेतनम्। दोषातनम्। दिवातनम्। **वा०**—चिर, परुत् और परारि से 'त्न' प्रत्यय होता है। चिरत्नम्। परुत्नम्। परारित्नम्। **वा०**—अग्र, आदि तथा पश्च से 'डिमच्' प्रत्यय होता है। अग्रिमम्। आदिमम्। पश्चिमम्। **वा०**—अन्त से भी 'डिमच्' प्रत्यय होता है। अन्तिमम्।

विमर्श—कालवाचक शब्दों का ही विषय है। अतः पूर्वसूत्र (१८५५) से 'कालात्' की अनुवृत्ति आ रही है। शेष पदों की अनुवृत्ति पूर्ववत् विद्यमान है। तदनुसार — "कालवाचक सायम्, चिरम्, प्राह्णे, प्रगे तथा अव्ययवाचक शब्दों से 'ट्यु' और 'ट्युल्' प्रत्यय होते हैं और इन प्रत्ययों को तुट् (= त्) का आगम भी होता है।" 'प्राह्ण' और 'प्रग' शब्दों को एकारान्त निपातन भी होता है।

उदाहरण—(१) सायं भवम् (सायम् + ट्यु अथवा ट्युल् = 'यु', यु = अन, तुट् = 'त्' का आगम — प्रकृत सूत्र से, 'म्' को अनुस्वार, विभक्तिकार्य) = सायंतनम् (दिन के अन्त (सायं) में हुआ)। (२) चिरं भवम् (पूर्ववत् प्रक्रिया) = चिरंतनम् (पुराना)। (३) प्राह्णे भवम् (प्राह्ण + 'ट्यु' या 'ट्युल्' = यु, यु = 'अन', तुट् = 'त्' का आगम, विभक्तिकार्य) = प्राह्णेतनम् (दिन के प्रथम प्रहर में हुआ)। (४) प्रगे जातम् (प्रगे + ट्यु, प्रक्रिया उक्तवत्) = प्रगेतनम् (प्रातः होने वाला)। (५) **अव्ययवाचक शब्द** — दोषा भवम् (दोषा + ट्यु = यु = अन, 'त्' का आगम, विभक्तिकार्य) = दोषातनम् (रात्रि में होने वाला)। (६) दिवा भवम् (प्रक्रिया उक्तवत्) = दिवातनम् (दिन में होने वाला)।

१. **वा०**—चिर, परु तथा परारि अव्ययों से जातादि अर्थ में 'त्न' प्रत्यय होता है।

उदाहरण—चिरकाले भवम् (चिर + 'त्न' — प्रकृत वार्तिक से, विभक्तिकार्य) = चिरत्नम् (प्राचीनकाल का)। परुद् भवम् (परुत् + त्न, 'त्' का लोप — 'झरो झरि सवर्णे') = परुत्नम् (गत वर्ष का)। परारि भवम् (परारि + त्न) = परारित्नम् (गत वर्ष के पहले वर्ष का)।

२. **वा०**—अग्र, आदि तथा पश्च शब्दों से डिमच् प्रत्यय होता है। **उदाहरण**—अग्रे भवम्

पश्चिमम्। * अन्ताच्च *। अन्तिमम्। (१८६६) विभाषा पूर्वाह्णापराह्णाभ्याम् ४।३।२४। आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च। पक्षे ठञ्। पूर्वाह्णेतनम्, पौर्वाह्णिकम्। अपराह्णेतनम्, आपराह्णिकम्। (१८६७) तत्र जातः ४।३।२५। सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः। स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रियः।

(१८६६) **विभाषेति। पक्षे ठञिति।** तथा सति न तुट्, तस्य ट्युट्युल्भ्यां सन्नियोग - शिष्टत्वादिति भावः।

(१८६७) **तत्र जातः।** तत्रेत्यनेन सप्तम्यन्तस्यैव ग्रहणम्। **स्रौघ्नः** — स्रुघ्ने जात इत्यर्थे

(अग्र + डिमच् = 'इम', टि का लोप, विभक्तिकार्य) = अग्रिमम् (आगे का)। आदौ भवम् (आदि + डिमच् = 'इम', टिलोप) = आदिमम् (आरम्भ का)। पश्चाद् भवम् (पश्चाद् + डिमच्, टि = 'आत्' का लोप) = पश्चिमम् (पीछे का)।

३. **वा०**—अन्त शब्द से भी 'डिमच्' प्रत्यय होता है। **उदाहरण**—अन्ते भवम् (अन्त + डिमच् = इम, टिलोप) = अन्तिमम् (अन्त का)।

(१८६६) **पद**—विभाषा, पूर्वाह्णापराह्णाभ्याम्। **अनुवृत्ति**—ट्युट्युलौ, तुट्, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—पूर्वाह्ण और अपराह्ण शब्दों से 'ट्यु' और 'ट्युल्' प्रत्यय विकल्प से होते हैं और तुट् का आगम होता है। पक्ष में ठञ्। पूर्वाह्णेतनम्, पौर्वाह्णिकम्। अपराह्णेतनम्, आपराह्णिकम्।

विमर्श—दो स्थलों पर 'ट्यु' और 'ट्युल्' प्रत्ययों का पाक्षिक विधान किया जा रहा है। अतः पूर्वसूत्र (१८६५) से विधेयांश 'ट्युट्युलौ तुट् च' की अनुवृत्ति अपेक्षित है। अन्य आधिकारिक पदों की अनुवृत्ति का प्रभाव भी विद्यमान है। तदनुसार ''कालवाचक पूर्वाह्ण और अपराह्ण शब्दों से शैषिक 'ट्यु' तथा 'ट्युल्' प्रत्यय विकल्प से होते हैं तथा उनको तुट् (= त्) का आगम भी होता है।'' पक्ष में 'कालाट्ठञ्' से ठञ् प्रत्यय होगा।

उदाहरण—पूर्वाह्णे जातम् (पूर्वाह्णे + ट्यु = 'यु', यु = अन तथा 'तुट्' = 'त्' का आगम — विकल्प से, विभक्तिकार्य) = पूर्वाह्णेतनम्। पक्ष में (पूर्वाह्ण + ठञ्, ठ = इक, आदिवृद्धि आदि) = पौर्वाह्णिकम् (दोपहर पूर्व का)। अपराह्णे जातम् (अपराह्णे + 'ट्यु' या 'ट्युल्', यु = अन, 'त्' का आगम विकल्प से, विभक्तिकार्य) = अपराह्णेतनम्। पक्ष में ठञ् होने पर — आपराह्णिकम् (दोपहर के बाद का)।

(१८६७) **पद**—तत्र, जातः। **अनुवृत्ति**—शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—सप्तम्यन्त समर्थ से जात अर्थ में अण् आदि प्रत्यय होते हैं। स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीणः।

विमर्श—सूत्रस्थ 'तत्र' पद अर्थ का निर्देशक है। यहाँ उसका अभिप्राय 'सप्तमी' विभक्ति से है। 'जातः' का अर्थ — 'उत्पन्न हुआ' है। पूर्ववत् आधिकारिक पदों की अनुवृत्ति आ रही है। अतः ''सप्तम्यन्त प्रातिपदिक से 'जातः' अर्थ में यथाविहित अपत्यादिं विकारान्तार्थ 'अण्' आदि तथा विशेष विहित 'घ' आदि प्रत्यय होते हैं।''

उदाहरण—स्रुघ्ने जातः (स्रुघ्न + अण् = 'अ' — प्रकृत सूत्र से, आदिवृद्धि, 'अ' का लोप तथा विभक्तिकार्य) = स्रौघ्नः[1] (स्रुघ्न नगर में उत्पन्न)। उत्से जातः (उत्स + अञ् = 'अ', आदिवृद्धि, 'अ'

---

[1] स्रुघ्न नगर थानेश्वर से दक्षिण-पश्चिम की ओर लगभग ५० मील पर स्थित वर्तमान सुग्ध नाम से जाना जाता है। कुछ ऐतिह्यविद् आगरा का प्राचीन नाम स्रुघ्न मानते हैं।

अवारपारीण इत्यादि। (१८६८) **प्रावृषष्ठप्** ४।३।२६। एण्यस्यापवादः। प्रावृषिकः।(१८६९) **प्रायभवः** ४।३।३९। तत्रेत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। (१८७०) **सम्भूते** ४।३।४१। स्रुघ्ने सम्भवति स्रौघ्नः। (१८७१) **कोशाड्ढञ्** ४।३।४२। कौशेयं वस्त्रम्। (१८७२) **तत्र भवः** ४।३।५३।

स्रुघ्नशब्दात् 'तत्र जातः' इत्यनेनाणि आदिवृद्धौ अकारलोपे विभक्तिकार्ये 'स्रौघ्नः' इति।

(१८६८) **प्रावृषष्ठप्**। ठपः पित्त्वं स्वरार्थम्। तत्र जात इत्यर्थे एण्यापवादः ठप् स्यादिति भावः।

(१८६९) **प्रायभवः**। प्रायभव इत्यर्थे सप्तम्यन्तादणादयो घादयश्च यथायथं स्युरित्यर्थः।

(१८७०) **सम्भूते**। सप्तम्यन्तात्सम्भूतेऽर्थेऽणादयो घादयश्च स्युरित्यर्थः।

(१८७१) **कोशाड्ढञ्**। **कौशेयम्** — कोशस्य विकार इत्यर्थे ढञ्प्रत्यये ढस्य एयादेशे ञित्वादादिवृद्धौ अकारलोपे विभक्तिकार्ये 'कौशेयमि'ति।

का लोप आदि) = औत्सः (उत्स = झरने में उत्पन्न)। राष्ट्रे जातः (राष्ट्र + 'घ' — प्रकृत सूत्र से, घ = इय, 'अ' का लोप, विभक्तिकार्य) = राष्ट्रियः (राष्ट्र में उत्पन्न)। अवारपारे जातः (अवारपार + ख, ख = ईन, 'अ' का लोप, णत्व) = अवारपारीणः (दोनों तटों पर उत्पन्न)।

(१८६८) **पद**—प्रावृषः, ठप्। **अनुवृत्ति**—तत्र, जातः, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—प्रावृष् शब्द से जात अर्थ में ठप् प्रत्यय होता है। प्रावृषिकः।

विमर्श—पूर्वसूत्र 'तत्र जातः' की अनुवृत्ति प्रमुखतया अपेक्षित है। तदनुसार ''जात अर्थ में सप्तम्यन्त समर्थ प्रावृष् शब्द से 'ठप्' प्रत्यय होता है।''

उदाहरण—प्रावृषि जातः (प्रावृष् + ठप् = ठ, ठ = इक, विभक्तिकार्य) = प्रावृषिकः (वर्षा ऋतु में पैदा हुआ)। 'ठप्' में प् इत् स्वरार्थ है। यह सूत्र 'एण्य' का अपवाद है।

(१८६९) **पद**—प्रायभवः। **अनुवृत्ति**—तत्र, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—'प्रायभव' अर्थ में सप्तम्यन्त से यथाविहित अण् आदि प्रत्यय होते हैं। स्रौघ्नः।

विमर्श—पूर्वसूत्र (१८६७) से 'तत्र' की अनुवृत्ति आती है। तदनुसार ''सप्तमीसमर्थ प्रातिपदिक से 'प्रायः होता है' अर्थ में यथाविहित अण् आदि प्रत्यय होते हैं।''

उदाहरण—स्रुघ्ने प्रायेण भवति (स्रुघ्न + अण् = 'अ', आदिवृद्धि, विभक्तिकार्य) = **स्रौघ्नः** (जो स्रुघ्न में प्रायः हो)।

(१८७०) **पद**—सम्भूते। **अनुवृत्ति**—तत्र, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—सम्भूत अर्थ में यथाविहित अण् आदि प्रत्यय होते हैं। स्रौघ्नः।

विमर्श—''सप्तमीसमर्थ प्रातिपदिक से 'सम्भव' अर्थ में यथाविहित अण् आदि प्रत्यय होते हैं।''

उदाहरण—स्रुघ्ने सम्भवति (स्रुघ्न + अण्) = स्रौघ्नः (स्रुघ्न में जो सम्भव हो)।

(१८७१) **पद**—कोशात्, ढञ्। **अनुवृत्ति**—सम्भूते, तत्र, शेषे, तद्धिताः। **विधिसूत्र**।

मूलार्थ—सप्तम्यन्त कोश शब्द से सम्भव अर्थ में ढञ् प्रत्यय होता है। कौशेयम्।

विमर्श—'तत्र' पद की अनुवृत्ति एवं 'सम्भूते' (१८७०) की अनुवृत्ति प्रमुखतया अपेक्षित है। तदनुसार ''सप्तमीसमर्थ कोश शब्द से सम्भूत (सम्भव) अर्थ में 'ढञ्' प्रत्यय होता है।''

उदाहरण—कोशे सम्भूतम् (कोश + ढञ् = ढ, ढ = 'एय' आदेश, 'अ' का लोप, आदिवृद्धि, विभक्तिकार्य) = कौशेयम् (रेशमी वस्त्र)।

स्रुघ्ने भवः स्रौघ्नः । औत्सः । राष्ट्रियः । (१८७३) दिगादिभ्यो यत् ४।३।५४ । दिश्यम् । वर्ग्यम् । (१८७४) शरीरावयवाच्च ४।३।५५ । दन्त्यम् । कण्ठ्यम् । (१८७५) दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ४।३।५६ । दार्तेयम् । कलशिर्घटः,

---

(१८७२) **तत्र भवः** । सप्तम्यन्ताद्भव इत्यर्थेऽणादयो घादयश्च यथायथं स्युरित्यर्थः ।

(१८७३) **दिगादिभ्यः** । भव इत्यर्थे सप्तम्यन्तेभ्य इत्यर्थः ।

(१८७४) **शरीरावयवाच्चेति** । भव इत्यर्थे यत्स्यादित्यर्थः ।

(१८७५) **दृतिकुक्षि०** । सप्तम्यन्तेभ्यो भव इत्यर्थे ढञ् स्यादित्यर्थः ।

(१८७२) **पद**—तत्र, भवः । **अनुवृत्ति**—शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—सप्तम्यन्त से भव अर्थ में अण् आदि प्रत्यय और घ आदि प्रत्यय होते हैं । स्रौघ्नः । औत्सः । राष्ट्रियः ।

विमर्श—पूर्ववत् सभी आधिकारिक एवं प्राकरणिक पदों की अनुवृत्ति आ रही है । तदनुसार "सप्तमीसमर्थ प्रातिपदिकों से 'भव' अर्थ में यथाविहित अण् आदि प्रत्यय होते हैं ।"

उदाहरण—स्रुघ्ने भवः (स्रुघ्न + अण्, प्रक्रिया पूर्ववत्) = स्रौघ्नः (स्रुघ्न में होने वाला) । राष्ट्रे भवः (राष्ट्र + घ) = राष्ट्रियः (राष्ट्र में होने वाला) । उत्से भवः (उत्स + अण्) = औत्सः ।

(१८७३) **पद**—दिगादिभ्यः, यत् । **अनुवृत्ति**—तत्र भवः, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—दिगादिगणपठित शब्दों से भव अर्थ में यत् प्रत्यय होता है । दिश्यम् । वर्ग्यम् ।

विमर्श—पूर्वसूत्र 'तत्र भवः' की अनुवृत्ति प्रमुखतया अपेक्षित है । अतः "सप्तम्यन्त दिश् आदि शब्दों से भव अर्थ में 'यत्' प्रत्यय होता है ।"

उदाहरण—दिशि भवम् (दिश् + यत् = 'य', विभक्तिकार्य) = दिश्यम् (दिशा में होने वाला) । वर्गे भवम् (वर्ग + यत् = 'य', अन्त्य 'अ' का लोप) = वर्ग्यम् (वर्ग या समूह में होने वाला) ।

(१८७४) **पद**—शरीरावयवात्, च । **अनुवृत्ति**—यत्, तत्र भवः, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—शरीरावयववाची शब्द से भी भव अर्थ में यत् प्रत्यय होता है । दन्त्यम् । कण्ठ्यम् ।

विमर्श—पूर्वसूत्र (१८७२) से 'तत्र भवः' की तथा सूत्र १८७३ से 'यत्' की अनुवृत्ति प्रमुखरूप से आ रही है । तदनुसार "सप्तम्यन्तसमर्थ शरीर के अवयववाचक शब्दों से भी भव अर्थ में 'यत्' प्रत्यय होता है ।"

उदाहरण—दन्तेषु भवम् (दन्त + यत् = 'य', 'अ' का लोप) = दन्त्यम् (दाँतों में होने वाला) । कण्ठे भवम् (कण्ठ + यत्, 'अ' का लोप) = कण्ठ्यम् (गले में होने वाला) ।

(१८७५) **पद**—दृतिकुक्षिकलशिवस्त्यस्त्यहेः, ढञ् । **अनुवृत्ति**—तत्र भवः, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—सप्तम्यन्त दृति, कुक्षि, कलशि, वस्ति, अस्ति और अहि शब्दों से भव अर्थ में ढञ् प्रत्यय होता है । दार्तेयम् । कालशेयम् । वास्तेयम् ।

विमर्श—उल्लिखित अनुवृत्तियों का प्रभाव विद्यमान है । तदनुसार — "सप्तमीसमर्थ दृति आदि शब्दों से भव अर्थ में शैषिक ढञ् प्रत्यय होता है ।"

उदाहरण—दृतौ भवम् (दृति + ढञ् = ढ, ढ = 'एय' आदेश, आदिवृद्धि, रपर, 'इ' का लोप, विभक्तिकार्य) = दार्तेयम् (मशक में होने वाला) । कलशौ भवम् (कलशि + ढञ् = ढ, ढ = एय, आदिवृद्धि, इकारलोप) = कालशेयम् (घड़े में रहने वाला) । वस्तौ भवम् (वस्ति + ढञ्, ढ = एय, आदिवृद्धि, इकारलोप) = वास्तेयम् (पेड़ू में होने वाला) ।

तत्र भवं कालशेयम् । वास्तेयम् । (१८७६) ग्रीवाभ्योऽण् च ४।३।५७ । चात् ढञ् । ग्रैवेयम्, ग्रैवम् । (१८७७) गम्भीराञ्ज्यः ४।३।५८ । गम्भीरे भवं गाम्भीर्यम् । (१८७८) अव्ययीभावाच्च ४।३।५९ । परिमुखे भवं पारिमुख्यम् । *परिमुखादिभ्य एवेष्यते* । नेह – औपकूलः । (१८७९) अन्तःपूर्वपदाट्ठञ्

(१८७६) **ग्रीवाभ्योऽण् चेति** । 'शरीरावयवाच्च' इति यतोऽपवादः । ग्रीवाशब्दोऽयं धमनीसङ्घेऽर्थे वर्तते । तत्र उद्भूतावयवभेदसङ्घविवक्षायां बहुवचनान्तात्प्रत्यय इति सूचयितुं बहुवचनं सूत्रे प्रयुक्तम् ।

(१८७७) **गम्भीराञ्ज्यः** । **गाम्भीर्यमिति** । गम्भीरशब्दात् ञ्यप्रत्यये ञित्त्वादादिवृद्धौ 'यस्येति चे'त्यकारलोपे विभक्तिकार्ये 'गाम्भीर्यमि'ति ।

(१८७८) **अव्ययीभावाच्च** । 'ञ्य' इति शेषः ।

(१८७६) **पद**—ग्रीवाभ्यः, अण्, च । **अनुवृत्ति**—ढञ्, तत्र भवः, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—सप्तम्यन्त ग्रीवा शब्द से भव अर्थ में अण् प्रत्यय होता है और ढञ् प्रत्यय भी । ग्रैवेयम्, ग्रैवम् ।

विमर्श—सूत्रस्थ 'च' से पूर्व प्रत्यय 'ढञ्' (१८७५) का अनुकर्षण होता है । अन्य प्राकरणिक पदों की अनुवृत्ति का प्रभाव यथापूर्व विद्यमान है । तदनुसार — "सप्तमीसमर्थ ग्रीवा शब्द से भव अर्थ में 'अण्' और 'ढञ्' प्रत्यय होते हैं ।" ग्रीवा शब्द 'धमनी' का वाचक है, उनके बहुत होने से सूत्र में बहुवचन का प्रयोग किया गया है ।

उदाहरण—ग्रीवासु भवम् (ग्रीवा + अण् = 'अ' — प्राप्त 'यत्' का बाधकर 'ग्रीवाभ्योऽण् च', आदिवृद्धि, 'आ' का लोप, विभक्तिकार्य) = ग्रैवम् । च ग्रहण से ढञ् — ग्रीवा + ढञ् (= ढ, ढ = एय, आदिवृद्धि, 'आ' का लोप) = ग्रैवेयम् (धमनियों में रहने वाला) ।

(१८७७) **पद**—गम्भीरात्, ञ्यः । **अनुवृत्ति**—तत्र भवः, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—गम्भीर शब्द से भव अर्थ में 'ञ्य' प्रत्यय होता है । गाम्भीर्यम् ।

विमर्श—पूर्वसूत्र (१८७२) से 'तत्र भवः' की अनुवृत्ति प्रमुखतया अपेक्षित है । तदनुसार — "सप्तमी समर्थ गम्भीर शब्द से भव अर्थ में 'ञ्य' प्रत्यय होता है ।"

उदाहरण—गम्भीरे भवम् (गम्भीर + ञ्य = 'य', आदिवृद्धि एवम् अन्त्य 'अ' का लोप, विभक्तिकार्य) = गाम्भीर्यम् (गहराई में होने वाला) ।

(१८७८) **पद**—अव्ययीभावात्, च । **अनुवृत्ति**—ञ्यः, तत्र भवः, शेषे, तद्धिताः । **विधिसूत्र** ।

मूलार्थ—अव्ययीभाव से भव अर्थ में ञ्य प्रत्यय होता है । पारिमुख्यम् ।

वा०—परिमुखादि से ही ञ्य प्रत्यय इष्ट है । अतः यहाँ नहीं — औपकूलः ।

विमर्श—सूत्रस्थ चकार पूर्वसूत्र (१८७६) से 'ञ्यः' की अनुवृत्ति का सूचक है । शेष उल्लिखित प्राकरणिक पदों की अनुवृत्ति का प्रभाव है । अतः "सप्तमीसमर्थ अव्ययीभावसंज्ञक शब्द से भवार्थ में ञ्य प्रत्यय होता है ।"

उदाहरण—परिमुखं भवम् (परिमुख + ञ्य = 'य', आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = पारिमुख्यम् (उपस्थिति या सामीप्य) । **वा०**—"परिमुख आदि शब्दों से ही ञ्य प्रत्यय होता है ।" अतः 'कुलस्य समीपम् उपकुलम्, तत्र भवः' अर्थ में 'ञ्य' प्रत्यय नहीं होता — उपकुल + अण् = औपकुलः (कुल के समीप होने वाला) ।

४।३।६० । अव्ययीभावादित्येव । वेश्मनि इति अन्तर्वेश्मम्, तत्र भवम् आन्तर्वेश्मिकम् । आन्तर्गणिकम् । * अध्यात्मादेष्ठञिष्यते * । अध्यात्मं भवम् आध्यात्मिकम् । (१८८०) अनुशतिकादीनां च ७।३।२० । एषामुभयपदवृद्धिर्ञिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । आकृतिगणो-

---

(१८७९) **अन्त इति । अन्तर्वेश्ममिति ।** विभक्त्यर्थेऽव्ययीभाव: । समासान्तष्टच् टिलोप: अन्तर्वेश्म इति । ततो भवार्थे ठञि, ठस्येकादेशे आदिवृद्धि: **आन्तर्वेश्मिकमिति** ।

(१८८०) **अनुशतिकादीनामिति ।** आदिवृद्धिप्रकरणे उत्तरपदस्य, पूर्वपदस्य चेत्यधिकारे सूत्रमिदं पठितम् । अत आह — **एषामिति** ।

(१८७९) **पद**—अन्त:पूर्वपदात्, ठञ् । **अनुवृत्ति**—अव्ययीभावात्, तत्र भव:, शेषे, तद्धिता: । **विधिसूत्र** ।

मूलार्थ—अन्त: पूर्वपद अव्ययीभाव से भव अर्थ में ठञ् प्रत्यय होता है । आन्तर्वेश्मिकम् । आन्तर्गणिकम् । **वा०**—अध्यात्म आदि शब्दों से भव अर्थ में ठञ् प्रत्यय होता है । आध्यात्मिकम् ।

विमर्श—अव्ययीभाव का ही विषय होने से पूर्वसूत्र (१८७८) से 'अव्ययीभावात्' की अनुवृत्ति आती है । 'तत्र भव:' (१८७२) आदि की अनुवृत्ति पूर्ववत् विद्यमान है । अत: "सप्तमीसमर्थ अव्ययीभावसंज्ञक शब्दों से भव अर्थ में ठञ् प्रत्यय होता है ।"

उदाहरण—वेश्मनि इति अन्तर्वेश्मम्, तत्र भवम् (अन्तर्वेश्म + ठञ् = ठ, ठ = इक, आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = आन्तर्वेश्मिकम् (मकान के अन्दर होने वाला) । अन्तर्गणं भवम् (अन्तर्गण + ठञ् = ठ, ठ = इक, आदिवृद्धि, 'अ' का लोप) = आन्तर्गणिकम् (गण या समूह के अन्दर होने वाला) ।

वा०—अध्यात्म आदि शब्दों से भवार्थ में ठञ् प्रत्यय इष्ट है । **उदाहरण**—आत्मनि इति अध्यात्मम्, तत्र भवम् (अध्यात्म + ठञ् = 'ठ' वार्तिक से, ठ = इक, आदिवृद्धि, 'अ' का लोप) = आध्यात्मिकम् (आत्मसम्बन्धी) ।

(१८८०) **पद**—अनुशतिकादीनां, च । **अनुवृत्ति**—पूर्वपदस्य, उत्तरपदस्य, किति, तद्धितेष्वचामादे:, किति, वृद्धि:, अङ्गस्य । **विधिसूत्र** ।

मूलार्थ—ञित्, णित् और कित् प्रत्यय परे रहते अनुशतिकादिगणपठित शब्दों में उभयपदवृद्धि होती है । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । यह आकृतिगण है ।

विमर्श—यह वृद्धिप्रकरण का सूत्र है । अत: उक्त पदों की अनुवृत्ति आ रही है । अनुशतिकादि आकृतिगण है । इसमें अनुशतिक, अधिदेव, अधिभूत, इहलोक तथा परलोक आदि शब्दों का समावेश है । तदनुसार — "ञित्, णित् तथा कित् तद्धित प्रत्ययों के परवर्ती रहने पर अनुशतिक आदि अङ्गों के पूर्वपद तथा उत्तरपद दोनों के अचों में आदि अच् को भी वृद्धि होती है ।"

उदाहरण—देवेषु इति अधिदेवम्, तत्र भवम् (अधिदेव + ठञ् = ठ — 'अध्यात्मादेष्ठञिष्यते'-वा०', 'ठ' = 'इक' आदेश, उभयपद आदिवृद्धि) — आधिदैव + इक (अन्त्य 'अ' का लोप, विभक्तिकार्य) = आधिदैविकम् (ईश्वर में होने वाला) । भूतेषु इति अधिभूतम्, तत्र भवम् (अधिभूत + ठञ्, ठ = इक, उभयपदवृद्धि एवं 'अ' का लोप) = आधिभौतिकम् (प्राणियों या पदार्थों में होने वाला) । इहलोके भवम् (इहलोक + ठञ् = ठ, ठ = इक, उभयपदवृद्धि, 'अ' का लोप) = ऐहलौकिकम् (इस लोक में होने वाला) । परलोके भवम् (परलोक + ठञ्, प्रक्रिया उक्तवत्) = पारलौकिकम् (परलोक में होने वाला) ।

ज्यम्। (१८८१) जिह्वामूलाङ्गुलेश्छः ४।३।६२। जिह्वामूलीयम्। अङ्गुलीयम्। (१८८२) वर्गान्ताच्च ४।३।६३। कवर्गीयम्। (१८८३) तत आगतः ४।३।७४। स्रुघ्नादागतः स्रौघ्नः। (१८८४) ठगायस्थानेभ्यः ४।३।७५।

(१८८१) **जिह्वामूलेति।** 'शरीरावयवाच्चे'ति यतोऽपवादोऽयम्।

(१८८२) **वर्गान्ताच्च।** छ इति शेषः।

(१८८३) **तत आगतः।** 'तत आगतः' इत्यर्थे पञ्चम्यन्ताद् यथायथं प्रत्ययाः स्युरित्यर्थः।

(१८८४) **ठगायस्थानेभ्यः।** तत आगत इत्यर्थे इति शेषः। हट्टादिषु स्वामिग्राह्यो भागः आयः। स यस्मिन् गृह्यते तदायस्थानम्, तद्वाचिभ्यः ठक् स्यादित्यर्थः।

(१८८१) **पद**—जिह्वामूलाङ्गुलेः, छः। **अनुवृत्ति**—तत्र भवः, शेषे, तद्धिताः। **विधिसूत्र।**

मूलार्थ—जिह्वामूल और अङ्गुलि शब्द से भव अर्थ में छ प्रत्यय होता है। जिह्वामूलीयम्। अङ्गुलीयम्।

विमर्श—यहाँ 'तत्र भवः' (१८७२) की अनुवृत्ति प्रमुखतया अपेक्षित है। तदनुसार — "सप्तमीसमर्थ जिह्वामूल तथा अङ्गुलि शब्दों से भव अर्थ में 'छ' प्रत्यय होता है।"

उदाहरण—जिह्वामूले भवम् (जिह्वामूल + छ, छ = ईय, अन्त्य 'अ' का लोप) = जिह्वामूलीयम् (जिह्वामूल में होने वाला)। अङ्गुल्यां भवम् (अङ्गुलि + छ, छ = ईय, शेष कार्य उक्तवत्) = अङ्गुलीयम् (अँगूठी)।

(१८८२) **पद**—वर्गान्तात्, च। **अनुवृत्ति**—छः, तत्र भवः, शेषे, तद्धिताः। **विधिसूत्र।**

मूलार्थ—वर्गान्त शब्दों से भी छ प्रत्यय होता है। कवर्गीयम्।

विमर्श—'तत्र भवः' तथा अन्य प्राकरणिक अनुवृत्तियों का प्रभाव विद्यमान है। पूर्वसूत्र (१८८१) से विधेयांश 'छ' की अनुवृत्ति आती है। तदनुसार — "सप्तमीसमर्थ वर्गशब्दान्त शब्दों से भी भवार्थ में छ प्रत्यय होता है।"

उदाहरण—कवर्गे भवम् (कवर्ग + छ, छ = ईय, अन्त्यलोप, विभिक्तिकार्य) = कवर्गीयम् (कवर्ग में होने वाला)।

(१८८३) **पद**—ततः, आगतः। **अनुवृत्ति**—शेषे, तद्धिताः। **विधिसूत्र।**

मूलार्थ—पञ्चम्यन्त से आगत अर्थ में अण् आदि प्रत्यय होते हैं। स्रौघ्नः।

विमर्श—सूत्रस्थ 'ततः' पद पञ्चम्यन्त का सूचक है। 'आगतः' का अर्थ 'आया हुआ' है। अतः "पञ्चम्यन्त समर्थ शब्दों से 'आया हुआ' अर्थ में यथाविहित अण् आदि प्रत्यय होते हैं।"

उदाहरण—स्रुघ्नात् आगतः (स्रुघ्न + अण् = 'अ', 'तत आगतः', आदिवृद्धि, 'अ' का लोप, विभक्तिकार्य) = स्रौघ्नः (स्रुघ्न से आया हुआ)।

(१८८४) **पद**—ठक्, आयस्थानेभ्यः। **अनुवृत्ति**—तत आगतः, शेषे, तद्धिताः। **विधिसूत्र।**

मूलार्थ—आयस्थानवाची पञ्चम्यन्त से आगत अर्थ में 'ठक्' प्रत्यय होता है। शौल्कशालिकः।

विमर्श—पूर्वसूत्र 'तत आगतः' की अनुवृत्ति प्रमुखतया अपेक्षित है। तदनुसार "पञ्चमीसमर्थ आय (= कर) स्थानवाची शब्दों से 'आगत' अर्थ में ठक् प्रत्यय होता है।"

